Almira-1
Shelf-4
25

भविष्यपुराणं

४२७५ मूल्य रु ५००/-

॥ स्वस्ति श्री भविष्यपुराण प्रारंभ ॥

२६६०

॥ भा.पु. ॥
॥ १ ॥

श्रीगणेशाय नमः ॥ ॥ श्रीसरस्वत्यै नमः ॥ ॐ नमो भगवते वासुदेवाय ॥ ॥ कल्याणानि ददातु वो गणपतिर्यस्मिन्नतुष्टे सति क्षोदीयस्यपि कर्मणि प्रभवितुं ब्रह्मापि जिह्मायते ॥ भेजे यच्चरणारविन्दमसकृत्सौभाग्यभाग्योदयैस्तेनैषा जगति प्रसिद्धिमगमद्देवेन्द्रलक्ष्मीरपि ॥ १ ॥ शाम्भव्यप्यहिरण्यगर्भरसनासिंहासनाध्यासिनी सेयं वागधिदेवता वितरतु श्रेयांसि भूयांसि वः ॥ यत्पादामलकोमलाङ्गुलिनखज्योत्स्नाभिरुद्वेल्लितः शान्तब्रह्मसुधांबुधिर्विधमनन्तस्वच्छं खेलं खेलति ॥ २ ॥ नमस्तस्मै विश्वोदयविलयरक्षाप्रकृतये शिवाय क्लेशौघच्छिदुरपदपद्मप्रणतये । अमन्दस्वच्छन्दं प्रथितपृथुलीलातनुभृते त्रिवेदीवाचामप्यपथनिजतत्त्वस्थितिकृते ॥ ३ ॥ यस्याङ्गणाङ्गणतले भाति विमलाबद्धपदावली ॥ अक्षमालेव विमला मनः पायाद्गणाधिपः ॥ ४ ॥ ॐ नमो वासुदेवाय सशार्ङ्गाय सकेतवे ॥ सगदाय सचक्राय सशङ्खाय नमो नमः ॥ ५ ॥ नमः शिवाय सोमाय सगणाय ससूनवे ॥ सवृषाय सशूलाय सकपालाय सेन्दवे ॥ ६ ॥ शिवं ध्यात्वा हरिं स्तुत्वा प्रणम्य परमेष्ठिनम् ॥ चित्रभानुं च भानुं च नत्वा ग्रन्थमुदीरयेत् ॥ ७ ॥ दृष्ट्वाभिषिक्तं धर्मज्ञं धर्मपुत्रं युधिष्ठिरम् ॥ द्रष्टुमभ्यागता हृष्टा व्यासाद्याः परमर्षयः ॥ ८ ॥ मार्कण्डेयः समाण्डव्यः शाण्डिल्यः शाकटायनः गौतमो गालवो गार्ग्यः शातातपपराशरौ ॥ ९ ॥ जामदग्न्यो भरद्वाजो भृगुर्भागुरिरेव च ॥ उत्तङ्कः शङ्खलिखितौ शौनकः

॥ राम ॥
॥ १ ॥

१ पापशंकितम् ७ २ विनयप्रणत ६०।७ ३

शाकटायनिः ॥ १० ॥ उत्तङ्कः पुलहो दाल्भ्यो बृहदश्वः सलोमशः ॥ नारदः पर्वतो जन्तूरर्यांवसुपरावसुः ॥ ११ ॥ तानृषीना-
गतान्दृष्ट्वा वेदवेदाङ्गपारगान् ॥ भक्तिमान्भ्रातृभिः सार्द्धं कृष्णाधौम्यपुरःसरः ॥ १२ ॥ युधिष्ठिरः संप्रहृष्टः समुत्थायाभिवा-
द्य ॥ अर्घ्यमाचमनं पाद्यमासनानि स्वयं ददौ ॥ १३ ॥ उपविष्टेषु तेष्वेव तपस्विषु युधिष्ठिरः ॥ विनयावनतो भूत्वा आसंव-
चनमब्रवीत् ॥ १४ ॥ भगवंस्त्वत्प्रसादेन प्राप्तं राज्यं महन्मया ॥ विक्रम्य निहताः सर्वे सानुबंधाः सुयोधनाः ॥ १५ ॥ सरोगस्य
यथा भोगः प्राप्तोऽपि न सुखावहः ॥ हत्वा ज्ञातींस्तथा राज्यं न सुखं प्रतिभाति मे ॥ १६ ॥ यत्सुखं पावनं प्रीतिर्वनमूलफलाशिना-
म् ॥ प्राप्य गां च हता ज्ञातिं न नन्दन्ति पितामह ॥ १७ ॥ यो नो बन्धुर्गुरुर्गोप्ता सदा शर्म च वर्म च ॥ स मया राज्यलोभेन भीष्मः पा-
पेन घातितः ॥ १८ ॥ अविवेकमहद्ध्वान्ते मनो मे पापपंकिलम् ॥ क्षालयित्वा नवगिरा वक्तुं दर्शितवारिणा ॥ १९ ॥ संश्रुतानि
पुराणानि वेदाः सांगा मया विभो ॥ ममाद्य धर्मसर्वस्वं प्रज्ञादीपेन दर्शय ॥ २० ॥ एते सधर्मगोप्तारो मुनयः समुपागताः ॥ पि-
बंतो नेत्रभ्रमरैर्भवतो मुखपंकजम् ॥ २१ ॥ सर्वशास्त्राणि यावंति धर्मशास्त्राणि यानि वै ॥ श्रुतानि सर्वशास्त्राणि भीष्माद्भा-
गीरथीसुतात् ॥ २२ ॥ स्वर्गं गते शान्तनवे भवान्कृष्णोऽथ यादवः ॥ सुहृत्त्वाद्बंधुभावाच्च तातस्त्वं शिक्षयिता मम ॥ २३ ॥ स त्वं
सत्यवतीसूनुर्द्धर्मराजाय वक्ष्यति ॥ विशेषधर्मानखिलान्मुनीनामविशेषतः ॥ २४ ॥ व्यास उवाच ॥ यदारख्येयं तदाग्रोते

ज्ञानदीपेन ६।पा० ४ सेवम ६।पा०२

दुःखितलोकशोकः ५ ४ धर्मतत्त्वार्थकोविदः २

मयाभीष्मेणतेऽनघ॥ मार्कण्डेयेनधौम्येनलोमशेनमहर्षिणा॥ २५॥ धर्मज्ञोह्यसिमेधावीगुणवान्स्वात्मसत्तमः॥ नतेऽस्त्यवि
दितंकिंचिद्धर्माधर्मविनिश्चये॥ २६॥ पार्श्वस्थितेहृषीकेशेकृष्णेवेकेशिसूदने॥ कस्त्वविकत्थनेजिह्मान्तत्रसंपरिवर्त्तते॥ २७॥ के
नापालयितामर्त्त्याञ्जगतांयोजगन्मयः॥ प्रत्यक्षदर्शीसर्वस्यधर्मान्वक्ष्यस्यमौनव॥ २८॥ समादिष्टोऽतिकर्त्तभंभगवान्बादराय
णः॥ पूजितःपाण्डुतनयैर्जगामस्वतपोवनम्॥ २९॥ स्वामाभाव्यभारतविधातरिसंप्रयातेतेकौन्तकाकुलधियोमृतनयःप्रशा
न्ताः॥ किंपृच्छतिक्षपितमानैतलोकशोकः किंवक्ष्यतीहभगवान्मृदवेदवीरः॥ ३०॥ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्व
णिआसमागमनवर्णनंनामप्रथमोऽध्यायः॥ १॥ ॥ युधिष्ठिरउवाच॥ कस्यज्ञातिष्ठानिर्दिष्टाकोहेतुःकिंपरायणम्॥ कस्मि
मन्नेतःप्रयंयातिकस्मात्प्रभवतेजगत॥ १॥ कतिद्वीपाःसमुद्राश्चकियंतोऽथकुलाचलाः॥ कियत्प्रमाणामवनिर्भुवनानि
कियंतिच॥ २॥ श्रीकृष्णउवाच॥ पुराणश्चैवविषयायेत्वपृष्टोःहंत्वयानघ॥ श्रुतोऽन्नभूतभ्रमयासंसारेसुचिरंतावरम्॥ २
अजायविश्वरूपायनिर्गुणायगुणात्मने॥ नमस्तस्मैभगवतेवासुदेवायवेधसे॥ ४॥ अत्रतेवर्णयिष्यामिक्रमणपार्थपुरा
तनम्॥ याज्ञवल्क्येनमुनिनाभविष्यंभास्वतोदितः॥ ५॥ एषोऽप्यनंतरंप्रादादविभ्यापतत्त्वपाश्चातम्॥ धन्यंयशस्यमायुष्यं
सर्वाघ्नभविनाशनम्॥ ६॥ भविष्योत्तरमेतत्तेकथयामियुधिष्ठिर॥ एकोत्मकंत्रिदैवसंवतःपंचवलक्षणम्॥ ७॥ गुणका

सर्वात्मकम् १

६ वकार्णाय ५ ७ वदतामया ४

2

५ सात्विकात् ८

लादिभेदेन सदसत्त्वं प्रदर्शितम् ॥ एक एव जगद्योनिः प्रतियोनिषु संस्थितः ॥ ८ एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ प्र
लाविलेर्वृषांकश्चत्रयोदेवाः सतांमता ॥ ९ ॥ नामभेदैः क्रियाभेदैर्भिद्यन्ते नात्मनात्वयम् ॥ प्रक्रिया चानुषङ्गश्च उपोद्घातस्त
थैव च ॥ १० ॥ उपसंहार इत्येतच्चतुष्पादं प्रकीर्तितम् ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ॥ ११ ॥ वंशानुचरितं चैव पुरा
णं पंचलक्षणम् ॥ एष वक्तव्यविषयः सुमहान्प्रतिभाति मे ॥ १२ ॥ तथाप्युद्देशतो वक्ष्ये सर्गं प्रति तवानघ ॥ महदादिविशे
षान्तं सवैरूप्यं सलक्षणम् ॥ १३ ॥ पञ्चप्रमाणं षट्कुक्षं पुरुषाधिष्ठितं जगत् ॥ अव्यक्ताज्जायते बुद्धिर्महानिति च सा स्मृ
ता ॥ १४ ॥ अहंकारस्तु महतस्त्रिगुणः सम्प्रपद्यते ॥ तन्मात्राणि च पंचाप्यहंकारात्सान्विकौत ॥ १५ ॥ जातानि तेभ्यो भूतानि
भूतेभ्यः सचराचरम् ॥ जलमग्निमयेविप्रोनिष्ठे स्थावरजंगमे ॥ १६ ॥ भूतात्मकमभूदण्डं महान्तमुदकेशयम् ॥ स्वेच्छा स्वेच्छात्मा
शात्मा च निर्भिन्नं तदण्डमभवद्द्विधा ॥ १७ ॥ भूकपालमथैकं तद्द्वितीयमभवन्नभः ॥ उल्वं तस्याभवन्मेरुर्जरायुः पर्वताः स्मृताः
१८ ॥ नद्यो धमन्यः संजाताः क्लेदः सर्वत्रैगोपमः ॥ योजनानां सहस्राणि षोडशाधः प्रतिष्ठितः ॥ १९ ॥ अस्यैव चतुराशीति द्वात्रिंशद्
६ र्ध्वं विस्तृतः ॥ कर्णिपद्भुजविस्तीर्णा कर्णिका मेरुरुच्यते ॥ २० ॥ आदित्यश्चादिदेवत्वात् गर्भस्त्रिगुणात्मकः ॥ जातः प्रजापतिरसौ
मध्याद्वै विश्वसृष्ट्यते ॥ २१ ॥ हृदो७पद्मगर्भसमये सम्भूतः स्विधामय ॥ जातः प्रजापतेर्ज्ञाता न तयोर्नवमानवाः७ ॥ २२ ॥ मरीचिर

६ र्ध्वविस्तृत २ ॥ सर्वगतम् २ ७ मानसाः १

॥ भ.पु ॥
॥ ३ ॥

आंगिरसो पुलस्त्यः पुलहः क्रतु ॥ भृगुर्वसिष्ठ दक्षश्च नारदो नवमः स्मृतः ॥ २३ ॥ नव ब्रह्माण इत्येष पुराणे निश्चयः स्मृतः ॥ अंगु
ष्ठाद्दक्षिणाद्दक्षः संजज्ञे कमलोद्भवात ॥ २४ ॥ वामाङ्गुष्ठात्तिहृदगाद्धृष्टा तौ च दंपती ॥ ताभ्यां जातास्तु तनया हर्यश्वास्ते विना
शिताः ॥ २५ ॥ सृष्टिं पुनः समुत्पन्ना नारदेन महात्मना ॥ दक्षः स्त्रीणान्तु तान्वीक्ष्य जनयामास कन्यकाः ॥ २६ ॥ पंचाशद्दश
विख्याताः तन्यायातामभिः स्मृताः ॥ ददौ स दश धर्माय कश्यपाय त्रयोदश ॥ २७ ॥ कालस्य नयने युक्ताः सप्तविंशति चेंद
वे ॥ द्वे प्रादाद्वाऽपुत्राय द्वे कृशाश्वाय चैव हि ॥ २८ ॥ रूपयौवनशालिन्यश्चतस्रोऽरिष्टनेमिने ॥ एकांभ्रगोर्भवायैकां प्रादात्ते
भ्यश्चराचर ॥ २९ ॥ अभवंस्तूरूपवत्याप्रभृतयस्सम्भवन्तुविधः ॥ गैराजमथ तैकुराटं कैलासमिति नामतः ॥ ३० ॥ मेरोः शृंगंत्र
यं मर्धिव्रसविजृम्भितालयम् ॥ प्राचीदिक्क्रमयोगेन तेषां पार्श्वे पुरः स्मृताः ॥ ३१ ॥ इन्द्रादिलोकपालानां दिक्ष्वैः स्वर्लक्ष्म
णोधृता ॥ हिमवान्हेमकूटश्च निषधो मेरुरेव च ॥ ३२ ॥ नीलः श्वेतस्तथा शृंगी जम्बूद्वीपे कुलाचलाः ॥ जम्बूद्वीपप्रमाणेन
सहस्राणि तं शतम ॥ ३३ ॥ मिथ्यते न वधासौः पिवर्षभेदेन भारत ॥ जम्बूशाककुशक्रौञ्चशाल्मगोमेदपुष्कराः ॥ ३४ ॥ द्वी
पाः सप्तसमाख्याताः समुद्रैः सप्तभिर्वृताः ॥ क्षारक्षीरेक्षुसुरयादध्नाचैव घृतेन च ॥ ३५ ॥ स्वादूदकेन चरमं तौर्द्धिगुणोद्धिगु
णोस्तथा ॥ भूर्लोकोऽथ भुवर्लोकः स्वर्महर्जनस्तपि ॥ ३६ ॥ तपः सत्यश्च कथिताः पार्थ सप्तस्थलपा ॥ महानलोऽभ्रमितलः सु

॥ रामः ॥
॥ ३ ॥

3

तलो वितलस्मृत॥ ३७ ॥ रसातलञ्च विज्ञेयः सप्तमञ्च तलातलः॥ हिरण्याक्षप्रमुखो दानवेन्द्रा महोरगाः॥ ३८ ॥ वसंत्येतेषु
कौन्तेय सिद्धाश्च ऋषयश्च ये॥ स्वायंभुवो मनुः पूर्वं ततः स्वारोचिषो ऽभवत॥ ३९ ॥ उत्तमस्तामसश्चैवतश्चाक्षुषेतिषट्
॥ वैवस्वतो ऽयमधुनावर्त्तते मनुरुत्तमः॥ ४० ॥ यस्य पुत्रैः प्रपौत्रैश्च विभक्तेयं वसुंधरा॥ आदित्या वसवो रुद्रा एकादश
समाश्विनौ॥ ४१ ॥ उपस्तृयः समाख्याता देवा वैवस्वते ऽन्तरे॥ विप्रचित्तिहिरण्याख्यौ दैत्यदानवसत्तमौ॥ ४२ ॥ तयोर्वं
शे तु वह्वो दैत्यदानवसत्तमाः॥ पंचाशद्गणिताकोटि योजनानां महत्तया॥ ४३ ॥ सप्तद्वीपसमुद्राद्याः प्रमाणमव
नेः स्मृतम्॥ पिण्डेन च सहस्राणि सप्ततिर्जलमध्यतः॥ ४४ ॥ गौरिवेयास्तुमहती मज्जते नवलीयते॥ लोकालोकः पर
तरः पर्वतो ऽग्रमहोच्छ्रयः॥ ४५ ॥ दिनमं सनियतो यो ऽसौ रश्मिरूत्वामपि॥ नैमित्तिकः प्राकृतिकस्तथैवात्यंतिको ल
यः॥ ४६ ॥ नित्यश्च तुर्यो विज्ञेयः कालो नित्यापहारकः॥ उत्पद्यते स्वयं यस्मात् तस्मिन्नेवलीयते॥ ४७ ॥ रश्मितिश्च परे पुं
सि भूतानामेष निश्चयः॥ यथर्त्तावृतुलिंगानि नानारूपाणि पर्यये॥ ४८ ॥ दृश्यंते तानि तान्येव तथाभावा युगादिषु॥
प्रतिलीनेषु भूतेषु विष्णुः सकलं जगत्॥ ४९ ॥ वेदशास्त्रेभ्य एवादौ निर्ममे स महेश्वरः॥ हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृता
नृते॥ ५० ॥ तेतं विनापुपद्यंते पुत्तस्तेष्वेवकर्मसु॥ भूर्दशगुणेन पयसा संवृतान्तञ्च तेजसा॥ ५१ ॥ तेजो ऽनिलेन नभसा

॥ भ·पु ॥
॥ ५ ॥

तद्गतोनानिलोवृतः ॥ भूतादिना तथाकाशं भूतादिर्महतावृतः ॥ ५२ ॥ महान्परिवृतस्तेनपुरुषेणाविनाशिना ॥ ए
वंविधानसंख्यानां सहस्राणि शतानि च ॥ ५३ ॥ उत्पन्नानि विनष्टानि भावितानि महात्मना ॥ ५४ ॥ वैकुंठकोष्ठग
तमेतच्छेषनायां ख्यातं जगत्सुरनरोरगसिद्धनष्टम् ॥ पश्यंति भक्तमनयो वहिरंतरे च मायायावराचरगैरपरैव
काचित ॥ ५५ ॥ इति श्रीभविष्ये महापुराणे उत्तरे पर्वणि ब्रह्माण्डोत्पत्तिवर्णनं नाम द्वितीयोऽध्यायः ॥ २ ॥
युधिष्ठिर उवाच ॥ कीदृशी कृष्ण सा माया विष्णोरमिततेजसः ॥ यया व्यामोहितं यच्च जगदेतच्चराचरम् ॥ १ ॥
श्रीकृष्ण उवाच ॥ येन द्वीपे पुरा विष्णुरास्ते चक्रगदाधरः ॥ वासुदेवः सगरुडः स्वच्छकक्ष्यश्रियासह ॥ २ ॥ नीलोत्पल
दलश्यामः ॥ कुंडलाभ्यां विभूषितः ॥ भ्राजते मुकुटोष्णीतकेयूरवनमालया ॥ ३ ॥ तस्य द्रष्टुमथाप्यागान्नारदो मुनि
सत्तमः ॥ प्रणम्य स्तुतिभिर्देवं प्राहेदं विस्मयान्वितः ॥ ४ ॥ संशयं परिपृच्छामि भगवन्वक्तुमर्हसि ॥ का माया कीदृ
शी माया किंरूपा चकृतस्तथा ॥ ५ ॥ तस्या दर्शय मे रूपं मायायाः पुरुषोत्तम ॥ यया मोहयते सर्वं त्रैलोक्यं सचराचर
म् ॥ ६ ॥ आब्रह्मस्तंवपर्यंतं स देवासुरमानुषम् ॥ वैकुंठं वासुदेवं च प्रसादं कर्तुमर्हसि ॥ ७ ॥ एवमुक्तस्तु मुनिना देव
देवो जनार्दनः ॥ प्रहस्योवाच देवर्षिं न कार्यं मायया त्वया ॥ ८ ॥ भक्तोऽपि मोहयामास ससोमग्राहेण नारदम् ॥ नारदो

॥ राम: ॥
॥ ५ ॥

याहिताग्न्यादिषिति बहुव्रीहेः परनिपातः १

पि महाराज प्रोवाचेदं श्रुतःश्रुतः ॥ ९ ॥ मायां दर्शय मे देव नान्यदस्ति प्रयोजनम् अथासौ विलसत्थाय पश्चे तदीयं प्रनर्य
यौ ॥ १० ॥ अंगुल्यग्रेण संगृह्य नारदं मुनिपुंगवम् ॥ ततो मार्गगतश्चक्रे आत्मानं द्विजरूपिणम् ॥ ११ ॥ ऋग्वेदमहगः सामा
द्भिवाथर्वलक्षवत्स्थितः ॥ इदृग्द्विजोत्तमवपुः संज्ञायो नाल्पको भवत ॥ १२ ॥ शिखी कमंडलुर्युक्तो मृगचर्मोपवीतकः ॥ यज्ञश
र्मेति संज्ञां च चक्रेऽसौ चात्मनः प्रभुः ॥ १३ ॥ कृत्वापि कृष्णानंतं त्वथ पवित्रकृतलक्षणम् ॥ आययौ समहीपृष्ठं जम्बुद्वीपं च वार
ह ॥ १४ ॥ वैदिशं नाम नगरं वेत्रवत्यास्तटे शुभम् ॥ तस्मिन्नादोपमपरो धनधान्यसमृद्धिमान ॥ १५ ॥ गोमहिष्याजसंपूर्णः पाशुपा
लेन संस्थितः ॥ हलकर्मकृषासक्तो वैश्यजातिरनिंदितः ॥ १६ ॥ गृहकर्मणि तल्लिप्तः सीरभद्र इति स्मृतः ॥ तस्यांतिके हरिः साक्षा
न्नारदेन सहागतः ॥ १७ ॥ ततो ह्यासनसन्मानैः समर्थेन कृतादरौ प्रोक्तं केनापि किं तुभ्यं साक्षमन्नं न साध्यते ॥ १८ ॥ नवा
स्मदीयं प्रष्माकं रोचतेऽन्नं ततो हरिः ॥ प्रहस्य प्रददौ तस्मै वरं द्विजवरो महान ॥ १९ ॥ उत्तमामपवक्रं चोवाच देवसंत्तुनया गि
रा ॥ संततेवह्रवः पुत्राः क्षेत्रमापारवृद्धयः ॥ २० ॥ पश्वापाग्रगृहासक्ताः शातार्ईवलवाहना ॥ तेषां पुत्राश्च पौत्राश्च कृषिवृ
द्धिप्रवर्द्धकाः ॥ २१ ॥ वस्त्रवृत्तिशतैर्लिप्सं वर्द्धस्वस्वजना वृतः ॥ इत्युक्त्वा स जगन्नाथो वासुदेवः सनारद ॥ २२ ॥ कोऽत्रेगोस्वा
मिनामानां द्विजेंद्र ह्रानुश्चतो ॥ दारिद्र्हलकर्मातं मेप्याघोपस्करार्दितम् ॥ २२ ॥ भागीरथ्यास्तटे रम्ये वेणिकाग्रामसन्नि

॥ भ-पु ॥
॥ ५ ॥

क्षौ॥ नगगुल्मलताकुञ्जक्षेत्रे चिंताकुलो हि सः॥ २४॥ ताभ्यां संप्रार्थितो विप्रो भोज्यं सागत्वा किंचन॥ सकाशांत वसं
प्राप्तो ग्रामादति पि धार्मिको॥ २५॥ इत्युक्तोऽसौ द्विजश्रेष्ठो हलकर्म विधाय तत॥ आजगाम गृहं तूर्णं ताभ्यां सह ससंभ्रम
म॥ २६॥ चक्रे चैवादरं भक्त्या तथा सनत्सत्क्रियाम॥ पाद्यौ वं तथाभ्यंगं कृत्वान्नं च सुसंस्कृतम॥ २७॥ सहपत्न्या
सतनयो भोज्यं भुक्तिं चकार सः॥ भुक्त्वा भोज्यो वसद्वर्यास्तु तस्मिन्नौ निशामये॥ २८॥ प्रयातो ददतुः श्चैवं वरं तस्मै द्विजा
तये॥ मा ते भवतु गोस्वामिन्कदाचिदपि कर्षणम॥ २९॥ माधान्यं मरस्व संतानं मम्ख मा गाद्विजोत्तम॥ इत्युक्त्वा जग्मु
र्नुस्तु तौ पुनः पप्रच्छ नारदः॥ ३०॥ किमिदं वद देवेश शापायरूपो वरस्त्वया॥ भङगो स्वामिने दत्तः किं च वैरूपेण तथा विधः॥
३१॥ इत्युक्तः प्राह देवेशः शृणु नारद सद्वचः॥ परमार्थं प्रवक्ष्येऽहं तव सर्वं यथाकृतं ततम॥ ३२॥ संवत्सरेण यत्पापं मत
स्यघाती समाचरेत॥ तदह्नैकेन कृते लांगली नात्र संशयः॥ ३३॥ अतोऽर्थं कृपया त्वेन नरकं यातु लांगली॥ तद
भावात्सकः स्यात्तेन मोक्षो ममापि ध्रुवम॥ ३४॥ मयि भुक्ते प्रसन्ने वा को विशेषोऽस्य नारद॥ यदि स्वर्गोऽथवा मोक्षो न सं
पद्येत तद्वृथा॥ ३५॥ इदानीं हलकालस्य छेदः सीरभङ्गो विचोदितैः॥ बहुधा पशुसंगेन घोरं नरकमेष्यति॥ ३६॥ स पुत्रपौ
त्रसंतानं हतोर्ध्वं न कृते मया॥ न भुक्तं न च विप्रान्नं विश्रान्तं द्विजवेश्मनि॥ ३७॥ सोऽपि द्विजो मनिश्चेष्टु संसाराद्रक्षिष्य

॥ रामः ॥
॥ ५ ॥

5

ति इत्येवं संवदन्तौ च जग्मतुर्मार्गमुत्तमम् ॥ ३८ ॥ कस्यकुत्राश्रमस्यासामीप्ये सरः श्रेष्ठमपश्यति ॥ हंसकारण्डवाकीर्णं
चक्रवाकोपशोभितम् ॥ ३९ ॥ पद्मिनीजलकह्लाररक्तोत्पलसितोत्पलैः ॥ हारिद्रैं पद्मिनीपत्रैर्मत्स्यैः कूर्मैर्जलोऽ
वैः ॥ ४० ॥ तटे रम्ये घनैर्वृक्षैः केतकीखण्डमण्डितम् केतकीकुसुमामोदैः चकुवैस्तरमेदिनै ॥ ४१ ॥ दात्यूहाशिखिभार
ड्चकोराद्यैश्च संकुलम् ॥ करवैश्वानकै रम्यं केकाकुलनिनादितम् ॥ ४२ ॥ जलकुक्कुटसंगीतं हंससारसशोभितम्
जीवंजीवकहारीतचकोरैरुपशोभितम् ॥ ४३ ॥ वसिष्ठस्य मुनेर्नाम्ना विख्यातं श्रीमहोदयम् ॥ अस्मिन्नघप्रवे
ष्ठमं महाज्ञानविवेकिनाम् ॥ ४४ ॥ स्थानमञ्चं पुरन्तस्ते यांतस्मात्तन्मानं समाचरेत् ॥ इत्युक्त्वा केशवः पापं सत्तौग्रा
गैवतज्जलैः ॥ ४५ ॥ यं तीर्थलोकं विख्यातं स्नात्वा तीरं समाश्रितः ॥ श्रीहरे वासुदेवस्य नाम्नोऽपि मुदायुतः ॥
४६ सा च मध्यस सतौ तीर्थेन क्षणेन तीर्थमवाप्य च ॥ यावदुत्तिष्ठते तोयात्तस्मात्तावत्कपिर्हृदारधी ॥ ४७ ॥ तावत्स्त्री
त्वं समापन्नो नारदः क्षणेन वर्ण्यते ॥ यस्यास्त्वविस्मृतेतेनैव चक्रं चंडोपमं गभस्त ॥ ४८ ॥ स्मरपाशोपमौ कर्णौ कपोलौ
कनकोज्ज्वलौ ॥ नासिकातिलधारेण कामचापोपमे भ्रुवौ ॥ ४९ ॥ दशनाहीरकैस्तस्याविद्रुमाभः शुभाधरः मय
रस्यकलापेन तुल्यं कचानिबंधनम् ॥ ५० ॥ शङ्खरेखात्रयेणैव कण्ठदेशो विराजते ॥ माधवीलतयातुल्यौ सौमञ्जरस्यान्

ज्ञौभुजौ ॥ ५१ ॥ वृत्तौरक्तोत्पलाभासौपाणीरक्तनखांगुली ॥ पीनावुत्तुंगसंश्लिष्टौकठिनौकलशोपमौ ॥ ५२ ॥ स्तनाव
विरलौस्निग्धौचक्रवाकयुगोपमौ ॥ स्वल्पकंमध्यदेशंतुमुष्टिग्राह्यमसंशयम् ॥ ५३ ॥ नाभिमण्डलगांभीर्यंला
वण्यंकेनवर्ण्यते ॥ वलित्रयेणविक्रतारोमराजिविराजितम् ॥ ५४ ॥ नतनेवपुनस्तस्यामग्नाद्भवस्तुशोभने ॥ नितं
वंविंवफलकंमत्मत्यायततंभ्रमम् ॥ ५५ ॥ रंभागर्भोपमावूरूस्मरागारनिवंधनौ ॥ विपरीतारतानापामखेदभारसहौदृ
ढौ ॥ ५६ ॥ नवकुंदलतासारसरलंसनिवंधनम् ॥ जंघायुगंमहाराजगूढगुल्फायुगंतथा ॥ ५७ ॥ रक्तांगुलीलनातसन
खचन्द्रकपाचितम् ॥ चरणारविंदयुगलंसरत्नंनूपुरनिष्ठितम् ॥ ५८ ॥ सेवंविधातदानारीसर्वलक्षणपूजिता ॥ वभू
वभ्रमणमात्रेणजगन्मोहकारिणी ॥ ५९ ॥ क्षीरोदमथनोत्तीर्णांलक्ष्मीमत्याभिवोच्छिताम् ॥ दृष्ट्वाप्यदर्शनंप्राप्तोमा
ययामधुसूदनः ॥ ६० ॥ संप्राप्यतेचसाकालसंगराहारिणीयथा ॥ भास्वत्पकाकिनीमुग्धाकुर्पादिगवलोकनम् ॥ दृ
ष्ट्वाजगामतंदेशंताम्रातालध्वजोनृपः ॥ सहस्रैश्वैःपरिवृतःपुरंदरइवामरैः ॥ ६२ ॥ गजारूढैहयारूढैरथारूढैर्नरो
त्तमैः ॥ विमानयानयुग्यस्थैस्तथान्तःपुरिकाजनैः ॥ ६३ ॥ ध्वजातपत्रकलिलैरनीकैःपरिवारितः ॥ तेनसासहसादृष्टा
नारकिमललोचना ॥ ६४ ॥ वभूवभ्रमणमात्रेणकंदर्पशरपीडितः ॥ केयंकस्यकुतःप्राप्ताकिंदेवीवाथमानुषी ॥ ६५ ॥ अ

दृष्ट्वा पाप्सरसा चित्रे देवी समागता ॥ अहो रूपं सुरूपाया गोचरे यदि तेः सुमाता ॥ ६६ ॥ मुमूर्छ जायते मोहादन्तु दिग्धहतो
यथा ॥ इति संचिंत्य हृदये राजा नालक्ष्य जोऽन्तिके ॥ ६७ ॥ उवाच नारीं मुग्धां तां ऋणाम द्दवचनं शुभे ॥ कात्वं कस्य कुतः प्रा
प्तादेशमेतं शुचिस्मिते ॥ ६८ ॥ इत्युक्ता साथ चार्वंगी प्राह मां विद्ध्ययोनिजाम् पित्रा मात्रा विहीनां च तथा पापि कुमा
रिकाम् ॥ ६९ ॥ निराश्रयां विदित्वैनां तां ततो राजा स्मरार्दितः ॥ आरोप्य हयपृष्ठे तां ततो राजा स्मरार्दितः ॥ ७० ॥ नीत्वा वि
वाहयामास शास्त्रोक्तविधिना ततः ॥ रेमे प्रासादशृंगाग्रे पर्यंके सितया तथा ॥ ७१ ॥ उद्यानभवनभूमीषु नदीनां पुलि
नेषु च ॥ पर्वतानां नितंबेषु निर्झरेषु गुहासु च ॥ ७२ ॥ पद्मखंडेषु कुंजेषु ग्रामेमितेषु सरस्सु च ॥ प्रयागादिषु तीर्थेषु नदी
नामाश्रमेषु च ॥ ७३ ॥ दिव्यावसथरम्येषु वेलाकूलेषु पार्थिव ॥ यावद्द्वादश वर्षाणि रेकाहयपि भारत ॥ ७४ ॥ ततस्त्र
योदशे वर्षे तस्यां गर्भोऽभवत्तस ॥ एतस्मिन्गर्भसंपूर्णे जाते दर्धिमलाकुकम् ॥ ७५ ॥ तडेगाहतकुंभे पुर्वीजप्रारोहरणा
न्तराः ॥ वभूवुर्वीतुभ्रात्वा वै दिव्यदेहबलोत्कटाः ॥ ७६ ॥ पंचाशत्तंत्वया जाता उपसर्गादिवर्जिताः ॥ आरूढयौवनाः सर्वे
शूराः संग्रामकोविदाः ॥ ७७ ॥ तेषां पुत्राश्च पौत्राश्च वभूवुः सुरसत्तमा ॥ पुत्रपुत्रःशरसंघातैश्चकुभूलातिपदहितैः ॥ ७८
हयैरश्वैर्गजै रथैः क्रोधांधाः कौरवा इव ॥ पांडवैः सह संग्रामे पुत्रपुत्राः समं जना ॥ ७९ ॥ सपदातिगजारोहाः सांतःपुरपुरोगकृ

१ सुगः २

विधेयाथ २

या। विनेशुरश्चि मामासाद्य सिंधुनां प्रवरा इव ॥ १० ॥ साम्निसवलविक्रान्ताः सदर्पाः समहोत्कुधा ॥ इत्युक्तो कोपमं सर्वकुलं नष्टं क्ष-
णांतरा ॥ ११ ॥ न दृष्ट्वा नारदी येषां विनष्टं स्वकुलं ततो ॥ रुरोद स्नेहसंयुक्तैरश्रुभिः कलुषया गिरा ॥ १२ ॥ हा दैव हा विधे पाप हा कृतांत
नमस्कृत ॥ दर्शयित्वा विधानं मे पुत्रान्नैत्रे हतेत्वया ॥ १३ ॥ इत्युक्त्वा स पुरोधातैर्ध्यानमग्नादुःखिता ॥ असौ मन्त्रीवरा भत्वा पुत्रः
शोकाग्निविचेतसा ॥ १४ ॥ सोऽपि राजा विषण्णोऽसौ निर्विण्णः शोकसागरे। असौ निपतितो दुःखाद्रुरोद भृशदुःखित ॥ १५ ॥ विषण्णो
मंत्रिभिः सार्धं वृद्धशोकेन संयुतः ॥ एतस्मिन्नंतरे विप्रराजगामर्षिभिः सह ॥ १६ ॥ द्विजवेषधारि कृष्ण उपविष्टः शुभासने।
ततः पुरस्सरो भत्वा चक्रे धर्मार्थदर्शनात ॥ १७ ॥ किं रोदिषि त्वं वङ्गना पुत्रयोः क्लेशकारिणा ॥ श्रूयतां विश्वमायैषा स्वप्नवद्बधनो-
पमा ॥ १८ ॥ शोभनेयाद्य शोकं कृत्वा संसारसागरे। सर्वेषामेव भूतानां परिणामो यमीदृशः ॥ १९ ॥ पुरंदरसहस्राणि चक्रव-
र्तिशतानि च। निर्वापितानि कालेन दीपेन इव वह्निना ॥ २० ॥ येऽपि शोषयितुं शक्ताः समुद्रं ग्राहसंकुलम् ॥ ऊर्ध्वभ्यारपुगमेन
चर्मेते स्म महीतले ॥ २१ ॥ उद्धर्तुं धरणीं शक्तां ग्रहीतुं चंडभास्करौ ॥ प्रविष्टास्ते तु कालेन कृतांतवदनं तदा ॥ २२ ॥ दुर्गास्त्रिकूटं प-
रिखाः समुद्रा रक्षांसि योधा धनदाश्च वित्तम्। मंत्रं च यस्यौशनसं प्रणीतं स रावणो दैववशाद्विपन्नः ॥ २३ ॥ संग्रामे गजतुरग-
समाकुलैः पिवादग्नौ वा गतविवरे महोदधौ वा ॥ सर्वैर्वा सह वसतां मदीर्णकोपैर्नाभाव्यं भवति कदाचिदेव नाशः ॥ २४ ॥

7

पातालमाविशन्ननुयानुसुरेंद्रलोकमारोहत्नु क्षितिधराधिपतिंसुमेरुम् ॥ मंत्रौषधिप्रहरणौभ्यकरोन्नरक्षांयस्माविनश्यतिना
थतिमाविनोऽस्मि ॥ ९५ ॥ रोदितिकश्चिदथाश्रुधौताननतनग्रहृतर्ग्शोकविह्वलः ॥ प्रविकट्वरगावानपिनत्यनिवःश्चिद्वर्मा
दिविग्रहः ॥ ९६ ॥ गायन्तिहृद्यहारिसुस्वनिर्भरमायंतविस्मृताध्वरोऽधिकम् ॥ सारंगपरंगोदरगतनतप्टपट्हावःमरुवायम्
९७ ॥ इत्येवंधर्ममुद्दिश्यविस्मृःसंसारचेष्टितम् ॥ तस्यांविभवानुपदंततस्तेद्विजपुंगव ॥ ९८ ॥ उत्तिष्ठस्नाहिपुत्राणांप्रकुरु
ष्वौर्द्धदेहिकम् ॥ मायाकंविस्मृमायेषाविस्मृनानिर्मितंस्वयम् ॥ ९९ ॥ इत्युक्त्वाकाचारुसर्वांगीसवभूवाचलःपुमान् ॥ सरु
घसद्यस्नाकारोनारद्स्तत्क्षणोऽभवत् ॥ १०० ॥ सोऽपिराजाददर्शाथतंसमंत्रिपुरोहितः ॥ सोनःपुरमिदंसर्वमिन्द्रजालोपमं
क्षणात् ॥ १ ॥ नारदंमुनिशार्दूलंजटाभारभयानकम् ॥ गौरवर्णंज्वलंतंचब्राह्म्यालक्ष्म्याविराजितम् ॥ २ ॥ शिखाकमंडलु
धरंवीणादंडकरंतथा ॥ ब्रह्मसूत्रेणशुभ्रेणकौपीनाच्छादनेनच ॥ ३ ॥ पादुकाभ्यांस्थितंतीरेसरसोब्रह्मणासनि ॥ संप्र
गृह्यकराग्रेणाजगामादर्शनेहरिः ॥ ४ ॥ अंबरेणसुरैःसार्द्धंतस्मादेशाद्युधिष्ठिर ॥ अथेनद्दीपमथासाद्यप्राहदेवोमुनिंनृप ॥ ५
देवर्षेयत्वयापृष्टंपूर्वंमायाकथांप्रति ॥ मायायथेदृशीमायायन्त्ररूपायदात्मिका ॥ ६ ॥ सातेमायामयाब्रह्मन्नैषावीसंप्रद
र्शिता ॥ एवमुक्त्वामुनिवरंदेवदेवोजनार्दनः ॥ ७ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेमायाद

॥ भ०पु ॥
॥ ८ ॥

र्शनंनामतृतीयोऽध्यायः॥ ३ ॥ युधिष्ठिरउवाच॥ देवत्वंमानुषत्वंचतिर्यक्त्वंकेनकर्मणा॥ प्राप्नोतिपुरुषः केनगर्भवासंसुदारु
णम्॥ १ ॥ गर्भस्थश्चकिमस्माभिः कथमुत्पद्यते पुनः॥ देहोत्थानादिकान्दोषान्कथंतरतिदुस्तरान्॥ २ ॥ बालभावेकथंपुष्टिःस्या
दुपाकेनकर्मणा॥ कुलीनः केनभवतिसुरूपः सुधनः कथम्॥ ३ ॥ कथंदारानवाप्नोतिगृहंसर्वगुणैर्युतम्॥ पंडितःपुत्रवांस्त्या
गीस्याद्भयविवर्जितः॥ ४ ॥ कथंसुखेनम्रियतेकथंभुंक्तेशुभाशुभम्॥ सर्वमेवामलमतेगदत्वंप्रतिभातिमे॥ ५ ॥ श्रीकृष्णउवाच॥
शुभैर्देवत्वमाप्नोतिमिश्रैर्मानुषतांव्रजेत्॥ अशुभैःकर्मभिर्जन्तुस्तिर्यग्योनिःप्रजायते॥ ६ ॥ प्रमाणंश्रुतिरेवात्रधर्माधर्मविनि
श्चये॥ पापंपापेनभवतिपुण्यंपुण्येनकर्मणा॥ ७ ॥ ऋतुकालेतदाभुक्तंनिर्दोषंयेनसंस्थितम्॥ तदातद्वायुनास्पृष्टंस्त्रीरक्तेनैक
तांव्रजेत्॥ ८ ॥ विसर्गकालेशुक्रस्यजीवःकरणसंयुतः॥ नित्यःप्रविशतेयोनिंकर्मभिःस्वैर्नियोजितः॥ ९ ॥ तच्छुक्ररक्तसंसृष्टमेका
हात्कललंभवेत्॥ पंचरात्रेणकललंबुद्बुदाकारतांव्रजेत्॥ १० ॥ बुद्बुदंसप्तरात्रेणमांसपेशीभवेत्ततः॥ द्विसप्ताहाद्भवेत्पेशीरक्तमांसे
दृढंविना॥ ११ ॥ बीजस्येवांकुराःपेश्याःपंचविंशतिरात्रतः॥ भवंतिमासमात्रेणपंचधाजायतेपुनः॥ १२ ॥ ग्रीवाशिरश्चस्कन्धश्च
पृष्ठवंशस्तथोदरम्॥ मासद्वयेनसर्वाणिक्रमशःसंभवंतिच॥ १३ ॥ त्रिभिर्मासैःप्रजायंतेसडंगांकुरसंधयः॥ मासैश्चतुर्भिरंगु
ल्यःप्रजायन्तेयथाक्रमम्॥ १४ ॥ मुखंनासाचकर्णौचमासेजायेतपंचभिः॥ दंतपंक्तिस्तथागुह्यंजायंतेचनखाःपुनः॥ १५ ॥
अस्रोपृष्ठंतथोद२

॥ रामः ॥
॥ ८ ॥

8

वर्णौचरंक्षसहितौषण्मासाभ्यंतरेगतः ॥ पांशुमेदकृपस्थश्चनाभिश्चाप्युपजायते ॥ १६ ॥ संध्ययोयेवगात्रेषुमासैर्जायंतिस
प्तभिः ॥ अंगप्रत्यंगसंपूर्णःशिरःकेशसमन्वितः ॥ १७ ॥ विभक्तावयवःपुष्टःपुनर्मासाष्टकेनव ॥ पंचात्मकसमायुक्तःपरिपक्वःस
तिष्ठति ॥ १८ ॥ मातुराहारवीर्येणषड्विधेनसतिष्ठति ॥ रसेनप्रत्यहंबालोवर्धतेभरतर्षभः ॥ १९ ॥ ततोऽहंसंप्रवक्ष्यामियथाश्रुतम
रिंदम ॥ नाभिसूत्रनिबंधेनवर्द्धतेसदिनेदिने ॥ २० ॥ ततःस्मृतिंलभेज्जीवःसंपूर्णोऽस्मिन्शरीरके ॥ सुखंदुःखंविजानातिनिद्रा
स्वप्नंपुराकृतम् ॥ २१ ॥ मृतश्चाहंपुनर्जातोजातश्चाहंपुनर्मृतः ॥ नानायोनिसहस्राणिमयादृष्टानितानिवै ॥ २२ ॥ अधुनाजात
मात्रोऽहंप्राप्तसंस्कारएवच ॥ ततःश्रेयःकरिष्यामियेनगर्भेणसंभवः ॥ २३ ॥ गर्भस्थश्चिंतयेदेवमहंगर्भाद्विनिःसृतः ॥ अध्ये
ष्येचतुरोवेदान्संसारविनिवर्तकान् ॥ २४ ॥ एवंसगर्भदुःखेनमहतापरिपीडितः ॥ जीवःकर्मवशादास्तेमोक्षोपायंविचिंतयन्
२५ ॥ यथागिरिवराक्रांतःकश्चिद्दुःखेनतिष्ठति तथाजरायुणादेहीदुःखेतिष्ठतिवेष्टितः ॥ २६ ॥ पतितःसागरेयद्वदुःखमा
स्तेसमाकुलः ॥ गर्भोदकेनसिक्तांगस्तथास्तेव्याकुलःपुमान् ॥ २७ ॥ लोहकुंभेयथान्यस्तःपच्यतेकश्चिदग्निना ॥ तथासपच्यते
जंतुर्गर्भस्थःपीडितोदरः ॥ २८ ॥ सूचीभिरग्निवर्णाभिर्विभिन्नस्यनिरंतरम् ॥ यद्दुःखमुपजायेततद्गर्भेऽष्टगुणंपुमान् ॥ २९
गर्भवासात्परोवासःकष्टोनैवास्तिकुत्रचित् ॥ देहिनांदुःखबहुलःसुघोरोह्यतिसंकटः ॥ ३० ॥ इत्येतद्गर्भदुःखंहिप्राणिनांपरि

॥ भ·पु ॥
॥ ९ ॥

नुलालकमम् ४   गवाक्षाष्टभूषितम् ५

कीर्त्तितम् ॥ चरस्थिराणां सर्व्वेषां मातृगर्भानुरूपतः ॥ ३१ ॥ गर्भात्कोटिगुणंदुःखं योनियंत्रप्रपीडनात् । संमूर्छितस्यजायेत जाय
मानस्य देहिनः ॥ ३२ ॥ गारवत्पीड्यमानस्य यंत्रेणेव समंततः ॥ शिरसिताड्यमानस्य पापमुद्गरकेण च ॥ ३३ ॥ गर्भान्निष्क्रम्यमाण
स्य प्रबलैः सूतिमारुतैः ॥ जायते सुमहद्दुःखं परित्राणमविंदतः ॥ ३४ ॥ यंत्रेण पीडिता यद्वन्निःसाराः स्युस्तिलेक्षवः ॥ तथा शरीरं निः
सारं योनियंत्रप्रपीडितम् ॥ ३५ ॥ अस्थिमज्जात्वचामांसस्नायुबंधेनयंत्रितम् ॥ रक्तमांसमलायुक्तविण्मूत्रद्रवलेपनम् ॥ ३६ ॥ केश
लोमनखाच्छन्नंरोगायतनमातुरम् ॥ वदनैकमहाद्वारं दंतोष्ठकविभूषितम् ॥ ३७ ॥ ओष्ठद्वयकपाटं च दंतजिह्वार्गलान्वितम् ॥ नाडीस्वेद
प्रवाहं च कफपित्तपरिप्लुतम् ॥ ३८ ॥ जराशोकसमाविष्टं कालवक्रानलेस्थितम् । कामक्रोधसमाक्रांतं व्यसनैश्चोपमर्दितम् ॥ ३९ ॥ भो
गतृष्णातुरं मूढं रागद्वेषवशानुगम् ॥ संवर्तितांगप्रत्यंगं जरायुपरिवेष्टितम् ॥ ४० ॥ संकटेनाविविक्तेन योनिद्वारेण निर्गतम् । विण्मूत्र
रक्तसिक्तांगपक्वेशाद्यसमुद्भवम् ॥ ४१ ॥ इतिदेहगृहं प्रोक्तं नित्यस्यानित्यमात्मनः ॥ अविशुद्धं विशुद्धस्य कर्मबंधविनिर्मितम् ॥ ४२ ॥
शुक्रशोणितसंयोगाद्देहः संजायते यतः ॥ नित्यं विण्मूत्रपूर्णश्च तेनायमशुचिः स्मृतः ॥ ४३ ॥ यथांतर्विष्ठया पूर्णः शुचिः स्यान्न बहि
र्घटः ॥ यत्नतः शोध्यमानोऽपि देहोऽयमशुचिस्तथा ॥ ४४ ॥ संप्राप्यात्रपवित्राणि पंचगव्यहवींषि च अशुचित्वं क्षणाद्यांति किम
न्यद्बहुविंदवः ॥ ४५ ॥ देहः संशोध्यमानोऽपि पंचगव्यकुशांबुभिः ॥ घृष्यमाण इवांगारो निर्मलत्वं न गच्छति ॥ ४६ ॥ स्रोतांसि यस्य स

॥ रामः ॥
॥ ९ ॥

9

कृष्णोल्पीनशुक्लःस्यादुपायतः ३ वि५:

सततंप्रवहंतिगिरेरिव । कफमूत्रपुरीषाद्यैःसदेहःशुध्यतेकथम् ॥ ४७ ॥ सर्वाशुचिनिधानस्यशरीरस्यनविद्यते शुचिरेकः प्रदेशोऽपिविड्मूत्राःस्यंदतेकिल ॥ ४८ ॥ कायःसुगंधधूपाद्यैर्यत्नेनापिसुसंस्कृतः । नजहातिस्वकंभावंश्वपुच्छमिवनामितम् ॥ ४९ ॥ यथाजात्यैवकृष्णोहिनशुक्लःस्यादुपायतः ॥ संशोध्यमानोऽपितथाभवेन्मूर्तिर्ननिर्मला ॥ ५० ॥ जिघ्रन्नपिस्वदुर्गंधंपश्यन्नपिमलंस्वकम् ॥ नविरज्यतिलोकोऽयंपीडयन्नपिनासिकाम् ॥ ५१ ॥ अहोमोहस्यमाहात्म्यंयेनव्यामोहितंजगत् ॥ जिघ्रन्पश्यन्स्वकंदोषंकायस्यनविरज्यते ॥ ५२ ॥ एवमेतच्छरीरंहिनिसर्गादशुचिध्रुवम् ॥ त्वङ्मात्रसारंनिःसारंकदलीसारसंनिभम् ॥ ५३ ॥ गर्भस्थस्यस्मृतिर्यासीत्साजातस्यप्रणश्यति ॥ संमूर्छितस्यदुःखेनयोनियंत्रप्रपीडनात् ॥ ५४ ॥ बाह्येनवायुनाचास्यमोहसंगेनदेहिनः ॥ स्पर्शमात्रेणघोरेणज्वरःसमुपजायते ॥ ५५ ॥ तेनज्वरेणमहतामहामोहःप्रजायते ॥ संमूढस्यस्मृतिभ्रंशःशीघ्रंसंजायतेपुनः ॥ ५६ ॥ स्मृतिभ्रंशात्ततस्तस्यपूर्वकर्मवशेनच ॥ रतिःसंजायतेतूर्णंजंतोस्तत्रैवजन्मनि ॥ ५७ ॥ रक्तोमूढश्चलोकोऽयमकार्येसंप्रवर्तते ॥ नचात्मानंविजानातिनपरंविंदतेचसः ॥ ५८ ॥ नशृणोतिपरंश्रेयःसतिचक्षुषिनेक्षते ॥ समेपथिशनैर्गच्छन्स्खलतीवपदेपदे ॥ ५९ ॥ सत्यांबुद्धौनजानातिबोध्यमानोबुधैरपि ॥ संसारेक्लिश्यतेतेनरागलोभवशानुगः ॥ ६० ॥ गर्भस्मृतेरभावेनशास्त्रमुक्तंमहर्षिभिः तद्दुःखवर्णनार्थायस्वर्गमोक्षप्रसाधकम् ॥ ६१ ॥ येषामस्मिन्स्थितेज्ञानेसर्वकामार्थसाधके ॥ नकुर्वंत्यात्मनःश्रेयस्तदत्रमहदद्भुतम् ।

नरदेवनाम ३

॰ कवित

॥ म ७॥
॥ १०॥

६२॥ अथ क्रौंडयन्त्रनिष्काशात्स्याद्दुःखं महत्तु न॥ इक्षुवन्निनयाक्रोतिकंर्नुवक्त्रंवसन्त्रियाम्॥ ६३॥ दंतोत्थाने महद्दुःखं मौहेन व्याधिना तथा।
बालरोगैश्च विविधैः पीडा बालग्रहैरपि॥ ६४॥ तृड्बुभुक्षापरीतांगः क्वचित्तिष्ठति रारटन्॥ विण्मूत्रभक्षणमपि मोहाद्बालः समाचरेत्॥
६५॥ कौमारे कर्णवेधेन मातापित्रोश्च ताडनात्। अक्षराध्ययनाद्यैश्च दुःखं स्याद्गुरुशासनात्॥ ६६॥ प्रमत्तेन्द्रियवृत्तिश्च कामराग
प्रपीडनात्॥ रोगोद्धतस्य सततं कुतः सौख्यं च यौवने॥ ६७॥ ईर्ष्यया च महद्दुःखं मोहाद्रक्तस्य जायते॥ नेत्रस्य कुपितस्यैव रागोद्दुःखाय
केवलम्॥ ६८॥ न रात्रौ विंदते निद्रां कोपाग्निपरिपीडितः॥ दिवा वापि कुतः सौख्यमर्थोपार्जनचिंतया॥ ६९॥ स्त्रीष्वायासितदेहस्य
ये पुंसः शुक्रबिंदवः॥ न ते सुखाय मंतव्याः स्वेदजा इव बिंदवः॥ ७०॥ कृमिभिस्तुद्यमानस्य कुष्ठिनः कामिनस्तथा॥ कंडूयनाग्नि
तापेन यद्भवेत्स्त्रीषु तद्धितन्॥ ७१॥ यादृशं विंदते सौख्यं गंडान्वयविनिर्गमे॥ तादृशं स्त्रीषु मंतव्यं नाधिकं तासु विद्यते॥ ७२॥ गंडस्य
वेदना यद्वत्स्फुटितस्य निवर्तते॥ तद्वत्स्त्रीष्वपि मंतव्यं न सौख्यं परमार्थतः॥ ७३॥ विण्मूत्रस्य समुत्सर्गात्सुखं भवति यादृशम्॥ ता
दृशं स्त्रीषु विज्ञेयं मूढैः कल्पितमन्यथा॥ ७४॥ नारीषु भृञ्जिमतासु सर्वदोषाश्रयासु च॥ नालं मात्रकमध्येवं सुखमस्ति विचारतः॥
७५॥ सन्मानमवमानेन वियोगेन तु संगमम्॥ यौवनं जरया ग्रस्तं किं सौख्यमनुपद्रवम्॥ ७६॥ वलीपलितखालित्यैः शिथिलीकृ
तविग्रहम्। सर्वक्रियास्वशक्तं च जरया जर्जरीकृतम्॥ ७७॥ स्त्रीपुंसयोर्नवं रूपं तदान्योन्यं प्रियं पुरा॥ तदेव जरया ग्रस्तमुभयोरपि

॥ राम: ॥
॥ १०॥

10

न प्रियम् ॥ ७८ ॥ अपूर्ववत्स्वमात्मानं जरयापरिवर्जितं । यः पश्यन्नपि रज्येत कोऽन्यस्तस्मादचेतनः ॥ ७९ ॥ जराभिभूतः पुरुषः
पत्नीपुत्रादिबान्धवैः ॥ अशक्तत्वाद्दुराचारैर्भृत्यैश्च परिभूयते ॥ ८० ॥ धर्ममर्थं च कामं च मोक्षं च न जरान्वितः ॥ शक्तः साधयितुं तस्मा
च्छरीरमिदमात्मनः ॥ ८१ ॥ वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ॥ तस्माद्व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ॥ ८२ ॥ वाताद्यव्य
तिरिक्तत्वाद्व्याधीनां पंजरस्य च ॥ रोगैर्नानाविधैर्याति देहो दुःखमनेकधा ॥ ८३ ॥ तानि च स्वात्मवेद्यानि किमन्यत्कथयाम्यहम् ॥
एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ॥ ८४ ॥ तत्रैकः कालसंयुक्तः शेषाश्चागन्तवः स्मृताः ॥ ये त्विहागन्तवः प्रोक्तास्ते प्रशाम्यन्ति भे
षजैः ॥ ८५ ॥ जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति ॥ यदि वापि न मृत्युः स्याद्विषमघादशंकितः ॥ ८६ ॥ न संति पुरुषे तस्मादपमृत्यु
विभीतयः ॥ विविधा व्याधयः शस्त्रसर्पाद्याः प्राणिनस्तथा ॥ ८७ ॥ विषाणि जंगमाद्यानि मृत्योर्द्वाराणि देहिनाम् ॥ पीडितं सर्वरोगा
द्यैरपि धन्वन्तरिः स्वयम् ॥ ८८ ॥ स्वस्थीकर्तुं न शक्नोति प्राप्तं मृत्युं च देहिनाम् ॥ नौषधं न तपो दानं न मंत्रा न च बांधवाः ॥ ८९ ॥ शक्नुवं
ति परित्रातुं नरं कालेन पीडितम् ॥ रसायनतपोजप्यैर्योगसिद्धैर्महात्मभिः ॥ ९० ॥ कालमृत्युरपि प्राज्ञैर्जीयते नालसैर्नरैः ॥ ना
स्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ॥ ९१ ॥ नास्ति मृत्युसमस्त्रासः सर्वेषामेव देहिनाम् सद्भार्यापुत्रमित्राणि राज्यैश्वर्य
धनानि च ॥ ९२ ॥ भवद्यानि च वैराणि मृत्युः सर्वाणि कृन्तति ॥ हे जनाः किं न पश्यध्वं सहस्रस्यापि मध्यतः ॥ ९३ ॥ जनाश्शतायुषः

१ योनिकोटीषु ४

॥ म·पु॥
॥११॥

पंचमवंतिनमवंतिच। अशीतिकाविपर्यंतेकेचित्सप्ततिकान्नराः॥ ९४॥ परमायुषांस्थितंषष्टिस्तत्रैवानिश्चितंपुनः। य
स्यायावद्भवेतद्युदेहिनांपूर्वकर्मभिः॥ ९५॥ तस्यार्द्धमात्तुशोरात्रिर्हरतेमस्तरूपिणी॥ बालभावेनमोहेनवार्द्धकोजरयानथा
९६॥ वर्षाणांविंशतिर्यातिधर्मकामार्थवर्जिता॥ आगंतुकैर्भयैःदुःखांव्याधिशोकैरनेकधा॥ ९७॥ मध्यतेऽर्द्धचतत्रापि
यच्छेषंतच्चजीवति॥ जीवितांतेचमरणंमहाघोरमवाप्नुयात्॥ ९८॥ जायतेजन्मकोटीषुमृतःकर्मवशात्पुनः॥ देहभे
देनयःपुंसांवियोगःकर्मसंक्षयात्॥ ९९॥ मरणंतद्धिनिर्दिष्टंनान्यथापरमार्थतः॥ महातमःप्रविष्टस्यछिद्यमानेषु
मर्मसु॥ १००॥ यदुःखंमरणेजंतोर्नतस्येहोपमाक्वचित्॥ हाताततमातःकांतेतिक्रंदत्येवंसुदुःखितः॥ १॥ मंडूकइवस
र्पेणग्रस्यतेमस्तज्ञानजनः॥ बांधवैःसंपरिवृतःप्रियैःसंपरिवारितः॥ २॥ निःश्वसन्दीर्घमुष्णांचमुखेनपरिशुष्यति·
कंठेनैवखखद्भायांपरिवर्तन्मुहुर्मुहुः॥ ३॥ संमूढःक्षीयतेऽत्यर्थंहस्तपादादितस्ततः खट्वातोवांछतेभूमिंभूमेःख
ट्वांपुनर्महीम्॥ ४॥ विवस्त्रस्त्यक्तलज्जश्चमूत्रविष्ठानुलेपितः॥ याचमानश्चसलिलंशुष्ककंठोष्ठतालुकः॥ ५॥ चिंतयान
श्चवित्तानिकस्यैतानिमृतेमयि पंचावटानवन्यमानःकालपाशेनकर्षितः॥ ६॥ म्रियतेपश्यतामेवजनानांघुर्घुरस्व
नः॥ जीवस्तृणजलौकेवदेहाद्देहंविशेत्क्रमात्॥ ७॥ संप्राप्योत्तरकालंहिदेहंत्यजतिपौर्विकम्। मरणात्प्रार्थनादुःखमधिकं

॥ रामः॥
॥ ११॥

योनिकोटीषु २

कंदन्

स्यविवेकिनः ॥ ८ ॥ क्षणिकं मरणाद्दुःखमनन्तं प्रार्थनाकृतम् । जगतां पतिरर्थित्वाद्विष्णुर्वामनतां गतः ॥ ९ ॥ अधिकः कोऽपर
स्तस्माद्यो नयात्यतिलाघवम् ॥ ज्ञातं मयेदमधुना मत्तो भवति यत्कृतः ॥ १० ॥ न परं प्रार्थयेद्भूयस्तृष्णालाघवकारणम् । आदौ
दुःखं तथा मध्ये दुःखमन्ते च दारुणम् ॥ ११ ॥ निसर्गात्सर्वभूतानामिति दुःखपरंपरा । वर्त्तमानान्यतीतानि दुःखान्येतानि या
नि तु ॥ १२ ॥ नरा न भावयंत्येतज्ज्ञानविरक्तचित्तेन ते । अल्पाहारान्महद्दुःखमनाहारान्महत्तमम् ॥ १३ ॥ नुतितं जीवितं कथं म
न्येऽप्येवं कृतः सुखम् ॥ बुभुक्षां सर्वरोगाणां व्याधिः श्रेष्ठतमः स्मृतः ॥ १४ ॥ स चाल्पौषधिलेपेन क्षणमात्रं प्रशाम्यति ।
क्षुद्व्याधिर्वेदनातुल्या निःशेषबलकृंतनी ॥ १५ ॥ तयाभिभूतो म्रियते यथान्यैर्व्याधिभिर्नरः ॥ नडसोपि हि कामादा
जिह्वाग्रे परिवर्त्तते ॥ १६ ॥ तत्क्षणार्द्धकालेन कंठं प्राप्य निवर्त्तते ॥ इति क्षुद्व्याधिनष्टानामन्नमौषधवत्स्मृतम्
न तत्सुखाय मन्तव्यं परमार्थेन पंडितैः ॥ १७ ॥ मत्तोपमोयभ्वेक्षेन सर्वकार्यविवर्जितः ॥ तत्रापि च कुतः सौख्यं त
मसाच्छादितात्मनः ॥ १८ ॥ प्रबोधेऽपि कुतः सौख्यं कार्यैरुपहतात्मनः ॥ कृषिगोरक्षवाणिज्यसेवाश्वादिपरिश्रमैः
१९ ॥ प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने तु बुभुक्षया ॥ तृप्ताः कामेन बाध्यन्ते जंतवो पिवि निद्रया ॥ २० ॥ अर्थस्योपार्जने
दुःखमर्जितस्यापि रक्षणे ॥ नाशे दुःखं व्यये दुःखमर्थेभ्यः कुतः सुखम् ॥ २१ ॥ चौरेभ्यः सलिलादग्नेः स्वजनात्पार्थिवाद

कथम्

पि ॥ भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ २२ ॥ खेयातं पक्षिभिर्मांसं भक्ष्यते श्वापदैर्भुवि ॥ जले च भक्ष्यते मत्स्यैस्त
थासर्वत्र वित्तवान् ॥ २३ ॥ विमोहयंति संपत्सु तापयंति विपत्तिषु ॥ खेदयंत्यर्जनाकाले कदाह्यर्थाः सुखावहा ॥ २४
यथार्थपतिरुद्विग्नो यथश्च सवार्थनिःस्पृहः ॥ यतश्चार्थपतिर्दुःखी सुखी सर्वार्थनिःस्पृहः ॥ २५ ॥ शीतेन दुःखं हेमंते ग्रीष्मे
तापेन दारुणम् ॥ वर्षासु वातवर्षाभ्यां कालेऽप्येवं कुतः सुखम् ॥ २६ ॥ विवाहे विस्तरे दुःखं तद्गर्भोद्वहने पुनः ॥ प्रसवेः
पतनादीपैश्च दुःखं दुःखादिकर्मभिः ॥ २७ ॥ दंताक्षिरोगैः पुत्रस्य हा कष्टं किं करोम्यहम् ॥ गावो नष्टाः कृषिर्भग्नाहृषाः
क्वापि पलायिता ॥ २८ ॥ समीप्रार्थ्यर्णकाः प्राप्ता भक्ष्यं देवमे गृहे बालापत्या च मे भार्या कः करिष्यति रंधनम् ॥ २९
प्रदानकाले कन्यायाः कीदृशश्च वरो भवेत् ॥ इति चिंताभिभूतानां कुतः सौख्यं कुटुंबिनाम् ॥ ३० ॥ कुटुंबचिंताकुलि
तस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे ॥ अपक्वकुंभे निहिता इवापः प्रयांति देहेन समं विनाशम् ॥ ३१ ॥ राज्ये च सुमह
दुःखं संधिविग्रहचिंतया ॥ पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् ॥ ३२ ॥ स्वजातीयाद्भयं प्रायः सर्वेषामेव देहि
नाम् ॥ एकद्रव्याभिलाषित्वाच्छुनामिव परस्परम् ॥ ३३ ॥ नाप्रधृष्यबलः कश्चिन्नृपः ख्यातोऽस्ति भूतले ॥ निखि
लं यस्तिरस्कृत्य सुखं तिष्ठति निर्भयः ॥ ३४ ॥ आजन्मतः प्रभृति दुःखमयं शरीरं कर्मात्मकं तव मया कथितं न

12

सर्वोपभोगसुभगम् १

रेऽ॥ दानोपवासनियमैश्च कृतैस्तदेव सर्वोपभोगसुखभाग्भवतीह पुंसाम् ॥ ३५ ॥ ॥ इति श्रीभविष्ये महापुरा
णे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संसारदोषाख्यापनं नाम चतुर्थोऽध्यायः ॥ ४ ॥ ॥ श्रीकृष्ण उवाच ॥
अधोधः पतनं येन तमधः कर्म प्रकीर्तितम् ॥ नरकार्णवघोरे तु पातनात्पापमुच्यते ॥ १ ॥ अधर्मभेदा विज्ञेयाश्चित्तवृत्तिप्रभे
दतः ॥ स्थूलाः सूक्ष्माः सुसूक्ष्माश्च कोटिभेदैरनेकधा ॥ २ ॥ तत्र ये पापनिचयाः स्थूला नरकहेतवः ॥ तेषां समासेन कथ्यन्ते
मनोवाक्कायसाधनाः ॥ ३ ॥ परस्त्रीद्रव्यसंकल्पश्चेतसानिष्टचिन्तनम् ॥ अकार्याभिनिवेशश्च चतुर्धा कर्म मानसम् ॥
४ ॥ अनिबद्धप्रलापित्वमसत्यं चाप्रियं च यत् ॥ परापवादपैशुन्यं चतुर्धा कर्म वाचिकम् ॥ ५ ॥ अभक्ष्यभक्षणं हिंसा मि
थ्याकामस्य सेवनम् ॥ परस्वानामुपादानं चतुर्धा कर्म कायिकम् ॥ ६ ॥ इत्येतद्द्वादशविधं कर्म प्रोक्तं ससाधनम् ॥ तेषां
भेदं पुनर्वक्ष्ये येषां फलमनन्तकम् ॥ ७ ॥ ये द्विषन्ति महादेवं संसारार्णवतारणम् ॥ समस्तपातकोपेतास्ते यान्ति नरका
ग्निषु ॥ ८ ॥ ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ॥ महापातकिनश्चैते तत्संसर्गी च पञ्चमः ॥ ९ ॥ क्रोधाद्द्वेषाद्भयाल्लो
भाद्ब्राह्मणं विघ्नसंति ये ॥ प्राणान्तिकं महादोषाद्ब्रह्मघ्नास्ते प्रकीर्तिता ॥ १० ॥ ब्राह्मणं च समाहूय याचमानमकिंचनम् ।
पश्चान्नास्तीति तं ब्रूयात्स चैव ब्रह्महा स्मृतः ॥ ११ ॥ यस्तु विद्याभिमानेन निस्तेजयति वै द्विजान् ॥ उदासीनः सभामध्ये ब्र

= सपाविक्रम् ४

॥ म॰पु ॥
॥ १३ ॥

= पापंहरले ६

ललाम्सोः पिकीर्त्तितः ॥ १२ ॥ मिथ्यागुरोः समामान्नानं नयस्तत्कर्पणं वलात् ॥ गुरूणां च विरुद्धो यः स चैव ब्रह्महा स्मृतः
१३ ॥ क्षुत्तृट्संतप्तदेहानां द्विजानां भोक्तुमिच्छताम् ॥ यः समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ॥ १४ ॥ पिशुनः सर्वलो
कानां छिद्रान्वेषणतत्परः ॥ उद्वेगजननः क्रूरः स चैव ब्रह्महा स्मृतः ॥ १५ ॥ गवां तृषाभिभूतानां जलार्थमुपसर्पता
म् ॥ यः समाचरते विघ्नं स चैव ब्रह्महा स्मृतः ॥ १६ ॥ परदोषमविज्ञाय नृपकर्णे करोति यः ॥ पापीयान्पिशुनः क्षुद्रः स चैव
ब्रह्महा स्मृतः ॥ १७ ॥ देवद्विजगवां भूमिं पूर्वदत्तां हरेत्तु यः ॥ प्रनष्टामपि कालेन तमाहुर्ब्रह्मघातकम् ॥ १८ ॥ द्विजवित्ता
पहरणे न्यायतः समुपार्जिते ॥ ब्रह्महत्यासमं ज्ञेयं पातकं नात्र संशयः ॥ १९ ॥ अग्निहोत्रपरित्यागो यस्तु याज्ञिककर्म
णाम् ॥ मातापितृपरित्यागः कूटसाक्ष्यं सुहृद्वधः ॥ २० ॥ गवां मार्गे वने चाग्निं पुरे ग्रामे च दीपयेत् ॥ इति पापानि घोरा
णि सुरापानसमानि तु ॥ २१ ॥ हीनस्य हरणे वापि नरस्त्रीगजवाजिनाम् ॥ गोभूरजतरत्नानां मौषधीनां रजस्य च ॥ २२
चंदनागरुकर्पूरकस्तूरीखंडवाससाम् ॥ हस्तन्यस्यापहरणं रुक्मस्तेयसमं स्मृतम् ॥ २३ ॥ कन्यानां वरयोग्यानामदा
नं सदृशे वरे ॥ पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥ २४ ॥ कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम् ॥ सवर्णायाश्च ग
मनं गुरुतल्पसमं स्मृतम् ॥ २५ ॥ महापातकतुल्यानि पापान्युक्तानि यानि तु ॥ तानि पातकसंज्ञानि तन्न्यूनमुपपात

= चंदनागरुकस्तूरीपट्टवाससाम् ३

॥ राम: ॥
॥ १३ ॥

13

कम्॥ २६॥ द्विजार्थं च प्रतिज्ञाय न प्रयच्छति यः पुनः॥ तस्मात्तरयते विप्रस्तु त्वं तदुपपातकम्॥ २७॥ द्विजद्रव्याप
हरणं मर्यादाया अतिक्रमः॥ अतिकोपश्च मानश्च दांभिकत्वं कृतघ्नता॥ २८॥ अत्यंतविषयासक्तिः कार्पण्यं श्रे
ष्ठमत्सरः॥ परदारापहरणं साध्वीकन्याविदूषणम्॥ २९॥ परिवित्तिः परिवेत्ता यया च परिविद्यते॥ तयोर्दानं च कक
न्यायास्तयोरेव च याजनम्॥ ३०॥ पुत्रमित्रकलत्राणामभावे स्वामिनस्तथा॥ शिष्टानां चैव संन्यासः सहृज्ज्ञानां तप
स्विनां॥ ३१॥ भंगश्च धर्मकृत्यानां सहायानां विनाशनम्॥ पीडमाश्रमसंस्थानामाचरेत्तल्लिकामपि॥ ३२॥ स्वयं स्वप
रिवर्गस्य पशुधान्यधनस्य च॥ कुप्यधान्यपशुस्तेयमयाज्यानां च याजनम्॥ ३३॥ गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां विशे
षतः॥ यज्ञारामतडागानां दारापत्यस्य विक्रयः॥ तीर्थयात्रोपवासानां व्रतायतननकर्मणाम्॥ ३४॥ स्त्रीधनान्युपजीवंति
स्त्रीभिरत्यंतनिर्जिताः॥ अरक्षणं च नारीणां मद्यपस्त्रीनिषेवणम्॥ ३५॥ ऋणानामप्रदानं च धान्यवृद्ध्युपजीविनाम्
निंदिताच्च धनादानमपण्यानां च विक्रयः॥ ३६॥ विषमारणमंत्राणां प्रयोगो मूलकर्मणाम्॥ उच्चाटनाभिचारश्च गरविद्वेषणा
क्रिया॥ ३७॥ जिह्वासमुपभोगार्थं यस्यारंभः स्वकर्मसु॥ मूल्येनाध्यापयेद्यश्च मूल्येनाधीयते च यः॥ ३८॥ व्रात्यता व्रतसंत्या
गः सर्वाहारनिषेवणम्॥ असद्दाराभिगमनं शुष्कतर्कावलंबनम्॥ ३९॥ देवाग्निसाधुसाध्वीनां निंदा गोब्राह्मणस्य च॥

= परस्त्रियाये हृष्यन्ते ॥

॥ ग.पु ॥
॥ १४ ॥

प्रत्यक्षं वा परोक्षं वा राज्ञां मंडलिकामपि ॥ ४० ॥ दुःशीला नास्तिकाः पापाः सर्वभक्षस्य वादिनः ॥ पर्वकाले दिवा चैव वियोनौ
पशुयोनिषु ॥ ४१ ॥ रजस्वलानां योनौ च मैथुनं च समाचरेत् ॥ स्त्रीपुत्रमित्रसंप्रीते प्रासाल्लच्छेदकाश्च ये ॥ ४२ ॥ जनस्याप्रियव
क्तारो धूर्त्ताः समयभेदिनः ॥ भेत्ता तडागचक्राणां संक्रमाणां रथस्य च ॥ ४३ ॥ एकपंक्तिस्थितानां च पाकभेदं करोति यः ॥ इत्ये
तैस्तैर्नराः पापैरुपपातकिनः स्मृताः ॥ ४४ ॥ गुरुकालदूनकैः श्चंडैः पापैः पापनराः स्मृताः ॥ ये गोब्राह्मणकन्यानां स्वामि
मित्रतपस्विनाम् ॥ ५५ ॥ अंतरं यांति कार्येषु ते नरा नारकाः स्मृताः ॥ परश्रियाये तप्यंते ये परद्रव्यसूचकाः ॥ ४६ ॥ परव्या
पारनिरताः परस्त्रीनरदूषकाः ॥ द्विजाय दुःखदः कुर्यात्प्रकारैर्गोद्रुभिः सदा ॥ ४७ ॥ सेवंते ये द्विजाः शूद्रां सुरां जिघ्रंति कामतः
ये पापाभिरताः क्रूरा ये च हिंसाप्रिया नराः ॥ ४८ ॥ वित्तार्थं ये च कुर्वंति दानयज्ञादिकां क्रियाम् ॥ गोष्ठाग्निजलरथ्यासु तरुच्छाया
मठेषु च ॥ ४९ ॥ त्यजंत्यमेध्यं गुरुका आरामायतनेषु च ॥ मद्यपानरता नित्यं गानवाद्यरतानराः ॥ ५० ॥ केलीकलाप्रसंगा
श्चरं ध्यात्वेषगानतत्पराः ॥ वंदीषुका भिक्षुकाश्चैव श्मश्रुभिः शांकुभिरेव वा ॥ ५१ ॥ ये मार्गान्मुषयंति परस्त्रीणां हरंति च ॥ कूटशासन
कर्त्तारः कूटकर्मक्रियारताः ॥ ५२ ॥ कूटपुत्राश्च त्राता कूटसंख्यावतारिणः ॥ धनुर्बाणास्त्र समस्त्राणां यः कर्त्ता यश्च विक्रयी ॥
५३ ॥ निर्दयोऽतीवभृत्येषु पशूनां दमकश्च यः ॥ मिथ्याप्रवदतो वाक्यमाकर्णयति यः शनैः ॥ यः स्वयं मिष्टमश्नाति विप्रा

हिंसापरा

चाप्राप्तिद
दद्यात् ६

15

॥ राम: ॥
॥ १४ ॥

पत्न्यर्थम्

= व्रतम् १

पामन्नमुपभुञ्जति ॥ ५६ ॥ वृथापाकःसविज्ञेयोब्रह्मवादिभिर्गर्हितः ॥ नियमान्स्वार्यमैंदापयेन्नाजिनंत्यजितेंद्रिया ॥ ५७ ॥
प्रव्रज्यावासिनोयेचरहस्यानांचभेदकाः ॥ ताडयंतिचवैगायेहापयंतिचमुहुर्मुहुः ॥ ५८ ॥ दुर्वलांश्चनपुष्णांतिप्रनष्टांश्चा
हयंतिच ॥ पीडयंत्यतिभारेणसक्षतान्वाहयंतिच ॥ ५९ ॥ सार्द्धयामादपरितःसंपृक्तेषुचभुंजते ॥ येभग्नक्षतरोगार्त्तान्
स्वगोरूपान्बुभुक्षया ॥ ६० ॥ नपालयंतियत्नेनतेगोघ्नानारकानराः ॥ वृषाणांवृषणान्येवपापिष्ठागालयंतिये ॥ ६१ ॥
वाहयंतिचगांवैघ्नांतेमहानारकाःस्मृताः ॥ आश्रमंसमनुप्राप्तंक्षुत्तृष्णाश्रमपीडितम् ॥ ६२ ॥ येऽतिथिंनाभिमन्यंतेतेवै
निरयगामिनः ॥ अनाथंविकलंदीनंबालंवृद्धंकृशातुरम् ॥ ६३ ॥ नानुकंपंतियेमूढास्तेयांतिनिरयार्णवम् ॥ अजाविको
माहिषिकःसामुंद्रश्चवृषलीपति ॥ ६४ ॥ भंडविट्क्षत्रवृत्तिश्चनारकीस्याद्द्विजाधमः ॥ शिल्पिनःकारुकावैद्याहेमकारा
नटाद्विजाः ॥ ६५ ॥ कृतकौशेयसंयुक्तास्तथाप्येनारकाःस्मृताः ॥ यश्चोदितमतिक्रम्यस्वेच्छयाचाहरेत्करम् ॥ ६६ ॥ नरकेनृ
सपक्षेतयश्चदंडरुचिर्भवेत् ॥ उत्कोचकैरधिकृतैस्तस्करैश्चप्रपीड्यते ॥ ६७ ॥ यस्यराज्ञःप्रजाहृष्टापच्यतेनरकेषुसः ॥ योद्वि
जाःप्रतिगृह्णंतिनृपस्यान्यायवर्तिनः ॥ ६८ ॥ प्रयांतितेपिघोराणिनरकाणिनसंशयः ॥ पारदारिकचौराणांयत्पापंपार्थि
वस्यतत् ॥ ६९ ॥ भवेदरक्षतस्तस्माद्धोरंतस्यप्रतिग्रहः ॥ सचौरंचौरवत्तस्मेच्चौरंवाऽचौररूपवत् ॥ ७० ॥ अविचार्यनृपस्तस्मा

= भुंजंति २

॥ भविपु ॥ स्नानयल्लरकं भुञ्जेत॥ पततैलान्नपानानि मधुमांसं सुरासवम् ॥ ७१ ॥ गुडेक्षुक्षारशाकानि दधिमूलफलानि च॥ नलीकाशं पुष्प
॥ १५ ॥ पत्रमौषधं कांस्यभाजनम् ॥ ७२ ॥ उपानच्छत्रशकटमासनं शयनांबरम् ॥ ताम्रसीसं त्रपुं काचं शंखाद्यं च जलोद्भवम् ॥ ७३ ॥
वार्क्षं वा वैणवाद्यं वा गृहोपस्कराणि च॥ उर्णाकार्पासकौशेयभंगदोद्भवानि च॥ ७४ ॥ स्थूलसूक्ष्माणि वस्त्राणि ये च लो
माद्वरंति च॥ एवमादीनि चान्यानि द्रव्याणि विविधानि च॥ ७५ ॥ नरकाणि ध्रुवं यांति नराणां नात्र संशयः॥ यदा तद्वा पर
द्रव्यमपि सर्षपमात्रकम्॥ ७६ ॥ अपहृत्य नरो याति नरकं नात्र संशयः॥ एवमाद्यैर्नरः पापैः उत्क्रांतेः समनंतरम् ॥ ७७ ॥ शरी
रं यातनार्थाय पूर्वाकारमवाप्नुयात्॥ यमलोकं व्रजेत्तेन शरीरेण यमाज्ञया ॥ ७८ ॥ यमदूतैर्महाघोरैर्नीयमानाः सुदुःखि 15
ताः॥ तिर्यङ्मानुषदेहानामधर्मनिरतात्मनाम्॥ ७९ ॥ धर्मराजः स्मृतः शास्ता सुघोरैर्विविधैर्वधैः॥ विनयाचारयुक्ता
नां प्रमादात्स्खलितात्मनाम्॥ ८० ॥ प्रायश्चित्तैर्गुरुः शास्ता न चैतैर्दृश्यते यमः॥ पारदारिकचौराणामन्यायव्यवहा
रिणाम्॥ ८१ ॥ नृपतिः शासकस्तेषां प्रच्छन्नानां च धर्मराट्॥ तस्मात्कृतस्य पापस्य प्रायश्चित्तं समाचरेत्॥ ८२ ॥ नाभु
क्तस्यान्यथा नाशः कल्पकोटिशतैरपि॥ यः करोति स्वयं कर्म कारयेद्वापि मोदयेत्॥ ८३ ॥ कायेन मनसा वाचा तस्य चा ॥ रामः ॥
धोगतिः फलम्॥ ॥ इति संक्षेपतः प्रोक्ताः पापभेदाः ससाधनाः॥ ८४ ॥ कथ्यंते गतयश्चित्रा नराणां पापकर्मणाम्· ॥ १५ ॥

=, यत्र क्षयं यत्र गृहमित्यर्थः ॥
= सर्वजंतवः ३

२५ ॥ याञ्चाप्यविनिजनितैर्व्वकुभेदमिश्रैः कृत्यैः शुभाशुभफलोदयहेतुभूतैः ॥ भास्वत्सुतस्य भुवनं नरकाननेकान्संप्राप्नुवं
तिमनुजा मनुजेन्द्रचन्द्र ॥ २६ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि पापभेदकथनो नाम पंचमोऽध्यायः ॥ ५ ॥
श्रीकृष्ण उवाच ॥ अथ पापैरिमैर्यांति यमलोकं चतुर्विधैः ॥ संत्रासजननं घोरं विवशाः सर्वदेहिनः ॥ १ ॥ गर्भस्थैर्जायमानै
श्च बालैस्तरुणमध्यमैः ॥ पुंस्त्रीनपुंसकैर्वृद्धैर्ज्ञातव्यं सर्वजंतुभिः ॥ २ ॥ शुभाशुभफलं तत्र देहिनां प्रविचार्यते ॥ चित्रगुप्तादि
भिः सभ्यैर्मध्यस्थैः सर्वदर्शिभिः ॥ ३ ॥ न तेऽत्र प्राणिनः संति ये न यांति यमक्षयम् ॥ अवश्यं हि कृतं कर्म भोक्तव्यं तद्विचारित
म् ॥ ४ ॥ तत्र ये शुभकर्माणः सौम्यचित्ता दयान्विताः ॥ ते नरा यांति सौम्येन पथा यमनिकेतनम् ॥ ५ ॥ यः प्रदद्याद्द्विजेन्द्राणामु
पानत्काष्ठपादुकाम् ॥ स वराश्वेन महता सुखं याति यमालयम् ॥ ६ ॥ छत्रदानेन गच्छंति यथा छत्रेण देहिनः ॥ दिव्यवस्त्रप
रीधाना यांति वस्त्रप्रदायिनः ॥ ७ ॥ शिबिकाश्वप्रदानेन ततस्तेन सुखं व्रजेत् ॥ शय्यासनप्रदानेन सुखं यांति यमाश्रय
म् ॥ ८ ॥ आरामकर्त्ता छायासु शीतलासु सुखं व्रजेत् ॥ यांति पुष्पकयानेन पुष्पारामप्रदायिनः ॥ ९ ॥ देवायतनकर्त्ता च य
तीनामाश्रमस्य च ॥ अनाथमंडपानां च क्रीडंत्यांति गृहोत्तमैः ॥ १० ॥ देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकाः ॥ पू
ज्यमाना नरा यांति कामिकेन पथा सुखम् ॥ ११ ॥ द्योतयंतो दिशः सर्वा यांति दीपप्रदायिनः ॥ प्रतिश्रयप्रदानेन सुखं यां

पमाहृयम् ५ प्राप्नोति विविधान्भारः ५ अन्नतोयप्रदातारः

॥ भ. पु ॥

॥ १६ ॥

तिग्रहं स्वयम् ॥ १२ ॥ सर्वकामसमृद्धेन यथा गच्छति गोप्रदः ॥ येन पापानि कुर्वंति तेन प्राप्नोति नान्यथा ॥ १३ ॥ अन्नतौषध
प्रदातारः सुखं यान्ति निराकुलाः ॥ विश्राम्यमाणा गच्छन्ति तृष्णक्षुधरोगेरना ॥ १४ ॥ पादशौचप्रदानेन शीतलेन पथा व्रजेत्
पादाभ्यंगं च यः कुर्याद् अश्वपृष्ठेन स व्रजेत् ॥ १५ ॥ हेमरत्नप्रदानेन याति दुर्गाणि निस्तरन् । यानवाहनदानेन नरयानेन गच्छति
१६ ॥ सर्वकामसमृद्धात्मा भूमिदानेन गच्छति ॥ अन्नपानप्रदानेन पिबनखादंश्च गच्छति ॥ १७ ॥ इत्येवमादिभिर्दानैः सुखं
यान्ति यमक्षयम् ॥ स्वर्गो च विपुलान्भोगान्प्राप्नुवंति नरोत्तम ॥ १८ ॥ सर्वेषामेव दानानामन्नदानं परं स्मृतम् ॥ सद्यः प्री
तिकरं दिव्यं बलबुद्धिविवर्द्धनम् ॥ १९ ॥ प्राणानामपि लोकानां जीवितं हृदकं स्मृतम् ॥ पवित्रममृतं दिव्यं भक्ष्यं सर्वरसा
यनम् ॥ २० ॥ अन्नं पानं च गो वस्त्रम् शय्याच्छत्रमासनम् । परलोके प्रशस्तानि दानान्यष्टौ विशेषतः ॥ २१ ॥ अन्नदाने वि
शेषेण धर्मराजपुरे नराः ॥ यस्माद्यान्ति सुखेनैव तस्माद्धर्मं समाचरेत् ॥ २२ ॥ ये पुनः क्रूरकर्माणः पापादानविवर्जिताः
ते घोरेण पथा यान्ति दक्षिणेन यमालयम् ॥ २३ ॥ षडशीतिसहस्राणि योजनानामतीत्ययम् वैवस्वतपुरं ज्ञेयं नाना
रूपव्यवस्थितम् ॥ २४ ॥ समीपस्थमिवाभाति नराणां शुभकर्मणाम् । पापानामतिदूरस्थपथा रौद्रेण गच्छताम्
२५ ॥ तीक्ष्णकंटकयुक्तेन शर्करानिचितेन च ॥ क्षुरधारानिभैस्तीक्ष्णैः पाषाणैर्निचितेन च ॥ २६ ॥ क्वचित्पंकेन महतादुरुता

कथितं पद्यः ६

16

॥ एमः ॥

॥ १६ ॥

दूलोहसूचीभिरत्यंतम् ।

रैश्चावृतान्तके ॥ लोहसूचीनिभैर्दंशैः संछन्नेन यथा क्वचित् ॥ २७ ॥ तप्तपानविषमैः पर्वतैर्दुःखसंकुलैः ॥ घृतप्रांगा
रवुकेन यांति मार्गेणादुःखिताः ॥ २८ ॥ क्वचिद्विषमगर्त्ताभिः क्वचिल्लोष्ठैः सुपिच्छलैः ॥ घृतप्रवालुकाभिश्च तथा तीक्ष्णै
श्चशंकुभिः ॥ २९ ॥ अनेकतापैर्विततैर्व्याप्तं वंशवनं क्वचित् ॥ क्वचिद्वालुकया व्याप्तं कष्टेनैव प्रवेशनम् ॥ ३० ॥ क्वचिद्दु दुष्पांगुना ३
षांगुनाव्याप्तं क्वचिच्च करीषाग्निना ॥ क्वचित्सिंहैर्वृकैर्व्याप्तं दंशैः कीटैश्च दारुणैः ॥ ३१ ॥ क्वचिन्महाजलौकाभिः क्वचि
च्चाजगरैस्तथा ॥ मक्षिकाभिश्च रौद्राभिः क्वचित्सर्पैर्विषोल्वणैः ॥ ३२ ॥ मत्तमातंगयूथैश्च बलोन्मत्तैः प्रमाथिभिः ॥ पंथा
नमुल्लिखद्भिश्च तीक्ष्णशृंगैर्महावृषैः ॥ ३३ ॥ महाविषाणैर्महिषैरुड्डैर्मत्तैश्च बाधकैः ॥ डांकिनीभिश्च रौद्राभिर्विक शाकिनीभिः
रालैश्च राक्षसैः ॥ ३४ ॥ व्याधिभिश्च महाघोरैः पीड्यमाना व्रजंति च महाधूलीविमिश्रेण महाचंडेन वायुना ॥ ३५ ॥ महा
पाषाणवर्षेण हन्यमाना निराश्रयाः ॥ क्वचिद्विद्युत्प्रपातेन दार्यमाणा व्रजंति च ॥ ३६ ॥ महता बाणवर्षेण विध्यमाना महता २
श्च सर्वशः ॥ पतद्भिर्वज्रसंघातैरुल्कापातैश्च दारुणैः ॥ ३७ ॥ घृतप्रांगारवर्षेण दह्यमाना व्रजंति च ॥ तप्तेन पांशुवर्षे
ण पांशुवर्षेण पूर्यमाणा रुदंति च ॥ ३८ ॥ महामेघरवैर्घोरैर्वित्रास्यंते मुहुर्मुहुः ॥ निशितायुधवर्षेण वर्ष्यमाणा नरैर्वृ
ताः ॥ ३९ ॥ महाक्षाराम्बुधाराभिः सिच्यमानाऽव्रजंति च ॥ महाशीतेन मरुता तीक्ष्णेन परुषेण च ॥ ४० ॥ समंतात्सीर्यमा
म्रियमाणास्ते = ।

विद्युत्तापेन दह्यमाना ४ =

कृष्यमाणा ५ पापकारिणः २

॥ मथुरा ॥
॥ १७ ॥

नाल्पे पुण्यं तेसंवृतिव ॥ दुःखं मार्गो महारौद्रो याम्या वैधाहितेनव ॥ ४१ ॥ निरालंबेन दुर्गेन निर्जलेन समंततः ॥ अतिश्रामेण म-
हता निर्गतानां पाप्मयोगाच ॥ ४२ ॥ नमोरूपेण क्षेत्रेन सर्वदुःखाश्रयेण च ॥ नीयंते देहिनः सर्वे ये मूढाः पापकर्मिणः ॥ ४३
यमदूतैर्महाघोरैस्तदाज्ञाकारिभिर्बलात् ॥ एकाकिनः पराधीना मित्रबंधुविवर्जिताः ॥ ४४ ॥ शोचंतः स्वानि कर्मा-
णि रुदंतश्च मुहुर्मुहुः ॥ प्रेतभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ॥ ४५ ॥ कृशांगा भीतभीताश्च दह्यमानाः क्षुधाग्नि-
ना ॥ बद्धाः शृंखलपाशैश्च उत्तानाः पादयोर्नराः ॥ ४६ ॥ आकृष्यंते घृष्यमाणा यमदूतैर्बलोत्कटैः ॥ पुनश्चाधोमुखाश्चा-
न्ये घृष्यमाणाः सुदुःखिताः ॥ ४७ ॥ केशपाशनिबद्धाश्च कृष्यंते रज्जुभिर्नराः ॥ ललाटे चांकुशैस्तीक्ष्णैर्भिन्नाः कृष्यंति
देहिनः ॥ ४८ ॥ उत्तानाः कंटकानाश्च पृष्ठे विदंगारव कर्षिताः ॥ पश्चाद्बाहुं समबद्धाश्च जठरे च प्रपीडिताः ॥ ४९ ॥ पीडिताः शृंखला-
भिश्च हस्तयोश्च प्रकीलिताः ॥ ग्रीवायामर्द्धचंद्रेण कृष्यमाणास्ततस्ततः ॥ ५० ॥ शिश्ने च वृषणे बद्धा नीयंते चर्मरज्जु-
ना ॥ विभिन्ना उदरे चान्ये तत्र शृंखलपाशनैः ॥ ५१ ॥ कृष्यंते कर्णयोश्चान्ये भिन्नाश्च चिबुकोपरि ॥ छिन्नाग्रपादह-
स्ताश्च छिन्नकर्णोष्ठनासिकाः ॥ ५२ ॥ संछिन्नशिश्नवृषणा भिन्नभिन्नांगसंधयः ॥ पच्यमानाः कुंतैश्च तापकै-
श्च ततस्ततः ॥ ५३ ॥ भिद्यमानाः प्रधावंति क्रंदमाना निराश्रयाः ॥ मुद्गरैर्लोहदंडैश्च हन्यमाना मुहुर्मुहुः ॥ ५४ ॥ क

क्षुधाग्निना ४

17

प्रपीडिताः =

॥ रामः ॥
॥ १७ ॥

केशपाशनिबद्धांश्च तास्ताः कर्षयंति च ६

८ चकृनःपुन२

शक्तिभिर्विविधैर्घोरैर्ज्वलिताग्निसमप्रभैः ॥ भिंदिपालैर्विभिद्यंते सर्वतः पृथग्घोरोगातनम् ॥५५॥ मांसेश्चताश्च क्रिमिभि
र्नीयंते विवशा नराः ॥ याचमानाश्च सलिलमन्नं चापि बुभुक्षिताः ॥५६॥ छायां प्रार्थयमानाश्च शीतानार्ता वह्निवायु
ना ॥ दानहीनाः प्रयांत्येव यावंतो विमुखा नराः ॥५७॥ गृहीतस्नानपाथेयाः सुखं यांति यमालयम् ॥ एवं यथातिक
ष्टेन प्राप्य यमपुरं तदा ॥५८॥ प्रज्ञापितास्तदा दूतैर्निवेद्यंते यमाग्रतः ॥ तत्र ये धर्मकर्माणस्तांश्च संमानयेद्यमः ॥
५९॥ स्वागतासनदानेन पाद्यार्घेण प्रियेण च ॥ धन्या यूयं महात्मान आत्मनो हितकारिणः ॥६०॥ येन दिव्यसुखा
र्थाय भवद्भिः सुकृतं कृतम् ॥ इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् ॥६१॥ स्वर्गं गच्छध्वमतुलं सर्वकामसमन्वि
तम् ततो भुक्त्वा महाभोगानंते पुण्यस्य संक्षयात् ॥६२॥ यत्किंचिदल्पमशुभं पुनस्तदिह भोक्ष्यथ ॥ ते चापि धर्म
राजानं नराः पुण्यानुभावतः ॥६३॥ पश्यंति सौम्यवदनं पितृभूतमिवात्मनः ॥ ये पुनः पापकर्माणस्ते पश्यंति
भयानकम् ॥६४॥ पापाविभुत्वनयनाविपरीतात्मरूपयः ॥ दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ॥६५॥ ऊ
र्ध्वकेशं महाश्मश्रुं प्रस्फुरदधरोत्तरम् ॥ अष्टादशभुजं क्रुद्धं नीलांजनचयोपमम् ॥६६॥ सर्वायुधोद्यतकरं बृहद्दंडे
न तर्जकम् ॥ महामहिषमारूढं दीप्ताग्निसमलोचनम् ॥६७॥ रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् ॥ प्रलयां

भक्ष्यंतमिव त्रैलोक्यम् १=

दुदनिर्घोषं पिबंतमिव सागरम् ॥ ६८ ॥ ग्रसंतमिव लोकानां दहंतमिव चानलम् सतस्यतत्समीपस्थः कालानल
समप्रभः ॥ ६९ ॥ कालभ्रांजनसंकाशः कृतांतस्यभयानकः ॥ मारीचोग्रामहामारीकालरात्रिः सुदारुणा ॥ ७० ॥ विविधाव्या
धयः कष्टानानारूपभयावहाः ॥ शक्तिभल्लांकुशधराः पाशचक्रासिधारिणः ॥ ७१ ॥ वज्रदण्डधरा रौद्राः खड्गतूणीधनुर्द्ध
राः ॥ असंख्याता महावीर्याः क्रूराभ्रांजनसंप्रभाः ॥ ७२ ॥ सर्वाप्रयोघातकरा यमस्ताभयानकाः ॥ अनेन परिवारेण महाघोरे
णासंवृतम् ॥ ७३ ॥ यमं पश्यंति पापिष्ठाश्चित्रगुप्तं च भीषणम् ॥ निर्भर्त्सयंतं चात्यंतं यमं स्वरूपकारिणम् ॥ ७४ ॥ चित्रगुप्तश्च
भगवान्धर्मवाक्यैः प्रबोधयन् ॥ भो भो दुष्कृतकर्माणः परद्रव्यापहारिणः ॥ ७५ ॥ गर्विता रूपवीर्येण परदारविमर्दकाः ॥ य
त्स्वयं क्रियते कर्म तत्स्वयं भुज्यते पुनः ॥ ७६ ॥ तत्किमात्मोपघातार्थं भवद्भिर्दुष्कृतं कृतम् ॥ इदानीं किं प्रतप्यध्वं पीड्यमानाः
स्वकर्मभिः ॥ ७७ ॥ भुंजध्वं तानि कर्माणि नात्र दोषोऽस्ति कस्यचित् ॥ एते च पृथिवीपालाः संप्राप्ता मत्समीपतः ॥ ७८ ॥ स्व
कीयैः कर्मभिर्घोरैर्दुःप्रज्ञा बलगर्विताः ॥ भो भो नृपा दुराचाराः प्रजाविध्वंसकारिणः ॥ ७९ ॥ अल्पकालस्य राज्यस्य कृते किं दु
ष्कृतं कृतम् ॥ राज्यलोभेन मोहाद्वा बलादन्यायतः प्रजाः ॥ ८० ॥ यस्माद्दिताः फलं तस्य भुंजध्वमधुना नृपाः ॥ क्व तद्राज्यं कल
त्रं च यदर्थमशुभं कृतम् ॥ ८१ ॥ तत्सर्वं संपरित्यज्य यूयमेकाकिनः स्थिताः ॥ पश्याम तद्बलं तुभ्यं येन विध्वंसिताः प्रजाः ॥ ८२

तुभ्यं तवेत्यर्थः षष्ठ्यर्थे चतुर्थी ।

18

: ग्रह्य ४

बलात् २=   पापिष्ठान्   आस्फोटयन्ति ४

यमदूतैस्ताड्यमानानामधुनाकीदृशंभवेत् ॥ एवंबहुविधैर्वाक्यैरुपालभ्ययमेनते ॥ १३ ॥ शोचंतःस्वानिकर्माणितस्मि
न्तिष्ठंतिपार्थिव ॥ इतिधर्मसमादिष्टान्नृपालान्धर्मराट्पुनः ॥ १४ ॥ तस्यापथंकमप्यर्थमिदंवचनमब्रवीत् ॥ भोभोचं
डमहाचण्डगृहीत्वानृपतीनिमान् ॥ १५ ॥ विशोधयध्वंपापेभ्यःक्रमेणनरकाग्निषु ॥ ततःशीघ्रंसमुत्थायनृपान्संगृह्य
पादयोः ॥ १६ ॥ भ्रामयित्वातिवेगेनविक्षिप्योर्ध्वंविगृह्यैव ॥ सर्वप्राणेनमहतात्रतप्तेनुशिलातले ॥ १७ ॥ आस्फालयं
तितरसावज्रेणेवमहाद्रुमम् ॥ ततःसरक्तस्रोतोभिःस्रवतेजर्जरीकृतः ॥ १८ ॥ सनिःसंज्ञस्तदादेहीनिश्चेष्टःसंप्रजायते ॥ त
तःसवायुनास्पृष्टःशनैरुज्जीवतेपुनः ॥ १९ ॥ ततःपापविशुद्ध्यर्थंक्षिप्यतेनरकार्णवे ॥ अष्टाविंशतिरेवाधःक्षितेर्नरकको
टयः ॥ २० ॥ सप्तमस्यतलस्यांतेघोरेतमसिसंस्थिताः ॥ रौरवप्रभृतीनांतुनरकाणांशतंस्मृतम् ॥ २१ ॥ चत्वारिंशत्समधिकं
महानरकमंडलम् ॥ येषुपापाःप्रपच्यंतेनराःकर्मानुरूपतः ॥ २२ ॥ यातनाभिर्विचित्राभिराकर्मप्रक्षयाद्भृशम् ॥ आमलप्र
क्षयाद्यद्वदग्नौध्मास्यंतिधातवः ॥ २३ ॥ तथापापक्षयात्पापाःशोध्यंतेनरकाग्निषु ॥ सुगाढंहस्तयोर्बाढंतन्त्रशृंखलयान
राः ॥ २४ ॥ महावृक्षाग्रशाखायांलंबंतेयमकिंकरैः ॥ ततस्तेसर्वयंत्रेणक्षिप्तादोलंतिकिंकरैः ॥ २५ ॥ दोलंतश्चातिवेगेन
निःसंज्ञायांतियोजनम् ॥ अंतरिक्षस्थितानांचलोहभारशतंततः ॥ २६ ॥ पादयोर्बध्यतेतेषांयमदूतैर्महाबलैः ॥ तेनभारे

त्याष्टुश्चगिरिता नतैः ५

: डौल्याम् ४

॥ मउग ॥
॥ १९ ॥

णमहता भग्नमानार्दितानराः ॥ ९७ ॥ ध्मायंति त्योनिकर्माणि गान्तूष्णानि तिष्ठंति विह्वलाः ॥ ज्वालाभिरग्निवर्णाभिर्लोहदंडैः स
कंटकैः ॥ ९८ ॥ हन्यंते किंकरैर्घोरैः समंतात्पापकारिणः ॥ ततः क्षारेण दीप्तेन वह्नेरपि विशेषतः ॥ ९९ ॥ समंततः प्रलि
प्यंते क्षतांगा जर्जरीकृताः ॥ पुनर्विदार्यचांगेषु शिरसः प्रभृतिक्रमात् ॥ १०० ॥ वृंताकवत्प्रपच्यंते तप्ततैलकटाहके ॥
विष्टापूर्णे ततः कूपे कृमीणां निचयेन तः ॥ १ ॥ मेदलक्कूयपूर्णायां वाप्यां क्षिप्यंति ते पुनः ॥ भक्ष्यंते कृमिभिस्ती
क्ष्णैर्लोहतुंडैश्च वायसैः ॥ २ ॥ श्वभिर्दंशैर्वृकैर्घोरैर्व्याघ्रैरप्यथवानरैः ॥ पच्यंते मांसवच्चापि वृंदीप्तांगारराशिषु
३ ॥ प्रोताः शलेषु तीक्ष्णेषु नराः पापेन कर्मणा ॥ तिलपिंडैरिवाक्रम्य घोरैः कर्मभिरात्मनः ॥ ४ ॥ तिलवत्संप्रपीड्यंते च
क्राख्ये नरके तथा ॥ भिद्यंते चापि तप्तेषु लोहभ्राष्ट्रेष्वनेकधा ॥ ५ ॥ तैलपूर्णकटाहेषु सुतप्तेषु पुनः पुनः ॥ वक्त्राः पी
ड्यंते जिह्वायाः सत्यप्रियवादिनी ॥ ६ ॥ संदंशेन सुतप्तेन प्रपीड्यंते च पादयोः ॥ मिथ्यागमप्रवक्तृश्चादेजिह्वस्य चाति
र्गता ॥ ७ ॥ जिह्वाद्वैक्षेत्राविस्तीर्णा हलैस्तीक्ष्णैश्च वाह्यते ॥ निर्भर्त्सयंति ये क्रूरा मातरं पितरं गुरुम् ॥ ८ ॥ तेषां वक्ष
उल्काभिर्मुखमापूर्य सेच्यते ॥ ततः क्षारेण दीप्तेन ताम्रेण त्रपुना पुनः ॥ ९ ॥ हृतेनापूर्यते, त्र्यपं तप्ततैलैश्च तन्मुख
म् ॥ दृतस्ततः पुनर्वक्त्रं भग्नमापूर्य हन्यते ॥ १० ॥ विष्टाभिः कृमिभिश्चापि सुवर्णाहरणो नरः ॥ ११ ॥ परिषजति चास्य

दीप्तांगारप्रदीप्तेषु ५

L9

॥ रामः ॥
॥ १९ ॥

ग्रां प्रदीप्तां लोहशाल्मलिम् ॥ हन्यते पृष्ठदेशे च भुजस्तीक्ष्णोर्महाघनैः ॥ दन्तैरेणातिकृष्टेन ककचेन वलीयसा ॥ १२
शिरःप्रभृति पादान्तं घोरैः कर्मभिरन्तशः ॥ पाट्यते स्थौ निमांसानि खाद्यते शोणितं स्वकम् ॥ १३ ॥ अन्नपानं न दत्तं
यैर्मर्त्यैर्नानुमोदितम् ॥ इक्षुवत्ते प्रपीड्यन्ते जर्जरीकृतमस्तकाः ॥ १४ ॥ असितालवने घोरे छिद्यन्ते खड्गखेडकैः
सर्वाभिर्भिन्नसर्वाङ्गास्तप्तशूलप्ररोपिताः ॥ १५ ॥ संबाध्यमाना नाविवशाः क्लिश्यन्ते न म्रियन्ते वै ॥ देहाद्कृत्वापमांसा
नि भिद्यन्तेऽस्थ्यीनि मुद्गरैः ॥ १६ ॥ इच्छिराकृष्यते तन्त्रां यमदूतैर्बलोत्कटैः ॥ निरस्तास्ते निरुच्छूसास्तिष्ठन्ति नरके ध्रुवम्
१७ ॥ उच्छूसन्ति सदाभ्यासे बालुकावदना कृताः ॥ रौरवे रोदमानाश्च पीड्यन्ते विविधैः शरैः ॥ १८ ॥ महारौरवपीडाभिर्म
हतीभिस्तदंतिके ॥ पादौ तास्ये गुदे चैव पार्श्वे चोरसि मस्तके ॥ १९ ॥ निखन्यन्ते घनैस्तीक्ष्णैः सुतप्तैर्लोहशंकुभिः ॥ सुत
प्तबालुकायांच प्रलुठ्यन्ते पुनःपुनः ॥ २० ॥ जन्तुपंके मग्नांगास्ते भिन्नाः क्रन्दन्ति विस्तरम् ॥ तेन तेनैव रूपेण दह्यन्ते यावदारि
कम् ॥ २१ ॥ गाम्यालिंग्यन्ते नारीं ज्वलन्तीं लोहनिर्मिताम् ॥ पर्वीकारं च पुरुषं प्रज्वलन्तं समन्ततः ॥ २२ ॥ दुश्चारिण्यः स्त्रियो
गाम्यालिंगन्ति वै दंतिच ॥ क्षिप्रधावसिवेगेन तेन मोक्षोऽस्ति सांप्रतम् ॥ २३ ॥ लंघितास्ते यथा मर्त्या पापं मुंश्चन्त यां
धेना ॥ लोहकुंभे तथा क्षिप्ताः सपिधानैः शनैःशनैः ॥ २४ ॥ मन्दाग्निनाथ पच्यन्ते स्वपापैरेव मानवाः ॥ कृतांस्रद्रवलेसा

जलंतेष

= तदनरम्र

= मधः शिरोर्ध्वपादाश्च १

स्ताः प्रक्षिप्यंते शिलासु च ॥ २५ ॥ क्षिप्यंते चांधकूपेषु दष्यंते भ्रमरैर्भृशम् ॥ कृमिभिर्भिन्नसर्वांगाः शतशो जर्ज
रीकृताः ॥ २६ ॥ सुतीक्ष्णक्षारकूपेषु क्षिप्यंते तदनंतरम् ॥ महाज्वाले च नरके पापाः फूत्कारयंति च ॥ २७ ॥ इतस्ततश्च
धावंति दह्यमानानास्तदर्चिषा ॥ पृष्ठे चानीय जंघे द्वे विन्यस्ते स्कंधयोः स्थिते ॥ २८ ॥ तयोर्मध्येन चाकृष्य बाहू पृष्ठे नगा
ढतः ॥ बध्वाः परस्परं सर्वे सुदृढं गाढरज्जुभिः ॥ २९ ॥ पीड्यंति सुसरंब्धा भ्रमरास्तीक्ष्णलोहजाः ॥ मानिनां क्रोधिनां चै
व पुरा पापस्यसंश्रयात् ॥ ३० ॥ पापानां नरके पुंसां पच्यंते वेदनं तथा ॥ शरीराभ्यंतरगतेन दारुणानां च दारुणाम् ॥ ३१
पिंडबंधः स्फुतो याम्यो महाज्वाले भयानना ॥ रज्जुभिर्वेष्टितांगाश्च प्रलिप्ताः कर्दमेन च ॥ ३२ ॥ करीषस्थवह्नौ च पच्यं
ते न म्रियंति च ॥ सुतीक्ष्णक्षारतोयेन शार्करासु शिलासु च ॥ ३३ ॥ आपापसंक्षयात्पापा पच्यंते वेदनं यथा ॥ शरी
राभ्यंतरगतैः प्रभूतैः कृमिभिर्नराः ॥ ३४ ॥ भक्ष्यंते तीक्ष्णवदनैरादेहप्रक्षयाद्भृशम् ॥ कृमीणां निचये क्षिप्ताः पू
तिमांसस्य राशिषु ॥ ३५ ॥ निष्कृष्टछिन्नहृदयाः पर्वताभ्यां च पीडिताः ॥ सुतप्तवज्रलेपेन शरीरमनुलिप्यते ॥ ३६ ॥
अधोमुखोर्द्धपादाश्च बद्धास्तप्यंति वह्निषु ॥ वदनांते प्रविन्यस्तं सुतप्तायोमयं गुडम् ॥ ३७ ॥ ने खादंति पराधीना द
ह्यमानास्तु मुद्गरैः ॥ ये शिवायतनारामवापीकूपमठांगणाम् ॥ ३८ ॥ अभिद्रवंति पापिष्टा नरास्तत्रैव संति च ॥ आया

२ अधःशिरोर्ध्वपादाश्च २

॥ राम: ॥
॥ २० ॥

20

मोदत्तंताभ्यंगस्नानमापानभोजनम् ॥ ३९ ॥ क्रीडनं मैथुनं द्यूतमाचरन्ति रमन्ति च । तेषां चैवंविधैर्घोरैरिक्षुयन्त्रादि
पीड्यते ॥ ४० ॥ निरयाग्निषु पच्यन्ते यावच्चन्द्रतारकम् येऽशृण्वन्ति गुरोर्निन्दां तेषां कर्णाः प्रपूर्यते ॥ ४१ ॥ अग्नि
वर्णैः स्वैः कीलैस्तप्तताम्रादिभिर्द्रुतैः ॥ त्रपुसीसारकूटाद्यैः क्षारेण जतुना पुनः ॥ ४२ ॥ क्रमादापूर्यते कर्णौ नरके
पुनर्यातनाः ॥ अनुक्रमेण सर्वे प्रभवन्त्येते समन्ततः ॥ ४३ ॥ सर्वेन्द्रियाणामप्येवं क्रमात्पापेन यातना ॥ भवन्ति घो
राः प्रत्येकं शरीरे तत्कृतेन च ॥ ४४ ॥ स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियम् ॥ तेषां त्वगग्निवर्णाभिः सूचीभिः
पूर्यते भृशम् ॥ ४५ ॥ ततः क्षारादिभिः सर्वैः शरीरमनुलिप्यते ॥ यातनाश्च महाकष्टाः सर्वेषु नरके पुनः ॥ ४६ ॥ गुरोः
क्रुद्धन्ति भृकुटिं क्रूरं चक्षुर्भ्यां ये नराः ॥ परदारांश्च पश्यन्ति लुब्धाः स्निग्धेन चक्षुषा ॥ ४७ ॥ सूचीभिरग्निवर्णाभिस्तेषां
नेत्रे प्रपूर्यते ॥ क्षाराद्यैश्च क्रमात्सर्वे देहे सर्वाश्च यातनाः ॥ ४८ ॥ देवाग्निगुरुविप्राणां यः निवेद्य प्रभुंजते ॥ लो
हकीलशतैस्तप्तैस्ताज्जिह्वास्यं प्रपूर्यते ॥ ४९ ॥ ततः क्षारेण दीप्तेन तैलताम्रादिभिः क्रमात् ॥ शरीरे च महाघोराश्चि
त्रा नरकयातना ॥ ५० ॥ ये ह्रिवारामपुष्पाणि लोभात्संगृह्य पाणिना ॥ जिघ्रन्ति मूढमनसा शिरसा धारयन्ति च ॥
५१ ॥ आपूर्यन्ते शिरस्तेषां सुतप्तैर्लोहशंकुभिः ॥ नासिका चातिवक्रुशस्ततः क्षारादिभिः पुनः ॥ ५२ ॥ ये निंदन्ति महा

१ येदेवारामपुष्पाणि २

देवायतनपर्यन्ते देवारामे चकृत्रवित् ५ शिवधर्मे २१ ग्रासम ६

॥ म.पु ॥
॥ २१ ॥

स्मात्मा चार्यं धर्मदेशकम् । शिवभक्तांश्च ये मूढाः शिवधर्मं च शाश्वतम् ॥ ५३ ॥ तेषामुरसि कण्ठे च जिह्वायां दन्तसंधि-
षु । तालकोष्ठे च नासायां मूर्ध्नि सर्वाङ्गसंधिषु ॥ ५४ ॥ अग्निवर्णाः सुतप्ताश्च शिखिशाला लोहशङ्कवः ॥ आखन्यन्ते सुब-
ऊ कल्पान्तेषु ते षु मुद्गरैः ॥ ५५ ॥ ततः क्षारेण तप्तेन ताम्रेणाद्रवणेन च ॥ तप्ततैलादिभिः सर्वैरापूर्यन्ते समन्ततः ॥ ५६ ॥
क्षारताम्रादिभिर्दग्धैर्दह्यन्ते च कृशाः पुनः ॥ नरकेषु च सर्वेषु विविधा देहयातना ॥ ५७ ॥ भवन्ति च कृशाः कष्टाः पापिपा-
दसमुद्गवाः ॥ शिवायतनपर्यन्ते शिवारामे च कृत्रवित् ॥ ५८ ॥ समुत्सृजन्ति ये पापाः पुरीषं मूत्रमेव वा ॥ तेषां लिङ्गं
सवृषणं कृन्त्यन्ते लोहमुद्गरैः ॥ ५९ ॥ सूचीभिरग्निवर्णाभिस्तत्तच्चापूर्यते पुनः ॥ लोहदण्डश्च सुमहानग्निवर्णः सकण्टकः ॥
५ निह्ष्णव ४ ६० ॥ आरोप्यते गुदे तेषां यावन्मूर्ध्नि विनिर्गतः ॥ ततः क्षारेण महता ताम्रेणाद्रवणेन च ॥ ६१ ॥ द्रुतेनापूर्यते गाढमु-
दरिश्चं हि देहिनाम् ॥ मनः सर्वेन्द्रियाणां च यस्मादुत्प्रवर्तकम् ॥ ६२ ॥ तस्मादिन्द्रियदुःखेन साध्यते तन्मुहुः खि-
तम् ॥ धने सत्यपि ये दानं न प्रयच्छन्ति याचिताः ॥ अतिथिं वावमन्यन्ते कालप्राप्तं गृहाश्रमे ॥ ६३ ॥ ते लोहतोरणे बद्धा
हस्तपादव ताडिताः ॥ विदारिताङ्गाः भूयन्ते निकृत्यन्ते दुरान्तं नराः ॥ ६४ ॥ हस्तपादतलान्येषु कीलितानां लोहशङ्कुभिः ॥ ॥ रामः ॥
नितम्बे च तीव्रं तं वक्रे कीलकण्ठयताडितम् ॥ ६५ ॥ कृमिभिः प्राणिभिश्चोग्रैर्लौहदंष्ट्रैश्च खाद्यते ॥ उपद्रवैर्बहुविधैः सर्वैर्म- ॥ २१ ॥

21

खरकैर्हतः ॥ ६६ ॥ आपीड्यंते सिह्लाम्हले निबध्य श्रंखलापुनः ॥ तिष्ठंति लंबमानाश्च लोहभारप्रपीडिताः ॥ ६७ ॥ क्षि-
प्येच नृपश्रोनरे लोहभारद्वयं पुनः ॥ तिष्ठते लंबमानं च वक्रभारवतुर्गलम् ॥ ६८ ॥ ततः स्वमांसमुत्कृत्य तिलमा-
त्रप्रमाणतः ॥ भोजनं दीयते तेषां स्वछ्रेणासृक्शोणितम् ॥ ६९ ॥ यदा निर्मांसतां प्राप्ताः कालेन महता पुनः ॥ ततः
क्षारेण दीप्तेन वपुस्तेषां प्रलिप्यते ॥ ७० ॥ सिच्यंते वर्षधाराभिः शोष्यंते वायुना पुनः ॥ सिच्यंते तप्ततैलेन प्रतप्तेन
समंततः ॥ ७१ ॥ पच्यंते वह्निना भूयो दूरस्थेन शनैः शनैः ॥ निशोषयांतनाभिश्चापीड्यंते क्रमशः पुनः ॥ ७२ ॥ मक्षांकु
भुभयापीगमृच्छयांति पिपासया ॥ भक्षणो नाति शीतेन पापानां समरे राव ॥ ७३ ॥ एवमादिमहाघोरा यात-
नाः पापकारिणः ॥ एकैकेनरके चैव ज्ञातशोथसहस्रशः ॥ ७४ ॥ अन्येके यातनाभिज्ञाः सर्वे ये नरके पुनः ॥ कथं व
र्णितेनापि सोढुं सर्वैश्च नारके ॥ ७५ ॥ एते च विविधैर्घोरैर्यातनाभिश्च कर्मभिः ॥ क्लिश्यंते नैव पापिष्ठा विविधाः
पापकारिणः ॥ ७६ ॥ महाघोराभिघोराख्याः कालाग्निसदृशोपमाः ॥ अन्यैरन्यैर्महारौद्रैः क्लिश्यंते मन्दचेतसः ॥ ७७ ॥
ततस्तेनात्र कथिताः पापा गच्छंति तान्क्षयम् ॥ पुत्रमित्रकलत्रार्थं यदपुराणं तया कृतम् ॥ ७८ ॥ एकाकी दह्यते ते
नन च पश्यंति तानि सः ॥ आत्मना च कृतं पापं भोक्तव्यं ध्रुवमात्मना ॥ ७९ ॥ नह्लिकस्मनोपघातार्थमद्पापंकृतंत्वया॰

अस्मादग्रे तत्रत्या यातनानां च विविधाः पापकारिणः इतिपाठ एकास्मिन्सजदेऽधिकः पृथकनयोपलभ्यते ३

एवं दूतैर्महापातकाख्यास्तेषु पतंति ततः पुनः ॥ ८० ॥ क्रियंते केन पापेन कालमाज्ञापयते नरा ॥ देवस्वविनाशेन गुरुद्रो-
हादिकर्मभिः ॥ ८१ ॥ पापात्मसर्वेषु पच्यंते नरकेष्वामहाक्षयात् ॥ महापातकिनश्चापि सर्वेषु नरकेष्विह ॥ ८२ ॥ आ-
चंद्रतारकं यावत्पीड्यंते विविधैर्वधैः ॥ महापातकिनश्चान्ये नरकार्णवकोटिषु ॥ ८३ ॥ चतुर्दश तु पच्यंते कला ये
विविधैर्वधैः ॥ उपपातकिनश्चापि तदर्धं यांति मानवाः ॥ ८४ ॥ शेषपापैस्तदर्धं तु कालं चापि तथाविधम् ॥ तस्मा-
त्पापं न कुर्वीत चंचले जीविते सति ॥ ८५ ॥ पापेन हि ध्रुवं यांति नरके तु नराः स्वयम् ॥ यः करोति नरः पापं तस्यात्मा
ध्रुवमप्रियः ॥ ८६ ॥ पापस्येह फलं दुःखं तद्भोक्तव्यमिहात्मना ॥ कथं ते पापनिरता नरास्तीव्रेषु घोरते ॥ ८७ ॥ स-
र्वाणां नरकाणां येषां नारकी तीव्रयातना ॥ एवं क्लिष्टा विभुज्याश्च सावशेषेण कर्मणा ॥ ८८ ॥ ततः क्षितिं समासाद्य पुनर्जायंति दे-
हिनः ॥ स्थावरा विविधाकारा तृणगुल्मादिभेदतः ॥ ८९ ॥ ततोऽनुभूय दुःखानि जायंते कीटयोनिषु ॥ निष्क्रांताः कीटयो-
निभ्यस्ततो जायंति पक्षिणः ॥ ९० ॥ संक्लिष्टाः पक्षिभावेन भवंति मृगजादिषु ॥ मार्गं दुःखमतिक्रम्य जायंते पशुयो-
निषु ॥ ९१ ॥ क्रमाज्जो योनिमासाद्य पुनर्जायंति मानवाः ॥ एवं योनिषु सर्वासु परिक्रम्य क्रमेण तु ॥ ९२ ॥ कालांतर-
वशाद्यांति मानुष्यमतिदुर्लभम् ॥ कृच्छ्रेणापि मानुष्यं प्राप्यते पुण्यगौरवात् ॥ ९३ ॥ विचित्रा गतयः प्रोक्ताः

मरणं तरितं येषाम् ५

अपदेशः ५

कर्मणां गुरुलाघवात्॥ मानुष्यं यः समासाद्य स्वर्गमोक्षप्रसाधकम्॥ ९४॥ द्वयोर्न साधयत्येकं स मृतस्तप्यते चिर
म् देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम्॥ ९५॥ तत्संप्राप्य तथा कुर्यान्न गच्छेन्नरकं यथा॥ स्वर्गापवर्गलाभाय
यदि नास्ति समुद्यतः॥ ९६॥ स्वर्गस्य मूलं मानुष्यं तं यत्नादनुपालयेत्॥ धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम्
९७॥ यदि लाभे न यत्नस्ते मूलं रक्ष स्वयत्नतः॥ मनुष्यत्वे च विप्रत्वं यः संप्राप्यापि दुर्लभम्॥ ९८॥ न करोत्यात्मनः श्रे
यः कोऽन्यस्तस्मादचेतनः॥ सर्वेषामेव देशानां मध्यदेशः परः स्मृतः॥ ९९॥ अतः स्वर्गश्च मोक्षश्च यद्देशः संप्राप्यते नरैः॥
एतस्मिन्भारते पुण्ये प्राप्य मानुष्यमध्रुवम्॥ २००॥ यः कुर्यादात्मनः श्रेयस्तेनात्मा रक्षितः स्वयम्। यः कुर्यान्नात्मनः॥
श्रेयस्तेनात्मा वञ्चितः स्वयम्॥ १॥ भोगभूमिः स्मृतः स्वर्गः कर्मभूमिरियं मता॥ इह यत्क्रियते कर्म स्वर्गे तदुपभुज्यते॥ २
यावत्स्वास्थ्यं शरीरस्य तावद्धर्मं समाचर॥ अस्वस्थश्चाति यत्नेन न किंचित्कर्तुमुत्सहेत्॥ ३॥ अध्रुवेण शरीरेण ध्रुवं
यः प्रसाधयेत्॥ ध्रुवं तस्य परिभ्रष्टमध्रुवं नष्टमेव च॥ ४॥ आयुषः खण्डखण्डानि निपतंति तिनवाग्रतः॥ अहोरात्रापदेशेन
किमर्थं नावबुध्यते॥ ५॥ यदा न ज्ञायते मृत्युः कदा कस्य भविष्यति॥ आकस्मिके हि मरणे धृतिं विन्देत कस्तदा॥ ६॥ प
रित्यज्य यदा सर्वमेकाकी यास्यसि ध्रुवम्॥ न ददासि तदा कस्मात्पाथेयार्थमिदं धनम्॥ ७॥ गृहीतदानपाथेयाः सुखं

= हरिम् ३

यांति महाध्वनि ॥ अन्यथा क्लिश्यते जंतुः पाथेयरहितः पथि ॥ ८ ॥ येषां द्विजेन्द्रवाहिन्यो पूर्णाभांडानुगच्छति ॥ स्वर्ग देशस्य भरतस्तेषां लाभं पदे पदे ॥ ९ ॥ इति ज्ञात्वा नरः पुण्यं कुर्यात्पापं विवर्जयेत ॥ पुण्येन याति देवत्वमपुण्यान्नरकं व्रजेत ॥ १० ॥ ये मनागपि देवेशं प्रपन्नाः शरणं शिवम् ॥ तेपि घोरं न पश्यंति यमस्य वदनं नराः ॥ ११ ॥ किं नु पापैर्महाघोरैः किंचित्कालं शिवाज्ञया ॥ भवंति प्रेतराजानस्ततो यांति शिवालयम् ॥ १२ ॥ ये पुनः सर्वभावेन प्रतिपन्ना महेश्वरम् ॥ न ते लिप्यंति पापेन पद्मपत्रमिवांभसा ॥ १२ ॥ तस्माद्विवर्धयेद्भक्तिमीश्वरे सततं बुधः ॥ तन्माहात्म्यविचारेण भवदोषविरागतः ॥ १४ ॥ पापानि पंचपरमार्थनयेव पार्थ दुःखप्रदानि सुचिरं पितृराजलोके ॥ सन्त्यानि यानि चिरकालभयानकानि वक्तुं न यांति किल तानि परिस्फुटानि ॥ १५ ॥ ॥ इति श्रीभविष्यपुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शुभाशुभफलनिर्देशो नाम षष्ठोऽध्यायः ॥ ६ ॥ ॥

परांगतिम् ४

23

श्रीकृष्ण उवाच ॥ यदेतत्ते समाख्यातं गंभीरं नरकार्णवम् ॥ व्रतोपवासनियमप्लवेनोत्तीर्यते सुखम् ॥ १ ॥ दुर्लभं प्राप्य मानुष्यं विद्युत्पतनचंचलम् ॥ तथात्मानं समादध्याद्भ्रश्यते न पुनर्यथा ॥ २ ॥ दानव्रतमयी कीर्तिर्यस्य स्यादिह देहिनः ॥ परलोकेऽपि सततं यांत्यायते ज्ञातिवर्द्धनः ॥ ३ ॥ ज्ञायते नेह नामश्च व्रतस्वाध्यायवर्जितः ॥

गतोपहविवर्जितः १

= विपिटाक्षः स्फुटितकार्वज्ञाः कृशस्फटित्वाः इत्यर्द्धःपाठ कस्मिंश्चित्पुस्तके दृश्यते ३
= श्रीवेन १

पुरुषः पुरुषं ज्ञात्वा तस्माद्भुतपरो भवेत् ॥ ४ ॥ अत्र ते कथयिष्यामि इतिहासं पुरातनम् ॥ सिद्धेन सह संवादमवंत्यां
ब्राह्मणस्य हि ॥ ५ ॥ योगर्द्धिसिद्ध्या संसिद्धः कश्चित्सिद्धो महीतलम् ॥ वचारविकृतं कृत्वा वपुः परमभीषणम् ॥ ६ ॥
निर्गीर्णदंतो लंबोष्ठः पिंगाक्षस्तनुमूर्द्धजः ॥ त्रुटितैककर्णो दुर्वर्णः शीर्णवस्त्रो महोदरः ॥ ७ ॥ विपिटाक्षः स्फुटि
तपाजुंघापादः कृशाकूर्परः ॥ दिग्नः पक्ष्मतिसंहृष्टो वभ्राम सोऽद्भुतं तविजवत् ॥ ८ ॥ ऐन्द्रजालिकविप्रेण दृष्टः पृष्टश्च को
भवान् ॥ कुतस्स्वर्गात्समायातः केन कार्येण मे वद ॥ ९ ॥ कश्चिद्दृष्टा त्वया रंभा भाभासितदिगंतरा ॥ चित्तसंमोहन
करी देवानामेकसुंदरी ॥ १० ॥ गत्वा मघवता वाक्यान्निर्वाण्यादोषदर्शिभिः ॥ आवंत्यस्त्वां कुशालिनीं पप्रच्छुतिस्माद्वि
जोत्तमः ॥ ११ ॥ सिद्धः प्रसिद्धं तं विप्रं प्राहेदं विस्मयान्वितः ॥ कथं त्वयाहं विज्ञातः स्वर्गादभ्यागतः स्फुटम् ॥ १२ ॥
ब्राह्मणोत्तम धीमाञ्च विज्ञातोऽसि मया यथा ॥ तथा ते हं प्रवक्ष्यामि क्षीणायो याव धारय ॥ १३ ॥ गात्रत्रयं शिरःपंस्था
द्वितीयं वा स्वरूपतः ॥ दृष्टास्सर्वाङ्गवैरूप्यं विज्ञातोऽसि ततो मया ॥ १४ ॥ उर्द्ध्वा प्रकृतिः साक्षादनुभूतकरी भवेत् ॥
प्रकृतेरन्यथाभावः सर्वथा लक्ष्यते जनैः ॥ १५ ॥ त्रिपुरस्थैर्देववचः श्रुत्वा जगामादर्शनं शनैः ॥ पुनः कैश्चिदहोरात्रैराज
गाम स सतां पुरीम् ॥ १६ ॥ ऐन्द्रजालकविप्रेण पृष्टः प्राहामरावतीम् ॥ गतोऽहं पृष्टवांस्तत्र रंभां विभ्रमकारिणीम् ॥ १७

= संभाव्याप्नुस्य ३

॥ भवि ॥
॥ २५ ॥

शाकस्यावसरेवृन्तेवृजन्त्याः स्वगृहं मृधा ॥ तस्मिन्देशाः समाख्याताः सावदन्कौनवेश्मितम् ॥ १८ ॥ विप्रयाकलयावा
पिपीरूपेणावृतेनव ॥ तपसावाप्युमानस्मर्ष्योदिविविज्ञायतेचिरम् ॥ १९ ॥ ब्राह्मणास्तमथोवाचमृग्याद्यधाग्नि
संभवा ॥ नभक्षयामिशाकंवृन्तैनैतेनवेत्तिमाम् ॥ २० ॥ तस्यैतद्वचनंश्रुत्वासमिद्धःसुविपश्चिधी ॥ गृहस्यामेञ
नंविप्रंजगामादर्शनंपुनः ॥ २१ ॥ कदाचिच्चरतातेनस्वर्गमार्गपदच्छया ॥ दृष्टारंभोद्विजश्रेष्ठःसर्वमेवनिवेदितम्
२२ ॥ रंभोवाच ॥ कोनजानामितंविप्रंशाकंवृन्तवारिणम् ॥ मलसालैर्षतंयंतंमहाकालवनाश्रयम् ॥ २३ ॥ दर्शनाद
थसंभाषात्पुण्यकारात्महात्मनां ॥ चतुर्धास्नेहनिर्बंधोन्तणांसंजायतेधिकः ॥ २४ ॥ तद्दर्शनंनसंभाषाकदाचित्स
दृतेनमे ॥ नामश्रवणमात्रेणस्नेहःसंदर्शितोमहान् ॥ २५ ॥ इत्येवमुक्त्वारंभोरुरंभाजंभारिणोन्तिकम् ॥ विस्मयोत्फु
ल्लनयनाजगामगजगामिनी ॥ २६ ॥ गत्वानिवेदयामासस्नेहंवृत्तविवेष्टितम् ॥ ततोहृष्टहृदयाब्राह्मणस्यवधीम
तः ॥ २७ ॥ शक्रःप्रोवाचचार्वंगींगीर्वाणहृदयंगमाम् ॥ किमानयामितंविप्रंसमीपंतवसुव्रतम् ॥ २८ ॥ दिव्यमास्यांव
रधरेदिव्यस्त्रगनुलेपनम् ॥ विमानवरमारोप्यदर्शयामालतंपुनः ॥ २९ ॥ तत्रस्थःसद्विजोभोगान्मनाक्रिसहरंभ
या ॥ शाकंवृन्तमाहात्म्यमित्येनतेनयोदितम् ॥ ३० ॥ तस्यप्रियंजगतिसर्वजनोपभोग्यमाप्नोतिशाकशिवकेशव

॥ राम: ॥
॥ २५ ॥

संवर्द्धन ५

शिववासवयोः १

वोन्निदानसमम॥ नाप्राप्यमस्तिभुवनेकुटुंबिनानांतस्मात्सदाव्रतपरेणनरेणभाव्यम्॥२१॥ ॥इतिश्रीभविष्येम
हापुराणोत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेशकटव्रतमाहात्म्यकथनंनामसप्तमोऽध्यायः॥ ७ ॥ युधिष्ठिरउ
वाच॥ ब्रह्मेशकेशवादीनांगौरीगणपतेस्तथा॥ दुर्गासूर्याग्निसोमानांव्रतानिमधुसूदन॥१॥ शास्त्रांतरेभूयशानि
तवकुक्षिगतानिच॥ तानिसर्वाणिमेदेववददेवकिनन्दन॥२॥ प्रतिपत्क्रमयोगेनविहितायस्ययातिथि॥ देवस्यत
स्यांयत्कार्यंतद्विशेषेणकीर्तय॥३॥ श्रीकृष्णउवाच॥ वसंतेकिंशुकाशोकशोभनेप्रतिपत्तिथिः॥ शुक्लातस्यांप्रकु
र्वीतस्नानंनियमतत्परः॥४॥ नारीनरोवाराजेन्द्रसंतर्प्यपितृदेवता॥ नद्यास्तीरेतडागेवागृहेवानियतात्मवान्॥
५॥ पिष्टातकेनविलिखेद्वत्सरंतुशुभाकृतिम॥ ततश्चन्दनचूर्णेनपुष्पधूपादिनार्चयेत॥६॥ दीपैश्चापिसनैवेद्यैः
पूजयेद्वत्सरंतदा॥ मासर्तुनामभिःपश्चान्नमस्कारांतयोजितैः॥ पूजयेद्ब्राह्मणान्विद्वान्मंत्रैर्वेदोदितैःशुभैः॥७
संवत्सरोऽसिपरिवत्सऽसीडावत्सरोऽभित्सरोऽसिउषसस्तेकल्पंनामहोरात्रास्तेकल्पंनामर्धमासस्तेकल्पंतांमा
सास्तेकल्पंनामृतवस्तेकल्पंतांसंवत्सरस्तेकल्पनाम्॥८॥ एवमभ्यर्च्यनामभिःपश्चात्तमभिवेदयेत॥ कालोद्भ
वैर्मूलफलैर्नैवेद्यैर्मोदकादिभिः॥९॥ ततस्तंप्रार्थयेत्पश्चात्पुरःस्थित्वाकृतांजलिः॥ भगवंस्त्वत्प्रसादेनवर्षंशुभम

मुपिष्ठकेन ५

= भाला ५

= सत्वंजयोजयी ४

॥ भविष् ॥
॥ २५ ॥

दमत्तुमे ॥ १० ॥ एवमुक्त्वा यथाशास्त्राद्दयाद्विप्राय दक्षिणाम् ॥ ललाटपट्टे तिलकं कुर्याच्चंदनपंकजम् ॥ ११ ॥ ततः प्रभृत्या
न्दिने तिलकालंकृतं मुखम् ॥ धार्यं संवत्सरं यावच्छागिते वनमस्तलम् ॥ १२ ॥ एवं नरो वा नारी वा व्रतमेतत्समाचरेत् ॥ सदै
व बहुरूपश्च सुभोगानभिभुनक्त्यसौ ॥ १३ ॥ भूताः प्रेताः पिशाचाश्च दुर्जना विविधा ग्रहाः ॥ निरर्थका भवंत्येते तिलकं वीक्ष्य
तत्क्षणात् ॥ १४ ॥ पूर्वमासीन्महीपालो नाम्ना शत्रुंजयो जयी ॥ चित्रलेखेति तस्याभूद्भार्या चारित्रभूषणा ॥ १५ ॥ तया व्रत
मिदं चैव गृहीतं द्विजसन्निधौ ॥ संवत्सरं पूजयित्वा ध्यात्वा हृदि जनार्दनम् ॥ १६ ॥ अमित्रः मित्रकामो वा समागच्छति यः पुरः
प्रयाति प्रियकृत्तस्मात् दृष्ट्वा मुखमधोमुखः ॥ १७ ॥ सपत्नी दर्पापहरा वशीकृतमहीपता ॥ भर्तुरिष्टा गृहस्था च सुखमास्ते नि
राकुला ॥ १८ ॥ तावत्करेण मिमृतो भर्ता पुत्रः सवेदनः ॥ शिरोःत्वा नाशं प्रयातः सुहृदां दुःखदायकः ॥ १९ ॥ धर्मराजपुरं
प्राप्तुं सर्वभूतापहारकः ॥ तस्मिन्क्षणे महाराज धर्मराजस्य किंकराः ॥ २० ॥ तस्य द्वारमनुप्राप्ताः पुत्रेष्टुं गृहमंजसा शत्रुंज
यं समानेतुं कालमृत्युपुरःसराः ॥ २१ ॥ पार्श्वस्थितां चित्रलेखां तिलकालंकृताननाम् ॥ दृष्ट्वा प्रणष्टसंकल्पाः परावृत्य ग
ताः पुनः ॥ २२ ॥ गते भूते पुनस्तत्र पुत्रेण सह भारत ॥ नीरुजो बुभुजे भोगान्सर्वकर्मार्जितान्शुभान् ॥ २३ ॥ एतद्व्रतं महाभा
गकीर्तितेन महोदयम् ॥ शंकरेण समाख्यातं मम पूर्वं युधिष्ठिर ॥ २४ ॥ एतत्त्रिलोकतिलकालकभूषणं तेऽख्यातं व्रतं

= भक्करेण १

॥ रामः ॥
॥ २५ ॥

25

= पितृभ्रातृपतिश्वश्रूसुतानां च तथैव च ५

सकलदुःखहरं परं च॥ इत्थं समाचरति यः स पुत्रैर्विहृत्य मर्त्ये प्रयाति पदमापदि पद्मयोनेः॥२५॥ ॥ इति श्रीभविष्ये महा
पुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलकव्रतकथनं नामाष्टमोऽध्यायः॥ ८ ॥ ॥ श्रीकृष्ण उवाच॥ आ
श्वयुक्कृष्णपक्षस्य प्रथमेऽह्नि दिनोदये॥ अशोकं पूजयेद्दक्षं प्ररूढं भमयःचवम्॥१॥ विरूढैः सप्तधान्यैश्च गुग्गुलकैः सौ
दद्दैः शुभैः॥ फलैः कालोद्भवैर्दिव्यैर्नालिकेरैः सदाडिमैः॥ २॥ पुष्पधूपादिना तद्वत्पूजयेत्तद्दिनेऽनघ॥ अशोकं पाल
वश्रेष्ठ शोकं नाप्नोति कुत्रचित्॥३॥ पितृभ्रातृपतिश्वश्रूश्वशुराणां तथैव च॥ अशोकशोकशमनो भव सर्वत्र नः
कुले॥४॥ इत्युच्चार्य ततो दद्यादर्घ्यं श्रद्धासमन्वितम् पताकाभिरलंकृत्य वस्त्रच्छत्रध्वजभवनाससा॥५॥ दमयती यथा स्वा
हा यथा वेदवती सती॥ तथाशोकव्रतादस्माज्जायते पतिवल्लभा॥ ६॥ वने पूज्यस्त्वया सद्धर्मैः सीतया संप्रदर्शितः॥ इष्ट्वा
ऽशोकं वने पार्थपत्न्या चालंकृतो वरम्॥ ७॥ कृत्या समीपे भर्तारं देवरं च तिलाक्षतैः॥ दीपालंकृतनैवेद्यधूपस्रग्वफल
र्चनैः॥८॥ अर्चयित्वा प्रार्थितोऽसौ रम्भाशोको युधिष्ठिर॥ मैथिल्या प्रांजलिर्भूत्वा भर्तावतो राघवस्य च॥९॥ चिरंजीव
तु मे वृद्धः श्वशुरः कोशलेश्वरः॥ भर्ता मे देवराश्चैव जीवंतु भरतादयः॥ १०॥ कौशल्यामपि जीवंतीं पश्येयमिति मैथिली॥
यथा चैतं महाभागा द्रुमं सत्योपयाचनम्॥११॥ प्रदक्षिणमुपावृत्य ततस्ते प्रययुः पुनः॥ एवमन्यापि या नारी पूजयेद्

= रक्तवस्त्रपरीधानम् ६

षितं नगम् ॥ १२ ॥ तिलतंडुलसंमिश्रैर्यवगोधूमसर्षपैः ॥ क्षमाप्यैवं दद्येन्मलं पात्रं पंरकूपःत्रवम् ॥ १३ ॥ मंत्रेणानेन कौ
न्तेय प्रणम्य स्त्री पतिव्रता ॥ महावृक्ष महाशाख मकरध्वजमंदिर ॥ १४ ॥ प्रार्थयेत्वां महाभाग वन्तोपवनभूषण ॥ एवमाभाष्य
तेहृवस्त्रं दत्वा विप्राय दक्षिणाम् ॥ १५ ॥ सखीभिः सहिता साध्वी ततः स्वभवनं व्रजेत ॥ १६ ॥ याः शोकनाशनमशोकतरुं तरुण्यः
संपूजयंति कुसुमाक्षतधूपदीपैः ॥ ताः प्राप्य सौख्यमतुलं भुवि मर्त्यजातं गौरीपदं प्रमुदिताःऽनराप्नुवंति ॥ १७ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलकव्रतकथनं नाम नवमोऽध्यायः ॥ ९ ॥ श्रीकृष्ण उ
वाच ॥ ज्येष्ठमासि सिते पक्षे प्रथमेऽह्नि दिनोदये ॥ देवोद्यानभवं हृद्यं करवीरं समर्चयेत् ॥ १ ॥ रक्तैस्तंतुपरीधानं गंधधूपविलेप
नैः ॥ विरूढैः सप्तधान्यैश्च नारंगैर्बीजपूरकैः ॥ २ ॥ गणकैर्घृटकैर्दिव्यैर्नालिकेरैः सुशोभनैः ॥ अभ्युक्ष्याक्षततोयेन मंत्रेणैवं
क्षमापयेत् ॥ ३ ॥ करवीर विषावास नमस्ते भानुवल्लभ ॥ मौलिमंडनसद्रत्न नमस्ते केशवेशयोः ॥ ४ ॥ आकृष्णेन रजसा व
र्तमानो निवेशयन्नमृतं मर्त्यं च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ ५ ॥ एवं भक्त्या समभ्यर्च्य दत्वा वि
प्राय दक्षिणाम् ॥ प्रदक्षिणमथो कृत्वा ततः स्वभवनं व्रजेत ॥ ६ ॥ एतद्व्रतं महाभाग सूर्याराधनकाम्यया ॥ अनसूयया च
क्षमया सावित्र्या सत्यभामया ॥ ७ ॥ दमयन्त्या सरस्वत्या गायत्र्या गंगया तथा ॥ अन्याभिरवि नारीभिर्मर्त्यलोकेऽप्यनुष्ठितम्

विकृतैः १

= पुरपार्थ २

वटकै ५

९॥ करवीरव्रतं पार्थ सर्वसौख्यफलप्रदम् ॥ ९ ॥ संपूज्य रक्तकुसुमैर्विततसर्वशाखैर्नीलैर्दलैस्तननतनतुं करवीरवृक्षम् ॥ सु
क्कामनोऽभिलषितान्यभिमतभोगानन्ते प्रयाति भवनं भरतोग्रभानोः ॥ १० ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे करवीरव्रतवर्णनं नाम दशमोऽध्यायः ॥ १० ॥ युधिष्ठिर उवाच ॥ स्त्रीभर्त्रीसहसंवठ महात्म्नेन यथा
भवेत् ॥ कुलस्त्रीणां तदाचक्ष्व व्रतं मम सुरोत्तमः ॥ १ ॥ श्रीकृष्ण उवाच ॥ यमुनायास्तटे पूर्वं मथुरा ते पुरी शुभा ॥ तस्यां राजाद्रु प्र
नाम्नाभूद्राजाराम प्रतिष्ठितः ॥ २ ॥ तस्य भार्य्या कीर्तिमाला नाम्नासीत्सुप्रथिता भुवि ॥ तया प्राप्तस्य भगवान्वसिष्ठो मुनि
पुंगवः ॥ ३ ॥ पृष्टः स तां मुनिश्रेष्ठ कथं समुपजायते ॥ वृद्धिमेति तत्सर्वं धकारणं व्रतमुत्तमं ॥ ४ ॥ एवमुक्तस्तयात्तानीव
सिष्ठः कीर्तिमालया ॥ ध्यात्वा मुहूर्त्तमाचख्यौ कोकिलाव्रतमुत्तमम् ॥ ५ ॥ श्रीवसिष्ठ उवाच ॥ आषाढपूर्णिमायां तु संध्या
काले ह्युपस्थिते ॥ संकल्पयेन्मासमेकं श्रावणेऽहः शुभं त्वहम् ॥ ६ ॥ स्नानं करिष्ये नियता ब्रह्मचर्यस्थिता सती ॥ भोक्ष्यामि न
क्तं भूशय्यां करिष्ये प्राणिनां दयाम् ॥ ७ ॥ इति संकल्प्य गृह्णीयो नारी वा ब्राह्मणान्तिके ॥ ग्रामान्तु स्नानतः प्रातः सर्वसाम
ग्रिसंयुतः ॥ ८ ॥ गृह्णीयः प्रतिपत्कालादेवं तथा यत्नपूर्वकम् ॥ नद्यां गत्वा तथा वाप्यां तडागे गिरिनिर्झरे ॥ ९ ॥ स्नानं कुर्या
द्दनी पार्थ सुगंधामलकैस्तिलैः ॥ दिनाष्टकं तथा पश्चात्सर्वौषध्याः ततः पृथक् ॥ १० ॥ वचया शोषतः पिष्ट्वा शिरो रुहवि

॥ भविष्य ॥
॥ २७ ॥

= तर्प्पयित्वा तिलपिष्टैः कोकिलाः पक्षिरूपिणीः कलकंठीः १

मर्दनम् ॥ स्नात्वा ध्यात्वा रविं चैव वर्द्धयित्वा पितॄन् तथा ॥ ११ ॥ तर्प्पयित्वा तिलपिष्टैः कोकिलां पक्षिरूपिणीम् ॥ कल
कंठीं शुभैः पुष्पैः पूजयेच्चंपकोद्भवैः ॥ १२ ॥ पत्रैर्वा धूपनैवेद्यदीपालक्तकचंदनैः ॥ तिलतंडुलदूर्वाग्रैः पूजयित्वा क्षमा
पयेत् ॥ १३ ॥ नित्यं तिलव्रती भक्त्या मंत्रेणानेन पार्थिव ॥ तिलसहे तिलसौख्ये तिलवर्णे तिलप्रिये ॥ १४ ॥ सौभाग्यं
द्रव्यपुत्रांश्च देहि मे कोकिले नमः ॥ इत्थंत्वार्च्यततः पश्चाद्गृहमभ्येत्य संयतः ॥ १५ ॥ कृत्वाहारं स्वपेत्पार्थ यावन्मासः स
माप्यते ॥ मासांते ताम्रपात्रं तु कोकिलां तिलपिष्टजाम् ॥ १६ ॥ रत्ननेत्रां स्वर्णपक्षां ब्राह्मणाय निवेदयेत् वस्त्रैर्द्धा
न्यैर्गुडैः शुक्लांश्चाघराणां कुंडले पचा ॥ १७ ॥ श्वश्रूश्वशुरवर्गे वा देवरे वा पुरोहिते ॥ आसेवा संप्रदातव्या व्रतिभिः शुभ
काम्यया ॥ १८ ॥ एवं या कुरुते नारी कोकिलाव्रतमादरात् ॥ सप्तजन्मानि सौभाग्यं सा प्राप्नोति सुविस्तरम् ॥ १९ ॥ नि:
सापत्न्यं पतिं भक्तं सस्नेहं प्राप्य भूतले ॥ मृता गौरीपुरं याति विमानेनार्कवर्चसा ॥ २० ॥ एतद्व्रतं वसिष्ठेन मुनिना
कथितं पुरा ॥ तया चानुष्ठितं पार्थ समस्तं कीर्तिमालया ॥ २१ ॥ तस्माश्च सर्वसंपन्नं वसिष्ठवचनादिह ॥ पुत्रसौ
भाग्यसंमानैश्वर्यप्रसादजम् ॥ २२ ॥ एवं यास्यापि कौंतेय कोकिलाव्रतमादरात् ॥ करिष्यति ध्रुवं तस्याः सौ

27

॥ राम ॥
॥ २७ ॥

भाग्यं च भविष्यति ॥ २३ ॥ ये कोकिलां कलरवां कलकंठपीठां यच्छंति माषतिलपिष्टमयीं द्विजेभ्यः ॥ ते नंदनादि
भुवनेषु विहृत्य कामं समर्त्ये समेत्य मधुरध्वनयो भवंति ॥ २४ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे कोकिलाव्रतं नामैकादशोऽध्यायः ॥ ७७ ॥ ॥ श्रीकृष्ण उवाच ॥ अथ पापापहं वक्ष्ये बृहद्व्रतमनु
त्तमम् ॥ सुरासुरमुनीनां च दुर्ल्लभं विधिनाश्रुतम् ॥ १ ॥ पर्वणापाभ्यद्रुजस्यांते पायसं घृतसंयुतम् ॥ नक्तं भुंजीत शुद्धा
त्मा ओदनं वैक्षवान्वितम् ॥ २ ॥ आचम्याथ शुचिर्भूत्वा बिल्वजं दंतधावनम् ॥ भक्षयित्वा महादेवं प्रणम्येदमुदी
रयेत् ॥ ३ ॥ अहं देवव्रतमिदं कर्त्तुमिच्छामि शाश्वतम् ॥ तवाज्ञया महादेव यथा निर्वहते कुरु ॥ ४ ॥ इत्येवं नियमं कृ
त्वा यावद्वर्षाणि षोडश ॥ तिथयः प्रतिपत्पूर्वा भजिष्यामी [illegible]नुक्रमात् ॥ ५ ॥ ततो मार्गशिरे मासि प्रतिपद्यपरे
हनि ॥ एकभुक्तं चोपवासं महादेवं स्मरन्मुहुः ॥ ६ ॥ स्नात्वा देवं समभ्यर्च्य रात्रौ प्रज्वाल्य दीपकान् ॥ यमुनां च महादेवं
नत्वा पुष्पाञ्जलिमंत्रयेत् ॥ ७ ॥ महादेवरतान्विप्रान्सपत्नीकान्नानव्रतान्स ॥ षोडशाष्टौ तदर्द्धं वाऽप्येकं वा शक्तितो चेभ्यया
न ॥ आमंत्र्य स्वगृहं गत्वा महादेवं स्मरन्स्थितो ॥ शुचिवस्त्रास्तृतायां तु निराहारो निशि स्वपेत् ॥ ९ ॥ भास्करोदयमासा
द्य स्नात्वा चापयदीपकान् ॥ नैवेद्यं स्नपनं पुष्पं धूपं गच्छेच्छिवालये ॥ १० ॥ अभ्यंगयित्वा देवेशं कषायैश्च विरूक्ष

येन॥ स्नापयेत्पंचगव्येन पयसा तदनंतरम्॥११॥ घृतेन मधुना दध्ना रसेन पयसा पुनः॥ तिलांबुना ततः स्नाप्य
स्नापयेच्छुद्धवारिणा॥१२॥ लेपयेत्तु घनं पश्चात्कर्पूरागरुचंदनैः॥ पुष्पैः संपूज्य दातव्यं हैमं शिरसि पंकजम्॥१३
वस्त्रयुग्मं पताकांचैवर्णं वितानकम्॥ धूपंदीपंचघंटांचदद्याद्देवस्यशक्तितः॥१४॥ पश्चान्निवेदयन्नैवेद्यं नत्वा स्व
भवनं व्रजेत्॥ सुसमिद्धं ततः कृत्वा पूजयेज्जातवेदसम्॥१५॥ व्रतिनश्च तथा सार्द्धं भोजयेन्मिथुनानि च॥ हेम
वस्त्रादिदानेन यथाशक्त्या क्षमापयेत्॥१६॥ एवं विसर्ज्य तान्सर्वान्सार्द्धं बंधुजनैः स्वयम्॥ प्राशयित्वा पंचगव्यं
हृष्टो भुंजीत वाग्यतः॥१७॥ एवमेव विधिं कृत्वा प्रारभेल्लिङ्गतो धनी॥ वित्तसामर्थ्यतश्चैव प्रतिमासं च कृत्स्नशः
१८॥ वित्तहीनो यथा कश्चित्कुर्याच्च पुनःपुनः॥ पुष्पार्चनविधानेन सर्वमेतत्समाचरेत्॥१९॥ प्रतिमासमुपोष्यै
वं प्रतिपत्कार्तिकावधौ॥ पारयेत्तं कृतं पार्थ प्रारंभविधिना कृत्स्नम्॥२०॥ द्वितीयेब्दे पंचदश्यां कृत्वा नक्तं नराधिपः॥
प्रतिपत्स द्वितीयायां च तस्यामुपवसेत्सुधीः॥२१॥ द्वितीयोपवसेच्चक्रान्ततः प्रभृति वत्सरम्॥ प्रारंभविधिना चैवं
द्वितीयामपि पारयेत्॥२२॥ इपवालद्वयं कृत्वा तृतीयां प्रारभेत्ततः॥ अनेनक्रमयोगेन यावद्वर्षं समाप्यते॥२३
कृत्वैवं षोडशो वर्षे पर्णमास्यां समुद्यतः॥ पूर्ववद्देवमभ्यर्च्य कृशानुं वाभितर्प्य व॥२४॥ हेमशृंगीं रौप्यखुरां सघंटां

28

कांस्यदोहनाम् । महादेवाय गां दद्याद्दीक्षिताय द्विजाय ते ॥ २५ ॥ शिवभक्तिरतान्विप्रान्विभूष्यांश्चैव षोडश । वस्त्राभरणदानैश्च शक्त्या संपूजयेद्व्रती ॥ २६ ॥ ब्राह्मणांश्च यथाशक्त्या भोजयेदपरानपि । अन्येषां चक्षुधार्त्तानां दद्यादानयथेछया ॥ २७ ॥ इहतपो व्रतं चैव बहुप्राप्य यशो धनाम् । अमर्त्यवादिषु लोकेषु भूरिभोगप्रदं नराणाम् ॥ २८ ॥ चतुर्णामपि वर्णानां स्वर्गसोपानवत्स्थितम् । नकुर्याद्योधनं प्राप्य समनुष्ठानष्टचेतन ॥ २९ ॥ धन्यमायुःप्रदं पुण्यं रूपसौभाग्यवर्द्धनम् ॥ स्त्रीपुंसयोश्च निर्दिष्टं व्रतमेतत्सनातनम् ॥ ३० ॥ विधवयापि कर्त्तव्यं भर्त्तोःऽवैधव्यहेतवे । सधवयापि कर्त्तव्यमवियोगाय सद्व्रतम् ॥ ३१ ॥ उपोष्य प्रतिमासं तु भुंजीत ब्राह्मणैः सह । एकद्वित्रिचतुर्भिर्वा स्वशक्त्या पांडुनंदन ॥ ३२ ॥ अंते चांते स्ववर्णानां प्रारंभविधिनाचरेत् ॥ पुण्यसंभारमन्विकृत्नामयित्वा शिवालयम् ॥ ३३ ॥ व्रतविघ्ने महाराजजाते दैवात्कथंचन । तावत्यस्तिथय भ्रष्टास्ताः समुपोष्याः समाप्नये ॥ ३४ ॥ अथ स्त्री पुनरं कश्चिद्व्रतं कर्त्तुमसमुद्यतः ॥ विधिनानेन राजेंद्र तेनग्राह्यं तिथिद्वयम् ॥ ३५ ॥ अंते चांते च वर्षाणां प्रारंभविधिनाचरेत् ॥ अथारब्धे व्रते कश्चिदसमाप्ते म्रियेत चेत् ॥ ३६ ॥ सोपि तत्फलमाप्नोति सत्यारंभप्रभावतः ॥ वाचकाः श्रावकाश्चैव व्रतस्यास्य युधिष्ठिर ॥ ३७ ॥ भवंति पुत्रसंश्लिष्टाः शिवधानानुभावतः ॥ ३८ ॥ पुण्यं बृहत्तपदुर्दं व्रतमादराद्ये कुर्वंति षोडश समा निरताः स्वधर्मे ॥ ते भानुमंडलमभेद्यमविंस्य

माघं भित्वा प्रयान्ति शाश्विश्वेश्वरपादमूलम् ॥ ३९ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्व्वणि श्रीकृष्णयुधिष्ठिरसं
वादे वृहत्तपोव्रतवर्णनं नाम द्वादशोऽध्यायः ॥ १२ ॥ युधिष्ठिर उवाच ॥ जातिस्मरत्वं देवेश दुष्प्राप्यमिति मे मतिः ॥ त
दहं ज्ञातुमिच्छामि प्राप्यते केन कर्म्मणा ॥ १ ॥ व्रतदानाद्देवानामृषीणां सेवनेन वा ॥ तीर्थस्नानेन तद्देव तपो होमव्रते
न वा ॥ २ ॥ श्रीकृष्ण उवाच ॥ चत्वारि राजन्भद्राणि समुपोष्याणि यत्नतः ॥ तत्प्रभावाद्भवेन्नूनं राजं जातिस्मरो नरः ॥ ३ ॥
शुभोदयः पुरा वैश्यो वभूव यमुनातटे ॥ तेन व्रतमिदं चीर्णमनन्तः कालक्रमादसौ ॥ ४ ॥ संजयस्य सुतो जातः स्वर्णष्ठी
वीति विश्रुतः ॥ व्रतप्रभावाज्जातिज्ञः सर्वचौरैर्निपातितः ॥ ५ ॥ नारदस्य प्रभावेण पुनरुज्जीवितेऽप्यसौ ॥ तस्मात्
पर्व्वहृतांतं सकलं व्रतधर्म्मतः ॥ ६ ॥ युधिष्ठिर उवाच ॥ संजयस्य कथं पुत्रः स्वर्णष्ठीवीति वा कथम् । दस्युभिश्च कथं नी
तो मृत्युं वैजीवितः कथम् ॥ ७ ॥ श्रीकृष्ण उवाच ॥ संजयो नाम राजासीत्कुशावत्यां नराधिप ॥ तस्य देवर्षा मित्रो च
सदा नारदपर्व्वतौ ॥ ८ ॥ एकदा संजयगृहं सम्प्राप्तौ तौ यदृच्छया ॥ स्वागतासनदानाद्यैरुपचारैरपूजयत् ॥ ९ ॥ तेषा
मथोपविष्टानां पर्व्वहृतांत भाविणी ॥ संजयस्य सुता प्राप्ता नरस्त्री पितुरन्तिकम् ॥ १० ॥ पर्व्वतः प्राह राजानं कस्येयं
वरवर्णिनी ॥ गुप्तगुल्फा सहंतोरुः पीनश्रोणिपयोधरा ॥ ११ ॥ पद्मपत्रेक्षणा तन्वीपद्मकिंजल्कसप्रभा ॥ साक्षाच्चित्त

29

मृदुस्निग्धैः केशैरविततैर्घनैः ॥ १२ ॥ सविलासागतिः सुनासा कोकिलस्वरा ॥ अहो रूपमहो धैर्यमहो लावण्यमुत्तमम्
१३ ॥ तिलपुष्पस्फुटानासा रूपं संपरिलक्ष्यते ॥ कस्येयं बालिका भद्रा मम भाति हृदयंगमा ॥ १४ ॥ एवं ब्रुवाणं तं विप्रं विस्मयो
त्फुल्ललोचनम् ॥ स राजा प्राह कन्येयं दुहिता मम पार्वत ॥ १५ ॥ अथोवाच वचनं धीमान्नारदः स्फुरितेन्द्रियः ॥ राजन्निवे
दकामोऽहं कन्येयं मम दीयताम् ॥ १६ ॥ यच्चिन्तितं तव दास्यामि वरं मर्त्येषु दुर्लभम् ॥ एवमुक्तो नारदेन प्रीतात्मा संजयस्त
था ॥ १७ ॥ कृताञ्जलिरुवाचेदं प्रहर्षोत्फुल्ललोचनः ॥ पुत्रो मे दीयतां क्षिप्रमक्षीणकनकाकरः ॥ १८ ॥ यस्य मूत्रं पुरीषं
वा श्लेष्मा लालां क्षिपति क्षितौ ॥ जातरूपं हि तत्सर्वं सुवर्णं भवतु स्थिरम् ॥ १९ ॥ एवमस्त्विति तं राजन्नारदः प्रत्यभाषत
सुवर्णष्ठीविनं पुत्रं ददामि तव सुव्रत ॥ २० ॥ एवमुक्तः सुतां कन्यां सालंकारां सुमध्यमाम् ॥ विवाहयामास तनया नारदे
हृष्टमानसः ॥ २१ ॥ ततस्तच्चेष्टितं दृष्ट्वा पर्वतः क्रोधमूर्छितः ॥ उवाच नारदं रोषाद्दीप्ताभः स्फुरिताधरः ॥ २२ ॥ मयेयं प्रा
र्थिता पूर्वं त्वया यस्माद्विवाहिता ॥ तस्मात्त्वया सह स्वर्गं न गन्तासि कथंचन ॥ २३ ॥ दत्तस्त्वयास्य यः पुत्रो वरदानेन ना
रद ॥ सोऽपि चौरैरभिहतः पञ्चत्वमुपयास्यति ॥ २४ ॥ एवमुक्तः पर्वतेन नारदः प्राह दुर्मनाः ॥ न त्वं धर्मं विजानासि कि
ल्बिन्नृतोऽसि दुर्मते ॥ २५ ॥ सामान्यं सर्वभूतानां कन्या भवति सुव्रत ॥ न तस्या वरणे दोषः एवं पश्यन्तीह बहुश्रुताः ॥ २६

दोषम् १

नसेवितान्यथावृत्तास्तेनमांसापसेवया॥ पाणिग्रहणमंत्राणां निष्ठास्यात्सप्तमेपदे॥२७॥ यस्माद्देवदविज्ञायशा
पसेमामनागसम्॥ तस्मात्त्वमप्यहोस्वर्गंनगंतासिमयाविना॥२८॥ संजयस्यसुतःशापाद्यदिपंचत्वमेष्यति॥ आ
नयिष्यतेतथाप्येतंयमलोकान्नसंशयः॥ २९॥ एवंशप्त्वातदान्योन्यंदेवर्षीतावुभौततः॥ पूजितौसंजयेनाथजग्मतुः
स्वाश्रमंप्रति॥३०॥ अथास्यसमयेसाक्षिजातःपुत्रोनृपस्यसः॥ स्वर्णष्ठीवीतिनामास्ययथार्थमकरोत्पिता॥३१॥
जातिस्मारःस्मरन्पूर्वंस्वर्णष्ठीव्यतिकारणम्॥ सर्वमन्तर्हितज्ञोऽभूद्भुतफलादिहः॥ ३२॥ मूत्रश्लेष्मपुरीषादियत्कि
ञ्चित्क्षिपतिक्षितौ॥ जायतेकनकंसर्वंप्रसादान्नारदस्यच॥३३॥ तेनासौयजतेराजाविधिवद्भूरिदक्षिणैः॥ राजसूयादि
भिर्यज्ञैर्विविधैर्बह्लगोहृतः॥ ३४॥ बभारम्यानानिशांपूर्णांचस्वजनानर्थिनाम्॥ चकारदेवतागारसत्प्यारामवापिकाः
३५॥ जातस्नेहस्तथापुत्रेरक्षोक्षितिभिर्हतः॥ राज्ञायःकनकस्यास्यवपुर्नृपतेःसुतान्॥३६॥ अथास्यदस्यवःकेचिद्धु
त्वातंकनकाकरम्॥ धनलोलुपयाजग्मुर्दाक्षिण्यान्नामतोहृताः॥ ३७॥ तस्मिन्विनष्टेनष्टंवारत्नंतत्समुद्भवम्। कन
कंतदपश्यंतोजग्मुरन्योन्यमनःसयम्॥३८॥ पातितंदस्युभिःपुत्रंदृष्ट्वाराजासुदुःखितः॥ विललापाकुलमतिःसम्मो
हमयानच॥३९॥ विलपंतंनृपंदृष्ट्वानारदःप्राहसंजयम्॥ राजन्विषादंमाकार्षीःप्रतिविमांभारतींमम॥ ४०॥ पुन

30

त्कासप्तमासवत्सौ चरितानि महौजसाम् ॥ विप्रिष्ट्वानां नरेंद्राणां यतीनां दक्षिणावताम् ॥ ४१ ॥ कृत्वा राज्ञा नरें-
द्राणां चरितानि महात्मनाम् ॥ विनष्टशोकः सहसा प्रकृतिस्थोऽभवत्सः ॥ ४२ ॥ नारदोऽपि नरेंद्रस्य मृतं पुत्रं यमालया-
त् ॥ आनयामास तरसा तथारूपं यथाहृतम् ॥ ४३ ॥ दृष्ट्वा स्वपुत्रं सपुत्रं तं परितुष्टेन चेतसा ॥ व्रीडितो विस्मितश्चैव
कृतांजलिरथाब्रवीत् ॥ ४४ ॥ किमाश्चर्यं प्रसन्नेन भवता मम नारद ॥ दत्तः पुत्रस्तथा मृतो दस्युभिर्घातितो यथा
४५ ॥ यत्त्वमासांते पुनरस्सौ जीवितं सर्वमेव तत् ॥ तस्मात्पूर्ववृत्तांतं भद्राणां पारणां किल ॥ ४६ ॥ श्रुतं तेन सर्वमाख्या-
तं ज्ञातिस्मरणाकारकम् ॥ व्रतं व्रताधिकं श्रेष्ठं किमन्यत्कथयामि ते ॥ ४७ ॥ श्रीकृष्ण उवाच ॥ ब्राह्मणाश्चैव मद्भाश्च कुले
महति जन्म च ॥ दाताक्षमी यती वाग्मी रूपी स्वेर्मडकैर्भवेत ॥ ४८ ॥ चत्वारि जन्मङ्गानि चतुर्ष्वा दानितानि वै ॥ तान्येव
वक्ष्ये विप्रानि बुध्या प्यास्वकृतास्माभिः ॥ ४९ ॥ मार्गशीर्षे तु प्रथमं द्वितीयं फाल्गुने तथा ॥ ज्येष्ठे तु तृतीयं राजेंद्र आख्यातं भा-
द्रपदे परम् ॥ ५० ॥ फाल्गुनामलपक्षादौ त्रीन्मासांस्तु नराधिप ॥ तद्विपुष्यमिति ख्यातं तनयाकरणं परम् ॥ ५१ ॥
ज्येष्ठस्य शुक्लपक्षादौ त्रीन्वै मासान्युधिष्ठिर ॥ तद्विरममिति ख्यातं समस्यशार्थ्यप्रदायकम् ॥ ५२ ॥ शुक्ले भाद्रपदस्यादौ
त्रीन्मासान्पांडुनंदन ॥ तद्विरंगमिति ख्यातं बहुविद्याप्रदायकम् ॥ ५३ ॥ शुक्ले मार्गशिरस्यादौ त्रीन्मासांस्तु नराधिप-

तद्विषाष्टपदं मित्र कृत्स्नं सर्वधर्मप्रदायकम् ॥ ५४ ॥ समासेनैव चोक्तानि भद्राण्येतानि भारत ॥ कर्त्तव्यानि नरैः स्त्री-
भिः ब्राह्मणानुमतेन वा ॥ ५५ ॥ युधिष्ठिर उवाच ॥ विस्तरेणोत्तमे ब्रूहि देवदेव जगत्पते ॥ भद्राणां नियमाधानं प्रधान-
नियमांस्तथा ॥ ५६ ॥ श्रीभगवानुवाच ॥ शृणु राजन्नवहितो भद्राणां विस्तरं परम् ॥ कथयिष्ये न कथितं कस्यचिद्य-
न्मया पुरा ॥ ५७ ॥ भद्रे मार्गशिरस्यादौ चत्वारस्तिथयो वराः ॥ द्वितीया च तृतीया च चतुर्थी पंचमी तथा ॥ ५८ ॥ ए-
कभुक्तासनक्तेषु त्वतिथ्यर्थां जितेन्द्रियः ॥ प्रभाते तु द्वितीयायां कृत्वा पत्काणीयकम् ॥ ५९ ॥ गृहे रत्रये समाषिकेण
तेस्नानं समाचरेत् ॥ मनो भयं च संगृह्य मंत्रैरेभिर्विचक्षणः ॥ ६० ॥ अहं तेन प्रदिष्टानि मंत्राणां विधिमुत्तमम् ॥ ये-
षां देयो न देयो वा नाप्यहं तत् स्ववशं मितं ॥ ६१ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव च योषिताः ॥ तेषां मंत्राः प्रदेयाश्चैव-
नुसंकीर्णधर्मिणाम् ॥ ६२ ॥ या स्त्री भर्त्रा वियुक्तापि स्वाचारैः संयुता शुभा ॥ सा च मंत्रान् प्रगृह्णातु सभर्त्ता तदनुज्ञ-
या ॥ ६३ ॥ स्नानं नदीतडागे वा वापी कूपगृहेऽपि वा ॥ ततो नरं फलं ज्ञेय माषिकं हि समं त्वकम् ॥ ६४ ॥ मृदं संत्रेणासं-
गृह्य सर्वांगेषु प्रलापयेत् ॥ त्वं मृदे वंदिता देवैः सनलेहैं स्पर्घानि भिः ॥ ६५ ॥ मया पि वंदिता भक्त्या मामतो विमलं कु-
रु ॥ ६६ ॥ स्नानमंत्रः ॥ एवं जपन्मृदं दत्वा स्वहस्ताये समं त्वकम् ॥ जलावगाहनं कुर्यात्कुण्डमालिख्य धर्मवित् ॥ ६७

मिश्रार्णकैः कृष्णतिलैर्वा सर्वौषधीः क्रमात् ॥ त्वमादिः सर्वदेवानां जगतां च जगन्मये ॥ ६८ ॥ भूतानां वीरुधां चैव रसा
नां पतये नमः ॥ गंगासागरजं तोयं पौष्करं नामदं तथा ॥ ६९ ॥ यामुनं सांनिहत्यं च संनिधानमिह कुरु ॥ ७० ॥ स्नानमंत्रः ॥
शरीरालंभनं पूर्वं कृत्वा मनसो मयांबुभिः ॥ एवं स्नात्वा समाप्लुत्य आचम्य नरः सास्थितः ॥ ७१ ॥ निवस्य वाससी शुभ्रे शुचिः प्रय
तमानसः ॥ देवान्पितॄन्मनुष्यांश्च तर्पयेत्सुसमाहितः ॥ ७२ ॥ एवं गृहीतनियमो गृहं गच्छेच्छुचिव्रतः ॥ उपविश्य ततः संज
ल्पेयावच्चन्द्रस्य दर्शनम् ॥ ७३ ॥ स्नात्वा चैव ततो नामततीयादिचतुर्दिने ॥ नमः कृष्णाच्युतानंत हृषीकेशेति च मान्
७४ ॥ चतुर्दिने द्वितीयादि देवं संपूजयेद्व्रतम् ॥ प्रथमे ह्निस्तनापूजा पादयोश्च कपालिना ॥ ७५ ॥ नाभिपूजा द्विती
ये ह्नि कर्तव्या विधिवद्धरेः ॥ सुराद्विपरतृतीयो ह्निपूजां वक्षसि विन्यसेत् ॥ ७६ ॥ चतुर्थे ह्नि जगद्धातुः पूजा शिरसि कल्पये
त ॥ ७ पौर्विलेपनैर्धूपैरर्घ्यदत्वा विभवतः ॥ ७७ ॥ पीवरैर्हरिनैवेद्यैर्दीपदानैश्च भक्तितः ॥ पूजयित्वा विधानेन वि
श्वेश्वरं व्रती ॥ ७८ ॥ ततो दिनावसाने तु मुहूर्ते निर्गते सति ॥ स एव व्रतोपात्सो मायमन्त्रान् जपन्नावभावितः ॥ ७९
शशिनं चन्द्रशशांकेन्दुनामाभिश्चक्रमशोत्तरः ॥ तृतीयादिष्वहं डस्यासंकीर्त्यार्घ्यं निवेदयेत् ॥ ८० ॥ सचार्घ्यो यादृशो देय
स्तिमशिरपेतैः ॥ ततः सम्यक्प्रवक्ष्यामि युधिष्ठिर निबोध मे ॥ ८१ ॥ वंशपात्रे सकर्पूरं दधि दूर्वाक्षतादिभिः ॥ रत्नैः स

॥ मधि ॥
॥ ३२ ॥

गुडेनभक्ष्यान्नैर्वस्त्रैर्वैदूर्यमौक्तिकैः ॥ ८२ ॥ पुष्पैः फलैः स्वकालोत्थैः खर्जूरैर्नालिकेरकैः ॥ वस्त्राच्छादनगोवाजिभूमिहे-
मगजान्वितैः ॥ ८३ ॥ सत्वपुकृत्स्यक्षद्युस्यराजलेपविधिः स्मृतः ॥ इतरस्य यथाशक्त्या फलपुष्पाक्षतोदकैः ॥ ८४ ॥ लवणांगु-
डघृतं तैलं पयः कुंभानि तैः सह ॥ अर्घैर्देवेनानि शय्यानि शय्याशिवा आविवर्द्धयेत् ॥ ८५ ॥ प्रत्यहं वर्द्धयेद्दर्भशाखिवृक्षानरोनमः
एवमर्घः प्रदातव्यः भक्त्या मंत्रविधिक्रमम् ॥ ८६ ॥ नवो नवो सि मासांते जायमानः पुनः पुनः ॥ त्रिरश्मिसमवेतावै देवा-
नाप्याययसे हरिः ॥ ८७ ॥ गगनांगणसद्दीप दुग्धाब्धिमथनोद्भव ॥ भाभासितदिगाभोग रमानुज नमोऽस्तु ते ॥ ८८ ॥ दत्वा-
र्घं द्विजराजाय सद्विप्राय निवेदयेत् ॥ निर्वर्त्यार्घ्यक्रममिदं ततो भुंजीत वाग्यतः ॥ ८९ ॥ भूमिं तु भाजनं कृत्वा पद्मपत्र-
समास्तृताम् ॥ पालाशैर्मधुपत्रैर्वा स्वरूपैर्वा शिलातले ॥ ९० ॥ समालभ्य धरां देवीं मंत्रेणानेन मंत्रवित् ॥ त्वत्तले भो-
क्तुकामोऽहं देवि सर्वरसोद्भवे ॥ ९१ ॥ मदनुग्रहाय तुष्ट्वादकुर्वन्नममृतोपमम् ॥ एवं जप्त्वा च भूत्काव ग्रासं पाकं ग-
तो नरम् ॥ ९२ ॥ आचम्य चोन्पालभ्य स्पृष्ट्वा सोमं स्वपेद्भुवि ॥ भोक्तव्यं तु द्वितीयायामक्षार लवणं हविः ॥ ९३ ॥ म-
त्स्यं तु तृतीयायां चतुर्थ्यां गोरसो नरम् ॥ घृताक्ताः सगुडाः शाल्याः पंचम्यां कृशरान्नदा ॥ ९४ ॥ शाल्लीमडेभुसर्वेषु
स दाडिमामलकतण्डुलाः ॥ प्रसाधिका घृतं गव्यं स्वपेत्लभ्य यावितम् ॥ ९५ ॥ प्रातःस्नानं ततः कृत्वा संतर्प्य पितृदे-

भोज्याः २

॥ रामः ॥
॥ ३२ ॥

32

प्रकाशेषु २ अपुत्र ४

वता ॥ भोजयेद्ब्राह्मणान्भक्त्या दद्याद्दानानि सर्जयेत ॥ ९६ ॥ समं बंधुजनैः सार्द्धं पश्चाद्भुंजीत कामतः ॥ एवं भद्रेषु
सर्वेषु त्रिमासेषु गतेषु च ॥ ९७ ॥ करोत्येनं नरो भक्त्या वर्षमेकममत्सरी ॥ तस्य श्रीर्विजयश्चैव वनितं सोमः प्रसीदति
९८ ॥ एतत्करोति या कन्या सं प्राप्नोति सा पतिम् ॥ दुर्भगा सुभगा साध्वी भवत्यविधवा सदा ॥ ९९ ॥ राज्यार्थी लभते
राज्यं धनार्थी लभते धनम् ॥ पुत्रार्थी लभते पुत्रानिति प्राह प्रभाकरः ॥ १०० ॥ योषित्कुलाकुलविवाहमनोरमालि
राध्यालयानवरतानतसन्नशोभितानि ॥ भद्रात्पकाम्यधनपुत्रकलत्रजातिज्ञातिस्मरो भवति भारत भद्रकर्त्ता ॥ १०१ ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भद्रोपवासव्रतनिरूपणं नाम त्रयोदशोऽध्यायः ॥ १३ ॥
इति प्रतिपत्कल्पः समाप्तः ॥ ॥ श्रीकृष्ण उवाच ॥ संत्यस्मात्तिथयः पार्थ द्वितीयाद्याः परिश्रुताः ॥ मासेभ्यस्तुर्मिश्चत्वारः
प्राहुः कृष्णाः कृमापहाः ॥ १ ॥ गोपिताश्च सदा लोके न प्रोक्ताश्च मया क्वचित् ॥ प्रकाशयामि ताः पार्थ स्नेहात्सर्वा मया हिताः
॥ २ ॥ एककान्तु श्रावणे मासि स्नात्वा भाद्रपदे तथा ॥ अपराश्वयुजे मासि चतुर्थी कार्त्तिके भवेत् ॥ ३ ॥ श्रावणे कलुषा नाम प्रो
क्तापादेवगीर्मला ॥ आश्विने प्रेतसंचारा कार्त्तिके च यमा स्मृता ॥ ४ ॥ ॥ युधिष्ठिर उवाच ॥ कस्मात्सा कलुषा प्रोक्ता कस्मा
त्सा गीर्मला मता ॥ कस्मात्सा प्रेतसंचारा कस्माद्याम्या प्रकीर्तिता ॥ ५ ॥ श्रीकृष्ण उवाच ॥ पुरा वृत्रवधे वृत्ते प्राग्राज्ये पुरं

ष्टे ॥ ब्रह्महत्यापनोदार्थमश्वमेधे प्रवर्त्तिते ॥ ६ ॥ क्रोधादिन्द्रेण वज्रेण ब्रह्महत्या निषूदिता ॥ षट्खण्डा च कृता क्षि
प्ताक्षेतोये महीतले ॥ ७ ॥ नारीब्रह्महनेवह्नौ संविभज्य यथाक्रमम् ॥ तस्यापंश्चावरोऽयं द्वितीयायां दिनोदये ॥ ८ ॥
नारीहृक्षनदीभूमीवह्निब्रह्महणो तथा ॥ निर्मलीकरणं ज्ञानमतोर्थं कलुषा स्मृता ॥ ९ ॥ मधुकैटभयोरक्ते पुरामग्ने
तिमेदिनी ॥ अष्टांगुलापविज्ञाता नारीणां नु रजोमलम् ॥ १० ॥ नद्यः परमलाः सर्वा वह्नेर्धूमाशिखामलः ॥ कलुषाणि
चरंतस्यां तेनैवा कलुषा मता ॥ ११ ॥ गीर्गिरा भारती वाणी या वाग्मेधा सरस्वती ॥ गीर्मलं वहते यस्माद्द्वितीया गीर्म
लामता ॥ १२ ॥ देवर्षिपितृधर्माणां निंदका नास्तिकाः शठाः ॥ तेषां सा वागमलकृता द्वितीया तेन गीर्मला ॥ १३ ॥
श्वनध्यायेषु शास्त्राणि पाठयंति पठंति च ॥ याज्ञिकास्तार्किकाः श्रौतास्तेषां शब्दापशब्दजाः ॥ १४ ॥ मलाक्रान्ता द्वि
तीयायामतोर्थं गीर्मलांवसा ॥ प्रेतास्तृपितरः प्रोक्तास्तेषां तस्यानुसंचर ॥ १५ ॥ द्वितीयायां च लोके पुनेत्तसाप्रेतसं
चरा ॥ अग्निष्वात्ता बर्हिषदश्चाज्यपाः सोमपास्तथा ॥ १६ ॥ पितृपितामहप्रेतसंचारास्प्रेतसंचरा ॥ पुत्रैः पौत्रैश्च
दौहित्रैः स्वधामंत्रैः सुपूजिताः ॥ १७ ॥ श्राद्धदानमखैस्तृप्ता यांत्यनन्तेन संचरा ॥ कार्त्तिके शुक्लपक्षस्य द्विती या
यां युधिष्ठिर ॥ १८ ॥ यमो यमुनया पूर्वं भोजितः स्वगृहे तदा ॥ द्वितीयायां महोत्सर्गे नारकीयाश्च तर्पिताः ॥ १९

पापेभ्यो विप्रमुक्तास्ते मुक्ताः सर्वे विवंधनाः ॥ भ्रामितानीतेनास्तुष्टाः स्थिताः सर्वे यहृच्छया ॥ २० ॥ तेषां महो
त्सवो वृत्तो यमराष्ट्रे सुखावहः ॥ ततो यमद्वितीयासा प्रोक्ता लोके युधिष्ठिर ॥ २१ ॥ अस्यां निजगृहे पार्थ नमो
भक्तव्यमतो बुधैः ॥ स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥ २२ ॥ दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥ स्वर्णालंकारव
स्त्राद्यैः पूजासत्कारभोजनैः ॥ २३ ॥ सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्निकाः ॥ पितृव्यभगिनीहस्तात्प्रथमायां युधिष्ठिर ॥ २४
मातुलस्य सुता हस्ताद्द्वितीयायां तु नर्न्दप ॥ पितृमातृस्वसारौ ये ते तीयायां तयोः करात् ॥ २५ ॥ भोक्तव्यं सहजायाश्च भगिन्या ह
स्ततः परम् ॥ सर्वासु भगिनीहस्ताद्भोक्तव्यं बलवर्द्धनम् ॥ २६ ॥ धन्यं यशस्यमायुष्यं धर्मकामार्थवर्द्धनम् ॥ आख्यातं सकलं स्नेहा
त्सरहस्यं मयानघ ॥ २७ ॥ यस्यां तिथौ यमुनया यमराजदेवः संभोजितो जगति सत्वरसौहृदेन ॥ तस्यां स्वसुः करतलादिह
यो भुनक्ति प्राप्नोति वित्तमथ भोज्यमनुत्तमं स ॥ २८ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवा
दे यमद्वितीयाव्रतमाहात्म्यं नाम चतुर्दशोऽध्यायः ॥ १४ ॥ युधिष्ठिर उवाच ॥ भगवन्भवता प्रोक्तं धर्मार्थादेः सुसाधनम्
गार्हस्थ्यं तच्च भवति दंपत्योः प्रीयमाणयोः ॥ १ ॥ पत्नीहीनः पुमान्पत्नी भर्त्रा विरहिता तथा ॥ धर्मकामार्थसंसिद्धौ न स्या
तां मधुसूदन ॥ २ ॥ न ब्रूहि देवदेवेश विधवा स्त्री न जायते ॥ व्रतेन येन गोविंद पत्न्याऽविरहितो नरः ॥ ३ ॥ श्रीकृष्ण उवाच ॥

व्रयत्नात् ४ अधमोत्तम ४

अशून्यशयनं नाम द्वितीयां शृणु तां मम ॥ यामुपोष्य न वैधव्यं प्राप्नोति स्त्री युधिष्ठिर ॥ ४ ॥ पत्नीवियुक्तश्च नरो न क
दाचित्प्रजायते ॥ श्रीते जगन्न निर्विघ्नः प्रियामार्द्वयदा किल ॥ ५ ॥ अशून्यशयनं नाम नदाग्राह्याव्रतानि विधिः ॥ उपवासेन
ननक्तेन तथैवायाचितेनव ॥ ६ ॥ कृष्णपक्षे द्वितीयायां श्रावणे नृपसत्तमः ॥ स्नानं नद्यां तडागे वा गृहे वा नियतात्मवा
न् ॥ ७ ॥ क्ष त्वापितृन्मनुष्यांश्च देवान्संतर्प्य भक्तिमान् ॥ स्थंडिलं चतुरस्रं तु सम्मयं कारयेत्ततः ॥ ८ ॥ तत्रस्थं श्रीधरं
श्रीशं भक्त्याभ्यर्च्य श्रिया सह ॥ नैवेद्यधूपदीपाद्यैः फलैः कालोद्भवैः शुभैः ॥ ९ ॥ इममुच्चारयेन्मंत्रं प्रणम्य जगतः पतिम् ॥
श्रीवत्सधारिन् श्रीकांत श्रीधामन् श्रीपतेऽव्ययं ॥ १० ॥ गार्हस्थ्यं मा प्रणाशं मे यातु धर्मार्थकामदम् ॥ अग्नयो मा प्रणश्यंतु मा
प्रणश्यंतु देवताः ॥ ११ ॥ पितरो मा प्रणश्यंतु मत्तो दंपत्यभेदतः ॥ लक्ष्म्या वियुज्यते कृष्णा न कदाचिद्यथा भवान् ॥ १२ ॥ तथा
कलत्रसंबंधो देव मा मे प्रणश्यति ॥ लक्ष्म्या न शून्यं वरद यथा ते शयनं सदा ॥ १३ ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन
न्मनि ॥ एवं प्रसाद्य पूजां च कृत्वा लक्ष्म्या हरेस्तथा ॥ १४ ॥ चंद्रोदये स्नानपूर्वं पंचगव्यं तु संयुतम् ॥ विप्राय दक्षिणां दद्यात्स्वश
क्त्या फलसंयुताम् ॥ १५ ॥ अनेन विधिना राजन्सावत्सासच नृपोत्तम ॥ कृष्णपक्षे द्वितीयायां श्रावणादि यथाचरेत ॥ १६ ॥
कार्तिके चाथ संप्राप्ते शय्यां श्रीकान्तसंयुताम् ॥ सोपस्करां सोदकुंभां सान्नां दद्याद्विजातये ॥ १७ ॥ प्रतिमासं च सोमाय

२ भक्युत इ

34

अर्घं दद्यात्समंत्रकम्॥ दध्यक्षतैर्मूलफलैरल्लैः सौवर्णीभाजनैः॥१८॥ गगनांगणसदीपदुग्धाब्धिमथनोद्भव॥ आ
भासितदिगाभोग रमानुज नमोस्तु ते॥१९॥ एवं करोति यः सम्यङ् नारी मासचतुष्टयम्॥ तस्य जन्मत्रयं यावद्भर्तृभंगो
न जायते॥२०॥ अभ्यङ्गस्नापनश्चैव धर्मकामार्थसाधकः॥ भवत्यष्टाहतैश्वर्यैः पुत्रपौत्राद्यसंपदः॥२१॥ नारी च पार्थ धर्म
ज्ञा व्रतमेतद्यथाविधि॥ या करोति न सा शोच्या बंधुवर्गस्य जायते॥२२॥ वैधव्यं दुर्भगत्वं च भर्तृत्यागं च सन्ततम्॥ प्राप्नोति ज
न्मत्रितयं न सा पाण्डुकुलोद्वह॥२३॥ एषा ह्यभ्यङ्गस्नापनाख्या नृपते द्वितीया ख्याता समस्तकल्मषापहाः द्वितीया॥ एतां समाच
रति यः पुरुषोऽथ योषित्साप्नोत्यसौज्ञानमनन्यमहार्हभोग्यम्॥२४॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयु
धिष्ठिरसंवादे अभ्यङ्गस्नापनव्रतमाहात्म्यं नाम पंचदशोऽध्यायः॥१५॥ श्रीकृष्ण उवाच॥ फाल्गुनेऽप्यसिते पक्षे तृतीया
यामुपोषिता॥ प्रातः स्थित्वा ब्रह्मचर्येण जटामुकुटशोभिता॥१॥ गौर्या रथगतां देवीं रुद्रध्यानपरायणाम्॥ पूजयेद्गंधकुसु
मैर्दीपालक्तकचन्दनैः॥२॥ केसरैर्मधुरैर्दिव्यैः स्वर्णमाणिक्यपूजया॥ ॐ भषिका देवमषा च भषिका ललिता उमा॥३॥
तपोवनरता गौरी सौभाग्यं मे प्रयच्छतु॥ दौर्भाग्यं मे शमयतु सुप्रसन्नमनाः सदा॥४॥ न वैधव्यं कुले जन्म ददात्वपरजन्मनि
संगासंगेमसौख्याङ्के पर्वे पर्वे स्थितामृतम्॥५॥ सुखदृष्टिस्वर्णारसं गौरी सौभाग्यप्रयच्छतु॥ एवमुच्चार्य मंत्रांश्च नारी ज्ञानव

तीमती ॥ ६ ॥ पूजयेद्ब्राह्मणोक्तैस्तु मंत्रैर्गुरुसुवासिनी ॥ जीरकैः कटुकुंडैश्च लवणैर्गुडसर्पिषा ॥ ७ ॥ हृद्यैर्नवैः फलैः स्वर्णैर्
मनोज्ञैः पुष्पबंधनैः ॥ कुसुमैः कुंकुमैर्गंधैः कालेयागुरुचंदनैः ॥ ८ ॥ सिंदूरेणातिरक्तेन वस्त्रैर्नानाविधैः शुभैः ॥ नैवेद्यैरनेक
देशोत्थैः पूपकैस्तिलतंदुलैः ॥ ९ ॥ आशोकैश्च विगुणकैर्घृतपूर्णैस्तु मोदकैः ॥ इत्येवमादिनैवेद्यैः पूजयित्वा महाद्रुमम् ॥ १०
प्रदक्षिणां ततः कृत्वा दत्वा विप्राय दक्षिणाम् ॥ एतत्करोति नेत्री उहित्वा व्रतमुत्तमम् ॥ ११ ॥ ततः प्राश्य सितुष्याप्यं त्रैलो
क्येश्वीधरं प्रति ॥ एतद्व्रतं मयाख्यातं यास्यंति निशाश्वतीः समाः ॥ १२ ॥ आख्यानं कथयेत्तादौ हि किमिणां व्रतमुत्तमम् ॥ याश्च
रिष्यंति ताः सर्वा भविष्यंति निरामयाः ॥ १३ ॥ अंगप्रत्यंगसुभगा लोकदृष्टिमनोहराः ॥ स्थित्वा वर्षशतं चांते ततो रुद्रपुरं शु
भम् ॥ १४ ॥ यास्यंति हंसयानस्थं किंकिणीशतनादितम् ॥ तत्रत्वा रमयिष्यंति सुभर्त्रा मन्वन्तराल्पकृत् ॥ १५ ॥ दिव्यभोग
भुजो हृष्टाः सिद्धचक्रसमन्विताः ॥ १६ ॥ अर्घं महार्घमतिकुंकुमकेसराढ्यं स्वर्गंधमुग्धमुखरालिकुलोपगीतम् ॥ दत्वा फ
लाक्षतयुतं मधुपादपाय गौरीव लोकमहिता भवतीह नारी ॥ १७ ॥ इति श्री भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठि
रसंवादे मधूकतृतीयाव्रतवर्णनं नाम षोडशोऽध्यायः ॥ १६ ॥ युधिष्ठिर उवाच ॥ मेघपाली व्रतं कृष्ण कदाचित्क्रियते नृ
भिः ॥ किं फलं किमनुष्ठानं कीदृग्वल्लीस्य तानुसा ॥ १ ॥ श्रीकृष्ण उवाच ॥ आश्वयुक्कृष्णपक्षेत्तु तृतीयायां युधिष्ठिर ॥ मे

35

घपाल्यै प्रदातव्यो भक्त्या स्त्रीभिर्नरैस्तथा ॥ २ ॥ अर्घो विरूढैर्गोधूमैः सप्तधान्यसमन्वितैः ॥ तिलतण्डुलपिण्डैर्वा दातव्यो धर्मलिप्सुभिः ॥ ३ ॥ तांबूलसद्रौः पत्रैरक्ताबंश्चासमंजरी ॥ वाटीग्राममार्गेषु ग्रोत्थिता पर्वतेपि च ॥ ४ ॥ मेघपाल्यां धान्यतैलगुडकुंकुमहेमनात् । यदन्यपि च कुर्वंति नरनार्यो जनाधिप ॥ ५ ॥ पापं सत्यानृतं कृत्वाऽडकालुष्याः फलान्विताः ॥ अर्घं दत्वा मेघपाल्यै नाशयन्ति क्षणादिह ॥ ६ ॥ मानोन्मानैर्जन्ममध्ये यत्पापं कृतं विकृतं तम् ॥ तत्सर्वं नाशमायाति व्रतेनानेन पाण्डव ॥ ७ ॥ मेघपाली शुभे स्थाने शुभे देशे समुत्थिता ॥ पूजनीया वरस्त्रीभिः फलैः पुष्पैस्तथाक्षतैः ॥ ८ ॥ खर्जूरैर्नालिकेरैश्च दाडिमैः करवीरकैः ॥ गंधधूपैर्दधिदीपैर्विरूढैर्धान्यसंचयैः ॥ ९ ॥ रक्तवस्त्रैः समाच्छाद्यापिष्टान्नकविभूषिताम् । कृत्वार्घः संप्रदातव्यो मंत्रेणानेन भारत ॥ १० ॥ वेदोक्तेन द्विजो विद्वांस्तत्र तस्यै निवेदयेत ॥ इत्येवं पूजयित्वा तां मेघपालीं शुभांस्ततः ॥ ११ ॥ नारी वा पुरुषो वापि प्राप्नोति परमां श्रियम् ॥ स्थित्वा वर्षशतं मर्त्ये सुखसौभाग्यगर्विते ॥ १२ ॥ विष्णुलोकमवाप्नोति देहान्ते यानसंस्थितः ॥ कुलानि सप्त नयति स्वर्गं स्वानिरसानलात ॥ १३ ॥ उद्धृत्य नात्र संदेहस्त्वया कार्यो युधिष्ठिर ॥ १४ ॥ नरकभीरुतया दद्यान्नियोऽर्घं फलायतनु पूतेन तु मेघपाले ॥ उत्थानकूटकपटानि कृतानि यानि पापानि हन्ति सविनैव नमः प्रदीहात् ॥ १५ ॥

॥ इति श्रीभविष्योत्तरमहापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मेघपालीतृतीयाव्र

नवर्णनं नाम सप्तदशोध्यायः ॥ ११ ॥ ॥ युधिष्ठिर उवाच ॥ स्त्रीणां संपद्यते येन मर्त्यलोके गृहं शुभम् ॥ पतिप्रेमनन
था सततं तस्मै ब्रूहि व्रतं शुभम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ एकदा पार्वती हृंमस्थितैनकनिसृताहृतो ॥ कैलासशिखरे रम्ये ना
नाधातुविचित्रिते ॥ २ ॥ नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ मुनिकिन्नरसंघुष्टे गेयनृत्यसमाकुले ॥ ३ ॥ शं
करः पार्वतीं प्राह किं त्वया सुकृतं कृतम् ॥ वामारूपेण मे त्वं तु प्रियासि वरवर्णिनि ॥ ४ ॥ आगन्तुजानुदेवोनुतुष्प्रसन्ना
ननाः प्रिये ॥ ब्रूहि चाविनयं सर्वं त्वया पार्वति यत्कृतम् ॥ ५ ॥ इत्युक्ता शूलिना भर्त्रा गौरी प्राह शिवं शुभा ॥ तृतीयायां म
याचीर्णं पुरा रंभाव्रतं शुभम् ॥ ६ ॥ तेन मे त्वं मनोहारी भर्ता लब्धोसि शंकर ॥ ईश्वरी चाप्यहं स्त्रीणां नवदेहार्द्धहारि
णी ॥ ७ ॥ ईश्वर उवाच ॥ कीदृशं तद्व्रतं भद्रे सर्वसौख्यप्रदायकम् ॥ ब्रूहि पार्वति यत्नेन यच्चीर्णं पितुरन्तिके ॥ ८ ॥ गौर्यु
वाच ॥ पुराहं देव तिष्ठामि कुमारी भवने पितुः ॥ हिमवन्नहरे रम्ये सखीगणसमाहृता ॥ ९ ॥ ततोहं मेनया प्रोक्ता स्व
पित्रा चाहिमाद्रिणा ॥ पुत्रि रंभाव्रतं चार्य वरसौभाग्यवर्द्धनम् ॥ १० ॥ येन प्रारब्धमात्रेण सर्वं संपत्स्यते तव ॥ सौभा
ग्यं स्त्रीगणैश्वर्यं महादेवीपदं तथा ॥ ११ ॥ एवं करोमि वै मातर्मम वांछं परं त्वया ॥ मनोभिलाषितं येन येन प्राप्नो
ति शंकरम् ॥ १२ ॥ मेनोवाच ॥ ज्येष्ठशुक्लतृतीयायां स्नात्वा नियमतत्परा ॥ कुरु पार्श्वे पंचाग्नीञ्ज्वालमालाकु

36

तासानान ॥१३॥ गार्हपत्यंदक्षिणाग्निसभ्यंचाहवनीयकम् ॥ पंचमंभास्करंतेजस्त्वेतेपंचवह्नय ॥१४॥ एतेषांमध्य
तोभूत्वातिष्ठपूर्वमुखोविरम् ॥ चतुर्भुजांध्यानपरांपद्मयोपरिसंस्थिताम ॥१५॥ स्रगाजिनक्षिल्लकवांजलवल्कलधा
रिणी ॥ सर्वाभरणसंयुक्तांदेवीमभिमुखीकुरु ॥१६॥ महालक्ष्मीर्महाकालीमहामायामहामतिः ॥ गंगाचयमुनासिंधुःश
तद्रुर्नर्मदामही ॥१७॥ सरस्वतीवैतरिणीसैवप्रोक्तामहासती ॥ तस्याश्चप्रेक्षणापरामवतत्रावभासिता ॥१८॥ होमंकुर्याद्य
तात्मातोब्राह्मणाःसर्वतोदिशाम ॥ देव्याःपूजाप्रकर्तव्यापुष्पधूपादिनानतः ॥१९॥ नकृष्णकारनैवेद्यंनैवेद्यंघृतपाचित
म ॥ यथाययेस्मरतोदेव्याःपायसंभागमेवच ॥२०॥ जीरकंकटुकंडभक्ष्यपूपान्कृसरंतथा ॥ निपाखांपावनतरांलवणा
शार्करांयुतम् ॥२१॥ पुष्पमंडपिकाकार्यागंधपुष्पाधिवासिता ॥ पद्मासनेनसंतिष्ठेदाचार्योरणतोरवि ॥२२॥ ततःपूर्णस्म
ऋताणीमंत्रमेतमुदीरयेत ॥ वेदेषुसर्वशास्त्रेषुस्मृतिविभ्रमोधरातले ॥२३॥ इष्टःपूर्णतश्चवरूप्योशोकाविराहितःसदा ॥ त्वंशान्ति
त्व
स्त्वंस्वधास्वाहासावित्रीसरस्वती ॥२४॥ पतिंदेहिगृहंदेहिवसुदेहिनमोस्तुते ॥ एवंसमापयेद्देवींप्राणिपत्यपुनःपुनः ॥२५॥
देहिभूत्वागृहंरम्यंविचित्रंवस्त्रभूमिकम ॥ आच्छादयादारकेदारकपोतादिविभूषितम ॥२६॥ कुम्भस्तंभगवाक्षाद्यंमणिमंडित
तोरणम् ॥ पद्मरागमहानीलवज्रवैदूर्यभूषितम ॥२७॥ गृहदानविधानेनब्राह्मणायप्रशास्यवे ॥ सपत्नीकायसंपूज्यसर्वोप

स्कर संयुतम् ॥ २८ ॥ कुवालिनी भ्यस्तदेवं नैवेद्यं सर्वसंस्थितम् ॥ निवर्त्यो विधिनानेन ततः पश्चात्समापयेत् ॥ २९ ॥ दां
पत्यानि वतन्वर्ष्यामधुरै रसैः ॥ इत्थं कृत्तु मया वीर्यो हर रंभाव्रतं परम् ॥ ३० ॥ व्रतान्ते गात्यमुनयेदत्तं गृहं वरं शुभम् ॥ लोपामु
द्राप्रिया पत्नी तस्य वेश्मनि पूजिता ॥ ३१ ॥ तेन धर्मेण देवत्वं भर्ता लब्धोऽसि शंकरः ॥ अर्द्धांकेऽपि स्थितानेन याश्चारिष्यंति यो
षितः ॥ ३२ ॥ कौंतेय पुरुषो वापि त्वामेतं रंभाव्रतं भुवि ॥ तासां पुत्राग्रहं भोगाः फलवृद्धिर्भविष्यति ॥ ३३ ॥ स्त्रीणां चातुर्यसौभा
ग्यं गार्हस्थ्यं सर्वकामिकम् ॥ बालावृद्धस्य मध्यानां रूपलावण्यवृंहणम् ॥ ३४ ॥ सपत्नीदर्पदलनं वशीकारणमुत्तमम् ॥ हि
मवद्विंध्ययोर्मध्ये आर्यावर्ते मनोहरे ॥ ३५ ॥ उत्पन्नस्त्रिमतेवासे पूर्वोऽस्मिन्धने कुले ॥ मन्तः स्वर्गपुरं याति ततो विष्णुपुरं व्रजेत्
॥ ३६ ॥ ततः शिवपुरं याति कालमत्यवचनं यथा ॥ ३७ ॥ यद्रंभया व्रतमयापहरं ततश्च गौर्या हिमाद्रिभवनस्थितयापि चीर्ण
म् ॥ तस्माद्व्रतं कुविकरोति निरता च धर्मे ब्रह्मेशकेशवपतित्वदं लभेत्सा ॥ ३८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे पंचाग्निसाधनाख्यं रंभातृतीयाव्रतं नामाष्टादशोऽध्यायः ॥ १८ ॥ श्रीकृष्ण उवाच ॥ पार्थ भाद्र
पदे मासि भ्रुरूपक्षे दिनोदये ॥ तृतीयायां चतुर्थ्यां वा भक्त्या यां प्रति वत्सरम् ॥ १ ॥ उपवासेन गृह्णीयाद्व्रतं नाम्ना नु गोपदम् ।
स्नात्वा नरो वा नारी वा पुष्पधूपविलेपनैः ॥ २ ॥ दध्यक्षतैश्च मालाभिः पिष्टकैर्वनमालया ॥ अभ्यंजयेद्गां शृंगं खुरं पुच्छ

37

त्नमेव च ॥३॥ दशाहं वा त्र्यहिकं भक्त्या तासां पूर्वापराह्णयोः ॥ अनग्निपाकं कंजीयानैलक्षारविवर्जितम् ॥४॥ भुंजंती नांग
वां नित्यं मायां नीनां च भारत ॥ उपग्नारैथवागाये मंत्रेणानेन मंत्रवित् ॥५॥ अर्घं प्रदद्यात्पुष्पैर्वा गवां पादेषु पाण्डव ॥६॥
माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥ प्रनु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥७॥
गवां मंत्रः ॥ गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ॥ गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥८॥ इत्थं संपूज्य दत्वार्घं ततो
गच्छेद्गृहमात्मनम् । पंचम्यां क्रोधरहितो भुंजीयात्क्षीरसंदधि ॥९॥ शालिविधं फलं शाकं तिलमल्लं च स्रोभनम् ॥ भुक्त्वा वसाने रा
जेंद्र संयतस्तां निशां स्वपेत् ॥१०॥ प्रभाते गोपदं दत्वा ब्राह्मणाय हिरण्मयम् ॥ समापयेद्व्रतं नाथं गोविंदं गरुडध्वजम् ॥११॥
अर्च्यंतेत्र यथा गावस्तथा गोवर्द्धनो गिरिः ॥ प्रणम्याच्युतमुद्दिश्य भक्त्या यः सकलमाचरेत् ॥१२॥ गोभक्तो गोव्रतं कृत्वा भक्त्या श्र
द्धावगोव्रदम ॥ सौभाग्यं रूपलावण्यं प्राप्नोति पृथिवीतले ॥१३॥ गोनर्तिकाकृत लंगेहं गोकुलं च समासतः ॥ धनधान्यसमसो
पेत श्रीलक्ष्मीस्समृद्धिमान् ॥१४॥ संतानपूजितं तेन स्थानतः स्वर्गे महोभवेत् । दिव्यरूपधरः स्रग्वी दिव्यालंकारभूषितः
१५ ॥ गंधर्वैर्गीतवाद्येन सेव्यमानोऽप्सरोगणैः ॥ दिव्यं युगशतं छित्वा ततो विष्णुपुरं व्रजेत् ॥१६। यो गोपदव्रतमिदं कुरुते त्रि
रात्रं गाश्च प्रपूज्य यतिगोरसपञ्जनाद्यः ॥ गोविंदमादिपुरुषं प्रणतः स विश्रामालोकमुत्तममुपैति गवां पवित्रम् ॥१७ ।

२अथम् ४

इति श्रीभविष्ये महापुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तृतीयाव्रते गोष्पदतृतीयाव्रतं नामैकोनविंशोऽध्यायः
१९ ॥ ॥ श्रीकृष्ण उवाच ॥ अङ्के भाद्रपदस्यैव तृतीयायां समर्चयेत् ॥ सर्वधान्यैस्तां विरूढैर्मूर्त्तां हरितशाद्वलाम् ॥ १ ॥ हरिका
लीं देवदेवीं गौरीं शंकरवल्लभाम् ॥ गन्धैः पुष्पैः फलैर्धूपैर्नैवेद्यैर्मोदकादिभिः ॥ २ ॥ प्रीणयित्वा समाच्छाद्य प्रजागरेण भावितात्मना· ॥
घंटावाद्यादिभिर्गीतैः प्रमोदककथानुगैः ॥ ३ ॥ कृत्वा जागरणं रात्रौ प्रभाते नेतुजनैर्वृतौ ॥ सुवासिनीभिः सा नेया मध्ये पुण्यजला
शये ॥ ४ ॥ तस्मिन्विसर्ज्जयेत्पार्थ हरकालीं हरिप्रियाम् ॥ ॥ युधिष्ठिर उवाच ॥ भगवन्हरिकालीति का देवी प्रोच्यते भुवि ॥ ५ ॥ आ
ड्यधान्यैः स्थिता कस्मात्कस्मात्तेन विसर्ज्जनम् ॥ पूजिता किं ददातीह सर्वमेतद्ब्रूहि केशव ॥ ६ ॥ श्रीकृष्ण उवाच ॥ सर्वपापहरां दिव्यां समनः
ष्टलोक कथां निशामय ॥ आसीद्दक्षस्य दुहिता काली नाम्नीति कन्यका ॥ ७ ॥ वर्णेनापि च सा कृष्णा नीलोत्पलप्रभा ॥ सा च दत्ता त्र्यम्
बकाय महादेवाय शूलिने ॥ ८ ॥ विवाहिता विधानेन शास्त्रोक्तेनाग्निसाक्षिणा ॥ यत्कुर्यात्तागतैर्देवैर्ब्रह्माद्यैर्वाद्यनिस्वनैः ॥ ९ ॥
निर्वर्तिते विवाहे तु कन्या सार्द्धं त्रिलोचनः ॥ क्रीडते विविधैर्भोगैर्मन्मथः प्रीतिवर्द्धनः ॥ १० ॥ अथ देवसमाजे तु कदाचित्सा वृ
षध्वजः ॥ आस्थानमण्डपे रम्ये आसीनो विबुधैः सहायवान् ॥ ११ ॥ तत्रस्थः प्राह या नाम नर्मणा त्रिपुरान्तकः ॥ कालीं नीलोत्पलश्या
मां गतामासनगोचराम् ॥ १२ ॥ एह्येहि त्वमिति नः कालिके कनकाञ्जनसन्निभे ॥ कालाञ्जनदिमेत्यार्थ्यै धवलेन समं प्रिया ॥ १३ ॥

38

एवमुक्तिप्रमनसा देवी संक्रुद्धमानसा ॥ भासयामास तामुश्री वाग्भगन्दयागिरा ॥ १४ ॥ रुरोद सत्वरं बाला नत्रस्थास्फु
रिताधरा ॥ किंदेव कोगानां कृगोगौरीत्येत्समभिधीयते ॥ १५ ॥ यस्मात्स्मामोघमादत्ता कृष्णवर्णेनशंकर ॥ ह्रीकालीतिवाहूतादे
वर्षिगणासेविता ॥ १६ ॥ तस्मादेहमिमंकृष्णं संत्यक्ष्येहमिज्वालितेनले ॥ इत्युक्त्वा वार्यमाणा तु हरिकालीत्वचान्विता ॥ १७ ॥ मुमोचह
रिनक्षायाकांतिंहित्वेशाद्वले ॥ त्विषासपदो वंशगोगास्वलितेद्यवास्ने ॥ १८ ॥ पुनःपर्वतराजस्यगृहेगौरीबभूवसा ॥ महादे
वस्यदेहार्द्धस्थितासंपश्यतेसुरैः ॥ १९ ॥ एवंसाहरिकालीतिगौरीशास्यप्रवस्थिता ॥ पूजनीयामहादेवीसंत्रेतानेनपांडव ॥
२० ॥ हरकर्मसमुत्पन्नेहरकोपेहरिप्रिये ॥ मांत्राहीयास्यमूर्तिस्थेप्रणतानांनमोनमः ॥ २१ ॥ इत्यंसंपूज्यनैवेद्यंदद्याद्विप्राय
पांडव ॥ तांचप्रातर्जलेरम्येमंत्रेणोवविसर्जयेत ॥ २२ ॥ मार्जिनासिमयाभक्त्यागच्छदेविसुरालयम ॥ हरकालेतिवेगौरिपुनरा
गमनायच ॥ २३ ॥ एवंयःपांडवश्रेष्ठहरिकालीव्रतंचरेत ॥ वर्षेवर्षेविधानेननारीनरपतेशुभा ॥ २४ ॥ सायत्फलमवाप्नोति
तच्छृणुष्वनराधिप ॥ मर्त्यलोकेचिरंतिष्ठेत्सर्वरोगविवर्जिता ॥ २५ ॥ सर्वभोगसमायुक्तासौभाग्यबलगर्विता ॥ पुत्रपौ
त्रैसहनिश्चिन्तनूसौहित्रसंकुला ॥ २६ ॥ सात्रंवर्षशतेयावज्ञोगान्भुक्त्वामहीतले ॥ ततोवसानेदेहस्यशिवज्ञानामहामुने ॥
२७ ॥ चिरमजामहाकालनंदीभृंगिविनायका ॥ तदाज्ञाप्तिंकंकरात्सर्वेमहादेवप्रसादतः ॥ २८ ॥ संपूर्णीसर्वंगणासम्प्तविह

॥भविष्य॥
॥३९॥

ष्टम्यां तां वै हिमाद्रिदुहितां हरिकालिकाख्याम् ॥ संपूज्य नागरमनुद्धतगीतवाद्यैर्वकुंनियाइह भवंति पतिप्रियास्ताः
२९ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हरिकालीतृतीयाव्रतं नाम विंशोऽध्यायः ॥२०॥
युधिष्ठिर उवाच ॥ अथ पृच्छामि भगवन्व्रतं तात्कामासालिकम् ॥ ललिताराधना नाम मासमासक्रमेण वा ॥१॥ कृष्ण उवा
च ॥ शृणु पांडव यत्नेन यथा वृत्तं पुरातनम् ॥ शंकरस्य महादेव्याः संवादं कृतमुत्तमम् ॥२॥ कैलासशिखरे रम्ये नानापुष्पफ
लोपगे ॥ सहकारद्रुमच्छन्ने वंशकाशोकमण्डिते ॥३॥ कदंबवकुलामोदवशीकृतमधुव्रते ॥ मधुरारावसंघुष्टे राजहंसोपशो
भिते ॥४॥ मृगाक्षगजसिंहेभ्यशार्दूलमृगगणावृते । गंधर्वयक्षदेवर्षिसिद्धकिंनरपन्नगैः ॥५॥ तपस्विभिर्महाभागैः सेव्य
मानं समंततः ॥ सुखासीनं महादेवं भक्तसंघैः समावृतम् ॥६॥ अप्सरोभिः परिवृतम् मातलाब्रवीदिदम् ॥ उमोवाच
भगवन्देवदेवेश भक्तपालो वृषध्वज ॥७॥ कथयस्व महेशान तृतीयाव्रतमुत्तमम् ॥ सौभाग्यं लभते येन धनपुत्रान्सभ
न्सुखम् ॥८॥ नारीत्वर्गभमं रूपमारोग्यं श्रियमुत्तमम् ॥ एवमुक्तोऽपि तया भार्यया प्रीतिपूर्वकम् ॥९॥ विहस्य शंक
रः प्राह किं व्रतेन न वपिये ॥ येका नास्ति वृलोके पृथिव्यां सप्तं नारिसेजा ॥१०॥ सर्वेपि तेन वा यज्ञा वरप्रस्तेहं यजनः पतिः ॥
उवाच ॥ सत्यमेतन्महेशान त्वयि दृष्टे न दुर्लभम् ॥११॥ किं विन्निभवनाभोगभस्तलोक्षाहिभूषण ॥ भक्ता स्त्रियो हि मां

॥रामः॥
॥३९॥

39

देवि पूजयंति भृशमात्मनम् ॥१२॥ विरूपाः कुलभाः काश्चिद्दुःखाश्च बहुपुत्रिकाः ॥ सुशीलाल्लपसाकाश्चित्कुष्ठाभिः पीडि
ताम्हशाम् ॥१३॥ शौचाचारसमायुक्ता नारी व्रतेथ कस्यचित् ॥ एवं बहुविधैर्दुःखैः पीड्यमानाः सुदारुणैः ॥१४॥ कारन्तां सांप्र
पन्नास्ताः कृपाविष्ट तनोऽहम् ॥ येन ताः सुखसंभोगरूपलावण्यसंयुताः ॥१५॥ पुत्रैः सौभाग्यवित्तौघैर्युक्ताः स्युः सुर
सत्तम ॥ तन्मे कथय तत्त्वेन व्रतानामुत्तमं व्रतम् ॥१६॥ ईश्वर उवाच ॥ माघे मासि सिते पक्षे तृतीयायां यतव्रता ॥ स्
रवं पुष्पमाल्यहस्ता वयादौ चैव समाहिता ॥१७॥ उपवासस्य नियमं दन्तधावनपूर्वकम् । मध्याह्ने नु ततः स्नानं बिल्वैरामल
कैः शुभैः ॥१८॥ स्नात्वा तीर्थजले शुभ्रे वाससी परिधाय च सुगंधैः सुमनोभिश्च प्रमतैः कुंकुमादिभिः ॥१९॥ अर्चयंति
सदा देवि त्वां भक्त्या भक्तवत्सले । कर्पूरागरुस्तथा धूपैर्नैवेद्यैः शार्करादिभिः ॥२०॥ यदृच्छालाभसंपन्नैर्धूपदीपार्चनादि
भिः । नीत्वे शातीं गृहीत्वा तु प्रतीक्षेद्वादिकां ततः ॥२१॥ पात्रे ताम्रमये शुद्धे जलपूर्णे विनिश्चिते ॥ सहिरण्यं फलिनं कृ
त्वा मंत्रपूर्वं समाहिता ॥२२॥ शिरसि प्रक्षिपेत्तोयं ध्यायंति मनसोप्सितम् ॥ बुद्ध्वा वर्णाश्रमायाता बुद्धयोनेर्विनि
र्गता ॥२३॥ महेश्वरात्तनो देवी ललितानाम्ना शंकरप्रिया ॥ गंगाद्वारे हरं प्राप्ता गंगाजलपवित्रिता ॥२४॥ सौभाग्यारोग्यपु
त्रार्थमर्थार्थं हरवेश्मनि ॥ आयाताविह कांभेड व्रतं स्मिन्नमो नमः ॥२५॥ दत्वा हिरण्यं तत्तस्मै ब्राह्मणायातक्रयोदकम्

मेलवः३भो १

= तेलः सायंस्कीत्वा ५

बतलतः ५

= मशनीवाद्धमे मासि ५

उग

आचम्य प्रयतो भूत्वा भूमिस्थाश्च पये स्वपाम ॥ २६ ॥ आयमानाङु मादेवीं हरिं त्रैयवसंस्मरे ॥ द्वितीयेऽह्नि ततः स्नात्वा
तथैवाभ्यर्च्य पार्वतीम् ॥ २७ ॥ यथाशक्त्या द्विजान् संपूज्य ततो भुंजीत वाग्यता ॥ एवं नृपश्रेष्ठ मे मासि पञ्चमीयासिकालि
के ॥ २८ ॥ द्वितीये कार्तिकी नाम तृतीये शांकरप्रिया ॥ भवानी च चतुर्थे तु स्कंदमाता च पंचमे ॥ २९ ॥ दक्षस्य दुहिता षष्ठे मेना
की सप्तमे स्मृता ॥ कात्यायनी अष्टमे मासि नवमे तु हिमाद्रिजा ॥ ३० ॥ दशमे मासि विख्याता देवी सौभाग्यदायिनी ।
उमा त्वेकादशे मासि गौरी तु द्वादशे परा ॥ ३१ ॥ कुशोदकं पयः सर्पिर्गोमूत्रं गोमयं फलम् ॥ निंवपत्रं कंटकारीगवां शृं
गोदकं दधि ॥ ३२ ॥ पंचगव्येन थाशाकं प्राशनानि क्रमादमी ॥ मासि मासि स्थिता ह्येव समुपवासपरायणा ॥ ३३ ॥ द
दानि भक्ष्यपेयानि वाचके ब्राह्मणो नमे ॥ कर्तुं भमास्यं लवणं जीरकं ज्यडमेव च ॥ ३४ ॥ दत्तैरेभिः सर्वयस्थात्वे सर्वयस्थान्तु
ष्यसि प्रिये ॥ मासि मासि भवेत्स्नं श्रीगकारो द्वादशाक्षरः ॥ ३५ ॥ ओंकारपूर्वकैर्देवि नमस्कारान्तदीरितैः ॥ एभिस्त्वं पू
जिता मंत्रैस्तुष्यसि व्रतनतः प्रिये ॥ ३६ ॥ तुष्टा त्वमीप्सितान् कामान् ददासि त्रीणि पूर्वकम् ॥ समाप्ते तु व्रते तस्मिन् ब्राह्म
णं वेदपारगम् ॥ ३७ ॥ सहितं भार्यया भ्यर्च्य गंधपुष्पादिभिः शुभैः ॥ द्विजं महेश्वरं कृत्वा उमां भार्यां तथैव च ॥ ३८ ॥
सत्वं सदक्षिणां दद्यात्तथा शय्यां च वाससी ॥ एकं वा सोपगं दद्यात्तामुद्दिश्य हि प्रिये ॥ ३९ ॥ शालग्रामं च पायुक्तं तस्या

कं

40

फलमिदंभरत॥ दशवर्षसहस्राणिलोकान्प्राप्यपरात्परान्॥ ५०॥ सोऽस्तेभर्तृसहितांयथेंद्रेणशचीतथा॥ मानुष
त्वंपुनःप्राप्यस्वेनभर्त्रासहैवसा॥ ५१॥ पुण्येकुलेश्रियायुक्तानीरोगाकुलसंभूते॥ सप्तजन्मानियावच्चनवैधव्यमव
वाप्नुयात्॥ ५२॥ पुत्रान्भोगांस्तथारूपंसौभाग्यारोग्यमेवच॥ एकपत्नीतथाभर्तुःप्राणेभ्योऽप्यधिकाभवेत्॥
५३॥ शृणुयाद्वाच्यमानंतुभक्त्यायाललिताव्रतम्॥ मयास्नेहेनकथितंसापितत्फलभागिनी॥ ५४॥ सर्वस्वल
क्षललितांललितांगयष्टिंगंधोदकामलघटांघ्रिरसिक्षितिपेयः॥ सास्वर्गमेत्यललितानुकलासमस्तांमुक्ताधिपंपतिम
वाप्यभुवंभनक्ति॥ ५५॥ ॥ इति श्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेललितातृतीयाव्र
तमाहात्म्यंनामैकविंशतितमोऽध्यायः॥ २१॥ ॥ युधिष्ठिरउवाच॥ इष्टवियोगसंतापभर्तृबंधुजनैःसह॥ वद
नारीनरश्रेष्ठव्रतेयेनश्रितालयम्॥ १॥ विधवाचपरेलोकेभर्त्राऽपिनवियुज्यते॥ सुखसंदोहसौभाग्ययुक्ताभव
तिभामिनी॥ २॥ श्रीकृष्णउवाच॥ उमयाचरितंयल्लाङ्गवाग्ललितामतम्॥ लब्धाहिमवतोजन्मदक्षकोपाद्विमुक्त
या॥ ३॥ महासौभाग्यसंदोहंदक्षादेव्यामहात्मना॥ अहंधन्यानमिष्टेनवृष्टेनकथितंभरत॥ ४॥ मासिमार्गशिरेप्रा
प्तेचंद्रवृद्धौशुचिस्मिता॥ द्वितीयायांसमासाद्यनक्तंभुंजीतपायसम्॥ ५॥ आचम्यवाग्यविर्भूत्वादन्तकाष्ठंकरंनमेत्॥

सुदान्विता नमस्कृत्वा गिरिजाम्परमेश्वरम् ॥ ६ ॥ औडमारमजं गत्व भक्षयेद्दन्तधावनम् ॥ उत्तराशागतं सार्धं सत्वं चं नि
द्रुणां भ्रमम् ॥ ७ ॥ द्वितीयायां परे वाह्नि गौरीं त्र्यंबं च पूजयेत् ॥ शालिपिष्टमयेकृत्वा रूपेस्त्रीपुंसयोः शुभे ॥ ८ ॥ पात्रेसं
स्थाप्य संपूज्य जागरं निशि कल्पयेत् ॥ विधिवत्पूजयित्वा तु शंकरं कीर्तयन्स्वपेत् ॥ ९ ॥ प्रभाते तेन गृहीत्वा तु आचार्याय नि
वेदयेत् ॥ भोजयेन्मष्टमन्नाद्यैः शिवभक्ताद्विजोत्तमान् ॥ १० ॥ दांपत्यानि च तत्रैव शक्त्या तान्यपि भोजयेत् ॥ प्रतिमासं प्र
कुर्वीत विधिना तेन संयता ॥ ११ ॥ कार्तिकान्ते ततो मासि मार्गशीर्षे समुपागते ॥ नामानि च प्रवक्ष्यामि प्रतिमासं क्रमा
त्कृतम् ॥ १२ ॥ पूजाजाप्यानिमित्तं च मिश्रं पंचेति तस्य च ॥ एवं पौषे तु संप्राप्ते गिरिशं पार्वतीं तथा ॥ १३ ॥ समभ्यर्च्य च तु
ष्टांतु पंचगव्यं पिबेत्सुधी ॥ एतत्पारणमुद्दिष्टं मार्गसौमार्गगोचरम् ॥ १४ ॥ नवान्नसेवनाद्यादि पावनं परमं स्मृतम्
भवं चैव भवानीं च मासि माघे प्रपूजयेत् ॥ १५ ॥ फाल्गुने तु महादेवमुमया सहितं सनतम् ॥ ललितां शंकरं देवं चैत्रे संपूजये
न्नतः ॥ १६ ॥ स्थाणुं वैशाखमासे तु लोलनेत्रायुतं यजेत् ॥ ज्येष्ठे वीरेश्वरं देवमेकवीरासमन्वितम् ॥ १७ ॥ आषाढे पशु
नाथं च शक्ता क्षमासार्द्धं त्रिलोचनम् ॥ श्रीकंठं श्रावणे देवं स्तुतान्वितमथार्चयेत् ॥ १८ ॥ भीमं भाद्रपदे मासि दुर्गया सहितं
यजेत् ॥ ईशानं कार्तिके मासि शिवादेवीयुतं यजेत् ॥ १९ ॥ जप्यध्यानार्चनार्थं च नामान्येतानि सुव्रत ॥ स्मृतानि विधिनारा

41

॥ रामः ॥
॥ ५१ ॥

जन्मृतसिद्धिभवेद्ध्रुवम् ॥ २० ॥ प्रतिमासं तु पुष्पाणि यानि पूजासु योजयेत् । तानि क्रमात्प्रवक्ष्यामि सर्वशः प्रीतिकराणि वै
॥ २१ ॥ आदौ नीलोत्पलं योज्यं तद्भावे परात्यपि ॥ पवित्राणि सुगन्धीनि योजयेद्भक्तितोऽर्चने ॥ २२ ॥ करवीरं बिल्वपत्रं किंशुकं कु-
ब्जमालिका ॥ पाटलाब्जकदंबवतगारंडोणमालती ॥ २३ ॥ कृत्वानुक्रमशो वमासे पृथग्दद्योस्थपि ॥ भक्त्या योज्यानि राजेन्द्र श्रि-
वयोस्तुष्टिहेतवे ॥ २४ ॥ वस्त्ररं तेविताने बध्वा त्क्षेपेसधिरि जन ॥ ध्वजं दीपं च स्वगुणं शांकराय निवेदयेत ॥ २५ ॥ स्नापयित्वा
चलिप्राचसौवर्णमृद्धिपंकजम् ॥ पूपपुगमं च पुरतः शालिपिष्टमयं न्यसेत ॥ २६ ॥ नैवेद्यं शक्तितो दत्वा नत्वा च विधिवच्छि-
वं ॥ कुर्याज्जागरणं रात्री प्रोत्तनोग हिम्त कृगहेन ॥ २७ ॥ ततः गत्या त्रिकोणं च चतुरस्रं च कारयेत ॥ त्रिकोणे ब्राह्मणी भोज्या चतुर-
स्रे द्विजोत्तमाः ॥ २८ ॥ व्रतिनो भोजयेत्सम्यक् स्वादन्नैर्वद्विजोत्तमान् ॥ मिथुनानि च तावंति शक्त्या भक्त्या च पार्वत ॥ २९ ॥ उमा-
महेश्वरं हैमं कारयित्वा सुशोभनम् ॥ मौक्तिकानि चतुःषष्टि तावंतोऽपि प्रधानकाः ॥ ३० ॥ तावंति पुष्परागाणि तावन्मपाञ्चो
परिन्यसेत ॥ वस्त्रेण वेष्टयित्वा च गन्धधूपैस्तथार्चयेत ॥ ३१ ॥ एतत्संभारसंयुक्तमाचार्याय निवेदयेत ॥ व्रतिनां ब्राह्मणा-
नां च दम्पतीनां च भारत ॥ ३२ ॥ दत्वा हिरण्यवासांसि प्रणिपत्य क्षमापयेत ॥ चत्वारिंशत्तथाष्टौ च कुम्भांश्छत्रमुपानहौ ॥ ३३ ॥
सहिरण्यांश्च ताम्रवीन्दपात्रस्योदकान्वितान ॥ दीनान्धदुःखितानां च नद्दिने वानिवारितम ॥ ३४ ॥ कल्पयेदन्नदानं चालो-

चेद्य भक्तिमात्मनः ॥ प्रत्याब्दिकं च कर्त्तव्यं स्ववित्तपरिमाणतः ॥ ३५ ॥ संपूरयेत्क्रमेनया वित्तशाठ्यं न कारयेत् ॥ अवियोग
करं चैतद्रूपसौभाग्यवित्तदम् ॥ आयुः पुत्रप्रदं स्वर्ग्यं दिव्यलोकप्रदायकम् ॥ ३६ ॥ सम्याक्पुराणपतितं व्रतचर्यमेतन्नत्वं च
नाचरगृहे हृदयंगमा याः ॥ पूजां विधाय विधिवन्नवियोगमेति साध्वी स्वभर्तृसुतबंधुजनैर्धनैश्च ॥ ३७ ॥ इति श्री भवि
ष्ये महापुराणोत्तरपर्वणि अवियोगतृतीयाव्रतं नाम द्वाविंशतितमोऽध्यायः ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ केन धर्मेण ना
रीणां व्रतेन नियमेन च ॥ सौभाग्यं जायते ऽतीव पुत्राश्च बहवः शुभाः ॥ १ ॥ धनधान्यं सुवर्णं च वस्त्राणि विविधानि च ॥ अ
वियोगं च सततं लभते पुत्रपौत्रयोः ॥ २ ॥ श्रीकृष्ण उवाच ॥ शृणु पार्थ प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् ॥ यत्कृत्वा सुभगा
नारी बहुपत्या च जायते ॥ ३ ॥ धनधान्यं हिरण्यं च दासीदासादिकं तथा ॥ उत्पद्यते गृहे येन तद्व्रतं कथयामि ते ॥ ४ ॥ उमाम
हेश्वरं नाम अप्सरोभिः पुराकृतम् ॥ विद्याधरैः किन्नरैश्च ऋषिकन्याभिरेव च ॥ ५ ॥ रूपिणा रंभया चैव सीतया ऽहल्यया त
था ॥ रोहिण्यापादमयंत्या च नार्याचान्तसूयया ॥ ६ ॥ एताभिश्चरितं पार्थ व्रतं सर्वव्रतोत्तमम् ॥ सौभाग्यारोग्यफलदं दारिद्र्या
घविनाशनम् ॥ ७ ॥ मर्त्यलोके स्त्रियो याश्च दुर्भगा रूपवर्जिताः ॥ अपुत्रा निर्धनाश्चैव सर्वभोगविवर्जिताः ॥ ८ ॥ तासां हितार्थं
पार्वत्या उमामहेश्वरं व्रतम् ॥ अवतारितं पुरा पार्थ तज्जानंत्यधमाः स्त्रियः ॥ ९ ॥ पूर्वं मार्गशिरो मासि नारी धर्मपरायणा ·

42

शुक्लपक्षे तृतीयायां सोपवासा जितेन्द्रिया ॥ १० ॥ स्नात्वा संपूज्य ललितां हरकायार्धवासिनीम् ॥ ततः प्रभातसमये स्नानं
वा कृत्रिमे जले ॥ ११ ॥ कृत्वा देवीं तर्पयित्वा इदं वाक्यमुदीरयेत ॥ नमो नमस्ते देवेश उमादेहार्धधारक ॥ १२ ॥ महादेवि नमस्ते(ऽ)
स्तु हरकायार्धवासिनी ॥ इति कृत्वा शिवं देवीं जपेद्यावदहंगता ॥ १३ ॥ पूजयेद्देवमीशानं पुष्पैः कालोद्भवैस्ततः ॥ वामपार्श्वे
उमादेवी दक्षिणेतु महेश्वरम् ॥ १४ ॥ धूपं वा गुग्गुलं वापि दहेत्सभ्यात्मभाविता । नैवेद्यं तु यथाशक्त्या घृतपक्वं निवेदयेत ॥ १५
कारयेद्वैश्वदेवं तु तिलाज्येन सुसंस्कृतम् ॥ पंचगव्यं ततः प्राश्य आत्मकायविशोधनम् ॥ १६ ॥ एवं द्वादशमासांस्तु पूजयित्वा
महेश्वरम् । उद्यापनं ततः कुर्यात्सुहृष्टेनान्तरात्मना ॥ १७ ॥ शिवं रूप्यमयं कृत्वा उमां हैममयीं तथा ॥ आरूढौ वृषभे रौप्ये सर्वा
लंकारभूषिते ॥ १८ ॥ चंदनेन शिवं चर्च्य कुंकुमेन च पार्वती ॥ अर्चयेत्कुसुमैः पश्चात्सुगंधैः सुमनोहरैः ॥ १९ ॥ वेष्टयेत्सूक्ष्मवस्त्रेण
शिवं रक्तेन पार्वतीम् ॥ पश्चाद्धूपं दहेन्नारी भक्तिभावेन भाविता ॥ २० ॥ भोजयेच्छिवभक्तांश्च ब्राह्मणान्वेदपारगान् । भक्षैर्भोद
क्षिणा देया भक्त्या शाठ्यविवर्जितः ॥ २१ ॥ ततः प्रदक्षिणीकृत्य इदमुच्चारयेद्बुधः ॥ उमामहेश्वरौ देवौ सर्वलोकपितामहौ ॥ २२
व्रतेनानेन सुप्रीतौ भवेतां मम सर्वदा ॥ एवमुक्त्वा जितक्रोधा ब्राह्मणो वेदपारगे ॥ २३ ॥ व्रतं निवेदयेत्कन्या वाचके वा गुणान्विते ।
इदं कृत्वा व्रतं नारी महेशार्पितमानसा ॥ २४ ॥ प्रयाति परमं स्थानं यत्र देवो महेश्वरः ॥ शिवलोके वसेत्तावद्यावदिन्द्राश्चतुर्दश ।

॥ भविष ॥
॥ ४३ ॥

२५ ॥ अप्सरोभिःपरिवृताकिन्नरीभिस्तथैवच ॥ यदासातुसमायातिजायतेविमलेकुले ॥ २६ ॥ रूपयौवनसंपन्नावहुपुत्रापति
व्रता ॥ धनधान्यसमायुक्तेसुवर्णमणिमंडिते ॥ २७ ॥ यावज्जीवंगृहेरम्येतिष्ठत्यव्याहतेक्रिया ॥ वियोगंनैवसाप्नोतिभर्तृमित्र
सुतादिकम् ॥ २८ ॥ मृताशिवपुरंयातिशिवगौरीप्रसादतः ॥ २९ ॥ हैमीमुमांरजतनपिनाकमयंमहेशंरौप्यंस्तुरूपवृषभंचस
मास्थितौतौ ॥ सम्पूज्यरक्तसितवस्त्रयुगावगूढौनारीभवत्यविधवासुतसौख्ययुक्ता ॥ ३० ॥ ॥ इतिश्रीभविष्येमहापुराणेउ
त्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेउमामहेश्वरव्रतंनामत्रयोविंशतितमोऽध्यायः ॥ २३ ॥ श्रीकृष्णउवाच ॥ रंभातृतीयां
वक्ष्यामिसर्वपापप्रणाशिनीम् ॥ पुत्रसौभाग्यफलदांसर्वामयनिवारिणीम् ॥ १ ॥ सर्वदुःखहरांपुण्यांसर्वसौख्यप्रदांतथा ॥
सपत्नीदर्पदलनांतथैश्वर्यकरींशिवाम् ॥ २ ॥ शंकरेणपुराप्रोक्तापार्वत्याःप्रियकाम्यया ॥ तामिमांश्रृणुभूपालसर्वभूतहि
तायवै ॥ ३ ॥ मार्गशीर्षेशुभेमासितृतीयायांनराधिप ॥ भुक्त्वायांप्रातरुत्थायदंतधावनपूर्वकम् ॥ ४ ॥ उपवासस्यनियमं
गृह्णीयाद्भक्तिभाविता ॥ देविसंवत्सरंयावत्तृतीयायामुपोषिता ॥ ५ ॥ प्रतिमासंकरिष्यामिपारणंचापरेऽहनि ॥ न
दविघ्नेनमेयातुप्रसादात्तवपार्वती ॥ ६ ॥ एवंसंकल्पविधिवत्कौंतेयकृतनिश्चय ॥ भक्त्यानरोवानारीवास्नानंकुर्यात्ततोद्वि
जः ॥ ७ ॥ नद्यांतडागेवाप्यांवागृहेवानियतात्मवान् ॥ पूजयेत्पार्वतींनामगराज्ञौप्रारूपकृष्णोदकम् ॥ ८ ॥ प्रभातेभोजयेद्विप्रा

॥ रामः ॥
॥ ४३ ॥

43

४

ञ्छिवक्तान्विशेषतः ॥ हिरण्यं लवणं चैव तेषां ददत्तु दक्षिणाम् ॥ ९ ॥ गौरीश्वरं यथाशक्त्या भोजयेत्प्रयतासती ॥ अनेन वि-
धिना राजन्त्यः कुर्यात्मासि पौषके ॥ १० ॥ गोमूत्रं प्राशयेद्रात्रौ प्रभाते भोजयेद्द्विजान् ॥ हिरण्यं जीरकं चैव स्वशक्त्या दापयेत्त-
तः ॥ ११ ॥ कडुडुगुं चकनकं तेभ्यो दत्वा विसर्जयेत् ॥ वाजपेयातिरात्राभ्यां फलं प्राप्नोत्यसंशयः ॥ १२ ॥ शक्रलोके वसेत्कल्पं त-
तः शिवपुरं व्रजेत् ॥ माघे मासि तृतीयायां तु देवीं नाम प्रपूजयेत् ॥ १३ ॥ गोमयं प्राशयेद्रात्रौ नक्तम्वैकाकिनी स्वपेत् ॥ प्रातः कु-
म्भं कनकं दद्यात्कृत्वा द्विजातिषु ॥ १४ ॥ विष्णुलोके चिरं स्थित्वा प्राप्नोति शिवसात्म्यताम् ॥ गौरी तु फाल्गुने नाम गोक्षीरं
प्राशयेन्निशि ॥ १५ ॥ प्रभाते भोजयेद्विप्राञ्छिवभक्तान्तु वासिनी ॥ कर्डुडुं सकनकं तेभ्यो दत्वा विसर्जयेत् ॥ १६ ॥ वाजपे-
यातिरात्राभ्यां फलं प्राप्नोत्यसंशयः ॥ चैत्रे मासि विशालाक्षीं प्रजयेद्भक्तितत्परा ॥ १७ ॥ दधिप्राशयेत्प्रातर्दद्याद्धेमं सकुं-
कुमम् ॥ सौभाग्यं महदाप्नोति विशालाक्ष्याः प्रसादतः ॥ १८ ॥ वैशाखस्य तृतीयायां श्रीमुखीं नाम पूजयेत् ॥ घृतं च प्राशयेद्रा-
त्रौ नक्तम्वैकाकिनी स्वपेत् ॥ १९ ॥ शिवभक्तान्द्विजान्स्नात भोजयित्वा यथोक्षितम् ॥ ताम्बूलं लवणं दत्वा प्राणिपत्य विसर्जयेत्
२० ॥ अनेन विधिना दत्वा पुत्रानाप्नोति शोभनान् ॥ आषाढे माधवीं नत्वा प्राशयीत तिलोदकम् ॥ २१ ॥ प्रभाते भोजयेद्विप्रा-
न्दक्षिणाभ्यां गुडः स्मृतः ॥ सर्वाचतः शुभाद्योकामाप्नोति हि न संशयः ॥ २२ ॥ श्रावणे तु श्रियं पूज्य पिवेत्सोम्भं गजं नल

म्। शिवभक्तांश्च संपूज्य दद्याद्धेमफलैः सह ॥२३॥ सर्वलोकेश्वरो भूत्वा सर्वकामानवाप्नुयात् ॥ भाद्रे चैव तृतीयायां हरिताली
ति पूजयेत् ॥२४॥ माहिषं च पिवेदुग्धं सौभाग्यमतुलं लभेत् ॥ इह लोके सुखं भुक्त्वा चांते शिवपुरं व्रजेत् ॥२५॥ आश्विने तु तृती
यायां गिरिपुत्रीति पूजयेत् ॥ संप्राश्य तण्डुलजलं प्रातर्विप्रांश्च पूजयेत् ॥२६॥ दक्षिणा चापि निर्दिष्टा कनकं च सवत्सनम्।
सर्वयज्ञफलं प्राप्य गौरीलोके महीयते ॥२७॥ पञ्चोद्भवा कार्त्तिके च पंचगव्यं पिवेन्नतः ॥ रात्रौ च जागरं कुर्यात्प्रभाते भोजयेद्द्वि
जान् ॥२८॥ सपत्नीकाञ्छुभाचारान्माल्यवस्त्रविभूषणैः ॥ पूजयेच्छिवभक्तांश्च कुमारीश्चैव भोजयेत् ॥२९॥ उमामहेश्वरं
हैमं समात्रं कारयेन्नृपः ॥ यथाविभवसारेण चित्रान्नं पंचवर्णकम् ॥३०॥ अन्नानं च मृन्मं दद्याच्छत्ते स्वर्णं कमंडलुम् ॥ पादु
कोपानहैर्दिव्यैर्वस्त्रयुग्मैश्च पाण्डव ॥३१॥ पीतयज्ञोपवीतैश्च दीपनेत्रैः समुज्ज्वलैः ॥ शंखशुक्तिसमोपेतैर्दर्पणैश्च सुशो
भितैः ॥३२॥ उमामहेश्वरं स्थाप्य पूजयित्वा यथाविधि ॥ नानाविधैः सुगंधैश्च पत्रैः पुष्पैः फलैस्तथा ॥३३॥ घृतपक्वैश्च
नैवेद्यैर्दीपमालाभिरेव च ॥ शर्करानालिकेरैश्च दाडिमैर्वीजपूरकैः ॥३४॥ जीरकैर्लवणैश्चैव कुसुंभैः कुंकुमैस्तथा ॥ स
ताम्रभाजनैर्दिव्यैर्मोदकैरससंयुतैः ॥३५॥ पूजयेद्देवदेवेशं ततः पश्चात्क्षमापयेत् ॥ शंखवादित्रनिर्घोषैर्वेदध्वनिस
मन्विते ॥३६॥ एवंकृते फलं यत्स्यात्तन्न शक्यं मयोदितुम् ॥ पूर्वोक्तफलभागी स्यात्सर्वदेवैश्च पूज्यते ॥३७॥ कल्पकोटि

वा

गतं यावत्सर्वकामानवाप्नुयात् ॥ तदंते शिवसायुज्यं प्राप्नोति हि न संशयः ॥ ३८ ॥ पुरैतदंभया चीर्णं तेन रंभाव्रतं स्मृ-
तम् ॥ योऽहं सा च स्मृता गौरी या गौरी स महेश्वरः ॥ ३९ ॥ इति मत्वा महाराज शारणं व्रज पार्वतीम् ॥ ४० ॥ एषा हि माड्डिहितुर्दयि-
तानन्तीयां रंभाविधानमलमङ्गु वितन्कुनेति ॥ सम्राज्ञि तैस्थितेन नामपृतानुयोव्य प्राप्नोति वाञ्छितफलान्यवलाव कृति-
४१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रंभानन्तीयाव्रतं नाम चतुर्विंशतितमोऽध्यायः ॥ २४
॥ ॥ श्रीकृष्ण उवाच ॥ तथैवान्यत्प्रवक्ष्यामि सर्वकामफलप्रदम् ॥ सौभाग्यशयनं नाम यत्पुराणविदो विदुः ॥ १ ॥ पुरा द-
ग्धेषु लोकेषु भूर्भुवः स्वर्महादिषु ॥ सौभाग्यं सर्वलोकानामेकस्थमभवत्तदा ॥ २ ॥ तच्च वैकुण्ठमासाद्य विष्णोर्वक्षस्थले
स्थितम् ॥ ततः कालेन महता पुनः सर्गविधौ नृप ॥ ३ ॥ अहंकारावृते लोके प्रधानपुरुषान्विते ॥ स्पर्द्धायां च प्रवृत्तायां कमला-
सनकृष्णयोः ॥ ४ ॥ पिंगाकारा समुद्भूता ज्वाला वक्षस्थलीनदा ॥ तयाभितप्तस्य हरेर्वक्षस्तक्षाद्विनिःसृतम् ॥ ५ ॥ यद्वक्षस्थल-
माश्रित्य विष्णोः सौभाग्यमास्थितम् ॥ रसरूपं न यातावत्प्राप्नोति वसुधातलम् ॥ ६ ॥ उत्क्षिप्तमन्तरिक्षस्थं ब्रह्मपुत्रेण धीम-
ता ॥ दक्षेण पीतमात्रं तु रूपलावण्यकारणम् ॥ ७ ॥ बलं तेजो महज्जातं दक्षस्य परमेष्ठिनः ॥ शेषं यदपतद्भूमावष्टधा तद-
जायत ॥ ८ ॥ इक्षवस्तवराजं च निष्पावा जाजि धान्यकम् ॥ विकारवच्च गोक्षीरं कुसुम्भं कुङ्कुमं तथा ॥ ९ ॥ लवणं चाष्टमं त-

१ तुल्यतेज २

१ घृतगव्येत ६

॥ भविपु ॥
॥ ४५ ॥

त्रसौभाग्याष्टकमुच्यते ॥ पीतंयद्दक्षपुत्रेणयोगेज्ञानविदांतथा ॥ १० ॥ दुहितास्याभवत्तस्माद्यासतीत्याभिधीयते ॥ लोका
नतीत्यललितास्मात्ललितातेनचोच्यते ॥ ११ ॥ त्रैलोक्यसुंदरीमेनामुपयेमेपिनाकधृक् ॥ त्रिविश्वसौभाग्यमयीभुक्तिमुक्तिफलप्रदा
१२ ॥ माराध्यतामस्मांभक्त्यास्त्रीराजन्किंलभेदिति ॥ १३ ॥ युधिष्ठिरउवाच ॥ कथमाराधनंतस्याजगद्धात्र्याजनार्दन ॥ यद्विधानं
वतत्सर्वजगन्नाथवदस्वमे ॥ १४ ॥ ॥ श्रीकृष्णउवाच ॥ वसंतमासमासाद्यतृतीयायांयुधिष्ठिर ॥ शुक्लपक्षस्यपूर्वाह्णेतिलैःस्ना
नंसमाचरेत ॥ १५ ॥ तस्मिन्नहनिसादेवीकिलविश्वात्मनासती ॥ पाणिग्रहणावैरशाह्यावरवर्णिनी ॥ १६ ॥ तयासहैववदेवेशंतृ
तीयायांसमर्चयेत ॥ फलैर्नानाविधैर्धूपदीपनैवेद्यसंयुतैः ॥ १७ ॥ पंचगव्येनानमासंतथागंधोदकेनच ॥ स्नापयित्वार्चयेद्गौ
रीमिंदुशेखरसंयुताम ॥ १८ ॥ पाटलांशंभसहितांपादयोस्तुप्रपूजयेत त्रियुगांशिवसंयुक्तांगुल्फयोरुभयोरपि ॥ १९ ॥ भद्रेश्वरेण
सहितांविजयांजानुनोर्युगे ॥ ईशानीहरिकेशेंचकट्यांसंपूजयेद्बुधः ॥ २० ॥ कोटवींशूलिनंकुक्षौमंगलांशर्वसंयुताम ॥ उपरेप्
जयेडाजन्मांहृदंकृवदये ॥ २१ ॥ अनंतांत्रिपुरघ्नंचपूजयेत्करसंपुटे ॥ कंठेभवंभवानींचमुखेगौरींहरंतथा ॥ २२ ॥ सर्वात्म
नावसहितांललितामस्तकोपरि ॥ ओंकारपूर्वकेरेतैर्नमस्कारांतयोजितैः ॥ २३ ॥ पूजयेद्भक्तिसहितोगन्धमाल्यानुलेपनैः
एवमभ्यर्च्यविधिवत्सौभाग्याष्टकमग्रतः ॥ २४ ॥ स्थापयेत्स्विन्ननिष्पावाकुसुंभंक्षीरजीरकम ॥ तवराजेक्षुलवणांकुंकुमं

45

॥ राम ॥
॥ ४५ ॥

२ प्राश्य२ प्रीयतांललितादेवी ३

वेतथाष्टमम्॥२५॥दत्तंसौभाग्यदंयस्मात्सौभाग्याष्टकमुच्यते॥एवंनिवेद्यतत्सर्वंशिवयोःप्रीयतामिति॥२६॥चैत्रे
शृंगोदकंप्राश्यस्वपेद्भूमावरिंदम॥ततःप्रातःसमुत्थायकृतस्नानजपःशुचिः॥२७॥संपूज्यद्विजदांपत्यंमाल्यवस्त्रवि
भूषणैः॥सौभाग्याष्टकसंयुक्तंसौवर्णंचरणद्वयम॥२८॥प्रीयतामत्रललिताब्राह्मणायनिवेदयेत॥एवंसंवत्सरंयावत्तृ
तीयायांसदानृप॥२९॥प्राशनेनाममंत्रेचविशेषोऽयंनिबोधमे॥गोशृंगोदकमादौस्याद्वैशाखेगोमयंपुनः॥३०॥ज्येष्ठे
मंदारपुष्पंचबिल्वपत्रंशुचौस्मृतम्॥श्रावणेदधिसंप्राश्यंनभस्येचकुशोदकम॥३१॥क्षीरमाश्वयुजेतद्वत्कार्त्तिकेपृषदा
ज्यकम्॥मगोत्तमांगेगोमूत्रंपौषेसंप्राशयेद्घृतम्॥३२॥माघेकृष्णतिलांस्तद्वत्पंचगव्यंचफाल्गुने॥ललिताविज
याभद्राभवानीकुमुदाशिवा॥३३॥वासुदेवीतथागौरीमंगलाकमलासती॥उमाचदानकालेतुप्रीयतामितिकीर्त
येत॥३४॥मल्लिकाशोककमलकदंबोत्पलमालती॥कुजलंकरवीरंचबाणमम्लानकुंकुमम॥३५॥सिंदुवारंचमासे
षुसर्वेषुक्रमशःस्मृतम॥जपाकुसुंभकुसुमंमालतीशतपत्रिका॥३६॥यथालाभंप्रदेयानिकरवीरंचसर्वदा॥एवंसं
वत्सरंयावदुपोष्यविधिवन्नरः॥३७॥स्त्रीनक्तेतुकुमारीवाशिवामभ्यर्च्यशक्तितः॥व्रतांतेशयनंदद्यात्सर्वोपस्करसं
युतम्॥३८॥उमामहेश्वरंहैमंवृषभंचगवासह॥स्थापयित्वातुशयनेब्राह्मणायनिवेदयेत॥३९॥अन्यान्यपियथाश

॥ भ·पु ॥
॥ ४६ ॥

= यसेत्स्वर्गे ४

गंधामिपुनाल्यंवरादिभिः ॥ धान्यालंकारगोरत्नैरन्यैश्च धनसंचयैः ॥ ४० ॥ वित्तशाठ्येन रहितः पूजयेद्गतविस्मयः ॥ एवं क-
रोति यः सम्यक्सौभाग्यशयनव्रतम् ॥ ४१ ॥ सर्वान्कामानवाप्नोति पदं चानन्त्यमश्नुते ॥ सौभाग्यारोग्यरूपायुर्वस्त्रालंका-
रभूषणैः ॥ ४२ ॥ न वियुक्तो भवेद्राजन्नववर्षायुतत्रयम् ॥ यस्तु द्वादशवर्षाणि सौभाग्यशयनं व्रतम् ॥ ४३ ॥ करोति सप्त वा-
ष्टौ वा श्रीकण्ठभुवनेश्वरैः ॥ पूज्यमानो मुनैस्तस्माद्यावत्कल्पायुतत्रयम् ॥ ४४ ॥ नारी वा कुरुते या तु कुमारी वा नरेश्वर ॥
सापि तत्फलमाप्नोति देव्यनुग्रहलालिता ॥ ४५ ॥ प्रत्यक्षयादपि यश्चैतत्सृणुयादथ वा मति ॥ सोऽपि विद्याधरो भूत्वा स्वर्गलोके
चिरं वसेत ॥ ४६ ॥ इदमिह मदनेन पूर्वमिष्टं व्रतमिदं शतधन्विना कृतं वै ॥ सरयतिधनदेशवायुसोमैश्चरितमिदं कहे-
गोनवंदिताय ॥ ४७ ॥ यानीह दत्तानि पुरा नरेन्द्रैर्दानानि धर्मार्थयशस्कराणि ॥ निर्माल्यवंतिप्रतिमानितानि निसनाम सा-
धुः पुनराददीत ॥ ४८ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि सौभाग्याष्टकतृतीयाव्रतं नाम पंचविंशतितमोऽ-
ध्यायः ॥ २५ ॥ ॥ युधिष्ठिर उवाच ॥ सौभाग्यारोग्यफलदं रिपुपक्षक्षयकारकम् ॥ भुक्तिमुक्तिप्रदं किंचिद्व्रतं ब्रूहि जनार्दनः
१ ॥ श्रीकृष्ण उवाच ॥ यदुमाया पुरा देव उवाच त्रिपुरसूदनः ॥ कथासु संप्रवृत्तासु ललिताराधनं प्रति ॥ २ ॥ तदिदानीं प्रवक्ष्या-
मि भुक्तिमुक्तिफलप्रदम् ॥ नराणामथ नारीणामाराधनमनुत्तमम् ॥ ३ ॥ प्रतःघा वहितो भक्त्या सर्वपापप्रणाशनम्

वस्तोन.

46

॥ रा म ॥
॥ ४६ ॥

नमस्येवाथवैशाखेपुनर्मार्गशिरेथवा ॥४॥ शुक्लपक्षतृतीयायांस्नानःसगौरसर्षपैः ॥ गोरोचनसगोमूत्रमुस्तागोश
कृतंतथा ॥५॥ दधिचंदनसंमिश्रंललाटेतिलकंन्यसेत् ॥ सौभाग्यारोग्यकृद्यस्मात्सदाचललिताप्रियम् ॥६॥ प्रतिपक्षं
तृतीयायांचवस्त्रमापीतवाससी ॥ धारयेदथवारक्तपीतानिकुसुमानिच ॥ सौभाग्यारोग्यकृद्यस्मात्सदाचललिताप्रियम्ः
६ ॥ प्रतिपक्षंतृतीयायांचवस्त्रगापीतवाससी ॥ धारयेदथवारक्तपीतानिकुसुमानिच ॥७॥ विधवाप्यनुरक्तानिकुमारीशु
क्लवाससी ॥ देव्यर्चांपंचगव्येनततःक्षीरेणकेवलम् ॥८॥ स्नापयेन्मधुनातद्वत्पुष्पगंधोदकेनच ॥ पूजयेच्छुक्लपुष्पै
श्चफलैर्नानाविधैरपि ॥९॥ धान्यकाजाजिलवणगुडक्षीरघृतादिभिः ॥ शुक्लाक्षतैस्तिलैरर्च्यललितांयःसदार्चयेत् १०
पादादारभ्यवैकुर्याद्देव्याःसम्यकसमासतः ॥ वरदायैनमःपादौतथागुल्फौश्रियैनमः ॥११॥ अशोकायैनमोजंघेभवा
न्यैजानुनीतथा ॥ ऊरूमांगल्यकारिण्यैकामदेव्यैतथाकटिम् ॥१२॥ पद्मोद्भवायैजठरमुरःकामश्रियैनमः ॥ करौसौभा
ग्यवासिन्यैबाहूहराह्निमुखश्रिये ॥१३॥ मुखंकंदर्पवासिन्यैपार्वत्यैमुस्मितंतथा ॥ गौर्यैनमस्तथानासांसुनेत्रायैचलो
चनं ॥१४॥ तुष्टैललाटफलकंकात्यायन्यैशिरस्तथा ॥ नमोगौर्यैनमःसृष्ट्यैनमःकांत्यैनमःश्रियै ॥१५॥ रंभायैललिता
यैचवासुदेव्यैनमोनमः ॥ एवंसंपूज्यविधिवदग्रतःपद्ममालिखेत् ॥१६॥ पत्रैर्द्वादशभिर्युक्तंकुंकुमेनसकर्णिकम् ॥

वऋम् १

पूर्वेण विन्यसेद्गौरीमपर्णां च ततः परम् ॥ १७ ॥ भवानी दक्षिणेन रुद्राणी च ततः परम् ॥ विन्यसेत्पश्चिमे सौम्यां
ततो मदनवासिनीम् ॥ १८ ॥ वायव्यां पाटलां वासामुत्तरेण ततो ह्युमाम् ॥ लक्ष्मीं स्वाहां स्वधां तुष्टिं मंगलां कुमुदां स-
तीम् ॥ १९ ॥ रुद्राणी मध्यतः स्थाप्य ललितां कर्णिकोपरि ॥ कुसुमैरक्षतैः शुभ्रैर्नमस्कारेण विन्यसेत् ॥ २० ॥ गीतमंग-
लघोषं च कारयित्वा सुवासिनी ॥ पूजयेद्रक्तवासोभी रक्तमाल्यानुलेपनैः ॥ २१ ॥ सिंदूरं स्नानचूर्णं च तासां शिरसि दा-
पयेत ॥ सिंदूरं कुंकुमं स्नानमिष्टं सत्याः सदा यतः ॥ २२ ॥ नमस्येत्पूजयेद्गौरी मृत्पालैरसितैस्तथा ॥ गंधजीवैराभ्यञ्जे का-
र्तिके शतपत्रकैः ॥ २३ ॥ कुंदपुष्पैर्मार्गशिरे पौषे वै कुंकुमेन च ॥ माघे तु पूजयेद्देवीं सिंदुवारेण भक्तितः ॥ २४ ॥ जात्या तु
फाल्गुने पूज्या पार्वती पाडुनंदन ॥ चैत्रे च मल्लिकाशोकैर्वैशाखे गंधपाटलैः ॥ २५ ॥ ज्येष्ठे कमलमंदारैराषाढे चंपकाम्बु-
जैः ॥ कदंबैरथ मालत्या श्रावणे पूजयेदुमाम् ॥ २६ ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ बिल्वपत्रार्कपुष्पं च ग-
वां शृंगोदकं तथा ॥ २७ ॥ पंचगव्यं तथा बिल्वं प्राशयेत्क्रमशः सदा ॥ रूपज्ञाडपदापेनु प्राशनं समुदाहृतम् ॥ २८ ॥ प्रति-
पक्षं द्वितीयायां मया प्रोक्तं वरानने ॥ ब्राह्मणं ब्राह्मणीं चैव शिवं गौरीं प्रकल्प्य च ॥ २९ ॥ भोजयित्वार्चयेद्भक्त्या वस्त्रमाल्या-
नुलेपनैः ॥ पुंसः पीताम्बरे दत्वा स्त्रियाः कौसुंभवाससी ॥ ३० ॥ निष्पावाजाजिलवणमिक्षुदंडगुडान्वितम् ॥ स्त्रियै दद्या

47

ष्टलं पुनः सुवर्णोत्पलसंयुत ॥३१॥ यथा न देवदेवेश त्वां परित्यज्य गच्छति ॥ तथा मां संपरित्यज्य पतिर्नान्यत्र ग-
च्छतु ॥३२॥ कुमुदा विमलानंता भवानी वसुधा शिवा ॥ ललिता कमला गौरी सती रंभाथ पार्वती ॥३३॥ नमस्यादिषु
मासेषु प्रीयतामित्युदीरयेत् ॥ व्रतांते शयनं दद्यात्सुवर्णकमलान्वितम् ॥३४॥ मिथुनानि चतुर्विंशत्तद्वदं सम्पूज-
येत् ॥ अष्टावष्टावथ पुनश्चातुर्मास्येषु समर्चयेत ॥३५॥ तथोपदेष्टारमपि पूजयेद्यत्नतो गुरुम् ॥ न पूज्यते गुरुर्यत्र
सर्वास्तत्राफलाः क्रियाः ॥३६॥ उक्तानंततृतीयैषा सदानंदफलप्रदा ॥ सर्वपापहरा देवी सौभाग्यारोग्यवर्द्धिनी ॥३७
न चैनां वित्तशाठ्येन कदाचिदपि लंघयेत् ॥ नरो वा यदि वा नारी वित्तशाठ्यात्पतत्यधः ॥३८॥ गर्भिणी सूतिका नक्तं कुमा-
री वाथ रोगयुक् ॥ यदाशुद्धा तदान्येन क्रियमाणां तु कारयेत् ॥३९॥ इमामनंतफलदां तृतीयां यः समाचरेत् ॥ कल्पको-
टिशतं साग्रं शिवलोके स पूज्यते ॥४०॥ वित्तहीनोऽपि कुर्वीत वर्षत्रयमपोषणे ॥ पुष्पमन्त्रविधानेन सोपि तत्फल-
माप्नुयात् ॥४१॥ नारी वा कुरुते या तु कुमारी विधवा तथा ॥ साऽपि तत्फलमाप्नोति गौर्यनुग्रहभाविता ॥४२॥ इति प-
ठति शृणोति वा य इत्थं गिरितनयाव्रतमिंदुलोकसंस्थः ॥ मतिमपि च ददाति सोऽपि देवैरमरवधूजनकिंनरैश्च
पूज्यः ॥४३ ॥ इत्यनंततृतीयाव्रतं ॥ ॥ श्रीकृष्णउवाच ॥ अन्यामपि प्रवक्ष्यामि तृतीयां पापनाशिनीम्

॥ म॰पु ॥
॥ ४८ ॥

रसकल्याणिनीनामतथाकल्पविदोविदुः॥४४॥माघमासेतुसंप्राप्तेतृतीयांशुक्लपक्षिकाम्॥प्रातर्गव्येनप
यसातिलैःस्नानंसमाचरेत्॥४५॥स्नापयेन्मधुनादेवींतथैवेक्षुरसेनच॥पुनःपूजाप्रकर्त्तव्याजात्यावाकुं
कुमेनवा॥४६॥दक्षिणाङ्गानिसंपूज्यततोवामानिपूजयेत्॥ललितायैनमःपादौगुल्फंतद्वदर्चयेत्॥४७॥जंघेजानूत
थासत्यैतथोरभ्यश्रियैनमः॥मदनालसायैतुकटिंमदनायैतथोदरम्॥४८॥स्तनौमदनवासिन्यैकुमुदायैचकंधरम्॥भु
जौभुजाग्रंमाधव्यैकमलायपुपस्थितम्॥४९॥भ्रूर्ललाटंचरुद्राण्यैशंकरायैतथालकान्॥मुकुटंविश्ववासिन्यैपुनःकान्त्यै
तथालकान्॥५०॥नेत्रंचक्रधारिण्यैपुष्ट्यैचवदनंपुनः॥उत्कंठिन्यैनमःकंठमनन्तायैतुकंधराम्॥५१॥रंभायैवामबा
हुंचविशोकायैनमःकरम्॥हृदयंमन्मथादित्यैपाटलायैनमोनमः॥५२॥एवंसंपूज्यविधिवद्द्विजदंपत्यमर्चयेत्॥भोजयि
त्वान्नदानेनमधुरेणविमत्सरः॥५३॥सलडुकंवारिकुंभंशुक्लांबरयुगंततः॥दत्वासुवर्णकमलंगंधमाल्यैरथार्चयेत्॥५४
प्रीयतामत्रकुमुदागृह्णीयाल्लवणंव्रतम्॥अनेनविधिनादेवींमासिमासिसमर्चयेत्॥५५॥लवणंवर्जयेन्माघेफाल्गुनेच
गुडंपुनः॥तावराजंतथाचैत्रेवर्ज्यंचमधुमाधवे॥५६॥पानकंज्येष्ठमासेतुआषाढेजीरकंतथा॥श्रावणेवर्जयेत्क्षीरंदधिभा
द्रपदेतथा॥५७॥घृतमश्वयुजेतद्वद्वर्जयेपाचमक्षिका॥धान्यकंमार्गशीर्षेतुपौषेवर्ज्यातुशर्करा॥५८॥व्रतान्तेकरकापू

48

॥ राम ॥
॥ ४८ ॥

र्गानेनैषां मासि मासि च ॥ कृष्णाष्टिकालवेलायां भक्ष्यपात्रेण संयुतान् ॥ ५९ ॥ तंडुलाज्यैस्तु वर्णाभ्यां संयावसमधुपूरिका ॥
घारिका घृतपूरांश्च मंडकान् क्षीरशाककम् ॥ ६० ॥ दध्यन्नं षड्विधं चैव भिंडयः शाकवर्तिकाः ॥ माघादौ क्रमशो दद्यादेता
निकरकोपरि ॥ ६१ ॥ कुमुदा माधवी गौरी रंभा भद्रा जया शिवा ॥ उमा शची सती तद्वन्मंगला रतिलालसा ॥ ६२ ॥ क्रमान्मा
घादि सर्वत्र प्रीयतामिति कीर्तयेत् ॥ वर्जनं पंचगव्यं च प्राशनं समुदाहृतम् ॥ ६३ ॥ उपवासी भवेन्नित्यमशक्तो दक्षिणोक्
रे ॥ उत्तमर्गोपेन्नु संप्राप्य शर्कराकरकोपरि ॥ ६४ ॥ कृत्वा तु कांचनीं गौरीं पंचरत्नसमन्विताम् ॥ उमामंगुष्ठमात्रां च कृधी
स्त्रकमंडलुम् ॥ ६५ ॥ नक्तं गोमिथुनं सर्वं सुवर्णास्यं सितं परम् ॥ सवस्त्रभाजनं दत्वा भवानी प्रीयतामिति ॥ ६६ ॥ अनेन वि
धिना यस्तु रसकल्याणिनीव्रतम् ॥ कुर्यात्स सर्वपापेभ्यस्तत्क्षणादेव मुच्यते ॥ ६७ ॥ भवार्बुदसहस्रं तु न दुःखी जायते क्वचित् ॥
अग्निष्टोमसहस्रेण यत्फलं तदवाप्नुयात् ॥ ६८ ॥ नारी वा कुरुते या तु कुमारी वा युधिष्ठिर ॥ विधवा वा वराकी वा सापि तत्फल
भागिनी ॥ सौभाग्यारोग्यसंपन्ना गौरीलोके महीयते ॥ ६९ ॥ इति पठति य इत्थं यः शृणोति प्रसंगात्सकलकलुषमुक्तः पा
र्वतीलोकमेति ॥ मतिमपि च नराणां यो ददाति प्रियार्थं विपुलमतिजनानां नायकः स्यादमोघम् ॥ ७० ॥ ॥ इति श्रीभ
विष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रसकल्याणिनीव्रतवर्णनं नाम षड्विंशतितमोऽध्यायः ॥ २६ ॥

श्रीकृष्ण उवाच ॥ तथाचान्यं प्रवक्ष्यामि तृतीयां पापनाशिनीम् ॥ लोकेषु नाम्ना विख्यातामाऽनंदकरीमिमाम् ॥ १ ॥
यदा शुक्लतृतीयायामाषाढर्क्षं भवेत्क्वचित् ॥ ब्रह्मर्क्षं वाथ मार्गं वा व्रतं ग्राह्यं तदा शुभम् ॥ २ ॥ दर्भगंधोदकैः स्नानं तेन दास
स्यकृत्समाचरेत् ॥ शुक्लमाल्यांबरधरः शुक्लगंधानुलेपनः ॥ ३ ॥ भवानीमर्चयेद्भक्त्या शुक्लपुष्पैः सुगंधिभिः ॥ महादेवे
न सहितामुपविष्टां वरासने ॥ ४ ॥ वासुदेव्यै नमः पादौ शंकराय नमो हरे ॥ जंघे शोकविनाशिन्यायावन्ताय नमः प्र
भो ॥ ५ ॥ रंभायै पूजयेदूरू शिवाय च पिनाकिनः ॥ आदित्यै च कटिं पूज्या शूलिनः शूलपाणये ॥ ६ ॥ माधव्यै च तथा
नाभिमथ शंभो भवाय वै ॥ स्तनावानंदकारिण्यै शंकरायेंदुधारिणे ॥ ७ ॥ उत्कंठिन्यै नमः कंठं नीलकंठाय वै हरेः ॥ करा
उत्पलधारिण्यै रुद्राय जगतीपते ॥ ८ ॥ बाहुं च परिरंभिण्यै नृत्यशीलाय वै हरे ॥ ९ ॥ देव्यामुखं विलासिन्यै वृषेशाय पु
नर्विभो ॥ स्मितं संस्मरशीलायै विश्ववक्त्राय वै विभो ॥ १० ॥ नेत्रं मदनवासिन्यै विश्वधाम्ने त्रिशूलिने ॥ भ्रुवौ रति
प्रियायै च तांडवेशाय वै विभो ॥ ११ ॥ देव्यै ललाटमिंद्राण्यै हव्यवाहाय वै विभो ॥ स्वाहायै मुकुटं देव्या विभोः पंचशाराय
वै ॥ १२ ॥ विश्वकायै विश्वमुखौ विश्वपादकरौ शिवौ ॥ प्रसन्नवदनौ वंदे पार्वतीपरमेश्वरौ ॥ १३ ॥ एवं संपूज्य विधिवद
ग्रतः शिवयोः पुनः ॥ पद्मोत्पलानि च तथा नानावर्णानि कारयेत् ॥ १४ ॥ शंखचक्रे सकटके स्वस्तिकं वर्द्धमानकम् ॥ गोम

= १ रक्तपुष्पैः ४ विश्ववक्त्राय ४

49

सर्वाश

त्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम् ॥ १५ ॥ शृंगोदकं बिल्वपत्रं नारिकेंभान्वितं तथा ॥ उशीरनीरं तद्वच्चन्दनोदकं त
तः ॥ १६ ॥ तिलोदकं च मंत्राम्भस्त्वपेन्मार्गशिरादिषु ॥ प्रतिपक्षे द्वितीयायां प्राशनं समुदाहृतम् ॥ १७ ॥ सर्वत्र भृङ्गराजस्तु व्यालिग्रहा
ह्यानि शिवार्चने ॥ दानकाले तु सर्वे तु मंत्रमेतमुदीरयेत् ॥ १८ ॥ गौरी मे प्रीयतां नित्यमघनाशाय मंगला ॥ सौभाग्यायास्तु ल
लिता भवानी सर्वसिद्धये ॥ १९ ॥ संवत्सरान्ते लवणं गुडकुंभं समर्जितम् ॥ चंदनं नेत्रपट्टं च सितवस्त्रयुगान्वितम् ॥ २० ॥ उमा
महेश्वरं हैमं तद्वद्दिक्षु फलैर्युतम् प्रलरावरणं ताभ्यां सविश्यामां निवेदयेत् ॥ २१ ॥ सपत्नीकाय विप्राय गौरी मे प्रीयतामिति ।
आर्द्रानन्दकरी नाम तृतीयैषा सनातनी ॥ २२ ॥ यामुपोष्य नरो याति शंभोस्तत्परमं पदम् ॥ इहलोके यदानंदं प्राप्नोति धनसं
चयात् ॥ २३ ॥ आयुरारोग्यसंपन्नो न कश्चिद्दुःखमाप्नुयात् ॥ नारी वा कुरुते या तु कुमारी विधवा तथा ॥ २४ ॥ सापि तत्फलमा
प्नोति देव्यनुग्रहलालिता ॥ प्रतिपक्षमुपोष्यैवं मंत्रार्चनविधानतः ॥ २५ ॥ रुद्राणीलोकमाप्नोति पुनरावृत्तिदुर्लभम् ॥ यद्
दंभरहितया लिख्यं श्रावयेद्वापि मानवः ॥ नाकलोके सगंधर्वैः पूज्यतेऽब्दशतत्रयम् ॥ २६ ॥ आनंददां सकलदुःखहरां तृ
तीयां या स्त्री करोति विधिवत्सधवाधवा वा ॥ सा स्वे गृहे सुखशतान्यनुभूय भूयो गौरीपुरं सदयिता मुदिता प्रयाति ॥ २७
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आर्द्रानन्दकरीतृतीयाव्रतं नाम सप्तविंशतितमोऽ

॥भवि॰पु॥
॥५०॥

ध्याय॥२७॥ ॥युधिष्ठिरउवाच॥ चैत्रेभाद्रपदेमाघेरूपसौभाग्यप्रदम्॥ तृतीयाव्रतमेतन्मेकृत्स्नंकस्मान्नकीर्तित
म्॥१॥ किमहंभक्तिरहितस्त्वयीमार्गातिगोनरः॥ शुश्रूषुर्दञ्जगत्स्वेनडोषितंकेनहेतुना॥२॥ भगान्सर्वधर्म्मानुकूलःस
र्वज्ञइतिमेमतिः॥ श्रीकृष्णउवाच॥ वृतंचैतज्जगत्सम्यक्तेनाख्यातंतेनतेनमया॥३॥ यथास्तिश्रवणेवुद्धिःश्रूयतांपाण्डुनं
दन॥ कौऽन्यःश्रोताजगत्यास्मिन्भवतानरद्योभुवि॥४॥ जयावविजयाचैववदुमायाःपरिचारिके॥ आगस्त्यमुनिक
न्याभिःपृष्टेभीष्ठफलेस्फुटा॥५॥ मयष्टौसर्वदादेव्याश्चितंवृतिविदोषिल॥ केनव्रतोपचारेणकस्मिन्नहनिपार्वती
ई॥ पूजितातुष्टिमभ्येतिमंत्रैःकैश्चवरानने॥ तासांतद्वचनंश्रुत्वाजयाप्रोवाचसादरम्॥७॥ श्रूयतामभिधास्यामि
सर्वकामफलप्रदम्॥ व्रतमुत्तमवलंघ्यकंनरनारीमनोरमम्॥८॥ चैत्रेसिततृतीयायांदन्तधावनपूर्वकम्॥ उपवास
स्यनियमंगृह्णीयाद्भक्तिभावितम्॥९॥ सकुंकुमंसतांबूलंसिंदूरंरत्नवाससी॥ विधवासोपवासाप्यवैधव्यकरणंपर
म्॥१०॥ विधवायातिमार्गेणकुमारीतुयदृच्छया॥ कुर्यादम्पर्वनविधिंश्रूयतांमंत्रविक्रमः॥११॥ नेत्रपटपटीवस्त्रै
र्वस्त्रमण्डपिकांशुभाम्॥ कारयेत्कुसुमामोदिव्याभरणभूषिताम्॥१२॥ प्रवालंलंवितत्रानामेतार्ईक्ष्यविनानका
म्॥ विन्यस्तपर्णकलशांसम्यक्स्थापितद्विजाम्॥१३॥ पुरतःकारयेत्कुंडंहस्तमात्रंसमेखलम्॥ ततःस्नात्वानुलि

२ विधयात्सोपवासापि ४

50

॥राम:॥
॥५०॥

वपरिधापयेद्वाससी ॥ १४ ॥ देवाग्नीन्समभ्यर्च्यन्ततो देवीगृहं व्रजेत् ॥ नामाष्टकेन संपूज्या गौरी गोपतिवल्लभा·
१५ ॥ तत्कालसम्भवैः पुष्पैर्गन्धालिवकुलाकुलैः ॥ कुंकुमेन समालभ्य कर्पूरागरुचन्दनैः ॥ १६ ॥ एवं संपूज्य विधिवत्स
धूपैनाधिवासयेत् ॥ पार्वती ललिता गौरी गांधारी शांकरी शिवा ॥ १७ ॥ उमा सती समुद्दिष्टं नामाष्टकमिदं मया ॥ लड्डु
कैः खण्डवेष्टैश्च गुणकैः सिंहकेसरैः ॥ १८ ॥ सोमालकैः कोकसरैः खंडखाद्यकरंबकैः ॥ घृतपक्वैर्बहुविधैः सुपक्वफलक
ल्पितैः ॥ १९ ॥ दधिप्राणाहारैर्हृद्यैर्ल्लेह्यैः प्रीणयेदुमाम् ॥ कंदुखंडजीरकं वकुंकुमं लवणाद्रकम ॥ २० ॥ इक्षुदंडानैश्चवं
वहरिजडांम्ररोत्समेन ॥ नालिकेरामलकान्मातुलुंगान्सदाडिमान् ॥ २१ ॥ कूष्माण्डकर्कटी वृंतनारंगपनसादिकान्·
कालोद्भवानि चान्यानि फलानि विनिवेदयेत् ॥ २२ ॥ गृहोपस्करवलशिलासर्पाभ्रणानिभिः सह ॥ नेत्रांजनशलाका श्वेत
खरैवनकानि च ॥ २३ ॥ दर्पणं वंशपात्राणि भवान्यै विनिवेदयेत् ॥ तालतूर्यनिनादेन गीतमंगलनिःस्वनैः ॥ २४ ॥ भक्त्या
संपूजयेद्देवीं स्वशक्त्या गिरिवल्लभाम ॥ ततोऽस्तसमये भानोः कुमार्यः कारकैर्नवैः ॥ २५ ॥ स्नानं कुर्युर्मुदायुक्ताः सौभाग्या
रोग्यवृद्धये ॥ यामे यामे जगते स्नानं देवीपूजनमेव च ॥ २६ ॥ तैरेव नामभिर्होमस्तिललाजेनपुष्पास्यने ॥ पद्मासनस्थिता
साध्वी तेनैवार्द्रेण वाससा ॥ २७ ॥ गौरीमुखेक्षणपरा तां रात्रिमतिवाहयेत् ॥ काश्चिद्गायंति संहृष्टाः काश्चिन्नृत्यं

५९

तिहर्षिता ॥ २८ ॥ कथयंतिकथाः काश्चिद्देव्यास्तत्रमहोत्सवे ॥ गीततालानुसंवद्धमनुष्ठनमनाकुलम् ॥ २९ ॥ नृत्यंतिस्मपुरे
देव्याः काश्चिद्दुःखसितभुवम् ॥ नृत्येनहृष्यतिहरोगौरीतेनतुष्यति ॥ ३० ॥ सप्तावेलापद्मासर्वेगाकुंतेपरमांमुदम् ॥ तृषासि
तीमिल्लांवलंकुंकुमकुसुमानिच ॥ ३१ ॥ प्रदेयंज्ञागरवतावाम्येषामपिकिंचन ॥ नैवेद्यंचैवतथाप्रेक्षणकोत्सवे ॥ ३२ ॥ सति
भिः सहितारात्रिंगायन्त्यःसुहृन्नांनयेत् ॥ एवंप्रभातसमयेस्नात्वासंपूज्यपार्वतीम् ॥ ३३ ॥ ततोवैस्वसमारोहेदत्वालक्ततो
रणम् ॥ तोलयेत्तन्तथासीतंगुडेनलवणेनव ॥ ३४ ॥ कुंकुमेनाथवाग्रानाकर्पूरागरुचंदनैः ॥ पर्वतानामपिच्छेदैः केचिदि
च्छंतिसत्यये ॥ ३५ ॥ कुंडमंडपसंभारैर्मेघैस्तत्रैवशोभयेत् लवणेनसहात्मानंतोलयंतिगुडेनवा ॥ ३६ ॥ कयापिभक्तिप
रयासौभाग्यमतुलीकृतम् ॥ एवंदेवींप्रसाद्यायेभिक्षामाप्यगृहमाविशेत् ॥ ३७ ॥ ग्रामेऽश्मयास्वकुशलानावारविधिपारगा
न् ॥ अन्नंवमधुरप्रायंभोजयित्वासुवासिनी ॥ ३८ ॥ स्वयंभुंजीतसहिताज्ञातीजनवृंदैस्वकैः ॥ यत्रदेव्याःपुरोदत्तंनैवेद्यादि
नदिक्रया ॥ ३९ ॥ गृहंप्रतिनयेत्सर्वंविभज्याभोजितिमानसा ॥ ततोदद्याद्गृहस्थेभ्यः कृतकृत्याभवेत्तदा ॥ ४० ॥ विधिर्भांडपदे
ऽप्येषवतोसर्वप्रदायकः ॥ सप्तधान्यस्वरूपांवमर्पयेत्संपूजयेदुमाम् ॥ ४१ ॥ गोमूत्रप्राशनंकृत्वातेनगोमूत्रसंहिता ॥ मा
घमासव्रतीयायांविशोकः क्रयतामिति ॥ ४२ ॥ पूर्वोक्तंसकलंकृत्वाप्रभातेयवसंस्तरम् ॥ तोलयित्वाकुंकुमैःपूजयेत्त

51

स्नातामिति ॥ ४३ ॥ एतेन कारणेनोक्ता चतुर्थी कुंडसंज्ञया ॥ तृतीयायां मयैतत्ते कथितं सर्वकारणम् ॥ ४४ जगया
मुनिकन्यानां यन्मया समुदाहृतम् ॥ श्रीकृष्ण उवाच ॥ आसीद्विदर्भनगरे वेश्या सर्वांगसुंदरी ॥ ४५ ॥ तया ब्राह्मणबाले
न सर्वमेतत्कृतं पुरा ॥ भुक्त्वा भोगान्महीपृष्ठे दत्वा दानं यथेप्सया ॥ ४६ ॥ कालेन समनुप्राप्ता मरणं मनुजेश्वर ॥ अवंतिना
राजदुहिता सा बभूवातिशोभना ॥ ४७ ॥ अवंतिसुंदरी नाम देवानामपि सुंदरी ॥ यदि वक्तुं सहस्राणां सहस्रैस्या कथं च न
४८ ॥ तथापि निर्वर्ण्यते नृप समासात्सा सुलोचना ॥ वैवस्वती यामाहि तस्या लावण्य वयः प्रभावती ॥ ४९ ॥ मातापि वीरति
श्रेष्ठा श्रीष्ठा सजनवल्लभा ॥ लब्धाश्विसंभवा यद्युक्तु पौनाक्तिष्टकर्मणा ॥ ५० ॥ ततः सा बुभुजे भोगान्भर्त्रा सार्द्धं मु
दामती ॥ यदत्तं ब्राह्मणेभ्यः सा भूषणं कटकादिकम् ॥ ५१ ॥ ततश्च भावेन सा लेभे सौभाग्यं किं ततः परम् ॥ पुत्रांश्च जनय
मास निर्दोषान्रूपराक्रमान् ॥ ५२ ॥ सर्वलक्षणसंपन्नान्वेदेन विधिपारगान् ॥ एवं दृष्ट्वा महत्सौभाग्यं पुत्रसंपद
म् ॥ ५३ ॥ भर्तुः सहैव मरणमेतत्प्राप्य पतिव्रता ॥ शक्रादिलोकपालानां भवनेषु यथाक्रमम् ॥ ५४ ॥ साक्रम्य ब्रह्मलो
कं च जगाम शिवसान्निधानम् ॥ एवं या नापि कुरुते नारी व्रतमिदं शुभम् ॥ ५५ ॥ सा तद्रूपसौभाग्यसुतान्प्राप्य स्वर्गे मही
यते ॥ न दुर्भगा कुलेतस्याः काचिद्भवति कन्यका ॥ ५६ ॥ न दुर्विनीतश्च सुतो न सम्भवत्यपि यक्ष्यवेन ॥ न दरिद्रो गृहे न

स्मितेन न्क्षाधिरूपजायते ॥५७॥ यत्र सा रमते साध्वी ध्यानयामीकरप्रभा ॥ अन्याश्च याश्चरी ध्यां निब्राह्मणात्तम
नेव्रतम् ॥५८॥ संपूज्यता नवकं भक्त्या भूषणाच्छादनादिभिः ॥ नाः सर्वकृष्णसंपन्ना अविपन्नमनोरथाः ॥ भविष्यंति गृ
हेष्वेष्टनस्यै देवि नमोस्तु ते ॥५९॥ माघे महार्घ्यमणिमंडितपादपीठां वैश्रैविविधकृतसोत्करवर्षितांगीम् ॥ सर्वप्रद
ढनवसस्यमर्यां नमस्ये संपूज्य नांभुदपितां शुभवंतिनार्यः ॥६०॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे चैत्रभाद्रपदमाघतृतीयाव्रतवर्णनं नामाष्टाविंशतितमोऽध्यायः ॥२८॥ युधिष्ठिर उवाच ॥ कृष्णपक्ष
तृतीयायां तु यद्वद्वः समुपोहना ॥ स्नानं कार्यं व्रतं ब्रूहि तृतीयो मयसर्वज्ञ नम ॥१॥ हिताय सर्वभक्तानां ललनानां विशेषतः ॥ स्ना
नप्राशननैवेद्यैर्मासि मासि पृथक् पृथक् ॥२॥ श्रीकृष्ण उवाच ॥ ब्रूहि विप्रमहेशाद्यैर्यथोक्तं नरसत्तमैः ॥ अपतं सर्वसं
ग्राणामानंतर्यं व्रतं स्त्रराः ॥३॥ आदौ मार्गशिरे मासि व्रतमेतत्समाचरेत् ॥ नक्तं कुर्याद्द्वितीयायां तृतीयायामुपोषि
तः ॥४॥ उमादेवीं समभ्यर्च्य पुष्पगंधादिभिः क्रमात् ॥ शर्करापूरिकां दत्वा प्राशितिपयस निवेदयेत् ॥५॥ प्राशयित्वा दधि
रात्रौ स्वपेद्विगतमत्सरः ॥ प्रभाते विधिवत्स्नात्वा मिथुनं भोजयेत्सुधीः ॥६॥ अश्वमेधमवाप्नोति समग्रं नात्र संशयः ॥
तथा कृष्णतृतीयायां सोपवासो जितेंद्रियः ॥७॥ अपेक्षाद्याय नीनाम नालिकेरं निवेदयेत् ॥ क्षीरं प्राश्य स्वपेद्रात्रौ

52

॥ रामः ॥
॥५२॥

कामक्रोधविवर्जितः ॥ ८ ॥ दांपत्यं सुभगं भोज्यं गोमेधफलमाप्नुयात् ॥ पौषस्यादितृतीयायां सोपवासो जितेन्द्रियः ॥
९ ॥ गौरीं नामतु संपूज्य लड्डुकानि निवेदयेत् ॥ घृतं प्राश्य स्वपेद्रात्रौ सम्यक्त्वा कामं नदयन्तः ॥ १० ॥ प्रभाते मिथुनं भोज्यं न
रमेधफलं लभेत् ॥ एवं कृष्णे तृतीयायां पार्वतीमिति पूजयेत् ॥ ११ ॥ निवेदयाल्लं शष्कुल्यो गोमयं प्राशयेन्निशि ॥ दां
पत्यं विविधं भोज्यमश्वमेधफलं लभेत् ॥ १२ ॥ माघस्य कृष्णपक्षे तु तृतीयायामुपोषितः ॥ सुरनायिकां च संपूज्य
खण्डबिल्वं निवेदयेत् ॥ १३ ॥ ततः कुशोदकं प्राश्य स्वपेद्भूमौ जितेन्द्रियः ॥ प्रभाते मधुरान्नेन मिथुनं भोज्य भक्तितः ॥
१४ ॥ समाप्यांते नमस्कृत्य गतिस्वर्गीफलं लभेत् ॥ पुनरेतत्ततो माघे कृष्णपक्षे शुचिव्रतः ॥ १५ ॥ आर्यां नामा तु पूज्याथ
खण्डकानि निवेदयेत् ॥ सघृतं प्राश्य स्वपेद्रात्रौ कामक्रोधविवर्जितः ॥ १६ ॥ मिथुनं भोजयित्वा तु वाजपेयफलं लभेत् ॥ एवं वै
फाल्गुने मासि सोपवासः शुचिव्रतः ॥ १७ ॥ भण्डीं नाम तु पूज्याथ कासारं वि निवेदयेत् ॥ शर्करां प्राशयित्वाथ स्वपेद्रात्रौ वि
मत्सरः ॥ १८ ॥ प्रभाते मिथुनं भोज्यं सौत्रामणिफलं लभेत् ॥ पुनः कृष्णे तृतीयायां काल्गुनस्यैव मारत ॥ १९ ॥ विशालाक्षीं
समभ्यर्च्य पूरिकाविनिवेदयेत् ॥ सोदकांस्तंडुलान्दत्वा स्वपेद्भूमौ मनस्विनी ॥ २० ॥ भोजयेन्मिथुनं प्रातरग्निष्टोमफलं लभे
त् ॥ चैत्रस्यादितृतीयायां शुचिर्भूता जितेन्द्रिया ॥ २१ ॥ श्रियं देवीं यजेद्भक्त्या वटकानि निवेदयेत् ॥ बिल्वपत्रं ततः प्राश्य

॥ भ.पु ॥ स्वपेद्भानवरापरात्रा ॥२२॥ प्रातःस्नात्वा यमं दत्त्वा मिथुनं पूजयेत्सुधीः ॥ प्रतिपत्सु च मासेष्वेवं राजसूयफलं भवेत्

॥ ५३ ॥ ॥२३॥ पुनः कृष्णातृतीयायां वैत्रे लम्ब गुण्डो बिना ॥ कालीं नाम समभ्यर्च्य पिष्टं प्राशय स्वपेन्निशि ॥२४॥ पूर्वकाणि निवे-

द्यात्र कुर्याज्जागरम् ॥ मिथुनानि बलं भोज्य मतिरात्रफलं भवेत् ॥२५॥ एवं वैशाखमासे तु सोपवासो जितेन्द्रियः

पूजयेद्वदिकां देवीं मधुकानि निवेदयेत् ॥२६॥ श्रीखण्डं चन्दनं लिप्त्वा स्वपेद्दक्षिणतो भुवि ॥ भोजयित्वा वदंपत्तं वाजा-

यगाफलं लभेत् ॥२७॥ तथा कृष्णातृतीयायां सोपवासो विमत्सरः ॥ पूजयेत्कालरात्रिं तु गन्धपुष्पैः सदीपकैः ॥२८॥

गुग्गुलुधूपावकं दत्त्वा तिलान्भुञ्जन्स्वपेन्निशि ॥ प्रभाते मिथुनं भोज्य मतिकृच्छ्रफलं लभेत् ॥२९॥ ज्येष्ठे सिततृतीयायां स्वो-

पवासकृतो नरः ॥ रम्भां देवीं समभ्यर्च्य आम्राणि विनिवेदयेत् ॥३०॥ संप्राश्य पामलकं रात्रौ गौरीं ध्यात्वा सुखं स्वपेत् ।

ततः प्रातः समुत्थाय दंपतं रूपशालिनम् ॥३१॥ भोजयित्वा विधानेन तीर्थयात्राफलं लभेत् । पुनः कृष्णातृतीयायां

सोपवासा सुवासिनी ॥३२॥ स्कन्दमातेति संपूज्य इङ्गुदां यो विनिवेदयेत् ॥ प्राश्यैतेनं बगाछन्ने स्वपेद्दक्षिणतस्तत ॥३३॥

प्रभाते मिथुनं भोज्यं कन्यादानफलं लभेत् ॥ आषाढमासे संप्राप्ते पूजयेच्चण्डयोधनम् ॥३४॥ करं नकं चनैवेद्यं गोभृं- ॥ रामः ॥

गोमः पिबेन्निशि । प्रभाते मिथुनं भोज्यं कन्यादानफलं लभेत् ॥३५॥ तथा कृष्णे तृतीयायां कृष्मालीं शक्तितोर्चयेत् ॥ ५३ ॥

53

१ संप्रपूजयेत् ४ २ हंभाद्रपदस्यादौ पूजयेत्कमलालयाम् ५

मक्रान्त्यां गजस्कंधकाम्रत्तोषि निवेदयेत् ॥३६॥ कुशोदकं च संप्राश्य स्वपेडाग्नौ जितेंद्रिया ॥ प्रभाते मिथुनं भो
ज्यं गोसहस्रफलं लभेत् ॥३७॥ श्रावणे तोयवासा च चंडांघंटां प्रपूजयेत् ॥ कूष्मांडां तत्र नैवेद्यं पिष्टेन पयोदकं च
नः ॥३८॥ प्रभाते स्नाति लोदयां स्नोत्नं मिथुनस्य तु ॥ ब्राह्मणोत्सभयदानस्य फलं नैवाश्वसंशयः ॥३९॥ तद्वत्कृष्णे तु तृती
यायां रुद्राणीं नामभिर्यजेत् ॥ सिद्धपिंडानि दिव्यानि नैवेद्यं दापयेत्तथा ॥४०॥ पिण्याकं प्राश्य पीत्वा तु स्वपेडाग्नौ
विमत्सरा ॥ संपूज्य द्विजदांपत्यमिष्टापूर्तफलं लभेत् ॥४१॥ भाद्रे शुक्लतृतीयायां पूजयेत् हिमाद्रिजाम् ॥ गोधूमा
न्नं निवेद्यैव प्राशयेत्तु जलं मितम् ॥४२॥ गोधोदकं ततः प्राश्य सतीभिः सहिता स्वपेत् ॥ प्रभाते मिथुनं भोज्यं सार्गपाली
शातं लभेत् ॥४३॥ तद्वत्कृष्णतृतीयायां दुर्गादेवीं समर्चयेत् ॥ दध्यान्नं च फलानि द्व्यान्नगजस्य परिप्रीतान ॥४४॥ प्राश्य
पीत्वा तु गोमूत्रं स्वपेच्छान्तेन चेतसा ॥ प्रातस्तु मिथुनान्भोज्य संदानब्रफलं लभेत् ॥४५॥ मासि चाश्वयुजे भक्त्या देवीं नारा
यणीं यजेत् ॥ तोयवासा घृतपूपान्नैवेद्यं परिकल्पयेत् ॥४६॥ ब्राह्मणे चंदनं रक्तं स्वपेज्जागरणमन्सरा ॥ प्रभाते भोज्य दंपत्य
मग्निहोत्रफलं लभेत् ॥४७॥ तथा कृष्णतृतीयायां स्वस्ति नाम प्रपूजयेत् ॥ शाल्योदनं गुडोपेतं नैवेद्यं निवेदयेत्ततः ॥४८
कुसुंभबीजान्संप्राश्य तस्य कृत्वा कामं स्वपेन्निशि ॥ संभोज्य मिथुनं प्रातर्गवाह्निकफलं लभेत् ॥४९॥ कार्त्तिकस्य तृती

मायां स्वाहानाम्नीं पूजयेत ॥ क्षीरं खंडघृतोपेतं नैवेद्यं दापयेच्च ताम ॥ ५० ॥ स्वपेद्रात्रौ जितक्रोधा प्राश्य कुंकुमकेशरान् ॥
प्रभाते मिथुनं भोज्यमेकभक्तफलं लभेत ॥ ५१ तथा कृष्णतृतीयायां स्वधानाम्नीं पूजयेत ॥ कृसरौदनं निवेद्याथ घृतं प्राश्य
स्वपेन्निशि ॥ ५२ ॥ प्रातः संभोज्य मिथुनं नक्तव्रतफलं लभेत ॥ एवं संवत्सरं कृत्वा मुक्तपापा शुचिर्भवेत ॥ ५३ ॥ शुक्लपक्षे तृती-
यायां सोपवासा निरामया ॥ विज्ञाय वसुतं भक्त्या तु माज्ञात्वार्थबोधकः ॥ ५४ ॥ मंडलं च ततो लिख्य नवनाभं वरप्रदम ॥ सौ-
वर्णीं कारयेद्देवं कुमयालहितं प्रभम ॥ ५५ ॥ ताभ्यां नेत्रे प्रदातव्यं मौक्तिकं नीलमेव च ॥ प्रवालमोष्ठयोर्दद्यात्कर्णयो रत्नकुंड-
ले ॥ ५६ ॥ उपवीतं तु देवस्य देव्याहारं तथोरसि ॥ रक्तवस्त्रधरां देवीं सितवस्त्रं महेश्वरम ॥ ५७ ॥ चतुःसमेन चालभ्य पुष्पैर्धूपै-
रथार्चयेत मंडले पूजयित्वा च होमं कुर्यात्ततो गुरुः ॥ ५८ ॥ तथोऽपराजितां नाम देवीं तत्रैव पूजयेत ॥ मन्त्रांसंप्राशयित्वा
च रात्रौ कुर्यात्प्रजागरम ॥ ५९ ॥ गीतवाद्योत्सवैर्हृद्यैर्वीणामंगलपाठकैः ॥ रात्रिमेवं जपेद्गत्वा यावदुद्गच्छते रविः ॥ ६० ॥ तली-
गं कलसं पूर्णं पर्यंके न्यस्तशोभिते ॥ उद्धृत्य मंडलाद्देवं पर्यंकोपरि विन्यसेत ॥ ६१ ॥ वितानध्वजमालालि किंकिणीदर्पणा-
न्वितम ॥ पुष्पमंडपिकाद्युक्तं धूपगुग्गुलवासितम ॥ ६२ ॥ तस्याग्रे भोजयेद्दत्वा स्वशक्त्या मिथुनानि च ॥ शीलायेऽक्षभोज्यै-
श्च पक्वान्नैर्मधुरैः शुभैः ॥ ६३ ॥ ततो दत्वाऽक्षतान्हस्ते तांबूलं विनिवेदयेत ॥ प्रीयतां मेऽम्बा कांतः पार्वत्या सहितः शिवः ॥ ६४

१ तत: ५

54

उच्छिष्टं क्रोधयित्वा तु पुनः प्रोक्ष्य समंततः ॥ रक्तवर्णां सुशीलां च मुद्गरपाशुपद्मसिनीम ॥६५॥ अंगाष्ठोरत्नकनकांगन
नपूरसंयुताम ॥ कांश्यलोहनकोपेतां रक्तवस्त्रावगुण्ठिताम ॥६६॥ पंचाभरणशोभाढ्यां देवदेवाग्रसंस्थिताम ॥ पादुकोपा
नहस्तश्च भोज्यभाजनसंयुताम ॥६७॥ त्रिधा प्रदक्षिणीकृत्य गुरोः सर्वं निवेदयेत ॥ उमामहेश्वरं देवमवियोगं प्रार्थितम
६८ ॥ अश्ववद्धेहभतेन वसुधीतेन दिनात्मके ॥ प्रणम्य शिरसा भूमौ समस्तेति गुरुं वदेत ॥६९॥ एवं समाप्यते देवि ज्ञानानंतर्यपु
ण्योत्तमम ॥ यः कुर्यात्समानवी नानस्य पुण्यफलं शृणु ॥७०॥ गंधर्वयक्षलोकांश्च विद्याधरमहोरगान ॥ ऋषिसिद्धसमं ज्ञा
नं शिवलोकं सनातनम् ॥७१॥ भुक्त्वा भोगान्नरश्चाप्येकविंशत्कुलान्वितः ॥ रत्नयाने समारूढो गुह्याप्सरसमं हतः
७२ ॥ देवविद्याधरैर्यक्षैः हृतो याति दिवालयम ॥ तत्र भुक्त्वा महाभोगान्सम्भुंक्ते शिववद्धृन ॥७३॥ भुक्त्वा भोगाम्यदाभूतः
कदाचित्तपसः क्षयात ॥ चतुर्विंशांतु समागम्य भवेत्सकलभूमिपः ॥७४॥ स्त्री वा समाचरेद्यातु महादेवीं तु जायते ॥ सानंत
र्यमवाप्तित्वा भोगान्देवी उमा यथा ॥७५॥ त्रैलोक्यपतिरुद्रेण सा भुंक्ते सहिता तथा ॥ नन्दैव्या यथा स ग्राष्ठा ज्याष्ठा कनोयथा
स्त्रवत ॥७६॥ नैरंतर्यं यथा सा तु तथा सा भुंक्ते पति नामन ॥ भूनेरहं धतीयवद्विलोलीलक्ष्मी हृदिस्थिता ॥७७॥ तथा तयो मे हस्तौ
रुद्रं नैरंतर्यं हि जायते ॥ सावित्री ब्रह्मलोमस्य गंगा तोयपतिधेर्यथा ॥७८॥ अश्ववद्धिन्नयोः प्रीतिस्तथा जन्मनि जन्मनि ॥

सन्ध्य

अथजन्मान्महोत्सवस्मिन्व्रतमेतत्कृतं भवेत् ॥ ७९ ॥ तेनैव पतिना सार्द्धं न वियोगमुपैति सा ॥ योजनानां शतसाहस्रैस्तु
ल्यामंडले भवेत् ॥ ८० ॥ अर्घाव्यासुभगामसाध्वी पुत्रपौत्रैरलंकृता ॥ एतत्ते निखिलं प्रोक्तं मानं तन्नर्मव्रतं मया ॥ ८१ ॥ भक्ता
यसु विनीताय कथितं ग्रंथं न वान्यथा ॥ ८२ ॥ एषा विशिष्टा विहितानततीयायानंतरी त्वविधवाभिरुदीरितोत्सवैः ॥ एतामुपोष्य
विधिवत्प्रतिपक्षयोगात्सैवांतरं सुतगृहं त्वजनैरुपैति ॥ ८३ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादेऽनंततृतीयाव्रतवर्णनं नामैकोनविंशात्तमोऽध्यायः ॥ २२ ॥ श्रीकृष्ण उवाच ॥ बहुनात्र किमुक्तेन किंब
हुक्षरमालया ॥ वैशाखस्य सिता सैका तृतीयांक्षयणा पाण्डवः ॥ १ ॥ स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम् ॥ यद
स्यां क्रियते किंचित्सर्वं स्यात्तदिहाक्षयम् ॥ २ ॥ आदौ कृतयुगस्येयं युगादिस्तेन कथ्यते ॥ सर्वपापप्रशमनी सर्वसौख्यप्रदा
यिनी ॥ ३ ॥ शाकले नगरे कश्चिद्धर्मनामाभवद्वणिक् ॥ प्रियंवदः सत्यरतो देवब्राह्मणपूजकः ॥ ४ ॥ तेन श्रुतं वाच्यमानं
तृतीया रोहिणीयुता ॥ यदा स्याद्बुधसंयुक्ता तदा सा च महाफला ॥ ५ ॥ तस्यां यद्दीयते किंचित्तत्सर्वं चाक्षयं भवेत् ॥ इति श्रु
त्वा स गंगायां संतर्प्य पितृदेवता ॥ ६ ॥ गृहमागत्य करकान्सान्नानुदकसंयुतान् ॥ अंबुपूर्णान्नटरेकुंभान्कृमान्निःहो
यतस्तदा ॥ ७ ॥ यवगोधूमचणकसक्तुदध्योदनं तथा ॥ इक्षुक्षारविकारांश्च सहिरण्यांश्च शक्तितः ॥ ८ ॥ शुचिः शुद्धे

55

नेमनमनसा ब्राह्मणे भ्तोद्दैवशितिकः ॥ भार्यया वार्यमाणोपि क्रुद्धं कामसक्तश्चिंतया ॥९॥ नावन्नं चस्थितः सत्वेमतास
र्धविनश्वरम् ॥ धर्मार्थकामशास्त्रज्ञः कालेन बहुना ततः ॥१०॥ जगाम पंचत्वमसौ वासुदेवं स्मरन्मुहुः ॥ ततः स क्षत्रि
यो जातः कन्यावत्यां नरेश्वरः ॥११॥ बभूव चाक्षया तस्य समृद्धिर्धर्मनिर्जिता ॥ इयाज स समतायज्ञैः समाप्तवरदक्षिणैः
१२ ॥ ददौ गोभूहिरण्यादीन्दानान्यस्यामहर्निशम् ॥ बुभुजे कामतो भोगान्दीनानाथांस्तर्पयंजनान् ॥१३॥ तथाप्यक्षय
मेवास्य क्षयं याति न तद्धनम् ॥ सज्ञात्वा पूर्वं तृतीयायां यद्व्रतं विनवं विना ॥१४॥ एतद्व्रतमयाख्यातं श्रूयतामत्र यो
विधिः ॥ उदकुंभान्सकरकानन्नान्सर्वरसैर्युतान् ॥१५॥ ग्रैष्मिकं सर्वमेवात्र सस्यदानं प्रशस्यते ॥ छत्रोपानत्प्रदानं
च गोभूकांचनवाससाम् ॥१६॥ यद्यदिष्टतमं चान्यत्तद्देयमविशंकया ॥ एतत्ते सर्वमाख्यातं किमन्यच्छ्रोतुमिच्छ
सि ॥१७॥ अनाख्येयं न मे किंचिदस्ति त्वत्स्वस्तेऽनघ ॥१८॥ अस्यां तिथौ क्षयमुपैति हुतं न दत्तं तेनाक्षयेति मुनि
भिः कथिता तृतीया ॥ उद्दिश्य यत्सुरपितॄन्क्रियते मनुष्यैस्तच्चाक्षयं भवति भारत सर्वमेव ॥१९॥ इति श्रीभविष्ये
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ऽक्षय्यतृतीयाव्रतवर्णनं नाम त्रिंशत्तमोध्यायः ॥ ३० ॥ ॥
युधिष्ठिर उवाच ॥ रूपसौभाग्यसुखदं नरनारीजनप्रियम् ॥ पापापहं बहुफलं सुकरं स्वपवासकम् ॥१॥ सुषिह

॥ भवि ॥
॥ ५६ ॥

पादव १

द्धिकरं स्वर्ग्यं यशस्यं सर्वकामदम ॥ तन्मे वदस्व तं किं विधिप्रदिष्टोऽसि माधव ॥२॥ श्रीकृष्ण उवाच ॥ भण पार्थ परं
गुह्यं यन्मया कथितं न च ॥ पुरातनं वनस्थस्य स्यन्द प्रवदाम्यहन ॥३॥ शिवयोरतिसंहर्षाद्रक्तबिन्दुश्च्युतः क्षितौ ॥ मेदि
न्यास प्रयत्नेन विधृतो धृतिरूपया ॥४॥ तस्माज्जातः कुमारोऽसौ रक्तो रक्तसमुद्भवः ॥ अंगंप्रासिद्धमेवेहांगारको वेगउ
च्यते ॥५॥ शिवांगाद्भूमसाज्जातस्तेनांगारक उच्यते ॥ अंगस्थोऽगारकांतिश्च संगप्रसंगसंभवः ॥६॥ सौभाग्यारोग्यकृद्य
स्मात्तस्मादंगारकः स्मृतः ॥ भक्त्या चतुर्थ्यां नक्तेन यस्तु श्रद्धासमन्वितः ॥७॥ तं पूजयति यत्नेन नारी वाऽनन्यमानसा॰
तस्य तुष्टः प्रयच्छेत्स यत्त्वया समुदाहृतम ॥८॥ रूपं सौभाग्यसंपत्त्वं नरनारीमनोहरम ॥ युधिष्ठिर उवाच ॥ स त्वन्मे वद दे
वेशांगारकविधिं शुभम ॥९॥ सहोमं मंत्रसंस्थानं साधिवासं विधानतः ॥ श्रीकृष्ण उवाच ॥ ॥ पूर्वं तु कृतसंकल्पः
स्नानं कृत्वा बहिर्जले ॥१०॥ स्नानार्थं मृत्तिकां मंत्रैर्गृह्णोपादेमसिस्थितः ॥ त्वं मृदे वंदिता पूर्वं कृष्णेनोद्धरता किल ॥११॥
तेन मे दह पापौघं यन्मया पूर्वसंचितम ॥ इमं मंत्रं पठन्पार्थ आदित्याय प्रदर्शयेत ॥१२॥ आदित्यरश्मिसंतप्तं गंगा
जलकणोक्षितम ॥ तां मृदं शिरसि प्रार्थ पूर्वं दत्वागसंविशु ॥१३॥ ततः स्नानं प्रकुर्वीत मंत्रेणांतर्जले पुनः ॥ त्वमा
पो योनिः सर्वेषां दैत्यदानवरक्षसाम ॥१४॥ स्वेदजोद्भिज्जयोनीनां रसानां पतये नमः ॥ स्नातोऽहं सर्वतीर्थेषु स

त्वमेव वद देवेश हृ

56

॥ भवि: ॥
॥ ५६ ॥

र्वपुस्नवशोभव ॥ १५ ॥ नदीषु देवखातेषु स्नानं तेषु समेभवेत् ॥ आपस्त्वमिति मंत्रेण ततः स्नानं समाचरेत्
१६ ॥ ततः स्नात्वा शुचिर्भूत्वा गृहमागत्य नस्पृशेत् ॥ नजल्पेन च संवीक्षेत्कंचित्वापिष्ठमेव हि ॥ १७ ॥ दूर्वाश्वत्थश
मीस्पृष्ट्वा मां च मंत्रेण मंत्रवित् ॥ दूर्वामभ्यस्य मंत्रेण युतेन समुपस्थितम् ॥ १८ ॥ त्वं दूर्वेऽमृतजन्मासि सर्वदेवै
श्चवंदिता ॥ वंदिता दह तत्सर्वं यन्मया दुष्कृतं कृतम् ॥ १९ ॥ दूर्वामंत्रः ॥ पवित्राणां पवित्रत्वं काश्यपी पठ्यसे श्रु
तै ॥ शमी शमयते पापं यन्मया ऽरनोष्ठितम ॥ २० ॥ शमीमंत्रः ॥ अश्वत्थमंगलं भते मंत्रसेन न्निग्रोधमे ॥ अक्षि
स्पंदं भुजस्पंदं दुःस्वप्नं दुर्विचिंतितम् ॥ २१ ॥ शत्रूणां च समुत्थानमश्वत्थ शमयस्व मे ॥ अश्वत्थमंत्र ॥ गोदग्यानुत
तो देवीं सवत्सां सप्रक्षिणाम् ॥ २२ ॥ समालभ्यं नु मंत्रेण मंत्रमेतदुदीरयेत् ॥ सर्वदेवमये देवि देवतैस्त्वं सुपूजिता
२३ ॥ तस्मात्स्पृशामि वंदामि वंदिता पापहा भव ॥ गोमंत्रः ॥ एवं मंत्रं पठन्नार्य भक्त्या भावेन भावित ॥ २४ ॥ प्रदक्षिणां
यः कुरुते गां दृष्ट्वा वरवर्णिनीम् ॥ प्रदक्षिणी कृता तेन पृथिवी नात्र संशयः ॥ २५ ॥ एवं मौनेन सा गत्वा वंद्यात्वेघगृ
हं व्रजेत् ॥ प्रक्षाल्य च मुदा पादौ स्वाहिताऽग्निगृहं विशेत् ॥ २६ ॥ होमं तत्र प्रकुर्वीत समिभिर्मंत्रैः पदैर्वरैः ॥ सर्वापसर्व
पुत्राय पार्वत्यागोः सुताय च ॥ २७ ॥ कृत्वा यत्लोहितांगाय गृहे शांगारकाय च ॥ भक्षो भक्ष्योयमा कृत्वा कृत्वा कृत्वा

वादरीमि२ स्थापयतम्

जुहाति वै ॥२८॥ ओंकारपूर्वकैर्मंत्रैः स्वाहाकारांतयोजितैः अष्टोत्तरशतं पार्थ अर्द्धमर्धार्धमेव च २९ ॥ एभिर्मंत्रपदैर्भक्त्या श
क्त्या वा काममेव वा ॥ समिधः खादिरीमिश्रघृतदुग्धौ तिलैर्यवैः ॥३०॥ भक्ष्यैर्नानाविधैरन्नैः शाल्याज्यावामंत्रविद्वती ॥ हुत्वा
ऽग्नौ ततः पार्थ देवं संस्थापयेत् क्षितौ ॥३१॥ स्नपनं केचिदिच्छन्ति स्वगुडे नाम्रभाजने ॥ सौवर्णं रक्तवर्णं वा वक्त्र स्यादारुमयं त
था ॥३२॥ कृत्वाङ्गारमयं चैवथवा खंडघटितं पुनः ॥ सौवर्णपात्रे तौ व्येवा अर्घ्यं कुंकुमकेसरैः ॥३३॥ अन्यैश्च लोहितैः पार्थ पुष्पै
वस्त्रैः फलैः शुभैः ॥ राजेन्द्र नैवेद्यविविधैरर्थवान्भक्तितोऽर्चयेत् ॥३४॥ यावद्दिनानि चित्तं वित्तवान्भक्तिभावितः ॥ तावद्धि
वर्धते पुण्यं दानुः शान्तसहस्रिकम् ॥३५॥ किं वित्ताम्नमये पात्रे वं राजेन्द्र मन्त्रयेपि वा ॥ पूजयन्ति नरा रक्तैः पुष्पैः कुंकुमके
सरैः ॥३६॥ ॐ अंगारकाय नमः ॥ शिरसि ॐ कुजाय नमः वदने ॥ ॐ भौमाय नमः ॥ स्कंधयोः ॥ ॐ मंगलाय नमः ॥ बाह्वोः ॥
ॐ रक्ताय नमः ॥ उरसि ॐ लोहितांगाय नमः ॥ कट्याम् ॥ ॐ आराय नमः जंघयोः ॥ ॐ महीधराय नमः ॥ पादयोः ॥ सर्वांगपु
ष्पिका ॥ पुरुषाकृतिं कृतपात्रे कृत्वं मंत्रैः समर्चयेत् ॥ गुग्गुलघृतसंयुक्तं कृष्णागरुसमन्वितम् ॥ धूपं सऽञ्जनं वापि दद्या
न्नत्र समाधिना ॥३७॥ होमं कुर्वीत पूर्वोक्तैर्मंत्रैर्मंगलसंज्ञितैः ॥ एवं सम्पूज्य देवेशं ब्राह्मणाय निवेदयेत् ॥३८॥ निष्पाव
कं भोजनं वा दद्यात्कृत्वा सदक्षिणाम् ॥ वित्तशाठ्यं हि कुर्वाणो न तत्फलभाग्भवेत् ॥३९॥ पश्चाद्भुञ्जीत मौनेन नमस्मिंक्र

रक्तैः६

महीनंदनाय नमः

57

नुभाजनम् । संज्ञेणानेनबालस्यतन्मिबोधमयोदितम् ॥ ४० ॥ सर्वौषधिरसाकासेसर्वदासर्वदापिनि ॥ त्वन्तलंभो
क्ककामोऽहंनक्तुक्रमसत्तंभवेत ॥ ४१ ॥ युधिष्ठिरउवाच । अंगारकेनसंयुक्ताचतुर्थीनक्तभोजनैः ॥ उपोष्याकतिमात्रासाकि
मेकाचदयादेव ॥ ४२ ॥ श्रीकृष्णउवाच ॥ चतुर्थीचचतुर्थीचयदांगारकसंयुता ॥ उपोष्यातत्रनत्रैवप्रदेयोविधिनाकुजः
४३ ॥ वित्तहीनाःप्रतीक्षन्तेयावद्वित्तोपलंभनम् । चतुर्थ्यांचचतुर्थ्यांचविधानंभणपारव ॥ ४४ ॥ सौवर्णपात्रेकृत्वानु
अंगारकमकृतिमम् ॥ दद्यासौवर्णिकंमुख्यंदद्यार्द्धार्द्धमथापिवा ॥ ४५ ॥ विंशत्यत्लानिपात्राणिविंशत्यर्द्धपलानिच ॥ विं
शात्कर्षाचापार्थशतोन्यूनंनकारयेत ॥ ४६ ॥ प्रतिष्ठाप्यकुजंमंत्रैर्वस्त्रैःसंपरिवेष्टितम् ॥ पुष्पमंडपिकांकृत्वादिव्यांसद्धूप
धूपिताम् ॥ ४७ ॥ तत्रसंपूजयेदेवंपूर्वमंत्रैर्विधानतः ॥ भक्त्याभोज्यैरनेकैश्चफलैरत्नैश्चसागरैः ॥ ४८ ॥ वस्त्रैःप्रावर
णैर्यानैःशय्योपानहासनैः ॥ छत्रैःपुष्पैर्गंधवरैःशक्त्याविनानुसारतः ॥ ४९ ॥ ततोविप्रंपरीक्षेतवृत्तशौचसमन्वित
म् ॥ वेदाध्ययनसंपन्नंशान्तंनिरहंकृतम् ॥ ५० ॥ अंगारकविधिंयश्चसम्यग्जानातिशास्त्रतः ॥ आह्वानविधिमंत्रांश्च
होमार्चनविसर्जनम् ॥ ५१ ॥ संपूज्यवस्त्राभरणोत्तमैर्देयःकुजोनमः ॥ यथाश्रुतोयथाज्ञातस्तथाभक्त्याप्युपोषितः
५२ ॥ वित्तसारेणतुष्यत्वंममभौमभवोद्भवः ॥ पठन्निमंमंत्रवरंब्राह्मणायनिवेदयेत ॥ ५३ ॥ ब्राह्मणाश्चाप्यसौविप्रान्मे

भुमे ४

तत्राथमर्चयेन्मंत्रैःपुष्पधूपैर्विधानतः ४

॥ भवि-पु ॥
॥ ५८

यत्नार्चनपरः २

चमेतमुदाहरेत् ॥ मंगलंप्रतिगृह्णामिउभयोरस्तुमंगलम् ॥ ५४ ॥ दातृप्रतिग्राहकयोःक्षेमारोग्यंभवत्विति ॥ प्रतिग्राहक
मंत्रः ॥ एवंचतुर्थ्यांसंप्राप्तेधनधान्यैर्नविद्यते ॥ ५५ ॥ नाममंत्रार्चनपरःपुनरेतांसमाचरेत् ॥ आशरीरनिपाताद्वायथोक्तफ
लभाग्भवेत् ॥ ५६ ॥ अल्पवित्तोयथाशक्त्यासर्वमेतत्समाचरेत् ॥ अंगारकेणसंयुक्तांचास्त्रांतिलशराविकाम् ॥ ५७ ॥ अने
नविधिनादत्त्वायथोक्तफलभाग्भवेत् ॥ एवंचतुर्थीयोभक्त्याकुजयुक्तामुपोषयेत् ॥ ५८ ॥ तस्यपुण्यफलंयत्तुतन्निबोधयु
धिष्ठिर ॥ इहस्थित्वाचिरंकालंपुत्रपौत्रश्रियावृतः ॥ ५९ ॥ देहावसानेदिव्यौजादिव्यगंधानुलेपनः ॥ दिव्यनारीगणवृतोविमा
नवरमास्थितः ॥ ६० ॥ यातिदेवपुरंहृष्टोदेवैःसहाभिनंदितः ॥ सततंरमतेकालंदेवैःसहसुरेशवत् ॥ ६१ ॥ चतुर्युगानिषट्
त्रिंशत्ततःकालांतरेपुनः ॥ इहागत्यराजासौकुलेमहतिजायते ॥ ६२ ॥ रूपवान्धनवान्वाग्मीदानशीलोदयापरः ॥ सा
रीवरूपसंपन्नासुभगाजातिसंभवा ॥ ६३ ॥ पुत्रपौत्रैःपरिवृताभर्त्रासहरमेश्चिरम् ॥ रमित्वासुचिरंकालंपुनःस्वर्गगतिंल
भेत् ॥ ६४ ॥ एषतेकथितोराजन्रहस्योविधिस्तथा ॥ दुर्लभोयोमनुष्याणांदेवानांभद्रमस्तुते ॥ ६५ ॥ अंगारकेणसहि
तानुमिताचतुर्थीशान्तासुरार्चनविधौपितृपिंडदाने ॥ तस्यांकुजंकनकलोहमयैःर्चयंतिभसौभवंतिवपुमंगलभाजना
नि ॥ ६६ ॥ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेचतुर्थीव्रतेअंगारकचतुर्थीव्रतवर्णनं

58

॥ राम: ॥
॥ ५८ ॥

श्रामदानुगतम् ६

नामैकत्रिंशत्तमोऽध्यायः ॥ ३१ ॥ ॥ युधिष्ठिर उवाच ॥ यन्नासिद्ध्यंति कार्माणि प्रारब्धानि नरोत्तमैः ॥ तत्केन कारणे-
नैतन्मे ब्रूहि माधव ॥ १ ॥ श्रीकृष्ण उवाच विनायकोऽर्थसिद्ध्यर्थं लोकस्य विनियोजितः गणानामाधिपत्ये च रुद्रे-
ण ब्रह्मणा तथा ॥ २ ॥ तेनोपसृष्टो यस्तस्य लक्षणानि निबोधत ॥ स्वप्नेऽवगाहतेऽत्यर्थं जलं मुण्डांश्च पश्यति ॥ ३ ॥ काषा-
यवाससश्चैव क्रव्यादांश्चाधिरोहति ॥ अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठति ॥ ४ ॥ व्रजमानस्तथात्मानं मन्यतेऽनुगतं परैः
विमना विफलारंभः संसीदत्यनिमित्ततः ॥ ५ ॥ पातकी विहीनच्छायो स्नानत्वे हेन लभते ॥ करभारूढमात्मानं महिषरव-
रं गं तथा ॥ ६ ॥ यातुधानानमंतं यातं श्मशानस्थानिकं नृप ॥ परुषेण कृष्णमाईलस्वप्नां तेनात्र संशयः ॥ ७ ॥ तैलाईमात्रं सरे-
हं करवीरविभूषितम् ॥ तेनोपसृष्टो लभते न राज्यं राजनंदनः ॥ ८ ॥ कुमारी न च भर्तारमपत्यं गर्भमंगना । आचार्यत्वं श्रो-
त्रियश्च न शिष्योऽध्ययनं तथा ॥ ९ ॥ वणिग्लाभं न चाप्नोति कृषिं चैव कृषीवलः ॥ स्नापनं तस्य कर्तव्यं पुण्येऽह्नि विधिपूर्वक-
म् ॥ १० ॥ गौरसर्षपकल्केन वस्त्रेणाच्छादितस्य तु । सर्वौषधैः सर्वगंधैर्दिग्धशिरसस्तथा ॥ ११ ॥ भद्ररूपसेवनपर्वानवारे
वाधिपगणस्य तु ॥ उच्छ्रे च वीरणं भद्रे नस्यैव पुरतो नृप ॥ १२ ॥ भद्रासनोपविष्टस्य स्वस्ति वाचा द्विजैः शुभैः ॥ चत्वार कलश जुः
सामाश्चर्वणेषु वर्णास्ततः ॥ १३ ॥ ओमकेशांतसंपन्न पार्वतीं मन्त्रिजं तथा ॥ कृष्णस्य पितरं वायुमवतारं सितं तथा ॥ १४

धिषणां क्षौद्रपुत्रं च कोणं तक्ष्मीच भारत ॥ विधुंतुदं वा फलैर्यन्नैः कस्य च धारणाम् ॥ १५ ॥ अश्वस्थानाद्गजस्थाना
द्वल्मीकात्संगमाद्ध्रदात ॥ मृत्तिकां रोचनां रत्नं गुग्गुलुं चाप्सु निक्षिपेत ॥ १६ ॥ यदाहृतं ह्येकवर्णैश्चतुर्भिः कलशैर्हृ
दात ॥ चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं तथा ॥ १७ ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृतम् ॥ तेन त्वामभिषिंचा
मि पावमान्यः पुनंतु मे ॥ १८ ॥ ॐ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥ भगमिंद्रश्च वायुश्च भगं सप्तर्षयो ददुः
१९ ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नंतु सर्वदा ॥ २० ॥ स्नातस्य सार्षपं तैलं
स्रुवेणौडुंबरेण तु ॥ जुहुयान्मूर्ध्नि शाकलान्सव्येन प्रतिगृह्य च ॥ २१ ॥ मितश्च संमितश्चैव तथा शालकटंकटौ ॥ कूष्माण्डो
राजपुत्रश्चेत्येते स्वाहासमन्वितैः ॥ २२ ॥ नामभिर्बलिमंत्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्ती
र्य सर्वतः ॥ २३ ॥ कृताकृतांस्तंडुलांश्च पललौदनमेव च ॥ मत्स्यान्पक्वांश्च तथा मांसमेतावदेव तु ॥ २४ ॥ पुष्पान्वितं सु
गंधं च सुरां च त्रिविधामपि ॥ मूलकं पूरिकापूपांस्तथैवोंडेरकस्रजः ॥ २५ ॥ दध्यन्नं पायसं चैव गुडपिष्टं समोदकम् ॥ वि
नायकस्य जननीमुपतिष्ठेत ततोम्बिकाम् ॥ २६ ॥ दूर्वासर्षपपुष्पाणां दत्वार्घ्यं पूर्णमंजलिम् ॥ रूपं देहि जयं देहि भगं भ
वति देहि मे ॥ २७ ॥ पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे ॥ प्रबलं कुरु मे देवि बलविद्योतिसंभवम् ॥ २८ ॥ भ्र

क्तमाल्यांबरधरः शुक्लगंधानुलेपनः ॥ भोजयेद्ब्राह्मणान्दद्याद्वस्त्रयुग्मंगुरोरपि ॥ २९ ॥ एवंविनायकंपूज्यग्रहांश्चै
वविधानतः ॥ कर्मणांफलमाप्नोतिश्रियंप्राप्नोत्यनुत्तमाम् ॥ ३० ॥ आदित्यस्यसदापूजांतिलकंस्वामिनस्तथा ॥
महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात् ॥ ३१ ॥ वैनायकंविनयमत्वेवतांनराणांस्नानंप्रशस्तमिहविघ्नविनाशका
रि। कुर्वंतियेविधिवदत्रभवंतितेषांकार्याण्यभीष्टफलदानिनसंशयोऽत्र ॥ ३२ ॥ ॥ इतिश्रीभविष्यमहापुराणेउ
त्तरपर्वणि। श्रीकृष्णयुधिष्ठिरसंवादेविनायकस्नपनचतुर्थीव्रतंनामद्वात्रिंशत्तमोऽध्यायः ॥ ३२ ॥ ॥ श्रीकृष्ण
उवाच ॥ अथाविघ्नकरंराजन्कथयामिव्रतंतव ॥ येनसम्यक्कृतेनेहनविघ्नमुपजायते ॥ १ ॥ चतुर्थ्यांफाल्गुनेमासिगृ
हीतव्यंव्रतंत्विदम् ॥ नक्ताहारेणराजेंद्रतिलान्नंपारणेस्मृतम् ॥ २ ॥ तदेववह्नौहोतव्यंब्राह्मणायचतद्भवेत् ॥ ३ ॥ भरा
यवीरायगजाननायलंबोदरायैकरदायचैव। एवंनुसंपूज्यपुनश्चहोमंकुर्याद्व्रतीविघ्नविनाशहेतोः ॥ ४ ॥ चतुर्मा
स्यांव्रतंचैवकृत्वेत्थंपंचमेतथा सौवर्णंगजवक्त्रंतुकृत्वाविप्रायदापयेत् ॥ ५ ॥ नाममंत्रैःपायसमन्नैश्चतुर्भिःस
हितंनृप ॥ पंचमेनतिलैःसार्द्धंगणेशाधिष्ठितेनच ॥ ६ ॥ सत्वयान्यापिपात्मातिवित्तहीनस्तुकारयेत् ॥ हेरंबंराजतं
तद्वद्विधिनानेनदापयेत् ॥ ७ ॥ इत्थंव्रतमिदंकृत्वासर्वविघ्नैःप्रमुच्यते ॥ हयमेधस्यविघ्नेनसंजातेसगरःपुरा ॥ ८

भुक्तवक्षीयाम् ८

॥ भवि ॥
॥ ६० ॥

एतद्देवव्रतं चीर्त्वा पुरंध्रं प्रलब्धवान् ॥ तथा रुद्रेण देवेन त्रिपुरं विघ्नता पुरा ॥ ९ ॥ एतद्देवकृतं यस्मात्त्रिपुरस्तेन
घातितः ॥ मया समुद्रं विघ्नानामेतद्देवव्रतं कृतम् ॥ १० ॥ तेनाब्धि कुम्भसंभूकापपिबीपुनरुद्धृता ॥ अन्यैरपि महीपा
लैरेतद्देवकृतं पुरा ॥ ११ ॥ तपोऽर्थिभिर्यज्ञसिद्धौ निर्विघ्नं स्यात्परंतप ॥ अनेन कृतमात्रेण सर्वविघ्नैः प्रमुच्यते ॥ १२
मृतो रुद्रपुरं याति वराहवचनं यथा ॥ १३ ॥ विघ्नानि तस्य न भवंति गृहे कदाचिद्धर्मार्थकामसुखसिद्धिविघातकानि ·
यः सप्तमीन्दुशकलाकृतिकांतदंतं विघ्नेशमर्चयति तत्कृती चतुर्थ्याम् ॥ १४ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरप
र्वणि श्रीकृष्णयुधिष्ठिरसंवादे विनायकचतुर्थीव्रतं नाम त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥ इति चतुर्थीकल्पः समाप्तः ॥
॥ ॥ श्रीकृष्ण उवाच ॥ शांतिव्रतं प्रवक्ष्यामि शृणुष्वैकमनाधुना ॥ येन चीर्णेन शांतिः स्यात्सर्वदा गृहमेधिनाम् ॥ १
पंचम्यां शुक्लपक्षस्य कार्तिके मासि पार्थिव ॥ आरभ्य वर्षमेकं तु भुंजीयादम्लवर्जितम् ॥ २ ॥ नक्तं देवं च संपूज्य हरिं
शेषोपरि स्थितम् ॥ अनंतायेति पादौ तु धृतराष्ट्राय वै कटिम् ॥ ३ ॥ उदरं तक्षकायेति उरः कर्कोटकाय च ॥ पद्माय कण्ठं
संपूज्य महापद्माय दोर्युगम् ॥ ४ ॥ शंखपालाय वक्षस्तु कुलिकायेति वै शिरः ॥ एवं विष्णुं सर्वगात्रं पृथगेव प्रपूजयेत् ·
५ ॥ क्षीरेण स्नपनं कुर्याद्धरिमुद्दिश्य वाग्यतः ॥ तदग्रे होमयेत्क्षीरं तिलैः सह विचक्षणः ॥ ६ ॥ एवं संवत्सरस्यांते कुर्या

दंतवर्जितम् ४

॥ राम: ॥
॥ ६० ॥

60

ब्राह्मणभोजनम् ॥ अनन्तं कांचनं कृत्वा सुवर्णेन विचक्षणम् ॥७॥ गां सवत्सां वस्त्रयुगं कांस्यपात्रं सधान्यकम् ॥
हिरण्यं च यथाशक्त्या ब्राह्मणायोपपादयेत् ॥८॥ एवं यः कुरुते भक्त्या व्रतमेतन्नराधिप ॥ तस्य शांतिर्भवेन्नित्यं ना-
गानामभयं तथा ॥९॥ शेषाहि भोगान्प्राप्यनन्त्यमयोगस्तु तिंस पुत्रपत्रवृद्धिं पतनगौंड नाशम ॥ ये नूजयंति मधुरैः
सितपंचमीव्रते येषां न नागजनितं भयमस्पृयैति ॥१०॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर
संवादे शांतिव्रतं नाम चतुस्त्रिंशत्तमोध्यायः ॥३४॥ युधिष्ठिर उवाच ॥ मधुराभारती केन व्रतेन मधुसूदन ॥ तथैव ज-
नसौभाग्यमतिविद्यासु कौशलम् ॥१॥ अभेदश्चापि दंपत्योस्तथा बंधुजनेन च ॥ आयुश्च विपुलं पुंसां जायते केन
केशव ॥२॥ ॥श्रीकृष्ण उवाच ॥ सम्यक्पृष्टं त्वया राजन्शृणु सारस्वतं व्रतम । यस्य संकीर्तनादेव तुष्यतीह सरस्व-
ती ॥३॥ योऽयं भक्तः स्वमान्कुर्यादेतद्व्रतमनुत्तमम् ॥ तद्घस्त्रादौ संपूज्य विधिवेणातं समाचरेत ॥४॥ अथवादित्यवा-
रेण ग्रहताराबलेन च ॥ पायसं भोजयित्वा च कुर्याद्ब्राह्मणवाचनम् ॥५॥ शुक्लवस्त्राणि दद्याच्च सहिरण्यानि शक्ति-
तः ॥ गायत्रीं पूजयेद्भक्त्या शुक्लमाल्यानुलेपनैः ॥६॥ एभिर्मंत्रपदैः पश्चात्सर्वं भक्त्या कृतांजलि ॥ यथा नु देवि भगवा-
न्ब्रह्मा लोकपितामहः ॥७॥ त्वां परित्यज्य नो तिष्ठेत्तथा भव वरप्रदा ॥ वेदशास्त्राणि सर्वाणि नृत्यगीतादिकं च यत्

॥ भ॰पु ॥
॥ ६१ ॥

८ ॥ वाहितं चलत्पादेवी तथा मे संनृशिस्तु वः ॥ लक्ष्मीर्मेधा वरा रिष्टिर्गौरी तुष्टिः प्रभा मतिः ॥ ९ ॥ एताभिः पाहि तनुभि
रष्टाभिर्मां सरस्वती ॥ एवं संपूज्य गायत्रीं वीणाक्षमणिधारिणी ॥ १० ॥ शुक्लरूपधरे ऽसितैभ नत्वा सकमंडलुपुस्तकाम ॥
मौनव्रतेन भुंजीत सायंप्रातश्च धर्मवित ॥ ११ ॥ पंचम्यां प्रतिपक्षे च पूजयित्वा सुवासिनी ॥ तिलैश्च तंडुलं प्रस्थं घृत
पात्रेण संयुतम ॥ १२ ॥ क्षीरं तथा हिरण्यं च गायत्री प्रीयतामिति ॥ संध्यायां च ततो मौनेन तं कृतं तु समाचरेत ॥ १३ ॥ नां
तेन भोजनं कुर्याद्यावन्मासा समुद्योरदा ॥ समाप्ते तु व्रते दद्यात्राजनं शुक्लतंडुलैः ॥ १४ ॥ पूर्णांस्तु वस्त्रयुग्मं च गां च विप्राय
भोजनम ॥ देव्यै वितानं घंटां च सितनेत्रं पटान्वितम ॥ १५ ॥ चंदनेन वस्त्रयुग्मं च दध्यन्नं शिखरैर्पैनम ॥ तथोपदेष्टारम
पि भक्त्या संपूजयेद्गुरुम ॥ १६ ॥ वित्तशाठ्येन रहितो वस्त्रमाल्यानुलेपनैः ॥ अनेन विधिना यस्तु कुर्यात्सारस्वतं व्रतम॰
१७ ॥ विद्यावानर्थयुक्तश्च रक्तकंठश्च जायते ॥ सरस्वत्याः प्रसादेन व्यासवत्तु कविर्भवेत ॥ १८ ॥ नारी वा कुरुते या तु सापि त
त्फलभागिनी ॥ ब्रह्मलोके वसेन्नावद्यावत्कल्पायुतत्रयम ॥ १९ ॥ सारस्वतं व्रतं यस्तु शृणुयादपि यः पठेत ॥ विद्याधरपु
रे सोऽपि वसेत्कल्पायुतत्रयम ॥ २० ॥ संवत्सरं व्रतवरेण सरस्वतीं ये संपूजयंति जगतो जननीं जनित्रीम ॥ विद्यावदात
हृदया मधुरस्वरास्ते लगान्विता वरकलाकुशला भवंति ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठि

62

॥ ए॰मः ॥
॥ ६१ ॥

भ.उ. मेभविष्य सादात्कस्य माघ व.६

र संवादे सारस्वत वृत्त निरूपणं नाम पंचत्रिंशत्तमोऽध्यायः || ३५ || श्रीकृष्ण उवाच || पंचमी दयिता राजन्नागानं
द विवर्द्धनी || पंचम्यां किल नागानां भवतीत्युत्सवो महान् || १ || वासुकिस्तक्षकश्चैव कालिको मणिभद्रकः || धृतरा
ष्ट्रो रैवतश्च कर्कोटकधनंजयौ || २ || एते प्रयच्छंत्यभयं प्राणिनां प्राणजीविनाम || पंचम्यां स्नापयंतीह नागान् क्षीरे
ण ये नराः || ३ || तेषां कुले प्रयच्छंति अभयं प्राणिनां सदा || सप्ता नागा यदा मात्रा दह्यमाना दिवानिशम् || ४ || निर्वा
पिता गवां क्षीरैः स्नातः प्रमतिवध्यमाः || युधिष्ठिर उवाच || || मात्रा शप्ताः कथं नागाः किमुद्दिश्य च कारणम् || ५ || कथं
वा तस्य शापस्य विनाशोऽभज्जनार्दन || श्रीकृष्ण उवाच || उच्चैःश्रवा अश्वराजश्च श्वेतवर्णोऽमृतोद्भवः || ६ || तं दृष्ट्वा चाब्रवी
त्कद्रूर्नागानां जननी स्वसाम् || अश्वरत्नमिदं श्वेतं पश्य पश्यामृतोद्भवम् || ७ || कृष्णांश्च पश्यसे वालान् सर्वश्वेतानुताथ
वै || || विनतोवाच || सर्वश्वेतो हयवरो नायं कृष्णो न लोहितः || ८ || कथं त्वं पश्यसे कृष्णं विनतोवाच तां स्वसाम् || ||
कद्रूरुवाच || पश्येऽहमेकनयना कृष्णा वालसमन्वितम् || ९ || द्विनेत्रा च त्वं विनते न पश्यसि पणं कुरु || विनतोवाच·
अहं दासी भवित्री ते कृष्णा केशो प्रदर्शिते || १० || न चेद्दर्शयसे कद्रु मम दासी भविष्यसि || एवं ते विपणं कृत्वा गते क्रो
धसमन्विते || ११ || स्वपिते प्राज्यदोषे नु कद्रूर्जिह्ममचिंतयत् || आहूय पुत्रान् सोवाच वाला भूत्वा हयोत्तमे || १२ ||

तिस्पृध्वं विपरीतोजे ष्वेयि नतां जयगद्दिनीम् ॥ श्रोत्रस्ते नि सन्तुष्टिं तां नागाः कद्रूं विगर्हयन् ॥१३॥ अथ मेरुवनं महान्करि
ष्यामो न तेव च ॥ भग्नापड्डुषि नाकद्रूः पावको वः प्रधक्ष्यति ॥१४॥ गते बहुतिथे काले पांडवो जनमेजयः ॥ सर्पसत्रं स
कर्ता वै भस्मावस्यैः सुदुष्करम् ॥१५॥ तस्मिन्सत्रे च तिग्मांशुः पावको भक्षयिष्यति ॥ एवं शप्त्वा तदा कद्रूः प्रत्युवाच न किं
चन ॥१६॥ मात्रा शाप्तास्तदा नागाः कर्तव्यं नान्वपद्यत ॥ वासुकिर्दुःखसंतप्तः तपानकुविमर्द्दितः ॥१७॥ वासुकिं दुःखि
तं दृष्ट्वा एलापत्रोवाच सांत्वयन् ॥ माभवो वासुके त्वार्त्तः श्रूयतां मद्वचनं परम् ॥१८॥ यायावरकुले जातो जरत्कारुरिति द्वि
जः ॥ भविष्यति महातेजास्तस्मिन्काले तपोनिधेः ॥१९॥ भगिनीं त्वं जरत्कारुं तस्मै त्वं प्रतिपादयसि ॥ भविता तस्य पुत्रो
सौ आस्तीक इति विश्रुतः ॥२०॥ स तत्सत्रं प्रवृद्धं वै नागानां भयदं महत् ॥ निषेधयिष्यति मुनिर्वाग्भिः संपूज्य पार्थिव
म् ॥२१॥ तदर्थं भगिनी नागा रूपोदार्यगुणान्विता ॥ जरत्कारुर्जरत्कारोः प्रदेया ह्यविचारतः ॥२२॥ यदासौ प्रार्थ्यते ऽ रापे
यात्किंचित्त्वं वदिष्यते ॥ तत्कर्तव्यमशेषेण ऋषेर्मेष्टयत्तथात्मनः ॥२३॥ पितामहवचः श्रुत्वा वासुकिः प्रणिपत्य च ॥ तथा
करोद्यथा चोक्तं यत्नं परममास्थितः ॥२४॥ तत्कृत्वा पन्नगाः सर्वे प्रहृष्टाः स्फारलोचनाः ॥ पुनर्जातमिवात्मानं मेनिरे भु
जगोत्तमाः ॥२५॥ अप्लवेनु निमग्नानां घोरे यज्ञाग्निसागरे ॥ आस्तीकस्तत्र भविता प्लवभूतोऽभयप्रदः ॥२६॥ श्रुत्वा स वा

५६ २

ग्निरानानमल्लिजन्लदनंतरम्॥ निवर्तयिष्यति यागं नागानां मोहनं परम॥२७॥ पंचम्यां तस्य भगिना ब्रह्मणो वा
वलेलिहान॥ तस्मादिदं महाराज पंचमी दयिता शुभा॥२८॥ नागानां हर्षजननी दत्ता वै ब्रह्मणा पुरा॥ दत्वा तु भोज
नं पूर्वं ब्राह्मणानां तु कामतः॥२९॥ विसर्ज्य नागाः प्रीयंतां ये केचित्पृथिवीतले॥ हिमाचले ये वसंति येऽतरिक्षे
दिवि स्थिताः॥३०॥ ये नदीषु महानागा ये सरःस्वभिगामिनः। ये च वापीषु तडागेषु तेषु सर्वेषु वै नमः॥३१॥ ना
गान्विप्रांश्च संपूज्य विसर्ज्य च यथार्थतः। ततः पश्चाच्च भुंजीयात्सह भृत्यैर्नराधिपः॥३२॥ पूर्वं मधुरमश्नीयात्तै
च्छयात्तदनंतरम्॥ एवं नियमयुक्तस्य यत्फलं तन्निबोध मे॥३३॥ मृतो नागपुरं याति पूज्यमानोऽप्सरोगणैः॥
विमानवरमारूढो रमते कालमीप्सितम्॥३४॥ इहचागत्य राजासौ सर्वराजवरो भवेत॥ सर्वरत्नसमृद्धश्च वाहना
ढ्यश्च जायते॥३५॥ पंचजन्मन्यसौ राजा द्वापरे द्वापरे भवेत॥ आधिव्याधिविनिर्मुक्तः पत्नीपुत्रसहायवान॥३६
तस्मात्तु पूज्याश्च नागा घृतक्षीरादिना सदा॥ ॥युधिष्ठिर उवाच॥ स्यांनियेनरंकृत्यनागाः क्रोधसमन्विताः
३७॥ भवेत्किं तस्य दष्टस्य विस्तरात्प्रब्रूहि मे॥ श्रीकृष्ण उवाच॥ नागदष्टो नरो राजन्प्राप्य मृत्युं व्रजत्यधः॥३८॥
अधो गत्वा भवेत्सर्पो निर्विषो नात्र संशय॥ ॥युधिष्ठिर उवाच॥ नागदष्टः पिता यस्य भ्राता माता सुहृत्सुत॥३९

नानाव्र ३

॥ भवि ॥
॥ ६३ ॥

तथा ५ भुजग ५

स्वसा वा दुहिता भार्या किं कर्तव्यं वदस्व मे ॥ मोक्षाय तस्य गोविंद दानं ब्रूतमनुपोषितम् ॥ ४० ॥ ब्रूहि मे यदुशार्दूल येन
स्वर्गतिमाप्नुयात् ॥ ॥ श्रीकृष्ण उवाच ॥ उपोष्या पंचमी राजन्नागानां तुष्टिवर्द्धनी ॥ ४१ ॥ वर्षमेकं तु राजेन्द्र विधानं शृणु या
दृशम् ॥ मासि भाद्रपदे या तु शुक्लपक्षे महीपते ॥ ४२ ॥ सा च पुण्यतमा प्रोक्ता ग्राह्या नन्दनिकाम्यया ॥ शेषा द्वादशवर्जिते
पंचम्या भरतर्षभ ॥ ४३ ॥ चतुर्थ्यामेकभक्तं तु तस्यां नक्तं प्रकीर्तितम् ॥ भूरिचंद्रमयं नागमथवा कलधौतजम् ॥ ४४ ॥ कृ
त्वा दारुमयं वापि उताहो मृन्मयं नृप ॥ पंचम्यामर्चयेद्भक्त्या नागं पंचफणां शुभाम् ॥ ४५ ॥ करवीरैस्तथा पद्मैर्जातीपुष्पैः
सुशोभनैः ॥ गंधधूपैः सनैवेद्यैः पूज्य पन्नगसत्तमम् ॥ ४६ ॥ ब्राह्मणान्भोजयेत्पश्चाद्घृतपायसमोदकैः ॥ नारायणबलिः
कार्यः सर्पदष्टस्य देहिनः ॥ ४७ ॥ दानेपि च प्रदानेन ब्राह्मणानां च तर्पयेत् ॥ वृषोत्सर्गस्तु कर्त्तव्यो गते संवत्सरे नृप ॥ ४८
स्नानं कृत्वोदकं दद्यात्कृष्णोऽत्र प्रीयतामिति ॥ अनंतं वासुकिं शेषं पद्मं कंबलमेव च ॥ ४९ ॥ तथा कर्कोटकं नागं नागम
श्वतरं नृप ॥ धृतराष्ट्रं शंखपालं कालियं तक्षकं तथा ॥ ५० ॥ पिंगलं च महानागं मासि मासि प्रकीर्तिताः ॥ वत्सरान्ते
पारणं स्यान्महाब्राह्मणभोजनम् ॥ ५१ ॥ इतिहासविदे नागं कांचनेन कृतं नृप ॥ तथार्जुनी प्रदातव्या सवत्सा कांस्यदो
हना ॥ ५२ ॥ एष पारणके पार्थ विधिः प्रोक्तो विचक्षणैः ॥ कृते व्रतवरे तस्मिन्सद्गतिं यान्ति बान्धवाः ॥ ५३ ॥ ये दन्दशूकरद

मंगलम् ४

॥ राम: ॥
॥ ६३ ॥

63

वाभयानिलः २

नैर्ऋत्याः प्राप्ताह्यधोगतिम् ॥ वर्षमेकं चरिष्यंति भजगायेत्तुनमृनमम् ॥५४॥ दांष्ट्रिकं मोक्ष्यते तेषां प्रभुंस्थानमषा
ष्यति ॥ पश्चोदंश्चगायान्ति संपृष्ठेऽन्यासमन्वितः ॥५५॥ नवैकुटुंबे नागेभ्यो भयं भवति कुत्रचित् ॥ श्रीकृष्णउवा
च ॥ ॥ तद्वद्भाद्रपदे मासि पंचम्यां श्रद्धयान्वितः ॥५६॥ यस्त्वालेख्यनरोनागान्कृष्णवर्णादिवर्णकैः ॥ पूजयेद्गंधपु
ष्पैस्तु सर्पिर्गुग्गुलुपायसैः ॥५७॥ तस्य तुष्टिं समायांति पन्नगास्तक्षकादयः ॥ आसप्तमात्कुलात्तस्य न भयं नागतो
भवेत् ॥५८॥ तस्मात्सर्वप्रयत्नेन नागान्संपूजयेद्बुधः ॥ तथाश्वयुजे मासि पंचम्यां कुरुनंदनः ॥५९॥ कृत्वाकु
शमयान्नागानिंद्राण्यासह पूजयेत् ॥ घृतोदकाभ्यां पयसा स्नापयित्वा विशांपते ॥६०॥ गोधूमैः पयसा सिद्धैर्भ
क्ष्यैश्च विविधैस्तथा ॥ यस्त्वस्यां विविधान्नागांशुचिर्भक्त्यासमन्वितः ॥६१॥ पूजयेत्कुरुशार्दूल तस्य शेषादयो नृप
नागाः प्रीता भवंतीह शांतिं प्राप्नोति शोभनाम् ॥६२॥ स शांतिलोकमासाद्य मोदते शाश्वतीः समाः ॥ इत्येतत्कथितं
वीर पंचमीव्रतमुत्तमम् ॥६३॥ तत्रायमुच्यते मंत्रः सर्वदोषनिषेधकः ॥ ॐ कुरुकुल्ले हुं फट् स्वाहा ॥ भक्तेन भक्तिसहि
ताः शातपंचमीष्वये पूजयंति भुजगान्कुसुमोपहारैः ॥ तेषां गृहे षभयं नहि सदैव सर्पाः शाश्वत्प्रमोदपरमा हृवयो भ
वंति ॥६४॥ ॥ इतिश्रीभविष्ये महापुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नागपंचमीव्रतवर्णनंनामषट्

मुभमा २

॥ भविष्य ॥
॥ ६८ ॥

त्रिंशत्तमोऽध्यायः॥ ६६ ॥ ॥ युधिष्ठिर उवाच ॥ कथमाराध्यते लक्ष्मीर्दुर्लभा भुवनत्रये ॥ दानेन तपसा वापि व्रते-
नानियमेन वा ॥१॥ जपहोमनमस्कारैः संस्कारैर्वा पृथग्विधैः ॥ एतद्वद यदुश्रेष्ठ सर्वं वितं मनो मम ॥२॥ श्रीकृष्ण
उवाच ॥ श्रियोः ख्यातां समस्तलोकपूर्वैः श्रीः क्रयते शुभा ॥ वासुदेवाय सा दत्ता मुनिनामान हृदये ॥३॥ वासुदेवोऽपि
तां प्राप्य पीनोत्तुंगपयोधराम् ॥ पद्मपत्रविशालाक्षी पूर्णचंद्रनिभाननाम् ॥४॥ भासमानसितदिग्भोगांसाक्षा
मानोः प्रभामिव ॥ नितंबाडंबरवतीं मत्तमातंगगामिनीम् ॥५॥ रेमे सह तया राजन्विभमोर्नुनवितया। साव
विश्वं जगज्जित्वं पाति त्रिजगतां पतिम् ॥६॥ प्राप्य कृतार्थमात्मानं मेने माननयशोधना ॥ हृष्टं पुष्टं जगत्सर्वं भव
वत्ता वितं तया ॥७॥ लक्ष्म्यानिरीक्षितं वैव सानन्दं मही नराम् ॥ क्षेमं सुभिक्षमारोग्यमनाकं दमनाकुलम्
८॥ नगद्दामी दक्षजानं पृथ्वांतोयदवं तथा ॥ दिवि देवाम्बुकदिरे दानवा दैत्यमागताः ॥९॥ विस्फारितफणाभोगाना
गाभ्भे व रसातले ॥ हृदये व्रालगौर्वत्रुं भुम्यन्ते विदिवैर्दिवि ॥ १० ॥ चातुर्वर्ण्यमसंकीर्णं पालयन्ते पार्थ पार्थिवैः ॥ विरोवन
प्रभृतिभिर्दैत्यैर्वेदेष्वसन्नमैः ॥ ११ ॥ तपस्तप्तमथारब्धं मणिमाञ्जिनसेयतैः ॥ सोमसंस्थाहविःसंस्थापाकसंस्थादि
भिर्मखैः ॥ १२ ॥ सदाचारैः समारब्धामखं त्वं प्राभिलाषिभिः ॥ एवं धर्मप्रधाने स्मिन्वैदवादरतात्मभिः ॥ १३ ॥

लक्ष्म्या मोपाल पंच स्यॉं सदृष्टे वमहीतलम् ॥

भनामयम् ७
64

॥ रामः ॥
॥ ६८ ॥

जगतामीश्वमाक्रान्तं विक्रमेणाक्रमेण तत् ॥ लक्ष्मीविलासप्रभवो देवानामभवन्मदः ॥ १४ ॥ मदाच्छीलं च शौचं च सत्यं
सघोगमनीनशान् ॥ सत्यशौचविहीनानां तान्देवान्सत्त्वं त्यज्य चं वलान् ॥ १५ ॥ जगाम दानवकुलं कुलदेवानुरागतः ॥ लक्ष्मी
भाविनदेहैस्तैः भजनहृतमानसैः ॥ १६ ॥ अथ वहर्तुसमारब्धमन्त्रायेन मदोद्धतैः ॥ वयं वेदा वयं यज्ञा वयं विप्रा
वयं जगत् ॥ १७ ॥ ब्रह्मविष्णुशंकरा यावयं सर्वे दिवौकसः ॥ अहंकारविमूढत्वात्तान्यादानवसत्तमान् ॥ १८
सागरं सा निवेशाय भ्रान्तचित्ता भृगोः सुता क्षीराब्धिमध्यगतया लक्ष्म्या श्रीरूपधृष्टं वया ॥ १९ ॥ निरानंद
गतश्रीकमभवद्भुवनत्रयम् । गतश्रीकमथात्मानं मत्वा शंबरसूदनः ॥ २० ॥ पप्रच्छांगिरसं विप्रं ब्रूहि किं वि
धेयं मम ॥ येन संप्राप्यते लक्ष्मीर्लब्धा न चलते पुनः ॥ २१ ॥ निश्चलापि सुहृन्मित्रैर्भोग्या भवति सा मुने ॥ न सा श्री
स्वभिमन्तव्या या कन्या सा या पाल्यते गृहे ॥ २२ ॥ परार्थ्याः सुहृन्मित्रैर्मत्सैर्वैर्नोपभुज्यते ॥ शाकस्येन तवः श्रुत्वाथ हस्व
तिरुदारधी ॥ २३ ॥ कथयामास संक्षिप्तं श्रीपंचमीव्रतम् ॥ पप्रच्छ कस्याचित्सोत्तं व्रतानामुत्तमं व्रतम् ॥ २४
न्द्रस्मै कथयामास सुरह्यस्य मन्त्रोपनः ॥ न कृत्वाकर्तुमारब्धं सुरेशेन सुरैस्तथा ॥ २५ ॥ दैत्यदानवगंधर्वैर्यक्षैः प्र
श्रीणकलमेखे ॥ सिद्धैः ऋषिसिद्धचारितैर्विलुप्ता प्रभाविल्मेना ॥ २६ ॥ ब्राह्मणो ब्रह्मतत्त्वज्ञैः समर्थैः पार्थिवैः सह ॥ कै

॥ म॰ पु ॥
॥ ६५ ॥

ञ्चित्सात्विकभावेन राजसेनापरैरपि ॥ २७ ॥ तामसेन तथा कैश्चित्कृतं व्रतमिदं तथा ॥ व्रतेन समाप्ते भूपिष्टे निष्पापाप्र
रयाप्रभो ॥ २८ ॥ देवानां दानवानां च पुरुमासीद्यथोद्धतम् ॥ निर्मथ्य मन्थवीर्येण सागरं सरितांपतिम् ॥ २९ ॥ समाहृत्य मो
हमृतं हिताय त्रिदिवौकसाम् ॥ इत्येवं समयं कृत्वा समं पूर्वं रुणालयम् ॥ ३० ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकी
म् ॥ मथ्यमाने जलाज्जाते चन्द्रः शीतांशुरुज्ज्वलः ॥ ३१ ॥ अनंतरं समुत्पन्ना लक्ष्मी क्षीराब्धिमध्यतः ॥ तया विलोकिताः सर्वे
दैत्यदानवसत्तमाः ॥ ३२ ॥ आलोकमात्रजगाम आत्मविष्णोर्वक्षःस्थलं च मम ॥ किंचिन्नातिक्लेना वीर्यां व्रतं तेनाधिसंभवा ॥ ३३
श्रीरस्याव भक्ताम्नविश्वमोहनलोचना ॥ किं च राजसभावेन शाक्तेयोन कृतं यतः ॥ ३४ ॥ तेन श्रियं युवतैश्वर्यं प्राप्तं तेन महर्द्धि
कम् ॥ तामसा व्रतचितेनैकसंवीर्यां दैत्यदानवैः ॥ ३५ ॥ तेन तेषाम् अथैश्वर्यं दृष्टिनष्टमभूत्किल ॥ एतत्सश्रीकसमं वत्स देवासुर
मानुषम् ॥ ३६ ॥ जगत्स्वजनानां मे व्रतस्यास्य प्रभावतः ॥ ॥ युधिष्ठिर उवाच ॥ कथमेतद्व्रतं कृष्ण क्रियते मनुजैः कदा ॥ ३७
प्रारम्भे तेन पार्थं ते च सर्वं वदस्व तत्त्वतम् ॥ ॥ श्रीकृष्ण उवाच ॥ मार्गशीर्षे सिते पक्षे पंचम्यां पतगोदये ॥ ३८ ॥ उपवासस्य
नियमं कुर्याद्भक्तसङ्कल्पितः ॥ स्वर्णरौप्यार्कटोत्था तु ताम्रमृन्मयजाथवा ॥ ३९ ॥ चित्रपटगतां देवीं लक्ष्मीं क्ष्मापालकार
येन ॥ पश्चात्तां पञ्चवर्णाद्यैः पट्टलेश्मरागम् ॥ ४० ॥ दिग्गजेन्द्रैः स्नाप्यमानां कांचनैः कलशोत्तमैः ॥ ततो यामत्रये जाते

65

॥ राम: ॥
॥ ६५ ॥

निम्नगायां गृहे ऽथवा ॥४१॥ स्नानं कुर्याददसंभ्रान्तं शास्त्रवदुपचारतः। देवान्पितंश्च संतर्प्य ततो देवगृहं व्रजेत ॥४२॥
नत्वस्थां पूजयेद्देवीं पुष्पैस्तत्कालसंभवैः। चपलायै नमः पादौ चंचलायै च जानुनी ॥४३॥ कटिं कमलवासिन्यै नाभिं
ख्यात्यै नमो नमः। स्तनौ मन्मथवासिन्यै ललितायै भुजद्वयम् ॥४४॥ उत्कंठितायै कंठं च माधव्यै मुखमण्डलम्। न
मः श्रियै शिरः पूज्य दद्यान्नैवेद्यमादरात ॥४५॥ फलानि च यथालाभं विविधान्यान्नसंचयान। ततः सुवासिनीः पू
ज्याः कुसुमैः कुंकुमेन च ॥४६॥ भोजयेन्मधुरान्नेन घृतपायसविसर्जयेत। ततस्तु तंडुलप्रस्थं घृतपात्रेण संयुतम्
४७॥ ब्राह्मणाय प्रदातव्यं श्रीशः संप्रीयतामिति। निवर्त्य तद्दिने शेषेण ततो भुंजीत वाग्यतः ॥४८॥ मासानुमासं
कर्त्तव्यं विधिनानेन भारत। श्रीलक्ष्मीः कमला संपद्रमा नारायणी तदा ॥४९॥ पद्मा धृतिः स्थितिः पुष्टिर्ऋद्धिः सि
द्धिर्यथाक्रमम्। मासानुमासं राजेन्द्र प्रीयतामिति कीर्तयेत ॥५०॥ ततश्च द्वादशे मासि संप्राप्ते पंचमीदिने। वस्त्रमं
डपिकां कृत्वा पुष्पगंधाधिवासिताम ॥५१॥ तस्यां स्थापयेत्लक्ष्मीं सर्वोपस्करसंयुताम। मौक्तिकाष्टकसंयु
क्तेन च पदा कृतनलनीम् ॥५२॥ सप्तधान्यसमोपेतां रसधातुसमन्विताम्। पादुकोपानच्छत्रभाजनासनसंयुताम्
५३॥ दद्यात्संपूज्य विधिवद्ब्राह्मणाय कुटुंबिने। व्यासाय वेदविदुषे यस्य वा रोचते स्वयम ॥५४॥ सोपस्करां सवत्सां

|| भपु ||

|| ६६ ||

वधेनं दत्त्वा क्षमापयेत् || श्री राज्ञि मथनोद्भूते विलोलोर्वक्षःस्थलालये || ५५ || सर्वकामप्रदे देवि विष्णुप्रिये नमोऽस्तु
ते || ततः सुवासिनीः पञ्च वस्त्रैराभरणैः शुभैः || ५६ || भोजयित्वा स्वयं पश्चाद्भुञ्जीत सह वंधुभिः || एवं यः कुरुते पार्थ भ
क्त्या श्रीपंचमीव्रतम् || ५७ || तस्य श्रीर्भवने भाति कुलानामेकविंशतिः || नारी वा कुरुते या तु प्राप्यानुज्ञां स्वभर्तृतः ||
५८ || सुभगानन्दकीर्तीया बहुपुत्रा च जायते || ५९ || श्रीपंचमीव्रतमिदं दयितं मुरारेर्भक्त्या समाचरति पञ्चभगालेन
जाम् | राज्यं निजं समभिगम्य जनोपभोगान्भुक्त्वा प्रयाति भवनं मधुसूदनस्य || ६० || इति श्रीभविष्ये महापुरा
णे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पंचमीव्रतकल्पे श्रीपंचमीव्रतनिरूपणं नाम सप्तत्रिंशत्तमोऽध्यायः || ३७
इति पंचमीकल्पः समाप्तः || || युधिष्ठिर उवाच || षष्ठीविधानमधुना कथयस्व जनार्दन || सर्वपापप्रशमनं स
र्वकर्मफलप्रदम् || १ || कृतं मया पञ्चमानो भानुः सर्वप्रियकृत्ति || दिवाकराराधनं मे तन्मा कथय केशव || २ ||
विशोकषष्ठीमनघां वक्ष्यामि मनुजोत्तम || यामुपोष्य नरः शोकं न कदाचिदिह जायते || ३ || माघे कृष्णतिलैः स्ना
तः पंचम्यां शुक्लपक्षतः || कृताहारः कृशरया दन्तधावनपूर्वकम् || ४ || उपवासव्रतं कृत्वा ब्रह्मचारी भवेन्निशि ||
ततः प्रभाते चोत्थाय कृतस्नानजपः शुचिः || ५ || कृत्वा तु कांचनं पद्ममर्कोऽयमिति पूजयेत् | करवीरेण रक्तेन रक

कृष्णपक्षतः २

|| रामः ||

|| ६६ ||

66

कतनैसक २

वस्त्रपूजनञ्च ॥ ६ ॥ यथाविशोकं भवनं त्वयैवादित्य सर्वदा ॥ तथाविशोकता मे स्यात्वद्भक्तिर्जन्मजन्मनि ॥ ७ ॥ एवं सं-
पूज्य षष्ठ्यां तु ब्राह्मणान् संपूजयेद्द्विजान् ॥ सुप्रासंप्राश्य गोमूत्रमुत्थाय कृते निश्चयः ॥ ८ ॥ संपूज्य विप्रमंत्रेणागृह्य पा-
त्रसमन्वितः ॥ सुसूक्ष्मवस्त्रयुगलं ब्राह्मणाय निवेदयेत् ॥ ९ ॥ अतैललवणं भुक्त्वा सस्वप्यां मौनसंयुतः ॥ ततः
प्रणाम्य वरणां कर्तं भुंभति मिष्टकृता ॥ १० ॥ अनेन विधिना सर्वमुभयोरपि पक्षयोः ॥ कुर्याद्यावत्सप्तमी च षट्कृप-
क्षस्य सप्तमी ॥ ११ ॥ व्रतान्ते कलशं दद्यात्स्वर्णकमलान्वितम् ॥ शय्यां सोपस्करं तद्वत्कपिलां च पयस्विनीम् ॥
१२ ॥ अनेन विधिना यस्तु वित्तशाठ्यविवर्जितः ॥ विशोकषष्ठीं कुरुते स याति परमां गतिम् ॥ १३ ॥ यावज्जन्मस-
हस्राणां सप्तकोटिशतं भवेत् ॥ तावन्न शोकमभ्येति रोगदौर्गत्यवर्जितः ॥ १४ ॥ यं यं प्रार्थयते कामं तं तं प्राप्नो-
ति पुष्कलम् ॥ निष्कामं कुरुते यस्तु स परं ब्रह्म गच्छति ॥ १५ ॥ यः पठेच्छृणुयाद्वापि षष्ठीं शोकविनाशिनीम् सो-
पींऽ लोकमाप्नोति न दुःखी जायते क्वचित् ॥ १६ ॥ ये भास्करं दिनकरं करवीरपुष्पैः संपूजयन्त्यभिनमन्ति कृतो-
पवासाः ॥ ते दुःखशोकरहिताः सहिताः सुहृद्भिर्भूमौ विहृत्य रविलोकमवाप्नुवंति ॥ १७ ॥ ॥ इति श्रीभविष्यो-
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विशोकषष्ठीव्रतं नामाष्टत्रिंशत्तमोऽध्यायः ॥ ३८ ॥ ॥

॥ भ॰पु ॥
॥ ६७ ॥

श्रीकृष्ण उवाच ॥ अन्यामपि प्रवक्ष्यामि पापघ्नषष्ठीं शुभां तथा ॥ यामुपोष्य नरः पापविमुक्तः स्वर्गभाग्भवेत्
१ ॥ मार्गशीर्षे शुभे मासि षष्ठ्यां नियतव्रतः ॥ षष्ठीमुपोष्य कमलं कारयित्वा तु कांचनम् ॥ २ ॥ शर्करासंयुतं द
द्याद्ब्राह्मणाय कुटुंबिने ॥ रूपं च कांचनं कृत्वा फलस्यैकस्य धर्मवित् ॥ ३ ॥ दद्यात्स्नातः कृतस्नानो भानुर्मे प्रीयता
मिति ॥ भक्त्या तु विप्रान्संपूज्य सप्तम्यां क्षीरभोजनम् ॥ ४ ॥ कृत्वा कुर्यात्फलत्यागं यावत्स्यात्कृष्णसप्तमी ॥ तस्या
मुपोष्य विधिवद्देनैतैव क्रमेण तु ॥ ५ ॥ तद्वै हैमं फलं दत्वा सुवर्णकमलान्वितम् शर्करापात्रसंयुक्तं वस्त्रमा
लासमन्वितम् ॥ ६ ॥ षष्ठ्योभयोर्महाराज यावत्संवत्सरं ततः ॥ उपोष्य दद्यात्क्रमशः सूर्यमंत्राननुदीरयेत् ॥ ७ ॥
भानुरर्को रविर्ब्रह्मा सूर्यः शक्रो हरिः शिवः ॥ श्रीमान्विभावसुस्त्वष्टा वरुणः प्रीयतामिति ॥ ८ ॥ प्रतिमासं च स
प्तम्यामेकैकं नाम कीर्तयेत् ॥ प्रतिपक्षं फलत्यागमेतत्कुर्वन्समाचरेत ॥ ९ ॥ व्रतांते विप्रमिथुनं पूजयेद्वस्त्रभू
षणैः ॥ शर्कराकलशं दद्याद्धैमपद्मफलान्वितम् ॥ १० ॥ यथाफलकरो मासस्त्वद्भक्तानां सदा रवे ॥ तथानंतफ
लावाप्तिरस्तु जन्मनि जन्मनि ॥ ११ ॥ इमामनंतफलदां फलषष्ठीं करोति यः ॥ स सर्वपापनिर्मुक्तः सूर्यलोके

67

॥ राम: ॥
॥ ६७ ॥

महीपते ॥ सुरापानादिकं किंचिद्यदत्रामुत्र वा कृतम् ॥ १२ ॥ तत्सर्वं नाशमायाति सूर्यलोकं स गच्छति ॥ भ-
नाभ्यसां शृणुयां स्मारयेदेक चिंतति ॥ १३ ॥ भल्पायायः पठेद्वापि सोपि कल्याणभाग्भवेत ॥ १४ ॥ हैमं फलं सकमलं कलंकले-
स्मितायः षष्ठीमुपोष्य विधिवद्द्विजपुंगवाय ॥ दद्यान्नरागुरुशिरोमति पद्मपादं मार्त्तं प्रणाम्य फलमिष्टमुपैति मर्त्यः
१५ ॥ ॥ इति श्रीभविष्योत्तरपुराणे श्रीकृष्णयुधिष्ठिरसंवादे कमलषष्ठीव्रतं नामैकोनचत्वारिंशत्तमो-
ध्याय ॥ ३९ ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि सर्वपापप्रणाशिनीम् सर्वकामप्रदां पुण्यां षष्ठीं मंदारसं-
ज्ञिताम् ॥ १ ॥ माघमासामले पक्षे पंचम्यां लघुभुंनरः ॥ दंतकाष्ठं ततः कृत्वा षष्ठीमुपवसेद्बुधः ॥ २ ॥ विप्रान्संपूजयित्वा
तु मंदारं प्राशयेन्निशि ॥ ततः प्रभाते चोत्थाय कृतस्नानः पुनर्द्विजान ॥ ३ ॥ भोजयेच्छक्तितः कृत्वा मंदारकुसुमाष्टकम् ॥
सौवर्णं पुरुषं तद्वत्पद्महस्तं सुशोभनम् ॥ ४ ॥ पद्मं कृत्वा तिलैः कृत्वा ताम्रपात्रे ष्टपत्रकम् । पूज्यं मंदारकुसुमैर्भास्करायेति पूर्वत ॥ ५ ॥ नमस्कारेणातद्वच्च सूर्यायेत्यनले दले ॥ दक्षिणे तद्वदर्काय तथार्यम्णो च नैर्ऋते ॥ ६ ॥ पश्चिमे वसु-
धात्रेच वायव्येचरुभानवे ॥ प्रद्योत्युत्तरतः पूज्य आनंदायेत्यतः परम् ॥ ७ ॥ कर्णिकायां तु पुरुषः पूज्यः सर्वात्मने-
ति च ॥ शुक्लवस्त्रैः समावेष्ट्य भक्ष्यैर्माल्यफलादिभिः ॥ ८ ॥ एवमभ्यर्च्य तत्सर्वं दद्याद्वेदविदे पुनः ॥ भुंजीतातैलल-

नराणांवाग्यतःप्रातःस्नात्वोगृही ॥ ९ ॥ अनेनविधिनासर्वंसप्तम्यांमासिमासिच । कुर्यात्संवत्सरंयावद्वित्तशाठ्यविवर्जितः ॥
१० ॥ एतद्देवव्रतंतेनुनिधायकलशोपरि ॥ गोभिर्विभवतःसार्द्धंदातव्यंभक्तिमिकृता ॥ ११ ॥ नमोमंदारनाथायमंदा
रभवनायच ॥ त्वंचवैतारयस्वास्मानस्मात्संसारकर्द्दमात् ॥ १२ ॥ अनेनविधिनायस्तुकुर्यान्मंदारकंव्रतम् ॥ वि
पाप्मासस्सुखीमर्त्योकल्पंचदिविमोदते ॥ १३ ॥ इमामघौघपटलध्वांतसद्दीप्तदीपिकाम् ॥ गच्छन्नगरसंसारसर्व
यानस्खलल्लरः ॥ १४ ॥ मंदारषष्ठीविख्यातामीप्सितार्थफलप्रदाम् ॥ यःपठेच्छृणुयाद्वापिसोपिपापैःप्रमुच्यते ॥ १५
षष्ठीमुपोष्यतिलपंकजकर्णिकायांसंपूज्यभास्करमहोसुरहंप्रभुष्यै ॥ यान्त्याप्नुवंतिप्रहतानहितेनकृताविसोमुहि
रण्यतिलदःपरमाप्नुवंति ॥ १६ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेमंदारषष्ठी
व्रतनिरूपणंनामचत्वारिंशोऽध्यायः ॥ ४० ॥ ॥ श्रीकृष्णउवाच ॥ भद्रभाद्रपदेमासिशुक्लपक्षेयुधिष्ठिर ॥ यो
षित्सुवेभाग्नुभगासर्वलोकमनोहर ॥ १ ॥ प्रातःस्नात्वामहानद्यांकृत्वासंगृह्यवालुकाम् नवेवंशमयेपात्रेयायाद्
हमतंडिता ॥ २ ॥ सोपवासाप्रयत्नेनदेवींतत्रप्रपूजयेत ॥ कृत्वावस्त्रगृहंरम्यंदीपनैवेद्यपूजनम् ॥ ३ ॥ तत्रसंस्था
पितांदेवींपुष्पैःसंपूजयेत्सवै ॥ ध्यात्वाललितिकांगौरींतपोवननिवासिनीम् ॥ ४ ॥ मंत्रेणानेनकुसुमैश्चंपक

स्यसुशोभने॥ चंपकं करवीरं च नेमालिं मालतीं तथा॥५॥ नीलोत्पलं केतकीं च संगहातगरं तथा॥ एकैकस्य
त्वष्टशतमष्टाविंशति रेव वा॥६॥ अभ्वैतैः कलिकाग्राह्यास्तैस्तु देवीं समर्चयेत॥ गंगाद्वारे कुशावर्त्ते विल्वके नी
लपर्वते॥७॥ स्नात्वा कनखले तीर्थे हरं लक्ष्यवती व्रजेत॥ ललिते ललिते देवी सौख्यसौभाग्यदायिनी॥८॥ या सौ
भाग्यसमुत्पन्ना तस्यै देव्यै नमो नमः॥ एवमभ्यर्च्य विधिना नैवेद्यं पुरतो न्यसेत॥९॥ कूष्मांडैः कर्कटीवृंतैः क
र्कोटैः कारविध्वकैः॥ वृंताकै रक्षतै रंगैर्दीपिधूपाघलक्कैः॥१०॥ सार्द्धसगुणाकैर्धूपैः सोहालककरंवकैः॥ गुडपू
पैः करीवेष्टैर्मोदकैर्मुखमोदकैः॥११॥ एवमभ्यर्च्य विधिवद्रात्रौ जागरणं ततः॥ गीतवाद्यनटच्छत्रप्रेक्षणी
यैः सुशोभनैः॥१२॥ सखीभिः सहिता साध्वी नारःत्रौं प्रशमल्लयेत॥ न च सम्मीलयेन्नेत्रे नारी याम चतुष्टय
म्॥१३॥ दुर्भगा दुर्गता वंध्या नेत्र संमीलनाद्भवेत॥ एवं जागरणं कृत्वा सप्तम्यां सरितं नयेत॥१४॥ गंधपुष्पैस्तथा
भ्यर्च्य गीतवाद्यपुरःसरम्॥ नच्चदद्याद्विजेंद्राय नैवद्यादि नरोत्तमः॥१५॥ स्नात्वा गृहमुपागम्य कृत्वा वैश्वानरं
क्रमात॥ देवान्पितन्मनुष्यांश्च पूजयित्वा सुवासिनी॥१६॥ कुमारीका भोजनीया ब्राह्मणा दश पंच च॥ भक्ष्य
भोज्यैर्वस्त्रविधैर्दयात्तेभ्यः सुदक्षिणा॥१७॥ ललिता प्रीतिमुक्तात्म इत्युक्त्वा तान्विसर्जयेत॥ यः कश्चिद

॥ भ॰पु ॥
॥ ६८ ॥

चरेदेतद्भक्त्या ललितिकाव्रतम् ॥ १८ ॥ नरो वा यदि वा नारी तस्य पुण्यफलं शृणु ॥ न तस्यास्ति मानुषे लोके तस्य यन्नोपपद्यते ॥ १९ ॥ सुखसौभाग्यसंयुक्ता गौरीलोकमवाप्नुयात् ॥ २० ॥ गच्छां जलां नरगतां वरवेश्मपात्रे संगृह्य जातियास्त्रिकृताः क्रमेण ॥ नक्तं च जागरमनुष्ठित गीतनृत्यैः कृत्वा प्रसौत्रिभुवने ललिते वसन्ति ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ललिताषष्ठीव्रतवर्णनं नामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीकृष्ण उवाच ॥ येयं मार्गशिरे मासि षष्ठी भरतसत्तम ॥ पुण्या पापहरा धन्या शिवा शान्ता गुहप्रिया ॥ १ ॥ निहत्य तारकं षष्ठ्यां गुहस्तारकराजवत् ॥ रराज तेन दयिता कार्त्तिकेयस्य सा तिथिः ॥ २ ॥ स्नानदानादिकं कर्म तस्यामक्षयमुच्यते ॥ यस्यां पश्यन्ति गाङ्गेयं दक्षिणापथमाश्रितम् ॥ ३ ॥ ब्रह्महत्यादिपापैस्तैर्मुच्यन्ते नात्र संशयः ॥ तस्मादस्यां सोपवासः कुमारं स्वर्णसंभवम् ॥ ४ ॥ राजतं वा महाराज मृन्मयं वापि कारयेत ॥ अपराह्णे ततः स्नात्वा समाचम्य यतव्रती ॥ ५ ॥ पद्मासनस्थो गाङ्गेयं ध्यायंस्तिष्ठेत्समाधिना ॥ ब्राह्मणस्तु ततो विद्वान् गृहीत्वा करकं नवम् ॥ ६ ॥ पातयेत स्वच्छिरसि धारां वै दक्षिणामुखः ॥ चंडमगणलभृतानां भवभृतिपवित्रिता ॥ ७ ॥ गंगाकुमारधारेयं पातिता नानवमस्तके ॥ स्कन्दं स्नात्वा समभ्यर्च्य भास्करं भुवनाधिप ॥ ८ ॥ पुष्पधूपादिनाभ्यर्च्य जपेत्कृत्तिकासुतम् ॥ देव

69

॥ रामः ॥
॥ ६८ ॥

सेनापते स्कंद कार्त्तिकेय भवोद्भव ॥ ९ ॥ कुमार गुह गांगेय शक्तिहस्त नमोऽस्तु ते ॥ एभिर्नामपदैः पूजा नैवेद्यं विनि
वेदयेत् ॥ १० ॥ फलानि दक्षिणान्यानि वंदनं मलयोद्भवम् ॥ पार्श्वस्थौ पूजयेच्छाग कुक्कुटौ स्वामिवल्लभौ ॥ ११ ॥ सक
लापं मयूरं च ग्रन्थशां हिमजां तथा ॥ कृत्तिकाषट्कं पार्श्वे संपूज्य स्कंदवल्लभम् ॥ १२ ॥ तेनैव नामभिर्होमः कार्यः सा
ज्यैस्तिलैस्तथा ॥ एवं निर्वर्त्य विधिवत्फलमेवं युधिष्ठिर ॥ १३ ॥ भक्षयित्वा स्वपेद्भूमी स्वात्सते दर्भसंस्तरे नालिके
रं मातुलुंगं नारिंगं पनसं तथा ॥ १४ ॥ जंबीरं दाडिमं द्राक्षां ह्याम्रान्याम्रफलानि च ॥ श्रीफलामलकं नद्धत्रपुसं क
दलीफलम् ॥ १५ ॥ क्रमेणाभक्षयेद्राजन्संयतो नियतव्रती ॥ अलाभे कलकालोपफलमश्नात्तं द्विजः ॥ १६ ॥ ग्रमक्षो हे
मघृतेन छागो वा कुक्कुटोऽथ वा ॥ प्रातर्दद्याद्द्विजायेन सेनानीः प्रीयतामिति ॥ १७ ॥ सेनायां लब्धसंभूतः क्रौंचारिः षण्मु
खो गुह ॥ गांगेयः कार्त्तिकेयश्च स्वामी बालग्रहाग्रणी ॥ १८ ॥ छागप्रियः शक्तिधरो द्वारो द्वादशाक्षः स्मृतः ॥ प्रीयतामि
ति सर्वेषु कर्मस्वासेषु कीर्त्तयेत् ॥ १९ ॥ ब्राह्मणान्भोजयित्वाथो पश्चाद्भुंजीत वाग्यतः ॥ एवं संवत्सरस्यांते कार्त्ति
के मासि शोभने ॥ २० ॥ कार्त्तिकेयं समभ्यर्च्य वासोभिर्भूषणैः सह ॥ गांगेयः कार्त्तिकेयश्च सस्कंदो वै समावरेन् ।
२१ ॥ संवत्सरविधिं कृत्वा जपं होमं पुरस्कृतम् ॥ दद्याद्विप्राय राजेंद्र वाचकाय विशेषतः ॥ २२ ॥ एते विप्राः स्म

नादित्या भौमात्वस्माद्विजात्तयः॥ पालितेः स्मिन्व्रते पार्थ तीर्णः स्याद्भवसागरे॥२३॥ यस्त्वं कुरुते भक्त्या नरो यो
षिद थापि वा॥ सप्राप्येह शुभं कामं गच्छतीन्द्रसलोकताम्॥२४॥ सदैव पूजनीयस्तु कार्त्तिकेयो महीपते॥ कार्त्ति
केयाद्दत्तेनास्मो राज्ञां पूज्यः प्रवक्ष्यते॥२५॥ संग्रामं गच्छमानो यः पूजयेत्कृत्तिकासुतम्॥ स सर्वं जयते वीरो यथे
न्द्रो दानवान्रणे॥२६॥ तस्मात्सर्वप्रयत्नेन पूजयेत्कृत्तिकात्मजम्॥ पूज्यमानस्तु सडन्त्या सर्वान्कामानवाप्नुयात्
२७॥ यस्तु षष्ठ्यां नरो नक्तं कुर्यान्नारं नससतम सर्वपापविनिर्मुक्तो गांगेयस्य सदा व्रजेत्॥२८॥ कृत्वैवं दक्षिणां
मासंगत्वा श्रद्धासमन्वितः॥ पूजयेद्देवदेवेशं संगत्वा शिवमंदिरम्॥२९॥ स्कंदं गुहं हरवरोद्भवमादिदेवं ग्रां भोः
सुतं सदयितं गिरिराजपुत्र्याः॥ स्वर्गे निरर्गलसुखो ननु भयते ना सेनापतिर्भवति राज्यधुरंधुरोऽसौ॥३०॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तारकवधकार्त्तिकेयपूजाषष्ठीव्रतवर्णनं
नामष्टचत्वारिंशोऽध्यायः॥४२॥ ॥ युधिष्ठिर उवाच॥ सप्तमी च यदा देव केन कालेन पूज्यते॥ किंफला निय
मक क्विद्वद देवकिनन्दनः॥१॥ श्रीकृष्ण उवाच॥ शुक्लपक्षे तु सप्तम्यां यदादित्यदिनं भवेत्॥ सप्तमी विजया ना

70

षष्ठीपक्वैस्तुतैंदुलैः ४

मनत्रदत्तं महाफलम् ॥ २ ॥ स्नानं दानं जपो होममुपवासस्तथैव च ॥ सर्वं विजयसप्तम्यां महापातकनाशनम् ।
३ ॥ प्रदक्षिणां यः कुरुते फलैः पुष्पैर्दिवाकरम् ॥ स सर्वगुणसंपन्नं पुत्रं प्राप्नोत्यनुत्तमम् ॥ ४ ॥ प्रथमा नालिकेरै-
स्तु द्वितीया रक्तनागरैः ॥ तृतीया मातुलुंगैश्च चतुर्थी कदलीफलैः ॥ ५ ॥ पंचमी वरकूष्माण्डैः षष्ठी पक्वैस्तु तैंदु-
कैः ॥ वृंताकैः सप्तमी देया अष्टोत्तरशतेन च ॥ ६ ॥ मौक्तिकैः पद्मरागैश्च नीलैः कर्केतनैस्तथा ॥ गोमेदैर्वज्रवैदू-
र्यैः शतेनाष्टाधिकेन तु ॥ ७ ॥ अक्षोटैर्वदरैर्बल्वैः करमर्दैः सवर्वरैः ॥ आम्राम्रातकजंबीरैर्जंबुकर्कोटिकाफ-
लैः ॥ ८ ॥ पुष्पैर्धूपैः फलैः पत्रैर्मोदकैर्गुणकैः शुभैः ॥ एभिर्विजयसप्तम्यां भानोः कुर्यात्प्रदक्षिणाम् ॥ ९ ॥ अन्यैः
फलैश्च कामैश्च हेमसवैर्ग्रंथिवर्जितैः ॥ रवेः प्रदक्षिणा देया फलेन फलमादिशेत ॥ १० ॥ नविशेल्वचसंजतोल्ल-
वकश्चिद्वदेदपि ॥ एकचित्ततया भानुश्चिंतनीयः प्रयत्नतः ॥ ११ ॥ वसोर्धारा प्रदातव्या भानोर्गव्येन सर्पिषा ।
वेडानपत्रं वध्नीयाज्जयं किंकिणिकायुतम् ॥ १२ ॥ कुंकुमेन समालभ्य पुष्पधूपैश्च पूजयेत ॥ शुभं निवेद्य नै-
वेद्यं ततः पश्चात्क्षमापयेत ॥ १३ ॥ भानो भास्कर मार्तण्ड चंडरश्मे दिवाकर ॥ आरोग्यमायुर्विजयं पुत्रं देहि न

मोदते ॥ १४ ॥ उपवासेन नक्तेन तथैवायाचितेन च ॥ कृत्वा नियमभक्तेन यास्त्रियं जयसप्तमी ॥ १५ ॥ रोगी विमुच्य
ते रोगा हरिद्रः श्रियमाप्नुयात् ॥ अपुत्रो लभते पुत्रं विद्यां विद्यार्थिनो भवेत् ॥ १६ ॥ शुक्लपक्षे यदा पार्थ सादित्यसप्तमी
भवेत् ॥ तदा नक्तेन मनुजा नारीः क्षपयेत्तु सप्तमी ॥ १७ ॥ भ्रमौपलाशपत्रेण स्नात्वा कृत्वा यथाविधि ॥ समाप्ते तु व्रते
दद्यात्सौवर्णं मुद्गमिश्रितम् ॥ १८ ॥ मुद्गं भक्ष्याय विप्राय वाचकाय विशेषतः ॥ सप्तम्यां सप्तसंयुतः आदित्येन नरोत्त
मः ॥ १९ ॥ उपोष्य विधिनानेन मंत्रध्यानपूजनैः ॥ षडक्षरेण मंत्रेण सर्वं कार्यं विजानता ॥ २० ॥ अर्चनं वह्निकार्यं
च स्नानमष्टोत्तरं नरः ॥ समाप्ते तु व्रते पश्चात्सुवर्णेन घटापितम् ॥ २१ ॥ सौवर्णं भास्करं पार्थ रक्तपद्मपात्रगतं शुभम्
रक्तांबरं चकाचार्यं गंधं दद्यात्सदक्षिणम् ॥ २२ ॥ मंत्रेणानेन विप्राय कर्मसिद्धैर्द्विजातये ॥ ॐ भास्कराय सुदेवाय नम
स्तुभ्यं यशस्कर ॥ २३ ॥ ममाद्य सप्तमी हितार्थं प्रदो भव नमो नमः ॥ दानानि च प्रदेयानि गृहाणि शयनानि च ॥ २४ ॥
श्रासनानि च देवानां शाश्वतीं तृप्तिमिच्छता ॥ यात्राप्रशालापानस्त्रणां राज्ञां च जयमिच्छताम् ॥ २५ ॥ विजयो जाय
तेऽत्र रूपं यतीनां च नराणां तदा ॥ अतोऽर्थं विश्रुता लोके सदा विजयसप्तमी ॥ २६ ॥ सर्वमेषा तिथिः पार्थ दृष्टकामप्र
दा नराणाम् ॥ परत्र सुखदा सौम्या सर्वलोकप्रदायिनी ॥ २७ ॥ दाना भोगाश्च च नरो दीर्घायुर्नीरुजः सुखी ॥ इहागत

भवेद्राजा हस्त्यश्वधनरत्नवान्॥ २८॥ नारी वा कुरुते या तु सापि तत्फलभागिनी। भवत्यत्र न संदेहः कार्यः पार्थ
नपाक्वचित्॥ २९॥ स्वर्ग्गापसमीहितस्तु लोर्थ्वफलप्रदा वया मृग्यते तु निर्वैः प्रवरा तिथी नाम॥ सा भानुपादकमला
र्चनविंनकानां पुंसां सदैव विजया विजयं ददाति॥ ३०॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठि
रसंवादे विजयसप्तमीव्रतकथनं नाम त्रिचत्वारिंशोऽध्यायः॥ ४३॥ ॥ श्रीकृष्ण उवाच॥ अथान्यदपि ते वक्ष्मि दानं श्रेयस्क
रं परम्॥ आदित्यमंडलं नाम सर्वाशुभविनाशनम्॥ १॥ यववर्ण्णेन शुभ्रेण कुर्याद्गोधूमजेन वा॥ गुडपक्वं भानुविम्बं गुड
गव्यासमन्वितम्॥ २॥ संपूज्य भास्करं भक्त्या तस्येमंडलं शुभम्॥ रक्तचंदनजं कुर्यात्कुंकुमं वा विशोभनं॥ ३॥ मंडलं तत्र सं
स्थाप्य रक्तवस्त्रैः सुपूजितम्॥ ब्राह्मणाय प्रदातव्यं मंत्रेणानेन पांडव॥ ४॥ आदित्यतेजसोत्पन्नं राजतं विधिनिर्मित
म्॥ श्रेयसे मम विप्र त्वं प्रतिगृह्णेदमुत्तमम्॥ ५॥ इति दानमंत्रः॥ कामदं धनदं धर्म्यं पुत्रदं सुखदं तव॥ आदित्यप्रीतये
दत्तं प्रतिगृह्णामि मंडलम्॥ ६॥ इति प्रतिग्रहमंत्रः॥ एवं दत्वा नरो राजन् सूर्यवद्दिवि राजते॥ सर्वकामसमृद्धार्थो मं
डलाधिपतिर्भवेत्॥ ७॥ दातव्यो जयसप्तम्यां तदारभ्य दिने दिने॥ भास्करस्य महाराज श्राकृत्स्नाभावेन भावितः॥ ८
गोधूमचूर्णजनितं यवचूर्णजं वा आदित्यमंडलमखंडगुडाद्यपूर्णम्॥ कृत्वा द्विजाय विधिवत्प्रतिपादयेद्यो

॥ भविष् ॥
॥ ७२ ॥

मृसोमभवन्नामितमंडलमंडलोऽस्तो ॥ ८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आ-
दित्यमंडलविधिवर्णनं नाम चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥ युधिष्ठिर उवाच ॥ यानुपोष्य नरः कामान्संप्राप्नो-
ति मनसेप्सितान् ॥ तामेकां वद मे देव सप्तमीं धनसौख्यदाम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ भानोर्दिने सिते पक्षे अ-
नीते चोत्तरायणे ॥ उत्थामाहृयनक्षत्रेण हृीयात्सप्तमीव्रतम् ॥ २ ॥ सव्रीहिकान्यवतिलान्सहमाषमुद्गगो-
धूममांसमधुमैथुनकांस्यपात्रम् ॥ अभ्यंजनांजनशिलातलचूर्णितानि पिष्टांपरं परीहरेद्दहनिप्रसिद्धौ ॥ ३ ॥
देवान्मुनीन्पितृगणान्सजलांजलीभिः संतर्प्य पूज्य गगनांगणहत्तमुक्तान् ॥ कृत्वानले तिलयवान्वकृशोप-
ताकालमसौख्यपेद्दिनिशायतिनं सवित्रम् ॥ ४ ॥ यानि व्रतोदयनैरिह वर्जितानि ऽआणि तानि परिहृत्य
परिहितपक्षा ॥ संप्राप्य रुद्वचराकानिह वर्षमेकं प्राप्नोति भारत नरस्त्वमनसेप्सितं च ॥ ५ ॥ इति श्रीभवि-
ष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे त्रयोदशावर्ज्यसप्तमीव्रतं नाम पंचचत्वारिंशोध्यायः
४५ ॥ ॥ श्रीकृष्ण उवाच ॥ लोमशो नाम विप्रर्षिर्मथुरायां गतः पुरा ॥ सोर्चितो वसुदेवेन देवक्या च युधिष्ठि-
र ॥ १ ॥ उपविष्टः कथाः पुण्याः कथयित्वा मनोहराः ॥ ततः कथयितुं भयो कथामेतां प्रचक्रमे ॥ २ ॥ कंसे हते

२४

॥ रामः ॥
॥ ७२ ॥

मृताः पुत्राः पुत्रा जाता जाता पुनः पुनः ॥ मृतवत्सा देवकि त्वं पुत्रदुःखेन दुःखिता ॥ ३ ॥ यथा चंद्रमुखी दीप्तिर्वभूव
मृतपुत्रिका ॥ यस्याश्चीर्णाद्व्रतात्सैव वभूवामृतवत्सका ॥ ४ ॥ त्वमेव देवकि तथा भविष्यसि न संशयः ॥ ॥
देवक्युवाच ॥ का सा चंद्रमुखी ब्रह्मन्वभूव वरूपुत्रिका ॥ ५ ॥ किं विचीर्णं व्रतवरं वफुसंततिकारकम् ॥ सर्वासंद
र्पकरणं सौभाग्यारोग्यवर्द्धनम् ॥ ६ ॥ लोमश उवाच ॥ अयोध्यायां पुरा राजा नहुषो नाम विश्रुतः ॥ तस्य राज्ञो म
हादेवी नाम्ना चंद्रमुखी पुरा ॥ ७ ॥ पुरोहितस्य तस्यैव पत्न्यासीन्मानमानिका ॥ तयोरासीद्दृढप्रीतिः स्पृहणी
यापरस्परम् ॥ ८ ॥ अथापि ते पि मित्रिण्यौ स्नातार्थं सरयूजले ॥ प्राप्ते प्राप्तास्तत्रैव बह्व्यश्च नगरांगना ॥ ९ ॥
स्नात्वा तु मंडलं चक्रुः स्वपतेर्थं कृरूपिणः ॥ लेखयित्वा शिवं शांतमुमया सह शंकरम् ॥ १० ॥ गंधपुष्पाक्षतै
र्भक्त्या पूजयित्वा यथाविधि ॥ प्रणम्य गंतुकामास्ताः पप्रच्छास्ताभ्यां तरहिस्त्रियः ॥ ११ ॥ नार्यूचुः शंकरोऽस्माभिः पा
र्वत्या सह पूजितः ॥ स्वर्णसूत्रमयं तंतुं ग्रीवायात्मानिवेदितः ॥ १२ ॥ धारणमयमिदं तावद्यावत्प्राणान्वधार
णम् ॥ तासां तु वचनं श्रुत्वा मित्रिण्यौ तेऽपि भारतः ॥ १३ ॥ तस्यैव समयं तत्र वद्धा दोर्मूले तु डोरकैः ॥ ततस्ताः
स्वगृहं जग्मुः स्वसखीभिः समावृताः ॥ १४ ॥ कालेन महता यातं तस्या वै तद्व्रतं नृप ॥ वंडवत्साः प्रमत्ताया वि

१ अग्निमाला ४

स्मृतः सतु गोरकः ॥ १५ ॥ मृता केञ्चिदहोरात्रैः सा च भर्तृपूर्वंगामी ॥ सानीच कुक्कुरी जाता ताम्रायः संनिकृष्टं वरे·
१६ ॥ तथैव जाते मित्रिणौ पूर्वजातिस्मरे तथा ॥ संभ्रम्य भ्रमतस्समयं प्राग्भ्रतं च कन्तुः पुनः ॥ १७ ॥ तद्दिने तत्र संप्राप्ते
पुनः कालेन तेमृते ॥ तत्रैव माग्रके देशे जाते गोकुलसंपुते ॥ १८ ॥ राज्ञो जायावभूवाथ वृद्धीनाथस्य वापुनः ॥ ईश्व
री नाम विख्याता राज्ञी राजेंद्रवल्लभा ॥ १९ ॥ अग्निमीला द्विजस्यासीद्भार्या भद्रगणानामिका ॥ पुरोहितस्य कालेन कुक्कु
री च कुत्र विश्रुता ॥ २० ॥ जातिस्मरापपन्नहत्ता अबद्धज्ञामतपूजा ॥ पुनर्निरंतरा प्रीतिर्वभूवाथ तयोर्नृप ॥ २१ ॥ तत्रे
श्वरी पुत्रमेकं प्रसूता चैव रोगिणम् ॥ नववर्षं तु पंचत्वमगात्स्तव युधिष्ठिर ॥ २२ ॥ ततस्तां भद्रगणां दुःखमथैवापुत्र
दुःखिता ॥ सखीभावात् तिस्नेहात्सर्वपुत्रसमन्विता ॥ २३ ॥ अमृकाभरणा नित्यं स्वभावेनैव भाषिता ॥ तां दृष्ट्वा पुत्रि
णीं भद्रां पुत्रजन्मालेश्वरी रुषा ॥ २४ ॥ ततो गृहं प्रेष्य वत्तां सखीं वैतीव्रमत्सरा· ॥ चिंतया सा ससारा श्रांतस्या पुत्रवधं
प्रति ॥ २५ ॥ हत्वा हत्वाश्वतत्पुत्रा पुनर्जीवितास्तानामया ॥ कदाचिद्गृहपसखीं भद्रगणां पुरतः स्थिताम् ॥ २६ ॥ ईश्वरी प्राह
किमिदं सखि पुत्राणां त्वयाकृतम् ॥ येनते निहताः पुत्राः पुनर्जीवन्ति नो मयम् ॥ २७ ॥ वक्तुं प्रजानीव वत्सा अमृताभर
णाकथम् ॥ सोभसे मृषिकं मडेवि पुत्सौ पामिनी वहि ॥ २८ ॥ भद्रगणोवाच ॥ भडेभाड पदेसालि सपुत्रमांस तिलाद्या

73

ये ॥ स्नात्वा शिवं मंडलकै रचयित्वा सहांबिकम् ॥२९॥ भक्त्या संपूज्य समयं कुर्याद्दत्वा करे गुरोम् ॥ यावज्जीवं मया नावच्छिवस्यात्मा निवेदितः ॥३०॥ इत्येवं समयं कृत्वा ततः प्रभृति डोरकम् ॥ स्वर्णरौप्यमयं वापि करशाखासु धारयेत ॥३१॥ मंडकं वेष्टिकां दद्यात्कुष्मकपक्वं द्विजेन वा ॥ स्वयं च नान भोक्तव्या व्रतभंगभयात्सखि ॥३२॥ परितो मुद्रिका रौप्या सौवर्णा च युधिष्ठिर ॥ ताम्रपात्रोपरि स्थाप्य ब्राह्मणाय निवेदयेत ॥३३॥ सोहालकानि कांसारं दद्याद्भुंजीत च स्वयम् ॥ मंडलेषु च वित्तं च शिवं शक्तिसमन्वितम् ॥३४॥ संपूज्य सखि दुष्प्राप्यं त्रैलोक्येऽपि न विद्यते ॥ तदेवं समयं पूर्वं त्वया सह मया कृतं ॥३५॥ समया पालितो भक्त्या न त्वोऽहं सुस्थिता सखि ॥ त्वया स भग्नः समयो दर्पात्सक्तः शारीरयोः ॥३६॥ तेन संततिविच्छिन्ना जीवसि तिदुःखिता ॥ एष प्रभावः कथितो व्रतस्यास्य मया तव ॥३७॥ भर्तृनवव्रतस्यास्मि तस्य धर्मस्य नु व्रते ॥ सखि भावात्स्वती च त्वं नात्र कार्या विचारणा ॥३८॥ इत्युक्त्वा शनितिजग्राह व्रतदानफलं ततः ॥ बभूव च प्रजाः साध्वी मोक्षं प्राप्य सुरेश्वरी ॥३९॥ व्रतस्यास्य प्रभावेण सपुत्रा त्वं च देवकि ॥ भविष्यसि त्रिलोकेशं पुत्रं च जनयिष्यसि ॥४०॥ इत्येवं कथयित्वास्मा लोमशो मुनिपुंगवः ॥ जगाम नभसा पार्थ मयाऽप्येतत्तथोदितम् ॥४१॥ ये चरिष्यंति मनुजा व्रतमेतद्युधिष्ठिर ॥ कृकवाकुप्रसंगात्तें देवक्याचरितं मम ॥४२॥ तेषां संततिविच्छेदो न कदाचि

॥ भव ॥
॥ ७४ ॥

प्रविष्यति । स्त्रियश्चयाश्चरिष्यंति व्रतमेतन्नुतव्रदम ॥ ४३ ॥ मर्त्यलोके कृतं वै स्थित्वा यास्यंति शिवमंदिरम् ॥ ४४
यः कर्कटीव्रतवरं पूवगीसमेतं चक्रे वराचरगुरुं हृदये निधाय ॥ न ह्याकरोति कलुषो व विधानरत्नां सा स्त्री पृवा भ
वति शोभनगीनवत्ता ॥ ४५ ॥ इति श्री भविष्ये महापुराणोत्तरे पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कुक्कुट मर्कटीव्रत
वर्णनं नाम षट्चत्वारिंशोध्यायः ॥ ४६ ॥ ॥ श्रीकृष्ण उवाच ॥ अतदुर्ध्वं प्रवक्ष्यामि सप्तमीकल्पमुत्तमम ॥ माघमा
सात्समारभ्य शुक्लपक्षे युधिष्ठिरः ॥ १ ॥ सप्तम्यां कुरुसंकल्पमहोरात्रे व्रतेनृप ॥ वरुणोभ्यर्चयित्वानुव्रलकुर्वंत्तुकार
येन ॥ २ ॥ अष्टम्यां भोजयेद्विप्रां त्रितपिष्टं गुडौदनम ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ३ ॥ सप्तम्यां फाल्गु
नेमासि सूर्यमित्यभिपूजयेत ॥ वाजपेयस्य यज्ञस्य यथोक्तं लभते फलं ॥ ४ ॥ सप्तम्यां चैत्रमासे तु वेदांशुरविपूजये
त ॥ उक्थाध्वरसमं पुण्यं नरः प्राप्नोति भक्तिमान ॥ ५ ॥ वैशाखस्य तु सप्तम्यां धातारमभिपूजयेत ॥ पशुबंधाध्वरे पु
ण्यं सम्यक्प्राप्नोति मानवः ॥ ६ सप्तम्यां ज्येष्ठमासस्य इंद्रमित्यभिपूजयेत ॥ वाजपेयस्य यज्ञस्य फलं प्राप्नोति दुर्ल
भम ॥ ७ ॥ आषाढमासे सप्तम्यां पूजयित्वा दिवाकरम ॥ बहुवर्णस्य यज्ञस्य फलं प्राप्नोति पुष्कलम ॥ ८ ॥ सप्तम्यां
श्रावणे मासि मातापिंनाम पूजयेत ॥ सौत्रामणिफलं सम्यक्प्राप्नोति पुरुषर्षभम ॥ ९ ॥ रविं प्रौष्ठपदे मासे

॥ राम: ॥
॥ ७४ ॥

74

सप्तम्यामर्च्चयेत्कविः ॥ तुलापुरुषदानस्य फलं प्राप्नोति मानवः ॥ १० ॥ आश्वयुक्कृष्णसप्तम्यां सवितारं प्रपूजयेत् ॥
गोसहस्रप्रदानस्य फलं प्राप्नोति मानवः ॥ ११ ॥ कार्त्तिके कृष्णसप्तम्यां दिनेशं सप्तवाहनम् ॥ योऽभ्यर्च्चयति पुष्पात्मा पौ-
ण्डरीकं स विन्दति ॥ १२ ॥ मार्गे मार्गसिते पक्षे पूजयित्वा विधानतः ॥ राजसूयस्य यज्ञस्य फलं दशगुणं लभेत ॥ १३ ॥
भास्करं पुष्यमासे तु पूजयित्वा यथाविधि ॥ नरमेधस्य यज्ञस्य फलं प्राप्नोति पुष्कलम् ॥ १४ ॥ न देवकृष्णसप्तम्यां नाम सं-
पूजयेद्बुधः ॥ सोपवासः प्रयत्नेन वर्द्धमेकं युधिष्ठिर ॥ १५ ॥ पश्चात्तस्मात्प्रनियमे सूर्ययागं समाचरेत् ॥ शुचिर्भूमौ
समे देशे लेपयेद्रक्तचन्दनैः ॥ १६ ॥ स्वहस्तं द्विहस्तं वा चतुर्हस्तमथापि वा ॥ सिन्दूरगौरिकाभ्यां वा सूर्यमण्डलमालिखेत् ॥
रक्तपुष्पैः सपद्मैश्च धूपैः कुन्दुरुकादिभिः ॥ संपूज्य दद्यान्नैवेद्यं विचित्रं घृतपाचितम् ॥ १७ ॥ पुरतः स्थापयेत्कुंभान्साहि-
रण्यान्नसंयुतान् ॥ अग्निकार्यं ततः कुर्यात्समभ्युक्ष्य हुताशनम् ॥ १८ ॥ आकृष्णेनेति मन्त्रेण समिद्भिश्चार्कसंभवैः ॥
तिलैराज्यगुडोपेतैर्दद्यादष्टशताहुतीः ॥ २० ॥ ततस्तु दक्षिणां दद्याद्ब्राह्मणानां युधिष्ठिर ॥ भोजयित्वा रक्तवस्त्रैः शु-
क्लान्यपि पिधापयेत् ॥ २१ ॥ तादृशाश्च प्रकुर्व्वीत तिगावो वस्त्रान्विताः शुभाः ॥ छत्रोपानहयुग्मं च एकैकाय प्रदापये-
त् ॥ २२ ॥ एवं विसर्ज्जनान्ते विप्रान्स्वयं भुञ्जीत वाग्यतः ॥ य एवं कुरुते पार्थ सप्तमीव्रतमुत्तमम् २३ ॥ नीरुजो रूपवा-

॥ भष ॥
॥ ७५ ॥

गमीदीर्घायुश्चैवजायते॥ सप्तम्यांसोपवासास्तु भानोः पश्यंति ये मुखम्॥ २४॥ सर्वपापविनिर्मुक्ताः सूर्यलोक
मवाप्नुयुः॥ व्रतमेतन्महाराज सर्वाशुभविनाशनम् २५॥ सर्वदुःखप्रशमनं शरीरारोग्यकारकम्॥ सर्वलोकप्रदं वा
नेषां हेवं नारदेमुनिः॥ २६॥ ये सप्तमीमुपवसंति निमित्तां वनामाश्चैरहिमदीधितिमर्चयंति॥ ते सर्वरोगरहिताः
सुखिनः सदैव मर्त्या रवेरनुचराः सुचिरं भवंति॥ २७॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधि
ष्ठिरसंवादे उभयसप्तमीव्रतवर्णनंनाम सप्तचत्वारिंशोऽध्यायः॥ ४७॥ ॥ युधिष्ठिर उवाच॥ भगवन्दुर्गसंसारसाग
रोत्तारकारकम्॥ किंचिद्व्रतं समाचक्ष्व स्वर्गारोग्यसुखप्रदम्॥ १॥ श्रीकृष्ण उवाच॥ यदा तु शुक्लसप्तम्यामादित्यस्य
दिनं भवेत्॥ तदा सा तु महापुण्या विजया तु निगद्यते॥ २॥ प्रातर्गव्येन पयसा स्नानमस्यां समाचरेत्॥ शुक्लांबरधरः
पद्ममक्षतैः परिकल्पयेत्॥ ३॥ प्राङ्मुखोष्टदलं मध्ये न छिचित्रां सकर्णिकाम्॥ सर्वेष्वपि दलेष्वेवं विन्यसेत्सर्वतः
क्रमात्॥ ४॥ पूर्वेण तपनायेति मार्तंडायेति वै नमः॥ याम्ये दिवाकरायेति विधात्रे नैर्ऋते तव॥ ५॥ पश्चिमे व
रुणायेति भास्करायेति वानिले॥ सौम्ये च वरुणायेति रवये ऽन्ये ऽष्टमे दले॥ ६॥ आदावंते च तन्मध्ये नमोऽस्तु प
रमात्मने॥ मंत्रैरेवं समभ्यर्च्य नमस्कारांतदीपितैः ७॥ शुक्लवस्त्रफलैर्भक्ष्यैर्धूपमाल्यानुलेपनैः॥ स्थंडिलेप

75

॥ रमः ॥
॥ ७५ ॥

नयेद्धृत्वा गृहे तेन लवणेन च ॥ ८ ॥ ततो आहृतिहोमेन विभज्य द्विजपुंगवान् । शक्तितस्तर्पयेद्भक्त्या गुडक्षीरघृ-
तादिभिः ॥ ९ ॥ तिलपात्रं हिरण्यं च गुरवे च निवेदयेत् । एवं नियमकृत्स्नात्वा प्रातरुत्थाय मानवः ॥ १० ॥ कृतस्ना-
नजपो विप्रैः सहैव घृतपायसम् । भुक्त्वा च वेदविद्भिर्वैडालव्रतवर्जितैः ॥ ११ ॥ एवं संवत्सरस्यान्ते कृत्वैतद्दवि-
हं नृप । उद्यापयेद्यथाशक्त्या भास्करं संस्मरं हृदि ॥ १२ ॥ घृतपात्रं सकरकं सोदकुंभं निवेदयेत् । वस्त्रालंकारसंयुक्तां
सुवर्णास्यां पयस्विनीम् ॥ १३ ॥ एकामपि प्रदद्यात्तां वित्तहीनो विमत्सरः । वित्तशाठ्यं न कुर्वीत ततो मोहात्पतत्यधः ॥
१४ ॥ अनेन विधिना यस्तु कुर्यात्कल्याणसप्तमीम् ॥ शृणुयाद्वा पठेद्वापि सोऽपि पापैः प्रमुच्यते ॥ १५ ॥ यश्चाप्यत्र कम-
लोदरकर्णिकायां संपूजयेत्कुसुमधूपविलेपनाद्यैः ॥ षष्ठ्याः परेहनि नगानिः रविदिने शं कल्याणभाजनमसौ भवतीह
जंतुः ॥ १६ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्याणसप्तमीव्रतवर्णनं ना-
माष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥ ॥ श्रीकृष्ण उवाच ॥ शर्करासप्तमीं वक्ष्ये सर्वकल्मषनाशिनीम् ॥ आयुरारोग्य-
मैश्वर्यं ययानंतं प्रजायते ॥ १ ॥ माधवस्य सिते पक्षे सप्तम्यां श्रद्धयान्वितः । प्रातः स्नात्वा तिलैः शुक्लैः शुक्लमाल्या-
नुलेपनैः ॥ २ ॥ स्थंडिले पद्ममालिख्य कुंकुमेन सकर्णिकम् । तस्मिन्नमः सवित्रेति गंधधूपौ निवेदयेत् ॥ ३ ॥

उच्यते २

स्थापयेदुदकुंभं च शर्करापात्रसंयुतम् ॥ रक्तवस्त्रैः स्वलंकृत्य गंधमाल्यानुलेपनैः ॥ ४ ॥ सुवर्णाश्वसमायुक्तं मंत्रेणा-
नेन पूजयेत् ॥ विश्वेदेवमयो यस्माद्वेदवादीति पठ्यते ॥ ५ ॥ त्वमेवामृतसर्वस्वमतः पाहि सनातन ॥ सौरसूक्तं जपंस्ति-
ष्ठेत्पुराणश्रवणेन वा ॥ ६ ॥ अहोरात्रे गते पश्चादष्टम्यां कृतनैत्यकः ॥ सर्वं च वेदविदुषे ब्राह्मणायोपपादयेत् ॥ ७ ॥
भोजयेच्छक्तितो विप्राञ्छर्कराघृतपायसैः ॥ भुंजीयातैललवणं स्वयमप्यथ वाग्यतः ॥ ८ ॥ अनेन विधिना
सर्वं मासि मासि समाचरेत् ॥ वत्सरांते पुनर्दद्याद्ब्राह्मणाय समाहितः ॥ ९ ॥ शयनं वस्त्रसंवीतं शर्कराकलशा-
न्वितम् ॥ सर्वोपस्करसंयुक्तं तथैकां गां पयस्विनीम् ॥ १० ॥ गृहं च शक्तितो दद्यात्समस्तोपस्करान्वितम् ॥ सहस्रेणा-
पि निष्काणां कृत्वा दद्याच्छतेन वा ॥ ११ ॥ दशभिर्वा त्रिभिर्निष्कैस्तदर्धेनापि भक्तितः ॥ सुवर्णाश्वः प्रदातव्यः पूर्वव-
न्मंत्रवाचनम् ॥ १२ ॥ वित्तशाठ्यं न कुर्वीत कुर्वन्दोषान्समश्नुते ॥ अमृतं पिबतो वक्त्रात्सूर्यस्यामृतबिन्दतः ॥ १३
निष्पेतुरेतदुत्पाय शालिमुद्गेक्षवः स्मृताः ॥ शर्करा च परं तस्मादिक्षुरसो ह्वामता ॥ १४ ॥ इष्टा रवेरतः पुण्या
शर्करा हव्यकव्ययोः ॥ शर्करासप्तमी चैषा वाजिमेधफलप्रदा ॥ १५ ॥ सर्वेष्युपशमं यांति पुनः संततिवर्द्धिनी·
यः कुर्यात्परया भक्त्या स परं ब्रह्म गच्छति ॥ १६ ॥ कल्पमेकं वसेत्स्वर्गे ततो याति परं पदम् ॥ १७ ॥ इदमनघ शृणोति

पः स्मरेद्वा परिपठतीह नरेश्वरस्य लोके ॥ मतिमपि च ददाति योजनानाममरवधूजनकिन्नरैः स पूज्यः ॥१८॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शर्करासप्तमीव्रतवर्णनं नामैकोनपं
चाशत्तमोऽध्यायः ॥४९॥ ॥ श्रीकृष्ण उवाच ॥ अतः परं प्रवक्ष्यामि तद्वत्कमलसप्तमी ॥ यस्याः संकीर्तनादे
व तुष्यतीह दिवाकरः ॥१॥ वसंतेऽमलसप्तम्यां स्नातः सन्गौरसर्षपैः ॥ तिलपात्रे च सौवर्णं निधाय कमलं शु
भम् ॥२॥ वस्त्रयुग्मावृतं कृत्वा गंधपुष्पैरथार्चयेत् ॥ नमस्ते पद्महस्ताय नमस्ते विश्वधारिणे ॥३॥ दिवाकर नम
स्तुभ्यं प्रभाकर नमोऽस्तु ते ॥ ततो द्विकालवेलायामुदकंभसमन्वितम् ॥४॥ विप्राय दद्यात्संपूज्य वस्त्रमाल्यवि
भूषणैः ॥ अहोरात्रे गते पश्चादष्टम्यां भोजयेद्द्विजान् ॥५॥ यथाशक्त्याथ भुंजीत विमांसं तैलवर्जितम् ॥ अनेन वि
धिना शुक्लसप्तम्यां मासि मासि च ॥६॥ सर्वसमाचरेन्नक्ता वित्तशाठ्यविवर्जितः ॥ व्रतान्ते शयनं दद्यात्सुवर्णकमलान्वि
तम् ॥७॥ गांवं सदयात्कृत्वानुसुवर्णां वा पयस्विनीम् ॥ भाजनासनदीपादीन्दद्यादिष्टानुपस्करान् ॥८॥ अने
न विधिना यस्तु कुर्यात्कमलसप्तमीम् ॥ लक्ष्मीमनन्तामभ्येत्य स सर्वलोके च मोदते ॥९॥ कल्पे कल्पे तथा लोका
न्सप्तगत्वा पृथक्पृथक् ॥ अप्सरोभिः परिवृतस्ततो याति परां गतिम् ॥१०॥ यः पश्यंतिदं भक्त्या यान्कुर्वंतं पठे

आर्षम ३

।। भ·पु ।।
।। ७१ ।।

ये मन्या भक्तिमन्तिं ददाति ।। सोऽप्सरोलक्ष्मीमचलामवाप्य गंधर्वविद्याधरलोकमेति ।। ११ ।। इति श्रीभविष्ये महापुरा
णे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कमलासप्तमीव्रतवर्णनं नाम पंचाशत्तमोऽध्यायः ।। ५० ।। ।। श्रीकृष्ण
उवाच ।। अन्यामपि प्रवक्ष्यामि शोभनां शुभसप्तमीम् ।। यामुपोष्य नरो रोगाच्छोकदुःखात्प्रमुच्यते ।। १ ।। पुण्ये आ
श्वयुजे मासि कृतस्नानः प्रयतः शुचिः ।। वाचयेत ततो विप्रानारभेच्छुभसप्तमीम् ।। २ ।। कपिलां पूजयेद्भक्त्या गं
धमाल्यानुलेपनैः ।। नमामि सूर्यसंभूतामशेषभुवनालयाम् ।। ३ ।। त्वामहं शुभकल्याणशरीरां सर्वसिद्धये
अथाहृत्य तिलप्रस्थं ताम्रपात्रेण संयुतम् ।। ४ ।। कांचनं वृषभं तद्वद्वस्त्रमाल्यगुडान्वितम् ।। दद्याद्विकालवेला
यामर्यमा प्रीयतामिति ।। ५ ।। पंचगव्यं च संप्राश्य स्वपेद्भूमौ विमत्सरः ।। ततः प्रभाते संजाते भक्त्या संतर्पयेद्द्विजान्
६ ।। अनेन विधिना दद्यान्मासि मासि सदा नरः ।। यासमी वृषभं हैमं तद्वत्तोत्सृजनम् ।। ७ ।। संवत्सरांते शयनमि
ष्टं दद्याद्गुडान्वितम् ।। सोपधानकविश्रामभाजनासनसंयुतम् ।। ८ ।। ताम्रपात्रं तिलप्रस्थं सौवर्णं वृषसंयु
तम् ।। दद्याद्वेदविदे सर्वं विश्वात्मा प्रीयतामिति ।। ९ ।। अनेन विधिना राजन्कुर्याद्यः शुभसप्तमी ।। ८ ।। ताम्र
पात्रं तिलप्रस्थं सौवर्णं वृषसंयुतम् ।। दद्याद्वेदविदे सर्वं विश्वात्मा प्रीयतामिति ।। ९ ।। अनेन विधिना राजन्कु

४२

।। राम: ।।
।। ७१ ।।

यायः शुभसप्तमीम् || तस्य श्रीर्विमला कीर्तिर्भवेज्जन्मनि जन्मनि || १० || अप्सरोगणगंधर्वैः पूज्यमानः सुरालये
वसेत्कलाक्षियो भूत्वाया यावदाभूतसंप्लवम् || ११ || सकलादवतीर्णस्तु सप्तद्वीपाधिपो भवेत् || ब्रह्महत्यासहस्रस्य
भ्रूणहत्याशतस्य च || १२ || नाशं करोति नियतमेषं कृता वै शुभसप्तमी || १३ || इमां पठेः शृणुयान्मनुष्यः पश्येत संगाद
पिदीयमानाम् || सोऽप्यत्र सर्वाघविमुक्तदेहः प्राप्नोति विद्याधरनायकत्वम् || १४ || इति श्रीभविष्ये महापुराणे
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शुभसप्तमीव्रतनिरूपणं नाम सैकपंचाशत्तमोऽध्यायः || ५१ || युधिष्ठिर उवा
च || किमुद्वेगाद्भवेत्कृष्ण मलक्ष्मीकेन दृश्यते || सुतवत्सादिकार्येषु दुःस्वप्ने च किमिष्यते || १ || श्रीकृष्ण उवाच || पुरा
कृतानि पापानि फलन्त्यत्र युधिष्ठिर || रोगदौर्गत्यरूपेण तथैवेष्टविघातनैः || २ || तद्विघाताय वक्ष्यामि सप्तकल्या
णसप्तमी || सप्तमी स्नपनं नाम व्याधिपीडाविनाशनम् || ३ || बालानां मरणं यत्र क्षीरपानं प्रशास्यते || तद्वद्वृद्धातुरा
णां च यौवने वापि वर्त्तताम् || ४ || शान्तये तत्र वक्ष्यामि मृतवत्सादिके च यत् || एतदेवाद्भुताद्वेगचित्ताविभ्रममानसम् |
५ || वराहकल्पे संप्राप्ते मनो वैवस्वतेऽन्तरे || कृते युगे महाराज हैहयो लोकवर्द्धनः || ६ || आसीन्नृपोत्तमः पूर्वं कृतवीर्यः प्र
तापवान् || सप्तद्वीपमखिलं पालयामास भूतलम् || ७ || यावद्वर्षसहस्राणि सप्तसप्ततिभारतः | जातमात्रं च तत्

॥म.पु॥
॥७८॥

स्याथषड्गंतत्रग्रामंकिल॥८॥यवनस्यतुशापेनविनाशमगमत्पुरा॥कृतवीर्यःसमाराध्यसहस्रांशुंदिवाक
रम्॥९॥उपवासव्रतैर्दिव्यैर्वेदसूक्तैश्चभारत॥दर्शयामासचात्मानंकृतवीर्यस्यभानुमान्॥१०॥कृतवीर्येणवै
पृष्टःप्रोवाचेदंवृहस्पतिः॥अतिक्रोधेनमहतापुत्रस्तवनराधिप॥११॥भविष्यतिचिरंजीवीकिंतुकल्मषनाश
नम्॥सप्तमीस्नपनंचाप्यांकुरुपापविनष्टये॥१२॥यातस्यमृतवत्सायाःसप्तमेमासिभूपते॥गरहृक्षारावलेल
ध्याकृत्वाब्राह्मणवाचनम्॥१३॥बालस्यजन्मनक्षत्रंवर्जयेत्तांतिथिंबुधः॥नदृष्टानुग्रहाणांतुकृतंस्यादितिने
पुच॥१४॥गोमयेनोपलिप्तायांभूमावेकाग्रचित्तवान्॥तंडुलैरक्षशालेयैर्वरुणाक्षीरसंयुतम्॥१५॥निर्वपे
त्सूर्यरुद्राभ्यांमातृभ्योपिविधानतः॥कीर्तयेत्सूर्यदैवत्यंसप्तार्चिविपिघृताहुती॥१६॥जुहुयाद्रुद्रसूक्तेननवद्रुग
यभारत॥होतव्याःसमिधश्चात्रतत्रवार्कपलाशजाः॥१७॥यवकृष्णतिलैर्होमःकर्तव्योष्टशतंपुनः॥हुत्वास्ना
नंचकर्तव्यंसर्वौषधिगंगेनधीमता॥१८॥विप्रेणवेदविदुषाविधिवद्धर्मपालिना॥स्थापयित्वाचतुःकोणेचतुः
कुंभास्तुशोभनान्॥१९॥पंचमंचपुनर्मध्येचाक्षतंचविभूषितम्॥स्थापयेद्दर्पणाक्रांतंसप्तर्षिणामिमंचितः

॥रामः॥
॥७८॥

२४

दमिताम्१

कर्पूरसंयुतमित्यर्थः १ पंचभंगाः पंचपल्लवाः दूर्वार्थ १

२०॥ सौरेणातीर्थतोयेन पूर्णांश्चंद्रमलान्वितान्॥ मर्दास्नानौषधियुतान्सं च भंगजलान्वितान्॥२१॥ पंचरत्नफ
लैर्युक्ता च्छायाभिरपिवेष्टितान्॥ गजाश्वरथ्याराज्ञद्वार्वल्मीकाह्रुदगोकुलात्॥२२॥ मृभुद्धिमदस्मानीय सर्वेष्वेव
विनिक्षिपेत्॥ चतुर्ष्वपि च कुंभेषु रत्नगर्भेषु मध्यमम्॥२३॥ गृहीत्वा ब्राह्मणं चात्र सौरान्मंत्रानुदीरयेत्॥ नारीभिः
सप्तसंख्याभीरव्यंगांगाभिरत्र च॥२४॥ भोजिताभिर्यथाशक्त्यामाल्यवस्त्रविभूषणैः॥ सविप्राभिश्च कर्तव्यम
नवस्नाभिषेचनम्॥२५॥ दीर्घायुरस्तु बालोऽयं जीवपुत्रा च भाविनी॥ आदित्यचंद्रमासाद्यं ग्रहनक्षत्रमंडलम्॥
२६॥ शक्रः सलोकपालो वै ब्रह्माविष्णुमहेश्वराः॥ एते चान्ये च वै देवाः सदा पांतु कुमारकम्॥२७॥ मासानिमांसरूत
भुजाचवास्वग्रहाः क्वचित्॥ पीडां कुर्वंतु बालस्य मामातृजनकस्य वै॥२८॥ ततः शुक्लाम्बरधरो कुमारं पतिसंयुता॥
सप्तकं पूजयेत्तत्ता पुष्पैर्गंधैः फलैः शुभैः॥ २९॥ कांचनीं च ततः कृत्वा तिलपात्रोपरिस्थितम्॥ प्रतिमां धर्मराजस्य गुर
वे विनिवेदयेत्॥३० ॥ वस्त्रकांचनरत्नौघैर्भक्ष्यैः सघृतपायसैः॥ पूजयेद्ब्राह्मणांस्तत्र दद्दिनत्राव्य विवर्जयेत ३१
भक्ष्याचारुपणापेयसप्त्यार्यमंत्रसंततिः॥ दीर्घायुरस्तु बालोऽयं पापावहर्षशतं सुखी॥३२॥ यत्किंचिद्दुरितं तन
स्मिन्नं वा भवामके॥ ब्रह्माहत्वेदयिन्नंः त्वं देवासुरराक्षोऽसिता स्मानः॥३३॥ रक्षंतु सर्वे दुष्टेभ्यो वरदा यांतु सर्वदा॥ इदमादी

॥ भविष्य ॥
॥ ७९ ॥

निवास्यानि वदतः पूजयेद्गुरुन् ॥ ३४ ॥ शक्तितः कपिलां दत्वा प्रणिपत्या विसर्जयेत ॥ वस्त्रं च युग्मसहिता प्रणाम्य रविविप्रां करौ·
३५ ॥ ऊनशोषंतरानीयायादित्याय नमोऽस्तु ते ॥ इदमेवाद्भुतं योगमद्भुते भुवनास्पते ॥ ३६ ॥ फल्गुर्जन्मनिहृश्याणां देवा-
न्संपूजयेन्नरा ॥ शांन्त्यर्थं भुक्तमन्नं प्रांसेत नकुर्वल्लसादिति ॥ ३७ ॥ पुण्यं पवित्रमायुष्यं सप्तमीस्नपनं रवि ॥ कथयित्वा
नरश्रेष्ठ तत्रैवांतरधीयत ॥ ३८ ॥ सप्तानेन विधानेन कार्त्तवीर्योऽर्जुनो नृप ॥ संवत्सराणामयुतं शशास पृथिवीमिमा-
म् ॥ आरोग्यं भास्करादिच्छेद्धनमिच्छेद्धुताशनात् ॥ ३९ ॥ शंकराज्ज्ञानमिच्छेत्तु गतिमिच्छेज्जनार्दनात् ॥ ४० ॥ एतन्महा-
पातकनाशनं स्यादप्यक्षयं वेदविदः पठंति ॥ शृणोति यश्चैनमनन्यचेतास्तस्यापि सिद्धिं मुनयो वदंति ॥ ४१ ॥ ॥ इति
श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे स्नपनसप्तमीव्रतवर्णनं नाम द्विपंचाशत्तमोऽध्यायः ॥ ५२
॥ ॥ युधिष्ठिर उवाच ॥ अध्रुवेण शरीरेण ध्रुवकेनापि किं फलम् ॥ माघस्नानविहीनेन नयस्तत्कं यदुनंदन ॥ १ ॥ प्रातःस्ना-
नासमर्थानां शरीरं पक्वदेहिनाम् ॥ किं तेन वद कर्त्तव्यं माघे संसारभीरुणा ॥ २ ॥ कायक्लेशसहा नार्यो न भवंति यदू-
त्तम ॥ सौकुमार्यं शरीरस्य अबलत्वान्न चैव च ॥ ३ ॥ कथं च ताः सुरूपाः स्युः सुभगाः सुप्रजास्तथा ॥ सुकृतस्येह पुण्यस्य
वं मे तत्फलं यतः ॥ ४ ॥ अल्पायासेन सुमहद्येन पुण्यमवाप्यते ॥ स्त्रीभिर्माघे मम ब्रूहि स्नानं तन्मर माधवः ॥ ५ ॥

॥ रामः ॥
॥ ७९ ॥

79

श्रीकृष्णउवाच ॥ श्रूयतांपाण्डवश्रेष्ठ रहस्यमृषिभाषितम् ॥ यन्नयाकस्यचिल्लोकेमवलासप्रसीवृतम् ॥ ६ ॥ वेश्यावैंदु
मतीनामरूपौदार्यगुणान्विता ॥ आसीत्कुरुकुलश्रेष्ठ मगधस्यविलासिनी ॥ ७ ॥ तनुमध्यासुजघनीपीनोन्नतपयोध
रा सम्यग्विभक्तावयवापूर्णचंद्रनिभानना ॥ ८ ॥ सौदर्यंसौकुमार्यंचतस्याःकामेनगीयते ॥ यस्याःसंदर्शनादेवकामः
कामातुरोभवेत् ॥ ९ ॥ मूर्त्तिःशशाधरस्येवनयनानंदकारिणी ॥ वशीकरणविद्येवसर्वलोकमनोहरा ॥ १० ॥ एकस्मिन्दि
वसेप्रातःसुप्तोत्थितयानया ॥ १० ॥ चिंतिताहृदयेराजन्संसारस्यानवस्थिति ॥ ११ ॥ सानिमग्नाजगदिदं विषयेकाय
सागरे ॥ जन्ममृत्युजराग्राहंनक्रभिर्दैवदुस्तरे ॥ १२ ॥ अपाकोमृतभाण्डानांधात्रशिल्पिविनिर्मितम् ॥ तत्कर्मधनसंवी
तंपश्यतेबालवंचिता ॥ १३ ॥ येषांतिदिवसाःपुंसांधर्मकामार्थवर्जिताः ॥ नतेपुनरिहायांतिहरभक्तानरायथा ॥ १४ ॥ स्ना
नदानतपोहोमःस्वाध्यायःपितृतर्पणम् ॥ यस्मिन्दिनेनक्रियतेवृथासादिवसोनृणाम् ॥ १५ ॥ पुत्राणांदारसंग्रहकसमा
सर्वंहिमानसम् ॥ वृकीवोरणमासाद्यमृत्युकालयगच्छति ॥ १६ ॥ इत्येवंचिंतयित्वातुवेश्यावैंदुमतीततः ॥ वशिष्ठस्या
श्रमंपुण्यंजगामगजगामिनी ॥ १७ ॥ वसिष्ठमृषिमासीनंप्रणम्याविनयान्वितः ॥ कृतांजलिपुटंकृत्वाइदंवचनमब्रवि
त् ॥ १८ ॥ ॥ इन्दुमतुवाच ॥ दशसूनासमभ्यर्क्कीदशचक्रिसमोध्वजः ॥ दशध्वजसमावेश्यादशवेश्यासमोनृपः ॥ १९ ॥

स्थितःस्नापितस्तत्वर्थः अहोस्नानप्रभावेण ६

॥ म॰प्र ॥ मयानदत्तंनकृतंनोपवासव्रतंकृतम् ॥ भक्ष्यान्नपूजितःशंभुः ॥ क्षितोनैकोधनीनरः ॥ २० ॥ सांप्रतंवर्त्तमानानायाव्रतं
॥ ८० ॥ किंचिद्ददस्वमे ॥ येनदुःखांतुपापौघाद्दुस्तराम्भिभवार्णवात् ॥ स्नानदस्याःश्रुतकृपाःश्रुत्वाधर्मपरंनृपः ॥ वसिष्ठःकथ
यामासमहाकारुणिकोमुनिः ॥ २२ ॥ ॥ वसिष्ठउवाच ॥ माघस्यासितसप्तम्यांसर्वकामफलप्रदम् ॥ तपःसौभाग्यजनन
नंस्नानंतत्रवराननो ॥ २३ ॥ कृत्वाबध्यायेकुमाकंसप्तम्यांनिश्चलंजलम् ॥ राज्ञीत्वंचालयेथास्त्वंदत्त्वाशिरसिदीपकं
म् ॥ २४ ॥ माघस्यासितसप्तम्यांमयचलंचालितंमया ॥ जलामलानांसर्वेषांकृतंनवलनंतथा ॥ २५ ॥ वसिष्ठवचनंश्रु
त्वातन्क्षितिल्लेवाहनिनृप ॥ सर्वंचकारेंदुमतीस्नानंदानंयथाविधि ॥ २६ ॥ महःस्नानप्रभावेणभवत्वाभोग्यान्विथे
क्षितानरेंद्रलोकेप्सरःसंघेनायकत्वमवापसा ॥ २७ ॥ अचलासप्तमीस्नानंकथितंचविशांपते ॥ सर्वपापप्रश
मनंपुत्रसौभाग्यवर्द्धनम् ॥ २८ ॥ ॥ युधिष्ठिरउवाच ॥ सप्तमीस्नानमाहात्म्यंश्रुतंनचविशेषतः ॥ सांप्रतंश्रोतु
मिच्छामिविधिमंत्रसमन्वितम् ॥ २९ ॥ श्रीकृष्णउवाच ॥ एकभक्तेनसंतिष्ठेत्षष्ठ्यांसंपूज्यभास्करम् ॥ सप्तम्यां ॥ रामः ॥
तुव्रजेत्प्रातःसुगंभीरंजलाशयम् ॥ ३० ॥ सरित्संगेतडागेवादेवखातेमथापिवा ॥ कृपोवगाहःसलिलंदुष्टस ॥ ८० ॥
त्वैरदूषितम् ॥ ३१ ॥ पभ्यभिःपाणिभिश्चैवजलंनैर्मल्यकच्छपैः ॥ नजलंचालयेत्तेयावत्तावत्स्नानंसमाचेत् ॥

80

३२॥ ममस्ते रुद्ररूपाय रसानां पतये नमः॥ वरुणाय नमस्तेऽस्तु हरिवासन नमोऽस्तु ते॥३३॥ यावज्जन्मकृतं पापं मयाज
न्मसु जन्मसु॥ तन्मे रोगं च शोकं च माकरी हन्तु सप्तमी॥३४॥ जननी सर्वभूतानां सप्तमी सप्तसप्तिके॥ सर्वव्याधिहरे देवि न
मस्ते रविमंडले॥३५॥ जलोपरि तरंदीपं स्नात्वा सन्तर्प्य देवताः॥ चंदनेन लिखेत्पद्ममष्टपत्रं सकर्णिकम्॥३६॥ मध्ये शि
वं सपत्नीकं प्रणवेन तु पूजयेत्॥ भानुं शक्रदले पूज्य रविं वैश्वानरे दले॥३७॥ याम्ये विवस्वान्नैर्ऋत्ये भास्करश्चेति पूज
येत्॥ पश्चिमे सविता पूज्यः पूज्योऽर्को वायुनाजले॥३८॥ सौम्ये सहस्रकिरणः शैवे सर्वात्मने तिच॥ पूज्याः प्रणवपूर्वास्तु
नमस्कारान्तयोजिताः॥३९॥ उष्णैः सुगंधधूपैश्च वस्त्रेणाच्छाद्य भास्करम्॥ विसर्जयेत्ततः पश्चात्स्वस्थानं गम्यतामि
ति॥४०॥ ताम्रपात्रेऽथ विस्तीर्णे समन्नये वा युधिष्ठिर॥ स्थापयेत्तिलचूर्णं च सघृतं सगुडं तथा॥४१॥ कांचनं तालकं कृ
त्वा घृतसिक्ततिलचूर्णकम्॥ संस्थाप्य रक्तवस्त्रेण गुण्ठ्य धूपैस्तथार्चयेत्॥४२॥ ततस्तं ब्राह्मणो दद्याद्दत्वा मंत्रेण ताल
कम्॥ आदित्यस्य प्रसादेन प्रातःस्नानफलं लभेत्॥४३॥ दुष्कर्मोत्पन्नदुःखेभ्यो मया दत्तं तु तालकम्॥ ततस्तं ताल
कं कृत्वा ब्राह्मणायोपपादयेत्॥४४॥ सपुत्रपशुभृत्याय मेऽर्कोऽयं प्रीयतामिति॥ नक्तोव्रतोपदेष्टारं पूजयेद्वस्त्रगो
तिलैः॥४५॥ विप्रानन्यान्यथाशक्त्या पूजयित्वा गृहे भुजेत्॥ एतत्ते कथितं कार्यं रूपसौभाग्यकारकम्॥४६॥ अचलास

प्तमीस्नानं सर्वकामफलप्रदम् ॥ ४७ ॥ इति पठति य इत्थं यः शृणोति प्रसंगात्कलिकलुषहरं वै सप्तमीस्नानमेत
त ॥ मतिमपि च ददानां यो ददाति प्रसंगात्स्वर्भवनगतो ऽसौ मोदते देवसंघैः ॥ ४८ ॥ इति श्रीभविष्ये महापुराणे उत्त
रपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वत्नासप्तमीव्रतविधिवर्णनं नाम त्रिपंचाशत्तमो ऽध्यायः ॥ ५३ ॥ ॥ श्रीकृ
ष्ण उवाच ॥ बुधाष्टमीव्रतं मत्तो वृद्धीमिच्छता पाण्डव ॥ येन चीर्णेन नरकं नरः पश्यति न कर्हिचित् ॥ १ ॥ पुरा कृतयुग
स्यादौ इलो राजा बभूव ह ॥ बहुभृत्यसुहृन्मित्रमंत्रिभिः परिवारितः ॥ २ ॥ जगाम हिमवत्पार्श्वे महादेवेन वारितः
यो ऽत्र नः प्रविशते ऽस्मौ सा स्त्री भवति निश्चितं ॥ ३ ॥ स राजा मृगसंगेन प्राविशत्तद्रुमावने ॥ एकाकी नरगोपेतः
क्षणात्स्त्रीत्वं जगाम ह ॥ ४ ॥ सा च भ्रामवने भ्रष्टा पीनोन्नतपयोधरा ॥ कुतो ऽहमागतेत्येवं न त्वबुध्यत किंचन ॥ ५
तां ददर्श बुधः सौम्यां रूपौदार्यगुणान्वितां ॥ स्वधिष्ण्यां बुधवारेणानत्वाकृष्टो बुधो ग्रहः ॥ ६ ॥ दधौ गर्भं तदुदरे इ
लाया रूपतोषितः ॥ पुत्रस्तस्यामजायत यो ऽसौ ख्यातः पुरूरवाः ॥ ७ ॥ चंडवंशकरो राजा आद्यः सर्वमहीक्षिता
म् ततः प्रभृति पूज्येयमष्टमी बुधसंयुता ॥ ८ ॥ सर्वपापप्रशमनी सर्वोपद्रवनाशिनी ॥ अष्टास्वदपि ते वक्षि
धर्मराजकथानकम् ॥ ९ ॥ आसीद्राजा विदेहानां मिथिलायां सवैरितिः ॥ संग्रामे निहतो वीरस्तस्य भार्या दरिद्रि

82

णी ॥ १० ॥ उर्मिला नाम वध्वासमं ही बालकसंयुता ॥ अवंती विषयं प्राप्ता ब्राह्मणस्य निवेशने ॥ ११ ॥ चकारोद-
रपूर्त्यर्थं नित्यं कंडनपेषणे ॥ हृत्वा सा स्तोकगोधूमान्ददौ बालकयोस्तदा ॥ १२ ॥ कारणात्पापान्मात्रात्मत्स्या क्षुधासंपी-
डमानयोः ॥ कालेन वक्रता साध्वी पंचत्वमगमच्छुभा ॥ १३ ॥ अत्र तस्या विदेहायां गत्वा स्वपितुरासने ॥ उपविष्टः सत्व-
योगाऽभ्रजेणामनाकुल ॥ १४ ॥ अन्विच्छाधर्मराज्ञो वै साकस्मामिथिवंशजा ॥ विवाहितां हितां भर्तुः सामहानापि-
काः भवत् ॥ १५ ॥ श्यामला नाम वार्वंगी ग्रिसिद्धाश्रयतेश्चतौ ॥ नामुवाववतारोहां धर्मराजः स्वयं प्रियाम् ॥ १६ ॥ वहस्व
सर्वस्यापारं श्यामले त्वं गृहे मम ॥ कुरुस्वजनमस्तानां तनभेपं यथेप्सितम् ॥ १७ ॥ किं त्वेते पंजराः सप्तकीलकै र-
तियंत्रिताः ॥ कदाचिद्दपि नोद्धाट्यास्त्वया वैदेहमंदिरे ॥ १८ ॥ एवमाज्ञप्ति सा प्रत्या निजं कर्म चकार ह ॥ कदाचि-
त्याकुलीभूते धर्मराजे विदेहजा ॥ १९ ॥ उद्घाट्य पित्वा प्रथमं ददर्श जननीं स्वकाम् ॥ सा पच्यमाना क्रंदंती भीषणैर्रौ-
र्यमकिंकरैः ॥ २० ॥ हेलयाभिप्यनेव धानप्नतैले पुनः पुनः ॥ तथैव तालकं दत्वा द्वीद्विनासा मनस्विनी ॥ २१ ॥
द्वितीये पंजरे तद्वन्मातामेव ददर्श ह ॥ सुधावक्षिप्यमानां तां शिलानस्पेषकेन तु ॥ २२ ॥ तृतीयपंजरे तद्वत्तां
ददर्श स्वमातरम् ॥ कंकचैः पाट्यते मूर्ध्नि घंटाछुतैः करोल्वणैः ॥ २३ ॥ चतुर्थपंजरे स्थाने भीषणौर्दारुणानलैः ॥

भक्ष्यमाणैः श्वापदैश्च कृंतती तां पुनः पुनः ॥ २४ ॥ पंचमे निर्हितां भ्रमो कंठे पादेन पीडिताम् ॥ संदंशौर्वदनं घातैश्चाविदी
र्णां क्रियते स्फुटा ॥ २५ ॥ षष्ठे चेक्षुयन्त्रगतां मातकेनुजसाहताम् ॥ संपीड्यमानां मनिसंभृहृदा खंडखंडवत् ॥ २६ ॥ सप्तमे पं
जरे चीर्णां स्वनां पूतिकृमिगंधिनीम् ॥ दग्धां तथाग्नितां तां नुमानरं दुःखकर्षिताम् ॥ २७ ॥ यथा म साम्ना नवदनो किंचिल्लोका वभा
षिनी ॥ अथागतं यमं प्राह सरोषा सूर्यमण्डलापतितम् ॥ २८ ॥ किं तयापहृतं राजन्मम मात्रा सुदारुणम् ॥ येनेयं विविधैर्घो
रैर्वध्यते वै ऽधुना त्वया ॥ २९ ॥ यमः प्राह प्रियां दृष्ट्वा मंडूकं प्रति नात्मयया ॥ एते पंच नरकाः सप्ततिषिद्धा त्वं मयापुरा ॥ ३०
तव मात्रा कृतस्नेहात् क्रोधमाये हताः किल ॥ किं तज्ज्ञातासि ते भडूये तव दृष्ट्वा मम मोपरि ॥ ३१ ॥ ब्रह्मस्वं पूर्णयात्कृतं दत्त्वा
सम्नमंकुलम् ॥ नरदेवचैर्यरूपेणादह त्वा वंडनारकम् ॥ ३२ ॥ गोधमात्ततंमेभ्रतः कृमिरूपाः सुदारुणा ॥ येपरावालल
गदे हताश्चत्रकृते ऽनया ॥ ३३ ॥ यथा मलोबाच ॥ जाता मितल दहं सर्वं परन्मे मात्रा कृतं पुरा ॥ तथापि त्वां समासाद्य सा वजा
मान्नरं भ्रमम् ॥ ३४ ॥ मुच्यते कृमिराशिस्त्वायथा नदं भुना कृतं ॥ न कृत्वा चिंतया विघ्नं ब्रिरं स्थित्वा जगादताम् ॥ ३५
धर्मराज ॥ स्वहसीनां प्रियां ज्ञाता धनेश्वरीम ॥ दत्तश्च सप्तमे ऽनीते जन्मनि ब्राह्मणीभ्रमा ॥ ३६ ॥ आसीनात्मिन्सवया
संगात्सर्वीनां पर्यपासिता ॥ तथाष्टमी सुसंपूर्णा यथोक्तफलदायिनी ॥ ३७ ॥ तत्फलं यदि दास्यसे तत्संकृत्वा सं

मायतः ॥ तेन दुःखेन मे माता नरकान्नापसंकटात् ॥३८॥ न कृत्वा त्वरितं स्नात्वा दद्यौ भुक्त्वा स्वकं कृतम् ॥ स्वमातुः स्वपामला
नुष्ठानेन मोक्षं जगाम सा ॥३९॥ दुर्मिलाद्रूपसंपन्ना दिव्यदेहधरा शुभा ॥ विमानवरमारूढा दिव्यमाल्यांबरावृता ॥४०
भर्तुः समीपे स्वर्गस्था दृश्यतेऽद्यापि मानवैः ॥ ओ वत्स त्वत्प्रार्थनेन भासिमिथिराजसमीपतः ॥४१॥ विस्तरं त्वं महाराज दूर्वाष्ट
म्याः प्रभावतः ॥४२॥ युधिष्ठिर उवाच ॥ यद्येवं प्रवरा कृष्ण त्वत्सानिध्यैर्दूर्वाष्टमी ॥ तस्मादेव विधिं ब्रूहि विधानं च विशे
षतः ॥४३॥ तस्मादेव विधिं ब्रूहि यदि तुष्टोऽसि मे प्रभो ॥४४॥ श्रीकृष्ण उवाच ॥ शृणु पाण्डव यत्नेन दूर्वाष्टम्या विधिं शु
भम् यदा यदा सितायाष्टम्यां बुधवारो भवेद्यदि ॥४५॥ तदा तदा व्रतं ग्राह्यमेकभक्ताशनेन हि ॥ स्नात्वा नद्यां तु पूर्वा
ह्णे गृहीत्वा कलशं नवम् ॥४६॥ जलपूर्णं तु सद्रव्यं पूर्णपात्रसमन्वितम् ॥ अष्टवारं प्रकर्तव्या विधानेन पृथक् पृथक् ॥
४७ ॥ प्रथमा मोदकैः कार्या द्वितीया फेणिकैस्तथा ॥ तृतीया घृतपूपैश्च चतुर्थी वटकैर्नृप ॥४८॥ पंचमी शष्कुकाभिश्च षष्ठी
सोहालकैस्तथा ॥ अशोकवर्तिभिः शुभ्रैः सप्तमी खंडसंयुतैः ॥४९॥ अष्टमी पक्वपूपैश्च केवलाखंडपोलिकैः ॥ एवं क्रमे
ण कर्तव्याः सुहृत्स्वजनबांधवैः ॥५०॥ सह कृत्वा स्थितैर्भोज्यं भोक्तव्यं स्वस्थमानसैः ॥ उपोष्याणामिदं श्रेष्ठं कथयद्भिः
शनैः शनैः ॥५१॥ श्रुत्वाष्टमीव्रतस्यापि माहात्म्यं भोजनं त्यजेत् ॥ तावदेवाहिमो कृष्णं कथा यावत्समाप्यते ॥५२॥ तथा

॥ भवि उ ॥
॥ ८३ ॥

भुक्त्वा बुधस्यात्रे भावसम्वपुनःपुनः ॥ विप्राय वेदविदुषे तं तु वस्त्र निपादयेत् ॥५३॥ लाक्षतं सहिरण्यं च जातरूपमयं बु
धम् ॥ अर्चितं विविधैः पुष्पैर्धूपदीपैः सुगंधिभिः ॥५४॥ पीतवस्त्रैः समाछन्नं बुधं सोमात्मजाकृतिम् ॥ माषकेण सुव
र्णेन तदर्धार्धेन वा पुनः ॥५५॥ ॐ बुधाय नमः ॥ ॐ सोमात्मजाय नमः ॥ एते पूजामंत्रा ॥ अथमीलयतपूर्णांतदाराजर्षिस
त्तमः ॥ ब्राह्मणान्भोजयेद्दद्यौगांदद्याच्चसवत्सकाम ॥५६॥ वस्त्रालंकरणैः सर्वैर्भूषणैर्विविधैरपि ॥ सपत्नीकं समभ्य
र्च्य कर्णमात्रांगुलीयकैः ॥५७॥ मंत्रेणानेन कौंतेय दद्याद्देवं समाचरन् ॥ बुधोऽयं प्रतिगृह्णातु द्रव्यस्थोऽयं बुधः स्वयम् ।
५८ ॥ दीयते बुधराजाय तुष्यतां च बुधो मम ॥५९॥ इति दानमंत्रः ॥ बुधः सौम्यस्तारकेयो राजपुत्र इलापतिः ॥ कुमारो
द्विजराजस्य यः पुत्रः स वः सः पिता ॥६०॥ इति प्रतिग्रहणमंत्रः ॥ दुर्बुद्धिबाधजनितं नाशयित्वा वसे बुधः ॥ सौख्यं च सो
मतनयं चकरोतु गृहे द्विजनंदनः ॥६१॥ इत्युच्चार्य गृहीत्वा तु दद्यात्स्वंत्रपुरःसरम् ॥ सप्तजन्मनि राजेंद्र जातीस्मरो भवेत् ।
६२ ॥ धनधान्यसमायुक्तः पुत्रपौत्रप्रवर्द्धनम् ॥ दीर्घायुर्विपुलान्भोगान्भुक्त्वा चैव महीतले ॥६३॥ ततः श्रुती
र्येमरणं ध्यात्वा नारायणं विभुम् ॥ मृतोऽसौ स्वर्गमाप्नोति पुरंदरसमो नरः ॥६४॥ वसते यावदाहूघेः पुनराभू
तसंप्लवम् ॥ एवमेतन्मयाख्यातं बुधानामुत्तमं व्रतम् ॥६५॥ एतदेव मयाख्यातं ग्रहं पार्थ बुधाष्टमी ॥ यां कृ

॥ रामः ॥
॥ ८३ ॥

83

ब्रह्महा गोघ्नः सर्वपापैः प्रमुच्यते ॥ ९९ ॥ यश्चाष्टमी बुधयुतां समवाप्य भक्त्या संपूजयेद्विप्रमुत्तं कनयष्टसंस्थम् ॥
एकालपात्रसहितैः सहिरण्यवस्त्रैः पश्येदसौ यमपुरं न कदाचिदेव ॥ १०० ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्व
णि श्रीकृष्ण० युधा० ष्टमीव्रतवर्णनं नप०ध्याय ५४ ॥ युधिष्ठिर उवाच ॥ जन्माष्टमीव्रतं ब्रूहि विस्तरेण समाच्युत ।
कस्मिन्काले समुत्पन्नं किं पुण्यं को विधिः स्मृतः ॥ १ ॥ श्रीकृष्ण उवाच ॥ हते कंसासुरे दुष्टे मथुरायां युधिष्ठिर । देवकी
मां परिष्वज्य कृत्वोत्सङ्गं रुरोद ह ॥ २ ॥ तत्रैव रङ्गवाटेन समं वाऽऽ जनोत्सवे ॥ महत्युद्धे पुरा वृत्ते समेते कुकुराऽन्धके ।
३ ॥ स्वजनैर्बन्धुभिः स्निग्धैः समं स्त्रीभिः समावृते । वसुदेवोऽपि तत्रैव वात्सल्यात्स रुरोद ह ॥ ४ ॥ समालिङ्ग्य परिष्व
ज्य पुत्र पुत्रेति वावदं ॥ सगद्गदस्वरो दीनो बाष्पपर्याकुलेक्षणः ॥ ५ ॥ बलभद्रं च मां चैव परिष्वज्य समदापुन । अद्य मे
सफलं जन्म जीवितं च सुजीवितम् ॥ ६ ॥ यदुभाभ्यां सुपुत्राभ्यां संयुक्तः समागमः ॥ एवं वर्षशतादांपत्ये हर्षं पुष्टं न
त्वा हृष्टमनाः ॥ ७ ॥ प्रणिपत्य जनाः सर्वे वसुदेवप्रहर्षिताः ॥ एवं महोत्सवं दृष्ट्वा मामाहुः सकलो जनः ॥ ८ ॥ प्रसादः क्रि
यतां नाथ लोकस्यास्य प्रसादतः ॥ यस्मिन्दिने जगन्नाथ देवकी त्वामजीजनत ॥ ९ ॥ तद्दिने देहि वैकुण्ठ कुर्मस्तेत्र नमो
नमः ॥ सम्यग्भक्तिप्रपन्नानां प्रसादं कुरु केशव ॥ १० ॥ एवमुक्ते जनौघेन वसुदेवोऽतिविस्मितः ॥ विलोक्य बल

॥ मव्रपु ॥
॥ ८४ ॥

मङ्कंसमांचकृत्वाह्युरोदह ॥११॥ एवमस्मिन्निति लोकानां कथयस्व यथा तथा ॥ ततश्चपितुरादेशात्तथाजन्माष्टमीव्रतम्
१२ ॥ मथुरायांजनौघाग्रेपार्थसम्यक्प्रकाशितम् ॥ पौरजनाजन्मदिनंवर्षेवर्षेसमोदितम् ॥१३॥ पुनर्जन्माष्टमी लोके
कुर्वन्तुब्राह्मणादयः ॥ क्षत्रियावैश्यजातीयाः शूद्रायेन्येऽपिधार्मिकाः ॥१४॥ सिंहराशिगतेसूर्येगगनेजलदाकुले ॥
मासिभाद्रपदेऽष्टम्यांकृष्णपक्षेऽर्द्धरात्रिके ॥१५॥ वृषराशिस्थितेचन्द्रेनक्षत्रेरोहिणीयुते ॥ वसुदेवेनदेवक्यामहंजातो
जनाः स्वयम् ॥१६॥ एवमेतत्समाख्यातंलोकेजन्माष्टमीव्रतम् ॥ भगवत्याश्चतोराजन्नऽस्त्वंमहोत्सवम् ॥१७॥ स
श्रुतायात्ततःपश्चाल्लोकेख्यातिंगमिष्यति ॥ शांतिरस्तुशिवंचास्तुलोकाःसंतुनिरामयाः ॥१८॥ युधिष्ठिरउवाच ॥
तत्कीदृशंव्रतंदेवलोकैःसर्वैरनुष्ठितम् ॥ जन्माष्टमीव्रतंनामपवित्रंपुरुषोत्तम ॥१९॥ येनत्वंतुष्टिमायासिलोका
नांप्रभुरव्ययः ॥ एतन्मेभगवन्ब्रूहिप्रसादान्मधुसूदन ॥२०॥ श्रीकृष्णउवाच ॥ पार्थतद्दिवसेप्राप्तेदंतधावनपूर्वकं
उपवासस्यनियमंगृह्णीयाद्भक्तिभावितः ॥२१॥ एकेनैवोपवासेनकृतेनकुरुनंदन ॥ सप्तजन्मकृतंपापंमुच्य
तेनात्रसंशयः ॥२२॥ उपावृत्तस्यपापेभ्योयस्तुवासोगुणैःसह ॥ उपवासःसविज्ञेयःसर्वभोगविवर्जितः ॥२३॥
ततःस्नात्वाचमध्याह्नेनद्यादौविमलेजले ॥ देव्याःसुशोभनंकुर्याद्देवक्याः सूतिकागृहम् ॥२४॥ पद्मरागैःपत्रनैश्च

॥ रामः ॥
॥ ८४ ॥

84

मंडितं चर्चितं भूमेः॥ रम्यं तु वनमालाभी रक्षामणिविभूषितम्॥ २५॥ सर्वगोकुलवत्कार्यं गोपीजनसमाकुलम्॥ घं
टामर्दलसंगीतमांगल्यकलशान्वितम्॥ २६॥ यवार्थस्वस्तिकाकुड्यैः शंखवादित्रसंकुलम्॥ चक्रामुराल्लोहरवैः त्रियष्ठा
गसमन्वितम्॥ २७॥ धात्र्यो विन्यस्य मुशलं रक्षितं रक्षपालकैः॥ षष्ठ्यादेव्याभ्यसंपूर्णैर्नैवेद्यैर्विविधैः कृतैः॥ २८॥ एव
मादि यथाशोभं कर्त्तव्यं सूतिकागृहम्॥ एतन्मध्ये प्रतिष्ठाप्या माता चावत्सविधा स्मृता॥ २९॥ कांचनी राजती ताम्री पैत्तली
मन्मयी तथा॥ दार्वी मणिमयी चैव कर्णिकाहिविता थवा॥ ३०॥ सर्वलक्षणसंपन्ना पर्यंके चार्द्धसुप्तिका॥ प्रतप्त
कांचनाभासा समयासहतपस्विनी॥ ३१॥ प्रसूता च प्रसूता च तत्क्षणात्त्व प्रहर्षिता॥ सा चापि बालकं सुप्तं पर्यंके स्तन
पायिनम्॥ ३२॥ श्रीवत्सवक्षसंपूर्णानीलोत्पलदलच्छविम्॥ यशोदा चापि तत्रैव प्रसूता बालकन्यकाम्॥ ३३॥ तत्र
देवगंहंनागाद्यक्षविद्याधरानराः॥ प्रणताः पुष्पमालाग्रव्यग्रहस्ताः सुरासुराः॥ ३४॥ संचरंत दिवाकाशे वाकारैरु
दितोदितैः॥ वसुदेवोऽतत्रैव खड्गचर्मधरः स्थितः॥ ३५॥ कश्यपो वसुदेवोऽयमदितिश्चापि देवकी॥ शेषनागो ब
लीभद्रो यशोदादितिजायत॥ ३६॥ नंदः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः॥ एषो व नारो राजेन्द्र कंसोऽयं काल
नेमिजः॥ ३७॥ तत्र कंसनियुक्ता ये दानवा विविधायुधाः॥ ते च प्राहरिकाः सर्वे सुप्ता निद्राविमोहिताः॥ ३८॥

॥ म·पु ॥
॥ ८५ ॥

पाद्यार्घौः २

गोधेनुकुंजराश्वाद्यादानवाः शास्त्रपाणयः॥ नृत्यंत्यप्सरसो हृष्टा गंधर्वा गीततत्पराः॥ ३९॥ लेखनीयश्चतत्रैव कालियो
यमुनाहृदे॥ रम्यमेवंविधिं कृत्वा देवकीं नवसूतिकाम्॥ ४०॥ तां चार्घ्यपूजयेद्भक्त्या गंधपुष्पाक्षतैः फलैः॥ कूष्माण्डैर्नालि
केरैश्च खर्जूरैर्दाडिमीफलैः॥ ४१॥ बीजपूरैः पूगफलैर्लंकुचैस्त्रपुसैस्तथा कालदेशोद्भवैर्मृष्टैः पुष्पैश्चापि युधिष्ठिर ४२
ध्यात्वावतारं प्राक्तु कृं मंत्रेणानेन पूजयेत॥ ४३॥ गायद्भिः किन्नराद्यैस्सततपरिवृता वेणुवीणानिनादैर्भृंगारादर्शकु
म्भप्रवरकृतकरैः सेव्यमाना मुनीन्द्रैः॥ पर्यंके स्वास्तृते या मुदिततरमना पुत्रिणी सम्यगास्ते सा देवी देवमाता जय
ति सुवदना देवकी कांतरूपा॥ ४४॥ पादावभ्यंजयंती श्रीर्देवक्याश्चरणांतिके॥ निषण्णा पंकजे पूज्या नमो देव्यैव मं
त्रतः॥ ४५॥ ॐ देवक्यै नमः॥ ॐ वसुदेवाय नमः॥ ॐ बलभद्राय नमः॥ ॐ श्रीकृष्णाय नमः॥ ॐ सुभद्रायै नमः॥ ॐ नंदाय
नमः॥ ॐ यशोदायै नमः॥ एवमादीनि नामानि सम्यगर्घ्यं पृथक्पृथक् पूजयेद्गुर्विजाः सर्वैस्त्रीभद्राणाममंत्रकम्
४६॥ विध्यंतरमपीच्छंति केचिदत्र द्विजोत्तमाः॥ चंद्रोदये शशांकाय अर्घ्यं दद्याद्धरिं स्मरेत॥ ४७॥ अनघं वामनं शौरिं वै
कुंठं पुरुषोत्तमम॥ वासुदेवं हृषीकेशं माधवं मधुसूदनम्॥ ४८॥ वाराहं पुंडरीकाक्षं नृसिंहं ब्राह्मणप्रियम॥ दामोदरं प
द्मनाभं केशवं गरुडध्वजम॥ ४९॥ गोविंदमच्युतं कृष्णमनंतमपराजितम्॥ अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारणम्॥
५०॥ अनादिनिधनं विष्णुं त्रैलोक्येशं त्रिविक्रमम्॥ नारायणं चतुर्बाहुं शंखचक्रगदाधरम॥ ५१॥ पीतांबरधरं नित्यं व

85

॥ राम: ॥
॥ ८५ ॥

नमाल्लाविम.षितं ॥ श्रीवत्सांकं जगत्सेतुं श्रीधरं श्रीपतिं हरिम ॥ ५२ ॥ योगेश्वराय योगेशसंभवाय योगपतये गोविंदाय न
मो नमः ॥ इति स्नानमंत्रः ॥ यज्ञेश्वराय यज्ञसंभवाय यज्ञपतये गोविंदाय नमो नमः ॥ ५३ ॥ इत्यनुलेपनार्घ्यार्चनं धूपमं
त्रः ॥ विश्वाय विश्वेश्वराय विश्वसंभवाय विश्वपतये गोविंदाय नमो नमः ॥ ५४ ॥ इति नैवेद्यमंत्रः ॥ धर्मेश्वराय धर्म
पतये धर्मसंभवाय गोविंदाय नमो नमः ॥ ५५ ॥ इति दीपासनमंत्रः ॥ क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव ॥ गृह
णार्घ्यं शशांकेन्दो रोहिण्या सहितो नमः ॥ ५६ ॥ स्थंडिले स्थापयेदेवं सचंद्रां रोहिणीं तथा ॥ देवकीं वसुदेवं च य
शोदां नन्दमेव च ॥ ५७ ॥ बलदेवं तथा पूज्य सर्वपापैः प्रमुच्यते ॥ अर्द्धरात्रे वसोर्द्धारां पातयेद्गुडसर्पिषा ॥ ५८ ॥
ततो वर्द्धापनं षष्ठीनामादिकारतां मम ॥ कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने ॥ ५९ ॥ यथा मम तथा कार्यं भ
गवत्या महोत्सवम् ॥ ब्राह्मणान्भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥ ६० ॥ हिरण्यं कांचनं गावो वासांसि
कुसुमानि च ॥ यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति ॥ ६१ ॥ यं देवं देवकी देवी वसुदेवादजीजनत् ॥ भौम
स्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ॥ ६२ ॥ सुजन्मवासुदेवाय गोब्राह्मणहिताय च ॥ शांतिरस्तु शिवं चास्त्वि
त्युक्त्वा तु विसर्जयेत् ॥ ६३ ॥ एवं यः कुरुते देवा देवक्याः सुमहोत्सवम् ॥ वर्षे वर्षे भगवतीमद्भक्तो धर्मनन्दनः ॥ ६४

नरोवायदिवानारीयथोक्तफलमाप्नुयात॥ पुत्रसंतानमारोग्यंधनधान्यादिसद्गृहम॥६५॥ शालीक्षुयवसंपूर्णं
मण्डलंसुमनोहरम॥ तस्मिंल्लोकेप्रभुंजंतेदीर्घायुर्मनसेप्सितान्॥६६॥ परचक्रभयंनास्तितस्मिन्राज्येऽपिपाण्डव
पर्जन्यःकामवर्षीस्यादीतिभ्योनभयंभवेत॥६७॥ यस्मिन्गृहेपांडुपुत्रक्रियतेदेवकीव्रतम्॥ नतत्रमृतनिष्क्रांतिर्नग
र्भपतनंतथा॥६८॥ नचव्याधिभयंतत्रभवेदितिमतिर्मम॥ नवैधजनसंयोगानैवापिकलहोगृहे॥६९॥ संपर्के
णापियःकश्चित्कुर्याज्जन्माष्टमीव्रतम्॥ विष्णुलोकमवाप्नोतिसोऽपिपार्थनसंशयः॥७०॥ जन्माष्टमीजनमनोन
यनाभिरामापापापहासपदिनंदितनंदगोपात॥ योदेवकीसदयितांजयतीहतस्यांपुत्रानवाप्यसमुपैतिपदं
सविष्णोः॥७१॥ इतिश्रीभविष्येमहापुराणोत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेजन्माष्टमीव्रतवर्णनं
नामपंचपंचाशत्तमोऽध्यायः॥ ५५ ॥ ॥ श्रीकृष्णउवाच॥ शुक्लेभाद्रपदेचैवपक्षेऽष्टम्यांयुधिष्ठिरः॥ दूर्वाष्ट
मीव्रतंपुण्यंयःकुर्याच्छ्रद्धयान्वितः॥१॥ नतस्यक्षयमाप्नोतिसंतानंसप्तपौरुषम नंदतेवर्द्धतेनित्यंयथादूर्वतथाकुलम॥२
युधिष्ठिरउवाच॥ कुतश्चाससमुत्पन्नादूर्वाकस्माच्चिरायुषा॥ कस्माच्चसापवित्राचलोकेनाथब्रवीहिमे॥३॥ ॥ श्रीकृष्णउ
वाच॥ क्षीरोदसागरेपूर्वंमथ्यमानेमृतार्थिना॥ विष्णुनाबाहुजंघाभ्यांयद्धृतोमंदरोगिरिः॥४॥ भ्रमितोवैसवेगेनरोमा

86

॥ रामः ॥
॥ ८६ ॥

ण्पूर्जितानि वै ॥ तास्मैतानि जलोर्मीभिः क्षिप्तानि नन्दनोद्याने ॥ ५ ॥ अत्रायतनभूभा दूर्वा रम्या हरितशाद्वला ॥ एवमेषा
नकृत्पन्ना दूर्वा शिवधुतनरूहा ॥ ६ ॥ तस्याश्चोपरि विन्यस्तं मथितामृतमुत्तमम् ॥ देवदानवगंधर्वैर्यक्षविद्याधरैस्तथा ॥
७ ॥ तेनामृतमनकं भस्य येनु निर्मथ्यं दविंदव ॥ नैरिपंस्यष मात्राभूद्दूर्वा रम्याः जराऽमरा ॥ ८ ॥ वंद्या पवित्रा देवैस्तु वंदि
तार्चिता पुरा ॥ अथ पूर्णां फलपुष्पैस्तु खर्जूरैर्नारिकेरकैः ॥ ९ ॥ द्राक्षाक्षोटकपित्थैश्च भव्यवर्वरैर्लकुचैस्तथा ॥ नारिंगैर्जंबु
केराम्रैर्वीजपूरैश्च दाडिमैः ॥ १० ॥ दध्यक्षतैः सुगन्धैश्च धूपनैवेद्यदीपकैः ॥ मंत्रेणानेन राजेन्द्र भक्त्या स्वावहितेन वा ॥
११ ॥ त्वं दूर्वेमृतजन्मासि वंदिता च सुरासुरैः ॥ सौभाग्यं संततिं कृत्वा सर्वकार्यकरी भव ॥ १२ ॥ यथा शाखाप्रशाखाभि
र्विस्तृतासि महीतले ॥ तथा ममापि संतानं देहि त्वमजरामरे ॥ १३ ॥ एवमेषां पुरा पार्थ पूजिता त्रिदशोत्तमैः ॥ तेषां प
त्नीवधूभिश्च भगिनीभिस्तथैव च ॥ १४ ॥ पूजिताभ्याईना वा वा गौर्या राजाङ्ग्रिया तथा ॥ मर्त्यलोके वेदवत्या दमयंत्या
पिसीतथा ॥ १५ ॥ सुकेश्या च घृताच्या च रंभया च सुकेश्यया ॥ सहस्या कामकंदस्या मेनकोर्वशिकादिभिः ॥ १६ ॥ स्त्री
भिरेवार्चिता दूर्वा सौभाग्यसुखदायिनी ॥ स्नाताभिः शुचिवस्त्राभिः सखीभिः सुहृज्जनैः ॥ १७ ॥ दत्वा दानानि
विप्रेभ्यः फलं दत्वार्चयेत्प्रभोः ॥ तिलपिष्टकगोधूमसप्तधान्यानि यांऽव ॥ १८ ॥ भक्षायेत्वा सुहृन्मित्रसंबंधिस्वजने

तथा ॥ यातार्म्मो विचरिष्यंति व्रतमेतत्सनातनम् ॥ १९ ॥ दूर्वाष्टमीति विख्यातं पुण्यं संतानकारकम् ॥ ताः सर्वाः सुखसौ
भाग्यपुत्रपौत्रादिभिस्तथा ॥ २० ॥ मर्त्यलोके चिरं स्थित्वा ततः स्वर्गगताः पुनः ॥ देवैरानंदितास्तत्र भर्तृभिः सहबांध
वैः ॥ २१ ॥ वसंति रममाणास्ता यावदाभूतसंप्लवम् ॥ २२ ॥ मेघावृतैः वरतले हरितेवतांतेयासाष्टमी भ्रमफलास
फला न भक्ष्ये ॥ दूर्वाफलाक्षततिलैः प्रतिपूज्य यो वि दूर्वैव वृद्धिमुपयाति सुतैः सुहृद्भिः ॥ २३ ॥ इति भविष्ये महा
पुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दूर्वाष्टमीव्रतवर्णनं नाम षट्पंचाशत्तमोऽध्यायः ॥ ५६ ॥ ॥
श्रीकृष्ण उवाच ॥ कृष्णाष्टमीव्रतं पार्थ शृणु पापभयापहम् ॥ धर्मसंजननं लोके हृष्टप्रीतिकरं परम् ॥ १ ॥ मासि
मार्गशिरे प्राप्ते दंतधावनपूर्वकम् ॥ उपवासस्य नियमं कुर्यात्कृष्णस्य वा पुनः ॥ २ ॥ शशांकशांकभेदेन गृहाणि ष्क
स्यवापितः ॥ कृष्णाष्टम्यां वर्षमेकं गुरुं पृष्ट्वा विचक्षणः ॥ ३ ॥ ब्रह्मचारी जितक्रोधः शिवार्चनजपे रतः ॥ ततोऽपरा
ह्णसमये स्नात्वा नद्यां विमलधी ॥ ४ ॥ शिवलिंगं समभ्यर्च्य सुमनोभिः सुगंधिभिः ॥ गुग्गुलं च भक्ष्यं दद्याद्दद्या
न्नैवेद्यमुत्तमम् ॥ ५ ॥ ततो देवस्य पुरतो होमं कुर्यात्तिलैर्गुरुः ॥ मार्गशीर्षेशुभेमासि शंकरेत्यभिपूजयेत्
६ ॥ गोमूत्रप्राशनं कृत्वा ततो भूमौ निशि स्वपेत् ॥ अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ ७ ॥ एवं पुष्येऽपि

संपूज्य शंभुं नाम महेश्वरम् ॥ कृष्णाष्टम्यां घृतं प्राश्य वाजपेयफलं भवेत् ॥ ८ ॥ माघे माहेश्वरं नाम कृष्णाष्टम्यां प्र-
पूजयेत् ॥ निशि पीत्वा गवां क्षीरं गोमेधाष्टकमाप्नुयात् ॥ ९ ॥ फाल्गुने च महादेवं संपूज्य प्राशयेत्तिलान् ॥ राजसू-
यज्ञस्य यस्य फलमष्टगुणं भवेत् ॥ १० ॥ चैत्रे च स्थाणुनामानं कृष्णाष्टम्यां शिवं यजेत् ॥ यवाहारोऽश्वमेधस्य यज्ञस्य फलमा-
प्नुयात् ॥ ११ ॥ वैशाखे शिवनामानमिष्ट्वा रात्रौ कुशोदकम् ॥ पीत्वा पुरुषमेधस्य फलं दशगुणं भवेत् ॥ १२ ॥ ज्येष्ठे पशु-
पतिं पूज्य गवां शृङ्गोदकं पिबेत् ॥ गवां लक्षप्रदानस्य नरः फलमवाप्नुयात् ॥ १३ ॥ आषाढे चोग्रनामानमिष्ट्वा संप्रा-
श्य गोमयम् ॥ वर्षाणां त्रिशतं साग्रं रुद्रलोके महीयते ॥ १४ ॥ श्रावणे शर्वनामानमिष्ट्वार्कं निशि भक्षयेत् ॥ बहुस्व-
र्णस्य यज्ञस्य नरः फलमवाप्नुयात् ॥ १५ ॥ मासि भाद्रपदेऽष्टम्यां त्र्यंबकं नाम पूजयेत् ॥ बिल्वपत्रं निशि प्राश्य मन्वदी-
क्षाफलं लभेत् ॥ १६ ॥ भवनामाश्विने पूज्यः प्राशयेत्तण्डुलोदकम् ॥ पौण्डरीकस्य यज्ञस्य फलं शतगुणं लभेत् ॥ १७
कार्तिके रुद्रनामानं संपूज्य प्राशयेद्दधि ॥ अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥ १८ ॥ अब्दान्ते भोजयेद्विप्रा-
न्शिवभक्तिपरायणान् ॥ पायसं मधुसंयुक्तं घृतेन समभिप्लुतम् ॥ १९ ॥ शक्त्या हिरण्यवासांसि भक्त्या तेभ्यो निवेद-
येत् ॥ सतिलाः कृष्णकलशा भक्ष्यभोज्येन संयुताः ॥ २० ॥ द्वादशात्र प्रदातव्याश्छत्रोपानद्युगान्विताः ॥ निवेदयीत र

॥ भविषु ॥
॥ ८८ ॥

हृद्या: ४

दत्वां गां च कृष्णां पयस्विनीम् ॥ २१ ॥ वर्षमेकं वरे देवं नैरन्तर्येण यो नरः ॥ कृष्णाष्टमीव्रतं भक्त्या तस्य पुन्यफलं शृणु ॥ २२
सर्वपापविनिर्मुक्तः सर्वैश्वर्यसमन्वितः ॥ मोदतेऽपवल्लित्वं मर्त्यलोके शतं समाः ॥ २३ ॥ अनेन विधिना देवाः सर्वे दे-
वत्वमागताः ॥ देवी देवत्वमापन्ना गुहः स्कंदत्वमागत ॥ २४ ॥ ब्रह्मा ब्रह्मत्वमापन्नो हरहं विष्णुत्वमागतः ॥ इन्द्रश्च दे-
वराजत्वं गणो गणपतां गतः ॥ २५ ॥ नारी वा पुरुषो वापि कृत्वा कृष्णाष्टमीव्रतम् ॥ अखंडितं महाराज पुण्यं प्राप्नो-
त्यनुत्तमम् ॥ २६ ॥ सूर्यकोटिप्रतीकाशैर्विमानैः सर्वकामिकैः ॥ रुद्रकन्यासमाकीर्णैर्हंससारससंयुतैः ॥ २७ ॥
नृत्यवादित्रसंयुक्तै रुद्रकच्छध्वनिनादितैः ॥ दीध्यमानश्चमरैः स्तूयमानः सुरासुरैः ॥ २८ ॥ त्रिनेत्रः शूलपाणि-
श्च शिवैश्वर्यसमन्वितः ॥ भक्ते शिवपुरे तावद्यावत्कल्पेषु चाष्टकम् ॥ २९ ॥ इत्येतत्ते समाख्यातं पार्थ कृष्णाष्ट-
मीव्रतम् ॥ यत्कृत्वा सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ३० ॥ कृष्णाष्टमीव्रतमिदं शिवभावतान्मा सत्याशनैरु-
दितनामसुतैरुपोष्य ॥ कृष्णोन्दपानिकलशान्तनिलान्नपुष्पामोसोपुष्यानिपदमुत्तममितुमोले ॥ ३१ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कृष्णाष्टमीव्रतवर्णनं नाम सप्तपंचाशत्तमोऽ-
ध्यायः ॥ ५७ ॥ ॥ श्रीकृष्ण उवाच ॥ ब्रह्मपुत्रो महातेजा अत्रिर्नाम महानृषिः ॥ तस्य पत्नी महाभागा अनसूया

पार्थपापस्य ४

88

॥ रामः ॥
॥ ८८ ॥

पतिव्रता ॥ १ ॥ तयोः कालेन महता जातः पुत्रो महातपाः ॥ दत्तो नाम महायोगी विष्णोरंशो महीतले ॥ २ ॥ द्वितीयो नाम स
लोकेस्मिन्नन पश्येति विश्रुतः ॥ तस्य भार्या नदी नाम बभूव सहचारिणी ॥ ३ ॥ अष्टपुत्रा जीववत्सा सर्वदा सद्गुणोर्न्विता ॥ अन
योर्विष्णुरूपेण लक्ष्मीश्चैवानदी स्मृता ॥ ४ ॥ एवं तस्य सभार्यस्य योगाभ्यासरतस्य वा ॥ आजग्मुः शरणं देवाः जंभदैत्येन पीडिताः
५ ॥ ब्रह्मलब्धप्रसादेन द्रुतं गत्वामरावतीम् । संरुद्धां जंभदैत्येन दिव्यवर्षशतं तप ॥ ६ ॥ दैत्यदानवसंयोगेन पातालादैत्यभार
त । तस्य सैन्यमसंख्येयं दैत्यदानवराक्षसैः ॥ ७ ॥ तेन निर्माथिता देवाः सेंद्रचेंद्रमरुद्गणाः ॥ त्याजिताः स्वानि धिष्ण्यानि तस्य
त्का जग्मुर्दिशो दश ॥ ८ ॥ भग्नतः पुलसंयांतः संडादेवा भयार्दिता ॥ एवं तेनु वृतं तिस्मदैत्या जंभपुरःसराः ॥ ९ ॥ वध्यंतः
शरसंघातैर्गदामुशलमुद्गरैः ॥ नर्दन्तो वृषभारूढाः केचिन्महिषवाहना ॥ १० ॥ शारभैर्गंडकैर्व्याघ्रैर्वानरै रभसैर्वृताः ॥
मुंचन्तो याति पाषाणान्द्रुतघ्नीस्तोमराञ्छरान ॥ ११ ॥ यावद्विंध्यागिरिं प्राप्तास्तत्र स्याश्रममंडलम ॥ अनघश्चा नदी चैव दंप
त्तं यत्र तिष्ठति ॥ १२ ॥ तयोः समीपं संप्राप्तास्ते सुराः शरणार्थिनः ॥ अनघोऽपि च तान्देवाल्लीलयैव ससवासवान ॥ १३ ॥ अ
भ्यंतरे प्रविश्याथ तिष्ठध्वं विगतज्वराः ॥ तथेति नाम ते कृत्वा सर्वे तुष्टिं समास्थिताः ॥ १४ ॥ दैत्या अपि द्रुतं प्राप्ता प्रघ्नंतः प्र
हरंतोरीन ॥ इन्द्रवरुणगणा घोरा गदृष्ट्वा ब्राह्मणीमृते ॥ १५ ॥ द्रुतं दृष्मा नाक्षिप्यध्वं पुष्प्योपगाफलोपगान ॥ अथारोप्या

तपं सुघोरं दत्मा जग्मुस्तदाश्रमात्॥१६॥ तस्माद्रणाद्यापि दैत्यानां श्रीर्बभूव शिरोगता। दत्तकेनापि ते दृष्टा नष्टा ध्यानाग्नि-
नाक्षराणात्॥१७॥ निस्तेजसो बभूवुर्हि निःश्रीका मंदपंडिता॥ देवैरपि निगृहीतास्ते दैत्याश्च हतारयो॥१८॥ स्वस्थं तो निस्तनंत
भ्यनिश्चैष्यावुलकंटकाः॥ ऋषिभिः कार्मोः भल्लैः परिघैर्घनैः॥१९॥ एवं ते पलयं जग्मुस्तत्प्रभावात्मनेस्तदा॥ असुरा देव
मास्त्रौघैर्जिताद्रूत्रैणाधानिता॥२०॥ देवाश्चापि स्वराज्ये प्रभूतस्थुः सर्वे यथापुरा॥ सुरैरपि मुनेस्तस्य देवर्षे महिमा भवत्॥
२१॥ ततः समस्तलोकानां भवाय मनतो स्थितः॥ कर्मणा मनसा वाचा वाग्भिर्भावैश्च समाचरत्॥२२॥ काष्ठकुड्यशिलाभूतनु
र्ध्ववाहुर्महातपा॥ ब्रह्मोत्तरं नाम तपस्तेपे सुनियतव्रतः॥२३॥ नेत्रे ह्युन्मिमिषे कृत्वा भ्रुवोर्मध्ये त्रिलोकयन्॥ त्रीणि वर्षसह
स्राणि दिव्यानीति हि नः श्रुतम्॥२४॥ तपसोऽन्ते ततस्तस्य स्थितस्यानिमिषस्य हि॥ योगाभ्यासप्रयत्नस्य माहिष्मत्याः पतिः प्रभुः
२५॥ एकाह वृतमभ्येत्य कार्तवीर्योऽर्जुनो नृप॥ शुश्रूषाविनयं चक्रे द्विजाराधनतत्परः॥२६॥ गात्रसंवाहनं पादं प्रोक्षणं मार्जनं
तथा। संपूर्णे नियमे तस्य तुष्टात्मा समन्वितः॥२७॥ तस्मै ददौ वरान्सुष्ठांश्चतुरो भूरितेजसः॥ पूर्वं बाहुसहस्रं तु स वव्रे प्रथमं वरम्॥
२८॥ स धर्माधीयमानस्य माध्यन्तस्मात्त्रिवारणम्॥ धर्मेण पृथिवीं जित्वा धर्मेणैवानुपालनम्॥२९॥ संग्रामान्सुबहून्जित्वा
हत्वा वीरान्सहस्रशः॥ संग्रामे युध्यमानस्य वधो मे स्यात्सुरैः करात्॥३०॥ तेन बुद्धेन लोकेऽस्मिन्दत्तेऽयं महीतले॥ कार्तवीर्य

89

स्यकौंतेय योगाभ्यासं सविस्तरम् ॥ ३१ ॥ चक्रवर्त्तीपदं चैव अष्टसिद्धिसमन्वितः ॥ तेनापि पृथिवी कृत्स्ना सप्तद्वीपा सपर्वता ॥ ३२ ॥ ससमुद्राकरवती धर्मेण विधिना जिता ॥ तस्य वाऽऽसन् सहस्रं तु प्रभावात् किल धीमतः ॥ ३३ ॥ यागाद्यथोक्तमैवप्रादुर्भवति मायया ॥ दशयज्ञसहस्राणि तेषु द्वीपेषु सप्तसु ॥ ३४ ॥ निरर्गलानि वृत्तानि स्वयं तेन तस्य पाण्डव ॥ सर्वे यज्ञा महावाहो प्रसन्ना भूरिदक्षिणाः ॥ ३५ ॥ सर्वे कांचनवेदिकाः सर्वैर्यूपैश्च कांचनैः ॥ सर्वदेवैर्महाभागैर्विमानस्थैरलंकृताः ॥ ३६ ॥ गंधर्वैरप्सरोभिश्च नित्यमेवोपशोभिताः ॥ तस्य यज्ञे जगुर्गाथां गंधर्वो नारदस्तथा ॥ ३७ ॥ वीतं राजसिंहस्य महिमानं निरीक्ष्यसे ॥ नत्वं तं कार्तवीर्यस्य गतिं यास्यसि पार्थिव ॥ ३८ ॥ यज्ञैर्दानैस्तपोभिर्वा विक्रमेणाश्रुतेन च ॥ द्वीपेषु सप्तसु स वै रथेन चर्मखड्गशरासनी ॥ ३९ ॥ व्यचरद्योगवलोवै दूरान्नरादपश्यत ॥ अनष्टद्रव्यता चास्य न शोको न च वैक्लवः ॥ ४० ॥ प्रभावेण महीराजः प्रजा धर्मेण रक्षय च ॥ पंचाशीतिसहस्राणि वर्षाणां वै नराधिप ॥ ४१ ॥ ससमुद्रवसन्तायाः स चक्रवर्ती वभूव ह ॥ स एव पशुपालोऽभूत् क्षेत्रपालः स एव च ॥ ४२ ॥ स एव वृष्ट्या पर्जन्यो योगित्वादर्जुनोऽभवत् ॥ स वै वाहुसहस्रेण ज्याघातकठिनत्वचा ॥ ४३ ॥ वाति रश्मिसहस्रेण क्षोभ्यमाणो महोदधौ ॥ स हि नागान्मनुष्यैस्तु माहिष्मत्यां महाद्युतिः ॥ ४४ ॥ कर्कोटाहेः सुतांजित्वा पुरि तत्र न्यवेशयेत ॥ स वै पत्नीसमुद्रस्य प्रावृट्कालेंबुजे

॥भवि॥
॥२०॥

सगणान्॥४५॥क्रीडन्नेवमदोन्मत्तःप्रतिस्रोतभ्यकारह॥ ललिताक्रीडतानेनफलनिष्पंदमालिनीम्॥४६॥उर्मीभ्रु
कुटिमत्स्येववक्रांकिताभ्येतिनर्मदा॥तस्यबाहुसहस्रेणक्षोभ्यमाणोमहोदधौ॥ ~~ललिताक्रीडतानेनफलनिष्पंदमालि~~
नीम्॥४६॥भवंत्यालीननिश्चेष्टाःपातालस्थामहासुराः॥चूर्णीकृतामहाभागालीनहीनमहामति॥४७॥चकाराडोलयता
दोःसहस्रेणससागरम्॥क्रांतानिश्चलमूर्द्धानोबभूवुश्चमहोरगाः॥४८॥सायाह्नेकदलीखण्डानिर्घाताभिहताइव॥सर्ववि
द्याधनुर्ज्ञाताःस्पृतिकंपंवभिःशरैः॥५०॥लंकाधिपंमोहयित्वासवलंरावणंवलात्॥निर्जित्यवद्ध्वामानीयमाहिष्मत्यांववंधव॥
५१॥ततोगत्वापुलस्त्यस्तुअर्जुनंसंप्रसादयन्॥मुमोचरक्षःपौलस्त्यंपौलस्त्येनानुगामिना॥५२॥तस्यबाहुसहस्रस्यवभूवज्या
तलस्वनः॥स्फुटितेनकदाचित्सप्रार्थितनभित्रभानुना॥५३॥सप्तद्वीपांविभ्रमान्तोःप्रादात्क्षिप्तांमहीमिमाम्॥कुंडेशायस्त
तोऽद्यापिदृश्यतेभगवान्हरिः॥५४॥निर्वादित्यश्चप्रत्यक्षोजात्रतत्तस्यैवपश्यति॥बभूवदुहितान्हेतोःशारदोऽद्यापितिष्ठ
ति॥५५॥सर्वंगुणासंयुक्तोराजाभूदर्जुनोभवि॥अनघस्यप्रसादेनयोगाचार्यस्यपांडव॥५६॥तेनेयंवर्द्धितालक्ष्मेनकार्त्त
वीर्येणयोगिनी॥प्रवर्तितामर्त्यलोकेप्रसिद्धायनघाष्टमी॥५७॥अघपापंस्मृतंलोकेतच्चापित्रिविधंभवेत्॥यस्माद
घंनाशयतितेनासावनघास्मृता॥५८॥तस्याष्टगुणमैश्वर्यंविनोदार्थंविभाव्यते॥अणिमामहिमाप्राप्तिप्राकामे

॥रामः॥
॥२०॥

90

१ हनकः ३

महिमा तथा ॥ ५९ ॥ ईशित्वं च वशित्वं च सर्वकामावसायिता ॥ इत्यष्टौ योगसिद्धस्य सिद्धयो मोक्षलक्षणाः ॥ ६० ॥
समुत्पन्नादनेकस्य लोके प्रत्ययकारकाः ॥ यात्रासमाप्तौ संगृह्य यद्यानितपैवता ॥ ६१ ॥ जगन्नाथस्तमन्नघं कुर्याद्दस्माद्
नोनघा ॥ मदंशो मद्गतप्राणो लोकेस्मिन्नन्तको द्विजः ॥ ६२ ॥ युधिष्ठिर उवाच ॥ कीदृशं पुण्डरीकाक्ष वैराज्ञाजिताव्रतम्
६३ ॥ चक्रे वा विष्णुलोके पूर्वैर्मन्त्रैः समयैर्भ्यकैः ॥ कस्मिन्काले तिथौ कस्यामेतन्मे ब्रूहि केशव ॥ ६४ ॥ श्रीकृष्ण उवाच ॥
कृष्णाष्टम्यां मार्गशीर्षे दांपत्यं दर्भनिर्मितम् ॥ अनघं चानघां चैव वकृपुत्रैः समन्वितम् ॥ ६५ ॥ पुराकृती कृतं शान्तं म
मिभागेष्विनं शुभम् ॥ स्नात्वैवं सर्ववेतुष्पैः सुसुगंधैर्युधिष्ठिर ॥ ६६ ॥ ऋग्वेदोक्तविधाविध्येध्यात्वामसांस्रजम् स
नघं वासुदेवेनानघां लक्ष्मीं व्रजांतनुम् ॥ ६७ ॥ प्रद्युम्नादि पुत्रवर्गं हरिवंशो यथोदितम् ॥ ६८ ॥ ओं अतो देवा अवन्तु नो
यतो विष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधामभिः ॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे ॥ त्रीणि प
दा विचक्रमे विष्णुर्गोपा अदाभ्यः ॥ अतो धर्माणि धारयन् ॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे ॥ इन्द्रस्य युज्यः
सखा ॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ॥ दिवीव चक्षुराततम् ॥ तद्विप्रासो विपन्यवो जागृवांसः समिंधते ।
विष्णोर्यत्परमं पदम् ॥ लोकोद्भवैः फलैः कन्दैः स्रंमारैर्वदरैः शुभैः ॥ वितैर्भ्यधान्यैः पुष्पैश्च गंधधूपैः सदीपकैः ॥ ६९ ॥

यः पूजयेद्भक्तियुक्तः सर्वपापैः प्रमुच्यते ॥ ततो द्विजान्भोजयेच्च सुहृत्संबंधिबांधवान ॥ ७० ॥ व्रतावसाने गृह्णीयात्कश्चिदे-
को नरो व्रतम् ॥ तेषांमध्ये द्वादशाब्दकुरनघव्रतपारगाः ॥ ७१ ॥ इदं जीवन्न घातीवेत्सत्यं नुसमयोषितम् ॥ वर्षमेकं ततः स्वेच्छाद्
दं तदा नघव्रतम् ॥ ७२ ॥ तत्रोपेक्षणकं कार्यं नटनर्तकगायकैः ॥ प्रभाते नु नवम्यां तं तोयमध्ये विसर्जयेत ॥ ७३ ॥ एवं सकृत्ते
यात्रां वर्षे वर्षे वहर्षित ॥ भक्तियुक्तः श्रद्धया च सर्वपापैः प्रमुच्यते ॥ ७४ ॥ कुटुंबं वर्द्धते तेषां येषां विघ्नः प्रसीदति ॥ आरोग्यं
सपुत्रत्वमाप्निन्नतो यांति परां गतिम् ॥ ७५ ॥ एतन्नामघौघशमनामनघाष्टमीं चकौंतेय संप्रति मया कथितां हिताय ॥ कुर्वं
न्ननन्तमनसः स्वपक्षाभिवृद्धौ ऋद्धिं प्रयांति कृतवीर्यसुतानुरूपम् ॥ ७६ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे अनघाष्टमीव्रतं नामाष्टपंचाशत्तमोऽध्यायः ॥ ५८ ॥ ॥ श्रीकृष्ण उवाच ॥ अथान्यत्संप्रवक्ष्या-
मि व्रतं श्रेयस्करं परम् ॥ शिवलोकप्रदं पुण्यं विधिवत्तन्निबोधत ॥ १ ॥ वारे सोमे सिताष्टम्यां पक्षे सोमं समर्चयेत ॥ वि
क्षिना वंद्रवृत्तालं प्राप्यमेतन्नत्सवंद्रकम् ॥ २ ॥ दक्षिणार्धे हरिं ध्यात्वा मध्ये नुपारीतः प्रभुम् ॥ पंचामृतादिना देवं स्थाप्य पयि
त्वा यत्नवृत्ती ॥ ३ ॥ चंदनेन तु युक्तेन दक्षिणार्धे विलेपयेत ॥ हरभागं नीलरक्तं क्षिवस्त्रोपरि मौक्तिकम् ॥ ४ ॥ पश्चात्पुष्पैः
समभ्यर्च्य सितै रक्तैरनुत्तमैः ॥ नीराजनं पुनः कुर्यात्पंचविंशतिदीपकैः ॥ ५ ॥ अँ घासिद्धैः शुभैर्भक्ष्यैर्नैवेद्यं विनिवेदयेत्

अपसिद्धे १

91

एवं कृतोपवासस्तु प्रभाते पूर्ववच्छिवम् ॥ ६ ॥ संपूज्याज्यतिलैर्मिश्रं जुहुयाज्जातवेदसि ॥ तृप्तितो ब्राह्मणान्सम्यग्भोजयि-
त्वा विधानतः ॥ ७ ॥ मिथुनानि तु संभोज्य यथाशक्त्यानुपूजयेत् ॥ आचार्यं पितरावर्च्य विधिनानेन सुव्रत ॥ ८ ॥ संवत्सरं
नेकर्तव्यं यतन्त्सर्वं निबोधतः ॥ प्रागुक्तविधिना पूज्या सितपीतसुगद्वयम् ॥ ९ ॥ दद्याद्वितानकं चैव पताकां घण्टिकां तथा ।
धूपगंधारसीवापि दीपवृक्षं सुशोभनम् ॥ १० ॥ एवमादीनि योज्यानि पूर्ववद्भोज्यमाचरेत् ॥ चतुरस्रं त्रिकोणं च मंड-
लं कारयेत्ततः ॥ ११ ॥ त्रिकोणे पार्वतीं ध्यायेच्चतुरस्रे महेश्वरम् ॥ संकल्प्य द्विजदांपत्यं वासोभिर्भूषणैस्तथा ॥ १२ ॥ पूज-
यित्वा यथाशक्त्या कुर्यान्नीराजनं क्रमैः ॥ दीपकैः पंचविंशद्भिर्मौ जपित्वा विसर्जयेत् ॥ १३ ॥ भद्रपंचकमेकं वा एवं यः कु-
रुते नरः ॥ उभाभ्यां लोकमासाद्य पदं यास्यत्यनामयम् ॥ १४ ॥ आदेहपतनाद्यस्तु नित्यमेतत्समाचरेत् ॥ इहैव स हरिः
साक्षात्तत्त्वं विभाव्यते ॥ १५ ॥ न स्पृशंत्यापदस्तस्य न दुःखीभवते क्वचित् ॥ ज्वरग्रहादिभिर्नैव पीड्यते सोकदाचन·
१६ ॥ श्रीकृष्ण उवाच ॥ अथवानतनेमागर्ते नामवेहि सिताष्टमीम् ॥ संप्राप्यादित्ययोगेन प्राग्विधानेन चाभ्यसेत् ॥ १७
किंतु दक्षिणानेत्रस्थं भास्करं चार्चयेद्बुधः ॥ पद्मरागेण दिव्येन सुवर्णेन च पार्वतीम् ॥ १८ ॥ कुंकुमेन समालभ्य चंदने-
न शिवं तथा ॥ अभावे सर्वरत्नानां हेम सर्वत्र योजयेत् ॥ १९ ॥ रुद्रबीजं परं प्रियं रुद्रस्य सर्वदा ॥ रक्तमाल्यांबरधरं
पूतं

किंतुदक्षिणानेत्रस्थम् २

नैवेद्यंघृतपाचितम ||२०|| शेषःपूर्व्वविधानेनकर्त्तव्योविधिविस्तरः || तिथौपूर्ण्णेचकुर्व्वीतगणेशेनात्रपारणम्
२१ || एतत्स्नात्वाकचविधायादंपंचगव्यादानेवमेवच || कृत्वासर्प्पादिलोकेभ्यःभक्त्वाभोगान्नुजेत्परम् ||२२|| पतंगवत्स्न
तापीस्याद्दीनभ्रंजनश्रियः || अस्मिँल्लोकेनबाध्येतधनवान्पुत्रवान्भवेत् ||२३|| यद्यष्टमीभवतिसोमयुताकृताविदर्क्केणवा
कुरुकुलोद्वहनागपोष्य || पूज्योमयातहहरंहरिरत्नकृविहूंभक्त्यायुतांपदमुपैतिपरंमुरारेः ||२४ || इतिश्रीभविष्येमहापु
राणेउत्तरपर्व्वणिश्रीकृष्णयुधिष्ठिरसंवादेसोमाष्टमीव्रतवर्णनंनामैकोनषष्टितमोऽध्यायः ||५९ || श्रीकृष्णउवाच || समु
त्सन्नेभूतलेभ्रष्टेगोदमथनेप्रभौ || दैत्यानांमोहनार्थायपोविष्टेजनार्दने ||१|| बलेर्वक्षेसंस्तांश्रांताविश्रांताकमला
लया || यामेवमितितिवान्योत्वंयुगंवृधुर्देवदानवाः ||२|| तिलाःसर्वेयुरापार्थयुद्धेकृष्णेनवक्षिप्ता || पातालंगमितादैत्याःसश्री
कःस्वपमायया ||३ || श्रीसमस्तामितायस्माद्धृदिवृक्षस्तुततःस्मृत || तस्माद्भाद्रपदस्यैवमसकृष्णपक्षेकृतत्तम ||४|| नवम्याम
र्च्चयेद्भक्त्यादृष्टमत्स्यैदयेनतम् || श्रीवृक्षंविविधैःपुष्पैर्नाग्निपाचितैःफलैः ||५ || तिलपिष्टान्नगोधूमैर्धूपगंधस्नगंबरैः
दृष्टद्रानुकरातान्मृतामृतीकृतनमस्तते ||६|| मंत्रेणानेनराजेंद्रकृत्वाब्राह्मणभोजनम् || ततोभुंजीतमौनेनतैलक्षार
विवर्जितः ||७ || अनग्निपाकंभूपात्रेदधिपुष्पफलैःशुभम् || एवंयःकुरुतेपार्थश्रीवृक्षस्यार्च्चनंनरः ||८ || नारी

92

वाड्रः स्वर्गो काम्यांभुक्त्वा नेनात्र संशयः ॥ सप्तजन्मान्तरं यावत्स्वर्गसौभाग्यसंयुता ॥ ९ ॥ श्रीयतिपर्लिनीधन्याम
न्मलोके महीयते ॥ १० ॥ श्रीवृक्षमक्षतफलं वसितं नवम्यां नैवेद्यपुष्पफलवस्त्रविचित्रधान्यैः ॥ पूज्यः प्रभातसमय
ये पूरुषो न मेष्यां संप्राप्नुवंति पुरुषाः पुरुषेंद्रवंद्यम् ॥ ११ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयु
धिष्ठिरसंवादे श्रीवृक्षनवमीव्रतवर्णनं नाम षष्टितमोऽध्यायः ॥ ६० ॥ श्रीकृष्ण उवाच ॥ महिषासुरे विनिहते भ
गवत्या महासुरैः ॥ पूर्ववैरमनुस्मृत्य संग्रामा वहवः कृताः ॥ १ ॥ नानारूपधरा देवी अवतीर्य पुनः पुनः ॥ धर्मसंस्था
पनार्थाय निजघ्ने दैत्यसत्तमान् ॥ २ ॥ अथ रक्तासुरो नाम महिषस्य सुतो महान् ॥ आसीत्तेन तपस्तप्तं वर्षाणां नियु
तानि वहु ॥ ३ ॥ तस्मै ददौ वतुर्वक्त्रो राज्यं त्रैलोक्यमंडले ॥ तेन लब्धं वरेणाथ मेलयित्वा दनोः सुतान् ॥ ४ ॥ प्रारब्धं
सहस्राक्षेण युद्धं गत्वाऽमरावतीम् तं दृष्ट्वा दानवबलं सन्नद्धानुद्धतध्वजा ॥ ५ ॥ युयुधे दानवैः सार्द्धं सुरैः शक्र
पुरस्सरैः ॥ तत्र प्रावर्त्तत नदी शोणितौघतरंगिणी ॥ ६ ॥ परमस्यगलग्राहवस्नेद्ककच्छपाः ॥ वहंति पितृलो
कायसुरासुरभयानकाः ॥ ७ ॥ अथ रक्तासुरो रोषाद्युयुधे विबुधैः सह ॥ तेहन्यमाना विबुधा रक्ताक्षेण महारणे ।
८ ॥ भ्रष्टाः स्वर्गं परित्यज्य त्यक्तप्रहरणा द्रुतम् ॥ करस्थ्रापुरीं प्राप्य यज्ञास्ते भववरप्रभा ॥ ९ ॥ दुर्गांवासमुपाय्या

सार्धंनवदुर्गासमन्विता। आद्यातावन्महालक्ष्मीर्नंदाक्षेमकरीतथा॥ १०॥ शिवदूतीमहारुद्राभ्रामरीचंडमंगला।
रेवतीहरसिद्धिश्चनवैताःपरिकीर्तिता॥ ११॥ एतासांतेस्तुतिचक्रंहिदग्धाःप्रणमताननाः॥ १२॥ अमरपतिमुकुटचुंबि
तचरणांबुजसकलभुवनसुखजननी॥ जयतिजगदीशावंदितासकलामलनिष्कलादुर्गा॥ १३॥ विकटनखदशनभ
षणरुधिरवसाक्तपूरितक्षतनखदहस्ता॥ जयतिनरमुंडमुंडितपिशितसुराहारकचंडी॥ १४॥ प्रस्फुटिताग्निविगलो
त्पलविकटजटाबद्धचंद्रमणिशोभा॥ जयतिदिगंबरभूषासिद्धवटेशामहालक्ष्मीः॥ १५॥ करकमलजनितशोभाप
त्रमनवद्यपद्मवदनाब॥ जयतिकमंडलुहस्तानंदादेवीनतार्तिहरा॥ १६॥ द्विजवसनाविकटमुखरवाफेत्कारोद्दामपूरित
दिशौघा॥ जयतिविकरालदेहाक्षेमंकरीरौद्रभावस्था॥ १७॥ कोटितनुब्रह्मांडोदरसुखरसुखरझंकृतातिनादा॥ जयति
मदनिमिहस्ताशिवदूतीप्रथमशिवशक्तिः॥ १८॥ मुक्ताट्टहासभैरवरुःसहस्ररवभिन्नसकलदिक्चक्रा॥ जयतिभुजगेन्द्र
बंधनशोभितकर्णामहानंदा॥ १९॥ पटुपटहमुरजमर्दलझर्झरीझंकारनर्तितावयवा॥ जयतिमधुव्रतरूपादैत्यहरीभ्रा
मरीदेवी॥ २०॥ शांताप्रशांतवदनासिंहवराध्यानयोगतल्लिष्ठा॥ जयतिचतुर्भुजदेहाचंडकलाचंडमङ्गलादेवी॥ २१
पक्षपुटचंचुघातैःसंचूर्णितविविधशत्रुसंघाता॥ जयतिशितमुशलहस्तावज्ररूपारेवतीभद्रा॥ २२॥ पर्यटतिजगतिहृष्टा

पितृवननिलये च योगिनीसहिता ॥ जयनिहासिस्थिता स्त्रीहर सिद्धिर्वर्द्धिता सिद्धैः ॥ २३ ॥ इति नवदुर्गासंस्तवमनुप
ममार्याभिरपरराट्कृत्वा ॥ इदमूचे सह देवैः स्वाहा हास्मान्सर्वभीतिभ्यः ॥ २४ ॥ पुनः पुनः प्रणम्योचुर्भवानीं सिंहवाहिनीम् ॥ अस्मा
कं भयभीतानां त्राणरणेश्वरतां भव ॥ २५ ॥ देवानां तद्वचः श्रुत्वा दत्वा तेभ्योऽभयं ततः ॥ सिंहारूढा विनिर्गत्य दुर्गाभिः सहिता पु
रा ॥ २६ ॥ युयुधे दानवैः सार्द्धं महासमरदुर्दिनम् ॥ कुमारी विंशतिभुजा घनविद्युल्लतोपमा ॥ २७ ॥ तेऽपि तत्रासुराः प्राप्ताः प्र
वंगरूढरूपिणः ॥ सर्वे तु ध्वराः शूराः सुतप्ततपसस्तथा ॥ २८ ॥ महाग्राहपराक्रान्ता दुष्टमायाविनश्च ये ॥ अस्त्रास्त्ररणहृष्टमि
मानाम तनभ्यनिज्रोघतान ॥ २९ ॥ इडमारी मसक्लेशः प्रलंबो नरकः सुत ॥ कृष्णः पुलोमा हारमेः शंबरो दुन्दुभिः खर ॥ ३० ॥
इल्वलो नमुचिर्भौमो वातापिर्धेनुकः कलिः ॥ मायावतौ बलो वंधुर्मधुकैटभकालजित ॥ ३१ ॥ रक्तः पौंड्रादिदैत्येन्द्राः प्राधान्येन
प्रकीर्त्तिताः ॥ धनगोभिर्जिताः सर्वे सन्नद्धाः स्वायतोऽध्वजः ॥ ३२ ॥ रूपतो वर्णितानां चैव ध्वजास्तेषां पृथक्पृथक् ॥ प्रत्यहरूपं
नराजेऽज्वलिताश्च पावका ॥ ३३ ॥ कांचनाः कांचनापीडाः कांचनस्रगलंकृताः ॥ पताका विविधैर्नीलैरुच्छ्रिता लक्ष
णान्विताः ॥ ३४ ॥ नीलाः पीताः सिता रक्ताः कृष्णास्याः पंचवर्णकाः ॥ तत्र पट्टपटीसौत्राः कृतक्षुद्रककिंकिराः ॥ ३५ ॥ पता
काकान्तिरतलानर्त्तकाश्च वशोभनाः ॥ ततो हलहलारावं चक्रुस्ते दानवोत्तमाः ॥ ३६ ॥ आस्फालयन्ति परितो भेरीरुड्डरगोमु

॥ भवि ॥
॥ २४ ॥

ताम॥ सवादयंस्तानकान्भेरीशंखांश्चवरडिंडिमान॥ ३७॥ रवंतेसमसुधंतमवानीदैत्यदानवाः॥ समाजघ्नुःशरैःशूलैःपरिघैः
शक्तितोमरैः॥ ३८॥ कर्णीकैरिषुभिःकुंतैःशतघ्नीकूटमुद्गरैः॥ आहत्यमानरीयेतानज्वालसमरेऽधिकम॥ ३९॥ सिंहारूढातु
तंदेवीरणमध्येप्रधाविता॥ आच्छिद्याच्छिद्यचिह्नानिध्वजानानाविधास्तथा॥ ४०॥ बलात्कारेणदैत्यानामनाथसमरेहृ
या विहृतानिददौतुष्टादेवेभ्यःशीघ्रचारिणी॥ ४१॥ क्रुद्धैरपिगृहीतानिजयदेवीतिवादिभिः॥ अंबिकानुमतांतुष्टातेषां
चक्रेक्षणात्क्षयम॥ ४२॥ कालरात्रीतितत्रासीन्मारीवनिपपातसा॥ जीवितानिचजग्राहदैत्यानांदेवनंदिनी॥ ४३॥ अथर
क्तासुरंकंठेगृहीत्वापात्यभूतले॥ देवीजग्राहतीक्ष्णेनत्रिशूलेनमहांदिवि॥ ४४॥ सभिन्नहृदयःपश्चाद्भूमौतत्रप्रपोथितः
तथापिदेव्यानिहतःपपातवसमारवे॥ ४५ देवास्तानसुरान्जित्वागत्वाशक्रपुरंजितम॥ दद्युस्तेरणशौंडेलंगमानानम
हाध्वजान॥ ४६॥ यांशंखचक्रंसंगृह्यनवम्यांध्वजचिह्नितान॥ अतोद्यापीहभूपालैर्जयलक्ष्मीस्पृहाहतैः॥ ४७॥ उपोष्य
तेनरैर्भक्तैर्नारीभिश्चैवपांडव॥ ४८॥ युधिष्ठिरउवाच॥ कीदृग्विधानंतस्याःपूजनवम्याब्रूहिमेप्रभो॥ सरहस्यंसमंत्रंचतु
ष्यतेयेनचंडिका॥ ४९॥ ॥ श्रीकृष्णउवाच॥ पौषस्यशुक्लपक्षेयानवमीसंपरिकृता॥ तस्यांस्नात्वाप्रभातेतुपुष्पैरर्चनीया
हरेःस्वसा॥ ५०॥ कुमारीसुभगादेवीसिंहस्यंदनगामिनी॥ ध्वजान्नानाविधान्कृत्वापुरस्तस्याःप्रपूजयेत॥ ५१॥ माल

94

॥ रामः ॥
॥ २४ ॥

तीकुसुमैर्दीपैर्गंधधूपविलेपनैः ॥ बलिभिः पशुभिर्मेध्यैः सुरामांसासवैर्वरैः ॥ ५२ ॥ दधिचंदनकर्पूरभक्ष्यैर्भक्ष्यान्नपि
पाचितैः ॥ मंत्रेणानेन कौंतेय ब्राह्मणोऽप्यथवा नृप ॥ ५३ ॥ मडां भगवतीं कृत्वा विश्वस्य जगतो हितम् । संवेष्टितां स्वय
मनीं ग्रहनक्षत्रमालिनीम् ॥ ५४ ॥ प्रपन्नोहं शिवां रात्रीं भद्रे पारमशीमहि ॥ सर्वभूतपिशाचेभ्यः सर्वसत्वसरीसृपैः
५५ ॥ देवेभ्यो मानुषेभ्यश्च भयेभ्यो रक्ष मां सदा ॥ ततश्चारोपयेद्राजा देवीं तां भवने तथा ॥ ५६ ॥ भोजयेच्च कुमारीश्च
प्रणिपत्य क्षमापयेत् ॥ उपवासेन कुर्वीत एकभक्तेन वा पुनः ॥ ५७ ॥ भक्ताभूपाल यं चास्य भक्तिस्तस्य गरीयसी ॥
एवं ये पूजयिष्यंति भक्त्या भगवतीं नराः ॥ ५८ ॥ तेषां दुर्गादुर्गमार्गे चोरज्वालाग्निसंकटे ॥ रणे राजकुले गेहे युद्धमध्ये ज
ले स्थिते ॥ ५९ ॥ रक्षां करोति सततं भवानी सर्वमंगला ॥ अस्यां वभूव विजयं नवम्यां पांडुनंदन ॥ ६० ॥ भगवत्यास्तु ते
नैषा नवमी सततं प्रिया ॥ धन्या पुण्या पापहरा सर्वोपद्रवनाशनी ॥ ६१ ॥ अनुष्ठेया प्रयत्नेन सर्वान्कामानभीप्सु
भिः ॥ ६२ ॥ देवमर्चयता हितमतिर्मनुजो नवम्यां हेमस्रजं ध्वजवरं सहिरोपयेद्यः ॥ भोगानवाप्य मनसोभिमतान्स्वका
मं देहं विहाय समुपैति स वीरलोकम् ॥ ६३ ॥ ॥ इति भविष्यमहापुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
ध्वजनवमीव्रतवर्णनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ ॥ श्रीकृष्ण उवाच ॥ उल्काख्यां नवमीं राजन्कथयामि नि

नवनीलकुसुंबकैः ५

नोधनात् । याकाश्यपेन कथिता रक्ष्यार्तिनाशिनी ॥ १ ॥ अश्वयुक्कृष्णपक्षे या नवमी लोकविश्रुता । तस्यां स्नात्वा स
मभ्यर्च्य पितृदेवांश्च यथाविधिः ॥ २ ॥ पश्चात्तं पूजयेद्देवीं चामुंडां भैरवप्रियाम् ॥ पुष्पधूपैस्सनैवेद्यैर्मांसमत्स्यसुरासवै ॥ ३
पूजयित्वा स्तवं कुर्यात्स्तोत्रेणानेन मानवः । समारोप्यांजलिं मूर्ध्नि जानुभ्यामवनीं गतः ॥ ४ ॥ ओं ह्रीं चण्डे महामाये चामुंडे मुं
डमालिनी ॥ ऽआरोग्यविजयो देहि देवी नमोऽस्तुते ॥ ५ ॥ कुमारीर्भोजयेत्पश्चान्नवमीतसुकंचेकैः ॥ परिधानैर्भूषणै
श्च भूषयित्वा क्षमापयेत् ॥ ६ ॥ सप्तपंचाथवैकां वा वित्तशक्त्यनुरूपतः । श्रद्धयानुष्यते देवी हतिवीरान्नृपसत्तम ॥ ७ ॥ स
म्यङ्मंडलं कृत्वा गोमयेन शुचिस्मितः ॥ दत्वासने चोपवसेत्तत्त्रं च पुरतो न्यसेत् ॥ ८ ॥ ततः सुसिद्धमन्नं यत्तत्सर्वं परिवे
षयेत् ॥ सघृतं पायसं चापि स्थापयेत्तत्र सन्निधौ ॥ ९ ॥ ततो निषण्णमादाय चातपधमनीं तथा । प्रज्वालयेत्ततो भो
ज्यं यावज्ज्वलति पावकः ॥ १० ॥ प्रज्ञांते भोजनं तस्य त्काल समाप्य प्रमनस्वी चामुंडां हृदये ध्यात्वा ज्ञेह कश्यपरो भवेत् ॥ ११
अनेन विधिना सर्वं मासि मासि समाचरेत् ततः संवत्सरस्यान्ते भोजयित्वा कुमारिकाः ॥ १२ ॥ वस्त्रैराभरणैः पूज्य प्रणिप
त्य क्षमापयेत् ॥ सुवर्णं शक्तितो दद्याद्ब्राह्मणाय शोभनात् ॥ १३ ॥ यश्चैवं कुरुते पार्थ प्रत्येकं नवमीव्रतम् । न तस्य शत्र
वो नार्तिः न राजा न च तस्करः ॥ १४ ॥ भूताः प्रेताः पिशाचा वा भयं जनयंति मयं गृहे ॥ सम्पद्यते प्रजा सिद्धिर्हत्वा तस्य न विद्यते·

96

१५॥ रक्षते तं सदो पुत्र सर्वास्वापत्सु चंडिका ॥ नरो वा यदि वा नारी व्रतमेतत्समाचरेत् ॥ १६ ॥ उल्कावत्तस्य पल्लानां ज्व
लनात्ते सदा हृदि ॥ १७ ॥ नाञ्जष्टकोटरमुखीं प्रकटोग्रदंष्ट्रां कापालिनीं समवलंबितमुंडमालां ॥ उल्कावृते पुपुहृष्टो
नवमी भवानीं संपूज्य कस्य हृदये न वशं करोति ॥ १८ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्व्वणि श्रीकृष्णयुधिष्ठि
रसंवादे उल्कानवमीव्रतवर्ण्णनं नाम षष्ठितमोऽध्यायः ॥ ६० ॥ श्रीकृष्ण उवाच ॥ पूर्वं कृतयुगस्यादौ भृगो भी
र्या महासती ॥ दिव्या रामा ग्नमेरम्या गृहकार्ये कृतस्मरा ॥ १ ॥ रम्यक्षमा भृगोर्नित्यं हृदयेपि न कारिणी ॥ तस्यां मुनिर्महा
तेजा अग्निहोत्रं निधापयत् ॥ २ ॥ विप्रो स्त्रामासादानवानां कुलज्वाला समाकुलम् ॥ मुल्कायुक्तं स्थितं वा भ्र्व समर्व्व मुनिपुंग
उर्घम् ५ वः ॥ ३ ॥ रत्नानि क्षेपकं सर्वं दिव्यप्रायं महातपाः ॥ जगाम हिमवत्पार्श्वे हरं तोषयितुं हरः ॥ ४ ॥ संजीवनी ऽतो नित्यं
कण्ठोर्ध्वमम्बधोमुखः ॥ पपौ दानवराजस्य विजयाय पुरोहितः ॥ ५ ॥ आनगामगते तस्मिन्नाहदेनाभिनो हरिः । समभ्येत्य
जग्मनं चक्रे चक्रेणोत्कृत्तकंधरम् ॥ ६ ॥ गतः कुपितरसंपन्नं लोहितार्णवसंनिभम् ॥ दृष्ट्वासरवलं सर्वं निहतं भिक्षुनात
दा ॥ ७ ॥ दिव्यासंज्ञां मुक्तासामर्षि कृंसास्ताविलेपना ॥ यावल्लोत्स्वर तेवाचं चक्रेणोत्कृत्तकंधरम् ॥ ८ ॥ तावल्लिपा
तयामास शिरस्तस्याः सकुंडलम् ॥ प्राप्य संजीवनीं विद्यां यावद्यायात्स सौ मुनिः ॥ ९ ॥ तावत्तस्यै स्वाल्लापरूपस्य रूप

तिस्मनिपातितनम् ॥ रोषास्फुरत्ताम्रवहरिंभृकुटीकुटिलाननः ॥ १० ॥ अवज्ञ्यभावभाविल्लाढिभ्यस्यहितकारणात् ॥
यस्मात्त्वयाहता दैत्या ब्राह्मणामत्परिग्रहाः ॥ ११ ॥ तस्मात्त्वं मानुषे लोके दशावतारनामिष्यति ॥ अतोऽयं मानुषे लोके रक्षार्थं
च महीक्षिताम् ॥ १२ ॥ अवतारं वकाराहं भयोभयः पथग्विधम् ॥ पूर्वोक्तैः कारणैः पार्थ अवतीर्णो महीतले ॥ १३ ॥ सांतरा
येऽर्च्चयिष्यंति तेषां वासस्त्रिविष्टपे ॥ ॥ युधिष्ठिर उवाच ॥ ब्रूतं दशावताराख्यं कृष्ण ब्रूहि सविस्तरम् ॥ १४ ॥ समंत्रं सरह
स्यं च सर्वपापप्रणाशनम् ॥ ॥ श्रीकृष्ण उवाच ॥ प्रोष्ठपदे सिते पक्षे दशम्यां नियतः शुचिः ॥ १५ ॥ स्नात्वा जलाशये स्वच्छे
पितृदेवादितर्पणम् ॥ कृत्वा कुरुकुलश्रेष्ठ गृहमागत्य मानवः ॥ १६ ॥ गृहीयाद्धान्यचूर्णस्य द्धिहतप्रसृतीत्रयम् ॥ कणे
ण पाचयेत्तांतु पूपं सज्ञं घृतसंस्कृतम् ॥ १७ ॥ वर्षे वर्षे दिनेतस्मिन्यावद्वर्षाणि वै दश ॥ प्रथमे पूरिकान्वर्षे द्वितीये घृत
पूरकान् ॥ १८ ॥ तृतीये भृकंसारं चतुर्थे मोदकाञ्शुभान् ॥ सोहालकान्पंचमेऽथ षष्ठेऽथ खण्डवेष्टकान् ॥ १९ ॥
सप्तमेऽथ कोकरसान्पूपांश्च तथाष्टमे ॥ नवमे कर्णवेष्टांश्च दशमे खण्डकाञ्शुभान् ॥ २० ॥ दशाधेनोर्दशाहरेदशावि
प्रायदापयेत् ॥ क्रमेण भक्षयित्वा च यथोक्तं भरतर्षभ ॥ २१ ॥ अर्द्धं द्विपेद्धेदेवस्य अर्द्धं च द्विजातये ॥ स्वतन्त्वार्घमश्नी
याद्गत्वा रम्ये जलाशये ॥ २२ ॥ दशावतारानभ्यर्च्य पुष्पधूपविलेपनैः ॥ मंत्रेणानेन मेधावी हरिभिर्भूस्य वारिणा ॥ २३

॥ एम ॥
॥ २६ ॥

96

मत्स्यं कूर्मं वराहं च नरसिंहं त्रिविक्रमम् ॥ श्रीरामं रामकृष्णं च बुद्धं चैव सकल्किनम् ॥ २४ ॥ गतोऽस्मि शरणं देवं हरिं
नारायणं प्रभुम् ॥ प्रपन्नोऽस्मि जगन्नाथं स मे विष्णुः प्रसीदतु ॥ २५ ॥ छिनत्तु वैष्णवीं मायां भक्त्या प्रीतो जनार्दनः ॥ श्वे
तद्वीपं नयत्यस्मात् तस्मात् तं मनसि निवेशयेत् ॥ २६ ॥ एवं यः कुरुते पार्थ विधिनानेन सुव्रत ॥ दशावतारनामाख्यं न स प्राप्
फलं स्मृतम् ॥ २७ ॥ अथ यतेयान्विता लोकान् गुरुषाणां दशादश ॥ नाभ्छिन्नति न संदेहः शार्ङ्गधृग्हरते हरिः ॥ २८ ॥ संसारसा
गरे घोरे मज्जन्तं तं समाहरि ॥ श्वेतद्वीपं नयत्याशु व्रतेनानेन तोषितः ॥ २९ ॥ किं न स्यान्न भवेल्लोके यस्य तुष्टो जनार्द
नः सोऽहं जनार्दनो राजन्कालरूपी धरासुतः ॥ ३० ॥ मर्त्यलोके स्वयं पार्थ भूभारोत्तारकारणम् ॥ यास्यी व्रतमिदं पार्थ च
रिष्यति मयोदितम् ॥ ३१ ॥ सा न लभ्याऽचलया युक्ता मर्त्यपुत्रसमन्विता ॥ मर्त्यलोके चिरं स्थित्वा विष्णुलोके महीयते ॥
३२ ॥ विष्णुलोकात्पुनर्लोकं ततो याति परं पदम् ॥ ये पूजयन्ति पुरुषाः पुरुषोत्तमस्य मत्स्यादिकं तु दशमीषु दशावता
रान् ॥ मर्त्या दशास्वपि दशासु सुरं विहस्य ते यान्ति यानमधिरुह्य सुरेशलोकान् ॥ ३३ ॥ ॥ इति श्रीभविष्ये महा
पुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दशावतारचरित्रव्रतं नाम त्रिषष्टितमोऽध्यायः ॥ ६३ ॥ ॥
श्रीकृष्ण उवाच ॥ पार्थ पार्थिववृन्दानां मुखपङ्कजषट्पदे ॥ भणिष्या वहितोवञ्छितवाशादशमीव्रतम् ॥ १ ॥

नलनामाभवत्पूर्वं निषधेषु महीपते ॥ स भ्रात्रा निर्जितो राज्ये निष्करेणेतिनः श्रुतम् ॥ २ ॥ अक्षैर्द्यूतेन राजेन्द्र निर्ययौ भा
र्यया सह ॥ वनं प्रतिभयं भ्रष्टं झिल्लीकगणनादितम् ॥ ३ ॥ स गत्वा प्रत्यहोरात्रं जलमात्रेण वर्त्तयन् ॥ ददर्श वनमध्यस्था
न्छकुनीन्कांचनच्छवीन् ॥ ४ ॥ ग्रहीतुमिच्छंस्तान्राजन्स समाच्छाद्य स्ववाससा । समापेतुः खगास्तूर्णं गृहीत्वा वसनं शु
भम् ॥ ५ ॥ आससाद ततो भ्रांतो कांश्चिद्धृतवासाः सुदुःखितः ॥ दमयंतीसमां प्राप्य निद्रयापहृतां सत ॥ ६ ॥ दुःखाद्दुःखस्य
गतत्वान्त्यागतः प्राग्धनेश्वरम् । गते तु नैषधे भैमी प्रबुद्धेवाविनानना ॥ ७ ॥ अपश्यंती नलं वीरं वीरभीमसुतावने ।
इतश्चेतश्च बभ्राम हा हेति रुदती मुहुः ॥ ८ ॥ दुःखशोकसमाक्रांता नलदर्शनलालसा ॥ आससाद दिनैः कैश्चित्ता चैद्यपुर
मंजसा ॥ ९ ॥ उन्मत्तवत्परिवृता शिशुभिः कौतुकाकुलैः ॥ सा दृष्टा चेदिराजस्य जनन्याजनवेष्टिता ॥ १० ॥ चंद्रलेखेव पति
ता भूमौ भासितदिङ्मुखा ॥ आनाय्य सा स्वभवनं दृष्ट्वाकान्तं वरानने ॥ ११ ॥ उवाच भैमी सव्रीडं सैरंध्रीं मा निबोधत । न धा
वयेयं वरारोहे नोच्छिष्टं भक्षयाम्यहम् ॥ १२ ॥ यदि प्रार्थयते कश्चिद्दण्ड्यस्ते सो प्रतं भवेत् । प्रतिज्ञयानया देवि निवत्स्येयं त
व वेश्मनि ॥ १३ ॥ एवमस्त्वनवद्यांगि राजमाता प्रजावताम् ॥ एवंविधानन्दवने कंचित्कालमनिंदिता ॥ १४ ॥ उवास
वसनार्द्धेन प्रच्छन्ना ते किल द्विजः ॥ आनयामास समुदितो दमयंतीं गृहं पितुः ॥ १५ ॥ माता पित्रा समायुक्ता सुतैर्भ्रातृभिरेव

97

च ॥ दमयंतीतथाप्याप्तेदुःखंनैषधवर्जिता ॥ १६ ॥ प्रोवाचविमनाहृदयबंधुनंदानमथापिवा ॥ कथयध्वंयथामेस्या
दिष्टेनसहसंगमः ॥ १७ ॥ तत्रैतिहासकुशलोविप्रःप्रोवाचबुद्धिमान् ॥ भद्रेत्वमाशादशमींकुरुष्वेप्सितसिद्धिदाम् ॥ १८
चकारसैवंतन्वंगीयत्नागणविदातदा ॥ ख्यातनामाख्यातोनाग्निशुपादमनेनपुरोधसा ॥ १९ ॥ व्रतस्यास्यप्रभावेनदमयंत्यान
रोत्तमः ॥ संजातःसुहृदोःस्वर्थंमंत्रीसहसमागमः ॥ २० ॥ युधिष्ठिरउवाच ॥ कथमाशादशम्येषासांगोविदक्रियते
कदा ॥ सर्वमेतत्समाचक्ष्वमासपोह्यसियादव ॥ २१ ॥ श्रीकृष्णउवाच ॥ राज्याशयाराजपुत्रःकृष्यर्थंतुकृषीवलः
भार्यार्थंतुवणिक्पुत्रःपुत्रार्थंतुगुर्विणीतथा ॥ २२ ॥ धर्मार्थकामसंसिद्ध्यैलोककन्यावरार्थिनी ॥ यष्टुकामोद्वि
जवरोरोगीरोगापनुत्तये ॥ २३ ॥ चिरप्रवासितेकांतेकालेनचनिपीडिता ॥ एतेष्वन्येषुकर्त्तव्यमाशाव्रतमिदं
सदा ॥ २४ ॥ यदायस्याभवेदर्त्तिंकार्यंतेहिनदाव्रतम् ॥ शुक्लपक्षेदशम्यांतुस्नात्वासंपूज्यदेवताः ॥ २५ ॥ नक्तंद
शाशाःसंपूज्याःपुष्पालक्तकचंदनैः ॥ गृहांगणेलेखयित्वायवैःपिष्टातकेनवा ॥ २६ ॥ दत्वाघृताक्तंनैवेद्यं
पुनःकार्यंनिवेदयेत् ॥ आशाभ्याशाःसदासंतुसिद्ध्यंतांचमनोरथाः ॥ २७ ॥ भवतीनांप्रसादेनसदाकल्याण
मस्त्विति ॥ एवंसंपूज्यभुंजीतदत्वाविप्रायदक्षिणाम् ॥ २८ ॥ अनेनक्रमयोगेनमासिमासिसमाचरेत् ।

॥ भविष्य ॥
॥ ९८ ॥

यावन्मनोरथः पूर्णस्ततः प्रभृत्यस्म्युपस्थिता ॥२९॥ मासि पूर्णे च षण्मासे वर्षे वर्षद्वये गते ॥ सौवर्णीः कारये-
द्राज्ञी रौप्याः पिष्टान्नकेन वा ॥३०॥ ज्ञातिबंधुजनैः सार्द्धं स्नातः सम्यगलंकृतः ॥ पूजयेन्मंत्रसंदर्भै रोलि ध्यात्वा ग-
हं गतो ॥३१॥ नवसंनिहितः शांकः सुरासुरनमस्कृतः ॥ पूर्वा चन्द्रगणसहिता महेन्द्रादिदेवते नमः ॥३२॥ आग्नेः प-
रिग्रहदर्यैस्त्वमाग्नेयीति पठन्नहे ॥ तेजोमयी पराशक्तिः राज्ञे वीवरदा भव ॥३३॥ देवराजं समासाद्य लोकः संयम-
यस्य सौ ॥ तेन संयमनी याम्या मियाम्ये कामदा भव ॥३४॥ खड्गं सहार्त्तिनिविकृता नैर्ऋतिस्त्वमुपाश्रिता तेन नै-
र्ऋतनाम्नी त्वं कृतवान्मवामसदा ॥३५॥ त्वय्यास्ते भवता धारवरुणो यादसां पतिः ॥ द्रव्यकामार्थसिद्ध्यर्थं
वारुणि प्रभवा भव ॥ आधिष्ठितासि यस्मात्त्वं वायुना जगदायुना ॥३६॥ वायव्ये त्वमतः ख्यातिंनिनिस्तं यक्ष नमो
नमः ॥ कौवेरो वहितसौम्याश्च प्रख्याता त्वमथोत्तरा ॥३७॥ हे ईशानी जगदीशेन शंभुना त्वमलंकृता ॥ अतस्त्वं शि-
वसान्निध्यं देवि देहि शिवे नमः ॥३८॥ सर्पाष्टककुलेन त्वं सेवितासि तथाप्यधः ॥ नागांगनाभिः सहिता हिता-
नः सर्वदा भव ॥३९॥ सप्तलोकैः परिगता सर्वदा त्वं शिवायतः ॥ सनकाद्यैः परिहृता ब्राह्मी निह्नानया कुरु ॥४०॥
नक्षत्राणि च सर्वाणि ग्रहास्ताराग्रहास्तथा ॥ नक्षत्रमातरो येव भूतप्रेतविनायका ॥४१॥ सर्वेममेव सिद्ध्यर्थे

98

॥ रामः ॥
॥ ९८ ॥

भवंतु प्रणताः सदा ॥ एभिर्मंत्रैः समभ्यर्च्य पुष्पधूपादिना ततः ॥ ४२ ॥ वासोभिरभिसंस्थाप्य फलानि विनि-
वेदयेत् ॥ ततस्तूर्यध्वनिघोषेण गीतमंगलनिःस्वनैः ॥ ४३ नृत्यंतीभिर्वरस्त्रीभिस्तां रात्रिमतिवाहयेत् ॥ कुंकुमक्षो-
दतीवैलतादानमानादिभिः सुखम् ॥ ४४ ॥ प्रभाते वेदविदुषे सर्वं तत्संनिपादयेत् ॥ अनेन विधिना सर्वं क्षमाप्य प्रा-
णिपत्य च ॥ ४५ ॥ भुंजीत मित्रसहितः सुहृद्बंधुजनैरपि ॥ य एतं कुरुते पार्थ द्वादशीव्रतमादरात् ॥ ४६ ॥ स सर्वकाम-
माप्नोति मनसाभीप्सितं नरः ॥ स्त्रीभिर्विशेषतः कार्यं व्रतमेतद्युधिष्ठिर ॥ ४७ ॥ लघुवित्ता यतो नार्यः सदा काम-
परायणाः ॥ धन्यं यशस्यमायुष्यं सर्वकामफलप्रदम् ॥ ४८ ॥ कथितं ते महाराज मया व्रतमनुत्तमम् ॥ ४९ ॥ ये
मानवा मनुजपुंगव कामकामाः संपूजयंति द्वादशी पुमसदा दशाशाः ॥ तेषां विशेषनिहता हृदये प्रकाममसमाशाः
फलं त्यलमलं बहुनोदितेन ॥ ५० ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अ-
गाद्वादशीव्रतं नाम चतुष्षष्टितमोऽध्यायः ॥ ६४ ॥ ॥ युधिष्ठिर उवाच ॥ अहं त्वागस्करः पापः पृथिवीक्षयका-
रकः ॥ पारिपच्छामि गोविंद त्वां नमस्कृत्य पादयोः ॥ १ ॥ गुह्याद्गुह्यतरं ब्रूहि व्रतं किंचिदनुत्तमम् ॥ नरा मियेन
पापौघं भीष्मद्रोणवधार्जितम् ॥ २ ॥ श्रीकृष्ण उवाच ॥ आसीत्पुरे नरो नाम्ना विदर्भायां कृशध्वजः ॥ सोंतःपुरस्

॥ भविपु ॥
॥ ९९ ॥

तोयभ्यवक्रेणाप्यमनंदिनः ॥ ३ ॥ जघान तापसं सोऽथ पुत्रमादान्मृगयांगतः ॥ मृगं मत्वा महारण्ये ब्राह्मणं दैवमो-
हितः ॥ ४ ॥ तेन कर्मविपाकेन देहान्ते नरकं गतः ॥ तत्रासौ यातनाघोरा अनुभूयातिपीडितः ॥ ५ ॥ तस्मादिहागतो भ-
र्त्ते रौद्रो विषधरोऽभवत् ॥ अदष्टात्मोऽपि राजेन्द्र ब्राह्मणं वरतोरणा ॥ ६ ॥ लब्ध्वा सहस्रपंचत्वंजगामद्विजसंप्रुतः ॥
विपन्नस्तु ततः सिंहो द्वितीयेऽभवत्सुदारुणः ॥ ७ ॥ विदारितमृगो हिंस्रो नानासत्वभयंकरः ॥ जघानासौ पुनः श्वे-
राजन्मं मृगयागतम् ॥ ८ ॥ ततोऽपि वज्रभिःश्वा स्वैर्जलोके निपातितः ॥ पुनर्व्याघ्रो वभूवासौ तृतीयेऽपि भवान्तरे ॥ ९
तीक्ष्णपादनखो घातज्ञापादितमृगोत्कयः ॥ तेनापि वैष्णवो निधनं नीतः किंचिद्दिनान्तरम् ॥ १० ॥ सनीतः कृमिराशि-
त्वं लोकैः स्वानतिपातनात् ॥ संजातस्तु महानक्रो नरवराहतजंतुरुकः ॥ ११ ॥ जघान बालं वेंशलात्सोमस्नमयानुया-
त् ॥ पंचमे मकरो जातः समुद्रेऽतिभयंकरः ॥ १२ ॥ स्त्रियं जघान नरस्तीं स्नातुकामामथागताम् ॥ प्रभाते शंकरस्याग्रे
शशांकग्रहणे निशि ॥ १३ ॥ तत्रापि वडिशांर्दत्वा जनैः प्राणैर्वियोजितः ॥ पुनः षष्ठे भवे जातः पिशाचः पिशिताशनः ॥
१४ ॥ क्रूरश्छिद्रपरः क्रूडो नरप्राणवियोजकः ॥ सोऽवतीर्णानास्यांगं कर्षयामास कस्यचित् ॥ १५ ॥ मंत्रेणाकृष्यमि-
ष्टेन तान्त्रिकेन वश्युः कृतः ॥ सप्तमे स पुनर्जातो दुर्निरीक्ष्यवपुर्भुजाम ॥ १६ ॥ क्रूरदंष्ट्रः करालास्यो मांसशोणितभोजनः ॥ दि

॥ रामः ॥
॥ ९९ ॥

99

गोर्जरम् १

त्वामामनुभ्रमसीक्षुधामिक्षो ब्रह्मराक्षसः ॥१७॥ सराकुंजर्जरं भ्रत्संसर्वचक्रे विषादित ॥ सोक्रम्य भीमसदासेन राज्ञा
राक्षसदारुणा ॥१८॥ समारोप्य धनुः संध्ये बलात्तेन निपातितः ॥ मृतोऽभवद्व्याघ्रसमः स्वजन्मन्यष्टमे भुवि
१९॥ वनेचराणां क्रूराणां गोब्राह्मणानिधनंगतः ॥ ततो हस्तीव मद्भुको मातंगेन धनुष्मता ॥२०॥ एकादशेऽपि
पांचालो भव मत्स्योऽतिभीषणः ॥ दुर्द्धर्षकेशोतिरक्ताक्षो जातो कृष्णतनुर्दृढः ॥२१॥ पापोऽधर्मध्वजो रक्षो देवतानि-
न्दमात्यधक् ॥ सदर्पपाशिकेनैव वृक्षाग्रे ह्यवलंवितः ॥२२॥ द्वादशेऽसप्तजन्मानि पुक्कलक्लेशभाजनः ॥ भक्ष्यलो-
भाद्विलग्नो व्याधेन विनिपातितः ॥२३॥ तेन चासौ कृतं पूर्वं तारकद्वादशीव्रतम् तत्प्रभावाज्जातोऽपि दुष्टयो-
नौ पुनः पुनः ॥२४॥ अवाप शीघ्रं पंचत्वं संसारभवसागरे ॥ पुनरेवाभवद्राजा विदर्भायां सुधार्मिकः ॥२५॥ भूय-
श्चोपोषितानेन तारकद्वादशी शुभा ॥ पश्यतां व्रतमाहात्म्यं जातो जातः पुनः पुनः ॥२६॥ व्रतप्रभावाद्भुवने भुक्त्वा
राज्यमकंटकम् ॥ प्राप विष्णुपुरे स्थानं यावदाभूतसंप्लवम् ॥२७॥ युधिष्ठिर उवाच ॥ कथमेतद्व्रतं कृष्ण कर्तव्यं पु-
रुषोत्तम ॥ स्त्रीभिर्वा भर्तृकामेन स्नानदानजपादिकम् ॥२८॥ श्रीकृष्ण उवाच ॥ मार्गशीर्षे सिते पक्षे गृहीत्वा
द्वादशीव्रतम् ॥ अकृत्रिमजले स्नानमपराह्णे समाचरेत ॥२९॥ प्रणम्य भास्करायाथ कृत्वा देवार्चनं तथा ॥ होमं च

तावत्स्थानतंयावदस्तमितोरविः ॥ ३० ॥ ततोभक्त्याफलैःपुष्पैर्गंधधूपविलेपनैः ॥ सजलंसाक्षतंकृत्वा
सहिरण्यंशुभैःफलैः ॥ ३१ ॥ रम्येताम्रमयेपात्रेजानुभ्यांधरणींगतः ॥ गृर्ह्यामुरवेःप्रदोपाग्रेमूर्ध्निकृत्वार्घ्यभाज
नम् ॥ ३२ ॥ भूमौतुमंडलंकृत्वागोमयेनसतारकम् ॥ चंदनेनसमालिख्यपुष्पैर्वंहिगगनोन्मरवेः ॥ ३३ ॥ सहस्र
शीर्षामंत्रेणभमौशान्त्वाग्नानैःस्वयम् ॥ तारकाणांकृतेश्रेष्ठदद्यादर्घ्यंमतंद्विजः ॥ ३४ ॥ पञ्चस्वथमसुक्षिप
दयाद्विप्रायदक्षिणाम् ॥ क्रमेणसर्वंनिर्वर्त्यभोज्यंभोज्यंनिशागमे ॥ ३५ ॥ मार्गशीर्षेरवेःस्वाद्यंपौषेसोह
लकंतथा ॥ तिलतंडुलकंमाघेगुडापूपंचफाल्गुने ॥ ३६ ॥ मोदकांश्चैत्रमासेतुवैशाखेरवेंडवेष्टकम् ॥ ज्येष्ठेस
क्तुभक्तैःपात्रैराषाढेगुडपूरिकैः ॥ ३७ ॥ श्रावणेमधुशीर्षैरानभस्येपायसेनच ॥ घृतपर्णैश्चाश्वयुजेकांसा
रैःकार्तिकेक्रमात् ॥ ३८ ॥ एभिर्द्वादशभिर्वर्षैर्भोजयित्वाद्विजान्स्वयम् ॥ भुंजीतमजताराजेंडपश्चादेवंक्षमा
पयेत् ॥ ३९ ॥ समाप्तेतुव्रतेकृत्वाराजतंतारकागणम् ॥ हेम्नावापूर्वविधिनापूजयित्वाक्षमापयेत् ॥ ४०
कुंभाद्वादशशानन्याःसोदकामोदकान्विताः ॥ ब्राह्मणायपरिधानंचपद्मरागंसकुंचकम् ॥ ४१ ब्राह्मणीव
त्नालंकारंलक्षपुष्पोपशोभितं ॥ चालकेनोपवीतंचपुष्पंदत्वाक्षमापयेत् ॥ ४२ ॥ अनेनविधिनाराज

॥ रामः ॥
॥ १०० ॥

100

न्यःकरोतिव्रतंनरः ॥ नारीवाभरतश्रेष्ठभक्तिभावपरःसदाः ॥ ४३ ॥ नक्षत्रलोकंव्रजतिविमानेनार्कवर्चसा ॥
अप्सरोगणगंधर्वयक्षविद्याधरामरैः ॥ ४४ ॥ सहस्रमर्त्तास्वर्लोकेपूज्यमानोदिवाकरैः ॥ वसेत्कल्पायुतंयावत्तन
र्विलपुरंव्रजेत ॥ ४५ ॥ एतद्व्रतंपुराचीर्णम्नाग्माराज्ञाप्रियोमया ॥ सीनयादमयंत्यावहृकिमराणासत्यभामया ४६
मेनयारंभयास्वर्गेउर्वश्यादेवदत्तया ॥ अन्याभिरपिनारीभिःपुरुषैश्चपथग्विधैः ॥ ४७ ॥ चीर्णमेतद्व्रतंपार्थसर्व
पापभयापहम् ॥ ४८ ॥ जन्मांतरेपिकृतानिहरत्यघानिपासंदहत्यहरहःसुकृतोपयोगात ॥ साद्वादशीजगतिना
रकनामधेयानन्तानितियत्नविदधातिकृतामनुष्यैः ॥ ४९ ॥ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्ण
युधिष्ठिरसंवादेनारकद्वादशीव्रतंनामपंचषष्टितमोऽध्यायः ॥ ६५ ॥ युधिष्ठिरउवाच ॥ भगवन्ब्रूहिमेसम
गरस्यद्वादशीव्रतम् । सप्राशनंसोपवासंसरहस्यंसमंत्रकम् ॥ १ ॥ श्रीकृष्णउवाच ॥ कौंतेयपयस्राचीर्णासी
नयावनसंस्थया ॥ व्रतंराघववाक्येनप्रशस्तंदोषवर्जितम् ॥ २ ॥ लोपामुद्रालयेसाध्वीमुनिपत्नीवकृव्रताः ॥ भोजि
तास्तर्पिताःसर्वैरादरैःसर्वकामिकैः ॥ ३ ॥ पद्मिनीपत्रविस्तीर्णेसोपदंशैर्यथानवैः ॥ भक्ष्यैर्भोज्यैस्तथालेह्यैश्चो
ष्यैश्चापिपदक्रया ॥ ४ ॥ नामिहैकमनाःपार्थस्मरणष्यारस्यद्वादशीम् ॥ मार्गशीर्षासितेपक्षेएकादश्यांदिनोद

प्रपापैः ४ सात्मै

ये ॥५॥ स्नात्वा नरः सोपवासः कृत्वा पूजां जनार्दने ॥ गंधपुष्पाक्षतैर्धूपैर्दीपैर्जागरणैर्निशाम् ॥६॥ नीत्वा प्रभाते ग
त्वा च वने वेदांगपारगान् ॥ भोजयित्वा फलप्रायं स्वयं भुंजीत वाग्यतः ॥७॥ पंचगव्यं प्राशयित्वा पूर्वमेवाथ तद्दि
ने ॥ वर्षमेकं क्रमं पूर्णं पारयित्वा युधिष्ठिर ॥८॥ श्रावणे कार्तिके मासे चैत्रे वाथ समर्चिते ॥ सोपदंशैः पत्रशाकैर्लि
लेह्याकुलिकादिभिः ॥९॥ अपूपैः खण्डवेष्टैश्च पूरीतैः सिंहकेसरैः ॥ धूलीमुखैरमृतफलैः खाडुकोकरसैः शुभैः
१०॥ शीतलैस्सर्पपयैर्द्विजानर्कपुष्पैः सुमालकैः ॥ दधिक्षीराज्यपायासैश्चान्नैर्जानकरंजितैः ॥११॥ कर्पूररसवधितै
श्च मधुरैः पानसौनमैः ॥ वज्रकृष्णं वनं गत्वा मृत्स्या दुसति लंघितवम् ॥१२॥ सुखोसतनो पविष्टांश्च पृाग्गृहस्थव कु
चीन् ॥ भोजयेद्दत्वा वधौवां मुनीनाराध्य वासिनः ॥१३॥ एकदंडी त्रिदंडी च गृहस्थांश्चापि सुव्रतान् ॥ बाह्मणो वि
विधाः सपत्नीकपत्न्यः पतिव्रताः ॥१४॥ चार्वंगयश्चार्चिताः स्नाताः सर्वाः कपर्दशोभनाः ॥ सुवस्त्राः कुंकुमाक्तांगाः सु
गंधकुसुमार्चिताः ॥१५॥ सर्वे वा भोजनीयास्ताः स्नात्वाश्चादित्यसप्तदेवताः ॥ वासुदेव जनार्दन दामोदर मधुसूदनाः ॥
१६॥ पद्मनाभ कृष्ण विष्णु गोविंद त्रिविक्रमाः ॥ श्रीधरश्च हृषीकेशाः पुण्डरीकाक्ष आदिवाराहाः ॥१७॥ एभिर्नामा
भिर्मंत्रैर्नमस्कारांतयोजितैः ॥ गंधवस्त्रदनसंवहिं धूपं दत्वाथ पथकपथक ॥१८॥ भोजयित्वाथ मान्यानि दद्यात्ताभ्यः

सुदक्षिणाम् ॥ प्रणम्य प्रार्थयेद्भक्त्या विष्णुर्मे प्रीयतामिति ॥ १९ ॥ ततो भुंजीत सहितं भृत्यैः प्रेष्यजनेन च ॥ आग
ताभ्यागतैर्लोकैः सुहृत्संबंधिबंधुभिः ॥ २० ॥ एवं कौंतेय कुरुते योऽरण्यद्वादशीं नरः ॥ स देहांते विमानस्थो दि
व्यकन्यासमावृतः ॥ २१ ॥ यातिस्तानि समायुक्तः श्वेतद्वीपं हरेः परम् ॥ यत्र लोकाः पीतवस्त्राः श्यामदेहाश्चतुर्भु
जाः ॥ २२ ॥ शंखचक्रगदापद्मचारुहस्ताः सकौस्तुभाः ॥ गरुडासनाः साभरणा मुकुटोत्कटकुंडलाः ॥ २३ ॥ नीलोत्प
लोद्दामपद्ममालयालंकृतोरसः ॥ लक्ष्मीधरा मेघवर्णाः कूर्पांगदभूषणाः ॥ २४ ॥ तिष्ठंति विविधास्तास्मास्येयावदाभू
तसंप्लवम् ॥ तस्माद्देशान्महातेजाः पार्थिवानां नृपपूजिताः ॥ २५ ॥ मर्त्यलोके वीर्णमंतः संभवंति नरोत्तमाः ॥ ततो या
नि परं स्थानं मोक्षमार्गं शिवं ध्रुवम् ॥ २६ ॥ यत्र गत्वा न शोचंति न संसारे भ्रमंति च ॥ २७ ॥ ये द्वादशीमुपवसंति
सितामरण्यनाम्नीं च ते द्विजवरानथ भोजयंति ॥ साध्व्यः स्त्रियः सुचरिता मरणाश्च तेषां विष्णोः प्रसादमुपयां
ति मोक्षम् ॥ २८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अरण्यद्वादशीव्रतं ना
म षट्नवतितमोऽध्यायः ॥ ९६ ॥ ॥ युधिष्ठिर उवाच ॥ घनावृते वरे देवे वर्षाकाले ह्युपस्थिते ॥ मयूरकेका
कलिते दर्दुरारावपूरिते ॥ १ ॥ कलस्त्रियः प्रपच्छंति कस्मात्लंकाऽत्र देवता ॥ किं व्रतं कृष्ण विख्यातमर्त्यलोक

॥ भवि ॥
॥ १०२॥

स्यांतिथौभवेत॥२॥ श्रीकृष्णउवाच॥ प्रवृत्तेश्रावणेमासिकृष्णापक्षेतुपस्थिते॥ एकादश्यांभुविभूत्वासर्वौष
धिजलैःशुभैः॥३॥ माषचूर्णेनराजेंद्रकुर्यादिंडरिकाश्चनम॥ मोदकांश्चतथापंचघृतपक्वान्सुनिर्मलान॥४॥ नर
मेकैकमुद्दिश्यततोगत्वाजलाशयम॥ दुष्टवादोविरहितंसततोयेजलेशैर्जनम॥५॥ नत्सोवपुलिनेरप्सोत्रुष्यान्ते
गोमयादिना॥ कृत्वामंडलकंवृत्तंपिष्टकादिभिरर्चितम॥६॥ चर्चितंगंधकुसुमैर्धूपदीपाक्षतोज्वलम॥ तत्र
चंद्रंलिखेद्देवरोहिण्यासहितंविभुम॥७॥ अर्चयेच्चतमापौवैमंत्रेणानेनभाविनः॥ सोमराजन्नमस्तुभ्यंरोहि
ण्यैतेनमोनमः॥८॥ महासतिमहादेविसंपादयममेप्सितम॥ एवंसंपूज्यतस्याग्रेनैवेद्यंदेयमर्चितम॥९॥
नत्वैवब्राह्मणोदद्यात्सोमोमेप्रीयतामिति॥ प्रीयतामितिमेदेवीरोहिणीसहितप्रिया॥१०॥ एवमुच्चार्यदत्वा
चततोःतज्जलमाविशेत॥ कण्ठांतेकटिमात्रेवाजानुत्कंतेवाजलाशये॥११॥ ध्यायेन्मनसासोमंरोहिणीसहि
तंतदा॥ यावत्समस्तंनक्षत्रंमुक्त्वाचांतस्तदेस्थितः॥१२॥ निष्क्रम्यचततःस्नात्वाततोविप्रायभोजनम। दक्षि
णासहितंदेयंनिश्चयंवाविकल्पयेत॥१३॥ अनन्याशाक्त्यायथाचित्तंतनपाणितंतथातथा॥ यःकरोतिनरो
राजन्नारीवाथकुमारिका॥१४॥ वर्षेवर्षेविधानेनपार्थेदंरोहिणीव्रतम॥ इहलोकेचिरंस्थित्वाधनधान्य

102

॥ रामः ॥
॥ १०२॥

समाकुले ॥१५॥ गृहं भ्रमे भ्रमांल्लब्धा पुत्रपौत्रादिसंततिम् ॥ ततः सुतीर्थमरणांत तो ब्रह्मपुरं ब्रजेत ॥१६॥ न
स्माद्धिन्दुपुरं पार्थ नतोरुडुपुरं भुमम ॥१७॥ रोहिणीशशाधराभिमता हिताव किं कारणं भगवन्नरेंद्र निवेद
यामि ॥ संपिष्टमापरविनैं दुरिकन्यानं यदुक्तं जन्मेगुड घतेन फलेन देनत ॥१८॥ ॥ इति श्रीभविष्ये महापु
राणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रोहिणीचंद्रव्रतं नाम सप्तषष्टितमोऽध्यायः ॥६७॥ ॥ युधिष्ठिर
उवाच ॥ अवियोगव्रतं ब्रूहि मम यादवनंदन ॥ विधानं तस्य कीदृक्च किं पुण्यं कात्र देवता ॥१॥ श्रीकृष्ण उ
वाच ॥ शृणु पार्थ प्रयत्नेन कथ्यमानं यथाखिलम् ॥ अवियोगव्रतं नाम व्रतानामुत्तमोत्तमम ॥२॥ प्रौष्ठप
देकृष्णपक्षे द्वादश्यां प्रातरुत्थितः ॥ यत्नशुक्लांबरधरः स्नात्वा पूर्वं जलाशये ॥३॥ गृहे रम्ये सौधतटे हरिं लि
ख्येन्मण्डले ॥ गोधूमचूर्णपिष्टेन लक्ष्मीं तस्यार्धवर्त्तिनीम ॥४॥ तत्रैवचरं गौरीं सावित्रीं ब्रह्मणा सह ॥ रा
ज्ञीसहितं च रविं त्रैलोकेशोत कर्त्तारम् ॥५॥ गंधैः पुष्पैश्च धूपैर्नैवेद्यैर्दीपै यथाक्रमा ॥ अवियोगव्रतचारी
मंत्रेणानेन राजेंद्र ॥६॥ नारी वा पुरुषो वा अवियोगमतिं दृढां कृत्वा ॥ भक्त्या ध्यानी मौनी दंपत्यं पूजयेदेवम्
७ ॥ सहस्रमूर्द्धा पुरुषः पद्मनाभो जनार्दनः ॥ आस्तांऽपि कपिलाचार्यो भगवान्पुरुषोत्तम ॥८॥ नारायणो

॥ भविपु ॥
॥ १०३ ॥

मधुलिहो विभुर्दामोदरो हरिः॥ महावराहो गोविंदः केशवो गरुडध्वजः॥ ९॥ श्रीधरः पुंडरीकाक्षो विश्वरूपस्त्रिवि-
क्रमः॥ उपेन्द्रो वामनो रामो वैकुंठो माधवो ध्रुवः॥ १०॥ वासुदेवो हृषीकेशः कृष्णः संकर्षणोऽच्युतः॥ अनिरुद्धो म-
हायोगी प्रद्युम्नो नंदनश्च॥ ११॥ नित्यंसमेत्युभः प्रीतः सश्रीकः केशामृलिनः॥ उमापतिर्नीलकंठः स्थाणुः शंभु-
र्भर्गाग्निहा॥ १२॥ ईशानो भैरवः शूली त्र्यंबकस्त्रिपुरांतकः॥ कपर्दी शोमहालिंगी महाकालो वृषध्वजः॥ १३॥ शिवः
शर्वो महादेवो रुद्रो मृत्युमहेश्वरः॥ समास्तु सह पार्वत्या शंकरः शंकराभिरामः॥ १४॥ ब्रह्मा शंभुः प्रभुः स्रष्टा पुष्करी प्रपि-
तामहः॥ हिरण्यगर्भो वेदज्ञः परमेष्ठी प्रजापतिः॥ १५॥ चतुर्मुखः सृष्टिकर्ता स्वयंभूः कमलासनः॥ विरिंचिः पद्मयो-
निभ्रमसमास्तुवरदः सदा॥ १६॥ आदित्यो भास्करो भानुः सूर्योऽर्कः सविता रविः॥ मार्तंडो मंडलज्योतिरग्निरश्मिमर्जी-
नेश्वरः॥ १७॥ प्रभाकरः सप्तसप्तिस्तरणिः सरहिताः खगः॥ दिवाकरो दिनकरः सहस्रांशुर्मरीचिमान॥ १८॥
पद्मप्रबोधनः पद्माकिरणीकेरु भूबलः॥ निकुंभो वर्णभोदेवः सुग्रीवोऽस्तु सदा मम॥ १९॥ लक्ष्मीः श्रीः संप-
दा पद्मा मा विभूतिर्हरिप्रिया॥ पार्वती ललिता गौरी उमा शंकरवल्लभा॥ २०॥ गायत्री प्रकृतिः सृष्टिः सावित्री
वेधसो मता॥ राज्ञी भानुमती संज्ञा नित्या भामा भास्करप्रिया॥ २१॥ इति पद्मनाभशंकरपितामहार्कादिसप्रिया

॥ रामः॥
॥ १०३॥

102

न्स्म । दत्वा दत्वा दानं भुक्त्वा चांते व्रजेच्छ्रम ॥२२॥ द्वादश्यां चरति नरो व्रतमेतद्भक्तिभाविता लोके ॥ भवति य
शो धन भागी संततिमान्विगतसंतापः ॥२३॥ हरिहरहिरण्यगर्भप्रभाकराणां क्रमेण लोकेषु ॥ भुक्त्वा भोगान्वि
पुलानथ योगी निर्वृतो भवति ॥ २४ ॥ स्त्रीपुंसोर्यदि युग्मं पुरुषो वाथ यदि समाचरति कश्चित ॥ नारी वा व्रतमेतच्ची
र्त्वा यात्यालयं विष्णोः ॥ २५ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हरिहरहि
रण्यगर्भप्रभाकराणामवियोगव्रतं नामाष्टषष्ठितमोऽध्यायः ॥ ६८ ॥ ॥ युधिष्ठिर उवाच ॥ अक्षौहिण्यो
दशाष्टौ च मद्राज्यार्थे क्षयं गताः ॥ तेन पापेन मे चित्ते जुगुप्सा तीव्र वर्तते ॥१ ॥ तत्र ब्राह्मणराजन्यवैश्यशूद्रा
दयो हताः ॥ भीष्मद्रोणकलिंगादि कर्णशल्यसुयोधनाः ॥ २ ॥ तेषां वधेन यत्पापं तन्मे मर्माणि कृंतति ।
पापप्रक्षालनं किंचिद्धर्मं ब्रूहि जगत्पते ॥ ३ ॥ श्रीकृष्ण उवाच ॥ सुमहत्पापजननं गोवत्सद्वादशीव्रतम् ॥
अस्ति पार्थ महाबाहो पांडवानां धुरंधर ॥ ४ ॥ युधिष्ठिर उवाच ॥ केयं गोद्वादशी नाम विधानं तच्च कीदृशम् ।
कथमेषा समुत्पन्ना कस्मिन्काले जनार्दन ॥ ५ ॥ एतत्सर्वं हरे ब्रूहि त्राहि मां नरकार्णवात ॥ ६ ॥ श्रीकृष्ण
उवाच ॥ पुरा कृतयुगे पार्थ मुनिकोटिः समागता ॥ तपश्चार विपुलं नानाव्रतधरा गिरौ ॥ ७ ॥ हर्षेण महता

॥ भविष्य ॥
॥ १०४ ॥

ट्टाभिरिति

गिष्ठादेवदर्शनकांक्षया ॥ तं च मार्गे महापुण्ये नानातीर्थविभूषिते ॥ ८ ॥ पारियात्रे सिद्धपार्श्वे रम्ये तंडुलिकाश्रमे ॥ ददृ
विरितिविरक्तो ते उत्तमे शिखरे नृप ॥ ९ ॥ तापसारण्यमतुलं दिव्यकाननमंडितम् ॥ वसिष्ठभृग्वंगिरसक्रतुदक्षा
दिभिर्वृतम् ॥ १० ॥ वल्कलाजिनसंवीतैर्मंगोराश्रममंडलम् ॥ नानामृगगणाकोर्जुष्टं शाखामृगगणैर्युतम् ॥ ११ ॥
प्रशांतसिंहहरिणां वक्रसर्वगतद्रुमम् ॥ गहनं निर्झरै रम्यैर्लतासंतानसंकुलम् ॥ १२ ॥ सिंहव्याघ्रगजैर्भिन्नैर्हरि
णैः शांतवैः शशो ॥ वराहै रुरुभिश्चित्रैः समंतादुपशोभितम् ॥ १३ ॥ तपस्यतां तत्र तेषां मुनीनां दर्शनार्थिनाम् ॥
आजं च चक्रे महीनाथ द्वादशाब्दार्धलोचनः ॥ १४ ॥ वभ्रव ब्राह्मणो वृद्धो जरापांडुरमूर्धजः ॥ श्लथचर्मतनुः कृशो
दंडिपाणिः समेपभु ॥ १५ ॥ उमापि चक्रे गोरूपं श्रमक्लमनतार्थयाहृशाम् ॥ क्षीरोदतोयसंभूता याः पुरामतमं
थने ॥ १६ ॥ पंच गावः शुभाः पार्थ पंचलोकस्य मातरः ॥ नंदा सुभद्रा सुरभी सुशीला बहुला इति ॥ १७ ॥ एता लो
कोपकाराय देवानां तर्पणाय च ॥ जमदग्निभरद्वाजवसिष्ठासितगौतमाः ॥ १८ ॥ जगृहुः कामदाः पंच
गावो दत्ताः सुरैस्तथा ॥ गोमयं रोचना मूत्रं क्षीरं दधि घृतं गवाम् ॥ १९ ॥ षडंगानि पवित्राणि संशुद्धिकर
णानि च ॥ गोमयादुत्थितः श्रीमान् बिल्ववृक्षः शिवप्रियः ॥ २० ॥ तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन सस्मृ

॥ रामः ॥
॥ १०४ ॥

104

न ॥ वीजान्युत्पलपद्मानां पुनर्जातानि गोमयात् ॥२१॥ गोरोचना च मांगल्या पवित्रा सर्वसाधिका ॥ गोमूत्रा-
द्गुग्गुलर्जातः सुगंधप्रियदर्शन ॥२२॥ आहारः सर्वदेवानां शिवस्य च विशेषतः ॥ यद्वीजं जगतः किंचित्तज्ज्ञेयं क्षी-
रसंभवम् ॥२३॥ दध्नः सर्वाणि जातानि मंगलान्यर्थसिद्धये ॥ घृतादमृतमुत्पन्नं देवानां तृप्तिकारणम् ॥२४
ब्राह्मणाश्चैव गावश्च कुलमेकं द्विधा कृतम् ॥ एकत्र मंत्रास्तिष्ठंति हविरन्यत्र तिष्ठति ॥२५॥ गोषु यज्ञाः प्रव-
र्त्तंते गोषु देवाः प्रतिष्ठिताः ॥ गोषु वेदाः समुत्कीर्णाः सषडंगपदक्रमाः ॥२६॥ शृंगमूले गवान्नित्यं ब्रह्मा विष्णु-
श्च संस्थितौ ॥ शृंगाग्रे सर्वतीर्थानि स्थावराणि चराणि च ॥२७॥ शिवो मध्ये महादेवः सर्वकारणकारणम् ल-
लाटे संस्थिता गौरी नासावंशे च षण्मुखः ॥२८॥ कंवलाश्वतरौ नागौ नासापुटसमाश्रितौ ॥ कर्णयोरश्विनौ दे-
वौ चक्षुर्भ्यां शशिभास्करौ ॥२९॥ दंतेषु वसवः सर्वे जिह्वायां वरुणः स्थितः ॥ सरस्वती च कुहरे यमयक्षौ च गं-
डयोः ॥३०॥ संध्याद्वयं तथोष्ठाभ्यां ग्रीवायां च पुरंदरः ॥ रक्षांसि ककुदे द्यौश्च पार्श्विकाये व्यवस्थितौ ॥३१॥ च-
तुष्पात्सकलो धर्मो नित्यं जंघासु तिष्ठति ॥ खुरमध्येषु गंधर्वाः खुराग्रेषु च पन्नगाः ॥३२॥ खुराणां पश्चिमे भा-
गे राक्षसाः संप्रतिष्ठिताः ॥ रुद्रा एकादशा पृष्ठे वरुणः सर्वसंधिषु ॥३३॥ श्रोणीतटस्थाः पितरः कपोलेषु च मा

नताः ॥ क्षीरपाने गवां नित्यं स्वाहाहंकारमाश्रिताः ॥ ३४ ॥ आदित्यारश्मयो वालाः पिण्डीभूता अवस्थिताः ॥
साक्षाद्गंगा च गोमूत्रे गोमये यमुना स्थिता ॥ ३५ ॥ त्रयस्त्रिंशद्देवकोट्यो रोमकूपे व्यवस्थिताः ॥ उदरे पृथिवी सर्वा स
शैलवनकानना ॥ ३६ ॥ चत्वारः सागराः प्रोक्ता गवां ये तु पयोधराः ॥ पर्जन्यः क्षीरधारासु मेघा विन्दुव्यवस्थिताः ॥
३७ ॥ जठरे गार्हपत्योऽग्निर्दक्षिणाग्निर्हृदि स्थितः ॥ कंठे आहवनीयोऽग्निः सभ्योऽग्निस्तालुनि स्थितः ॥ ३८
अस्थिष्ववस्थिताः शैला मज्जासु क्रतवः स्थिताः ॥ ऋग्वेदोऽथर्ववेदश्च सामवेदो यजुस्तथा ॥ ३९ ॥ सुरक्तपीतकृष्णादि
गवां वर्णा व्यवस्थिताः ॥ तासां रूपमुमा सम्यक् तासु रश्मीलतां युधिष्ठिर ॥ ४० संस्मृत्य ताः श्रमगा गौरी इत्येषा सद्योन्न
तुम् ॥ सात्वानां विद्ये देवी धर्मराज सलाघ्रताम् ॥ ४१ ॥ ककुद्मन्तां पंचनिम्नां मंडूकाक्षीं सुवालधिम् ॥ ताम्रस्तनीं रो
प्यकर्णां दृढस्कंधां शृंगबद्धां सितानम् ॥ ४२ ॥ सुशीलां बहुतस्नेहां सुक्षीरां सुपयोधरां गोरूपिणीं सुमां स्वकुल्यामिनीं
तां सवत्सकाम ॥ ४३ ॥ चर्यया पूतरं हृष्टो महादेव ॥ त्वचेन सि ॥ शनैः शनैर्ययौ पार्थ विप्ररूपमिहाश्रमम् ॥ ४४
दत्याकुलपतेः पार्श्वं भृगोर्गां सर्वे दयात ॥ तपस्विनां महातेजास्तो चक्रवैष्णपांडव ॥ ४५ ॥ न्यासरूपां ददौ
धेनुं रक्षित्वानां विमवधम ॥ यावत्स्नात्वाह तत्त्वीत्वां जंबूमार्गो त्रियामाहम ॥ ४६ ॥ रक्षिष्यामः प्रतिज्ञाते म

निमिः शुभैमिमिमाम् । अंतर्द्धिमगमद्देवः पुनर्व्याघ्रो बभूवह ॥ ४७ ॥ वज्रचक्रनखोदग्रो ज्वलत्पिंगललोचनः ॥ जिह्वाक
रालवदनो जिह्वालांगूलदारुणः ॥ ४८ ॥ संप्राप्यासाश्रमपदं तां च धेनुं सवत्सकाम् ॥ त्रासयामास तां देव मुनीनां दिक्ष
वस्थिता ॥ ४९ ॥ मुनयोऽपि समाक्रांता आर्तनादं प्रचक्रिरे ॥ हाहेत्युच्चैः केचिद्वै हुंकारैस्तथापरे ॥ ५० ॥ तालास्फोटं
ददुः केचिव्याघ्रं दृष्ट्वातिभैरवम् ॥ सापि हुंभारवां चक्रे गौरुत्पुच्छा सवत्सका ॥ ५१ ॥ तस्या व्याघ्रभयार्त्तायाः कपिलायाशु
षिष्विर ॥ पलायंत्याः शिलामध्ये शफाग्रं क्षुरचतुष्टयम् ॥ ५२ ॥ व्याघ्रवत्सकयोस्तत्र वंदितं सुरकिन्नरैः ॥ दृश्यतेऽतीवसुव्य
क्तं तदद्यापि चतुष्टयम् ॥ ५३ ॥ सजलं शिवलिंगं च शंभोस्तीर्थं तदुत्तमम् ॥ यस्तत्र स्नाति राजेंद्र स गोवध्यामपोहति ॥
५४ ॥ तत्र स्नात्वा महातीर्थे जंबुमार्गे नराधिप ॥ ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः ॥ ५५ ॥ ततस्ते मुनयः क्रुद्धा बु
द्धदत्तां महाखलाम् ॥ जघ्नुर्घंटां शरैर्दत्तां गिरिकंदरपरलीन ॥ ५६ ॥ शापेन तेन व्याघ्रोऽपि मृकत्वागावं सवत्सका
म् ॥ विप्रैस्तत्र कृतं नाम महुंडागिरिरितिश्रुतिः ॥ ५७ ॥ तं प्रपश्यंति ये पार्थ ते रुद्रा नात्र संशयः ॥ अथ प्रत्यक्षतां श्रेष्ठ
स्तेषां देवो महेश्वरः ॥ ५८ ॥ शूलपाणिस्त्रिपुरहा कामघ्नो वृषभे स्थितः ॥ उमासहायो वरदः सत्वामी सविनायकः
५९ ॥ सनंदिः समहाकालः सभृंगी समनोहरः ॥ वीरभद्रा च चामुंडा चंडघंटाकुमारादिभिर्वृतः ॥ ६० ॥ मातृभिर्मत

संघातैर्य्यक्षराक्षसगुह्यकैः ॥ देवदानवगंधर्वमुनिविद्याधरोरगैः ॥ ६१ ॥ ब्रह्माद्य देवदेवाय पत्नीभिः सहितैस्तथा ॥
गौर्याः पितामहस्तस्मा वर्ज्जिता ब्रह्मचारिभिः ॥ ६२ ॥ कार्त्तिकेयः कृपयासौ तु द्वादश्यां नंदिनीव्रतम् ॥ ततः प्रभृति राजेंद्र अ
वतीर्णं महीतले ॥ ६३ ॥ उत्तानपादेन तथा व्रतं चीर्णमिदं पुरा ॥ उत्तानपादनामासीत् क्षत्रियः पृथिवीपते ॥ ६४ ॥ त
स्य भार्याद्वयं चासीत् सुरुचिश्च सुनीति विश्रुतम् ॥ श्च सुनीत्यां जातो ध्रुवः पुत्रो बालपादधरोऽभवत् ॥ ६५ ॥ तस्याः समर्पितःश्च ध्रु
वोऽप्यरक्षत्तां सखि ॥ अहं करिष्ये शुश्रूषां भर्तृ लालयत्सदा स्वयम् ॥ ६६ ॥ रुच्याः सपत्नीं नित्यं प्रत्यहं कुरुते गृहे ॥ अक
रोन्नर्त्तश्च भक्ष्यांश्च सुनीतिस्सं पतिव्रता ॥ ६७ ॥ कदाचित्क्रोधमात्सर्यात्सापत्न्यं दर्शितं तया ॥ स्वयं रुच्या निहत्यासौ हि भ्रूः
त्वेऽन्तराः कृतः ॥ ६८ ॥ नापि कार्यं तथा स्थाल्यां पक्कमिदं सुखं कृतः ॥ अन्नभोजनवेलायां ददाति न प्रभाजने ॥ ६९ ॥
नैवैम सपितुं दृष्ट्वा लामिषं भाजनं किलः ॥ अपभोजनवेलायां वर्त्ते जीवितमाप्नवान् ॥ ७० ॥ तथैव प्रहसन्त्या लोमानु
रुत्स्वांगजोऽभवत् ॥ तेन दुःखं महदाश्चर्यं श्च सुनी पप्रच्छ विस्मिता ॥ ७१ ॥ किमेतत् ब्रूहि वृत्तान्तं कस्येयं सुविरतमा ॥ किं त्वया
चरितं किंचिद्व्रतं दत्तं कृतं तथा ॥ ७२ ॥ सत्यं सत्यं पुनः सत्यं येन जीवति ते सुतः ॥ मयायं सप्तवारं तु विशाल्य शाकलीकृतः ॥
७३ ॥ पक्कः स्वयं कृतः स्थाल्यां व्यंजनैः सह भोजनैः ॥ परिविष्यमाणः स पुनः कथं जीवितमाप्नवान् ॥ ७४ ॥ किं ते सिद्ध

महाविद्यासमस्तसंजीवनीप्रभा ॥ रत्नं मणिर्महारत्नं योगांजनमहौषधम् ॥ ७५ ॥ कथयस्व महाभागे सत्वं सत्वं भगि
न्यसि । एवमुक्ते हरिणा तस्या आचख्यौ वत्सगोव्रतम् ॥ ७६ ॥ कार्तिके चैव वा द्वादश्यां यथा चानुष्ठितं पुरा ॥ व्रतस्यास्य प्र
भावेन पुनर्जीवति मे सुतः ॥ ७७ ॥ वत्सो मे वत्सवेलायां सुतोऽर्थं लभते पुनः ॥ समागमश्च भवति सुतैः प्रवसितैरपि
७८ ॥ यथार्थमेतन्माहात्म्यं तत्ते च गोवत्सद्वादशीव्रतम् ॥ तवापि हि विनष्टार्थं भविष्यति समं प्रियम् ॥ ७९ ॥ एवमुक्तं व्रतं वी
र्यैर्हत्या पुत्राः सुखं धनम् ॥ संप्राप्तं जीवितानां तेन च ध्रुवस्थाने निवेशिता ॥ ८० ॥ उत्तमेनाधिकारेणा ह्यचिर्भर्त्रा सहा
सिता ॥ दश्यानक्षत्रसंयुक्तो ध्रुवः सोद्यापि दृश्यते ॥ ८१ ॥ ध्रुववर्षैश्च यदा ह्येकः पापैः प्रमुच्यते ॥ युधिष्ठिर उवाच ॥ कीदृ
शं तद्विधानं वत्सन्मे ब्रूहि जनार्दन ॥ ८२ ॥ यत्कृतं भाग्निववनाङ्‌आयद्कुलो न च ॥ श्रीकृष्ण उवाच ॥ संप्राप्ते कार्तिके मा
सि शुक्लपक्षे कृतेनम ॥ ८३ ॥ द्वादश्यां कृतसंकल्पः स्नात्वा पुण्ये जलाशये ॥ नरो वा यदि वा नारी एकभक्तं प्रकल्पयेत् ॥ ८४
ततो मध्याह्नसमये दृष्ट्वा धेनुं सवत्सकाम् ॥ सुशीलां वत्सलां श्वेतां कपिलां रक्तरूपिणीम् ॥ ८५ ॥ शालिताम्रपात्रे विधाय विशांशृ
ङाणां स्त्रीजनेश्वर ॥ यथाक्रमेण पूज्यते गंधपुष्पजलाक्षतैः ॥ ८६ ॥ कुंकुमालक्तकैर्दीपैर्माषान्नवटकैः शुभैः ॥ कृष्ण
मैर्वत्सकं चापि मंत्रेणानेन पांडव ॥ ८७ ॥ ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः ॥ प्रनुवोचं

विक्लिन्नचेतनाय मा गामत्ता गामादि निंविधिषु । नमोनमः स्वाहा ॥ ८८ ॥ इत्थं संपूज्य गां दद्यात्पश्चात्तांव्रतसमापयेत्·
ओं सर्वदेवमये देवि लोकानां शुभनंदिनि ॥ ८९ ॥ मातर्ममाभिलषितं सफलं कुरु नंदिनि ॥ एवमभ्यर्च्य यो देकां गा
मेतद्विगवाह्निकम् ॥ ९० ॥ पर्द्ध्यवारिणा भक्त्या प्रणम्य सुरभीं नरः ॥ तद्दिने तापिकापक्वं स्थालीपाकं च वर्जये
त् ॥ ९१ ॥ भमोत्सवं ब्रह्मचारी भूशयः सफलमाप्नुयात् । यावंति गात्रे रोमाणि गवां कौरवनंदन ॥ ९२ ॥ तावत्कालं स
वसति गोलोके नात्र संशयः ॥ मेरोः पूर्वबकं रम्यमिंद्राग्नियमरक्षसाम् ॥ ९३ ॥ वरुणानिलयक्षाणां रुद्रस्य च यु
धिष्ठिर ॥ तासामुपरि गोलोकस्तत्र याति स गोव्रती ॥ ९४ ॥ तुङ्गैः सितैर्विदशमेःह निर्गांसवत्सां याः पूजयंति कुरुषु
मैर्वत्स्यैश्च हर्षैः ॥ ताः सर्वकामसुखभोगभूमिभाजो मर्त्यैव संति सुचिरं बहुजीवजन्ताः ॥ ९५ ॥ ॥ इति श्रीभवि
ष्योमहापुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गोवत्सद्वादशीव्रतं नामैकोनसप्ततितमोऽध्यायः ॥ ६९ ॥
॥ श्रीकृष्ण उवाच ॥ अथातः पार्थ प्रवक्ष्यामि गोविन्दशयनं व्रतम् ॥ कटदानं समुत्थानं चातुर्मास्यव्रतक्रमम् ॥ १
॥ युधिष्ठिर उवाच ॥ किं देवशयनं नाम देवः स्वपिति चाप्यसौ ॥ देवः किमर्थं स्वपिति किं विधानं सदा वद ॥ २
के मंत्राः के च नियमा व्रतानामथ क्रिया च का ॥ किं ग्राह्यं किं च मोक्तव्यं सुप्ते देवे जनार्दने ॥ ३ ॥ श्रीकृष्ण उवाच·

मिथुनस्थे सहस्रांशौ स्थापयेन्मधुसूदनम् ॥ तुलाराशिगते तस्मिन्पुनरुत्थापयेद्धरिम् ॥ ४ ॥ अधिमासे च पतितेऽप्येष एव विधिक्रमः ॥ नान्यथा स्थापयेद्देवं न चैवोत्थापयेद्धरिम् ॥ ५ ॥ आषाढस्य सिते पक्षे एकादश्यामुपोषितः स्थापयेद्भक्तिमान्विष्णुं शंखचक्रगदाधरम् ॥ ६ ॥ पीतांबरधरं सौम्यं पर्यंके स्वास्तृते शुभे ॥ शुक्लवस्त्रसमाच्छन्ने सोपधाने युधिष्ठिर ॥ ७ ॥ इतिहासपुराणज्ञो विष्णुभक्तो पि यः पुमान् ॥ स्नापयित्वा दधिक्षीरघृतक्षौद्रजलैस्तथा ॥ ८ ॥ समालभ्य शुभैर्गन्धैर्धूपैर्दीपैरलंकृतम् ॥ पूजयित्वा कुंकुमाद्यैर्मन्त्रेणानेन पाण्डव ॥ ९ ॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदम् ॥ विबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरम् ॥ १० ॥ एवं तां प्रतिमां विष्णोः स्थापयित्वा युधिष्ठिर ॥ तस्यैवाग्रे स्वयं वाचं गृह्णीयान्नियमांस्ततः ॥ ११ ॥ चतुरो वार्षिकान्मासान्देवस्योत्थापनावधि ॥ स्त्री वा नरो वा मद्भक्तो धर्मार्थं सुदृढव्रतः ॥ १२ ॥ गृह्णीयान्नियमानेतान्दंतधावनपूर्वकम् ॥ तेषां फलानि वक्ष्यामि तत्कर्तॄणां पृथक्पृथक् ॥ १३ ॥ मधुरस्वरो भवेद्राजा पुरुषो गुडवर्जनात् ॥ तैलस्य वर्जनात्पार्थ सुन्दरांगः प्रजायते ॥ १४ ॥ कटुतैलपरित्यागाच्छत्रुक्षयमवाप्नुयात् ॥ मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ॥ १५ ॥ पुष्पादिभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥ योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ॥ १६ ॥ कटुकाम्लतिक्तमधुरक्षारकषायमेव च ॥ यो वर्जयेत्स वैरूप्यं दौर्ग

संनाप्नुयात्कवित ॥१७॥ तांबूलवर्जनाद्भोगीरक्तकंठश्चजायते ॥ घृतत्यागात्सुलावण्यंसर्वस्निग्धतनुर्भवेत ॥१८॥ फलत्यागाच्चमतिमान्बहुपुत्रश्चजायते ॥ शाकपत्राशनाद्रोगीअपक्वादोऽमलोभवेत् ॥१९॥ पादाभ्यंगपरित्यागाच्छिरोभ्यंगाच्चपार्थिव ॥ दीप्तिमान्दीप्तिकरणोयक्षोद्रव्यपतिर्भवेत ॥२०॥ दधिदुग्धतक्रनियमाद्गोलोकंलभतेनरः ॥ इंद्रातिथित्वमाप्नोतिस्थालीपाकविवर्जितात् ॥२१॥ लभेतसंततिंदीर्घांतापपक्वस्यभक्षणात ॥ भूमावस्तरशायीचविप्रोरनुचरोभवेत ॥२२॥ सदामुनिःसदायोगीमधुमांसस्यवर्जनात ॥ निर्व्याधिर्नीरुजौजस्वीसुरामद्यविवर्जनात् ॥२३॥ एवमादिपरित्यागाद्धर्मःस्याद्धर्मनंदन ॥ एकांतरोपवासेनब्रह्मलोकेमहीयते ॥२४॥ धारणेनखरोमाणांगंगास्नानंदिनेदिने मौनव्रतीभवेद्यस्तुतस्याज्ञाःस्खलितामवेत ॥२५॥ भूमौभुंक्तेसदायस्तुसपृथिव्याःपतिर्भवेत ॥ नमोनारायणायेतिजपतोनशनंफलम् ॥२६॥ पादाभिवंदनाद्विष्णोर्लभेद्गोदानजंफलम ॥ विष्णुपादांबुसंस्पर्शात्कृतकृत्योभवेन्नरः ॥२७॥ विष्णुदेवकुलेकुर्यादुपलेपनमर्चनम ॥ कल्पस्थायीभवेद्राजासनरोनात्रसंशयः ॥२८॥ प्रदक्षिणाशतंयस्तुकरोतिस्तुतिपाठकः ॥ हंसयुक्तविमानेनसवविष्णुपुरंव्रजेत ॥२९॥ गीतवाद्यकरोविष्णोर्गंधर्वलोकमाप्नुयात ॥ नित्यंशास्त्रविनोदेनलोकान्यस्तुप्रबोधयति ॥३०॥ सव्यासरूपीभगवानंतेविष्णु

108

पुरं व्रजेत ॥ पुष्पस्नानादिभिः पूजां कृत्वा विष्णुपुरं व्रजेत ॥ ३१ ॥ नित्यस्नायी नरा ये तु नरकं न पश्यति ॥ भोजनं च
जयेद्यस्तु स स्नानं पौष्करं लभेत ॥ ३२ ॥ कृत्वा प्रेक्षणकं दिव्यं राज्यं सोऽमरत्वं लभेत । अश्वाचितेन प्राप्नोति वापीकूपे यथा
फलम् ॥ ३३ ॥ षष्ठकालेन भोज्येन तथा पीत्स्वर्गे नरो भवेत ॥ पर्णेषु यो नरो भुंक्ते कुरुक्षेत्रफलं लभेत ॥ ३४ ॥ शिलायां भो-
जनात्तीर्थस्नानं प्रयागं भवेत । आमध्ये येन तृष्णागात्ररोगैः परिभूयते ॥ ३५ ॥ एवमादिव्रते पार्थ तुष्टिमायाति हेतु-
न ॥ सुप्ते संनि जगन्नाथे केशवे गरुडध्वजे ॥ ३६ ॥ निवर्तन्ते क्रियाः सर्वाश्चातुर्वर्ण्यस्य भारत ॥ विवाहव्रतवंधादि मृतसं-
स्कारदीक्षणम् ॥ ३७ ॥ यज्ञाभ्यर्चगृहवेशादि गोदानाद्यप्रतिष्ठितम् ॥ पूज्यानि यानि कर्माणि तानि सर्वाणि वर्जयेत
॥ ३८ ॥ असंक्रान्तं तु मासं वै देवे पित्र्ये च वर्जयेत ॥ सत्रिंशश्च मलस्त्रौ वं च सूर्यसंक्रान्तिवर्जितम् ॥ ३९ ॥ प्राप्ते भाद्रपदे मासि
एकादश्यां दिने हरेः ॥ कटदानं भवेद्विष्णोर्महापूजां प्रवर्तयेत ॥ ४० ॥ यत्तु देवशयनं तत्रेदं कारणं भगात ॥ पुरा तपः
प्रभावेन तोषयित्वा हरिं विभुम् ॥ ४१ ॥ ममापि मानयन्तां गां प्रार्थितो योगनिद्रया ॥ निरीक्ष्य चात्मनो देवान् रुस्थं ल-
क्ष्माङुरः स्थलम् ॥ ४२ ॥ शंखचक्रासिमार्गाद्यैर्बाहवो यस्य वक्षसा ॥ अधोनाभेर्निरुद्धं मे वैनतेयेन पक्षिणा ॥ ४
३ ॥ मुकुटेन शिरोरुद्धं कुंडलाभ्यां च कर्णकौ ॥ ततो दत्तवहं तुष्टो नेत्रयोः स्थानमादरात ॥ ४४ ॥ चतुरो वार्षिकान्मासा-

तदाक्रम्

न्मासःऽस्थितासामभविष्यति ॥ योगनिद्राविसाहात्म्यं कृत्वा योऽतनतं श्रमम् ॥ ४६ ॥ योगनिद्रामलानिद्राशेषाभिशायने
स्थितम् ॥ क्षीरोदधौव विध्यग्रे धौतपादः समाहितः ॥ ४७ ॥ लक्ष्मीकरांबुजैरक्षैर्मर्द्यमानपदद्वयः ॥ तस्मिन्कालेऽपि
मनुष्यो यो मासांश्चतुरः क्षिपेत् ॥ ४८ ॥ व्रतैरनेकैर्नियमैः पांडवश्रेष्ठ मानव ॥ कल्पस्थायी विष्णुलोकं स व्रजेन्नात्र सं
शयः ॥ ४९ ॥ ततोऽवबुध्यते देवः श्रीयागर्भं खगवाधरः ॥ कार्तिके शुक्लपक्षस्य एकादश्यां यथाक्रमक्रमात् ॥ ५० ॥
मंत्रेणानेन राजेंद्र देवमुत्थापयेद्द्विजः ॥ इदं विष्णुर्विचक्रमे त्वामनेवनदानव ॥ ५१ ॥ समुत्थिते ततो विष्णौ क्रियाः सर्वाः
प्रवर्तयेत् ॥ महात्र्यर्थरवे रात्रौ भ्रामयेत्स्यंदने स्थितम् ॥ ५२ ॥ उत्थिते देवदेवेशे नगरे पार्थिवः स्वयम् ॥ दीपोद्वेककरे मा
र्गे नृत्यगीतजनाकुले ॥ ५३ ॥ यं यं दामोदरः पक्षे ऽस्थितो धरणीधरः ॥ तं तं प्रदेयं राजेंद्र सर्वस्वर्गाय कल्पते ॥ ५४ ॥ रात्रौ प्र
जागरे देवमेकादश्यां सुरालये ॥ प्रभाते विमले स्नात्वा द्वादश्यां विष्णुमर्चयेत् ॥ ५५ ॥ होमयेद्धव्यवाहं च हव्यद्वैर्घृतादि
भिः ॥ ततो विप्रान्सुभाष्कृत्वा भोजयेदन्नविस्तरैः ॥ ५६ ॥ दत्तदधिक्षीरोदकाद्यैर्गंधधूपैः समोदकैः ॥ यजमानोऽपि संतुष्टस्त
राहास्यविवर्जितः ॥ ५७ ॥ एकादश्यादश्याष्टौ वा पंच द्वौ वा कुरूत्तम ॥ अर्चयेच्चंदनैर्धूपैः पुष्पैर्गंधैर्द्विजोत्तमान् ॥ ५८
श्रद्धोक्तविधिना पार्थ भोजयेद्राग्यनास्यतीन् । आचांतेभ्यस्ततो दद्यात्स्वागं यत्किंचिदेवहि ॥ ५९ ॥ स्ववावास्वमनो

भीष्टपत्रपुष्पफलादिकम्॥ चतुरो वार्षिकान्मासान्नियमं यस्य यत्कृतम्॥ ६० ॥ कथयित्वा द्विजेभ्यस्तं दद्याद्भक्त्या
सदक्षिणाम्॥ दत्त्वा विसर्जयेद्विप्रांस्ततो भुंजीत च स्वयम्॥ ६१ ॥ यश्चैवं चतुरो मासान्स्मृतिनिस्पृहचाचरेत्॥ एवं यश्चा
रेत्पार्थ सोऽनन्तं धर्ममाप्नुयात्॥ ६२ ॥ अवसाने नृराजेन्द्र गामुदेवपुरीं व्रजेत्॥ यस्मादिविघ्नः समाप्येत चातुर्मास्यव्रतं
नृप॥ ६३ ॥ सम्भवेत्कृतकृत्यस्तु न पुनर्मर्त्यको भवेत्॥ यो देवशयनं पार्थ मासं मासं समाचरेत्॥ ६४ ॥ उत्थाने वा
पि कृत्स्नस्य स हरेर्लोकमाप्नुयात्॥ शृणोति ध्यायति स्तौति जुहोत्याख्याति यो नरः॥ ६५ ॥ विष्णोर्भक्तिपरः पार्थ
स गच्छेद्वैष्णवं पदम्॥ ६६ ॥ दुग्धाब्धिभोगशयने भगवाननन्तो यस्मिन्दिने स्वपिति यत्र विबुध्यते वा॥ तस्मिन्न
नन्यमनसामुपवासभाजां पुंसां ददाति सुगतिं गरुडांगसंगी॥ ६७ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे देवशयनोत्थापनद्वादशीव्रतवर्णनं नाम सप्ततितमोऽध्यायः॥ ७० ॥ ॥
श्रीकृष्ण उवाच॥ पुरा बभूव राजर्षिर्जनपाल इति श्रुतः॥ प्रार्थितः सप्रजाभिस्तु सर्वदुःखोपशान्तये॥ १ ॥ दुःखा
पनोदं कृत्स्नो भो व्याधितानां नरेश्वर॥ एवमुक्तः स्थिरं ध्यात्वा ऽव्याधीन्प्रजागणान्॥ २ ॥ पालयामास हृष्टोऽसौ सा
र्वपालस्ततोऽभवत्॥ तेनैषा निर्मिता शान्तिर्नाम्ना नीराजना जने॥ ३ ॥ तस्मान्नृपांडवश्रेष्ठ लक्षणां वच्मि

लता २

॥ मविषु ॥
॥ ११० ॥

तेभ्य एव ॥ राज्ञा पुरोहितैः सार्द्धमनुष्ठेया विधानतः ॥ ४ ॥ तस्मिन्काले वभूवाथ रावणो राक्षसेश्वरः ॥ लंकास्थितः
सुरगणान्नियुनक्तिस्म कर्मसु ॥ ५ ॥ अरत्नयः संडलें वंडमात्तपत्रं चकार ह ॥ स्कन्दं सेनापतिं चक्रे वायुं पांसुप्रमार्जकम् ।
६ ॥ वरुणं वद्धकर्मस्थं धनदं धनरक्षकम् ॥ यमं संयमने ऽरीणां मुमुते मंत्रिणो मनुम् ॥ ७ ॥ मेघाम्भोदं तिनपतिं पु
मनुष्यादिपंक्तिषु ॥ सप्तर्षयः शांतिपरा ब्रह्मणा सह संस्थिताः ॥ ८ ॥ यामिका मध्यकक्षायां गंधर्वा गीततत्पराः ॥
प्रेक्षणीये ऽप्सरो वृंदं वाद्ये विद्याधरा वृता ॥ ९ ॥ गंगाद्याः सरितः पाने गार्हपत्ये हुताशनः ॥ विश्वकर्मान्नसंस्कारे य
मः शिल्पिप्रयोजने ॥ १० ॥ निषेवंति पार्थिवाः सर्वे पुरः सेवाविधायिनः ॥ दृष्ट्वं तेभास्करै रत्नैः प्रभावंतो विभवणो ॥ ११
संदष्टुं रावणः प्राह प्रहस्तं प्रतिहारकम् ॥ सेवां कर्तुं समस्थाने ब्रूहि को ऽत्र समागतः ॥ १२ ॥ सउवाच प्रणम्याग्रे दंड
पाणिर्निशाचरः ॥ ऋषककुत्स्थो मांधाता धुंधुमारो नलोऽर्जुनः ॥ १३ ॥ ययातिर्नहुषो भीमो राघवोऽथ विदूरथः ॥
एते चान्ये च वहवो राजानः ॥ इति आसते ॥ १४ ॥ मेघाकारास्तु तथा तेनाजपाल इहागतः ॥ रावणः कुपितः प्रा
हस्तीप्रं दूतं असर्जयत ॥ १५ ॥ इत्युक्ते प्रहितो दूतो धूम्राक्षो नाम राक्षसः ॥ धूम्राक्ष गच्छ ब्रूहि त्वमजपालं ममा
ज्ञया ॥ १६ ॥ सेवां कुरु समागच्छ कथं धोयस्य पार्थिवः ॥ अन्यथा वंडहासेन त्वां करिष्ये विकंधरम् ॥ १७ ॥

ना२८

वशम ५

॥ राम ॥
॥ ११० ॥

110

रावणो नैव मुक्तस्तु धूम्राक्षो गतोऽयथा ॥ संप्राप्य तां पुरीं रम्यां तच्च राजकुलं गतः ॥ १८ ॥ ददर्शायं तमेकं सअज
पालमज्ञात्वतम् ॥ मुक्तकेशां मुक्तकक्षं नैकमुक्तकमद्वयम् ॥ १९ ॥ यष्टिहस्तं धरेणाः भूतं व्याधिभिः परिवारितम्
निहन्तामित्रशार्द्दूलं सर्व्वोपद्रवनाशनम् ॥ २० ॥ महामालिख्यनामानि निखिनिघ्नं तं द्विषां गणम् ॥ स्नानं मुक्तं
स्मभेस्थाने कृतकृत्यं मुनिं यथा ॥ २१ ॥ दृष्ट्वा हृष्टमनाः प्राह धूम्राक्षो रावणोदितम् ॥ साक्षेपमजपालोऽपि प्र
मुक्त्वा कारणान्तरम् ॥ २२ ॥ प्रेषयामास धूम्राक्षं ततः कृत्वा समादधे ॥ ज्वरमाकारयित्वानु प्रोवाचेदं महीपतिः
२३ ॥ गच्छ लंकाधिपस्थानमावर्त्तय यथोचितम् ॥ नियुक्तस्त्वजपालेन ज्वरो राजं जगाम ह ॥ २४ ॥ गत्वा चकं
पयामास सगाणां राक्षसेश्वरम् ॥ रावणस्तं विदित्वा तु ज्वरं परमदारुणम् ॥ २५ ॥ प्रोवाच तिष्ठ नु नृपस्तेन मेन
प्रयोजनम् ॥ ततः स विज्वरो राजा वभूव धनदानुजः ॥ २६ ॥ तेनैषा निर्मिता शान्तिरजपालेन धीमता ॥ सर्व्वरो
गप्रशमनी सर्व्वोपद्रवनाशिनी ॥ २७ ॥ कार्त्तिके शुक्लपक्षस्य द्वादश्यां रजनीमुखे ॥ समुत्थिते तु विनिद्रे तु दे
वे दामोदरे तेन ॥ २८ ॥ वेष्टिते रत्नमालाभी रम्यैर्मालानुरञ्जिते ॥ जनयित्वा नवं विन्दुं कृत्वा मन्त्रैर्द्विजोत्तमैः ॥
२९ ॥ वर्द्धमानतन्तूत्थाभिर्द्दीपिकाभिर्हुताशनम् ॥ कृत्वा महाजनैः सर्व्वैर्हरिं नीराजयेद्बुधैः ॥ ३० ॥ पुष्पैर

॥ म-पु ॥
॥ १११ ॥

ऽपर्चितं देवं समालब्धं च चन्दनैः ॥ वदरैः कर्बुरैश्चैव त्रपुसैरिक्षुभिस्तथा ॥ ३१ ॥ गंधैः पुष्पैरलंकारैर्वस्त्रैरन्यैश्च पूजि-
तैः ॥ तस्यैवानुमतां लक्ष्मीं वृल्लानां च शिरःकांतथा ॥ ३२ ॥ आदित्यं शंकरं गौरीं यक्षं गणपतिं ग्रहान् ॥ मातरं पितरं नागा-
न्सर्वान्नीराजयेत्ततः ॥ ३३ ॥ गवां नीराजनं कुर्यान्महिष्यादेश्च मंडलम् ॥ भ्रामयेत्त्रासयेच्छर्दिं घंटावादनछादनैः ॥
३४ ॥ नागावः प्रस्नुता यांति स्थापीडास्तवकांगणाः ॥ सिंदूरकृतशृंगाग्राः संभारवशावत्सकाः ॥ ३५ ॥ अनुयांति सगो-
पालाः कालयंतो धनानि ते ॥ ढक्कानुलिप्तरक्तांगा रक्तपीतसितांवराः ॥ ३६ ॥ एवं कोलाहले वृत्ते गवां नीराजनो-
त्सवे ॥ तुरगाल्लक्ष्मसौपर्णिकान्द्विरदांश्च सुपूजितान् ॥ ३७ ॥ राजचिह्नानि सर्वाणि उद्धृत्य स्वगृहांगणे ॥ राजा पुरोहि-
तैः सार्द्धं मंत्रिमुख्यपुरःसरः ॥ ३८ ॥ सिंहासनोपविष्टश्च शंखतूर्यादिनिस्वनैः ॥ पूजयेद्गंधकुसुमैर्वस्त्रदीपविले-
पनैः ॥ ३९ ॥ ततः स्त्रीलक्ष्मसौपर्णिका वेश्या वाथ कुलांगना ॥ सर्वोपरि नरेन्द्रस्य भ्रामयेदारुपात्रिकाम् ॥ ४० ॥ शांति-
रस्तु समृद्धिश्च द्विजैश्च स्वजनैस्तव ॥ ततो नीराजयेत्सौम्यं हस्त्यश्वरथसंकुलम् ॥ ४१ ॥ एवमेषा महाशांतिः
ख्याता नीराजने जने ॥ येषां राष्ट्रे पुरे ग्रामे क्रियते यादुनंदन ॥ ४२ ॥ तेषां रोगाः क्षयं यांति सुभिक्षं वर्द्धते तदा ।
शांतिर्नीराजनाख्योके सर्वान्रोगान्व्यपोहति ॥ ४२ ॥ लोकानां वर्द्धयित्वानु भजपालवरो यथा ॥ एषां रोगादिपी

॥ रामः ॥
॥ १११ ॥

पुजनंतन्नांहितमिच्छता ॥ ४४ ॥ वर्षेवर्षेप्रयोक्तव्याशांतिनीराजनाइति ॥ ४५ ॥ नीराजयंतिनवमेघनि मंहीरिंयेगोब्राह्म
णान्नथसंज्ञांश्वनरैश्वाविहंगान् ॥ तेसर्वरोगरहिताश्चकृतानरेंद्रैरिंद्रप्रभाभुविभवंत्यजपालगाकयात ॥ ४६ ॥ इति
श्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेनीराजनद्वादशीव्रतवर्णनंनामैकसप्ततितमोध्यायः ॥
७१ ॥ युधिष्ठिरउवाच ॥ यदेतदतुलंपुण्यंव्रतानामुत्तमंव्रतम् ॥ कर्त्तव्यंकार्त्तिकेमासिप्रयत्नाद्भीष्मपंचकम् ॥ १ ॥ वि
धानंकीदृशंतस्यफलंचकुरूत्तम ॥ कथयस्वप्रसादान्मेमुनीनांहितमिच्छताम् ॥ २ ॥ श्रीकृष्णउवाच ॥ प्रवक्ष्यामिव्रतं
पुण्यंव्रतानामुत्तमंव्रतम् ॥ यथाविधिचकर्त्तव्यंफलंचास्ययथोदितम् ॥ ३ ॥ मयापिभृगवेप्रोक्तंभृगुश्चोशनसेददौ उशना
पिहिविप्रेभ्यःप्रह्लादायचधीमते ॥ ४ ॥ तेजस्विनांयथावह्निःपवनःशीघ्रगामिनाम् ॥ विप्रोयथावंद्यानांदानानांकां
चनंयथा ॥ ५ ॥ भूर्लोकःसर्वलोकानांतीर्थानांजाह्नवीयथा ॥ यथाश्वमेधोयज्ञानांमथुरांऽककांक्षिणाम् ॥ ६ ॥ वेदे
ष्वैवयथासाम्नांदेवानामच्युतोयथा ॥ तथासर्वव्रतानांतुवरिष्ठंभीष्मपंचकम् ॥ ७ ॥ दुष्करंभीष्ममित्याहुर्नशक्यंतादि
होच्यते ॥ यस्तंकरोतिराजेंद्रतेनसर्वंकृतंभवेत् ॥ ८ ॥ वसिष्ठभृगुभर्गाद्यैश्चीर्णंकृतयुगादिषु ॥ नाभागांबरीषा
द्यैश्चीर्णंत्रेतायुगादिषु ॥ ९ ॥ सीरभद्रादिभिर्वैश्यैःशूद्रैरन्यैःकलौयुगे ॥ दिनानिपंचपूज्यानिचीर्णमेतन्महाव्रतम्·

१०॥ ब्राह्मणो ब्रह्मचर्य्येण जपहोमक्रियादिभिः॥ क्षत्रियेभ्यस्तथाह्यन्नाशौचव्रतपरायणोः॥ ११॥ पराधिः परिहर्त्तव्या
ब्रह्मचर्य्येण नित्यशः॥ मद्यंमांसं परित्यज्य मैथुनं पापमाचरम्॥ १२॥ शाकाहारपरैश्चैव कृच्छ्राद्व्रतपरैर्नरैः॥ स्त्रीभि
र्वा भर्त्तृवाक्येन कर्त्तव्यं सुखवर्द्धनम्॥ १३॥ विधवाभिश्च कर्त्तव्यं पुत्रपौत्रादिवृद्धये॥ सर्वकामसमृध्यर्थं मोक्षार्थ
मपि पाण्डव॥ १४॥ नित्यं स्नानेन दानेन कार्त्तिकी यावदेव तु॥ प्रातः स्नात्वा विधानेन मध्याह्ने न तथा व्रती॥ १५॥ नद्यां
निर्झरगर्त्ते वा समालभ्य गोमयम्॥ यवव्रीहितिलैः सम्यक् तर्पयेच्च पृथक्ततः॥ १६॥ देवानृषीन्पितॄंश्चैव ततो स्ना
न्कामवारिणा॥ स्नानं मौनं नरः कृत्वा धौतवासा दृढव्रतः॥ १७॥ ततोऽनुपूजयेद्देवं सर्वपापहरं हरिम्॥ स्नापयेच्चा
मृतं भक्त्या मधुक्षीरघृतेन च॥ १८॥ तद्वैव पंचगव्येन गंधचंदनवारिणा॥ चन्दनेन सुगंधेन कुंकुमेनाथ केशवम्
१९॥ कर्पूरेणागरुमिश्रेणालेपयेन्मधुसूदनम्॥ अर्चयेद्विविधैः पुष्पैर्गंधधूपसमन्वितैः॥ २०॥ गुग्गुलं घृतसंयुक्तं दहे
त्कृष्णाग्रमभक्तितः॥ दीपकं च दिवारात्रौ दद्यात्पंचदिनानि तु॥ २१॥ नैवेद्यं देवदेवस्य परमान्नं निवेदयेत्॥ ॐ नमो
वासुदेवायेति जपेदष्टोत्तरं शतम्॥ २२॥ जुहुयाच्च घृताक्तांश्च तिलव्रीहिं ततो व्रती॥ षडक्षरेण मंत्रेण स्वाहाका
रान्वितेन च॥ २३॥ उपास्य पश्चिमां संध्यां प्रणम्य गरुडध्वजम्॥ जपित्वा पूर्ववन्मंत्रं क्षितिशायी भवेन्नरः॥ २४

सर्वमेतद्विधानं च कार्यं पंचादिने शुभे ॥ संविशेत्कंबले वाम्पि न्स्यदपूर्वं भ्रूतलेऽथमे ॥ २५ ॥ प्रथमेऽह्नि हरेः पादौ पू-
जयेत्कमलैर्नरः ॥ द्वितीये बिल्वपत्रेण जानुदेशं समर्चयेत् ॥ २६ ॥ पूजयेच्च तृतीयेऽह्नि नाभिं भृंगरसेन च ॥ मध्ये
बिल्वजयाभिश्च ततः स्कंधौ प्रपूजयेत् ॥ २७ ॥ ततोऽनुपूजयेच्छीर्षं मालत्याः कुसुमैर्नवैः ॥ कार्तिक्यां देवदेवस्य भक्त्या
तु समाहितः ॥ २८ ॥ अर्चयित्वा हृषीकेशमेकादश्यां समाहितः ॥ संप्राश्य गोमयं सम्यक् मंत्रवत्समुपावसेत् ॥
२९ ॥ गोमूत्रं मंत्रवत्कृत्वा द्वादश्यां प्राशयेद्व्रती ॥ क्षीरं तत्र त्रयोदश्यां चतुर्दश्यां तथा दधि ॥ ३० ॥ संप्राश्य कायशुद्ध्यर्थं
लंघयीत चतुर्दिनम् ॥ पंचमे तु दिने स्नात्वा विधिवत्पूज्य केशवम् ॥ ३१ ॥ भोजयेद्ब्राह्मणान्भक्त्या तेभ्यो दद्याच्च दक्षि-
णाम् ॥ तथोपदेष्टारमपि पूजयेद्वस्त्रभूषणैः ॥ ३२ ॥ ततो नक्तं समश्नीयात्पंचगव्यपुरःसरम् ॥ एवं समापयेत्स-
म्यग्यथोक्तं व्रतमुत्तमम् ॥ ३३ ॥ सर्वपापहरं पुण्यं प्रख्यातं भीष्मपंचकम् ॥ मद्यपो यत्सजन्मयं जन्मनो मरणां-
तिकम् ॥ ३४ ॥ तद्भीष्मपंचकं स्नकत्वा प्राप्नोत्यप्यधिकं फलम् ॥ ब्रह्मचर्येन रश्नीत्वां सुघोरं नैष्ठिकं व्रतम् ॥ ३५ ॥
यत्प्राप्नोति महत्पुण्यं तत्कृत्वा भीष्मपंचकम् ॥ गात्राभ्यंगं शिरोभ्यंगं मधु मांसं च मैथुनम् ॥ ३६ ॥ ब्रह्मलोकमवाप्नो-
ति त्यक्त्वैकं भीष्मपंचकम् ॥ संवत्सरेण यत्पुण्यं कार्तिकेन च यद्भवेत् ॥ ३७ ॥ यत्फलं कार्तिके नोक्तं भवेतद्भीष्मपंचके ॥

व्रतमेतत्सुरैः सिद्धैः किन्नरैर्नागगुह्यकैः ॥ ३८ ॥ फलं समीहितं प्राप्य कृत्वाभ्यर्च्य जनार्दनम् ॥ पापस्य प्रतिमा कार्या
रौद्रवक्त्रातिभीषणा ॥ ३९ ॥ खड्गहस्ताति विकृता सर्वलोकभयीनघ ॥ तिलप्रस्थोपरि स्थाप्या कृष्णवस्त्राभिवेष्टि
ता ॥ ४० ॥ करवीरकुसुमापीडा चलत्कांचनकुंडला ॥ ब्राह्मणाय प्रदातव्या कृष्णो मे प्रीयतामिति ॥ ४१ ॥ अनेनापि
दानमेवं कृत्वा वसु वांछितम् ॥ कृतकृत्यः स्थिरो भूत्वा विरक्तः संयतो भवेत् ॥ ४२ ॥ शांतचेता निराबाधः परं पदम
वाप्नुयात् ॥ नीलोत्पलदलश्यामस्तनुर्दंष्ट्रश्चतुर्भुजः ॥ ४३ ॥ अष्टघण्टैकनयनः शंकुकर्णो महास्वनः ॥ जटी द्विजिह्व
स्तामस्थो मृगराजतनुच्छदः ॥ ४४ ॥ चिंतनीयो महादेवो यस्य रूपं न विद्यते ॥ इदं भीष्मेण कथितं शरतल्पगतेन मे ॥ ४५
न देवते समाख्यातं दुष्करं भीष्मपंचकम् ॥ व्रतं च राजशार्दूल प्रवरं भीष्मपंचकम् ॥ ४६ ॥ यस्तस्मिं तोषयेद्भक्त्या तस्मै
मुक्तिप्रदोऽच्युतः ॥ ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथवा यतिः ॥ ४७ ॥ प्राप्नोति वैष्णवं स्थानं सत्कृत्वा भीष्मपंचक
म् ॥ ब्रह्महा मद्यपः स्तेयी गुरुगामी सदा कृती ॥ ४८ ॥ मुच्यते पातकात्सद्यः कृत्वैकं भीष्मपंचकम् ॥ नास्माद्व्रतात्तुल्य
तमं वै स्नवेभ्यो यतो व्रतम् ॥ ४९ ॥ अथास्मिंस्तोषितो विष्णुर्नृणां मुक्तिप्रदो भवेत् ॥ कृत्वैतत्स्नखमानं नृप पवित्रं भी
ष्मपंचकम् ॥ ५० ॥ मुच्यते पातकेभ्यो वा पापात्को विष्णुलोकभाक्, धन्यं पुण्यं पापहरं युधिष्ठिर महाव्रतम् ॥ ५१ ॥

113

नमंति

यद्भीष्मपंचकमिति प्रथितं पृथिव्यामेकादशीप्रभृति पंचदशीनिरुद्धम् ॥ अन्नस्य भोजननिवृत्तिवशादमुष्मि
न्निष्टं फलं दिशति पांडव शार्ङ्गधन्वा ॥ ५५ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
भीष्मपंचकव्रतवर्णनं नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ युधिष्ठिर उवाच ॥ शंखचक्रगदापाणे श्रीवत्सगरुडा
सन ॥ ब्रूहि मे मत्स्यद्वादश्याविधानं देवकीसुत ॥ १ ॥ ॥ श्रीकृष्ण उवाच यदा मांडीरन्यग्रोधे वसामि यमुनातटे ॥ गो
पालमध्ये गोवत्सैरश्ववर्गैः स्मिह्लीलया ॥ २ ॥ कंसासुरवधार्थाय मथुरोपवने तदा ॥ आबालो बालरूपेण गोपमल्लैर्वृतोऽक्र
डे ॥ ३ ॥ समेत्य मत्स्यगोपस्य बलेन सह कानने ॥ आस्फोटयंति त्रिदशो त्रिदशाइव ॥ ४ ॥ सुरभंडीमंडलीकृष्णयोगवर्द्धनयोगदा ॥
यक्षेऽश्मदस्त्वादि तेषां नामानि गोकुले ॥ ५ ॥ गोपीनामपि नामानि राधा त्वेन निबोध मे ॥ गोपाली पालिका धन्या विशा
खा ध्याननिष्ठिका ॥ ६ ॥ इत्यानुगंधा सुभगा तारका दशमी तथा ॥ इत्येवमादिभिरहं सपविष्टो वरासने ॥ ७ ॥ पूजितोऽस्मि
सुरैः पुष्पैर्दधिदुग्धाक्षतैस्तथा ॥ नानानिवेद्यानि षड्विभ्रमत्स्यानां पूजयंति मान् ॥ ८ ॥ मद्भिन्नभ्यक्तमांसैरंगजागरन
र्तनैः ॥ मत्स्यपुष्पैर्वरैर्विविधैर्गीतैर्नर्तनैर्मत्स्यैः स्तुतैः ॥ ९ ॥ भक्ष्यैर्भोज्यैस्तथा पानैर्दधिदुग्धघृतान्वितैः ॥ गोपालैर्गोपदानैर्भव
दयाविप्रपूजनैः ॥ १० ॥ गोष्ठीप्रभृतेर्वर्धनानां स्नेहसंभावरौर्मिथः ॥ एवं द्वादश्यां द्वादश्यां योगहीनश्रा पथे कृष्णा ॥ ११ ॥

॥ भवि॰पु ॥
॥ ११४ ॥

संवंधिभिः क्रमेणैव मंत्रान्तां वपृथक् पृथक् । पूजयंति क्रमेणैव मासांमासान्नतं ममः ॥ १२ ॥ मासादिकार्त्तिकांतंवमक्राद्वाद
शनामभिः । पारणे पारणे दद्यान्मासकानि द्विजातये ॥ १३ ॥ केशवनारायणमाधवगोविंदविष्णुमधुसूदनत्रिविक्रमवामनश्री
धरहृषीकेशपद्मनाभदामोदराणां नमो नम इति ॥ १४ ॥ गंधैः पुष्पैस्तथा धूपैर्दीपैर्जागरणेन निशि ॥ गीतवाद्यैश्च नृत्यैश्च मंत्र
स्वेगंगपुष्पकैः ॥ १५ ॥ घृतदानैः क्षीरदानैः कृष्णो मे प्रीयतामिति ॥ एवमेष विधिः प्रोक्तो मासैर्द्वादशभिर्नृप ॥ १६ ॥ द्वादशीया
ममाप्यापि मनसः प्रीतिवर्द्धनी ॥ मत्वैः प्रवर्त्तिता यस्माद्व्रतोयं मद्द्वादशी ॥ १७ ॥ तेषां परमसंज्ञानां तेषां नाम्नां युधिष्ठिर
गोष्ठेव भवतु प्राज्य गोमहिष्याघजाविकम् ॥ १८ ॥ मत्प्रसादाद्धर्मपुत्र वलं कीर्त्तिर्यशो धनम् ॥ एवमन्यैः पितृरूपाद्व
लाभः स्वद्वादशीम ॥ १९ ॥ येकरिष्यंति मद्भक्तास्तेषां दास्यामिह सुतम् ॥ आरोग्यं वलमैश्वर्यं वित्तं लोकं च शाश्वतम् ॥ २०
मांडीरपादपतले मिहितैर्म्महद्भिर्मंत्रैरनाकुलितवाह्रवलैर्वलिष्ठैः संपूजितः सपदि यच्छति यौ ततश्च सा द्वादशी सुवि
दिता व्रतमत्स्वसंज्ञा ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मद्द्वादशीव्रतवर्ण
नं नाम त्रिसप्ततितमोऽध्यायः ॥ ७२ ॥ ॥ श्रीकृष्ण उवाच । विदर्भाधिपतिः श्रीमानासीत्सर्वसुधार्मिकः ॥ दमयं
त्याः पिता पूर्वं नलस्य श्वशुरोऽभवि ॥ १ ॥ सत्यवादनशीलश्च प्रजापालनतत्परः ॥ भवधरतः श्रीमान्संग्रामेष्वपरा

114

॥ रामः ॥
॥ ११४ ॥

जितः ॥ २ ॥ तस्मात्पिकुर्वतो राज्यं ज्ञात्वा दृष्टेन कर्मणा ॥ आजगाम महाभागः पुलस्त्यो ब्रह्मणः सुतः ॥ ३ ॥ सर्वज्ञानविधिः
श्रीमांस्तीर्थयात्राप्रसंगतः ॥ तमागतमथो दृष्ट्वा ब्रह्मयोनिमकल्मषम् ॥ ४ ॥ उत्थाय प्रददौ राजा त्वमासनमभीप्सित
म ॥ अर्घं पाद्यं च यत्किञ्चित्तत्तस्मै प्रददौ स्वयम् ॥ ५ ॥ राज्यं चैवात्मना सार्द्धं निवेद्य सकृतांजलिः ॥ तेन चैवाप्यनुज्ञातो
निषसाद वरासने ॥ ६ ॥ पप्रच्छ कुशलं प्रश्नं तपस्यध्ययने तथा ॥ तच्चेति चोक्त्वा स मुनिस्तं राजानमभाषत ॥ ७
पुलस्त्य उवाच ॥ कच्चित्ते कुशलं राजन्कोशे जनपदे पुरे ॥ धर्मे च ते मतिर्नित्यं कच्चित्स्वार्थे च वर्त्तते ॥ ८ ॥ भीम उवाच ॥
सर्वत्र कुशलं ब्रह्मन्येषां कुशलमिच्छसि ॥ तवचागमनेनाहं पावितः संगवारिणा ॥ ९ ॥ एवं तौ संविदं कृत्वा संभाष्या
थ परस्परम् ॥ रेमाते पूर्ववृत्तान्तैः कथाभिरितरेतरम् ॥ १० ॥ ततः कथान्ते राजेन्द्र पुलस्त्यं जातविस्मयः ॥ पप्रच्छ सर्व
लोकस्य हिताय जगतः पतिः ॥ ११ ॥ भगवन्स्वामिनः सर्वे संसारार्णवमध्यगाः ॥ दृश्यंते विविधैर्दुःखैः पीड्यमाना
दिवानिशम् ॥ १२ ॥ नारके गर्भवासे च व्याधिभिर्जन्मना तथा ॥ तथा कष्टवियोगादिदुःखैर्दौर्गत्यसंभवैः ॥ १३ ॥
लालप्यमाना बहवः परपीडोपजीविनः ॥ एवंविधान्यनेकानि दुःखानि मुनिपुंगव ॥ १४ ॥ दृष्ट्वैव तानि तान्येव
भृशं मे व्याथितं मनः ॥ तेषां दुःखनिमग्नानां प्राणिनां भुवि मानद ॥ १५ ॥ उपकारकरं ब्रूहि समानुग्रहकाम्यया ॥

स्वल्पायासेन भगवंजायतेऽत्र महत्फलम् ||१६|| पुलस्त्यउवाच | शृणु राजन्प्रवक्ष्यामि व्रतानामुत्तमं व्रतम् || यात्कृपो
ष्यान्न दुःखानां भाजनो जायते जनः ||१७|| माघमासे सिते पक्षे द्वादशी याव नीस्मृता || तस्यांजलाईवसनउपोष्यात्सुख
भाग्भवेत ||१८|| भीमउवाच || कथंमाकृनिराहाईलउपोष्याद्वादशीभवेत || विधिना केन विप्रेन्द्र तन्मे ब्रूहि यथाक्रमम्
१९|| पुलस्त्यउवाच || शृणु राजन्नवहितो व्रतं पापप्रणाशनम् || नवभक्ष्यघाराद्वाअंसमाख्येतन्नसंशयः || २०|| अ
दीक्षिताय नो देयं नास्तिकाय कदाचन || विष्णुभक्ताय शान्ताय धर्मनिष्ठाय चैव हि ||२१|| वाच्यमेतन्महाराज भवता
न्यस्य न कचित् || ब्रह्महा गुरुघाती च बालस्त्रीघातकस्तथा ||२२|| कृतघ्नो मित्रध्रुक्चौरः क्षुद्रो भग्नव्रतस्तथा || मुच्यते
तकैः सर्वैर्व्रतेनानेन भ.पते ||२३|| शुद्धे तिथौ मुहूर्ते च मंडपं कारयेत नरः || दशहस्तप्रमाणेन दशापूर्वोत्तरे प्लवे ||२४||
तन्मध्ये पंचहस्तां तु वेदिकां परिकल्पयेत || अरत्निमात्रकुण्डिमांभ.मिंवेशां कृत्वा प्रयत्नतः ||२५|| विलिखेन्मंडलं तत्र
पंचवर्णैर्विधानतः || ब्राह्मणो वेदसंपन्नो विष्णुभक्तो जितेन्द्रियः ||२६|| पंचविंशतिरत्विजः स्थापयामिरतस्तथा·
कुंडानि कल्पयेनत्रसष्टौचत्वारिवापुनः ||२७|| ब्राह्मणांस्तेषु पूजीत वात्रभ्यरणिकांकुभात || मध्ये च मंडलस्याथ
कर्णिकायां जनार्दनम् ||२८|| प्रत्यंमुखं नमेदेवं चतुर्बाहुमरिंदम || पूजयेत्तविधानेन शास्त्रोक्तेन विचक्षणः ||

अष्टोचत्वारिवा ४

115

२९ ॥ गंधैः पुष्पैस्तथा धूपैर्नैवेद्यैर्विविधैरपि ॥ एवं संपूज्य देवेशं ब्राह्मणाः सहदेशिकः ॥ ३० ॥ त्वमेनस्तं मण्डपं पश्चात्निष्
न्काष्ठसमन्वितम् ॥ देवस्याभिमुखं तत्र पीठं तु परिकल्पयेत् ॥ ३१ ॥ षट्त्रिंशदंगुलं श्रेष्ठं चतुरस्रं समंततः ॥ तत्र शिवं
समालंब्य सुवृत्तं सुदृढं नवम् ॥ ३२ ॥ आरोपयेद्दृढं तत्र यादृशं तच्छृणुष्व मे ॥ कलधौतं तथा रौप्यं ताम्रं वाप्यथ मृन्मयम् ।
३३ ॥ सर्वलक्षणसंपूर्णं दृढं व्यंगविवर्जितम् ॥ तन्मध्ये शतं कुर्यादेकच्छिद्रमथापि वा ॥ ३४ ॥ कृशानत्वात्तु रूपेण पात्रे
कच्छिद्रमेव वा ॥ सन्निधाने ततः कुर्यात्सलिलं वस्त्रपावनम् ॥ ३५ ॥ हेमार्थं कल्पयेच्चापि पालाशः समिधः शुभाः ॥ ति
लाघृतं तथा क्षीरं शमीपत्राणि चैव हि ॥ ३६ ॥ वेद्याः पूर्वोत्तरे भागे ग्रहपीठं प्रकल्पयेत् ॥ तत्र पूज्या ग्रहाः सर्वे ग्रहयज्ञ
विधानतः ॥ ३७ ॥ पूर्वस्यां दिशि शक्रस्य पूजां कुर्वीत यत्नतः ॥ दक्षिणस्यां यमस्याथ प्रतीच्यां वरुणस्य च ॥ ३८ ॥ कुबे
रस्य तथोदीच्यां बलिं कुर्यात्सलाक्षतैः ॥ एवं संभृतसंभारं शुक्लांबरधरस्तथा ॥ ३९ ॥ समालभ्य शुभैर्गंधैर्दर्भपाणि
रतंद्रितः ॥ पीठमारोपयेत्पुत्ते यजमानं द्विजोत्तमाः ॥ ४० ॥ यजमानोऽपि देवस्य संमुखः प्रयतः शुचिः ॥ उपविश्य प
ठेन्मंत्रं पुराणोक्तमिदं परम् ॥ ४१ ॥ नमस्ते देवदेवेश नमस्ते भुवनेश्वर ॥ व्रतेनानेन मां त्राहि परमात्मन्नमोऽस्तु ते ॥ ४२
ततोदकस्य धाराणां प्रत्यंगेषु समन्विताः ॥ शिरसा धारयेत्शांतिं तेनांतरात्मना ॥ ४३ ॥ होमं कुर्युस्ततो विप्रा दिक्षु

सर्वाकृतत्वराः ॥ पठेयुः शांतिकाध्यायं विघ्नसंज्ञानियानि वै ॥ ५४ ॥ वादित्रैस्ताडमानैश्च शंखगेयस्वनैस्तथा ॥ पुण्या-
हजयशब्दैश्च वेदस्वनविमिश्रितैः ॥ ५५ ॥ मंगलैः स्तुतिसंयुक्तैः कारयेत्तन्महोत्सवम् ॥ देवदेवस्य चरितं केशवस्य म-
हात्मनः ॥ ५६ ॥ हरिवंशादिकं सर्वं श्रावयेद्ब्राह्मणोवरः ॥ सौपर्णिकमथाख्यानं भारताख्यानमेव च ॥ ५७ ॥ आख्यानकुश-
लाः केचिद्वाचयेयुरतंद्रिताः ॥ अनेन विधिना सर्वां तां रात्रिं प्रीतिवर्द्धिनीम् ॥ ५८ ॥ यजमानो नयेद्धीमान्यावत्सूर्योद-
यो भवेत् ॥ ब्राह्मणाश्चापि तां रात्रिं जुहुतो जातवेदसम् ॥ ५९ ॥ मंत्रैस्तु वैष्णवैर्दिव्यैः क्षपयेद्धर्महीपते ॥ वासुदेवस्य शि-
रशि वसोर्द्धारां प्रपातयेत् ॥ ५० ॥ क्षीरेण सर्पिषा वा राजन्सर्वसिद्धिप्रदायिनीम् ॥ ततः प्रभातसमये यजमानो द्विजैः सह ॥
५१ ॥ स्नानं कुर्यान्नृपश्रेष्ठ नद्यां सरसि वा पुनः ॥ अथवा शक्तिहीनस्तु यजमानोप्यागारिणा ॥ ५२ ॥ ततः शुक्लानि वस्त्राणि
परिधाय यतव्रतः ॥ अर्घ्यं दत्वा भास्कराय तद्विधानं श्रुतन्वधी ॥ ५३ ॥ पुष्पैर्धूपैः सनैवेद्यैः पूजयेत्पुरुषोत्तमम् ॥ कृत्वा
ध्यानं मनसा दत्वा पूर्णाहुतिं ततः ॥ ५४ ॥ पूजयेद्ब्राह्मणान्सर्वान्होतारो यज्ञकल्पिता ॥ शय्याभोजनगोदानैर्वस्त्रै-
राभरणैस्तथा ॥ ५५ ॥ आचार्यः पूजनीयोऽत्र सर्वस्वेनापि भारत ॥ येन गानस्य संतुष्टिर्देवतुल्यो गुरुर्यतः ॥ ५६ ॥ वित्त-
शाठ्यविहीनस्तु भक्तिशक्तिसमन्वितः ॥ दीनानाथविशिष्टाश्च ये दिनश्च समागताः ॥ ५७ ॥ तेषामन्नं हिरण्यं च दद्यात्तु

दत्तेन चैतन्मया ॥ एवं संपूज्य विप्रांश्च भोजयित्वा यथेप्सितम् ॥ ५८ ॥ यथा विभवसारेण पश्चाद्भुञ्जीत वाग्यतः ॥ हवि
ष्यमन्नं यज्ञेन हविष्याः सतिलास्तथा ॥ ५९ ॥ एवं यज्ञो महाराजं म्योक्तस्ते संप्रकीर्तितः ॥ पापिष्ठाः सर्वपापेभ्यो मुच्य
न्ते नात्र संशयः ॥ ६० ॥ वाजपेयातिरात्राभ्यां ये यजंति शतं समाः ॥ सर्वे ते विष्णुयागस्य कलां नार्हन्ति षोडशीम् ॥ ६१ ॥ स
प्तजन्मानि सौभाग्यमायुरारोग्यसंपदः ॥ प्राप्नोति द्वादशीमेतां नामपोष्य विधानतः ॥ ६२ ॥ ततो विष्णुपुरं याति विष्णु
नासह मोदते ॥ चतुर्युगानि द्वात्रिंशद्विष्णुरूपधरः स्थितः ॥ ६३ ॥ रुद्रलोके तथा राजन्युगानि द्वादशैव तु ॥ ब्रह्मलोके तथा त्री
णि सर्वलोके युगानि च ॥ ६४ ॥ ततः पश्चादिहाभ्येत्य राजा भवति धार्मिकः ॥ पृथिव्याधिपतिः श्रीमान्विजितारिः प्रताप
वान् ॥ ६५ ॥ व्रतमेतत्पुरा चीर्णं सगरेण महात्मना ॥ अजेन धुंधुमारेण दिलीपेन ययातिना ॥ ६६ ॥ अन्यैश्च पृथिवीपालैः
पालितं शोभनं तलैः ॥ स्त्रीभिर्वैश्यैस्तथा शूद्रैर्धर्मकामैः सदा नृप ॥ ६७ ॥ भृग्वाद्यैर्मुनिभिः सर्वैर्ब्राह्मणैर्वेदपारगैः ॥ त्व
याच पृष्टेन मया कथितं ते नराधिप ॥ ६८ ॥ अद्यप्रभृति चैवेयं ख्यातिं यास्यति भूतले ॥ भीमाख्या द्वादशी चेति कृतकृ
त्या च भारत ॥ ६९ ॥ एषा पुलस्त्यमुनिना कथिता कुरुनंदन ॥ यश्चैनां कथितां ध्यात्वा कुर्याद्वा भक्तिभावतः ॥ ७० ॥ सर्व
पापविनिर्मुक्तो विष्णुलोके महीयते ॥ दरिद्रश्चापि भोः पार्थ वित्तशाठ्यं विवर्जयेत् ॥ ७१ ॥ विष्णुभक्तेन कर्त्तव्या संसार

भयभीरुणा ॥७२॥ भीमेन या किल पुरा समुपोषिता च रात्रौ घटस्थितसुशीतलवारिधारा ॥ तां द्वादशीं दशसुरवारि-
मुखाकृतां वसमस्य मुनी चरति याति स विष्णुलोके ॥७३॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठि-
रसंवादे भीमद्वादशीव्रतवर्णनं नाम चतुःसप्ततितमोऽध्यायः ॥७४॥ युधिष्ठिर उवाच ॥ ॥ उपवासासमर्थानां स-
दैव पुरुषोत्तम ॥ एका या द्वादशी पुण्या तां वदस्व ममानघ ॥१॥ श्रीकृष्ण उवाच ॥ मासि भाद्रपदे शुक्ला द्वादशी श्रव-
णान्विता ॥ सर्वकामप्रदा पुण्या चोपवासे महाफला ॥२॥ संगमे सरितां स्नात्वा द्वादश्यां समुपोषितः ॥ अयत्नात्सम-
वाप्नोति द्वादशद्वादशीफलम् ॥३॥ बुधश्रवणद्वादश्यामेवं वै संयतो भवेत् ॥ अतिमहती तस्यां कृतं सर्वमथाक्ष-
यम् ॥४॥ द्वादशी श्रवणोपेता यदा भवति भारत ॥ संगमे सरितां स्नात्वा गंगादिस्नानजं फलम् ॥५॥ सोपवासः
समाप्नोति नात्र कार्या विचारणा ॥ जलपूर्णं तथा कुंभे स्थापयित्वा विचक्षणः ॥६॥ पंचरत्नसमोपेतं सोपवीतं सु-
पूजितम् ॥ तस्य स्कंधे तु घटितं स्थापयित्वा जनार्दनम् ॥७॥ यथाशक्त्या स्वर्णमयं शंखचक्राग्रविभूषितम् ॥ स्नाप-
यित्वा विधानेन सितचंदनचर्चितम् ॥८॥ सितवस्त्रयुगच्छन्नं छत्रोपानद्युगान्वितम् ॥ ॐ नमो वासुदेवाय निशि-
रः संप्रपूजयेद्धरेः ॥९॥ श्रीधराय मुखं तद्वत्कंठं कृष्णाय वै पुनः ॥ ॐ नमः श्रीपतेवक्षो भुजौ सर्वास्त्रधारिणो ॥१०

मापकायनमः हृषीकेशायायोदरं नमः॥ त्रैलोक्यजननकायेति स्कंधं संपूजयेद्धरिम्॥११॥ सर्वाधिपतये जंघे पादौ
सर्वात्मने नमः॥ अनेन विधिना राजन्नर्घ्यैर्धूपैः समर्चयेत्॥१२॥ ततस्तस्याग्रतो देयं नैवेद्यं घृतपाचितम्॥ मोद-
कांश्चनतान्कंगान्डज्जाद्दद्याद्विचक्षणः॥१३॥ स्कंधं संपूज्य गोविंदं जागरं तत्र कारयेत्॥ प्रभाते विमले स्नात्वा संपू-
ज्य गरुडध्वजम्॥१४॥ पुष्पधूपादिनैवेद्यैः फलैर्वहैः स्तुत्योभनै॥ ततः पुष्पांजलिं बद्ध्वा मंत्रमेतमुदीरयेत्॥१५॥ नमो
नस्ते गोविंद बुधश्रवणसंज्ञक॥ अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव॥१६॥ स्कंधं संपूज्य गोविंदं ब्राह्मणान्पूजयेत्ततः॥
भक्तं तं ब्राह्मणौ वै वेदवेदांतपारगे॥१७॥ पुरा राज्ञे विशिष्ठो येरा विधिवत्संप्रदापयेत्॥ द्वादश्यां श्रवणो युक्ते अहो षाहस्क-
रान्विते॥१८॥ करकं संगमे स्नात्वा प्रीयतां मे जनार्दनः॥ श्रीकृष्ण उवाच॥ अत्राप्युदाहरंतीममितिहासं पुरातनम्॥१९॥
महत्पररूपेयछतं भमिपालम्यशृणुष्व तत्॥ देशो दशार्णको नाम तस्य भागेऽनुपश्चिमे॥२०॥ अस्ति कश्चिन्मरुर्देशः स-
र्वसत्वभयंकरः॥ सुतप्तसिकताभूमिर्यत्र दुष्टा महोरगाः॥२१॥ अल्पच्छायद्रुमाकीर्णो मृतप्राणिसमाकुलः॥ शमीख-
दिरपालाशकरीरैः पीलुभिःसह॥२२॥ तत्र भीमद्रुमाः पार्थ कटकैः शाचलाहटे॥ दग्धप्राणिगणाकीर्णो यत्र मूर्द्धस्थिते
र्केचिन्॥२३॥ अल्पोदकं नोलभंते राजंस्तत्र वलाहकाः॥ कदाचिदपि दृश्यंते भ्रमसाण्णो विहंगमाः॥२४॥ वृक्षांतरगतैर्नि-

त्यं शिशुभिस्तु पितैः समम॥ उत्क्रान्तजीविता राजन्दृश्यंते विहगोत्तमाः॥२५॥ तथानुराभ्रसहसास्मगाः सैकतमा-
गताः॥ सैकते ध्वेवतन्दृश्यं निजलं सैकतसेतुवत॥२६॥ तस्मिंस्तथाविधे देशे कश्चिद्दैववशाद्वणिक॥ निजसार्थपरिभ्र-
ष्टः प्रविष्टो मरुजंगले॥२७॥ पिशाचान्मलिनांस्तीक्ष्णान्निर्मांसान्भीमदर्शनान॥ इतस्ततः संचरतो दद्दर्श वणिजोत्त-
मः॥२८॥ वभ्रामोद्भ्रान्तहृदयः क्षुत्तृषाश्रमकर्षितः॥ क्व यामः क्व जलं क्वाहं यास्यामि न बुबोध सः॥२९॥ अथ प्रेतानदृ-
र्शासौ तत्राव्याकुलितेंद्रियान॥ स्नायुबद्धास्थिवरणान्स्वेभ्रमाणानितस्ततः॥३०॥ प्रेतस्कंधसमारूढमेकं प्रेतं ददृ-
र्श ह॥ अपरैर्बहुभिः प्रेतैः समंतात्परिवारितम॥३१॥ आगच्छमानमभ्यर्णं स्नुतुराकृपः सरम प्रेतस्कंधान्महीं गत्वा
तस्यांतिकमुपागमत॥३२॥ स दृष्ट्वाथ वणिक्प्रेष्ठमिदं वचनमब्रवीत॥ अस्मिन्वै निर्जले देशे गमनं भवतः कथम॥
३३॥ तमुवाच वणिग्धीमान्सार्थभ्रष्टस्त्वचैवमे॥ प्रवेशो दैवयोगेन पूर्वकर्मकृतेन तु॥३४॥ तृषा मां बाधतेऽत्यर्थं
क्षुद्दुनोति भृशं तथा॥ प्राणाः कंठमनुप्राप्ता वचनं न स्फुतीव मे॥३५॥ अत्रोपायं न पश्यामि जीवेयं येन केनचित्
॥ कृत्स्नेवाच॥ इत्येवमुक्ते प्रेतस्तं वणिजं वाक्यमब्रवीत॥३६॥ पुंनागमिममाश्रित्य प्रतीक्षस्व मुहूर्तकम॥ कृता-
तिथ्यो यथालाभं गमिष्यसि यथासुखम॥३७॥ एवमुक्तस्तथा चक्रे स वणिक्तृष्णयार्दितः॥ मध्याह्नसमये प्रा-

प्रेतनतस्तं देशमागतः ॥ ३८ ॥ उल्लागहसात्कारको वारिधारामनोरमः ॥ दध्योदनसमायुक्तो वर्धमानेन संयुतः ॥ ३९
आगतेऽकारके तस्मिन्स्नात्वा दत्वातिथये तदा ॥ भुक्त्वान्नं च जलं पीत्वा वणिक्तुष्टिमुपागतः ॥ ४० ॥ वितृष्णो विज्वरश्चै
व क्षणेन समभवत ॥ ततस्तु प्रेतसंघस्य भोक्तुकामस्य वै ददौ ॥ ४१ ॥ दध्योदनं सपानीयं प्रेतास्तृप्तिं परां गताः ॥ अति
थिं तर्पयित्वा च प्रेतलोकं च सर्वशः ॥ ४२ ॥ ततः स्वयं स बुभुजे भुक्तशेषं यथासुखम् ॥ तस्य भुक्तवतश्चान्नं पानीयं च
क्षयं ययौ ॥ ४३ ॥ प्रेताधिपं ततस्तुष्टो वणिग्वचनमब्रवीत् ॥ आश्चर्यमेतत्परमं वनेऽस्मिन्प्रतिभाति मे ॥ ४४ ॥ अन्नपा
नस्य संप्राप्तिः परमस्य कुतस्तव ॥ स्तोकेन च तथान्नेन विमर्षिस्तु बह्वन्नस्य च क ॥ ४५ ॥ तृप्ताः परं कथं त्वेते निर्मांसास्थित
कुक्षयः ॥ अपरं च कथं चेह मम पापपरिक्षयः ॥ ४६ ॥ हस्तावलंबनः कस्त्वं संप्राप्तो निर्जने वने ॥ तृप्तश्चासि कथं ग्रा
समात्रेणाच संभवत ॥ ४७ ॥ कस्त्वमस्यां सुघोरायामटव्यां तु कृतालयः ॥ तदेतत्संशयं छिंधि परं कौतूहलं मम ॥ ४८
एवमुक्तः स वणिजा प्रेतो वचनमब्रवीत् ॥ शृणु भद्र प्रवक्ष्यामि दुष्कृतं कर्म चात्मनः ॥ ४९ ॥ शाकले नगरे रम्ये अ
हमासं सुदुर्मतिः ॥ वणिज्याश्रितः पूर्वं कालो नीतो मयानघ ॥ ५० ॥ धनलोभान्मया तत्र कृता विश्वप्रमादिना ।

तदन्तामिसाठेमिश्यानष्णाया पीडिताय च ॥ ५१ ॥ प्रतिवेशी च तत्रासीद्ब्राह्मणो गुणवान्मम ॥ श्रवणद्वादशीयोगे मासि भा
ऽपदे तथा ॥ ५२ ॥ सकलविन्मया सार्धं तोयांनाम नदीं ययौ ॥ तस्याश्च संगमः पुण्यो यत्रासीच्चंद्रभागया ॥ ५३ ॥ चंद्रभागा
सोमसुता तोया चैवार्कनंदिनी तयोः शीतोष्णसलिलसंगमः सुमनोहरः ॥ ५४ ॥ तत्तीर्थवरमासाद्य प्रतिवेश्यः सव
द्विजः ॥ श्रवणद्वादशीयोगे स्नातश्चैवमुपोषितः ॥ ५५ ॥ चंद्रभागातोयपोश्च वारिधानैर्नवैर्दृढैः ॥ दध्योदनयुतैः सा
र्धं संपूर्णैर्वर्धमानकैः ॥ ५६ ॥ छत्रोपानद्युगं वस्त्रं प्रतिमां विधिवद्धरेः ॥ चंद्रभागाजीवनेनद ध्यादेनयुतं तदा ॥ ५७ ॥ प्र
तस्तु स्वागत्यै प्रायच्छत्ततः कालेन केनचित् ॥ पंचत्वमहमासाद्य ताम्रिकस्यासुतत्तांगतः ॥ ५८ ॥ अस्या मत्प्रयोगेन यांच
थाहश्च त्वयानघ ॥ बुद्धस्त्वहारिणा त्वेते पापाः प्रेतत्वमागताः ॥ ५९ ॥ पादारताः केचिन्त्वा मिद्रोहरताः परे ॥ मित्र
द्रोहरताः केचिद्देशोऽस्मिंस्तु सुदारुणे ॥ ६० ॥ ममैते भ्रत्ततां याता अन्नपानकृतेन च ॥ असत्वो भगवान्कृष्णः परमा
त्मा सनातनः ॥ ६१ ॥ यदीयते न मुद्दिश्य अक्षय्यं तत्प्रकीर्तितम् ॥ मया विहीनाः किं त्वेते वनेऽस्मिन्सुदारुणे ॥ ६२ ॥
पीडामनुभविष्यंति दारुणां कर्मयोनिजाम् ॥ एतेषांत्वमहाभागममानुग्रहकाम्यया ॥ ६३ ॥ अनेकनामगोत्राणि
गृहाणालेखनेन च ॥ अलकक्षागतां चैवनवसंपुटिकाभृ मा ॥ ६४ ॥ हिमवत्यां तथा साधतवत्वं लप्स्यसे निधिम् ॥

119

गयाशीर्षेततोगत्वाश्राद्धंकृत्वामहामते ॥ ६५ ॥ एकमेकमथोद्दिश्यप्रेतंप्रेतंयथाक्रमम् ॥ एवंसंभाष्यमाणोऽसौतप्त
जांबूनदप्रभः ॥ ६६ ॥ विमानवरमारुह्यस्वर्गलोकमितोगतः ॥ स्वर्गतेप्रेतनाथेतुप्रभावात्तववाणिकछमान् ॥ ६७ ॥ ना
मगोत्राणिसंगृह्यप्रयातःसहिमाचलम् तत्रप्राप्यनिधिंगत्वाविनिक्षिप्यस्वकेगृहे ॥ ६८ ॥ धनभागमनुपादयगया
शीर्षवटंययौ ॥ प्रेतानांक्रमशस्तत्रचक्रेश्राद्धंदिनेदिने ॥ ६९ ॥ यस्ययस्यगयाश्राद्धंसकरोतिदिनेवाणिक ॥ सचतस्यस
दास्वप्नेदर्शयत्यात्मनस्तनुम् ॥ ७० ॥ ब्रवीतिचमहाभागप्रसादेनतवानघ ॥ प्रेतभावोमयात्यक्तःप्राप्तोस्मिपरमां
गतिम् ॥ ७१ ॥ सकृत्वाधनलोभाच्चप्रेतानांसत्कृतिंवाणिक ॥ जगामस्वगृहंतत्रमासिभाद्रपदेतथा ॥ ७२ ॥ श्रवणाद्वा
दशीयोगेपूजयित्वाजनार्दनम् ॥ दानंचदत्वाविप्रेभ्यःसोपवासोजितेंद्रियः ॥ ७३ ॥ महानदीसंगमेतुप्रतिवर्षंयुधि
ष्ठिर ॥ चकारविधिवद्दानंततोदिष्टांतमागतः ॥ ७४ ॥ अनाथपरमंस्थानंदुर्लभंचात्रमानवैः यत्रकामफलावृ
क्षानद्यःपायसकर्दमाः ॥ ७५ ॥ शीतलामलपानीयाःपुष्करिण्योमनोहराः ॥ ७६ ॥ तंदेशमासाद्यवणिक्समहात्मा
तप्तजांबूनदभूषितांगः ॥ कल्पंसमग्रंसहसुंदरीभिःस्वर्गेसरेमेमुदितःसदैव ॥ ७७ ॥ इतिश्रीभविष्येमहापु
राणोउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेश्रवणाद्वादशीव्रतवर्णनंनामपंचसप्ततितमोऽध्यायः ॥ ७५ ॥ ॥

श्रीकृष्णउवाच ॥ द्वादश्यान्तेविधिःप्रोक्तःश्रावणेयोयुधिष्ठिर ॥ सर्व्वपापप्रशमनःसर्व्वसौख्यप्रदायकः ॥ १ ॥ एकाद
शीपरानाम्नाख्याश्रवणेनसमन्विता ॥ विजयानामतिथिःप्रोक्ताभक्तानांविजयप्रदा ॥ २ ॥ बलवानजितोदैत्योबलिर्नामा
महाबलः ॥ तेनदेवगणाःसर्व्वेत्याजिताःसुरमंदिरम् ॥ ३ ॥ ततोदेवामहाविष्णुंगत्वावचनमब्रुविरे ॥ त्वंगतिःसर्व्वदेवा
नांशीघ्रंकष्टात्समुद्धर ॥ ४ ॥ तंहिदैत्यंमहाबाहोबलिंबलनिषूदन ॥ श्रुत्वाविष्णुस्तदावाक्यंदेवानांकरुणोदयम् ॥ ५ ॥
उवाचवाक्यंकालज्ञोदेवानांहितकाम्यया ॥ जानेवैरोचनिंदैत्यंबलिंत्रैलोक्यकंटकम् ॥ ६ ॥ तपसाभावितात्मानंशान्तं
दान्तंजितेन्द्रियम् ॥ सक्तंमकृतप्राणांसत्यसंधंमहाबलम् ॥ ७ ॥ तपसोन्तःस्रुवकृताकालेनास्यभविष्यति ॥ यदाविन
यसंपन्नंज्ञास्येकालेनकेनचित् ॥ ८ ॥ समाहत्यप्रियंतस्यतदास्येदिवौकसम् ॥ अदितिमप्रिपन्नावैपुत्रार्थेपुत्र
लोभिनी ॥ ९ ॥ तस्यामतिहितंदेवाःकरिष्येनात्रसंशयः ॥ तदेवानांहितंसर्व्वंवाहितंतुसुरद्विषाम् ॥ १० ॥ तस्मा
द्यूयंनिरुद्विग्नाःकालःकश्चित्प्रतीक्ष्यताम् ॥ एवमुक्तागतादेवाःकार्य्यंविष्णुरचिंतयत् ॥ ११ ॥ संचिंतयित्वासुचिरं
देत्यागर्भोचितारणाम् ॥ अदितिर्व्वरयामासवांछितंमेभविष्यति ॥ १२ ॥ अथकालेवकृतियोगेनेमासागर्भिताह्वम्,त
सुषुवेनवमेमासिपुत्रंसावामनंहरिम् ॥ १३ ॥ ह्रस्वपादंह्रस्वकायंमहाच्छिरसमर्भकम् ॥ पाणिपादोदरकृशांस्व

नारायणं हरिम् ॥१४॥ दृष्ट्वा तु वामनं जातं यदिसा वक्रमुखन्ता ॥ विस्मद्गा कामाह मवबकं किंचिन्नपारितम् ॥१५
एकादश्यां भाड्रपदे श्रवणेन नरोत्तम ॥ संचचाल मही जाते वामने तु त्रिविक्रमे ॥१६॥ भयं च महदैत्यानां देवानां
तोषश्चाभयत् ॥ जातकर्मादिकांस्तस्य संस्कारांस्त्वयमेव हि ॥१७॥ चकार कश्यपो धीमान्प्रजापतिरनुपत ॥ आ
षाढमेखलो दंडी धृत्वा यज्ञोपवीतकम् ॥१८॥ कृष्णात्वचश्चोदकधरः कमंडलु विभूषितः ॥ वलेर्बलवतो यज्ञं जगा
म वक्रु विस्तरम् ॥१९॥ दृष्ट्वा वलिमथो गाव वामनोऽभ्येत्य तक्षणाम् ॥ अथ चाह यज्ञपते दीयतां मम मेदिनी॰
२०॥ पादत्रयप्रमाणेन यष्ठव्यार्थे स्थितो ह्यसि ॥ दत्ता दत्ता तव मया वलिः प्राह द्विजोत्तमम् ॥२१॥ ततो वर्द्धित
मारब्धो वामनोऽनंतविक्रमः ॥ पादौ भूमौ प्रतिष्ठाप्य शिरसा हृष्यरोदसी ॥२२॥ ताभ्यां मिंडादिकीकाल्लोका
न्त्वेलात्रेतुत्रणः पदम् ॥ ततस्तीयं पदं लेभे तत्तो नेड्रादिवौकसः ॥२३॥ न दृष्ट्वा महदाश्चर्यं सिद्धा देवर्षयस्तथा॰
साधु साध्विति देवेशं प्रशशंसुर्मुदान्विताः ॥२४॥ ततो दैत्यगणान्सर्वाञ्जित्वा त्रिभुवनं वशी ॥ वलिमाह ततो
गच्छ सुतलं त्वं बलानुगः ॥२५॥ तत्र त्वमीप्सितान्भोगान्भव त्वा मद्बाहुपालितः ॥ अस्पंदस्पावसाने तु त्वमेवेंद्रो

भविष्यति ॥ २६ ॥ एवमुक्तो बलिः प्रायान्नमस्कृत्य नरोत्तमम् ॥ विसृज्येमं बलिं देवान्सकलान्स उवाच ह ॥ २७ ॥ स्वा
नि धिष्ण्यानि गच्छध्वं निवृत्तं विगतज्वराः ॥ देवेनोक्ता गता देवा हृष्टाः संपूज्य वामनम् ॥ २८ ॥ देवः कृत्वा तदा कार्यं
तत्रैवान्तरधीयत ॥ एतत्सर्वं समभवद्द्वादश्यां नराधिप ॥ २९ ॥ तेनेष्टा देवदेवस्य सर्वदा विजया तिथिः ॥ एषा वै फाल्गु
ने मासि शुष्योरासहिता नृप ॥ ३० ॥ विजया प्रोच्यते सद्भिः कोटिकोटिगुणोत्तरा ॥ एकादश्यां सोपवासो रात्रौ संपूजयेद्ध
रिम् ॥ ३१ ॥ रौप्यसौवर्णपात्रे वा दारुवंशमयेऽपि वा ॥ कुंडिकां स्थापयेत्पार्श्वे छत्रं चै पादुके तथा ॥ ३२ ॥ भृंगांच वैष्ण
वीं यष्टिं तथा मत्रकमंडलं । आच्छाद्य पात्रं वासोभिः फलैर्भक्ष्यापि सुशोभनैः ॥ ३३ ॥ मार्गचार्मरापगंधैश्च भक्ता वा भग
वर्मणा ॥ तिलाढकेन विनाप्यः प्रस्थेन कुडवेन वा ॥ ३४ ॥ व्रीहिभिर्वा यगोधूमैः फलैः शृङ्गतिलैर्मंडेत ॥ पुष्पैर्गंधैर्धूप
दीपैः पक्वान्नैरर्चयेद्धरिम् ॥ ३५ ॥ नानाविधैश्च नैवेद्यैर्भक्ष्यभोज्यैर्गुडोदनैः ॥ स्वस्य वितानं तु सारेण सहिरण्यं च कारयेत्
३६ ॥ मंत्रज्ञानगुणांचैव भक्ता लक्षगुणोत्तरम् ॥ भक्तिमान्भृगुणो येनं कोटिकोटिगुणोत्तरम् ॥ ३७ ॥ एभिर्मंत्रपदैस्तत्रपू
येद्गरुडध्वजम् ॥ उपहारैर्नरश्रेष्ठ भुविर्भक्त्या समाहितः ॥ ३८ ॥ ॐ जलजोपमदेहाय जलजास्याय शायिने ॥ जलराशिस्व
रूपाय नमस्ते पुरुषोत्तम ॥ ३९ ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्ते केशवानंत वासुदेव नमोऽस्तु ते ॥ ४०

स्नानमंत्र॥ मलयेभुसमुत्पन्नंगंधाढ्यंसुमनोहरं। मयानिवेदितंतुभ्यंगृहाणपरमेश्वर॥४१॥ चंदनमंत्र॥ वनस्पतिसमु
त्पन्नंगंधाढ्यंसुमनोहरम्॥ मयानिवेदितंतुभ्यंगृहाणपुरुषोत्तमः॥४२॥ पुष्पमंत्रः नमःकमलकिंजल्कपीतनिर्मलवाससे
मनोहरवपुःस्कंधधृष्टचक्रायशार्गिणे॥४३॥ पूजामंत्र॥ मत्स्यंकूर्मंवराहंचनारसिंहंचवामनम्॥ रामंरामंचकृष्णांनाम
भिर्वामनतायते॥४४॥ पादाद्यैकैकांगस्यपूजनंशीर्षगंततः॥ सर्वांगपूजा॥ धूपोऽयंदेवदेवेशशांखचक्रगदाधर॥४५
अच्युतानंतगोविंदवासुदेवनमोऽस्तुते॥ धूपमंत्रः॥ त्वमेवपृथिवीज्योतिर्वायुराकाशमेवच॥४६॥ त्वमेवज्योतिषांज्योति
र्दीपोऽयंप्रतिगृह्यतान्॥ दीपमंत्र॥ अन्नंचतुर्विधंस्वादुरसैःषड्भिःसमन्वितं॥४७॥ भक्ष्यभोज्यसमायुक्तंप्रसीदपरमे
श्वर॥ अन्नंप्रजापतिर्विष्णुरुद्रेन्द्राग्निभास्करा॥४८॥ अन्नंत्वष्टायमोऽग्निभ्यपापंहरन्तुमेऽव्यय॥ नैवेद्यमंत्रः॥ जगदा
दिर्जगद्रूपमनादिर्जगदंतकृत॥४९॥ जलाशायजगद्योनिःप्रीयतांमेजनार्दन॥ प्रीतानमंत्र॥ अनेककर्मनिर्वंधध्वंसि
नंजलशायिनम्॥५०॥ नतोऽस्मिमथुरावासंमाधवंमधुसूदनम्॥ नमोवामनरूपायनमस्तेऽस्तुत्रिविक्रमः॥५१॥
नमस्तेमहिमावंधायवासुदेवनमोऽस्तुते॥ नमस्कारमंत्र॥ नमोनमस्तेगोविंदवामनेशत्रिविक्रमः॥५२॥ सद्योपसंभ्र
यंकृत्वासर्वकामप्रदोभव॥ प्रार्थनामंत्र॥ सर्वगःसर्वदेवेशःश्रीधरःश्रीनिकेतनः॥५२॥ विश्वेश्वरश्चविष्णुश्चश्रीशा

गीत
पीवनमोनमः ॥ शयनमंत्रः ॥ एवंसंपूज्ययोरात्रावेकादश्यांनृपोतमः ॥ ५४ ॥ जागरंतत्रकुर्वीतवादित्रनिस्वनैः ॥ याव
च्छ्रवणासंयुक्ताद्वादशीपरमातिथिः ॥ ५५ ॥ तस्यांचसंगमेस्नात्वासर्वपापैःप्रमुच्यते एवंसंपूज्ययत्नेनप्रभातेवि
मलेसति ॥ ५६ ॥ प्रदेयंशास्त्रविदुषेब्राह्मणायचमंत्रतः ॥ ब्राह्मणाभ्यापिमंत्रेणप्रतिगृह्णीतमंत्रवत् ॥ ५७ ॥ वामतो
स्यप्रतिग्राहीवामनायनमोनमः ॥ ५८ ॥ ॐगुह्ये ॥ ॐशिरसि ॥ ॐपादयोः ॐनाभौ ॥ ॐभुजयोः ॥ ॐसर्वांगे ॥ सर्वात्मने
नमः ॥ धूपंफलंचनैवेद्यंसर्वमेतद्यथाविधिः ॥ नरोदद्यादुपोष्यैवमेकादश्यांसमंत्रकम् ॥ ५९ ॥ पूर्वोक्तविधिनाप्रात
र्भोजनंचबदात्मकम् ॥ पूर्वंदत्वाब्राह्मणेभ्यःपश्चाद्भुंजीतवाग्यतः ॥ ६० ॥ भूयोभूयोऽपिराजेंद्रसर्वत्रैवंविधिःस्मृतः
समाप्तेतुव्रतेराजन्यत्पुण्यंतन्निबोधमे ॥ ६१ ॥ चतुर्युगानिराजेंद्रएकसप्ततिसंख्यया ॥ प्राप्यविष्णुपुरेराजन्क्रीडतेका
लमक्षयम् ॥ ६२ ॥ इहागत्यभवेद्राजाप्रतिपक्षक्षयंकरः ॥ हस्त्यश्वरथपत्तीनांदाताभोक्ताविमत्सरी ॥ ६३ ॥ रूपसौभा
ग्यसंपन्नोदीर्घायुर्नीरुजोभवेत् ॥ पुत्रैःपरिवृतोजीवोजीवेच्छरदःशतंनर ॥ ६४ ॥ एतस्याःफलमाख्यातमेकादश्या
मयातनः ॥ पूर्वमेवसमाख्याताद्वादशीश्रवणान्विता ॥ ६५ ॥ उपोष्यैकादशीपश्चाद्वादशीमप्युपोषयेत् ॥ नचात्र
विधिलोपःस्यादुभयोर्देवताहरिः ॥ ६६ ॥ एकादशीद्वादशयोरन्तरस्यांश्रवणयुक्तायांश्रवणयुक्तोपवासेनैवतु

तद्वयसिद्धि । एकस्मिन्नुक्ते पूर्वमन्यां तिथिमुपोष्य पश्चादपारयित्वैवान्यो पोष्यत इति यो विधिलोपः स एकदेवता
कत्वेन न भवतीत्यर्थः ॥ वृषभस्य वरासंभूता द्वादशी संगयोदकम् ॥ दानं श्राद्धं दानं सत्यमुपवासः परो विधिः ॥ ६७ ॥
सगरेण ककुत्स्थेन धुंधुमारेण गाधिना ॥ एतैश्चान्यैश्च राजेंद्र कृतं वै द्वादशीव्रतम् ॥ ६८ ॥ सा द्वादशी बुधयुता श्रवणेन सा
र्कं स्याद्विजयाय कथिता ऋषिभिर्नभस्ये ॥ तामादरेण समुपोष्य नरोऽसमस्तं प्राप्नोति पार्थ अणिमादिगुणोपपन्नम् ॥ ६९
इति श्रीभविष्योमहापुराणोउत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विजयश्रवणद्वादशीव्रतवर्णनं नाम षट्सप्ततित
मोऽध्यायः ॥ ७६ ॥ ॥ श्रीकृष्ण उवाच ॥ कृष्णपक्षे तु पौषस्य संप्राप्तं द्वादशीव्रतम् ॥ पौषादि पारणं मासैः षड्भिर्ज्येष्ठां
तिकं स्मृतम् ॥ १ ॥ प्रथमं पुंडरीकाक्षं नाम कृष्णस्य गीयते ॥ द्वितीये माधवाख्यं तु विश्वरूपं तु फाल्गुने ॥ २ ॥ पुरुषोत्तमा
ख्यं तु ततः पंचमेऽच्युतसंज्ञकः ॥ षष्ठे जयेति देवेशं गुह्यं नाम प्रकीर्तितम् ॥ ३ ॥ पूर्वोक्तेषु च मासेषु स्नात्वा न प्राशनयोर्मिलाः
आषाढादिषु मासेषु पंचगव्यमुदाहृतम् ॥ ४ ॥ स्नानं च प्राशनं चैव पंचगव्यं सदेष्यते ॥ पूजयेत्पुंडरीकाक्षं तैस्तैरेव च ना
मभिः ॥ ५ ॥ प्रतिमासं च देवेशं कृत्वा पूजां यथाविधि ॥ विप्राय दक्षिणां दद्याद्बुद्ध्या नन्यभक्तितः ॥ ६ ॥ पारणं चैव देवे
याषीरान्नं भक्तिपूर्वकम् ॥ कुर्वीत मनुजा गोविंदस्नानेनार्चनं यतः ॥ ७ ॥ नक्तं भुंजीत सततं तैलक्षारविवर्जितम् ॥

एकादश्यामुपोष्यैवं द्वादश्यामथवा दिने ॥ ८ ॥ एवं संवत्सरस्यांते यदभिप्रेतमात्मनः ॥ धनं च सुहिरण्यं वा धान्यं
भाजनमासनम् ॥ ९ ॥ शय्यां वा ब्राह्मणे दद्यात्केशवः प्रतिगृह्णताम् ॥ एतामुपोष्य विधिना विप्रश्चीर्णो व्रतस्मरः ॥ ११ ॥
सर्वान्कामानवाप्नोति यद्यदिच्छति चेतसा ॥ ततो लोके भुवि ख्यातं संप्राप्य द्वादशी निवै ॥ ११ ॥ कृताभिलषिता दृष्टा
शास्त्राधर्मतत्परैः ॥ प्राप्येदखिलान्कामानस्मिन्स्मृता द्वादिने दिने ॥ १२ ॥ संप्राप्तिकामुपवसंति समीहितार्था ये या नवा
मनुजपुंगव विष्णुभक्ताः ॥ तेषां समीहितफलानि ददाति शाश्वद्दासः सुरेशो भवते भगवत्प्रसादात् ॥ १३ ॥ इति श्रीभ
विष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संप्राप्तिद्वादशीव्रतं नाम सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥
श्रीकृष्ण उवाच ॥ तथान्यामपि ते वच्मि गोविंदद्वादशीं शृणु ॥ तस्याः सम्यगनुष्ठानात्प्राप्नोत्यभिमतं फलम् ॥ १ ॥
पौषे मासे सिते पक्षे द्वादश्यां समुपोषितः ॥ सम्यक्संपूज्य गोविंदनाम्ना देवमधोक्षजम् ॥ २ ॥ धूपपुष्पोपहारैश्च नैवे
द्यैश्च समाहितः ॥ गोविंदेति जपेन्नाम पुनस्तत्तन्मानसः ॥ ३ ॥ विप्राय दक्षिणां दद्याद्यथाशक्त्या नराधिप ॥ स्वयं वि
उदस्तुलितो गोविंदेति च कीर्तयेत् ॥ ४ ॥ पाखंडिभिर्विकर्मस्थैरालापांश्च विवर्जयेत् ॥ गोमूत्रं गोमयं वापि दधि क्षीर
मथापि वा ॥ ५ ॥ गोदोहे ततः समुद्भूतं प्राश्नीतात्मविशुद्धये ॥ द्वितीये ऽह्नि पुनः स्नात्वा तथैवाभ्यर्च्य केशवम् ॥ ६ ॥ तेनैव ना

123

विकल्पस्थै·२

संपूज्य दत्वा विप्रस्य दक्षिणाम् ॥ ततो भुंजीत गोदोहं संभृतेन समुद्भवम् ॥७॥ एवमेकाविलान्मासानुपोष्य प्रयतः
शुचिः ॥ दद्याद्वाह्निकं विद्वान्प्रतिमासं तु शक्तितः ॥८॥ पारितेव पुनर्वर्षे गोविंदं पयसा सह ॥ गोविंदः प्रीतिमायातु व्र
तेनानेन मे सदा ॥९॥ विप्रोषतः पुनर्दद्यात्तस्मिल्लह्नि गवाह्निकम् ॥ भक्त्या परमया राजन्सम्यक्फलमाप्नुयात् ॥१०
स्वर्णशृंगीं रौप्यखुरां गां दत्वा वृषभं वरम् ॥ इति मासं द्विजातिभ्यो दत्वा यत्फलमश्नुते ॥११॥ तदाप्नोत्यखिलं सम्यग्व्रतमे
तदुपोषितः ॥ तं च लोकमवाप्नोति गोविन्दो यत्र तिष्ठति ॥१२॥ गोविंदद्वादशीमेतामुपोष्यंति विधानतः ॥ वियोगनमानाद
स्यं ते लोके यापिशाश्वांकवत् ॥१३॥ गोविंदमर्चयति गोरसभोजनेन कुगावो विनोदयति तद्गवाह्निकभ्यः ॥ यो द्वादशी कु
कृतान्नकृतोपवासः प्राप्नोत्यसौ सुरभिलोकमपेतशोकम् ॥१४॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्ण
युधिष्ठिरसंवादे गोविंदद्वादशीव्रतवर्णनं नामाष्टसप्ततितमोऽध्यायः ॥ ॥७८॥ ॥ युधिष्ठिर उवाच ॥ ॥
उपवासव्रतानां तु वैकल्यं यन्महामते ॥ दानधर्मकृतं यच्च विपाको वद याद्दृशः ॥ १ ॥ श्रीकृष्ण उवाच ॥ यज्ञानामुपवा
सानां व्रतानां च नरेश्वर ॥ वैकल्यात्फलवैकल्यं याद्दृशं तच्छृणुष्व मे ॥ २ ॥ उपवासान्विनारब्धं प्राप्नुवंत्येव तादृशाः
भ्रष्टभार्या निर्द्धनाश्च वसंति पुरुषाः पुनः ॥३॥ रूपं तथोत्तरं प्राप्य व्रतवैकल्यदोषतः ॥ काणाः कुब्जाश्च षंढाश्च भवंत्य

उपवासादिनाशप्रायश्चित्तैव २

स्याभ्यमानवाः ॥ ४ ॥ उपवासीनरःपत्नींनारीप्राप्यतथापतिम् ॥ वियोगंव्रतवैकल्यंदुर्भगत्वमवाप्नुयात् ॥ ५ ॥ येऽन्ये
सत्यदातारस्तथान्येसम्यनगनयः ॥ कलेवसंतिदुःशीलाडुक्कृताशीलनिभ्यये ॥ ६ ॥ वस्त्रानुलेपनैर्हीनाभूषणोज्झातिरू-
पिणः ॥ विरूपरूपाश्चतथाप्रसाधकगुणान्विताः ॥ ७ ॥ तेसर्वेव्रतवैकल्यात्कलवैकल्यमागताः ॥ तस्मान्नकुर्तवैकल्यं
यत्नवैकल्यमेवच ॥ ८ ॥ उपवासेनकर्त्तव्यंवैकल्याधिकलंफलं ॥ युधिष्ठिरउवाच ॥ कथंविधादिवैकल्यमुपवासादिके
भवेत ॥ ९ ॥ किंतत्रचद्कर्त्तव्यमस्मिन्छिद्रंयेनजायते ॥ श्रीकृष्णउवाच ॥ अवेंऽवादश्याहेबासमस्तेष्वेवकर्मसु ॥ १० ॥ वैक
ल्यंप्रशमंयातिमत्प्रसादान्नसंशयम ॥ मार्गशीर्षेसितेपक्षेद्वादश्यांनियतःशुचिः ॥ ११ ॥ कृतोपवासोदेवेशंसमभ्यर्च्यजना-
र्दनम् ॥ स्नातोनारायणंब्रूयाद्भुञ्जन्नारायणंतथा ॥ १२ ॥ गच्छन्नारायणंदेवंस्वपन्नारायणंपुनः ॥ पंचगव्यजलस्नातो
विशुद्धात्माजितेंद्रियः ॥ १३ ॥ यवव्रीहिमयंपात्रंदत्वाविप्रायभक्तितः ॥ इदमुच्चारयेत्सम्यग्देवस्यपुरतोहरेः ॥ १४ ॥ सप्त
जन्मनियत्किंचिन्मयाखंडव्रतंकृतम् ॥ भगवंस्त्वत्प्रसादेनतदखंडमिहास्तुमे ॥ १५ ॥ यथाखंडंजगत्सर्वंत्वमेवपुरुषोत्त-
म ॥ तथाखिलान्यखंडानिव्रतानिममसंतुवै ॥ १६ ॥ चतुर्भिरपिमासैस्तुपारणंप्रथमंस्मृतम् ॥ प्रीणनंचहरेःकुर्यात्स्यादितः
पारणेततः ॥ १७ ॥ चैत्रादिषुचमासेषुचतुर्ष्वन्यंतुपारणम् ॥ तत्रापिसकृपाञ्जाशिदधाकृत्वासमन्वितः ॥ १८ ॥ श्रावणा

124

दिषुमासेषु कार्त्तिकान्ते तु पारणम् ॥ तत्रापि घृतपात्राणि दद्याद्विप्राय दक्षिणाः ॥ १९ ॥ सौवर्णं रौप्यं ताम्रं च मन्मयं
पात्रमिष्यते ॥ स्वशक्त्यपेक्षया राजन् स्थाल्याद्यं वापि कारयेत् ॥ २० ॥ एवं संवत्सरस्यान्ते ब्राह्मणान्सज्जितेन्द्रिय ॥ आमंत्र्य द्वा
दशान्विप्रान्भोजयेद्घृतपायसैः ॥ २१ ॥ वस्त्राभरणदानैश्च प्रतिपत्त्या क्षमापयेत् ॥ उपदेष्टारमप्यत्र पूजयेद्विधिवद्गुरुम् ॥
२२ ॥ एवं सम्यग्यथान्यायमखंडद्वादशीं नरः ॥ समुपोष्य अखंडस्य व्रतस्य फलमश्नुते ॥ २३ ॥ सप्तजन्मसु वैकल्यं यद्व्र
तस्य क्वचित्कृतम् ॥ करोत्यविकलं सर्वमखंडद्वादशी तु तत् ॥ २४ ॥ तस्माद्देवाः प्रयत्नेन नरैः स्त्रीभिश्च सुव्रत ॥ अखंडद्वाद
शी सम्यगुपोष्या फलकांक्षया ॥ २५ ॥ ये द्वादशीव्रतमखंडमिति प्रसिद्धं मार्गोत्तमागमविधिक्रमतः कृतेन येन ॥ खंडव्रता
नि पुरुषैः सुकृतानि यानि संपूर्णतां समुपयान्ति हरेः प्रसादात् ॥ २६ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्री
कृष्णयुधिष्ठिरसंवादेऽखंडद्वादशीव्रतवर्णनं नामैकोनाशीतितमोऽध्यायः ॥ ७९ ॥ श्रीकृष्ण उवाच ॥ फाल्गुनेमल
पक्षस्यैकादश्यामुपोषितः ॥ नरो वा यदि वा नारी समभ्यर्च्य जगत्पतिम् ॥ १ ॥ हरेर्नाम वदन्भक्त्या भावपूतो युधि
ष्ठिर ॥ उत्तिष्ठन्प्रस्वपंश्चैव हरिमेवानुकीर्त्तयेत् ॥ २ ॥ ततोन्येदिवसे प्राप्ते द्वादश्यां नियतो हरिं ॥ स्नात्वा सम्यक्समभ्यर्च्य
दत्वा विप्राय दक्षिणाम् ॥ ३ ॥ हरिमुद्दिश्य चैवाग्नौ घृतहोमं कृतक्रियः ॥ प्रणिपत्य जगन्नाथमिति वाणीमुदीरयेत्

४ ॥ पातालसंस्थां वसुधां यां प्रसाद्य मनोरथान् ॥ अवाप वसुदेवोसौ पुत्रद्यानुमनोरथा ॥ ५ ॥ यमभ्यर्च्य दिवि प्राप्तः स
कलांश्च मनोरथान् ॥ भुवराज्यश्च देवेंद्रो यमभ्यर्च्य जगत्पति ॥ ६ ॥ मनोरथानमितवान् प्राप्तवांश्च मनोहरान् ॥ एवम
भ्यर्च्य पूजां च निष्पाद्य च हरेस्ततः ॥ भुंजीत प्रयतः सम्यग्गृहीत्वं पांडुनंदन ॥ ७ ॥ फाल्गुने चैत्रवैशाखे ज्येष्ठे मासि वसन्नम
च नुभिः पारणं मासैरेभिर्निष्पादितं भवेत् ॥ ८ ॥ रक्तपुष्पैश्च चतुरो मासान्कर्वीरवार्चनम् ॥ दहेनुग्गुग्गुलं प्राश्यगोशृंग
क्षालनं जलम् ॥ ९ ॥ हविष्यान्नं च नैवेद्यमात्मानं चापि भोजनम् ॥ ततश्च श्रूयतां पार्थ साधा चादौ नु या क्रिया ॥ १० ॥
जातीपुष्पाणि धूपश्च हाम्नः सर्जरसोनघ ॥ प्राशयद्दर्भोदकं चान्यच्छाल्यन्नं च निवेदनम् ॥ ११ ॥ स्वयं तदेव चाश्नीयाद्धेपं
पूर्ववदाचरेत् ॥ कार्त्तिकादिषु मासेषु गोमूत्रं कायशोधनम् ॥ १२ ॥ सुगंधं चैव धूपं च पूजां भृंगारकेन च ॥ कांसारं चात्र नै
वेद्यमश्नीयात्तच्चैव स्वयम् ॥ १३ ॥ प्रतिमासं च विप्राय दानं स्याद्दक्षिणा तथा ॥ पारणं चैव कृष्णाविष्णोः पारणेपावनेमते ॥ १४
यथाशक्त्या यथाप्रीत्या वित्तशाठ्यं विवर्जयेत् ॥ स्वयं वैनैव गोविंदः पूजितः प्रीयते यतः ॥ १५ ॥ पारणान्ते यथाशक्त्यापि
नः पूजितो हरिः ॥ प्रीणितश्चेप्सितान्कामांस्तान्ददात्यथ्यानघः ॥ १६ ॥ वर्षान्ते प्रतिमासिद्धां कारयित्वा सुशोभनाम् ॥ स्व
र्णकेव यथाशक्त्या शंखचक्रांगविभूषिताम् ॥ १७ ॥ पुष्पवस्त्रयुगाच्छन्नां ब्राह्मणाय निवेदयेत् ॥ तां दद्याद्ब्राह्मणांस्तत्र भो

125

अलक्षा:

नपिबेत्क्षमापयेत॥१८॥ द्वादश्यां च प्रदातव्याः कुंभाः साल्लजलान्विता॥ छत्रोपानद्युगैः सार्द्धं दक्षिणाभिश्च भारत:
१९॥ एषा पुन्या पापहरा द्वादशीफलमिछताम्॥ यथाभिलषितान्कामां ददाति नृपसत्तम॥२०॥ पुरस्य त्वखिलान्कामा
यतश्चैषां मनोरथान्॥ मनोरथा द्वादशीयं ततो लोके प्रगिश्रुता॥२१॥ उपोष्यैतां त्रिभुवनं लब्धमिन्द्रेण वै पुरा॥ आदि
त्याश्चोषिताः पुत्रा धनमीशानसा तथा॥२२॥ सोमश्चैनाभ्युपतं प्राप्तवनैश्चाभिमतं फलं। राजर्षिभिस्तथा विप्रैः स्त्रीवि
ट्शूद्रैश्च भूतले॥२३॥ यं यं काममभिध्याय व्रतमेतदुपोषितम् तत्तदाप्नोत्यसंदिग्धं विलोराधनोद्भन॥२४॥
अपुत्रो लभते पुत्रमधनो लभते धनम्॥ रोगाभिभूतश्चारोग्यं कन्या प्राप्नोति सत्पतिम्॥२५॥ समागमं प्रवसतैरुपोष्यै
तामवाप्नते॥ सर्वान्कामानवाप्नोति मृतः स्वर्गे विमोदते॥२६॥ नापुत्रो नाधनो जन्मे श्लोबियोगी न च निर्गुण:॥ उपोष्यैतन्तु
तेमर्त्य: स्त्री भद्रो वापि जायते॥२७॥ स्वर्गलोके सहस्राणि वर्षाणाम उषतानि च॥ भोगानभिमतान्भुक्त्वा नत्रतत्र पपेद्ध
या॥२८॥ इहपुण्यवतां नृणां धनिनां लक्ष्म्यालिनाम्॥ गृहे प्रजायते राजन्सर्वव्याधिविवर्जित:॥२९॥ न द्वादशी नृपवस
न्ति मनोरथाख्यां नैवार्चयन्ति पुरुषोत्तममादिदेवम्॥ गोब्राह्मणांश्च न नमन्ति न पूजयन्ति ये ते मनोभिलषितं कथ
माप्नुवन्ति॥३०॥ इति श्रीभविष्येमहापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मनोरथद्वादशीव्रतवर्णनंनामा

पृथ्वीं वा कृतेनानेन १

॥ भवि ॥
॥ १२६ ॥

तीनितमोऽध्यायः ॥ ९० ॥ ॥ युधिष्ठिर उवाच ॥ अल्पायासेन गोविन्द धनेनाल्पेन वा विभो ॥ पापं प्रशममायाति येन
तद्वक्तुमर्हसि ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ शृणु पार्थ परां पुण्यां द्वादशीं पापनाशिनीम् ॥ यामुपोष्य परं भक्त्या मानुषाः श्र
द्धयान्विताः ॥ २ ॥ माघमासे च संप्राप्ते आषाढर्क्षं भवेद्यदि ॥ मूलं वा कृष्णपक्षस्य द्वादश्यां नियतव्रतः ॥ ३ ॥ गृह्णीयात्स्म
रण फलदं विधानं तस्य मे शृणु ॥ देवदेवं समभ्यर्च्य सुस्नातः प्रयतः शुचिः ॥ ४ ॥ कृष्णनाम्ना च संपूज्य एकादश्यां महा
मते ॥ उपोषितो द्वितीयेह्नि पुनः संपूज्य केशवम् ॥ ५ ॥ संकृत्यनाम्ना तेनैव कृष्णाख्येन पुनः पुनः ॥ दद्यात्तिलांश्च विप्रा
य कृष्णो मे प्रीयतामिति ॥ ६ ॥ ततश्च प्राशयेत्कृष्णांस्तथा कृष्णतिलान्नृप ॥ विप्रश्रीशानमंत्रोक्ते समाप्ते वर्षपारणे
७ ॥ कृष्णकुंभांस्तिलैः सार्धं पक्वान्नेन च संयुतान् ॥ छत्रोपानद्युगैर्वस्त्रैः सहिताञ्जलगर्भितान् ॥ ८ ॥ ब्राह्मणानां प्रदे
यान्ते यथावन्माससंख्यया ॥ तिलप्ररोहा जायंते यावत्संख्यास्तिलान्नृप ॥ ९ ॥ तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ अ
रोगो जायते नित्यं नरो जन्मनि जन्मनि ॥ १० ॥ अंधो न बधिरश्चैव न कुष्ठी न च कुत्सितः ॥ भवत्येनामुषित्वा तु तिलाख्यां द्वा
दशीं नरः ॥ ११ ॥ अनेन पार्थ विधिना तिलदानान्न संशयः ॥ मुच्यते पातकैः सर्वैरनायासेन मानवः ॥ १२ ॥ दानं विधिवत्तथा
श्राद्धं सर्वपातकशांतये ॥ नार्थः प्रभूतो नायासः शारीरे नृपसत्तमः ॥ १३ ॥ सर्वोपभोगनिरतो ह्यपरे द्वाभ्यां स्नानं

॥ राम: ॥
॥ १२६ ॥

126

तिलैस्तिलनिवेदनकृतिलाशी ॥ दत्त्वा तिलान्द्विजवराय विराजकेनं संपूज्य विष्णुपदवीं समुपैति मर्त्यः ॥१४ ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे उल्कानवमीव्रतवर्णनं नामैकाशीतितमोऽध्यायः
८१ ॥ युधिष्ठिर उवाच ॥ यत्त्वतापाय वै पुंसां भवत्यामुष्मिकं कृतम् ॥ तत्पापाय भवति तद्वदस्व यदूत्तम ॥१ ॥ उपवास
प्रभावं वै कृष्णाराधनकांक्षिणाम् ॥ कथयेह महाबाहो नैव तृप्यामि कथ्यतः ॥२ ॥ श्रीकृष्ण उवाच ॥ श्रूयतां पार्थ यत्त्व
ष्टाः कौतुकाद्भवता वयम् ॥ आमुष्मिकं ततापाय पुनापाय चजायते ॥ ३ ॥ उपोषितप्रभावं च कृष्णाराधनकांक्षिणाम्
कथयामि यथावृत्तं पूर्वमेव नरोत्तम ॥४॥ वैदिशं नाम नगरं प्रख्यातं नृपसत्तम ॥ तत्र वैश्योऽभवत्पूर्वं वीरभद्र इति
श्रुतः ॥ ५ ॥ भार्यया मातृदुहितापुत्रपौत्रैः समन्वितः ॥ प्रभूतमन्नवर्गाढ्यो बहुभृत्यापारकारकः ॥ ६ ॥ पुत्रपौत्रादिभिः रागो
व्यासक्तिर्मतिरेव च ॥ परलोकं प्रति मतिस्तस्य नासीत्कदाचन ॥७ ॥ चकारानुदिनं सोऽथ न्यायासायैर्द्धनार्जनम् ॥ सर्व
ग्रासव्रतिः स्नेहः पुत्रस्नेहपरिप्लुतः ॥ ८ ॥ न जुहोत्यदिते काले न ददाति न स्नाय ॥ बभूव चोद्यमसत्यपुत्रादिभिरतोपरः ॥
नित्यनैमित्तिकानां च हानिं चक्रे स्वकर्मणाम् ॥ ९ ॥ तृष्णाभिभूतो राजेंद्र स्ववर्गभरणोद्यतः ॥ कालेनागच्छता सोऽपम
तो विंध्याटवीतदे ॥१० ॥ यानतादेहमत्युग्रेतो ग्रीष्मकाले भवत्तप ॥ तं ददर्श महाभागो दिव्ययानसमन्वितः ॥११ ॥

॥ भवि. ॥
॥ १२७ ॥

वेदवेदांगविद्वेषी विप्रांतोनामवैद्विजः ॥ भास्करस्यांशुभिर्दग्धैर्दहंतमनिदारुणौः ॥ १२ ॥ प्रतप्तबालुकामध्ये तृषार्त
भ्रान्तिपीडितः ॥ कृत्स्नामकंठमग्नकायेंतयोद्दत्तविलोचनम् ॥ १३ ॥ निष्क्रांतजिह्वमंगेषु विस्फोटैः सर्वतश्चितम्
निश्वासायाससंवेदेनाविह्वलः पीडितोदरः ॥ १४ ॥ निजेनकर्मणावद्धमसमर्थंप्रसर्पणे ॥ तथाद्दग्नमध्ये हृद्गार्दभेयो
महत्स्वपि ॥ १५ ॥ विप्रीनः ग्राहराजेन्द्रकाहरणमरितंवचः ॥ जानन्नपियथाप्राप्तं तस्यानुष्ठानजंफलम् ॥ १६ ॥ जंतोस्तस्यो
पकारायसर्वतो हृदयप्लिव ॥ निपीतउवाच ॥ अधःसूर्यांशुभिस्तप्तैर्वह्निभिः पथिपांशुभिः ॥ १७ ॥ उपर्यर्ककरैस्ती
क्ष्णैस्तृषागातनिपीडितम् ॥ अन्यत्तत्राणकैर्घोरैरविषह्यैः सुदारुणैः ॥ १८ ॥ कथयेहयथानत्वमेकाकीदह्यसे
कथम् ॥ तस्यैतद्वचनं श्रुत्वा विपीतस्यसवेदनः ॥ १९ ॥ वेदनार्तउवाचेदं कृच्छ्रादुद्धृत्यनंदकम् ॥ सीरभद्रउवाच ॥
प्रलत्वालोचितंपूर्वंकथमेतन्भविष्यति ॥ २० ॥ अत्राभ्वतेशाभ्वतधीस्तेनदद्याभिदुर्मतिः ॥ इदंकरिष्याम्यपरंत्वि
दंकृत्वात्विदंपुनः ॥ २१ ॥ इतीच्छाज्ञानमारूढस्तेनदद्याभिदुर्मतिः ॥ शीतोष्णावर्षादिभवंलोभात्सोढंमयाःश्रम
म् ॥ २२ ॥ नदेवहितधर्मार्थतेनदद्याभिदुर्मतिः ॥ पितृदेवमनुष्याणामदत्वायोऽपितान्हिये ॥ २३ ॥ तेगतानापिव
तैतैदह्याम्येकोऽत्रदुर्मतिः ॥ उग्रक्षेत्रकलत्रेषु ममत्वाहृतचेतना ॥ २४ ॥ बहुसाधुकृतंकर्मतेनदद्याभिदुर्मतिः ॥

॥ राम: ॥
॥ १२७ ॥

नमयापूजितागेहान्निर्गताद्विजसत्तमा ॥ २६ ॥ स्ववर्गमिहकामेननतेनदत्तास्वहंमति ॥ यत्नेनपूजितादेवाःकु
टुंबंपोषितंपरम् २७ ॥ एकाकीनान्नदत्तामिष्टेभुक्तास्तेऽन्यतोगताः ॥ नित्यंनैमितिकंकर्मपूर्वेषांचैवनोकृ
तम् ॥ २८ ॥ एकाकीनेनदत्तामिगतास्तेफलभोगिनः ॥ दाराःपुत्राश्चभृत्याश्चपापपुष्टामयाभृताः ॥ २९ ॥
एकाकीनेनदत्तामिगतास्तेफलभोगिनः ॥ दाराःपुत्राश्चभृत्यार्थेमयापापार्थसंचयः ॥ ३० ॥ ऊनत्वेनान्नदत्ता
मिष्टेभुक्तास्तेऽन्यतोगताः ॥ क्षतपापंमयाभुक्तमस्येत्तत्कर्मसंचितम् ॥ ३१ ॥ दत्तास्वेकोऽहमत्यंतंगतास्तेफ
लभोगिनः ॥ यन्ममत्वाभिभूतेनमयापापमुपार्जितम् ॥ ३२ ॥ नतदन्यस्यकस्यापिकेवलंममदुष्कृतम् ।
अंतर्दुःखेनदग्धोऽहंबहिर्दत्ताग्निभावयन् ॥ ३३ ॥ तावद्दुःखंनवाभंतुपापमेकंद्विधास्थितम् ॥ कृतस्तस्मा
त्मदुद्धारंपरूपस्यमतसागरम् ॥ ३४ ॥ नवयेनाहमाहूदंप्राप्नुयांमुनिसत्तम ॥ ॥ विपीतउवाच ॥ अल्पकालि
कउद्धारेनवपश्यामिसंशयम् ॥ ३५ ॥ प्रभीतांपापमेतावत्कुवृत्तंचारित्रेनेपरम् प्रतीतेदशामेजन्मजन्मान्यमु
ताराधनेच्छया ॥ ३६ ॥ सुकर्मजपदानभेष्टादन्नींसमुपोषितः ॥ नचतस्याःप्रसादेनपापमत्यंतदुर्जयम् ॥ ३७ ॥
मलैरहोभिःसंक्षीणामामपात्रेयथाजलम् ॥ गतंपापमयंह्यस्याःप्रभावोऽस्यतस्तदुर्लभः ॥ ३८ ॥ नाशःपापस्य

॥ भविपु ॥
॥ १२८ ॥

कृतेन येन सुकृतकर्मणाः ॥ सकृत्कर्मप्रदा ह्येषा नित्यं वै द्वादशी स्मृताः ॥ ३९ ॥ यथैव दत्तानैन भवता परिदेवितम्
न मुवाचात्र संदेहो मम तापाय दैव किम् ॥ ४० ॥ पापमन्त्रकृतं ते त्वमडता पापजायते ॥ आहूतादायतथा पश्यामि हृष्ट
दयकृतान्तनाम् ॥ ४१ ॥ सीरभंडंसमाभ्यात्स्य यथा विध्यं मत्ता मुनिः ॥ सोप्यत्वेनैव कालेन ततो मोक्षमवाप्तवान् ॥ ४२
उपवासप्रभावश्च कथितस्तेनरोत्तम ॥ येनाल्पैरेव दिवसैर्भूरि पापं क्षयं गतम् ॥ ४३ ॥ तस्मात्त्वं रोगपापाय यतनीत
यंतपातकम् ॥ उपवासाश्च कर्तव्याः सदैवास्माद्धितैषिणा ॥ ४४ ॥ युधिष्ठिर उवाच ॥ अथैतत्कृष्ण पापानां विपाको न
रस्मिन्स्थिते ॥ पृष्टैर्भुज्यते ह्यत्रात्मा मोक्षं वद सत्तम ॥ ४५ ॥ श्रीकृष्ण उवाच ॥ जयापापमेताः पुरुषाः सदा सुकृतकर्म
णः ॥ जयाख्या द्वादशीस्नानं यान्सुकृतकर्मणाम् ॥ ४६ ॥ फाल्गुनामलपक्षस्य एकादश्यामुपोषितः ॥ द्वादश्यां तु द्वि
जश्रेष्ठ पूजयेन्मधुसूदनम् ॥ ४७ ॥ एकादश्यां स्थितिस्थश्च विष्णोर्नामानुकीर्तयन् ॥ पूजायां वासुदेवस्य मुञ्जीत सुस
माहितः ॥ ४८ ॥ कामं क्रोधं च लोभं च मदं मोहं च वर्जयेत् ॥ द्रोहादीन्वर्जयेद्दोषान्सर्वान्ध्यनमतोऽव्रवान् ॥ ४९ ॥ भावयेद्वि
ष्णोः भक्तश्च संसारे संसारं तांतथा ॥ एवं भावितचित्तेन प्राणिनां हितमिच्छता ॥ ५० ॥ नमो नारायणायेति वक्तव्यं
स्वपता निशि ॥ तथैव कुर्यां द्वादश्यां नात्मा क्षत्रा रणान्नप ॥ ५१ ॥ सौवर्णा ताम्रपात्राणि मृन्मयान्यपि पांडव ॥ यवपा

॥ राम: ॥
॥ १२८ ॥

128

त्राणि पूर्ववत्तु दद्यान्मासचतुष्टयम् ॥ ५२ ॥ आषाढादि द्वितीयं तु पारयेत्त्वं महामते ॥ तत्रापि घृतपात्राणि दद्या
त्कुम्भान्समन्वितः ॥ ५३ ॥ कार्त्तिकादिषु मासेषु माघांतेषु तथा तिलान् ॥ विप्राय दद्यान्मात्रं तु प्रतिमासमुपोषितः
५४ ॥ नामत्रयमशेषेण मासि मासि दिनत्रयम् ॥ तथैवोच्चारयन्दद्यान्मासि मासि यथादिकम् ॥ प्रणम्य च हृषीकेशं
कृतप्राञ्जः प्रसादयेत् ॥ ५५ ॥ त्रिलोकेन नमस्ते जगतीप्रसूते श्रीवासुदेवाय नमो नमस्ते ॥ नारायणाख्यं प्रणतैर्निषेवितं
करोतु मे शाश्वत पुण्यराशिम् ॥ ५६ ॥ प्रसीद पुण्यं जयमेति विष्णो श्रीवासुदेवार्द्धमपैतु पापम् ॥ प्रयातु नाशो मम यो
विनाशं मानैः प्रियमाप्नुदितस्त्वमेमाति ॥ ५७ ॥ विष्णो प्रणयोऽङ्गो मेस्तु वासुदेवास्तु मे भ्रमम् ॥ नारायणास्तु मे धर्मो
जहि पापमशेषतः ॥ ५८ ॥ अनेकजन्मजनितं बाल्ययौवनवार्द्धके ॥ प्रत्यं विहृद्धि यातु वातु पापं वलं क्षयम् ॥ ५९ ॥
आकाशादिषु यद्दोषो ग्राह्यो महदादिषु ॥ प्रकृतौ च ह्यवेवैव ब्रह्मण्यपि च सप्रभः ॥ ६० ॥ यथैकरूपो धर्मात्मा वासुदे
वोऽव्यवस्थितः ॥ तेन सत्येन पापं मे नरकार्त्तिप्रदं क्षयम् ॥ ६१ ॥ प्रयातु सुकृतस्याप्तिर्मम मासानुदिवसे जयः ॥ पापस्य हा
निः प्रणयस्य वृद्धिर्मेस्तु नमो नमः ॥ ६२ ॥ एवमुच्चार्य विप्राय दद्यात्प्रकल्पितं तत भुंजीत कृतसत्पारणो पारणो गते
६३ ॥ पारणांते तु देवेशं प्रीणनं शान्तिको नृप ॥ कुर्वीतापि तु पाखंडैरालापं च विवर्जयेत् ॥ ६४ ॥ एवं संवत्सरस्यांते कांच

नीं प्रतिमां हरेः ॥ पूजयित्वा वस्त्रपुष्पैर्घृतपात्रेण संयुतैः ॥ ६५ ॥ गां सवत्सां च विप्राय दद्याच्छ्रद्धासमन्वितः ॥ वि
लं वित्तं च यत्स्यात्सर्वं देवानस्मान्भजेद्यदि ॥ ६६ ॥ तस्मिन्नहनि दातव्यं भोजने वारिवारितम् ॥ इत्येषा कथिता पुण्या
सुकृतस्य महावहा ॥ ६७ ॥ द्वादशी नरकं पार्थ यथा मुयो श्च न पश्यति ॥ नामृयो न च शास्त्राणि न च लोहमुखाः खगाः
६८ ॥ नारकास्तं प्रबाधंते मतिर्यस्य जनार्दने ॥ नामोच्चारणमात्रेण विष्णोः क्षीणाघसंचयः ॥ ६९ ॥ भवत्यघविनाश
श्च नरके पतनं कुतः ॥ नमो नारायणाहरे वासुदेवेति कीर्तयेत् ॥ ७० ॥ न यान्ति नरकं मर्त्याः संक्षीणाशेषपातकाः ॥
तस्मात्पाखंडिसंसर्गमकुर्वद्वादशीमिमाम् ॥ ७१ ॥ उपोष्य पुण्यो पवये न यान्ति नरकं नराः ॥ ७२ ॥ पापं क्षिणोति सुकृ
तस्य करोति वृद्धिं वृद्धिं प्रयच्छति नियच्छति सर्वदोषान् ॥ या द्वादशीह सुकृता निहिता च लोके कस्मान्न तामुपवसं
ति विमूढचित्ताः ॥ ७३ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शुक्लद्वादशीव्रतवर्णनं
नाम षडशीतितमोऽध्यायः ॥ ८२ ॥ ॥ युधिष्ठिर उवाच ॥ यदेतत्परमं गुह्यं सर्ववेदेषु पठ्यते ॥ स देवः पुण्डरीकाक्षः
स्वयं नारायणो हरिः ॥ १ ॥ स यज्ञैर्विविधैरिष्टैर्व्रतैश्च यदुसत्तमः ॥ प्राप्यते परमो देवः सनातन कथं च न ॥ २ ॥
वद वित्तेन भगवानृत्विग्भिर्वेदपारगैः ॥ प्राप्यन्ते सुप्रहायैश्च कवि सत्ताः सुदुष्कराः ॥ ३ ॥ वित्तेन च विनादानं

दत्तं कृतं तन्नश्यकाते ॥ विद्यमानेऽपि न मतिः कुटुंबासक्तचेतसः ॥ ४ ॥ तस्मान्मोक्षः कथं कृष्ण सर्वथा दुर्लभो हरिः ॥
अल्पायासेन लभ्यते येन देवः सनातनः ॥ ५ ॥ तन्मे समासतो ब्रूहि सर्ववर्णेषु यद्भवेत् ॥ श्रीकृष्ण उवाच ॥ कथयामि प
रं गुह्यं रहस्यं देवनिर्मितम् ॥ ६ ॥ धरण्या यत्कृतं पूर्वं मज्जन्त्या वसुधातले ॥ पृथिव्यां पार्थिवभवे सलिलेनातिवाहि
नः ॥ ७ ॥ तस्मिन्सलिलसंलग्ने मही प्रायाद्रसातलम् ॥ साभक्तेधात्री धरणी रसातलगता शुभा ॥ ८ ॥ आराधयामास
विभुं देवं नारायणं परम् ॥ उपवासव्रतैर्देवी नियमैश्च पृथग्विधैः ॥ ९ ॥ कालेन महता तस्याः प्रसन्नो गरुडध्वजः ॥ उज्ज
हार स्थितां चेमां स्थापयामास वाच्युतः ॥ १० ॥ प्राप्ते मार्गशिरे मासे दशम्यां नियतात्मवान् ॥ स्नात्वा देवार्चनं कृत्वा अ
ग्निकार्यं यथाविधि ॥ ११ ॥ भूमिवासाः प्रसन्नात्मा ह्यम्यत्वान्नं सुसंस्कृतम् ॥ मुक्त्वा पंचपदं कृत्वा पुनः शौचं चरणयोः ॥
१२ ॥ कृत्वाष्टांगलमात्रं तु क्षीरवृक्षसमुद्भवम् ॥ भक्षयेद्दंतकाष्ठं तु ततश्चाचमयत्नतः ॥ १३ ॥ स्पृष्ट्वा न्यासानि कर्माणि
चिरं ध्यात्वा जनार्दनम् ॥ शंखचक्रगदापाणिं पीताम्बरसमावृतम् ॥ १४ ॥ एवमुच्चारयेद्वाचं तस्मिन्काले महाद्युते ॥ एका
दश्यां निराहारः स्थित्वाहमपरेहनि ॥ १५ ॥ भोक्ष्येहं पुण्डरीकाक्ष शरणं मे भवाच्युत ॥ एवमुक्त्वा ततो देवदेवदेवस्य संनि
धौ ॥ १६ ॥ जपेन्नारायणायेति रूपेतत्र विधानतः ॥ ततः प्रभाते विमले नदीं गत्वा समुद्रगाम् ॥ १७ ॥ इतरां वातडागं

नागरहे वा नियतात्मवान् ॥ आनीय मृत्तिकां भूयो मंत्रेणानेन मानवः ॥१८॥ धारणं पोषणं त्वत्तो भूतानां देवि सर्व
दा ॥ तेन सत्येन मां पाहि पापान्मोचय सुव्रते ॥१९॥ मृत्तिकामंत्रः ॥ ॥ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे ॥ भवं
ति भक्तानि सत्तां मृत्तिकामालभेत्तु नः ॥२०॥ आदित्यदर्शनमंत्रः ॥ एवं मृदं रवेरग्रे कृत्वा चात्मानमालभेत् ॥ त्रिः कृ
त्वा शेषमुदया कं समालिख्य वै जले ॥२१॥ ततः स्नात्वा नरः सम्यक् कवक्रवर्जुपचारकः ॥ आचम्य वस्त्रकं कृत्वा पुनर्दे
वगृहं व्रजेत् ॥२२॥ नमाराध्य महायोगं देवं नारायणं प्रभुम् ॥ केशवाय नमः पादौ कटिं दामोदराय च ॥२३॥ उरुयुग्मं
नृसिंहाय उरः श्रीवत्सधारिणे ॥ कंठं कौस्तुभनाथाय वक्षः श्रीपतये तथा ॥२४॥ त्रैलोक्यविजयायेति बाहू सर्वा
त्मने शिरः ॥ रथांगधारिणे वक्रं शंकरायेति वांबुजम् ॥२५॥ गंभीरायेति चगदाम भवंशांतमूर्तये ॥ एवमभ्यर्च्य देवे
शं देवं नारायणं प्रभुम् ॥२६॥ पुनस्तस्याग्रतः कुंभांश्चतुरः स्थापयेद् बुधः ॥ जलपूर्णान् समाल्यांश्च सितचंदनचर्चितान्
२७॥ चतुर्भिस्तिलपात्रैश्च पिगिनान्नलसंयुतान् ॥ चत्वारस्नेहमृडान्वि कलशाः परिकीर्तिताः ॥२८॥ तेषां मध्ये तु संपीठं
स्थापयेद् वस्त्रसंवृतम् ॥ तस्मिन्सौवर्णरौप्यं वा ताम्रं वा दारवं तथा ॥२९॥ पात्रं तोयमृतं कृत्वा तस्य मध्ये ततो न्यसे
त् ॥ सौवर्णं मात्स्यरूपेण कृत्वा देवं जनार्दनम् ॥३०॥ वेदवेदांगसंयुक्तं स्मृतिस्मृतिविभूषितम् ॥ मत्स्यैर्वहुविधैराज

मूलैः पुष्पैश्च शोभितम् ॥३१॥ गंधैर्धूपैर्मंत्रवरैश्चर्चयित्वा यथाविधि ॥ रसातलगतान्वेदा यथा देवत्वयाहृता ॥३२
मत्स्यरूपेण तद्वन्मां भवादुद्धर केशव ॥ एवमुच्चार्य तस्याग्रे जागरं तत्र कारयेत् ॥३३॥ यथाविभवसारेण प्रभावेऽ
पि पुनः पुनः ॥ चतुर्णां ब्राह्मणानां तु चतुरो दापयेद्घटान् ॥३४॥ पूर्वं तु बह्वृते दद्याच्छंदोगे दक्षिणां तथा ॥ यजुःशा
खान्विते दद्यात्साम्नि संघटमुत्तमम् ॥३५॥ उत्तरं कामतो दद्यादेष एव विधिक्रमात् ॥ ऋग्वेदः प्रीयतां पूर्वं सामवेद
श्च दक्षिणः ॥३६॥ यजुषः पश्चिमो नाम्ना आथर्वायोत्तरं तथा ॥ पूर्णपात्रैस्तु सतिलैः स्थगितान्कारयेद्घटान् ॥३७
ततस्तं जलपात्रस्थं ब्राह्मणाय कुटुंबिने ॥ दद्याद्देवं महाभाग ततः पश्चात्तु भोजयेत् ॥३८॥ ब्राह्मणान्यायसाल्लेन ततः
पश्चात्स्वयं गृही ॥ भुंजीत भृत्यसहितो वाग्यतः संयतेंद्रिय ॥३९॥ अनेन विधिना यस्तु द्वादशीं क्षपयेन्नरः ॥ तस्य पु
ण्यफलं राजन्छृणुष्व सत्यवतां वर ॥४०॥ यदि वक्त्रसहस्राणि भवंति हि युगे युगे ॥ आयुश्च ब्रह्मणस्तुल्यं भवेद्यदि महा
मते ॥४१॥ तदस्य फलसंख्यानं कर्तुं शक्यं न धारयेत् ॥ यः कूर्मद्वादशीमेनामनेन विधिना नरः ॥४२॥ करोति ब्रह्म
लोकं स समाप्नोति न संशयः ॥ ब्रह्महत्यादि पापानि जन्मांतरकृतान्यपि ॥४३॥ अकामतः कामतो वा प्रणश्यंति न
संशयः ॥ तथैव पुष्यमासेनत्मृतं मथितं सुरैः ॥४४॥ तत्र कूर्मो भवद्देवः स्वयमेव जनार्दनः ॥ तस्येयं तिथिरुद्दि

॥ भवि ॥
॥ १२१ ॥

पाहरेर्वै कूर्मरूपिणः ॥ ४५ ॥ पौष्यमासं समासाद्य द्वादशीं शुक्लसंज्ञिताम् ॥ तस्यां प्रागवत्सुसंकल्पः प्रातःस्नानादिकाः
क्रियाः ॥ ४६ ॥ निर्वर्त्याधारयेद्धाम्ने कादश्यां जनार्दनम् ॥ पूजयमंत्रैर्नरूपमेव देवदेवं जगद्गुरुम् ॥ ४७ ॥ कूर्मायपा
दौ प्रथमं तु पूज्य नारायणायेति कटिं हरेस्तु । संकर्षणायेत्युदरं विशोधेत्युरो भवायेति च कंठपीठम् ॥ ४८ ॥ सुबाहवे
त्येव भुजौ शिरश्च सर्वात्मनेपांऽवपद्मनीयो । स्वनाममंत्रेण च शंखचक्रे गदां नमस्कारपरेण चैव ॥ ४९ ॥ मंत्रैरिमैः
पुष्पसुगंधधूपैर्नैवेद्यदीपैर्विविधैः फलैश्च ॥ अभ्यर्च्य देवं कलशं तदग्रे संस्थापयेन्माल्यविलेपनाद्यम् ॥ ५० ॥ तं
रत्नगर्भं सुसुगंधतोयं कृत्वा ततो हेममयं स्वशक्त्या ॥ समंदरं कूर्मतनुं सुरेशं संस्थापयेद्वाचभुमेवपात्रे ॥ ५१ ॥ घृतस्य
पूर्णे कलशोपरि संस्थं संपूजयेज्जागरमत्र गीते ॥ संपूज्य विप्रान्युतमायसेन निवेदयद्वेदविजपुंगवाय ॥ ५२ ॥ निर्व
र्त्य सर्वं विधिवत्ततश्च भुंजीत संतुष्टमनाः समस्तः ॥ एवं कृते कल्पयुगांतराणि स्वर्गे वसेत्सर्वसमृद्धकामः ॥ ५३ ॥
संसारचक्रं स विधाय शीघ्रं प्राप्नोति लोके तु हरेः पुराणे ॥ प्रयांति पापानि विनाशमाशु श्रिया युतो जायति सत्यधर्मः ॥
५४ अनेकजन्मार्जितसंचितानि नश्यंति पापानि नरस्य भक्त्या ॥ प्राग्गुरुरूपं व फलं लभेत्स नारायणं वत्नुमुपैति सद्यः ॥ ५५
एवं माघे सिते पक्षे द्वादशी धरणीधर । वराहस्य महताः ख्यातास्मां राजसत्तम धार्मिक ॥ ५६ ॥ प्राग्गुक्तेन विधानेन स्नानं संक

॥ रामः ॥
॥ १२१ ॥

131

स्रमेवच । कृत्वा देवं स समभ्यर्च्य एकादश्यां समाहितः ॥ ५७ ॥ धूपनैवेद्यगंधैस्तु अर्चयित्वा घृतं नरः ॥ पश्चात्तस्याग्र-
तः कुंभं जलपूर्णं तु विन्यसेत ॥ ५८ ॥ वाराहायेति पादौ तु माधवायेति वै कटिम् ॥ क्षेत्रज्ञायेति जठरं विश्वरूपेत्युरो हरेः
५९ ॥ सर्वज्ञायेति कंठं तु प्रजानां पतये शिरः ॥ प्रद्युम्नायेति च भुजौ दिव्यास्त्राय सुदर्शनम् ॥ ६० ॥ अमृतोद्भवाय शंखं तु ग-
दिने व गदां तथा ॥ एवं समभ्यर्च्य मेधावी तस्मिन्कुंभेऽपि विन्यसेत ॥ ६१ ॥ सौवर्णं रूप्यताम्रं वा पात्रं विभवशक्तितः ॥ सर्व-
बीजैस्तु संपूर्णं स्थापयित्वा विचक्षणः ॥ ६२ ॥ तत्र शक्त्या च सौवर्णं वाराहं कारयेत ततः ॥ दंष्ट्राग्रेणोद्धरन्तं पृथ्वीं सपर्वतव-
नद्रुमाम् ॥ ६३ ॥ माधवं मधुहंतारं वाराहं रूपमास्थितम् ॥ सर्वबीजभृतैः पात्रैः स्वर्णगर्भघटोपरि ॥ ६४ ॥ स्थापयेत्परमं देवं
जातरूपमयं हरिम् ॥ सितवस्त्रयुगच्छन्नं ताम्रभावे तु वैणवे ॥ ६५ ॥ स्थाप्यार्चयेद्गंधपुष्पैर्नैवेद्यैर्विविधैः फलैः ॥ पुष्प-
मंडपिकां कृत्वा जागरं तत्र कारयेत ॥ ६६ ॥ प्रादुर्भावं हरेर्दिव्यं वाचयेत्तोपयेद्बुधः ॥ एवं स नियमस्यास्य प्रभातेऽदिने रवौ
६७ ॥ वेदवेदांगविदुषे साधुवृत्ताय धीमते ॥ विस्तृंभकाय राजेंद्र विशेषेण प्रदापयेत ॥ ६८ ॥ एवं स कुंभं दत्वा च हरिं वा-
राहरूपिणम् ॥ ब्राह्मणाय भवेद्यत्तु फलं तन्मे निशामय ॥ ६९ ॥ इह जन्मनि सौभाग्यं श्रीः कांतिः तुष्टिरेव च ॥ प्राप्नोति पु-
रुषो राजन्यदिच्छति किंचन ॥ ७० ॥ एकाऽपि विधिनो पाल्या ददात्यमृतमुत्तमम् ॥ किं पुनर्द्वादशैमेकं च करोति कृत्स्नं

|| मवि ||
|| १३२ ||

दनं || ७१ || एतद्व फाल्गुने मासि शुक्लपक्षेतु द्वादशी || उपोष्या पूर्वविधिना हरिमाराधयेत्सुधीः || ७२ || नरसिंहाय पादौ तु
गोविंदायोरं तथा | कटिं विश्वसृजे पूज्य अनिरुद्धेत्यतोहरेः || ७३ || कंठं तु शितिकंठाय वैनतेयाय वै शिरः || असुरध्वंसना
येति वक्त्रं तोयात्मने नमः || ७४ || शांर्ङ्गमित्येव संपूज्य गंधपुष्पैः फलैस्तथा || तदग्रेतु घटं स्थाप्य सितवस्त्रयुगान्वितम् |
७५ || तस्योपरि तु सिंहं तु सौवर्णं ताम्रभाजने हैमे वंशाकृतिः कृत्वा दारुवंशमये ऽपि वा || ७६ || रत्नगर्भमये स्थाप्य अभ
त्नासंपूज्य मानवः || द्वादश्यां वेदविदुषे ब्राह्मणाय निवेदयेत् || ७७ || एषा वंध्या पापहरा द्वादशी भवते मया || कथिता
च प्रफल्लेन श्रुता च भवते क्षिता || ७८ || एवमेवानरत्याप्य चैत्रे संकल्प द्वादशी || उपोष्याराधयेत्सभ्याद्देवदेवं जनार्दनम् |
कुंडिकां स्थापयेत्तत्र अर्घ्यं छत्रिकां पादुके तथा || अक्षमालं वामनं स्थाप्य वृसीकां सपरिष्कृतम् || ८० || फलैः पुष्पैः सुगंधैश्च प्रभाते
साधुजातये || दापयेत्प्रीयतां विष्णुर्ह्रस्वरूपी सुदीरयेत् || ८१ || मासनाम्नात्र संपूज्य प्राडुर्भावं विधानतः || प्रीयतामिति स
र्वत्र विधिरेवं प्रकीर्तितः || ८२ || अपुत्रो लभते पुत्रमधनो धनमाप्नुयात् भ्रष्टराज्यो लभेद्राज्यं मृतो विष्णुपुरं व्रजेत् || ८३ ||
क्रीडित्वा सुचिरं कालमिह मर्त्यमुपागतः || चक्रवर्ती भवेच्छ्रीमान्यातिरिति नाकपः || ८४ || वैशाखे ऽप्येवमेवं तु संकल्प
विधिवन्नरः || तद्वत्स्नानं मदानं दत्वा ततो देवालयं व्रजेत् || ८५ || तत्राराध्य हरिं भक्त्या समिर्मैत्रैर्विचक्षणाः || जामदग्न्या

|| राम: ||
|| १३२ ||

132

यपादौनुउदरं सर्व्वधारिणे ॥१६॥ मधुसूदनायेति कटिं गुह्यः श्रीवत्सधारिणे ॥ क्षत्त्रांतकाय च भुजौ मालिना कंठाय कंठकम्
१७॥ पूजयेन्नियतो भक्त्या सुरूपायेति वै मुखम् ॥ स्वनाम्ना शंखचक्रे च शिरो ब्रह्मांडधारिणे ॥१८॥ एवमभ्यर्च्य मेधा
वी ब्राह्मणस्याग्रतो घटम् ॥ विन्यसेत्सवस्त्राढ्यं सितचंदनचर्चितम् ॥१९॥ वैणवेऽभिनवे पात्रे स्थापयेन्मधुसू
दनम् ॥ जामदग्न्येन रूपेण कृत्वा सौवर्णमग्रतः ॥२०॥ दक्षिणो परशुं हस्ते तस्य देवस्य कारयेत् ॥ सर्व्वगंधैस्तु संपूज्य पु
ष्पैर्नानाविधैः शुभैः ॥२१॥ ततस्तस्याग्रतः कुर्याज्जागरं भक्तिमान्नरः ॥ प्रभाते विमले सूर्ये ब्राह्मणाय निवेदयेत्
२२॥ एवं नियमयुक्तस्य यत्फलं तन्निबोध मे ॥ कल्पं ब्रह्मणो लोके वसित्वाप्सरसां गणैः ॥२३॥ स्थित्वा भौत्तं च स
ष्टौ च चक्रवर्ती भवेद्ध्रुवम् ॥ ज्येष्ठे मासेऽप्येवमेव संकल्प्य विधिवन्नरः ॥२४॥ अर्चयेत्परमं देवं पुष्पैर्नानाविधैः
शुभैः ॥ नमो दामोदरायेति पादौ पूर्वं समर्चयेत् ॥२५॥ त्रिविक्रमायेति कटिं धताविश्वाय चोदरम् ॥ उरः संवर्त्तका
येति कंठं संवत्सराय च ॥२६॥ सर्व्वास्त्रधारिणे बाहू स्वनाम्नाब्जरथांगकौ ॥ सहस्रशिरसेऽभ्यर्च्य शिरस्तस्य महा
त्मनः ॥२७॥ एवमभ्यर्च्य विधिवत्प्रामुक्तं विधिवन्न्यसेत् ॥ प्राग्वद्वस्त्रयुगं तस्य सौवर्णौ रामलक्ष्मणौ ॥२८॥
अर्च्चयित्वा विधानेन प्रभाते ब्राह्मणाय तौ ॥ दातव्यौ मनसा काममहिता पुरुषेण तु ॥२९॥ अपुत्रेण पुरा पृष्टो

राज्ञादशरथेनतु ॥ पुत्रकामेनवदतावसिष्ठःपरमार्चितः ॥ १०० ॥ इदमेवविधानंतु कथयामासवैद्विजः ॥
तरस्यंविदित्वा च स राजाकृतवानिदम् ॥ १ ॥ तस्य पुत्रः स्वयंजज्ञे रामोनाममहाबलः ॥ चतुर्द्धासोऽप्ययोविष्णुः
परितोषादजायत ॥ २ ॥ स तदेवंसमाख्यातंपरलोकेसुखप्रदम् ॥ ३ ॥ ॥ श्रीकृष्णउवाच ॥ आषाढेऽप्येव
मेवंतुसंकल्प्यविधिनापरः ॥ अर्चयेत्परमंदेवंगंधपुष्पैःसमाहितं ॥ ४ ॥ वासुदेवायपादौतुकटिंसंकर्षणायच ॥ प्रद्युम्नाये
तिउदरमनिरुद्धायवैनमः ॥ ५ ॥ चक्रपाणिंभुजौकंठंसुखंभूपतयेतथा ॥ स्वनाम्नाशंखचक्रेतुपुरुषायेतिवैशिरः ॥ ६ ॥
एवमभ्यर्च्यमेधावीप्रागवतस्याग्रतोघटम् ॥ विन्यस्यवस्त्रसंयुक्तंतस्योपरिततोन्यसेत् ॥ ७ ॥ कांचनंवासुदेवेतिचक्रवा
सं सनातनम् ॥ तमभ्यर्च्यविधानेनगंधपुष्पादिभिःक्रमात् ॥ ८ ॥ प्रातस्तंब्राह्मणेदद्याद्देवगादिनिसुव्रते ॥ स्वषाहृपोवि
ताराजन्विधांविशेषयस्कृति ॥ ९ ॥ राज्यंवभूवराज्ञानामपुत्राणांकृत्वान्वहन् ॥ मृतोविष्णुपुरेरम्येक्रीडतेकालमक्ष
यम् ॥ १० ॥ मन्वंतराणिषट्त्रिंशत्ततःकालात्ययेपुनः ॥ इहलोकेभवेद्राजासप्तजन्मनिमानवा ॥ ११ ॥ पतनायशःसमा
युक्तस्ततोनिर्वाणमाप्नुयात् ॥ श्रीकृष्णउवाच ॥ एवमेवंश्रावणेतुमासिसंकल्प्यद्वादशीम् ॥ १२ ॥ अर्चयेत्परमंदेवंगं
धपुष्पनिवेदनैः ॥ बुधायपादौसंपूज्यश्रीधरायेतिवैकटिम् ॥ १३ ॥ पद्मोद्भवायजठरमुरःसंवत्सरायच ॥ सुग्रीवायेति

133

वैकंठं भुजौ वैचित्रवाहवे ॥१४॥ प्राग्वदस्नाति संपूज्य ब्राह्मणाय निवेदयेत ॥ अनेन विधिना सर्वं द्वादशीसमु
पोषितः ॥१५॥ भुक्तौ दत्तेन नन्त्या भक्त्या यं पुत्रो जनार्दनः ॥ महतीं च श्रियं प्राप्य पुत्रपौत्रसमन्वितः ॥१६॥ भुक्त्वा रा
ज्यश्रियं सोथ गतः परमिकां गतिम ॥ एवन्ते विधिरुद्दिष्टः श्रावणे मासि सत्तम ॥१७॥ एकैकोपोषिता ह्यस्मा राज्य
मेकैतु यच्छति ॥ किं पुनर्द्वादशी वात्र यद्युरैंडं महत्फलम ॥१८॥ तद्वद्भाद्रपदे मासि शुक्लपक्षे तु द्वादशीम ॥ संकल्प
विधिना देवमर्चयेत्परमेश्वरम ॥१९॥ नमोऽस्तु कल्किने पादौ हृषीकेशाय वै कटिम ॥ म्लेच्छप्रध्वंसनायेति जगन्मूर्तेन्तथो
दरम ॥२०॥ शितिकंठाय कंठं तु खड्गपाणीति वै भुजौ । शंखचक्रे स्वनामात्र विश्वमूर्तेन्तथा शिरः ॥२१॥ एवमभ्यर्च्य मेधा
वी प्राग्वत्तस्याग्रतो घटम ॥ विन्यस्य कल्किनं देवं सौवर्णं तत्र कारयेत ॥२२॥ सितवस्त्रयुगच्छन्नं गंधपुष्पोपशोभितम
कृत्वा प्रभाते विप्राय प्रदेयः ब्रह्मवित्तमे ॥२३॥ एवं कृते भवेद्यत्तु तन्निबोध नृपोत्तम ॥ दशावतारास्तेनेन पूजनेनैव तत
फलम ॥२४॥ पूज्यन्ते मत्स्यरूपेण सर्वज्ञत्वमभीप्सुभिः ॥ स्ववंशभरणायाथ कूर्मरूपी तु पूज्यते ॥२५॥ भवोदधिनि
मग्नैस्तु वाराहः पूज्यते हरिः ॥ नृसिंहन्तवरूपेणानष्टपापभयान्नरः ॥२६॥ वामनं मोहनाशाय वित्तार्थे जामदग्निज
म ॥ क्रूरशत्रुविनाशाय जपेद्दाशरथिं बुधः ॥२७॥ बलकृष्णौ जपेद्धीमान्पुत्रकामो न संशयः ॥ रूपकामो जपेद्बुद्धं

कल्कितं शत्रुघातने ॥ २८ ॥ सर्व्वंदत्वाविधानेन पूजां प्राप्नोति वांछितम् ॥ ॥ श्रीकृष्णउवाच ॥ तद्वदाश्वयुजे मासि
शुक्लपक्षेतु द्वादशीम् ॥ २९ ॥ संकल्प्यार्च्चयेद्देवं पद्मनाभं सनातनम् ॥ पद्मनाभाय पादौ तु कटिं वै पद्मयोनये ॥ ३०
उदरं सर्व्वदेवाय पुष्कराक्षाय वैउरः ॥ अव्ययाय तथा शीर्षं प्राग्वदस्त्राणि पूजयेत् ॥ ३१ ॥ ततस्तस्याग्रतः कुंभं माल्यवस्त्र
समन्वितम् ॥ यथाशक्त्या कांचनेन पद्मनाभेति भूषितम् ॥ ३२ ॥ रात्रौ तु जागरं कृत्वा प्रभाते विमले ततः ॥ ब्राह्मणे
तत्प्रदातव्यं संसारभयभीरुणा ॥ ३३ ॥ एवं कृते तु यत्पुण्यं तद्वक्तुं शक्यते कथम् ॥ ब्रह्महत्यादि पापानि किंतु पंचैव
भारत ॥ ३४ ॥ नश्यंति कृतपुण्यस्य विष्णोर्न्नामानुकीर्त्तनात् ॥ श्रीकृष्णउवाच ॥ शृणु राजन्महाबाहो कार्त्तिके मासि
द्वादशी ॥ ३५ ॥ उपोष्य विधिनानेन यथास्याः प्राप्यते फलम् ॥ प्राग्विधानेन संकल्प्य वासुदेवं प्रपूजयेत् ॥ ३६ ॥ अ
नुलोमेन देवेशं पूजयित्वा विचक्षणः ॥ नमो दामोदरायेति सर्व्वांगं पूजयेद्धरिम् ॥ ३७ ॥ एवं संपूज्य विधिना तस्या
ग्रे चतुरो घटान् ॥ स्थापयेद्रत्नगर्भांश्च सितचंदनचर्च्चितान् ॥ ३८ ॥ स्रग्दाममालंवितग्रीवान् सितवस्त्रैश्च गुंठि
तान् ॥ स्थगितांस्ताम्रपात्रैस्तु तिलपूर्णैः सकांचनैः ॥ ३९ ॥ चत्वारः सागरास्तेच कथिता राजसत्तम ॥ तन्मध्ये प्राग्वि
धानेन सौवर्णां स्थापयेद्धरिम् ॥ ४० ॥ योगेश्वरं मंगनिधिं विरक्तं पीतवाससम् ॥ तद्वद्देवं च संपूज्य जागरं तत्र

134

कारयेत ॥४१॥ कृत्वानुवैश्रवं योगं जपेद्योगेश्वरं हरिम् ‒ योऽस्मौ वैरथ्यांगेषु रजोभिर्वद्धुभिः कृते ॥४२॥ स्वं कृत्वा प्र
भातेनु ब्राह्मणान्स्वं च भोजयेत ॥ चत्वारः कलशा देयाश्चतुर्णां पंचमस्याहि ॥४३॥ योगेश्वरं च सौवर्णं दापयेत्स्वयनःस्व
वि: ॥ ब्राह्मणाय समं दत्तं द्विगुणं वेदवादिने ॥४४॥ वेदवेदांगविदुषे सहस्रगुणितं भवेत ॥ पंचमस्याहस्यंनु समसमं चो
पपादयेत ॥४५॥ विधानं तस्य पंचैव दत्वा कोटिगुणो नरान् इतिहासपुराणज्ञे दत्तं चैवाक्षयं भवेत ॥४६॥ पंच दत्वा वि
धानेन तादृश्यां विद्धमर्जुन ॥ विप्राणां भोजनं दद्याद्यथाशक्त्या सदक्षिणाम् ॥४७॥ दीनानाथादिकान्सर्वान्तर्पयेद्ध
जितो नृप ॥ धरणीव्रतमेतत्तु पुरा कृत्वा प्रजापतिः ॥ प्रजांल्लेभे ततो मुक्तिर्ब्रह्मणा विशांवेश्मभे ॥४८॥ युवनाश्वेन राज
र्षिरनेन विधिना पुरा ॥ मत्वा तारं शुभं लोके परं ब्रह्म च शाश्वतम् ॥४९॥ तथा हैहयदायादः कृतवीर्यो नराधिपः ॥ चक्रव
र्तित्वं तल्लेभे सहस्रार्जुनमूर्जितम् ॥५०॥ शाकुन्तलाप्येवमेव व्रतं चीर्त्वा नरोत्तमम् ॥ लेभे शाकुंतलं पुत्रं दुष्यंतश्चक्रवर्ति
नम् ॥५१॥ तथा पुराणराजानो वेदोक्ताश्चक्रवर्तिनः ॥ अनेन विधिना प्राप्ताश्चक्रवर्तित्वमुत्तमम् ॥५२॥ अरण्या
भिपिपाना लेमगनयावरीतं पुरा ॥ व्रतमेतत्ततो नाम्ना धरणीव्रतमुच्यते ॥५३॥ समाप्तेऽस्मिंस्तदा देवी हरिणा क्रो
डरूपिणा ॥ उद्धृता दंष्ट्राग्रेण स्थापिता नौरिवांभसि ॥५४॥ धरणीव्रतमेतत्ते कथितं पांडुनंदन ॥ यद्दंष्ट्रया

स्नानाय भक्त्या कुर्यान्नरोत्तम ॥ ५५ ॥ सर्व्वपापविनिर्मुक्तो विष्णुसायुज्यतां व्रजेत् ॥ ५६ ॥ वीर्णं रसातलतलेगतया धरण्या
तेन प्रसिद्धिमगमद्धरणीव्रतेति ॥ सद्यः समाचरति धर्म्मरतिर्द्दरिक्ष्मामुद्धृत्य सप्त पुरुषान्स परं प्रयाति ॥ ५७ ॥ इति
श्रीभविष्ये महापुराणे उत्तरपर्व्वणि श्रीकृष्णयुधिष्ठिरसंवादे धरणीव्रतं नाम त्र्यशीतितमोऽध्यायः ॥ ८३ ॥ ॥
युधिष्ठिर उवाच ॥ किमभीष्टवियोगशोकसंघाद्बुद्धर्त्तुमुपोषणं व्रतं वा ॥ विभवोद्भवकारि भूतलेऽस्मिन्भव
ति विभो भयसूदनं च पुंसाम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ परिपृष्टमिदं जगत्प्रियं ते विबुधानामपि दुर्ल्लभं महत्वात् ॥
तव भक्तिमतस्तथापि वक्ष्ये व्रतमिन्द्रासुरदानवेषु गुह्यम् ॥ २ ॥ पुण्यमाश्वयुजे मासि विशोकद्वादशीव्रतम् ॥
दशम्यां लघुभुग्विद्वानारभेन्नियमेन तु ॥ ३ ॥ उदङ्मुखः प्राङ्मुखो वा दन्तधावनपूर्व्वकम् ॥ एकादश्यां निराहारः
सम्यगभ्यर्च्य केशवम् ॥ ४ ॥ विधिवत्त्वां समभ्यर्च्य भोक्ष्यामि अपरेऽहनि ॥ एवं नियमकृत्सुप्त्वा प्रातरुत्थाय मानवः ॥
५ ॥ स्नानं सर्व्वौषधैः कुर्यात्पञ्चगव्यजलेन तु ॥ शुक्लमाल्याम्बरधरः पूजयेच्छ्रीशमुत्पलैः ॥ ६ ॥ विशोकाय नमः पादौ
जंघे च वरदाय वै ॥ श्रीशाय जानुनी तद्वदूरू च जलशायिने ॥ ७ ॥ कंदर्पाय नमो गुह्यं माधवाय नमः कटिम् ॥ दामोद
रायेत्युदरं पार्श्वे च विपुलाय वै ॥ ८ ॥ नाभिं च पद्मनाभाय हृदयं मन्मथाय वै ॥ श्रीधराय विभोर्व्वक्षः करौ मधुभि

हृष्ट्यै कृष्ट्यै नमो नमः ५

दे नमः ॥ ९ ॥ चक्रिणे नाम वाहुं च दक्षिणं गदिने नमः ॥ वैकुण्ठाय नमः कण्ठमास्यं यज्ञमुखाय वै ॥ १० ॥ नासामशो-
कनिधये वासुदेवाय चाक्षिणी । ललाटं वामनायेति किरीटं विश्वरूपिणे ॥ ११ ॥ नमः सर्वात्मने न च शिरः सम्यभिपू-
जयेत् ॥ एवं संपूज्य गोविंदं फलमाल्यानुलेपनैः ॥ १२ ॥ ततस्तस्याग्रतो भूमौ स्थंडिलं कारयेत्सदा ॥ चतुरस्रं समंताच्चा-
रत्निमात्रमुदङ्मवम् ॥ १३ ॥ नदीवालुकया पूर्णं लक्ष्म्याः प्रतिकृतीस्तसेत ॥ स्थंडिले सूर्पमारोप्य लक्ष्मीमित्यर्चयेद्-
बुधः ॥ १४ ॥ नमो देव्यै नमः शांत्यै नमो लक्ष्म्यै नमः श्रियै । नमः पुष्ट्यै नमस्तुष्ट्यै नमो हृष्ट्यै नमो नमः ॥ १५ ॥ विशो-
का दुःखनाशाय विशोका वरदास्तु मे ॥ विशोका वास्तु संतत्यै विशोका सर्वसिद्धये ॥ १६ ॥ ततः शुक्लांबरधरो शूर्पसंवेष्ट्य
पूजयेत् ॥ भक्ष्यैर्नानाविधैस्तद्वत्सुवर्णकमलेन च ॥ १७ ॥ रजनीषु च सर्वासु पिवेद्दर्भोदकं व्रती ॥ ततस्तु नृत्यगीतादिका-
रयेत्सर्वरात्रिकम् ॥ १८ ॥ यामत्रये व्यतीते तु सुप्तात्वथ्योपमानस ॥ अभिगम्य च विप्राणां मिथुनानि सदार्चयेत् ॥ १९
शक्तितस्त्रीणि चैकं वा वस्त्रमाल्यानुलेपनैः ॥ शयनस्थानि पूज्यानि नमोऽस्तु जलशायिने ॥ २० ॥ ततस्तु गीतवाद्याद्यै रा-
त्रौ जागरणे कृते ॥ प्रभाते विमले स्नानं कृत्वा दंपत्यमर्चयेत् ॥ २१ ॥ भोजनं च यथाशक्त्या वित्तशाठ्यविवर्जितः ॥ भुक्त्वा
श्रुत्वा पुराणानि तद्दिनं च निवाहयेत् ॥ २२ ॥ अनेन विधिना सर्वं मासि मासि समाचरेत् ॥ व्रतान्ते शयनं दद्याद्गुडधेनु

समन्वितम् ॥ २३ ॥ सोपिधानकविश्रामसमास्तरणावरणांशुभम् । यथा न लक्ष्मीर्देवेश त्वां परित्यज्य गच्छति ॥ २४ ॥ तथा
कुरु यथायोग्यमहाशोकं वास्तु मे सदा । यथा देवेन रहिता न लक्ष्मी र्जायते क्वचित् ॥ २५ ॥ तथा विशोकता मेऽस्तु भक्तिरेता
वकेशव ॥ मंत्रेणानेन ध्यात्वा तु गुडधेनुं समन्वितम् ॥ २६ ॥ अर्पयेव लक्ष्मासहितं दातव्यं भूतिमिच्छता ॥ उत्पातं करवीरं
च बाणमम्लानकं ऽलम् ॥ २७ ॥ केसरं सिंदुवारं च मल्लिका गंधपाटलम् कदंबं कुंकुमं जाती तथान्यैरपि पूजयेत् ॥
२८ ॥ युधिष्ठिर उवाच ॥ गुडधेनुविधानं मे त्वमाचक्ष्व जगत्पते ॥ किंरूपा केन मंत्रेण दातव्या तदिहोच्यताम् ॥ २९ ॥
श्रीकृष्ण उवाच ॥ गुडधेनुविधानं च यद्रूपमिह यत्फलम् ॥ तदिदानीं प्रवक्ष्यामि सर्वपापप्रणाशनम् ॥ ३० ॥ कृष्णाजिनं च
तुर्हस्तं प्रागेवं विन्यसेद्भुवि ॥ गोमयेनानुलिप्तायां दर्भानास्तीर्य सर्वतः ॥ ३१ ॥ लघ्वेनकांचनंतद्वत्सं च परिकल्पयेत्·
प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकाम् ॥ ३२ ॥ उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टया ॥ वत्सं भारेण कुर्वीत ताभ्यां
वै मध्यमा स्मृता ॥ ३३ ॥ अर्द्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु ॥ चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः ॥ ३४ ॥
धेनुवत्सौ कृतावेतौ सितसूक्ष्मांबरावृतौ ॥ शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ ॥ ३५ ॥ सितसूत्रशिरालौ
तु सितकंबलकंबलौ ॥ ताम्रगःचकपृष्ठौ तौ सितचामररोमकौ ॥ ३६ ॥ विद्रुमभ्रूयुगावेतौ नवनीतस्तनान्वितौ ॥

136

क्षौमपुच्छौकांस्यदोहाविन्द्रनीलकतारकौ ।३७। सुवर्णशृंगाभरणौराजतखुरसंयुतौ । नानाफलसमायुक्तौघ्राणगंध
करंडकौ ।३८। इत्येवंरचयित्वातान्धूपदीपैरथार्चयेत् । यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता ।३९। धेनुरूपेणसा
देवीममपापंव्यपोहतु । विष्णोर्वक्षसियालक्ष्मीःस्वाहायाचविभावसौ ।४०। चंद्रार्कशक्रशक्तिर्याधेनुरूपास्तुसाश्रि
ये । चतुर्मुखस्ययालक्ष्मीर्यालक्ष्मीर्धनदस्यच ।४१। यालक्ष्मीर्लोकपालानांसाधेनुर्वरदास्तुमे । स्वधात्वंपितृमुख्यानां
स्वाहायज्ञभुजांयतः ।४२। सर्वपापहराधेनुस्तस्माच्छांतिंप्रयच्छमे । एवमामंत्रितांधेनुंब्राह्मणायनिवेदयेत् ।४३। विधानमे
तद्धेनूनांसर्वासामिहपठ्यते । यास्तुपापविनाशिन्यःपठ्यंतेदशधेनवः ।४४। तासांस्वरूपंवक्ष्यामिनामानिचनराधि
प । प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा ।४५। तिलधेनुस्तृतीयास्याच्चतुर्थीमधुधेनुका । जलधेनुःपंचमीतुषष्ठी
क्षीरसंभवा ।४६। सप्तमीशर्कराधेनुर्दधिधेनुस्तथाष्टमी । रसधेनुश्चनवमीदशमीस्यात्स्वरूपतः ।४७। कुंभाःस्यु
र्द्रवधेनूनामितरासांतुराशयः । सुवर्णधेनुमप्यत्रकेचिदिच्छंतिमानवाः ।४८। नवमीतेनरत्नैश्चतथान्येतुमहर्षयः ।
एतदेवविधानंस्यात्तएवोपस्कराःस्मृताः ।४९। मंत्रावाहनसंयुक्ताःसदापर्वणिपर्वणि । यथाश्रद्धंप्रदातव्याभुक्तिमु
क्तिफलप्रदा ।५०। गुडधेनुप्रसंगेनसर्वास्तवमयोदिताः । अशेषयज्ञफलदाःसर्वपापहराःशुभाः ।५१। व्रतानामुत्तमं

न
यस्याद्विशोके द्वादशी व्रतम् ॥ तदंगत्वेन चैवैषा गुडधेनुः प्रशस्यते ॥ ५१ ॥ अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः ॥
गुडधेन्वादयो देया उपरागादिपर्वसु ॥ ५२ ॥ विशोकद्वादशी चैषा सर्वपापहरा शुभा ॥ यामुपोष्य नरो याति तद्विष्णोः
परमं पदम् ॥ ५४ ॥ इहलोके तु सौभाग्यमायुरारोग्यमेव च ॥ वैष्णवं पदमाप्नोति मरणे स्मृतिर्भवेत् ॥ ५५ ॥ नवार्बुदसह
स्राणि दश चाष्टौ च धर्मवित् । न शोकदुःखदौर्गत्यं तस्य संजायते नृप ॥ ५६ ॥ नारी वा कुरुते या तु विशोकद्वादशीमिमा
म् ॥ नृत्यगीतपरा नित्यं सापि तत्फलमाप्नुयात् ॥ ५७ ॥ इति पठति य इत्थं यः शृणोति हि सम्यङ्मधुमुरनरकारेरर्चनं यश्च प
श्येत् ॥ मतिमपि च जनानां यो ददातीन्द्रलोके वसति स विबुधाद्यैः पूज्यमानः सदैव ॥ ५८ ॥ ॥ इति श्रीभविष्यपुराणे उत्त
रपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विशोकद्वादशीव्रतं नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥ श्रीकृष्ण उवाच ॥ अतः परम्
प्रवक्ष्यामि विष्णुव्रतमनुत्तमम् विभूतिद्वादशीं नाम सर्वामरनमस्कृतम् ॥ १ ॥ कार्तिके वाथ वैशाखे मार्गशीर्षे
ऽथ फाल्गुने ॥ आषाढे वा दशम्यां च शुक्लायां लघुभुङ् नरः ॥ २ ॥ कृत्वा सायंतनीं संध्यां गृह्णीयान्नियमं बुधः ॥ एकादश्यां नि
राहारः समभ्यर्च्य जनार्दनम् ॥ ३ ॥ द्वादश्यां द्विजसंयुक्तः करिष्ये भोजनं विभो ॥ तदविघ्नेन मे यातु साफल्यं मधुसूदन ॥
४ ॥ ततः प्रभात उत्थाय कृतस्नानजपः शुचिः ॥ पूजयेत् पुण्डरीकाक्षं शुक्लमाल्यानुलेपनैः ॥ ५ ॥ विभूतिदाय नमः पादौ वि

शोकायचजानुनी ॥ नमः शिवायेत्यूरूचविश्वमूर्त्तेनमः कटिम् ॥ ६ ॥ कंदर्पायनमो मेढ्रमादित्यायनमः करौ । दामोदरायेत्युद-
रं वासुदेवाय वक्षसी ॥ ७ ॥ माधवायेति हृदयं कंठं वैकुंठेनेनमः ॥ श्रीधराय मुखं केशान्केशवायेति पांडव ॥ ८ ॥ पृष्ठं शार्ङ्गधरा-
येति श्रवणौ वरदाय वै ॥ स्वनाम्ना शंखचक्रासिगदापरशुपाणये ॥ ९ ॥ सर्वात्मने शिरो राजन्नमस्त्वामिमर्चयेत् । दशावता-
र रूपाणि प्रतिमासं क्रमान्नृप ॥ १० ॥ दत्वा चैवं तथा व्यासमुत्स्लेन समन्वितम् ॥ दद्यादनेन विधिना पाखंडान विवर्जयेत् ।
११ ॥ समाप्यैवं यथाशक्त्या द्वादशाद्वादशीर्न्नरः ॥ संवत्सरांते लवणपर्वतेन सह प्रभोः ॥ १२ ॥ शय्यां दद्यान्मतिश्रेष्ठ गुरवे रस-
संयुताम् ॥ ग्रामं वा शक्तिमान्दद्यात्क्षेत्रं वा भवनान्वितम् ॥ १३ ॥ गुरुं संपूज्य विधिवद्वस्त्रालंकारभूषणैः ॥ अन्यानपि यथा-
शक्त्या भोजयित्वा द्विजोत्तमान् ॥ १४ ॥ तर्पयेद्वस्तुगोदानैरन्यैश्च धनसंचयात् ॥ अल्पवित्तो यथाशक्त्या स्तोकं स्तोकं समाचरे-
त् ॥ १५ ॥ यश्चातिनिःस्वः पुरुषो भक्तिमान्माधवं प्रति ॥ पुष्पार्चनविधानेन स कुर्याद्वत्सरं व्रतम् ॥ १६ ॥ अनेन विधिना
यस्तु विभूतिद्वादशीव्रतम् ॥ कुर्यात्स पापनिर्मुक्तः पितॄणां तारयेच्छतम् ॥ १७ ॥ जन्मनां शतसाहस्रं न शोकफलभा-
ग्भवेत् । न च व्याधिर्भवेत्तस्य न दारिद्र्यं न बंधनं ॥ १८ ॥ वैष्णवो वाथ शैवो वा भवेज्जन्मनि जन्मनि ॥ यावद्युगसहस्रा-
णां यज्ञमष्टोत्तरं भवेत् ॥ १९ ॥ तावत्स्वर्गे वसेद्राजन्भूपतिश्च पुनर्भवेत् ॥ पुरा रथंतरे कल्पे राजासीत्पुष्पवाहनः ॥ २०

॥ भ·पु ॥
॥ १३८ ॥

वे
नाम्ना लोके भविष्योतस्तेजसा सूर्यसन्निभः ॥ तपसा तस्य तुष्टेन चतुर्वक्त्रेन भारत ॥ २१ ॥ कमलं कांचनं दत्तं यथाका-
मगतः सदा ॥ समस्तमन्त्रसहितः सांतःपुरपरिस्थितः ॥ २२ ॥ द्वीपानि सुरलोकं च यथेष्टं विचरत्यसौ ॥ कल्पादौ स-
प्तमं द्वीपं तस्य पुष्करवासिनः ॥ २३ ॥ लोके संपूजितो यस्मात्पुष्करं द्वीपमुच्यते ॥ तदैवं ब्रह्मणा दत्तं यानमस्य यतो नृ-
प ॥ २४ ॥ पुष्पवाहनमित्याहुस्तस्मात्तं देवदानवाः ॥ २५ ॥ नागस्य तस्यास्य जगत्त्रयेपि ब्रह्मांडजस्थस्य तपोऽनु-
भावात ॥ पत्नी च तस्य प्रतिमा नरेंद्र नारी सहस्रैरभितोऽभिनंद्या ॥ २६ ॥ नाम्ना च लावण्यवती बभूव या पार्वती-
वेष्टतमा भवस्य ॥ तस्यात्मजानामयुतं बभूव धर्मात्मनामग्र्यधनुर्द्धराणाम् ॥ २७ ॥ तदात्मनः सर्वमवेक्ष्य राजा
मुहुर्मुहुर्विस्मयमाससाद ॥ सोभ्यागतं पूज्य मुनिप्रवीरं प्रचेतसं वाचमिमां बभाषे ॥ २८ ॥ कस्माद्विभूतिरम-
ला मम सर्वपूज्या जाया च सर्वविजितामरसुंदरी या ॥ भार्यात्मनत्वतपसा च सुतोपि तेन दत्तं ममां भुवनगृहं
परमप्रसादात् ॥ २९ ॥ यस्मिन्नु विषमपि कोटिशतं नृपाणां सामान्यकुंजररथाश्वघनावृतानाम् ॥ नालक्ष्य
नाक्ष्यगतमंबरगौरिवेह ताराग्रणैरपि सुरासुरलोकपालैः ॥ ३० ॥ तस्मात्किमस्य जननी जठरोद्भवेन धर्मादि

॥ राम: ॥
॥ १३८ ॥

कं कृतमशेषजनातिगं स्यात ॥ सम्पद्ःसमयाथतत्रतस्यैरत्नयामहर्षीमाहार्ययातदविलंकथयम्बुवेत ॥ ३१ ॥
तस्यतद्वचनंश्रुत्वाध्यानेनावेक्ष्यचाविलम् ॥ पूर्वेतान्तमुवाचाथमत्तगात्रःपुङ्गलाननम् ॥ ३२ ॥ लुब्धकस्त्वंपुरारा
जन्सर्वसत्त्वभयंकरः ॥ आसीदसाभुविनिःस्पृहान्मित्रविवर्जितः ॥ ३३ ॥ यतनमध्योद्भूतकेशाःकृष्णाङ्गोरक्तलोचनः
धनुष्पाणिर्वनगतःकृतान्तकसमोभवान् ॥ ३४ ॥ अमृद्दनावृष्टिरतीवरौद्राकराविदाहारनिमित्तरोपः ॥ पश्चात्तथा
दायततोवह्निगतंपुरंवैदिशानामधेयम् ॥ ३५ ॥ उक्तस्त्वलोभाच्चपुरंसमस्तंभ्रान्तंत्वयाशेषमहत्तदासीत् ॥ केनान
कश्चित्कमलेषुजातनलोकेमहांशङ्कस्त्वापिपीडितश्च ॥ ३६ ॥ उपविष्टस्त्वमेकस्मिन्समार्यौभवनांगतो ॥ अथमंगलहा
रकृत्त्वयाराज्ञौतथाश्रुतः ॥ ३७ ॥ समाप्यवासासाघमासस्यह्रादशरणांलवणाचलम् ॥ निवेदयन्तीपुरवेश्याभ्यांचोपस्कृ
तान्वितम् ॥ ३८ ॥ अलंकृत्यहर्षाकेशांसौवर्णोपरमंपदम् ॥ साथदृष्ट्वातन्तत्ताभ्यामिदंविनेवयाचितम् ॥ ३९ ॥ किमेभिः
कमलैःकार्यवरंविभुरलंकृतः ॥ इतिमक्तिस्तदाज्ञानादांपस्यस्यनरेश्वर ॥ ४० ॥ तत्सुसंगास्तस्मान्मार्याकेशावंलव
णाचलम् ॥ ताभ्यांवपुष्पप्रकरैःपूजिताभ्यच्चसर्वदा ॥ ४१ ॥ अथानंगवतीनुष्ठानपोद्दीनदानव्रयम् ॥ प्राददहीनं
ताभ्यांवनतत्सर्वावलंबनात ॥ ४२ ॥ अनंगवतविधुनस्तयोरत्नंचतुर्विधम् ॥ आनाय्योपहृतंकृत्वाभुक्त्वनाभिनि

मुपते ॥ ४३ ॥ ताभ्यां तु सदपि त्वत्तं भोज्या वः स्मो वरानने ॥ प्रसंगाद्वोपवासेन तत्तथा यात्तु कुर्वता वह ॥ ४४ ॥ जन्मप्रभृति
पिष्टावाटां देवि दृढव्रते ॥ मत्प्रसंगाद्धतु धर्मश्चोधर्मलाभस्तु वाव्योः ॥ ४५ ॥ इति जागरणं ताभ्यां प्रसंगात्तदनुष्ठितम्
प्रभाते च तया दत्ताश्चाभ्यां स्वल्पवराणावला ॥ ४६ ॥ ग्रामस्थगुरवे भक्त्या विप्रेभ्यो द्वादशैव हि ॥ वस्त्रालंकारयुक्तं गा गावश्च
कनकांचिताः ॥ ४७ ॥ भोजनं वसु हुत्मिश्च दीनांधकृपणौः समम् ॥ तत्तु लुब्धकदंपत्यं पूजयित्वा विसर्जितम् ॥ ४८
समभवाल्लुब्धको जातः सपत्नीको नरेश्वरः ॥ पुष्पाणां प्रकरेनास्मात्केशावस्य प्रपूजनम् ॥ ४९ ॥ प्राप्तं सुदुर्लभं वीरव
याप्युष्करमंदिरम् तस्य सर्वस्य माहात्म्यादलंतनपसान्नृप ॥ ५० ॥ यथा कामगतं दृश्य पश्ययोनिं गिरिं विना संतुष्ट
स्त्वया राजेन्द्र ब्रह्मरूपी जनार्दनः ॥ ५१ ॥ शय्यानंगवतीवेश्या को मे देशास्य सांप्रतम ॥ पत्नी सपत्नी संजाता रत्नाश्री निरि
तिश्रुता ॥ ५२ ॥ लोके ख्यातं दजननी सकलामर पूजिता ॥ तद्गुणस्त्वया राजेन्द्र निर्वाणं समवाप्स्यसि ॥ ५३ ॥ इत्युक्त्वा
सम्मुनिः सर्वं तत्रैवांतरधीयत ॥ राजा यथोक्तं च पुनः सबके पुष्पवाहनः ॥ ५४ ॥ इमामाचरतो ब्रह्मन्नवंऽव्रतमा
चरेत ॥ यथा कथंचित्कालेन द्वादश्यां द्वादशीमुने ॥ ५५ ॥ कर्तव्याः शक्तितो देया विप्रेभ्यो दक्षिणा नृप ॥ ५६ ॥ इति क
लुषविदारणां जनानामिति पठति शृणोति भक्तिभक्त्या ॥ मतिमपि वददाति देवलोके वसति स परःशतानि वत्स

राणाम्॥ ५० ॥ इतिश्रीभविष्येमहापुराणोत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेविभूतिद्वादशीव्रतवर्णनंनामपंचाशीतितमोऽध्यायः॥ ८५ ॥ युधिष्ठिरउवाच॥ श्रोतुमिछामिभगवन्मदनद्वादशीव्रतम्॥ सुतानेकोनपंचाशद्येनलेभेदितिःपुरा॥ १ ॥ श्रीकृष्णउवाच॥ तद्वसिष्ठादिभिःप्रोक्तमित्येकातिथिरुत्तमा॥ विस्तरेणातदेवेदंतस्मकाश्यान्निबोधत॥ २ ॥ चैत्रेमासेसितेपक्षेद्वादश्यांनियतव्रतः॥ स्थापयेदव्रणांकुंभंसिततंदुलपूरितम्॥ ३ ॥ नानाफलयुतंतद्वदिक्षुदण्डसमन्वितम्॥ सितवस्त्रयुगछन्नंसितचंदनचर्चितम्॥ ४ ॥ नानाभक्ष्यसमोपेतंसहिरण्यंचशक्तितः॥ ताम्रपात्रंगुडोपेतंतस्योपरिनिवेदयेत॥ ५ ॥ तस्योपरितथाकामंकदलीदलसंस्थितम्॥ कुर्याच्छर्करयोपेतमितितस्यसमीपतः॥ ६ ॥ गंधंपुष्पंतथाधूपान्गीतंवाद्यंचकारयेत॥ तदलाभेकथांकुर्यात्कामकेशवयोर्नरः॥ ७ ॥ कामंनाम्नाहरेरर्चांस्नापयेद्गंधवारिणा॥ शुक्लपुष्पाक्षततिलैरर्चयेन्मधुसूदनम्॥ ८ ॥ कामायपादौसंपूज्यजंघेसौभाग्यदायच॥ मन्मथायतथामेढ्रंमाधवायकटिंनमः॥ ९ ॥ शांतोदरायेत्युदरमनंगायेत्युरोहरेः॥ मुखंपद्ममुखायेतिबाहूपंचशरायवै॥ १० ॥ नमःसर्वात्मनेमौलिमर्चयेदितिकेशवम्॥ ततःप्रभातेकुंभंचब्राह्मणायनिवेदयेत॥ ११ ॥ ब्राह्मणान्भोजयेद्भक्त्यास्वयंचलवणादृते॥ भक्त्यायदक्षिणांदद्यादिमंमंत्रमुदीरयेत॥ १२ ॥

प्रीयतामत्र भगवान्कामरूपी जनार्दनः ॥ हृत्स्थे सर्वभूतानां यथा वेदोऽभिधीयते ॥ १३ ॥ अनेन विधिना सर्वं मासि मा-
सि समाचरेत् ॥ फलमामलकं प्राश्य द्वादश्यां भूतले स्वपेत् ॥ १४ ॥ ततस्त्रयोदशे मासि घृतधेनुसमन्वितम् ॥ शय्यां
दद्याद्द्विजेन्द्राय सर्वोपस्करसंयुताम् ॥ १५ ॥ कांचनं कामदेवं च शुक्लां गां च पयस्विनीम् ॥ वासोभिर्द्विजदांपत्यं पूज्य शक्त्या
विभूषणैः ॥ १६ ॥ होमः शुक्लतिलैः कार्यः कामनामानि कीर्त्तयेत् । गव्येन सर्पिषा तत्र पायसेन च धर्मवित् ॥ १७ ॥ विप्रेभ्यो
भोजनं कृत्वा वित्तशाठ्यं विवर्जयेत् ॥ इक्षुदण्डानथो दद्यात्पुष्पमालां च शक्तितः ॥ १८ ॥ यः कुर्याद्विधिनानेन मदनद्वाद-
शीमिमाम् ॥ सर्वपापविनिर्मुक्तः प्राप्नोति परमं पदम् ॥ १९ ॥ इह लोके वरस्त्रीणां सौभाग्यं सुखमश्नुते ॥ कश्यपो व्रतमा-
हात्म्यादागत्य परया मुदा ॥ २० ॥ चकार कर्कशां भूयो रूपलावण्यसंयुताम् वरेण च्छन्दयामास सा च वव्रे वरं वाम ॥ पुत्रं
शक्रवधार्थाय समर्थममितौजसम् ॥ २१ ॥ प्रार्थयामि महाभाग सर्वामरनिषूदनम् ॥ कश्यपः प्राह तां भद्रे एवमस्तु
शुचिशोभने ॥ २२ ॥ संवत्सरशतं त्वेकं गर्भो धार्यः शुचिक्षया ॥ संध्यायां नैव भोक्तव्यं वृक्षमूलेषु सर्वदा ॥ नोपस्करे भवि-
विशेन्मुशलोलूखलादिषु ॥ २४ ॥ जलं न चावगाहेत शून्यागारं विवर्जयेत् ॥ वर्जयेत्कलहं गेहे गात्रभंगं तथैव च ॥ २५
मुक्तकेशी न तिष्ठेत नाशुचिः स्यात्कथंचन ॥ न शयीतोत्तरशिरा न चाप्याऽशिरा । क्वचित् ॥ २६ ॥ न वस्त्रहीना नोद्विग्ना

नाड्यादानमतले ॥ नामंगल्यांवदेद्वाचंनच हास्यपरा भवेत् ॥ २७ ॥ कुर्याच्च गुरुशुश्रूषां नित्यं मंगलतत्परा ॥ स
र्वौषधीभिः ॥ कोष्णेन वारिणा स्नानमाचरेत् ॥ २८ ॥ कृत्रियो नाभिभाषेत नवस्त्रेवातं विवर्जयेत् ॥ मलवस्त्रादिसंसर्गो
पगेहं च सुंदरी ॥ २९ ॥ नशीघ्रं मार्गमाक्रामेत् लंघयेन्न महानदीम् ॥ नचवीभत्सकं किंचिन्नच वीक्षेद्भयानकम् ॥ ३०
गुरुवातलमाहारमजीर्णेन समाचरेत् ॥ संपूर्णगर्भिणीयायामं च विवर्जयेत् ॥ ३१ ॥ गर्भो हि स्थः सदा यथा हृदिधार्योन
संशयः ॥ अनेन विधिना साध्विशोभनं पुत्रमाप्नुयात् ॥ ३२ ॥ अन्यथा गर्भपतनं स्तंभनं वा प्रवर्तते ॥ तस्मात्सम
नयात्नत्सा गर्भे हितं भूम समाचरेः ॥ ३३ ॥ भविष्यति भमः पुत्रः सर्वावयवसुंदरः ॥ स्यात्पत्न्येनेगामि व्यामितथैस्सुक्त
न्तया च सः ॥ ३४ ॥ पश्यतां सर्वभक्तानां तत्रैवांतरधीयत ॥ ततः साकश्यपोक्तेन विधिना समतिष्ठत ॥ ३५ ॥ यथा
पपुत्रास्वां वाश्वादेको नाम्नां दुनंदन ॥ एवमन्यापि या नारी मदनद्वादशीमिमाम् ॥ ३६ ॥ कोतिपुत्रानाशो निसहम
र्त्तां सुखी भवेत् ॥ ३७ ॥ एकोनमर्ध्यशतमापदितिः पुत्रानां येन व्रतेन बलवीर्यसमन्वितानाम् ॥ मर्त्याः समाचरति
पुत्रधनाभिलाषी तत्सर्वमत्रसफलं भवतीह तेषाम् ॥ ३८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयु
धिष्ठिरसंवादे मदनद्वादशीव्रतवर्णनं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥ ॥ युधिष्ठिर उवाच ॥ कांतारव

॥ भविपु ॥
॥१४१॥

दुर्गे भृगुप्रसन्नाटवीभुव ॥ समुद्रतारणोदाने संग्रामे तस्करार्दने ॥१॥ कांदेवतां स्मरेत्कृष्ण परित्राणकरीमिह ॥
कथं च देवः प्रहृषः पवित्रोत्तां स्मृतो जनैः ॥२॥ श्रीकृष्ण उवाच ॥ सर्वमंगलमांगल्यां दुर्गां भगवतीमिमाम ॥ नाप्नोति
दुःखं पुरुषः संस्मरन्सर्वमंगलाम ॥३॥ अलक्ष्म्यां लक्ष्मतानां संस्मरन्सर्वमंगलाम् ॥ न भयं समवाप्नोति पुरुषः पार्थ
कर्हिचित ॥४॥ यदातां प्रतिजिज्ञासुरवं त्वामहमागतः ॥ उरासंदीपनौ पार्थ बलेनसह भारत ॥५॥ शास्त्रविद्येन च
मया प्रतिज्ञातास्य दक्षिणा ॥ दिक्षांतं विदित्वा मे तेनाहं याचितः प्रभो ॥६॥ प्रभासतीर्थे पुत्रो मे गतः केनाप्यसौ हृतः
तमानय महाबाहो त्वं कृष्ण वचो मम ॥७॥ उपाध्यायस्य वचनादेवस्वतपुत्रमेयवा ॥ आप्तः संदीपनेः पुत्रः समानीतः क्ष
णादसौ ॥८॥ दक्षिणांतांमुताहृत्वा प्रस्थितो पुनरागतो ॥ स्थानमेतत्त्वयातंकं कृत्वा वां गृहमागतौ ॥९॥ ततः प्र
भृति पुत्रार्थाः पूजयंति जनाः सदा ॥ मां चैव बलभद्रं च मध्यस्थां सर्वमंगलाम् ॥१०॥ वामे नारायणो हंसरूपमेव
च के भवेत् ॥ भवाधकं योर्चयते नतीर्थं कौंतिनंदन ॥११॥ चयोदश्यां सितेपक्षे मासि मासि यतव्रतः ॥ नक्तेनैवोपवा
सेन एकभक्तेन वा पुनः ॥१२॥ गंधपुष्पैश्च मधुभिः सीधुभिश्च सुरासवैः ॥ मृन्मयीं कांचनीं वापि कृत्वा प्रतिकृतिं
नृप ॥१३॥ यक्षगंधवलिक्षेपैः पललौदनसंस्कृतैः ॥ सोऽभ्यर्चयति राजेंद्र सर्वपापैः प्रमुच्यते ॥१४॥ नारी वा भर्तृ

॥ रामः ॥
॥१४१॥

141

सहितास्वर्गलोकेमहीयते ॥ १५ ॥ संवाम्रिकांविदशामेःहिमितेसदैवयः पूजयेत्कुसुममांसमुरोवहारैः ॥ नक्तंनि
नस्यभगवतेयतिभीषणानिचौरांग्निमारजनितानिभयानिसद्यः ॥ १६ ॥ इति श्री भविष्येमहापुराणोउत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादेअगाधकद्वेनवर्णनंनामसप्ताशीतितमोऽध्यायः ॥ ८७ ॥ ॥ युधिष्ठिरउवाच ॥ ब्रूहि
मेयदुशार्दूलव्रतंगंधविनाशनम् ॥ कंटुतिक्ताम्लदेहेत्थंदौर्भाग्यदमनंतथा ॥ १ ॥ श्रीकृष्णउवाच ॥ इमंप्रश्नंपुरा
पार्थजातूकर्ण्योमहामुनिः ॥ पृष्टोरुन्धत्याविष्ठेभक्त्याकालतंदतज्ञातया ॥ २ ॥ कथयामाससंपृष्टासत्पविष्टाभगो
तिसा ॥ देवीकृतांजलिपुटाजातूकर्ण्योविदद्व्रतम् ॥ ३ ॥ ज्येष्ठेमासिसितेपक्षेत्रयोदश्यांयुधिष्ठिर ॥ स्नात्वापुष्पनदी
तोयेपूजयेत्कुसुमदेशजम् ॥ ४ ॥ श्वेतमंदारमर्कंवाकरवीरंचरक्तकम् ॥ निंबंचसूर्यदेवस्यवाऽवमंदुर्लभंतथा ॥ ५ ॥
पुष्पैर्नैवेद्यधूपाद्यैर्मंत्रेणानेनपांडव ॥ निरीक्ष्यगगनेसूर्यंध्यात्वाहृदिसमुच्चरेत ॥ ६ ॥ सूर्यश्वेतारमंदारश्वेतार्का
र्कास्यसंज्ञायमम् ॥ करवीरनमस्तुभ्यंनिंबवृक्षनमोऽस्तुते ॥ ७ ॥ इत्थंयोर्कपतेभक्त्यावर्षेवर्षेप्रयन्नरः ॥ सलभंत्रेण
नन्वेष्टनारीवामक्तिसंपुता ॥ ८ ॥ तस्याःशरीरदौर्गंध्यंदौर्भाग्यंवाअज्ञाविकम् ॥ ९ ॥ निंबंनवार्ककरवीरलतांसु
पुष्पांयाःपूजयंतिकुसुमाक्षतधूपदीपैः ॥ ताःसर्वकामसुखभोगसमृद्धिभाजोदौर्भाग्यदोषरहिताःसुभगाभ

वंति ॥ १० ॥ इति भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मंदारनिम्बार्ककरवीरव्रतवर्णनं नामाष्टाशी
तितमोऽध्यायः ॥ ८८ ॥ युधिष्ठिर उवाच ॥ यमस्याराधनं ब्रूहि श्रीवत्स पुरुषोत्तम ॥ कथं न गम्यते कृष्ण नरकं नरकेसरि
न् ॥ १ ॥ श्रीकृष्ण उवाच ॥ आराधनं पुरा पार्थ स्नातोऽहं लवणाम्भसि ॥ दृष्टवान्मुनिमायांतं मुद्गलं नाम पार्थिव ॥ २ ॥ पूज्य तं त
मिवादितं तपसा द्योतितात्मना ॥ तं पूजयित्वा मधुपर्कसत्कारैः पप्रच्छाहं युधिष्ठिर ॥ ३ ॥ यमादर्शनना मानं व्रतं जन्तुभयापहम्
कथयामास सकलं मुद्गलो विस्मयान्वितः ॥ ४ ॥ मुद्गल उवाच ॥ सकस्मात्कृष्ण मूर्छामेपतितोऽस्मि धरातले ॥ पश्यामि
दंडपुरुषैर्मद्देहान्नज्वलल्लिव ॥ ५ ॥ अंगुष्ठमात्रः पुरुषो बलदाकृष्यारोपितः ॥ बद्धोयममभटैर्गाढं नीयते वेदवादिभिः ॥
६ ॥ श्मशानसभायां पश्यामि यमं पिंगललोचनम् ॥ कृष्णावदातनैरौद्रास्यं मत्तं व्याधिशतान्वितम् ॥ ७ ॥ कासश्वासोफज्वरा
तंकस्फोटिकालूतकारिभिः ॥ ८ ॥ ज्वरगर्दभशीर्षादिभगंदरमलक्षयैः ॥ गंडमालाशिरोरोगैश्च मसूरकृच्छुहरव्रणौ ॥ ९
वेदनाभिः प्रमेहैश्च पिटकैर्गंडगुह्मकैः ॥ विषूचिकागलग्राहदीरडामृततस्करैः ॥ १० ॥ इत्थं बहुविधैर्घोरैर्नानारूपभ
यंकरैः ॥ करालशस्त्रहस्तैश्च संग्रामैर्नरकैस्तथा ॥ ११ ॥ राक्षसैर्दानवैरुग्रैरूपविधैः पुरः स्थितैः ॥ धर्माधिकरणस्थै
श्च विचित्रगुप्तादिलेखकैः ॥ १२ ॥ सिंहव्याघ्रवराहैश्च नरश्वभ्यानुजंतुकैः ॥ वृश्चिकैर्दंशमशकैः शिवाखर्पैः सकुंडुभैः

जानजंतुकैः · १

१३॥ गृध्रैरुलूकैर्वकैर्भिर्मत्कुणोर्डाकिनीग्रहैः ॥ अपस्मारस्मरोन्माददद्रुड्विकारैर्वनीग्रहैः ॥ १४ ॥ पिशाचैर्यक्षकूष्माण्डैः
पाशखड्गधनुर्द्धरैः ॥ मुक्तकेशैः श्वासकरैर्भृकुटीकुटिलाननैः ॥ १५ ॥ वृहत्कायैर्नारकीयैः पापिष्ठानां नियामकैः ॥ असि
पत्रवनांगारैः क्षारगर्तारादपकैः ॥ १६ ॥ असिभिर्भगाभिपक्षेदरुधिरस्रावकादिभिः ॥ आस्थाने संमतो भाति य
मो महामोघमः ॥ १७ ॥ स आह किंकरान्सर्वान्धर्मराजो जनार्दन ॥ किमयं मुनिरानीतो युष्माभिर्ज्जतनामभिः ॥
१८ ॥ मुग्दलो नाम कौण्डिन्ये नगरे भीष्मकात्मज ॥ क्षत्रियोऽस्ति स आत्रेयः क्षीराम उत्तस्य तां मुनि ॥ १९ इत्युक्तास्ते गता
स्तस्मादायाताः पुनरेव ते ॥ कुबुर्यत्र भटाः प्रस्थाधर्मराजं सविस्मयाः ॥ २० ॥ तस्मामित्रवसी राम पुनर्देही लक्षितो गतैः
न जानीमो मानुषतो कथं च ज्ञातमानसा ॥ २१ ॥ यमराज उवाच ॥ प्रायेणानेन दृष्टं ते युष्मैर्यमकिंकरैः ॥ कृतात्रयोदशी
ये मनुना रकार्ति विनाशिनी ॥ २२ ॥ उक्तयित्वा त्रयोदशी वा भैरवेवाथयेसता ॥ निलाल्लगो हिरण्यादि दत्तं येभ्यागवाह्निक
२३ ॥ रुक्म उवाच ॥ कीदृशं तद्व्रतं स्वामिन्ब्रूहि सनो भास्करात्मज ॥ किं तत्र वद कर्तव्यं पुरुषैस्तव तद्विदम् ॥ २४ ॥ यम उवाच
पर्वाद्ये मार्गशीर्षादौ वर्षमेकं निरन्तरम् ॥ त्रयोदश्यां सौम्यदिने सर्वयोगारकवर्जिते ॥ २५ ॥ नमनाम्नाद्विजानष्टौ पंच
चैव समाहृयेत ॥ वेदान्तगांजातिशुद्धान्तचितान्सुशोभनान ॥ २६ ॥ वाचकश्चापि तन्मध्ये सदा भास्करवः प्रभान्

यमनाला २

दिनस्य प्रथमे यामे भक्ष्योद्देशो समाहितान् ॥२७॥ अंतर्वासो हतान्भक्तान्सोपदिष्टादिसोन्मुखान् ॥ अभ्यंगये
च्छिरोदेशान्तिलतैलेन मर्दयेत् ॥२८॥ स्नापयेद्गंधकाषायैः सुखोष्णांबुभिरेव च ॥ पृथक्पृथक्स्नापयित्वा सर्वा
नेव द्विजोत्तमान् ॥२९॥ शुचिर्भूत्वा तथाचांतो व्रती भक्तिपरायणः ॥ स्वयंसंभृत्य पुष्पाणि तेषां कृत्वा नरोत्तम ॥
३०॥ प्राङ्मुखानुपविष्टांश्च त्रयोदश पृथक्पृथक् ॥ भोजयेच्छालिमन्नाद्यं गुडपूपान्मुखोचितान् ॥३१॥ सुव्यंजनं
सूपकान्नं भक्ष्यभोज्यं निवेदयेत् ॥ शुचिर्भूत्वा तथाचांतान्दर्भयेत्तिलतंडुलैः ॥३२॥ प्रस्थमात्रैरथैकैकं ताम्रपात्रस
मन्वितैः ॥ सदक्षिणैः सवस्त्रैश्च जलकुंभैः पवित्रकैः ॥३३॥ चर्मप्रावरणैः श्रेष्ठैस्तेषां दत्वा विसर्जयेत् ॥ मंत्रेणा
नेन राजेंऽसर्वयेतान्पृथक्सुधीः ॥३४॥ ब्राह्मणान्वाचकं चापि तं क्रिमेदं न कारयेत् ॥ ॐ नमः शान्तेभ्यो मम सर्वदंऽऽ
नीविनाशकः ॥३५॥ सभावः प्रलयः सौरिरीः खघ्नः श्यामनोऽन्तकः ॥ लोकपालो हि निःक्रूरो रौद्रो घोरो नतः शि
वः ॥३६॥ यमः प्रसन्नमानस्को दयान्मेऽभयदक्षिणाम् स्वाहा ॥ इत्युच्चार्य प्रयच्छेत देयं दत्वा व्रती पुनः ॥३७॥ ष्ठि
तांश्चानुव्रजेत्प्रान्तं हांश्चार्चितवर्चितान् ॥ एवं यः पुरुषः कश्चित्सम्यक्कृतामदेवरेन ॥३८॥ समम्लोऽपि नरोम
सौ नायाति यममंदिरम् ॥ अदृष्टो मममायाभिर्विमानेनार्कमंडले ॥३९॥ स च याति पुरीं विष्णोस्ततः शिवपुरं व्रजे

॥ राम: ॥
॥ १४३ ॥

143

त॥ कृतं चीर्णं व्रतं तेन मृकण्डेन समोदितम्॥५०॥ तेन नायात्यसौ लोके मम क्षत्रियपुंगवः॥ इति कालवचः श्रुत्वा
तेऽपि दूता गता स्वस्थे॥५१॥ अहं पुनः समापन्नस्तर्णं कालेविसर्जितः॥ स्वशरीरं पुनः प्राप्य नीरोगः पुनरुत्थितः॥५२
त्वांद्रष्टुमुपागतः प्रोक्तमेतत्कृतं मयानघ॥ इत्युक्त्वा मृकण्डो राजन्सुयातः स्वगृहं प्रति॥५३॥ इदं कुरुष्व कौन्तेय त्वमप्यत्र मही
तले॥ ततो यास्यस्य संदिग्धं वंचयित्वा यमं सुतः॥५४॥ एवं येऽपि पुरुषाः स्त्रियो वापि युधिष्ठिरः॥ त्रयोदश्यां ये चरिष्यं
ति भूतले॥५५॥ एकभक्तेन नक्तेन उपवासेन वा पुनः॥ यमदर्शनमाख्यातं व्रतं सर्वव्रतोत्तमम्॥५६॥ सर्वपापवि
निर्मुक्ता दिव्ययानसमाश्रिताः॥ यास्यन्तीन्द्रपुरं दृष्ट्वा अप्सरोगणसंवृता॥५७॥ दोधूयमाना भ्रमरैः स्तूयमानाः सु
रासुरैः॥ गंधर्वनृत्यनादेन छत्रपंक्तिविराजिताः॥५८॥ अदृष्ट्वा घोररूपास्ते यमदूतैर्युधिष्ठिर॥ अनर्दिता व्याधि
गतैरदृष्ट्वा यमकिंकरैः॥५९॥ अनादिता महारौद्रैर्नानाप्रहरणोत्तमैः॥ यमदृष्टिपथामुक्तैः सर्वसौख्यसमन्विताः
६०॥ सर्वसौख्यसमायुक्तैः शिववत्सौम्यदर्शनाः॥ स्वर्गे वसंति सुचिरं भाविताः स्वेन कर्मणा॥६१॥ स्नात्वा त्रयोदश
मनीन्यथ कायसेन संपूज्य पूज्यान् तिलतंडुलवस्त्रदानैः॥ कुर्वंति ते व्रतमिदं त्रिदशोऽधिपूताः पश्यंति ते यममुखं न
कदाचिदेव॥६२॥ इति श्रीभविष्ये महापुराणे उत्तरःपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे यमदर्शनं त्रयोदशीव्रत

॥ भवि ॥
॥ १४४ ॥

वर्णनंनामैकोननवतितमोऽध्यायः ॥ ८९ ॥ ॥ युधिष्ठिरउवाच ॥ भगवन्भूतभव्येशसंसारार्णवतारक ॥ व्रतंकथ
यकिंचिन्मेरूपसौभाग्यदायकम् ॥ १ ॥ श्रीकृष्णउवाच ॥ किंकृतैर्वंकृभिःपार्थव्रतैरुग्रनियन्त्रितैः ॥ कायक्लेशकरैःक्रू
रैरसारैःफललाघवैः ॥ २ ॥ वरमेकापिवरदाकृतानंगत्रयोदशी ॥ प्रतिष्ठिंसमनुप्राप्तामत्र्यकामप्रदायिनी ॥ ३ ॥ सौभाग्या
रोग्यजयदासर्वातंकनिवारिणी ॥ सर्वदुष्टोपशमनीसर्वमंगलवर्धनी ॥ ४ ॥ प्रलोकेष्ठनांमहावाहोकथयामिसविस्तरम्
पुरादग्धेनकामेनत्रिनेत्रनयनाग्निना ॥ ५ ॥ भस्मीभूतेनलोकानांसंकल्पितापुरानघ ॥ अनंगेनकथाह्येषातेनानंग
त्रयोदशी ॥ ६ ॥ हेमंतेसमनुप्राप्तेमासिमार्गशिरेशुभे ॥ शुक्लपक्षेत्रयोदश्यांसोपवासोजितेंद्रियः ॥ ७ ॥ स्नानंनद्यांत
डागेवागृहेवानियतात्मवान् कृत्वासमभ्यर्च्यविभुंविधिनाशशिशेखरम् ॥ ८ ॥ धूपदीपैःसनैवेद्यैःपुष्पैःकालोद्भवैस्त
था ॥ शंभुनामासमथ्योवार्यहोमःकार्यस्तिलाक्षतैः ॥ ९ ॥ अनंगमात्मासंपूज्यमधुप्राशयेन्निशि ॥ नैवेद्यैर्मधुरैर्दिव्यैः
घृतवाहैर्घृतपाचितैः ॥ १० ॥ धूपंकृत्वागंधंदद्याद्रत्नपुष्पैःस्तुपूजनम् ॥ रंभातुल्याभवेत्स्त्रीतुरूपयौवनशालिनी ॥ ११ ॥ मधुवत्स्या
मामधुरःकामरूपधरस्तथा ॥ दशानामश्वमेधानांफलंप्राप्नोतिमानवः ॥ १२ ॥ पौषमासेसमभ्यर्च्यचंदनंप्राशयेन्निशि ॥ योगे
श्वरंनमस्पूज्यमालतीकुसुमैः ॥ १३ ॥ नैवेद्यंघृतपूपांश्चदद्यात्मस्नानात्कृताःक्षिप ॥ सौभाग्यीनसुगंधाच्यवंदनप्राशनोद्भवैः ॥ १४

॥ रामः ॥
॥ १४४ ॥

144

मधुनामासायोद्यर्थ ५

तृजौवीरकम् ४

राजसूयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमं ॥ माघे नटेश्वरं नाम पूजयेत्पंकजेन तु ॥१५ ॥ नैवेद्यं क्षीरखंडाद्यैर्मौक्तिकं प्राशये-
न्निशि ॥ वज्रभृत्त्राभवेत्स्मात्तु स्थानं सौभाग्यमुत्तमम् ॥१६ ॥ मुक्ताभरणी निभैर्नेत्रैर्यदा स्यात्तद्देवहि ॥ गौरी तु लाभवे-
त्सान्तु कोमलांगः प्रजायते ॥१७ ॥ तप्तजांबूनदाभासो भवेद्दिव्यतनुर्महान् ॥ गोमेधस्य सहस्रस्य फलं प्राप्नोति मानवः
१८ ॥ फाल्गुने मासि संपूज्य देवं देवं हरेश्वरम् । कांचनारस्य पुष्पाणि नैवेद्ये वीजपूरकम् ॥१९ ॥ कंकोलं प्राशयेद्रात्रौ सौ-
दर्यमतुलं लभेत् ॥ चैत्रे सुरूपकं नाम पूजयेद्दमनेन तु ॥२० ॥ नैवेद्यं धपकं दद्यात् घृतखंडविपाचितान् ॥ कर्पूरं प्राशयेद्रा-
त्रौ सौभाग्यं महदाप्नुयात् ॥२१ ॥ वेडश्चवेडकांतिश्चवेंडवीर्तिहराकृते ॥ नामेधस्य यज्ञस्य फलं प्राप्नोति शोभनम् ॥२२ ॥
वैशाखे च महारूपं पुष्पैर्मौमालिकार्चनम् ॥ कांरंवकैस्तु नैवेद्यं दानखंवाति शोभनम् ॥२३ ॥ जातीफलं तु संप्राश्य जातिस्मा-
रोत्सनुत्तमाम् ॥ सफला तस्य सर्वाशा भवंति भुवि भारत ॥२४ ॥ गोसहस्रफलं प्राप्य ब्रह्मलोके महीयते ॥ ज्येष्ठे मासे तु पु-
रुषं पूजयेन्नाम्विकाम्रजैः ॥२५ ॥ नैवेद्यं खंडवर्तिवलवंगं प्राशयेन्निशि ॥ ज्येष्ठं पदमवाप्नोति तथा लक्ष्मीजनार्द्दनात् ।
२६ ॥ सर्वलोकसमो येनां स्थित्वा भुवि ज्ञातं समा ॥ वाजपेयस्य यज्ञस्य स्नानमष्टगुणोत्तरम् ॥२७ ॥ आषाढे चैव संप्राप्ते उमा-
भर्त्तारमर्चयेत् ॥ पुष्पधूपादिनैवेद्यैः प्राशयीत तिलोदकम् ॥२८ ॥ तिलोत्तमारूपधरा मुखौ स्याच्छरदः शतम् ॥ श्राव-

षड्गुणाम् ६

१ विश्वेश्वरम् ६

रोडुमापतिंनाम तिलपुष्पैस्तु पूजनम् ॥ २९ ॥ नैवेद्यं लड्डुकान्दद्यात्कृष्णांश्च प्राशयेत्तिलान् ॥ पौण्डरीकस्य यज्ञस्य फ-
लं प्राप्नोत्यविनाकुलम् ॥ ३० ॥ तदन्ते राजराजः स्यात्शत्रुपक्षक्षयंकरः ॥ सद्योजातं भाद्रपदे पूज्य कुंकुमकेशरैः ॥ ३१ ॥ नै-
वेद्यं सोलिकां दद्यात्स्नाप्राशयेदगुरुं निशि ॥ अगुरुं प्राशयित्वा तु गुरुर्भवति भूतले ॥ ३२ ॥ पुत्रपौत्रैः परिवृतो मृत्वा मो-
गात्मनोऽनुगान् ॥ उक्तयज्ञफलं प्राप्य विषान् लोके महीयते ॥ ३३ ॥ त्रिदशाधिपतिं सम्य पूजिपज्यासिंदूरकस्रजैः
स्वर्णादिकेन संस्नाप्य स्वर्णवर्णः प्रजायते ॥ ३४ ॥ रूपवान्सुभगो वाग्मी भुक्त्वा भोगान्महीतले ॥ सुवर्णकोटिदानस्य
फलं प्राप्नोति मानवः ॥ ३५ ॥ विश्वेश्वरं कार्त्तिके तु सर्वपुष्पैस्तु पूजयेत् ॥ दमनस्य फलं प्राप्य दमनेन पुमान्भवेत् ३६
दमनोन्मादकर्त्ता च सर्वस्य जगतः प्रभुः ॥ भवेद्ध्वजबलोपेतस्ततः शिवपुरं व्रजेत् ॥ ३७ ॥ एवं संवत्सरस्यान्ते पारिते
ऽस्मिन्व्रतोत्तमे ॥ यत्कर्त्तव्यं तदधुनाख्यायतां यदुनन्दन ॥ ३८ ॥ व्रतेहि पूर्णं यदा चस्या दशान्नामासतकेन वा ॥ उपोष्य मेचो-
पवसेत वाडुमपूरःपूत ॥ ३९ ॥ पूर्वोक्तमेवं निवर्त्य सौवर्णं कारयेच्छिवम् ॥ ताम्रपात्रे तु संस्थाप्य कलशोपरि विन्य-
सेत् ॥ ४० ॥ भक्त्या वस्त्रेण संछाद्य पुष्पनैवेद्यपूजितम् ॥ ब्राह्मणाय प्रदातव्यं शिवभक्ताय सुव्रते ॥ ४१ ॥ शान्तिमा-
ऽढ्ययनं दद्याद्गां सवत्सां पयस्विनीम् ॥ छत्रोपानत्प्रदानं च कलशान्सोदकांस्तथा ॥ ४२ ॥ शान्ताभ्य केचिदिच्छन्ति शान्तिं

145

दद्याद्दक्षिणाम् ॥ पंचामृतेन स्नानं च तस्मिन्नहनि कारयेत् ॥४३॥ देवदेवस्य राजेन्द्र पुष्पदीपान्नसंयुतम् । भोजनं
च यथाशक्त्या षड्रसं मधुरोत्तमम् ॥४४॥ प्रदद्याच्छिवभक्तानां विप्रेन्द्रेणान्तरात्मना ॥ एवं निर्वर्त्य विधिवत्कृतकृत्यः पु
मान्भवेत ॥४५॥ नारी वा भरतश्रेष्ठ कुमारी वाथ तद्व्रता ॥ पारितेन व्रतेन पश्चात्कुर्याच्च सुमहोत्सवम् ॥४६॥ अनेन वि
धिना कुर्याद्यस्त्वनंगत्रयोदशीम् ॥ सराज्यं निहतामित्रं कीर्तिरायुर्यशोबलम् ॥४७॥ सौभाग्यं महदाप्नोति यावज्ज
न्मशतं नृप ॥ ततो निर्वाणमायाति शिवलोकं च गच्छति ॥४८॥ कामेन या किल पुरा समुपोषितासीच्छुभ्रा तिथिस्त्रि
दशामीसुखभोगहेतो ॥ तां प्राप्यानेरुदितनामयुतैरुपेतां कृत्वा प्रयाति परमं पदमिंदुमौलेः ॥४९॥ इति श्रीभविष्ये
महापुराणे उत्तरपर्वणिनंगत्रयोदशीव्रतवर्णनं नाम नवतितमोऽध्यायः ॥ ९० ॥ ॥ युधिष्ठिर उवाच ॥ अंबुपूर्णातडा
गेषु महतोयाशयेषु च ॥ कस्मार्घ्यं संप्रयच्छंति कृष्णोताः फलपोषितः ॥१॥ श्रीकृष्ण उवाच ॥ मासि भाद्रपदे प्राप्ते भ्रुक्षेभ
नतिथौ नृप ॥ तडागपाल्यां दातव्यमगस्त्यायार्घ्यमुत्तमम् ॥२॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैः स्त्रीभिस्तथैव च । तस्मिन्दिने भक्ति
नम्रैर्देयार्घ्यं युधिष्ठिर ॥३॥ पुष्पैः फलैस्तथा वस्त्रैर्दीपालक्तकचंदनैः ॥ अनग्निपाकसिद्धान्नैस्तिलतंडुलमिश्रकैः ॥४॥
खर्जूरैर्नालिकेरैश्च बीजपूर्णारकैस्तथा । द्राक्षादाडिमपूगैश्च त्रपुसैश्चापि पूजयेत् ॥५॥ शालिव्येमगत्सै देवं वरुणं वा

॥ भ.पु ॥
॥ १४६ ॥

१सम३

रुण्यै नमः ॥ मंत्रेणानेन राजेंद्र पूजयेद्भक्तिभावतः ॥ ६ ॥ वरुणाय नमः कुंभं नमस्ते यादसांपते । अपांपते नमस्तेऽ-
स्तु रसानां पतये नमः ॥ ७ ॥ माहेंद्रं माचदीर्गं ध्यं हिरण्यं सामुद्रवेऽस्तु मे । वरुणो वारुणी भर्ता वरदोऽस्तु सदा मम स्वाहा ।
८ ॥ एवं यः पूजयेद्भक्त्या वरुणं वरुणालयम् । मध्याह्ने सरसि स्नात्वा नाग्निपाकी व्रती नृप ॥ ९ ॥ चातुर्वर्णपथैनारी
व्रतेनानेन पांडव । नैवेद्यं ब्राह्मणे देयं पल्लैवेधे प्रकल्पितम् ॥ १० ॥ एवं यः कुरुते पार्थ पालीव्रतमनुत्तमम् । नस्मणा
त्सर्वपापेभ्यो मुच्यते नात्र संशयः ॥ ११ ॥ संरुद्धशुद्धसलिलानि वलांविशालां पालीमुपेत्य वरुणं मितलहभिः कृतालीमः
ये पूजयंति वरुणं सहितं समुद्रैस्तेषां गृहे भवति भूमिरलघ्यवेगा ॥ १२ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृ-
ष्णयुधिष्ठिरसंवादे पालीव्रतवर्णनं नामैकनवतितमोऽध्यायः ॥ ९१ ॥ श्रीकृष्ण उवाच ॥ अस्मिन्नेव दिने पार्थ भक्त्या ब्रह्म-
सभातले देवलेन पुरा गीतं देवर्षिगणसन्निधौ ॥ १ ॥ अप्सरोगणगंधर्वैर्देवैः सर्वैः समर्चितम् । संप्राप्तासारतोऽद्भुता
त्रयस्याकदलीद्रुमे ॥ भक्त्या पक्षे चतुर्दश्यां मासि भाद्रपदे नृप ॥ २ ॥ दत्तमर्घ्यं वरस्त्रीभिः फलैर्नानाविधैः शुभैः । विरूढैः सप्त-
धान्यैश्च दीपालक्तकचंदनैः ॥ ३ ॥ दधिदूर्वाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः ॥ जातीफलैर्लवंगैश्च नवैलालवलीफलैः ॥ ४
कदल्यैः कंदरंभायै मोचायात्र निगद्यते ॥ अस्मिन्नहनि दानं स्त्रीभिः सर्वाभिरुत्तमम् ॥ ५ ॥ मंत्रेणानेन वै वार्घ्यं भ-

॥ रामः ॥
॥ १४६ ॥

146

णष्टव्रतराधिप। चित्वा त्वं कंदलदलैः कदलीकामदायिनी॥ ६॥ शरीरारोग्यलावण्यं देहि देवि नमोऽस्तु ते॥ इत्थं यः
पूजयेद्राजा पुरुषो भक्तिमान्नृप॥ ७॥ नारी वा नगिपाकांता चातुर्वर्ण्या युधिष्ठिर॥ तस्याः फलेन भवन्ति कृविल्लारी
कलात्मनी॥ ८॥ दुर्गता दुर्भगा वंध्या स्वैरिणी पापकारिणी॥ विलासिनी वा वृषली पुनर्भूः पुनरेतसी॥ ९॥ गणि
का स्वैरिणी वो ण मत्स्यं कर्मकरी खला॥ भर्तृव्रतास्त्ववलिता न कदा विदग्धजायते॥ १०॥ भवेत्सौभाग्यसौख्याढ्या पुत्रपौ
त्रैस्तथावृता॥ साधुम्मती कीर्तिमती रमेदर्षशतैर्भुवि॥ ११॥ एकं रंभाव्रतं चीर्त्वा गायत्र्या स्वर्गसंस्थया॥ तथा गौर्या
च कैलासशृंगाद्या नंदने वने॥ १२॥ श्वेतद्वीपे तथा लक्ष्म्या राज्ञ्या चरगिमण्डले॥ अरुंधत्या दारुवने स्वाहया मेरुपर्व
ते॥ १३॥ सीतादेव्या त्वयोध्यायां वेदवत्या हिमाचले॥ भानुमत्या नागपुरे व्रतमेतदनुष्ठितम्॥ १४॥ एतद्व्रतं पार्थिवेन्द्र
मासि भाद्रपदे सिते। याकरोति न सा दुःखैः कदाचिदपि पीड्यते॥ १५॥ संमिल्य कंदकदलीवनमोज्ज्वलां याः पूजयंति
कुसुमाक्षतधूपदीपैः॥ तासां गृहेषु न भवंति कदाचिदेव नार्यस्त्वनार्यचरिता विधवा विरूपाः॥ १६॥ इति श्रीभवि
ष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रंभाव्रतं नाम षष्ठिनवतितमोऽध्याय॥ ९९॥ श्रीकृष्ण उ
वाच॥ चतुर्दशी महाराज कृतभृगुयिना भुभा॥ नष्टं तदाहमवाहः पुनर्जितं माघ्नदान॥ १॥ युधिष्ठिर उवाच॥

कथमग्निः पुरा नष्टो देवकार्ये ह्युपस्थिते ॥ केनाग्निस्त्वं कृतं तत्र कथं हि विदितो ऽनलः ॥ २ ॥ एतद्वदस्व देवेन्द्र सर्वं हि विदितं त
व ॥ ॥ श्रीकृष्ण उवाच ॥ पुरा सुरा महाराज तारकेन पराजिताः ॥ अपृच्छन्निस्वकर्तारकं को वधिष्यति ॥ ३ ॥ उवाच तान्सो चिरं ध्या
त्वा हरजो मान्नुकसंभवः ॥ गंगायां ह्यग्निनेत्रोजः शिशुर्दैत्यं वधिष्यति ॥ ४ ॥ एवं श्रुत्वागता देवा यत्र शंभुः सहोमया ॥ प्रणम्य
तेन मत्सुर्हि पुत्रकं तुष्टुवुरानताः ॥ ५ ॥ प्रीतिपन्नेन रुद्रेण उमया सहितेन तत् ॥ सुरतमकरोतं वयउक्तसमरैस्ततः ॥ ६ ॥ दिव्यं व
र्षशतं साग्रं गतः कालो ऽथ मैथुने ॥ न चाप्युपरमस्तत्र तयोरासीत्कथंचन ॥ ७ ॥ भयं च सुमहत्तेषां देवानां समजायत सरुद्र
संभवो यो वै भविष्यति महाबल ॥ ८ ॥ स दैत्यान्सानवगणान्धक्ष्यति निसंशयः ॥ केन कालेन भवति रतेर्विरतिरेतयो ॥ ९ ॥
एतद्विचिंत्य प्रहितौ देवैस्तत्रानिलानलौ ॥ गतौ तौ चोमया दृष्टौ तमस्थौ विषमस्थया ॥ १० ॥ ततः शापं च रुषा देवी देवानामभि
वर्जिता ॥ यस्मान्नेर्जनितं विघ्नमपत्यार्थे दिवौकसाम् ॥ ११ ॥ अथोवाच ततो देवो देवान्सर्वगणैर्वृतैः ॥ अग्निर्गत्वा तु वीर्यं मे
संभूतं प्रचिरं हि यत् ॥ १२ ॥ एवमुक्तो ऽथ रुद्रेण नष्टो ऽग्निर्देवसंकुलात् ॥ तत्र स्थानं भविष्यो वा नसर्वस्थानमनलो ॥ १३
देवास्तत्र प्रयत्नमकुर्वंस्त्वग्निदर्शने ॥ कृमिकीटपतंगाश्च सृष्टौ वच्चिद्दिवौकसः ॥ १४ ॥ हंहो केकाः शुका वह्निः शमीपुंसार
वर्णा गतः ॥ तस्मात्पापाग्निर्गजा जिह्वा द्विगुणा वो भविष्यति ॥ १५ ॥ दृष्ट्वाथ विबुधाः सर्वे पक्षिणां पक्षिणां वरम् ॥ जीवं जी

वकलामानं भोभो सत्यं वदस्व नः ॥१६॥ कच्चिद्दृष्टस्त्वया वह्निर्वने ऽस्मिन्नटता सदा ॥ न भङ्क्त्वापि भङ्क्त्वा किंचिदेव वचो ऽ
ब्रवीत् ॥१७॥ भूयो भूयस्तु पृष्टो ऽपि नगाम् ज्ञापयेच्चिरम् ॥ तुष्टस्तस्याब्रवीद्वह्निर्जीवंजीव वदामि ते ॥१८॥ यस्मान्न किंचि
दुक्तं ते तस्माच्चित्रतनूरुहाः ॥ जीवंजीव पुनर्जीव यावदिच्छा तथा पुनः ॥१९॥ द्वितीयं ते वरं दद्मि जीवंजीवक शोभनम् ।
व्यक्ता ते मानुषी वाचा स्पष्टार्था च भविष्यति ॥२०॥ कश्चिद्यदि नवा धस्तादुषः स्नानं करिष्यति ॥ वंशावाघो ऽस्माद्दीया
क्षराणां भालो भविष्यति ॥२१॥ मांसं यश्नततीयं वै भक्षयिष्यति निर्दिनम् ॥ अजरः सो ऽमरश्चैव सर्वकालं भविष्यति ॥
२२॥ इदं दत्वा वरांस्तस्य वह्निस्त्वमथ आप्नवान् ॥ विबुधा ऽपि तत्रैव तमपद्यं तवंशगाम् ॥२३॥ उष्मयाजानकल्माषं ज्ञात्वा सं
हृष्टमानसः ॥ तुष्टावं शमथो वृत्ते देवास्त्रिभुवनेश्वराः ॥२४॥ उष्मया कल्मषी भूत्वा अग्निगर्भं धरिष्यति ॥ योगहीवैरगीयं
विंब्रह्मचारी च नैष्ठिकः ॥२५॥ पंडाग्निपालते गुरापं यदष्टं ब्रह्मवादिभिः ॥ वदतः कल्मषीयविस्तं प्राप्नोति द्विजोत्तम ॥२६॥
वंशस्यानुग्रहं कृत्वा देव्याहृतिमथाब्रुवन् ॥ ग्ट स्तीतभुक्तं भद्रस्य तव पुत्रो भविष्यति ॥२७॥ ऋषिरुवाच ॥ यदाग्निर्न
ष्टो देवानां केनाग्नित्वं तदाकृतम् ॥ भूयो ऽपि केन कालेन अग्निरग्नित्वमाप्नवान् ॥२८॥ क्रषा उवाच ॥ शृणु राजन्नष्टे
ऽग्नौ येनाग्नित्वं कदाचन ॥ यस्मिन्काले तिथौ यस्यां पुनरग्नित्वमाप्नवान् ॥२९॥ उतथ्यांगिरसोः पूर्वमासी ह्यतिकरो म

॥ भविष्य ॥
॥ १४८ ॥

हृता। अहं विप्रात्तपो भार्यां वै तेन व स्मायया स्फुतेनव ॥३०॥ उतथ्येनैवमुक्तस्तु अंगिराः प्राह तं मुनिम् ॥ गच्छावो ब्रह्मसदनं मरी
चिप्रमुखैर्द्विजैः ॥३१॥ उपेतं चान्यमुनिभिर्ब्रह्मराजर्षिसत्तमैः ॥ उतथ्यः प्राह सद्ब्रह्मन्नषीं त्वां त्वत्तख्यमानसः ॥३२॥ स्मायया
न्याकृतमोस्माकमितितनः कथ्यतां स्फुटम् ॥ तथोवाच मुनिर्ब्रह्मा तातभौकृद्धमानसो ॥३३॥ आनय त्वं द्रुतं गत्वा विबुधान्स्व
वनेश्वरान् ॥ ततो विवादं परणामि भवतां तैः समेत्य च ॥३४॥ ततस्तौ ताहितौ गत्वा ॥ त्रित्वतुभ्य रूषीं त्वदा ॥ लोकपाला
न्महेंद्रादीन्स्वयमात्मारुणानिलान् ॥३५॥ सा आत्मरूपरणा विभ्यान्नषीन्सगवाग्निनारदान् ॥ गंधर्वान्विनरक्षोघ्नान्नरा
भ्रसान्दैत्यदानवान् ॥३६॥ तायात तत्र तिग्मांशुः सर्वे चान्ये समागताः ॥ दृष्ट्वा तु विबुधान्सर्वान्ब्रह्मा प्रोवाच तानृषी
न् ॥३७॥ आनयत्वमितः सूर्यमास्मादंडे नवापुनः ॥ एवमुक्तो गतस्ता वद्दुतथ्यः सूर्यमंडलम् ॥३८॥ स गत्वा प्राह मा
र्तंडं श्रीघ्रमेहि वसं विदम् ॥ स उतथ्यमथोवाच कथं ब्रह्मन्त्रजाम्यहम् ॥३९॥ एवमुक्तो गतः सूर्यो भुवने मयि निर्गते ॥
एवमुक्तो मुनिः प्राप्यात्सर्वदेवसमागमम् ॥४०॥ आचख्यौ च यथा प्रोक्तं भास्वता तपनं प्रति ॥ उवाचांगिरसं ब्रह्मा शी
घ्रमेनं त्वमानय ॥४१॥ स तथोक्तो गतस्तत्र यत्रास्तौ तपनो रविः ॥ एहि हे भगवन्सूर्य तप्यते भवता त्वहम् ॥४२॥ ए
वमुक्तो गतः सूर्यो यत्र देवाः समागताः ॥ स्थित्वा मुहूर्तं प्रोवाच किं वा कार्यमुपस्थितम् ॥४३॥ एवमुक्तमेवमार्तंडं

148

॥ राम ॥
॥ १४८ ॥

ब्रह्मा प्रावोचसादरम् ॥ गच्छ शीघ्रं न दहते भुवनं यावदंगिरा ॥ ४४ ॥ लब्धप्रायं तु गोलोकं वर्त्तते कल्पपिंगलम् ॥
पाटलं हरितं श्योणां श्वेतो वर्णः स्रुणाग्नितः ॥ ४५ ॥ शाकद्वीपं कुशद्वीपं क्रौंचद्वीपं सपन्नगम् ॥ दग्धमंगिरसा सर्वं भ-
योऽपि प्रदहिष्यति ॥ ४६ ॥ यावच्च दहते सर्वं भुवनं तपसांगिरा ॥ गच्छ तावदितः शीघ्रं स्वस्थाने तपभास्कर ॥ ४७
एवमुक्तः स विभुना स्वस्थानमधिरूढवान् ॥ विसृष्टवानंगिरसं सकाशममृताशिनाम् ॥ ४८ ॥ गत्वांगिरा उवाचेदं
गतः किं करवाण्यहम् ॥ देवा अंगिरसं प्राहुस्तपोराशिमकल्मषम् ॥ ४९ ॥ संप्रहृष्टास्यो ऽग्निस्त्वं कुरु तावन्महीतले ॥ पू-
र्वं यथाग्निः कृतवांस्तथा त्वमपि सत्तम ॥ ५० ॥ यावदग्निं प्रपश्यामः क्वासौ नष्टः क्व तिष्ठति ॥ एवमुक्तः स देवैस्तु अग्नित्वं
कृतवांस्तदा ॥ ५१ ॥ देवैर्दृष्टो यथा ह्यग्निस्तेन सर्वं निवेदितम् ॥ देवकार्ये कृते तेन स्मिन्देवा वह्निमथाब्रुवन् ॥ ५२ ॥ अग्नेः
ग्नित्वं कुरुष्व त्वमंगिरास्तु यथा पुरा ॥ एवमुक्तः सुरैर्वह्निश्चिन्तयामास दुःखितः ॥ ५३ ॥ केन मे ऽपहृतं तेजः केनाग्नि-
त्वं कृतं त्विह ॥ अथाग्निरंगिरसं दृष्ट्वा तेजोराशिमकल्मषम् ॥ ५४ ॥ उवाच मुंच मत्स्थानं त्वं च लोककरं भ्रगण ॥ अहं
ते तनयश्रेष्ठो भविष्ये प्रथमे प्रभो ॥ ५५ ॥ बृहस्पतीति नाम्ना वै तथान्ये वहवः सुता ॥ एवमुक्तो मुनिस्सृष्टो वह्निश्चाज-
नयत्सुतान् ॥ ५६ ॥ वह्निः संजनयामास पुत्रान्सौत्रांस्तदांगिराः ॥ अवाप पुनरग्नित्वमग्निस्तस्यां तिथौ नृप ॥ ५७

॥ भविष् ॥
॥ १४९ ॥

सर्वमेव चतुर्दश्यां संजातं हव्यवाहनम् हव्यवाहनदेवानां मृतानां गृह्यचारितम् । ५८ ॥ ततोऽथ पतिपत्नेव हड्डेल
प्रतिपादितम् ॥ पूजिते यं तिथिर्देवी दिविस्थैश्चान्तरैरपि ॥ ५९ ॥ पैलजाबालमन्त्राद्यैरन्यैश्चान्तकृपादिभिः ॥ शिष
शास्त्रहतानां च संग्रामे न्यस्त्रतेः कचित् ॥ ६० ॥ अज्ञाता ह्य पापैश्च व्यालैर्येव्यापा हिंसिताः ॥ नदीप्रवाहपतिताः स्तम्
डे पर्वतेऽथ नि ॥ ६१ ॥ पतिताः पर्वते ह्यश्च तोयाग्निदहने मृताः ॥ उद्ध्यापातिता ये च ये केचात्महनो जनाः ॥ ६२ ॥
तेषां शस्तं चतुर्दश्यां श्राद्धं स्वर्गसुखप्रदम् ॥ श्राद्धानि चैव दत्तानि दत्तानि सुलघून्यपि ॥ ६३ ॥ प्रभूतफलभोज्यानि
उपतिष्ठंति तान्नरान् ॥ एवं तिथिरियं राजन्नाग्नेयी प्रोच्यते जनैः ॥ ६४ ॥ रौद्रीं च केचिदिच्छन्ति रुद्रडोग्निः स च पठ्यते
यस्यां मनोरथं यं यं समुद्दिश्य तु पोषति ॥ ६५ ॥ ददाति तस्य तं वह्निः साग्ने संवत्सरे गते ॥ चतुर्दश्यां निराहारः सम्यगभ्य
र्च्य त्रिलोचनम् ॥ ६६ ॥ पुष्पधूपादिनैवेद्यै रात्रौ जागरणान्वितः ॥ पंचगव्यं निशि प्राश्य स्वपेद्भूमौ विमत्सरः ॥ ६७ ॥ गणामा
कमथवा भुक्त्वा तैलक्षारविवर्जितम् ॥ होमः कृष्णतिलैः कार्यः स्नातमव्रोत्तरं नृप ॥ ६८ ॥ अग्नये हव्यवाहनाय सोमायां
गिरसे नमः ॥ ततः प्रभाते विमले स्नाप्य पंचामृतैः शिवम् ॥ ६९ ॥ पूजयित्वा विधानेन होमं कृत्वा तथैव च ॥ उदीरयेन्म
न्त्रमेतं कृत्वा शिरसि चांजलिम् ॥ ७० ॥ नमस्त्रिमूर्तये तुभ्यं नमः सूर्याग्निरूपिणे ॥ पुत्रान्स कृसुखं य कृ मोक्षं प कृ

॥ रामः ॥
॥ १४९ ॥

149

नमोऽस्तु ते ॥ ७१ ॥ नीराजनं ततः कुर्य्याद्गीतवाद्यतः ॥ एवं संवत्सरस्यान्ते कृत्वा सर्वं यथोदितम् ॥ ७२ ॥ सौवर्णंकार
येद्देवं त्रिनेत्रं शूलपाणिनम् ॥ वृषस्कंधगतं सौम्यं सितवस्त्रयुगान्वितम् ॥ ७३ ॥ चंदनेनानुलिप्तांगं सितमाल्योपशो
भितम् ॥ स्थापयित्वा ताम्रपात्रे ब्राह्मणाय निवेदयेत् ॥ ७४ ॥ सर्वकालिकमेतन्ते कथितं व्रतमुत्तमम् ॥ संवत्सरं समा
प्ते हि व्रतस्य तु यदा भवेत् ॥ ७५ ॥ काले गतें व ऋनिथे तीर्थस्याहारणं भवेत् ॥ मृतस्य देहो दिव्यः स्यो दिव्यालंकारभूषितः
७६ ॥ दिव्यनारीगणवृतो विमानवरमास्थितः ॥ देवदेवैः समः शंभोः क्रीडते त्रिपुरे चिरम् ॥ ७७ ॥ इह चागत्य कालान्तेऽजा
तः स च नृपो भवेत् ॥ दाता यज्वा धनी दक्षो ब्राह्मणो ब्राह्मणप्रियः ॥ ७८ ॥ श्रीमान्वाग्मी कृती धीमान्पुत्रपौत्रसमन्वितः
पत्नीगणसमायुक्तश्चिरं भद्राणि पश्यति ॥ ७९ ॥ येऽर्च्चंभाभ्यवि सुरारेगमानवानां कामाहन्नमगुणेनयुताः सदैव
नानाप्रुवंतिमित भक्तिनिष्ठौ सुरेशं संपूज्य सोमतिलकं विधिवन्मनुष्याः ॥ ८० ॥ इति श्रीभविष्ये महापुराणे उत्तर
पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आग्नेयीचतुर्दशीव्रतवर्णनं नाम त्रिनवतितमोऽध्यायः ॥ ९३ ॥ श्रीकृष्ण उवाच ॥
अनंतव्रतमस्त्यन्यत्सर्वपापहरं शिवम् ॥ सर्वकामप्रदं नृणां स्त्रीणां चैव युधिष्ठिर ॥ १ ॥ भकृपक्षे चतुर्दश्यां मासि भाद्र
पदे शुभे ॥ तस्यानुष्ठानमात्रेण सर्वपापैः प्रमुच्यते ॥ २ ॥ युधिष्ठिर उवाच ॥ कृष्ण कोऽयं त्वया ख्यातो ह्यनंत इति विश्रु

आनंदचतुर्दशीव्रतवर्णनं नाम ३ सर्वपापंप्रणाशनि १

॥ भवि ॥
॥ १५० ॥

नः॥ किंशेषनागआहोस्विदनंतस्तक्षकः स्मृतः॥३॥ परमात्माथवानंतमुताहोब्रह्मउच्यते॥ कएषोऽनंतसंज्ञो वैत
थ्यंमेब्रूहिकेशव॥४॥ श्रीकृष्णउवाच॥ अनंतइत्यहंपार्थममनामनिबोधय॥ आदित्यादिग्रहारेच्यःकालउपप
द्यते॥५॥ कलाकाष्ठामुहूर्तादिदिनरात्रिशरीरवान्॥ पक्षमासर्तुवर्षादियुगकल्पव्यवस्थया॥६॥ योऽयंकालोम
याख्यातस्तवधर्मभृतांवर॥ सोऽहंकालोऽवतीर्णोऽत्र भुवोभारावतारणात्॥७॥ दानवानांविनाशायवसुदेवकुलो
द्भवम्॥ मांविद्धनंतंपार्थत्वंविष्णुंजिष्णुंहरंशिवम्॥८॥ ब्रह्माणंभास्करंशेषंसर्वव्यापिनमीश्वरम्॥ विश्वरूपंमहात्मा
नंसृष्टिसंहारकारकम्॥९॥ इत्यपार्थंमयाख्यातंसोऽहंपार्थनसंशयः॥ युधिष्ठिरउवाच॥ अनंतव्रतमाहात्म्यंविधिं
वदविदांवरः॥१०॥ किंपुण्यंकिंफलंचास्यह्यनुष्ठानवतांनृणाम् केनवादौपुराचीर्णंमर्त्येकेनप्रकाशितम्॥११
एवंसमस्तंविस्तार्यब्रूह्यनंतव्रतंहरे॥ ॥ श्रीकृष्णउवाच॥ ॥ आसीत्पुराकृतयुगेसुमंतोनामवैद्विजः॥१२
वसिष्ठगोत्रेचोत्पन्नः सुरूपश्चभृगोःसुताम्॥ दीक्षांनामोपयेमेतांवेदोक्तविधिनाततः॥१३॥ तस्याःकालेनसंजा
तादुहितानंतलक्षणा॥ शीलनामसुशीलासावर्द्धतेपितृसद्मनि॥१४॥ माताचतस्याःकालेनज्वरदाहेनपीडि
ता॥ विनताह्यनदीतीरेसास्वर्गपुरंययौ॥१५॥ सुमंतोपिततोन्यांवैधर्मपुंसःसुतांपुनः॥ उपयेमेविधानेन

॥ राम: ॥
॥ १५० ॥

150

कर्कशांनामतामतः॥१६॥ दुःशीलां कर्कशां चंडीं नित्यंकलहकारिणीम्। सापिशीलापितुर्गेहेगृहार्चनरता
विभो॥१७॥ कुद्यस्तंभतुलाद्वारदेहलीतोरणादिषु। चातुर्वर्णीकरंगैश्चनीलपीतसितासितैः॥१८॥ स्वस्तिकैःशं
खपद्मैश्चअर्चयंतीपुनःपुनः॥ पित्राहदृष्ट्वासुमंतेनस्त्रीविज्ञायौवनेस्थिता॥१९॥ कस्मैदेयामयाशीलाविचार्यैवं
सुदुःखितः॥ पितादद्दौमुनींद्रायकौंडिन्यायपञ्चमेदिने॥२०॥ सुमन्तुःशास्त्रविधिनाविवाहमकरोत्तदा॥ निवर्त्तो
वाहिकंसर्वंप्रोक्तवान्कर्कशांद्विजः॥२१॥ किंचिद्दायादिकंदेयंजामातुःपारितोषिकम्॥ तच्छ्रुत्वाकर्कशाक्रुद्धाप्रो
द्धत्यगृहमंडपम्॥२२॥ कपाटेसुस्थिरंकृत्वागम्यतामित्युवाचह॥ भोज्यावशिष्टचूर्णेनपाथेयंचकारसा॥२३॥
कौंडिन्योपिविवाह्यैनांपथिगच्छ्छनैःशनैः॥ शीलांसुशीलामादायनवोढांगोरथेनहि॥२४ मध्याह्नेभोजनवे
लायांसमुत्तीर्यसरित्तटे॥ ददर्शशीलासास्त्रीणांसमूहंरक्तवाससाम्॥२५॥ चतुर्दश्यामर्चयंतंभक्त्यादेवंपृथक्
पृथक्॥ उपगम्यशनैःशीलापप्रच्छस्त्रीकदंबकम्॥२६॥ नार्यःकिमेतन्मेब्रूतकिंनामव्रतमीदृशम्॥ ताऊचु
योषितःसर्वाअनंतोनामविश्रुतः॥२७॥ साब्रवीदहमप्येवंकरिष्येव्रतमुत्तमम्॥ विधानंकीदृशंतत्रकिंदा
नंकस्यपूजनम्॥२८॥ ॥ स्त्रियऊचुः॥ शीलेपक्वान्नप्रस्थस्यपुन्नाम्नःसुकृतस्यतु॥ अर्द्धंविप्रायदातव्यमर्द्धं

वामेकरतलेन्यसेत्॥२

मात्मनि भोजनम्॥ २९॥ कर्त्तव्यं नु सरित्तीरे कथां श्रुत्वा हरेरिमाम्॥ अनंतानंतसम्भार्च्यसर्व्वसद्लेगंधदीपकैः॥ ३०
धूपैः पुष्पैः सनैवेद्यैः पीतालक्तैश्च तन्तुःशतैः॥ तस्याग्रतो दृढं सूत्रं कुंकुमाक्तं सुदोरकम्॥ ३१॥ चतुर्द्दशग्रंथियुतं वामे
स्त्री दक्षिणे पुमान्॥ मंत्रेणानेन राजेंद्र पावद्वर्षसमाप्यते॥ ३२॥ अनंतसंसारमहासमुद्रे मग्नान्समभ्युद्धर वासुदेव।
अनंतरूपे विनियोजितात्मा अनंतरूपाय नमो नमस्ते॥ ३३॥ अनेन दोरकं बद्धा भोक्तव्यं स्वस्थमानसैः॥ ध्यात्वा नाराय
णं देवमनंतं विश्वरूपिणम्॥ ३४॥ भुक्त्वा चांते व्रजेद्वेश्ममिदं प्रोक्तं व्रतं तव॥ सापि श्रुत्वा व्रतं चक्रे शीला बद्धा सुदो
रकम्॥ ३५॥ भर्त्ता तस्याः समागत्य तां ददर्श महाधनाम्॥ पाथेयशेषं विप्राय दत्वा भुक्त्वा तथैव च॥ ३६॥ ततो जगा
म सा हृष्टा गोरथेन स्वमाश्रमम्॥ भर्त्रा सहैव शनकैः प्रत्यक्षं तत्क्षणादभूत्॥ ३७॥ तेनानंतप्रभावेन शुभं गोधन
संकुलम्॥ गृहमाश्रमं श्रियायुक्तं धनधान्यसमायुतम्॥ ३८॥ आकुलं व्याकुलं रम्यं सर्वत्रातिथिपूजनम्॥ सापि
माणिक्यकांचीभिर्मुक्ताहारविभूषिता॥ ३९॥ दिव्यांगवस्त्रसंछन्ना सावित्री प्रतिमा भवत्॥ कदाचिदुपविष्टेन
दृष्ट्वा स्कंधे सुदोरकम्॥ ४०॥ शीलायाः स्तम्लेनु साक्षेपं त्रोटितं रुषा॥ तेन कर्मविपाकेन तस्य सा श्रीः क्षयं गता॥ ४१
गोधनं तस्करैर्नीतं गृहं चाग्निविदाहितम् यद्यदेवागतं गेहे तत्तत्सर्व्वं विनश्यति॥ ४२॥ स्वजनैः कलहो मित्रैर्वचनं न

तेनानंतव्रतेनास्य वभौ ५

॥ एमः ॥
॥ १५१ ॥

151

जनैस्तथा ॥ अनंताश्चैव दोषेण दारिद्र्यं प्रतितं गृहे ॥ ४३ ॥ न कश्चिद्ददते लोकस्तेन सार्द्धं युधिष्ठिर ॥ ततो जगा
म कौडिन्यो निर्वेदाद्वनगह्वरम् ॥ ४४ ॥ मनसा ध्यायतेनंतं कदा द्रक्ष्यामि केशवम् ॥ व्रतं निरशनं गत्वा ब्रह्मचर्यंजपकृरि
म ॥ ४५ ॥ विह्वलः प्रययौ पार्थ अरण्यं जनवर्जितम् ॥ तत्रापश्यन्महावृक्षं कलितं पुष्पितं तथा ॥ ४६ ॥ तमपृच्छत्त्व
यानंतः कश्चिद्दृष्टो महाद्रुम ॥ तद्ब्रूहि सोप्युवाचेदं नानंतं वेद्म्यहं द्विज ॥ ४७ ॥ एवं निरीक्षितस्तेन गां ददर्श सवत्सका
म् ॥ तणमध्ये प्रधावंतीमितश्चेतश्च पांडव ॥ ४८ ॥ सोब्रवीद्धेनुके ब्रूहि यद्यनंतस्त्वयेक्षितः ॥ गौरुवाचाथ कौंडि
न्यं नानंतं वेद्म्यहं विभो ॥ ४९ ॥ ततो जगाम सोथ वने गोवृषं शाद्वले स्थितम् ॥ दृष्ट्वा पप्रच्छ गोस्वामिन्ननंतो लक्षि
तस्त्वया ॥ ६० ॥ गोवृषस्तमुवाचाथ नानंतो वीक्षितो मया ॥ ततो व्रजन्ददर्शाग्रे रम्यं पुष्करिणीद्वयम् ॥ ५१ ॥
अन्योन्यजलकल्लोलवीचिभिः परिशोभितम् ॥ छन्नं कुमुदकह्लारैः कमुदोत्पलमंडितम् ॥ ५२ ॥ सेवितं भ्रमरै
र्हंसैश्चकैः कारंडवैर्वकैः ॥ तमपृच्छद्द्विजोनंतो भवद्भ्यां नोपलक्षितः ॥ ५३ ॥ ऊचतुः पुष्करिण्यौ तं नानंतं विद्महे
द्विज ॥ ततो व्रजन्ददर्शाग्रे गर्दभं कुंजरं तथा ॥ ५४ ॥ तावपृच्छत्तौ सुमंतेन नतस्यापि विनिवेदितम् ॥ नाताभ्यां वी
क्षितोनंतस्तच्छ्रुत्वा निषसाद ह ॥ ५५ ॥ तस्मिन्क्षणे मुनिवरे कौंडिन्ये ब्राह्मणोत्तमे ॥ कृपयानंतदेवोपि प्रत्यक्षः

आसी.ददाना च्छ स्नस

समजायत ॥ ५६ ॥ वृद्धब्राह्मणरूपेणाद्भुतमहीतृणावाततम् ॥ प्रवेशयित्वा स्वगृहं गृहीत्वा दक्षिणे करे ॥ ५७ ॥ तां पुरीं द
र्शयामास दिव्यनारीनरैर्युताम् ॥ तस्यां निविष्टमात्मानं वरसिंहासने नृप ॥ ५८ ॥ पार्श्वस्थशंखचक्रासिगदागरु
डशोभितम् ॥ दर्शयामास विप्राय पूर्वोक्तं विश्वरूपिणम् ॥ ५९ ॥ विस्मितिमे दृश्यानंतमनन्तं परमेश्वरम् ॥ तं दृष्ट्वा तु द्वि
जोनंतमुवाच परयामुदा ॥ ६० ॥ पापोहं पापकर्माहं पापात्मा पापसंभवः ॥ त्राहि मां पुंडरीकाक्ष सर्वपापहरो भव ॥
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ वृतह्न स्नोहृवः कल्किकागोः पुष्करिणीस्वयम् ॥ ६२ ॥ गर्दभं कुंजरं चैव देवमेव पु
रितत्वतः ॥ अनंत उवाच ॥ यत कृष्णोहि विप्रोसौ विद्यामत्तो वेदगार्विनः ॥ ६३ ॥ विद्यादानंतोपकुर्वंति व्यसलत्कृतां गतः
सा गौर्वसुन्धरा हृष्ट्वा निष्फला यातनयोक्षिता ॥ ६४ ॥ सहर्षो वृषभो दृष्टो लाभार्थं यस्त्वया हृतः ॥ धर्माधर्मव्यवस्थाने त
त्रपुष्करिणी स्वयम् ॥ ६५ ॥ खरः क्रोधस्तथा दृष्टः कुंजरो धर्मदूषकः ॥ ग्राहलोभावनंतोहं गृहासंसारगह्वरे ॥ ६६ ॥ इत्यनं
तेमया सर्वं विप्रगच्छ पुनर्गृहम् ॥ चरानंतव्रतं तत्वं तच्च वर्षाणि पंचच ॥ ६७ ॥ ततस्तुष्टः प्रदास्यामि नक्षत्रस्थानमुत्त
मम् ॥ भुक्त्वा च विपुलान्भोगान्स्वर्गान्कामान्यथेप्सितान् ॥ ६८ ॥ पुत्रपौत्रैः परिवृतस्ततो मोक्षमवाप्स्यसि ॥ इति दत्वा
वरो देवस्तत्रैवांतरधीयत ॥ ६९ ॥ कौंडिन्योप्यागतो गेहे चचारानंतसद्व्रतम् ॥ शीलया सह धर्मात्मा भुक्त्वा भोगा

॥ रामः ॥
॥ १५२ ॥

152

न्मनोरमान ॥७०॥ अंतेजगामवस्वर्गेनक्षत्रंवपुनर्वसुम ॥ कल्पस्थायीवसंभूतोप्यनेयापिसज्वलन ॥७१
अनंतव्रतधर्मेणसम्यकचीर्णेनकौरव ॥ एतत्तेकथितंपार्थव्रतानामुत्तमंव्रतम ॥७२॥ यत्कृत्वासर्वपापेभ्यो
मुच्यतेनात्रसंशयः ॥७३॥ येचशृण्वंतिसततंतास्मानेनरोत्तम । तेसर्वेपापनिर्मुक्तायांतिपरमांगतिम ॥
७४॥ संसारसागरगुहासुसुखंविहर्तुंवांछंतियेकुरुकुलोद्भवशुद्धसत्वाः ॥ संपूज्यतेत्रिभुवनेशमनंतदेवंबध्नंति
दक्षिणकरेवरदोरकंते ॥७५ ॥इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेअनंतचतु
र्दशीव्रतंनामचतुर्नवतितमोऽध्यायः ॥९४॥ ॥युधिष्ठिरउवाच ॥ लोकेप्रसिद्धाःश्रूयंतेश्रवणोनामदेवताः
एताःकाःकिंचकुर्वंतिधर्मंचासांब्रवीहिमे ॥१॥ ॥श्रीकृष्णउवाच ॥ विद्यंतेदेवताःपुण्याःश्रवणोनामपांडवः
ब्रह्मणाप्रथमंसृष्टानियोगेचजनेकृतम ॥२॥ योयंवदतिलोकेस्मिन्शुभंवाप्यथवाशुभम ॥ श्रावयंतिहितंस्त्री
पुंबालगणाःकर्मगोचरम ॥३॥ जानात्यत्रिलोकेपृथ्वानुनियमेनप्रजायते ॥ दूराच्छ्रवणविज्ञानंदूरादर्शनगोचर
म ॥४॥ तासामतीहसामर्थ्यंनिरविंन्यानकैहेतुभिः ॥ नरैस्तुषैश्चवयस्तोर्कैःकार्याकार्यस्यकारणात ॥५॥ तेभ्यएव
नियतःपार्थनैकाश्रावणिकामता ॥ यथादेवायथादैत्यायथाविद्याधरानराः ॥६॥ यथाहिसिद्धगंधर्वानागाः

किंपुरुषाः खगाः ॥ राक्षसाश्च पिशाचाश्च देवा नासत्ययोनयः ॥ ७ ॥ तथैताः भुजङ्गनामानो वंशाः श्रावणिकाः स्मृताः
ताः समृद्धिश्च कर्तव्यं व्रतं नारीनरैरिह ॥ ८ ॥ किं तु नाम्नां महोग्रं तु व्रतं संयमनं तदा ॥ आघ्राय धूपं पक्वान्नं जलं चागंधमे
वच ॥ ९ ॥ दातव्यं तु नरश्रेष्ठ सा नारीणां भोज्यपारणा ॥ अदत्त्वा यदि मत्स्यः स्याद् नरालेपि पाण्डव ॥ १० ॥ ततलग्नत्रैदैर्घ्यस्ला
लग्नास्तु परिकारम् ॥ तस्य निलेर्मृत्यौ रौद्रे भिर्यंतेनीव दुःखिता ॥ ११ ॥ श्रूयते हि पुरा पार्थ पृथिव्यां नहुषो नृपः ॥ त
स्य भार्या महादेवी जयश्री नाम भारत ॥ १२ ॥ प्रत्यक्षरूपसंपन्ना दर्शनीयतराशुभा ॥ पीवरोरुस्तना श्यामा मृदुकुंचित
मूर्द्धजा ॥ १३ ॥ शातकुंभसंभाषा मत्तमातंगगामिनी ॥ यथारूपा तथाशीला सतीवेशा महीतले ॥ १४ ॥ एकदा विसृता
स्नातुं गंगायां स्नानमेकृतेः ॥ वसिष्ठस्य ददर्शाथ सती भार्यामरुंधतीम् ॥ १५ ॥ भोजयंतिं मुनीनां तु पत्नी नानाल्पभो
जनैः ॥ तथा वसिष्ठपत्नीं च पृष्ट्वा देवी महासती ॥ १६ ॥ प्रत्यूषं भगवति ब्रूहि किमेतद् व्रतमुत्तमे ॥ अरुंधत्यब्रवीत् ॥ जयश्रि
ये श्रूयतां त्वं नाम्ना श्रावणिका व्रतम् ॥ १७ ॥ स्नात्वा समाख्यातं वसिष्ठेन महर्षिणा ॥ गृहं त्वं पार्थिवसर्वस्वं प्रपतितं वत
कं भुभम् ॥ १८ ॥ गच्छ त्वा निष्टवाराशि तवातिथ्यं करोम्यहम् ॥ एवमुक्ता जयश्रीस्तु भोज्ये तस्मिन्स्तदद्भुता ॥ १९ ॥ ततभु
जे साधितं चैव अरुंधत्या कृतादरात् ॥ भुक्त्वा च स्वजगाम स्वं भवनं परमेश्वरम् ॥ २० ॥ कालेन विस्मृतं तस्याश्च तद्व्रतं त

253

स्यभोजनं ॥ ननलक्षसमं येपूर्णां म्रियमाणो महासती ॥ २१ ॥ जयश्रीर्घर्घरां गां तु कुर्वाणा कंठगजद्धम् ॥ येनं तालाविलाधक्का
रुणिरंती मृदुमृदुः ॥ २२ ॥ स्थिता पंचदशाहानि नी मत्वा दारुणानना ॥ ततः षोडशमे प्राप्ते दिने स्वयमहं धृती ॥ २३ ॥ प्रति
ष्ठाभ्यंतरं पूर्णं तोरणं श्री मन लोकाव ॥ नम्रूबाय समावद्योपदुर्कंभ्रवणी ब्रुते ॥ २४ ॥ न क्षुत्वा न क्षुधो राजा द्रुतं भोज्यं प्र
चक्रमे ॥ यथोक्तं तदहं धन्या पवृया वदमीक्षितनम ॥ २५ ॥ दत्वा चकारकान्यष्टौ नामृद्धिरयजय श्रियम् ॥ भगोज्जगाम
पंचत्वं करकाणां प्रदानतः ॥ २६ ॥ जगाम शक्रलोकं सा विमानेनार्कवर्चसा ॥ दोधूयमाना चमरैः स्तूयमाना सुरासुरैः
२७ ॥ युधिष्ठिर उवाच ॥ मार्गशीर्षादिमासेषु द्वादश्यामपि पांडव ॥ उपवासस्त्रिभक्तिश्च दानकाले प्रशस्यते ॥ २८ ॥ भु
क्त्वा यत्नेन तु दश्याम सध्यां वा युधिष्ठिर ॥ ब्रुती स्नात्वा नृपश्रेष्ठे नद्यादो विमले जले ॥ २९ ॥ आमंत्रयेद्द्वौ केकानार्णो
रीस्वरूपिणी ॥ सदाचाराः सर्वे षाश्च ब्राह्मणो वा स्वगोत्रजाः ॥ ३० ॥ द्वादश ब्राह्मणांस्तत्र वेदवेदांगपारगान् ॥ मंत्रज्ञा
नितिहासज्ञान्नुपशांतान् जितेंद्रियान् ॥ ३१ ॥ सर्वेदयादिधानेन पादप्रक्षालनपर्वकम् ॥ चंदनेन सुगंधेन पुष्पधूप
दिना तथा ॥ ३२ ॥ ग्रीवासूत्रकर्णसिंदूरकंकमेन च भूषयेत ॥ नानामयेप्रदातव्या वर्द्धन्यो द्वादशैव तु ॥ ३३ ॥ सच्छिद्रा
जलपूर्णा कृसृव्रताः सूत्रवेष्टिताः ॥ सोहालकादिभिश्छिन्नाः पुष्पमालाविभूषिताः ॥ ३४ ॥ चंदनेन समालब्धाः स

हिरण्याः पृथक्पृथक् ॥ तन्मध्ये वर्द्धनीं चैकां स्वके शीर्षे निवेशयेत् ॥ ३५ ॥ स्थित्वा मण्डलके मध्ये यजमानः स्वयं तदा ॥
यद्वाल्ये यच्च कौमारे वार्द्धके वापि यत्कृतम् ॥ ३६ ॥ तत्सर्वं नाशमायातु पितृदेवर्षिणां नृणाम् ॥ इमामे समयं त्वर्णांता
रयस्व महार्णवात् ॥ ३७ ॥ अथाहं गन्तुमिच्छामि विष्णोः पदमनुत्तमम् ॥ एवमास्ति तिना धृत्वुः स्त्रियः सर्वा युधि
ष्ठिर ॥ ३८ ॥ ततो ब्राह्मणमाहूय यजमान इदं वदेत् ॥ ब्रूहि ब्राह्मण यत्नेन मयं येन क्षयं व्रजेत् ॥ ३९ ॥ उत्तीर्णश्चाव
णां मासं समुत्तारय सांप्रतम् ॥ उत्तारयीत मन्त्रेण ब्राह्मणो वर्द्धनीं च ताम् ॥ ४० ॥ उपोष्य शिरसो देव्याः समुत्तीर्य
स्रहहुमान् ॥ कटुकं निंवहं संयात ततो मधुकमास्रह ॥ ४१ ॥ ततो गच्छ महादेवं भवतो भवतो नमो ॥ वर्द्धनिकोत्तारण
मंत्रः ॥ एवं ता ॥ समयं प्रोक्ता दत्ता शीर्षं वस्तानि च ॥ ४२ ॥ तां वर्द्धनिकामेकान्ते विप्राय प्रतिपादयेत् ॥ गृहीत्वा करका
न्नार्घ्यो व्रजेयुः स्वेगृहे स्वकम् ॥ ४३ ॥ यजमानोऽपि विप्रानास्तुयथेष्टं कामसमाचरेत् ॥ एवमाचरते पार्थ श्रावणीव्रतमा
दरात् ॥ ४४ ॥ तस्य काले तु संप्राप्ते स्वर्गं मृत्युः प्रजायते ॥ निर्व्याधिर्नीरुजो भोगी स्थित्वा स्थित्वा चिरं सुखम् ॥ ४५ ॥
पुत्रपौत्रसमस्तादीन्भुक्त्वा कामान्यथेप्सितानि च ॥ रुद्रलोकमवाप्नोति सोमलोकं समागच्छति ॥ ४६ ॥ स्त्रीणां तु लसं सहीनोऽपि
उतीव्रतफलं भवेत् ॥ गौरीभोज्येषु दत्तेषु एकादशस्तु यत्फलम् ॥ ४७ ॥ तदेवैकं नापि लभते पार्थ श्रावणिकाव्रते ॥

भक्त्या गच्छंति ते लोकान्विहृत्य सुखमादरात् ॥ ५८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर
संवादे श्रवणिकाव्रतं नाम पंचनवतितमोऽध्यायः ॥ ९५ ॥ ॥ श्रीकृष्ण उवाच ॥ अथ नक्तोपवासस्य विधानं शृ
णु पांडव ॥ येन विज्ञातमात्रेण नरो मोक्षमवाप्नुयात् ॥ १ ॥ येषु केषु च मासेषु शुक्लपक्षे चतुर्दशी ॥ ब्राह्मणां
भोजयित्वा तु प्रारभेत् ततो व्रतम् ॥ २ ॥ मासि मासि भवंति स्म वर्षमध्ये चतुर्दशी ॥ शिवार्चनरतो भूत्वा शिव
ध्यानैकमानसः ॥ ३ ॥ वसुधाभाजने कृत्वा भुंजीयान्नक्तभोजनम् ॥ उपवासात्परं भैक्ष्यं भैक्ष्यात्परमयाचित
म् ॥ ४ ॥ अयाचितात्परं नक्तं तस्मान्नक्तेन भोजयेत् ॥ देवैश्च भुक्तं पूर्वाह्णे मध्याह्ने मुनिभिस्तथा ॥ ५ ॥ अपराह्णे च पि
तृभिः संध्यायां गुह्यकादिभि ॥ सर्वलोकानतिक्रम्य नक्तभोजी सदा भवेत् ॥ ६ ॥ हविष्यभोजनं स्नानं सत्यमाहा
रलाघवम् ॥ अग्निकार्यमधःशय्यां नक्तभोजी सदा भवेत् ॥ ७ ॥ एवं संवत्सरस्यांते व्रतं पूर्णस्य सर्पिषः ॥ पूर्ण
कुंभोपरि स्थाप्य पूजयेच्च सुशोभने ॥ ८ ॥ कपिलापंचगव्येन स्नापयेन्मन्मथं शिवम् ॥ फलं पुष्पं यवक्षीरं द
धिदर्भांकुरांस्तथा ॥ ९ ॥ नक्तं भांश्च तलोन्मिश्रमर्घमष्टांगमुच्यते ॥ शिरसा धारयित्वा तु जानू कृत्वा महीतले
१० ॥ महादेवाय दातव्यं गंधपुष्पं यथाक्रमम् ॥ अस्योदनैर्वलिं कृत्वा प्रणम्य परमेश्वरीम् ॥ ११ ॥ धेनुं वा दक्षिणां द

प्राहुर्वंतापि धुरंधरम्॥ श्रोत्रियाय दरिद्राय कल्पवृक्षं निवेदयेत्॥१२॥ यो ददाति शिवे भक्त्या तस्य पुण्यफलं भराः विमानमर्कप्रतिमं हंसयुक्तमलंकृतम्॥१३॥ आरूढो ऽप्सरसां गीतैर्याति रुद्रालये सुखम्॥ स्थित्वा रुद्रस्य भवने वर्षकोटिशतत्रयम्॥१४॥ इह लोके नृपश्रेष्ठ ग्रामलक्षेश्वरो भवेत्॥१५॥ यश्चाष्टमी भुवशिवागसु चतुर्दशीषु नक्तं समाचरति शास्त्रविधानदृष्टम्॥ स्वर्गांगनाकलरवाकुलितं विमानमारुह्य याति सह तेन सुरेशलोकम्॥१६॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे ष्टमावतीनमोऽध्यायः॥ २६॥ ॥

श्रीकृष्ण उवाच॥ शृणुष्वावहितो राजन्नस्ये माहेश्वरं व्रतम्॥ त्रिषु लोकेषु विख्यातं नाम्ना शिवचतुर्दशी॥१॥ मार्गशीर्षत्रयोदश्यां सितायामेकभक्तनर॥ मासेष्वन्येषु वा राजन्मार्थरुवं न कारयेत्॥२॥ चतुर्दश्यां निराहारः समभ्यर्च्य महेश्वरम्॥ सौवर्णं वृषभं दत्त्वा वक्ष्यामि च परेऽहनि॥३॥ एवं नियमकृत्स्नात्वा प्रातरुत्थाय मानवः॥ कृतस्नानजपः पश्चादुमया सहशंकरम्॥४॥ पूजयेत्कुसुमैः शुभ्रैर्गंधधूपानुलेपनैः॥ पादौ नमः शिवायेति शिरः सर्वात्मने नमः॥५॥ ललाटं तु त्रिनेत्राय नेत्राणि हरये नमः॥ मुखमिंदुमुखायेति तथेशानाय वोदरम्॥६॥ पार्श्वौ चानंतधर्माय ज्ञानरूपाय वै कटिम्॥ ऊरू चानन्तवैराग्यजानुनी चार्चयेद्बुधः॥७

प्रधानाय नमो जंघे गुल्फौ व्योमात्मने नमः ॥ ओम व्योमात्मरूपाय पदद्व समभ्यर्चयेन्नमः ॥ ८ ॥ नमः सृष्ट्यै नमस्तु
ष्ट्यै पार्वतीं चापि पूजयेत ॥ ततस्त्वृषभं हैमस्तु रक्तं भससमन्वितम् ॥ ९ ॥ स्रक्माल्यांबरछत्रं पंचरत्नविभूषितं
भक्ष्यैर्नानाविधैर्युक्तं ब्राह्मणाय निवेदयेत ॥ १० ॥ प्रीयतां देवदेवोऽत्र सद्योजातः पिनाकधृक ॥ एवं दत्त्वा च संप्रा
श्य पस्वपेद्भूमावुदङ्मुखः ॥ ११ ॥ पंचदश्यां ततः प्रातः सर्वमेतत्समाचरेत तर्पयित्वा ततोऽन्नेन ब्राह्मणांश्च भक्तितः
भुमात ॥ १२ ॥ सुहृत्स्वदातिसहितः पश्चाद्भुंजीत वाग्यतः ॥ ततः कृष्णचतुर्दश्यामेतत्सर्वं समाचरेत ॥ १३ ॥ चतुर्द
शीषु सर्वासु कुर्यात्संवत्सरं व्रतम् ॥ ये च मासविशेषाः स्युस्तान्निबोध क्रमादिह ॥ १४ ॥ मार्गशीर्षादि मासेषु स्वप
न्नेतानुदीरयेत ॥ शंकराय नमस्तुभ्यं नमस्ते करवीरक ॥ १५ ॥ त्र्यंबकाय नमस्तुभ्यं महेश्वरमतः परम् ॥ नमस्तेऽ
स्तु महादेव स्थाणवे च ततः परम् ॥ १६ ॥ नमः पशुपते नाथ नमस्ते शंभवे नमः ॥ नमस्ते परमानंद नमः सोमा
र्द्धधारिणे ॥ १७ ॥ नमो भीमाय चोग्राय त्वामहं शरणं गतः ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥ १८ ॥
पंचगव्यं तथा बिल्वं यवागूः क्षीरवारिजम् ॥ तिलांश्च कृष्णान्विधिवत्प्राशयेत्समुदाहृतम् ॥ १९ ॥ प्रतिमासं चतु
र्दश्यामेकैकं प्राशनं स्मृतम् ॥ मंदारैर्मालतीभिश्च तथा धत्तूरकैरपि ॥ २० ॥ सिंदुवारैरशोकैश्च मल्लिकाकुब्ज

॥ भविष्य ॥
॥ १५६ ॥

माल्यानुलेपनैः २

पाटलैः ॥ अर्कपुष्पैः कदंबैश्च शतपत्रैस्तथोत्पलैः ॥ २१ ॥ करवीरैश्च राजेंद्र तथा पूज्यो महेश्वरः ॥ एकैकेन चतुर्दश्यण
मर्चयेत्पार्वतीपतिम् ॥ २२ ॥ पुनश्च कार्त्तिके मासि संप्राप्ते तर्पयेद्विजोतान् ॥ अलंकृत्वा नाविधैर्भक्ष्यैर्वस्त्रैर्माल्यवि
भूषणैः ॥ २३ ॥ कृत्वा नीलं वृषोत्सर्गं श्रुत्युक्तविधिना नरः ॥ उमामहेश्वरं हैमं वृषभं च गवा सह ॥ २४ ॥ मुक्ताफला
ष्टकयुक्तं सितनेत्रपटावृतम् ॥ सर्वोपस्करयुक्तायां शय्यायां विनिवेदयेत ॥ २५ ॥ उदकुंभयुतं तद्वच्छालितंडुलसं
युतम् ॥ स्थाप्य विप्राय दत्तां तां पठेद्व्रतपरायण ॥ २६ ॥ ज्येष्ठसामविदे देयं न च कुर्वंति नेकवित् ॥ अव्यंगगाय सौ
म्याय सदा कल्याणकारिणे ॥ २७ ॥ सपत्नीकाय संपूज्य माल्यवस्त्रविभूषणैः ॥ न वित्तशाठ्यं कुर्वीत कुर्याच्चो भास
तन्मयः ॥ २८ ॥ अनेन विधिना यस्तु कुर्याच्छिवचतुर्दशीम् ॥ सोऽश्वमेधसहस्रस्य फलं प्राप्नोति मानवः ॥ २९ ॥ ब्रह्म
हत्यादिकं पापं यद्वामुत्र वा कृतम् ॥ पितृभिर्मातृभिर्वापि तत्सर्वं नाशमाप्नुयात् ॥ ३० ॥ दीर्घायुरारोग्यकुलाभि
वृद्धिरत्राक्षया त्यत्र चतुर्भुजत्वम् ॥ गणाधिपत्वं दिविकल्पकोटी स्वर्गे वसित्वा पदमेति शांभोः ॥ ३१ ॥ न बृहस्पतिर
प्येतन्नरस्य फलमिंद्रोऽपि नामहोऽपि वक्तुम् ॥ न च सिद्धगणोऽप्यलं न वाहं यदि जिह्वायुतकोऽप्यति वक्त्रे ॥ ३२ ॥
भवत्यमरवत्समः पठति यः स्मरेतास्सदा भक्तोस्तापि विमत्सरः ॥ सकलपापनिर्मोचनम् ॥ इमां शिवचतुर्दशीमसमराकृ

॥ रामः ॥
॥ १५६ ॥

156

मित्रीकोदयः स्तुवंति दिविनंदिताः किमुत समावरेयः सदा ॥ ३३ ॥ या पार्थ नारी कुरुते तिममत्ता भर्त्तारमापद्वा
भुभंगुरुह्वा ॥ सापि प्रसादात्परमेश्वरस्य परंपदं याति पिनाकपाने ॥ ३४ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरप
र्वणि श्रीकृष्णयुधिष्ठिरसंवादे शिवचतुर्द्दशीव्रतं नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥ ॥ श्रीकृष्ण उवाच ॥ ॥
तथा सर्वफलत्यागमाहात्म्यं शृणु भारत ॥ यदक्षयं परे लोके सर्वकामफलप्रदम् ॥ १ ॥ मार्गशीर्षे शुभे मासि चत
र्द्दश्यां धृतव्रतः ॥ स्नात्वारंभे मकृष्णपक्षस्य कृत्वा ब्राह्मणवाचनम् ॥ २ ॥ अन्येष्वपि तु मासेषु अष्टम्यां नरसत्तम ॥ स
दक्षिणं पायसेन शक्तितः पूजयेद्द्विजान् ॥ ३ ॥ अष्टादशानां धान्यानामन्यत्र फलमूलकम् वर्जयेदब्दमेकं तु
विधिनौषधकारकम् ॥ ४ ॥ ततः संवत्सरस्यान्ते चतुर्द्दश्यष्टमीषु च ॥ महाकृष्णव्रतं कर्तुं सहसैव प्रमुच्यते ॥ ५ ॥
सौवर्णं कारयेद्रुद्रं धर्मराजं तथैव च ॥ कूष्माण्डं मातुलुंगं च वृन्ताकं पनसं तथा ॥ ६ ॥ आम्रामातकपित्थं च कलिंग
मेर्वारुकम् ॥ श्रीफलं सवटाश्वत्थं जंबीरं कदलीफलम् ॥ ७ ॥ बदरं दाडिमं शक्त्या कार्याण्येतानि षोडश ॥ मूल
कामलकं जंबू पुष्करं करमर्द्दकम् ॥ ८ ॥ उदुंबरं नालिकेरं द्राक्षा च बृहतीद्वयम् ॥ कंकालीकाकतुंडीरकरीरकुटजं
शमी ॥ २ ॥ रौप्याणि कारयेत्तन्याफलानीमानि षोडश ॥ ताम्रं नालफलं कुर्याद्दिगात्मफलमेव वा ॥ १० ॥ पिंडीरकं च व

जीरं तथा मूरणाकंदकम् । पनसं लकुचं चैव कर्कटं तिंतिडिं तथा ॥ ११ ॥ चिञ्चावल्लीफलं तद्वत् शाल्मलिकाफल
म् ॥ मधुकं कारवेल्लं च वल्लीं गुंदपटोलकम् ॥ १२ ॥ कारयेद्भक्तितो धीमान्फलान्येतानि षोडश ॥ उदकुंभद्वयं कुर्या
त्तान्योपरि सवाससम् ॥ १३ ॥ पक्वपात्रद्वयोपेतं यमरूद्रसमन्वितम् ॥ धेन्वा सहैव शांताय विप्रायाथ कुटुंबिने
१४ ॥ सपत्नीकाय संपूज्य पुराणे हि निवेदयेत् ॥ यथा फलेषु सर्वेषु वसंत्यमरकोटयः ॥ १५ ॥ तथा सर्वफलत्यागा
च्छिवे भक्तिः सदास्तु मे ॥ यथा शिवस्य धर्मस्य सदानंतफलप्रदौ ॥ १६ ॥ तथैकफलदानेन तौ स्यातां मे वरप्रदौ ॥ य
था फलानां कामस्य शिवभक्तस्य सर्वदा ॥ १७ ॥ यथानंतफलावाप्तिरस्तु जन्मानि जन्मानि ॥ यथा भेदं न पश्यामि शि
वविष्ण्वर्कपद्मजाम् ॥ १८ ॥ तथा ममास्तु विश्वात्मा शंकरः शंकरः सदा इत्युच्चार्य च तत्सर्वमलंकृत्य विमत्सरः ॥
१९ ॥ शक्तश्चेद्रूप्यतं दद्यात्सर्वोपस्करसंयुतम् अशक्तस्तु फलान्येव यथोक्तानि विधानतः ॥ २० ॥ तथोदकुंभसहि
तौ शिवधर्मौ च कांचनौ ॥ विप्राय दत्वा भुंजीत तैलक्षारविवर्जितम् ॥ २१ ॥ अन्नान्यपि यथाशक्त्या भोजयेद्द्विजपुंग
वान् ॥ न शक्नोति विहातुं चेत्सर्वाण्यपि फलान्यतः ॥ २२ ॥ एकमेव परित्यज्य तदेव प्रतिपादयेत् ॥ एतत्त्यागव्रतानां तु
गवे चैतच्च योगिनाम् ॥ २३ ॥ शांते सर्वफलत्यागं व्रतं वेदविदो विदुः ॥ नारीभिश्च यथाशक्त्या कर्तव्यं राजसत्तमः ॥ २४

157

तेनतस्मादपरंकिंचिदिहलोकेपरत्रच॥ व्रतमस्तिमनुतिष्ठेष्ठयद्दत्वंनस्फलप्रदम॥२५॥ सौवर्णरौप्यताम्रेषुयावंतः
परमाणवः॥ भवंतिवर्षमानोगोषुफलेषुनृपसत्तम॥२६॥ तावद्युगसहस्राणिरुद्रलोकेमहीयते॥२७॥ स्नातस्म
स्तकलुषापहरंजनानामाजीवनायमनुजेश्वरसर्वदास्यात॥ जन्मान्तरेष्वपितपुत्रकलत्रदुःखमाप्नोतिधामसपु
रंदरस्यवजुष्टम्॥२८॥ योवाप्यशक्तोनिपुरुषोत्यधनोनरोवायोब्राह्मणान्भवनेषुचधार्मिकाणाम॥ पापैर्विमुक्त
श्चपरत्रपुरंमुरारेरानंदकृत्परमुपैतिनरेन्द्रसोपि॥२९॥ इतिश्रीभविष्योत्तरमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधि
ष्ठिरसंवादेकलत्यागचतुर्दशीव्रतवर्णनंनामाष्टनवतितमोऽध्यायः॥९८॥ ॥ श्रीकृष्णउवाच॥ पूर्णमासी
महाराजत्सोमस्यदयितातिथिः॥ पूर्णमासोभवेद्यस्यांपौर्णमासीतलक्ष्यता॥१॥ पौर्णमास्यांचसंजातःसंग्रामो
जयलक्षणः॥ सोमस्यारिवधैःसार्द्धंसर्वसत्वभयंकरम॥२॥ तारायांचंऽस्माःसकृतस्याभर्ताबृहस्पतिः॥ तयोरभून्म
हायुद्धंभार्याकृतेपुरा॥३॥ युधिष्ठिरउवाच॥ ताराकस्यसुताकस्मात्सकृष्णःसमुराहिता॥ सोमेनसहसंग्रामंच
क्रेचक्रगदाधर॥४॥ श्रीकृष्णउवाच॥ प्रजापतेरभूत्कन्याताराबृत्रेस्वगानुजा॥ तांबृहस्पतयेप्रादात्स्वयंथिआमेरुसं
दीमत्॥५॥ देवाचार्यायसाभार्यात्वनिर्देश्यातथाविधा॥ रूपेणाप्यांरूपवतीसानिधर्यवजवस्थिता॥६॥ बृहस्पतिंप

र्यं चरं यथा चान्याः स्त्रियः क्वचित ॥ तां ददर्शायतापांगीं नवांगीं चारुहासिनीम् ॥ ७ ॥ श्रीतां पूर्द्दर्शानां देवकामस्य वश
मीयिवान् ॥ सा च भावैवमधुरं तारे स्नेहेहिमाचिरम् ॥ ८ ॥ इंगिताकारकुशला तारा सा मे स्य वे ष्टितम् ॥ उवाच बुद्धिमथो
तन्वी प्राहेदं मधुराक्षरम् ॥ ९ ॥ मुने रंगिरसः पुत्रस्त्वं च सोमोऽसि सोमराट् ॥ अंगिरसो मुनेर्वीरस्तु बाहुश्चित्तं नतं ते १०
स्तु ह सोमवेन यो योगात्तव सिद्धोऽद्भुतो महान् ॥ अंगिरा त्वां किल पुरा लसत्पुरन्दराग्रसे ॥ ११ ॥ राजन्त्वेष्याथ पयामास
नैतत्स्मरसि किं विधो ॥ कथमद्य निद्रानाथ ह्युतं गेनासि वीडितः ॥ १२ ॥ तस्मात्कुरु वीमि सिञं ते रोचये यदि ते कुरु
परवत्यास्मि मदं नेन गम्यास्मि बुधोत्तम ॥ १३ ॥ एवमुक्तस्तया चासौ न चैवं कृतवान्सतः ॥ गृहीत्वा कर्षयामास
सोमोऽनंगवशीकृतः ॥ १४ ॥ बृहस्पतिस्तु तां ज्ञात्वा सत्तं सोमसमागईयन् ॥ शेषयिष्याति मे भार्या त्वयमेव ममांति
कम् ॥ १५ ॥ सर्वं विरेणाविज्ञाय बृहस्पतिरुदारधीः ॥ तां लसां दृष्ट्वा भार्यां रोषात्प्रस्फुरिताधरः ॥ १६ ॥ सा च सौ
म्यं वपिं दाय सोमस्येदं विचेष्टितम् ॥ इदः समाहूयामास देवान्मिगणांस्तथा ॥ १७ ॥ तत्सो मोगरायामास तन्
तोऽपि ध्यन देवराट् ॥ आकार्य विद्यासर्वान्ना च सौर्चं विचेष्टितम् ॥ १८ ॥ तच्छुत्वा देवगंधर्वाः क्रोधान्धाः क्षुब्ध
मानसाः ॥ प्रगृहीतप्रहरणा रथान्नारुरुहुः स्वकान् ॥ १९ ॥ सोमोऽपि दैत्यान्संयोधा ज्ञात्वा संकृतनिश्चयान् ॥ दै

158

विमलंचक्रम् ५

त्वदानवरक्षांसि समानीय व्यवस्थितः ॥ २० ॥ आरुह्य च रथश्रेष्ठं युद्धायैव मनो दधे ॥ प्रवृत्तं सुमहद्युद्धं शारतो
मरकंपनैः ॥ २१ ॥ कौणपैः क्ष्मासुरैः शूलैर्देवदानवदारुणम् ॥ स तेषां सुमहद्युद्धं दत्वा तारागणाधिपः ॥ २२ ॥ बभं
ज देवान्सेन्द्रांश्च हिमवृष्ट्या क्षपाकरः ॥ सजित्वा देवगंधर्वान्सोमो राजन्यसनम ॥ २३ ॥ श्रिया परमया युक्तो यथा ना
न्यो हविर्भुजाम् ॥ देवाश्च निर्जितास्तेन सोमेनामिततेजसा ॥ २४ ॥ आजग्मुः शरणं देवं शरण्यं स्वर्गवासिनाम्
इन्द्रः सर्वसमाचख्यौ सोमस्य दुर्विचेष्टितम् ॥ २५ ॥ श्रुत्वा क्रुद्धो हृषीकेशः आरुह्य गरुडं तथा ॥ गृहीत्वा चायुधश्रेष्ठं
युद्धायैव मनो दधे ॥ २६ ॥ युकर्तुं सुमहद्युद्धं चक्रशार्ङ्गगदाधरः ॥ जगाम विबुधैः सार्धं सोमस्योपरि रोषितः ॥ २७ ॥
विष्णुं विदित्वा संप्राप्तं सोमो दैत्यगणैः सह ॥ युद्धाय समरामर्षी स्थितः प्रध्माप्य वारिजम् ॥ २८ ॥ सरित्वा देव
संघातं सेंद्रं चांयुपुरस्सरम् ॥ विष्णुना सह संयुक्तः शास्त्रास्त्रैरस्त्रभोजनैः ॥ २९ ॥ यदा नासावुपरमेद्युद्धाय सह वि
ष्णुना ॥ तदाऽऽददे हृषाविष्णुश्चक्रं क्रोधसमन्वितः ॥ ३० ॥ अथाह ब्रह्मा देवेशमजितं विष्णुमव्ययम् ॥ योः सौमे च
पयुष्मांगं यत्वां वक्ष्मि निबोध तत् ॥ ३१ ॥ नास्ति वध्यं त्रिभुवने च कस्याप्यत्र वानघ ॥ सोमो द्विजाधिपत्ये च मया
समभिषेचितः ॥ ३२ ॥ तस्माद्युध्यते देवकार्येऽस्मिंस्तद्विधीयताम् ॥ अथाह भगवान्विष्णुः सुरब्रह्मर्षिसंनिधौ

विष्णुंचाभिप्रदुद्रुवे ५

प्रध्मातवारिजः ५

३३॥ सिनीवालीकुहूनाम तस्यां नष्टः क्षपाकरः॥ विनष्टोऽपि पुनर्जन्म प्राप्स्यतीति न संशयः॥ ३४॥ एकां चानुम
तीं प्राप्य वृद्धिरस्य भविष्यति॥ आप्यायितश्च सूक्तकैः पितृपिण्डैः समंत्रकैः॥ ३५॥ ब्राह्मणैर्हव्यकव्यानि देवेभ्यः प्रा
पिष्यति॥ वृद्धिः क्षयो न चैवास्य न च जातस्य भूयसी॥ ३६॥ एकमेव विधिर्दृष्टस्तस्याप्यायनमेव मे। अमोघस्य तमोघ
नं भविष्यति कदाचन॥ ३७॥ शप्तश्च सोमो दक्षेण स चावरूपं भविष्यति॥ सुदर्शनस्य च प्रीतिरेवमेव भविष्यति॥ ३८॥
एवमस्त्विति देवेशा यड्वान्त्वुर्वीथिवै॥ ब्रह्मा प्रोवाच सोमं तु विनीतवदुपस्थितम्॥ ३९॥ अर्पयस्व गुरोर्भार्यां न
कार्यं पुनरीदृशम्॥ स तथोक्तः समानीय ददौ तारां बृहस्पतेः॥ ४०॥ पुनरन्वेषाशीस्ववं भराव तां त्रिदिवौकसाम्
अस्यां गर्भो मदीयोऽयं यदपत्यं ममैव तत्॥ ४१॥ बृहस्पतिरथोवाच मयि गर्भः समाहितः॥ क्षेत्रे मदीये चोत्पन्नस्त
स्मात्तु मम पुत्रकः॥ ४२॥ उक्तं च वेदशास्त्रज्ञैरृषिभिर्धर्मदर्शिभिः॥ उप्तं वा नाहृतं बीजं यस्य क्षेत्रे प्ररोहति॥ ४३॥
क्षेत्रिणस्तस्य तद्बीजं न बीजी फलभाग्भवेत्॥ सम्यगुक्तं न भवता शशांकः प्राह तत्त्ववित्॥ ४४॥ माता भस्त्रा पितुः
पुत्रो येन जातः स एव सः॥ इति पौराणिकाः प्राहुर्मुनयो नयचक्षुषः॥ ४५॥ विवदन्तौ निवार्याथ ब्रह्मा प्रोवाच तां
वधूम्॥ तानैरे कांतमानीय गर्भोऽयं कस्य शंस मे॥ ४६॥ एवमुक्तवती तारा ह्रिया नोवाच किंचन॥ उक्ता सर्जक्ष

159

णान्धर्मभामासितक्षणालयम् ॥ ४७ ॥ तमुवाच ततो ब्रह्मा पुत्रकस्य कुतो भवान् ॥ सोमस्याहं सुतो ब्रह्मन्निति तत्
थ्यं मयोदितम् ॥ ४८ ॥ बुधोऽयं विबुधाः प्राज्ञः सर्वज्ञानविदांवरः ॥ गृहीत्वा पुत्रकं सोमो जगाम स्वं निवेशनम् ॥ ४९
गुरुर्गृहीत्वा स्वां भार्यां जगाम भवनं स्वानै ॥ सोमोऽपि तनयं लब्ध्वा हर्षमाकुलमानसः ॥ ५० ॥ पौर्णमासीसमाख्या
ताप्राप्तपूर्णमनोरथा ॥ प्राप्तः पुत्रो मयाद्यस्यां तस्माच्च विजयस्तथा ॥ ५१ ॥ तस्मादेतामुपासिष्ये विधिना व्रततत्प
रः ॥ एवमन्योऽपि पूर्णार्थः पूर्णाङ्गः पूर्णलक्षणम् ॥ ५२ ॥ यो मामस्यां तिथौ भक्त्या विधिवत्पूजयिष्यति ॥ तस्य प्रसा
दाभिमुखः सर्वकामप्रदो ह्यहम् ॥ ५३ ॥ एवमेषा तिथिः पार्थ सोमस्य दयिता शुभा ॥ पौर्णमासीसमाख्याता पूर्ण
मासो भवेद्यथा ॥ ५४ ॥ तदस्यां स्रोतसि स्नात्वा संतर्प्य पितृदेवताः ॥ आलिख्य मंडले सोमं नक्षत्रैः सहितं विभुम् ॥ ५५
पूजयेत्कुसुमैर्हृद्यैर्नैवेद्यैर्घृतपाचितैः ॥ भक्ष्याशनैः शुक्लवस्त्रैः पूजयित्वा क्षमापयेत् ॥ ५६ ॥ शाकाहारेण मुन्यन्नै
र्नक्तं भुंजीत वाग्यतः ॥ वसंतबांधवविधौ शीतांशोरुज्वलितनःकृते ॥ ५७ ॥ गगनार्णवमाणिक्य चंद्र दाक्षायणीप
ते ॥ पक्षे पक्षे पौर्णमास्यां विधिरेष प्रकीर्तितः ॥ ५८ ॥ कृष्णपक्षेऽपि यः कश्चित्कुहूवावास्ये व्रती भवेत् ॥ तस्याप्येष
विधिः प्रोक्तः सर्वसौख्यप्रदायकः ॥ ५९ ॥ अमावास्यां तिथिरियं पितॄणां दयिता सदा ॥ अस्यां दत्तं नयत्लप्तं पितॄणां

१ मासेमासे २

नरकात् २

म भयं भवेत् ॥ ६० ॥ अमावास्या महाराज श्वपत्नैर्य्यैस्तपोषिता ॥ नैरक्ष्यं भवेद्दत्तं पितृभ्यस्तीर्थमुत्तमम् ॥ ६१ ॥ यः कश्चि
त्कुरुते न स्मिन्स्त्रिन पितृणोदकक्रियाम् ॥ स तारयति भुगणान्मातृहृषानेकविंशतिम् ॥ ६२ ॥ भवेद्यत्र यथा तस्य लोकाः
पितृनिषेविताः ॥ यदा तु रहकालांते तस्यागागमनं भवेत् ॥ ६३ ॥ ब्राह्मणः पितृभक्तश्च सर्वविद्याविशारदः ॥ एवं
जन्मनि राजेंद्र भवेद्धनसमन्वितः ॥ ६४ ॥ एवं संवत्सरस्यांते हैमं कृत्वा सुशोभनम् ॥ सोमं न भरसाहितं विप्राय
प्रतिपादयेत् ॥ ६५ ॥ उपदेशं प्रयच्छेद्यस्तस्मै वृतकृते नरः ॥ संवत्सरं वस्त्राभागौर्नैवेगैरास्थं निवेदयेत् ॥ ६० ॥ मासेमा
से विधिरयं व्रतस्यास्य नराधिप ॥ यो न शक्नोति वा कर्तुं पक्षं वाथ निरंतरम् ॥ ६६ ॥ स एकामप्यपोष्यैव कृत्वा सु
यापनं सुधीः ॥ यश्चैतत्कुरुते पार्थ पौर्णमासीव्रतं नरः ॥ ६७ ॥ सर्वपापविनिर्मुक्तश्चंडवद्दिविराजते ॥ पुत्रपौ
त्रधनोपेतो यज्वा दाता प्रियंवदः ॥ ६८ ॥ संततिं विपुलां प्राप्य प्रयागे मरणं भवेत् ॥ ततश्चैवाक्षयांल्लोकान्साप्नो
ति सुरसेवितान् ॥ ६९ ॥ सेव्यमानः सगंधर्वैः स्तूयमानः सुरासुरैः ॥ आस्ते स पूर्णं सर्वांगो यावत्कल्पशतत्रयमः
७० ॥ अभ्यर्चयंति तिलितपंचदशीषु सोमं कृष्णासु ये पितृगणां जलपिंडदानैः ॥ तेषां गृहाणि धनधान्यसुतादिसं
पन्नाणि तिपार्थिव भवंति विधेर्विधानात् ॥ ७१ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर

कृत्वावतिम२

॥ राम: ॥
॥ १६० ॥

160

संवादे विजयपौर्णमासीव्रतवर्णनं नामनवनवतितमोध्यायः ॥ ९९ ॥ ॥ युधिष्ठिर उवाच ॥ संवत्सरे वयाः
काश्चित्तिथयः पुण्यलक्षणाः ॥ तामेवदयदुश्रेष्ठस्नानेदानेमहाफलाः ॥ १ ॥ श्रीकृष्ण उवाच ॥ वैशाखीकार्तिकी
माघीतिथयोऽतीवपूजिताः ॥ स्नानदानविहीनैस्तान नेयाः पांडुनंदन ॥ २ ॥ तीर्थस्नानं नदात्रास्नं दानं विना
नेरूपतः ॥ वैशाख्यां पांडवश्रेष्ठप्रभ्रष्टाघोमतिकामता ॥ ३ ॥ कार्तिक्यां पुष्करारण्यं माघ्यां वाराणसी स्मृता ॥
स्नाने लोके दानेन तारयत्यपि दुष्कृतीन ॥ ४ ॥ कुंभान्नवस्त्रांभक्ष्यैः पूर्णान्हिरण्यान्नसंयुतान ॥ वैशाख्यां ब्राह्म
णो दत्वा न शोचति कृते व्रते ॥ ५ ॥ मधुरान्नरसैः पूर्णान्भाजनान्कनकोज्ज्वलान ॥ गोभूहिरण्यवासांसि विधिवत्प्र
तिपादयेत ॥ ६ ॥ माघ्यां मघासु च तथा संतर्प्य पितृदेवताः ॥ तिलपात्राणि देयानि तिलांश्च पललौदनम ॥ ७ ॥ कार्पा
सदानमत्रैव तिलदानं च शस्यते ॥ कंबलाजिनरत्नानि मोचकौ पापमोचकौ ॥ ८ ॥ उपानहानमत्रैव कथितं सर्वकाम
दम ॥ यत्रवातत्रवा स्नानं दानं विनानुरूपतः ॥ ९ ॥ कलिकालोद्भवसर्वं नाश्यते पांडुनंदन ॥ कार्तिक्यां तु वृषोत्सर्गो विवा
हः पुण्यलक्षणः ॥ १० ॥ कार्यंकुरुकुलश्रेष्ठ हरेर्नीराजनं तथा ॥ गजाश्वरथदानं च घृतधेन्वादयस्तथा ॥ ११ ॥ प्रदेयाः
पुण्यकृद्भिः श्वतात्ताः संकल्प्य देवताः ॥ फलानि यानि विधानि सुगंधिमधुराणि च ॥ १२ ॥ जातीफलं च केकोललवंग

॥ भविपु ॥
॥ १६१ ॥

लवलीफलम् ॥ खर्जूरीनालिकेरं च कदल्याश्च फलानि च ॥ १३ ॥ दाडिमान्मातुलुंगांश्च कर्कोटांस्त्रपुसांस्तथा । वृंताका
न्कारवेल्लांश्चिर्भिटान्कूष्मांडकर्कटान् ॥ १४ ॥ अप्रदानेन येषां तु तिथयो यांति भारत ॥ तेषाधिनादरिद्राश्च जायंते भुवि
मानवाः ॥ १५ ॥ न केवलं त्रालुतानां दानं सर्वस्य शस्यते ॥ भगिनीभागिनेयानां मातुलानां पितृष्वसुः ॥ १६ ॥ दरिद्राणां च वं
धूनां दानं कोटिगुणोत्तरम् ॥ मित्रं कुलीनमभ्यापन्नो वंधुं दरिद्रदुःखितं ॥ १७ ॥ आगतायाभ्यागतो श्रान्तोतिथिः स्वर्गसंक्रमः
वनं प्रस्थापिते रामे ससीते सहलक्ष्मणे ॥ १८ ॥ मातामहकुलादेत्य विभ्रष्टेनांतरात्मना ॥ ससर्वैः श्राविलोनेकैः कौशल्याभर
तेन वै ॥ १९ ॥ यदा न प्रत्ययं याति कथंचित्कौशलात्मजः तदा विशुद्धभावेन तिथयः श्राविताः पुनः ॥ २० ॥ वैशाखीकार्त्ति
की माघी तिथयो मम पूजिताः ॥ अप्रदानवतो यांति यस्मात्पौत्र मते गताः ॥ २१ ॥ एतच्छ्रुत्वा तु कौसल्या सहसा पुत्रयंगता ॥
अंकमानीय भरतं सांत्वयामास दुःखितम् ॥ २२ ॥ एतत्तिथीनां माहात्म्यमाख्यातं वरुविस्तरम् ॥ भूयस्तु किं प्रवक्ष्यामि तव
राजन्महामते ॥ २३ ॥ वैशाखकार्त्तिकमघासहिताथ माघे या पूर्णिमा भवति पर्णशशांकचिह्ना ॥ तस्यां जलान्नकनकां
वरमानपत्रं दत्त्वा प्रयाति पुरुषः पुरुहूतलोकम् ॥ २४ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधि
ष्ठिरसंवादे वैशाखीकार्त्तिकीमाघीव्रतवर्णनं नाम शततमोध्यायः ॥ १०० ॥ ॥ युधिष्ठिर उवाच ॥ पुनर्मे ब्रूहि देवे

181

॥ रामः ॥
॥ १६१ ॥

ग्रात्वद्गत्या भावितात्मनः ॥ कथयामास मिहेऽत्रा मिश्रमधर्मवर्द्धनम् ॥ १ ॥ यत्रा त्वयितरैर्दत्तं जप्तं वा सुमहद्भवेत् ॥ २ ॥ श्रीकृ
ष्णुवाच ॥ मलच्यांऽवते वक्षिरहस्यं देवनिर्मितम् ॥ यन्मयाकस्यचिन्नोक्तं सुप्रियस्यापि भारत ॥ ३ ॥ वैशाखमासस्य तु या
त्तीया नवम्यसौ कार्त्तिकशुक्लपक्षे नभस्यमासस्य तु कृष्णपक्षे त्रयोदशीं पंचदशीं च माघे ॥ ४ ॥ वैशाखस्य तृतीया
तु समाकृतयुगेन तु ॥ नवमी कार्त्तिके या तु त्रेतायुगसमा तु सौ ॥ ५ ॥ त्रयोदशी नभस्येन द्वापरेण समागता माघे पंचद
शी एताः कलिकालादिरुच्यते ॥ ६ ॥ स्नानाच्च तपसो राजेंद्र युगानां प्रभवा यथा युगादयस्त्वकथ्यंते तेनैताः सर्वसूरिभिः ॥ ७
ऽपवासस्तपो दानं जपहोमक्रिया तथा ॥ यद्यत्प्रक्रियते किंचित्सर्वं कोटिगुणं भवेत् ॥ ८ ॥ वैशाखस्य तृतीयायां श्रीसमेतं
जगद्गुरुम् । नारायणं पूजयेथाः पुष्पधूपविलेपनैः ॥ ९ ॥ वस्त्रालंकारसंभारैर्नैवेद्यैर्विविधैस्तथा ॥ ततस्तस्याग्रतो
धेनुं लवणस्याढकेन तु ॥ १० ॥ कार्या कुरुकुलश्रेष्ठ चतुर्भागेन वत्सकम् । अभिचर्मोपरिस्थाप्य कल्पयित्वा विधानतः
॥ ११ ॥ स्वशास्त्रोक्तक्रमयोगेन ब्राह्मणायोपपादयेत् ॥ श्रीधरः श्रीपतिः श्रीमान् श्रीशः संप्रीयतामिति ॥ १२ ॥ अनेन विधिना
दत्वा धेनुं विप्राय भारत ॥ गोसहस्रं दत्तफलं प्राप्नोतीह न संशयः ॥ १३ ॥ तथैव कार्त्तिके मासि नवम्यां त कभुड्नरः ॥ स्ना
त्वा नदीतडागेषु देवखातेषु वा पुनः ॥ १४ ॥ उमासहायं वरदं नीलकंठमथार्चयेत् ॥ पुष्पधूपादिनैवेद्यैरन्यैः शंकरं शिवम्

पितृनुद्दिश्य २

१५॥ धेनुं तिलमयीं दद्यात्पुराणोक्तविधानतः॥ अथ स्मृतिर्नीलकंठः प्रीयतामिति चिंतयेत्॥१६॥ यदत्र प्राप्यते पुण्यं
पार्थ तत्केन वर्ण्यते॥ दत्वा तिलमयीं धेनुं शिवलोकमवाप्नुयात्॥१७॥ त्रयोदशीं नभसि पाक्रन्नमस्यां समर्चयेत्॥ पितॄ
न्पायसान्नेन मधुना च घृतेन तु॥१८॥ भोजयेद्ब्राह्मणान्भक्त्या वेदवेदांगपारगान्॥ पितॄनुद्दिश्य दातव्या सवत्सा कांस्य
दोहनी॥१९॥ श्रमस्था गौर्महाराज तरुणी रूपपयस्विनी॥ पितापितामहश्चैव तथैव प्रपितामहः॥ २०॥ प्रीयंतां गोप्रदा
नेनेति दत्वा विसर्जयेत्। कृतेनानेन राजेंद्र यत्पुण्यं प्राप्यते नृभिः॥२१॥ तत्केन वर्णितुं याति वर्षकोटिशतैरपि.
पुत्रान्पौत्रान्प्रपौत्रांश्च धनं च महदीप्सितम्॥२२॥ इह चाप्नोति पुरुषः परत्र च शुभांगतिम् पंचदश्यां च माघस्य पूजयि
त्वा पितामहम्॥२३॥ गायत्र्या सहितं देवं वेदवेदांगभूषितम्॥ नवनीतमयीं धेनुं फलैर्नानाविधैर्युताम्॥२४॥ सहिरण्यां
सवत्सां च ब्राह्मणाय निवेदयेत्॥ कीर्तयेत्प्रीयतामत्र पद्मयोनिः पितामहः॥ २५॥ यत्स्वर्गे यत्र पाताले यत्र मर्त्ये सुदुर्ल
भम्॥ तदवाप्नोत्यसंदिग्धं पद्मयोनिप्रसादतः॥ २६॥ यानि चान्यानि दानानि दत्तानि सुबहून्यपि॥ युगादिषु महाराज
अक्षयानि भवंति हि॥२७॥ अल्पमल्पं हि यः कश्चित्तद्दद्यान्निर्धनोऽपि सन् तदक्षय्यं भवेत्सर्वं युगादिषु न संशयः॥ २८
वित्तानुसारं स्वं ज्ञात्वा वित्तवान्पार्थिवोऽपि वा॥ अनुसारेण वित्तस्य सश्रद्धेन समाधिना॥ २९॥ भूहिरण्यं गृहं वासः शय

162

नास्नामनानि च। छत्रोपानद्युग्मानि प्रदेयानि द्विजातिषु ॥ ३० ॥ एवं दत्वा यथाशक्त्या भोजयित्वा द्विजानपि। पश्चाद्भुं
जीत सुमना वाग्यतः स्वजनैः सह ॥ ३१ ॥ यत्किंचिन्मानसं पापं कायिकं वाचिकं तथा ॥ तत्सर्वं नाशमायाति युगादितिथि
पूजनात् ॥ ३२ ॥ उद्गीयमानो गंधर्वैः स्तूयमानः सुरासुरैः ॥ रमते चाक्षयं कालं स्वर्गलोके न संशयः ॥ ३३ ॥ यद्दीयते किम
पि कोटिगुणं तदत्र स्नानं जपो नियममक्षयमेव सर्वम् ॥ स्यादक्षया युगयुगपूर्वतिथी पुराजन्मास्मात् समादयो मुनिवराः स
मुदाहरंति ॥ ३४ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे युगादितिथिव्रतमाहात्म्यव
र्णनं नामैकाधिकशततमोऽध्यायः ॥ १०१ ॥ युधिष्ठिर उवाच ॥ स्मरयामि हृषीकेश यल्लोकं भवता क्वचित ॥ तत्सावित्री
व्रतं ब्रूहि ममोपरि दयां कुरु ॥ १ ॥ श्रीकृष्ण उवाच ॥ कथयामि कुलस्त्रीणां महाभाग्यं युधिष्ठिर ॥ यथा चीर्णं व्रतवरं सावि
त्र्या राजकन्यया ॥ २ ॥ आसीन्मद्रेषु धर्मात्मा सर्वभूतहिते रतः । पार्थिवोऽश्वपतिर्नाम पौरजानपदप्रियः ॥ ३ ॥ क्षमावान्न
क्षितिपतिः सत्यवाग्विजितेंद्रियः ॥ स सभार्यो व्रतमिदं चचार नृपतिः स्वयम् ॥ ४ ॥ सावित्री व्रतमिदं तत्सर्वकामप्रदा
यकम् तस्य तुष्टाभवद्राजन् सावित्री ब्रह्मणः प्रिया ॥ ५ ॥ भूर्भुवः स्वरिति प्रोक्ता साक्षान्मूर्तिमती स्थिता ॥ कमंडलुधरा
देवी प्रसन्नवदनेक्षणा ॥ ६ ॥ उवाच दुहिता ह्येका तव राजन्भविष्यति ॥ इत्येवमुक्त्वा सावित्री जगामादर्शनं पुनः ॥ ७ ॥

कालेन सा तथा राजन्दुहिता देवरूपिणी ॥ सा विवृद्धा शीलयादत्ता सा विख्याता न पूर्वया तदा ॥ ८ ॥ सावित्रीत्येव नामास्याश्च
क्रुर्विप्रास्तथा पिता ॥ सा गृहे वतमिश्रीर्यवर्द्धत नृपात्मजा ॥ ९ ॥ सावित्री सुकुमाराङ्गी यौवनस्था बभूव ह ॥ तां सुम
ध्यां पृथुश्रोणीं प्रतिमां कांचनीमिव ॥ १० ॥ प्राप्तेव देवकन्येति दृष्ट्वा तां मेनिरे जनाः ॥ सा तु पद्मपलाशाक्षी प्रज्वलंती
व तेजसा ॥ ११ ॥ चचार सा च सावित्री व्रतं यद्भृगुणोदितम् ॥ अथोपोष्य शिरःस्नाता देवतामभिगम्य सा ॥ १२ ॥ हुत्वा
ग्निं विधिवद्विप्रान्वाचयित्वेंदुपर्वणि ॥ तेभ्यः सुमनसः शेषाः प्रतिगृह्य नृपात्मजा ॥ १३ ॥ साध्वी पतिव्रता मेने स देवश्री
रिव रूपिणी ॥ सोऽभिवाद्य पितुः पादौ शेषान्पूर्वं निवेद्य च ॥ १४ ॥ कृताञ्जलिर्वरारोहा नृपतेः पार्श्वतः स्थिता ॥ तां दृष्ट्वा यौ
वनं प्राप्तां स्वसुतां देवरूपिणीम् ॥ १५ ॥ उवाच राजा संमंत्र्य स्वार्थं सह मंत्रिभिः ॥ पुत्रि प्रदानकालोऽयं तेन कश्चि
द्वृणोति माम् ॥ १६ ॥ विचारयित्वा पश्यामि वरं तुल्यं महात्मनः ॥ देवादीनां यथा वाच्यो न लभेयं तथा कुरु ॥ १७ ॥ श्रूय
मातो मया पुत्रि धर्मशास्त्रेषु पठ्यतम् ॥ पितुर्गेहे तु या कन्या रजः पश्यत्यसंस्कृता ॥ १८ ॥ ब्रह्महत्या पितुस्तस्य सा कन्या वृष
ली स्मृता ॥ अतोऽर्थं प्रेषयामीति कुरु पुत्रि स्वयंवरम् ॥ १९ ॥ वृद्धैरमात्यैः सहिता शीघ्रं गच्छति धारयन् ॥ एवमस्त्विति सा
वित्री प्रोक्ता तस्माद्विनिर्ययौ ॥ २० ॥ तपोवनानि रम्याणि राजर्षीणां जगाम सा ॥ मान्यानां तत्र वृद्धानां कृत्वा पादाभि

षेवनम् ॥ २१ ॥ ततोभिगम्यतीर्थानि सर्वाण्येवाश्रमाणि च ॥ आजगाम पुनर्वेश्म सावित्री सह मंत्रिभि ॥ २२ ॥ त
त्रापश्यत देवर्षिं नारदं पुरतः पितुः ॥ आसीनमासने विप्रं प्रणम्य स्मितभाषिणी ॥ २३ ॥ कथयामास तत्सर्वं यथा
वृत्तं वने ऽभवत् ॥ ॥ सावित्र्युवाच ॥ आसीत्साल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ॥ २४ ॥ द्युमत्सेन इति ख्यातो देव
दन्धोबभूव सः ॥ ॥ नारदउवाच ॥ अहोबत महत्कष्टं सावित्र्या नृपते कृतम् ॥ २५ ॥ बाल्यभावाद्यदनया गुणवा
न्सत्यवान्नृप ॥ सत्यं वदत्यस्य पिता सत्यं माता प्रभाषते ॥ २६ ॥ उपेतो ऽतिगुणैः सर्वैर्द्युमत्सेनसुतो व्रती ॥ एको
दोषो ऽस्ति नान्यो ऽस्य सो ऽद्यप्रभृति सत्यवाक ॥ २७ ॥ संवत्सरेण हीनायुर्देहत्यागं करिष्यति ॥ नारदस्य वचः श्रुत्वा
दुहितां प्राह पार्थिवः ॥ २८ ॥ पुनश्च सावित्रि गच्छ त्वमन्यं वरय सत्पतिम् ॥ संवत्सरेण सो ऽल्पायुर्देहत्यागं करिष्यति ॥
२९ ॥ सावित्र्युवाच ॥ सकृज्जल्पंति राजानः सकृज्जल्पंति पंडिताः ॥ सकृत्प्रदीयते कन्या त्रीण्येतानि सकृत्सकृत् ॥ ३०
दीर्घायुरथवाल्पायुः सगुणो निर्गुणो ऽपि वा ॥ सकृद्वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥ ३१ ॥ मनसा निश्चयं कृ
त्वा ततो वाचा ऽभिधीयते ॥ क्रियते कर्मणा पश्चात्प्रमाणं मे मनः सदा ॥ ३२ ॥ नारदउवाच ॥ यद्येतदिष्टं दुहितुस्त
नः शीघ्रं विधीयताम् ॥ अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्ततः ॥ ३३ ॥ एवमुक्त्वा समुत्पत्य नारदस्त्रिदिवं गतः ॥

राज्ञा च दुहितुः सर्वं वैवाहिकमथाकरोत् ॥ ३४ ॥ शुभे मुहूर्ते सा पार्थ स्वस्थै ब्राह्मणैर्वेदपारगैः ॥ सावित्र्यपि वरं लब्ध्वा
भर्तारं मनसेप्सितम् ॥ ३५ ॥ मुमुदेऽतीव तन्वंगी स्वर्गं प्राप्येव पुण्यकृत ॥ एवं तत्राश्रमे तेषां वसतां प्रीतिपूर्वकम्
३६ ॥ कालस्तपस्यतां कश्चिदतिचक्राम भारत ॥ सावित्र्यास्तप्यमानायास्तिष्ठंत्याश्च दिवानिशम् ॥ ३७ ॥ नारदेन यदुक्तं तु
वाक्यं मनसि वर्तते ॥ ततः कालेन बहुतिथे व्यतिक्रांते कदाचन ॥ ३८ ॥ सप्राप्तकालो म्रियते इति संचिंत्य भामिनी ॥ प्रोष्ठप
देसितेपक्षे द्वादश्यां रजनीमुखे ॥ ३९ ॥ गता यंत्वाभ्यसा विश्रा नारदोक्तं च वो हृदि ॥ व्रतं त्रिरात्रमुद्दिश्य दिवारात्रं विनाम
वत् ॥ ४० ॥ ततस्त्रिरात्रं निर्वर्त्य स्नात्वा संतर्प्य देवताः ॥ चतुर्थेऽहनि मर्तव्यमिति संचिंत्य भामिनी ॥ ४१ ॥ श्वश्रूश्वशुरयोः
पादौ ववंदे चारुहासिनी ॥ अथ प्रतस्थे परशुं गृहीत्वा सत्यवान्वनम् ॥ ४२ ॥ सावित्र्यपि च भर्तारं गच्छंतः पृष्ठतोऽन्वगात ॥ ततो
ऽवदत्सा भर्तारं तां पृच्छस्व श्वशुरौ निजौ ॥ ४३ ॥ तथेत्युक्त्वा हि पप्रच्छ नत्वा श्वश्रूपदानि सा ॥ श्वशुराववदतां वचनं तत्त्वयान
घे ॥ ४४ ॥ बाले त्वं परमं भीरुः कथं गच्छसि काननम् ॥ भक्त्या भावेन सा प्रोचे ऽवश्यं काननं मया ॥ ४५ ॥ गच्छेति तां तदोचाते
श्वश्रूश्वशुरौ चारुहासिनीम् ॥ ततो गृहीत्वा तरसा फलपुष्पसमित्कुशान ॥ ४६ ॥ यथाभ्रुक्कालिकादायकाष्ठभारमकल्प
यत् ॥ अथ पाटयतः काष्ठं जाता शिरसि वेदना ॥ ४७ ॥ अथ मां बाधते बाले स्वप्तुमिच्छामि सुंदरी ॥ विश्रमस्व महाबाहो

सावित्री प्राह दुःखिता ॥ ४८ ॥ पश्चादपगमिष्यामिस्या श्रमं श्रमनाशनम् ॥ यावदुत्संगके कृत्वा शिर आस्ते महीत
ले ॥ ४९ ॥ तावद्ददर्श सावित्री पुरुषं कृष्णपिंगलम् ॥ किरीटिनं पीतवस्त्रं सा भास्कर्यमिवोदितम् ॥ ५० ॥ तमुवाचाथ सा
वित्री प्रणम्य मधुपिंगलम् ॥ कस्त्वं देवोऽथवा दैत्यो मां धर्षयितुमागतः ॥ ५१ ॥ नचाहं केनचिच्छक्या स्वधर्मादवरोपि
तुम् ॥ स्प्रष्टुं वा पुरुषश्रेष्ठ दीप्तामग्निशिखामिव ॥ ५२ ॥ यम उवाच ॥ यमः संयमनश्चास्मि सर्वलोकभयंकरः ॥ क्षी
णायुरेष ते भर्त्ता तं नयामि पतिव्रते ॥ ५३ ॥ नशक्याः किंकरैर्नेतुमतोऽहं स्वयमागतः ॥ एवमुक्त्वा सत्यवतः शरीरात्पाश
संयतः ॥ ५४ ॥ अंगुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात् ॥ अथ प्रयातुमारेभे पंथानं पितृसेवितम् ॥ ५५ ॥ सावित्र्यपि
वरारोहा पृष्ठतोऽनुजगाम ह ॥ पतिव्रतां तथा श्रांतां ज्ञात्वा वाच यमस्तदा ॥ ५६ ॥ निर्वर्त्तनं कुसावित्रि स्वगेहे त्वमितागता
ना ॥ एष मार्गो विशालाक्षि न केनाप्यनुगम्यते ॥ ५७ ॥ सावित्र्युवाच ॥ न श्रमो न च मे ग्लानिः कदाचिदपि जायते ॥ भर्त्ता
रमनुगच्छंतिया तातसां न श्रमादयः ॥ ५८ ॥ सतां संतो गतिर्नान्या स्त्रीणां भर्त्ता सदा गतिः ॥ वेदो वर्णाश्रमाणां च शि
ष्याणां च गतिर्गुरुः ॥ ५९ ॥ सर्वेषामेव जंतूनां स्थानमस्ति महीतलम् ॥ भर्त्तार एव मनुजस्त्रीणां नान्यः समाश्रयः
६० ॥ एवमन्यैश्च विविधैर्वाक्यैर्धर्मार्थसंहितैः ॥ तुतोष सूर्यतनयः सावित्रीं वेदमब्रवीत् ॥ ६१ ॥ तुष्टोऽस्मि तव भद्रे

॥ भविपु ॥
॥ १६५ ॥

तेवरं वरय भामिनि ॥ सावित्र्यपि वरान्लब्ध्वा विनयावनतानना ॥ ६२ ॥ चक्षुः प्राप्तिस्तथा राज्यं श्वशुरस्य महात्मनः ॥ पितुः
पुत्रशतं चैव पुत्राणां शतमात्मनः ॥ ६३ ॥ जीवितं च तथा भर्त्तु धर्मसिद्धिश्च शाश्वती ॥ धर्मराजो वरान्दत्वा प्रेषयामास
तां ततः ॥ ६४ ॥ अथ भर्त्तारमासाद्य सावित्री हृष्टमानसा जगाम स्वाश्रमपदं सहभर्त्रा निराकुला ॥ ६५ ॥ भाद्रस्य पौर्णमा
स्यां तु यथा चीर्णं व्रतं त्विदम् ॥ माहात्म्यमस्य नृपते कथितं सकलं मया ॥ ६६ ॥ युधिष्ठिर उवाच ॥ कीदृशं तद्व्रतं देव सा
वित्र्या यदनुष्ठितम् ॥ तस्मिन्भाद्रपदे मासि सिद्धान्तं तस्य कीदृशम् ६७ ॥ का देवता व्रते तस्मिन्ब्रूहि कामं प्रति प्रभो
सविस्तरं हृषीकेश ब्रूहि धर्मं सनातनम् ॥ ६८ ॥ श्रीकृष्ण उवाच ॥ श्रूयतां पाण्डवश्रेष्ठ सावित्रीव्रतमादरात् ॥ कथयामि
कथं चीर्णं तया तस्मा युधिष्ठिर ॥ ६९ ॥ त्रयोदश्यां भाद्रपदे दंतधावनपूर्वकम् ॥ त्रिरात्रं नियमः कार्य उपवासस्य भारत
७० ॥ अशक्तस्तु त्रयोदश्यां नक्तं कुर्याज्जितेन्द्रियः ॥ अयाचितं चतुर्दश्यामुपवासेन पूर्णिमा ॥ ७१ ॥ नित्यं स्नात्वा महा
नद्यां तडागे वाथ निर्झरे ॥ विशेषः पूर्णिमास्यां तु स्नाने सर्षपमृज्जलैः ॥ ७२ ॥ गृहीत्वा तिलकान्पात्रे प्रस्थमात्रं युधिष्ठिर
अथवा धान्यमादाय यव शालि तिलादिकम् ॥ ७३ ॥ ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टयेत् ॥ सावित्रीप्रतिमां कृत्वा स
र्वावयवशोभनाम् ॥ ७४ ॥ सौवर्णीं मृन्मयीं वापि स्वशक्त्या रौप्यनिर्मिताम् ॥ रक्तवस्त्रयुगं दद्यात्सावित्र्यै ब्रह्मणे तथा ॥ ७४

॥ राम: ॥
॥ १६५ ॥

165

सावित्रीं ब्रह्मणा सार्द्धमेवं भक्त्या प्रपूजयेत् ॥ गंधैः सुगंधपुष्पैश्च धूपनैवेद्यदीपकैः ॥ ७६ ॥ फलैः कोशातकैर्भव्यैः कूष्मांडैः कर्कटीफलैः ॥ नालिकेरैश्च खर्जूरैः कपित्थैर्दाडिमीफलैः ॥ ७७ ॥ जंबूजंबीरनारंगैः कर्कटैः पनसैस्तथा ॥ जीरकैः कटुखंडैश्च गुडेन लवणेन च ॥ ७८ ॥ विरूढैः सप्तधान्यैश्च वंशपात्रप्रकल्पितैः ॥ रजन्या सूत्रकंठैश्च सुभैः कुंकुमकेसरैः ॥ ७९ ॥ अवतारवती त्वेवं सावित्री ब्रह्मणः प्रिया ॥ तामर्चयेत मंत्रेण सावित्रीं ब्राह्मणः स्वयम ॥ ८० ॥ इतरेषां पुराणोक्तमंत्रोऽत्र समुदाहृतः ॥ ॐकारपूर्वके देवि वीणापुस्तकधारिणी ॥ ८१ ॥ वेदमातर्नमस्तुभ्यमवैधव्यं प्रयच्छ मे ॥ एवं संपूज्य विधिवज्जागरं कारयेत्ततः ॥ ८२ ॥ गीतवादित्रशब्देन लब्धनारीकदंबकैः ॥ नृत्यहासैर्नयेद्रात्रिं प्रेक्षणैश्च कथानकैः ॥ ८३ ॥ सावित्र्याख्यानकं चापि वाचयेद्द्विजसत्तमम् ॥ यावत्प्रभातसमयं गीत्वा भावरसैः समम ॥ ८४ ॥ ततः प्रभाते विमलउपःकाले उपस्थिते ॥ ब्राह्मणो वेदविदुषि सावित्रीं विनिवेदयेत ॥ ८५ ॥ यथा सावित्रकल्पज्ञे सावित्र्याख्यानवाचके ॥ दैवज्ञउंढज्ञौ च पीडे चाग्निहोत्रिणे ॥ ८६ ॥ मंत्रेणानेन कौंतेय प्रणम्य विधिपूर्वकम ॥ दर्भाक्षततिलैर्मिश्रा पूर्वाशाभिमुखोत्थिता ॥ ८७ ॥ सुधीर्विप्रवरो विप्र ॐकारस्वस्तिपूर्वके ॥ सावित्री यं मया दत्ता सहिरण्या महासती ॥ ८८ ॥ ब्रह्मणः प्रीणनार्थाय ब्राह्मण प्रतिगृह्यताम ॥ एवं दत्वा द्विजेंद्राय सावित्रीं तां युधिष्ठिर ॥ ८९ ॥ नैवेद्यादि च तत्सर्वं ब्राह्म

॥ भवि उ ॥
॥ १६६ ॥

णः स्वगृहं नयेत् ॥ स्वयं दशपदं गत्वा त्व वेश्म पुनराविशेत् ॥ २० ॥ ततश्च भुक्त्वा हविष्यान्नं ब्राह्मणैर्बान्धवैः सह ॥ विसर्जयेत्ततो विप्रान्सावित्री प्रीयतामिति ॥ २१ ॥ पंचदश्यां तथा ज्येष्ठे वटके च महासती । त्रिरात्रोपोषिता नारी विधिनानेन पूजयेत् ॥ २२ ॥ सार्द्धं सत्यवता साध्वी फलनैवेद्यदीपकैः ॥ पटावलंबनं कृत्वा काष्ठभारं युधिष्ठिरः ॥ २३ ॥ रात्रौ जागरणं कृत्वा नृत्यगीतपुरस्कारैः ॥ प्रभाते विधिना पूर्वं पूर्वोक्तेन नरोत्तमः ॥ २४ ॥ तस्मै वै ब्राह्मणो दद्यात्सर्वाणि पत्न्यक्षमापयेत् ॥ एततु ते व्रतमिदं कथितं विधिवन्मया ॥ १५ ॥ याश्चरिष्यंति लोकेस्मिन्नार्यो व्रतसमन्विताः ॥ भुक्त्वा भोगांश्चिरं भर्त्रा सौ यास्यंति ब्रह्मणः पदम् ॥ २६ ॥ एतत्पुण्यं पापहरं धन्यं दुःखप्रनाशनम् ॥ जपतां शृण्वतां चैव सावित्रीव्रतमादरात् ॥ २७ ॥ सर्वार्थवेदजननीं सहस्त्रां भुजायां संपूज्येदिह त्रिरात्रकृतोपवासा ॥ सावित्रिवत्सितफलं च तथा स्वभर्तुस्सार्द्धं च येत्तु विभुनक्ति चिरं सुखानि ॥ २८ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वटसावित्रीव्रतं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ श्रीकृष्ण उवाच ॥ पूर्वमासीत्कृतयुगे स्त्रित्रिणी वरुत्रिणी ॥ नाम्ना कलिंगभद्रेति रूपलावण्यसंयुता ॥ १ ॥ तुंगस्तनी पद्मनेत्रा हंसनागेन्द्रगामिनी ॥ सौभाग्यगुणसंपूर्णा चंद्रबिंबनिभानना ॥ २ ॥ धनरत्नैश्च संपूर्णा मध्यदेशे नृपस्थले ॥ राज्ञः पत्नी तु सा देवी दिलीपस्य महात्मनः ॥ ३ ॥ कलिंगभद्रा ललिता महादेवीगुणान्विता महाप्रसादं मन्वाना नावकस्मान पुर

166

॥ रामः ॥
॥ १६६ ॥

स्मरम || ४ || ब्राह्मणोभ्यर्थ्यदाता निव्रयकृत्ति महासती || त्यागसंभोगसौभाग्ये द्वितीया यानुनाहृशी || ५ || नारीणांनृन
र श्रेष्ठ दिलीपस्य यथाविधा || यथावकार्त्तिके मासि गृहीतंस्त्रिकाव्रतम || ६ || षण्मासेन व्रतं यावादिदं संचिंत्य चेतसि
पारितं च तया सर्वं किंचिन्मात्रं नु वर्त्तते || ७ || पारणे पारणे वापि पुराणज्ञे द्विजोत्तमे || उद्यापनं प्रयच्छंती कालेन पतिस्सुंद
री || ८ || कदाचिद्धर्मरात्रे तु सुप्ता भर्त्रा सहैव सा || दष्टा सर्पेण रौद्रेण जगाम निधनं क्षणात || ९ || तेन दोषेण सा बाला अ
जायोनौ हजायत | व्रते चरी धर्मपरा पूर्वजातिस्मरा दृढा || १० || पूर्वाभ्यासेन तेनैव गृहीतं कृत्तिकाव्रतम | वसता यूथप
रिभ्रष्टा उपवासपरिस्थिता || ११ || पर्य्यस्त्रेण गच्छंती अजा सस्यावमर्दनी कार्त्तिकांगलके बद्धाग्रामकेण विलागता |
१२ || दृष्ट्वा त्रिणा महाभागा पूर्वजातिस्मरेण सा || कारणं बुध्यतां बुद्धा महकालिंदभडकाम || १३ || मोक्षिता बदरीवृक्षा
चरंती कृत्तिकाव्रतम | गोपालेर्वं धनात्साध्वीअनिर्वेदपरानुसा || १४ || संप्राप्य बदरीपत्रं पीत्वा पुष्करिणीपयः || ममेत्तु
क्षाहारं भ्रांता पारयामास तद्व्रतम || १५ || तस्यैव योगात्तत्तो दत्वा जगामाश्चिस्तपोवनम || सा वियोगेश्वरी भूत्वा निदि
त्वा जन्म चात्मनः || १६ || तस्या जयोगात्त्वात्मा रुणान्याधिस्थिता गौतमस्पृहि || अष्ठेवं भव दुहिता ह्यहत्या गर्भसुंदरी || १७ ||
योगलक्ष्मीतिनाम्ना सा कन्या गुणगणैर्युता || विधेव दत्ता सा पित्रा शांडिल्याय महर्षये || १८ || तपोधनाय दांताय नित्यं स

हवरी वभौ ॥ ब्राह्मलक्ष्म्यादी प्यमाराणां साक्षाद्देहस्मृतिर्यथा ॥ १९ ॥ सरस्वती च स्वाहा च यथा चैवारुन्धती यथा ॥ गौरी राज्ञीन थाल
क्ष्मीर्गायत्री चोत्तमा सती ॥ २० ॥ महालक्ष्मीस्तथा राजन्भद्रा शिल्पसागहे वभौ ॥ पितृदेवमनुष्याणां नित्यं भुक्तघरोरता ॥ २१
अथ तेना त्रिरात्रदष्वा पुनर्गर्भवतीगृहे ॥ भक्ताभिर्ख्याप्रपच्छन्ती ब्राह्मणानामनिंदिता ॥ २२ ॥ योगाछिदित्वा तामस्वे भग
वान्सर्वव छनैः ॥ योगलक्ष्मी महाभागे वर्त्तते कति कृत्तिका ॥ २३ ॥ सापि जातिस्मरा प्राह भगवन्तं महासती ॥ षड्वर्त्तते म
हायोगिन्नेकापरवशोस्थिता ॥ २४ ॥ तच्छ्रुत्वा स्यै भगवतानासकारूण्येन चेतसा · दत्तं व्रतं तथा मंत्रो येन स्वर्गं जगाम सा ॥
२५ ॥ इह भुक्त्वा चिरं भोगान्पुत्रपौत्रप्रियान्वृता ॥ ततः स्नानस्पदं प्राप्ता पुनरावृत्तिदुर्लभम् ॥ २६ ॥ युधिष्ठिर उवाच ॥ कीदृशं त
द्व्रतं कृष्ण मंत्रश्चापि जनार्दन ॥ विधानं कृत्तिकानां च तं च कालं वदस्व मे ॥ २७ ॥ ॥ श्रीकृष्ण उवाच ॥ कृत्तिकावृषयं सोमः कृ
त्तिकासु बृहस्पतिः ॥ यदा स्यात्सोमवारेण सा महाकार्तिकी स्मृता ॥ २८ ॥ ईदृशी वहुभिर्वर्षैर्वहुपुण्यैश्च लभ्यते ॥ तथा स्नान
नृथाने या यदीच्छेच्छ्रेय आत्मनः ॥ २९ ॥ अन्यापि कार्तिकी पार्थ सपुण्या ष्या विधानतः ॥ तस्या विधानं राजेन्द्र शृणुष्वैकमना
भव ॥ ३० ॥ कार्तिके शुक्लपक्षस्य पूर्णिमास्यां दिनोदये ॥ नक्तायनियमं कुर्याद्दन्तधावनपूर्वकम् ॥ ३१ ॥ उपवासस्य वा शक्त्या
ततः स्नात्वा जलाशये ॥ कुरुक्षेत्रे प्रयागे वा पुष्करे नैमिषे तथा ॥ ३२ ॥ शालग्रामे कुशावर्ते मूलस्थाने सकूंतले ॥ गोकर्णे वा

द्रुदे प्रयागे ऽथ वाप्यमरकंटके ॥ ३३ ॥ पुरे वा नगरे वापि ग्रामे घोषे ऽथ पत्तने ॥ यत्र तत्र च कार्त्तिक्यां नरो यो विदधाति
वा ॥ ३४ ॥ देवर्षिपितृपूजां च कृत्वा होमं युधिष्ठिर ॥ ततः स्नानसमये प्राप्ते पात्रं गव्यस्य सर्पिषः ॥ ३५ ॥ क्षीरस्य वाथ संपूर्णं
कृत्वा गुडफलान्वितम् ॥ षट्प्रमाणं यथाशोभि कृत्तिकाशकटं न्यसेत् ॥ ३६ ॥ षट्कृत्तिकानां बिंबानि स्वर्णरौप्यमया-
नि च रत्नगर्भाणि कुर्याच्च स्वशक्त्या पांडुनंदन ॥ ३७ ॥ प्रथमा स्वर्णनिष्पन्ना द्वितीया रौप्यकी कृता ॥ तृतीया रत्न-
घटिता चतुर्थी नवनीतजा ॥ ३८ ॥ पंचमी कलिकास्यूता षष्ठी पिष्टमयी कृता ॥ षट्कृत्तिकाः कृतबिंबाः कृत्वालक्त-
कसूत्रका ॥ ३९ ॥ रत्नगर्भाः कुंकुमाक्ताः वष्टितः स्तवकान्विताः ॥ सिंदूरचंदनाभ्यक्ता जातीपुष्पैः सुपूजिताः ॥ ४०
मंत्रेणानेन राजेंद्र द्विजाय प्रतिपादयेत् ॥ ४१ ॥ ॐ सप्तर्षिदारा ह्यनलस्य वध्वा या ब्रह्मणा दक्षिणयेति युक्ता ॥ तुष्टाः
कुमारस्य यथार्थमातरो ममापि सुप्रीततरा भवंतु स्वाहा ॥ ४२ ॥ एवमुच्चार्य विप्राय प्रदेयाः कृत्तिका नृप ॥ ब्राह्म-
णोपि प्रतीच्छेत मंत्रेणानेन पांडव ॥ ४३ ॥ धर्मदाः कामदाः संतु इमा नक्षत्रमातरः ॥ कृत्तिका दुर्गसंसारात्तारयंत्वा-
वयोः कुलम् ॥ ४४ ॥ अनेन विधिना दत्वा इष्टाचैवांतरे स्थिताः ॥ विसर्ज्य ब्राह्मणान् भक्त्या चानुव्रज्य पदानि षट् ॥ ४५ ॥ नि-
र्वर्त्तेत कथार्थं नु मध्यगो यः फलमाप्नुयात् ॥ विमानेनार्कवर्णेन गत्वा नक्षत्रमंडलम् ॥ ४६ ॥ दिव्येन वपुषा युक्तः स्वक

चंदनाभिभूषितः ॥ दिव्यनारीगणाकृतः स्रग्वीभुक्तेस्वनामयम् ॥ ४७ ॥ दोधूयमानभ्रमरै रत्नपंकत्या विराजितः ॥
पारिजातकमंदारपुष्पभारोपशोभिताः ॥ ४८ ॥ कृतार्थः परिपूर्णाशास्तिष्ठेदाभूतसंप्लवम् ॥ नारीः कृत्वा व्रतं त्वेताग
त्वा स्वर्गे सभर्तृका ॥ ४९ ॥ रमते सुभया सार्धं सर्वभोगसमन्विता ॥ यश्चैनत्कुरुते पार्थ भक्तियुक्तः समाहितः ॥ ना
री वा पुरुषो वापि मुच्यते सर्वकिल्बिषैः ॥ ५० ॥ सौवर्णरौप्यसतिलां गोनवनीतमिश्राः षट्कृत्तिकाः कृत्तिकपिष्टमयी
स्तु कृत्वा ॥ पात्रे निधाय कुसुमाक्षतधूपदीपैः संपूज्य जन्मा गा हि तं नवित्रं तिमर्त्याः ॥ ५१ ॥ ॥ इति श्री भविष्ये महापुराणे
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कार्त्तिक्यां कृत्तिकाव्रतं नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥ ॥ श्रीकृष्ण उवा
च ॥ पंचदश्यां भृ कृष्णपक्षे कार्त्तिकस्य नरोत्तम पाखंडान्पतितांश्चैव तथैवान्त्यावसायिनः ॥ १ ॥ नास्तिकान्भिन्नवृत्तांश्च
पापिनो नैव चालपेत् ॥ नारायणगतमनाः प्रह्लो हि जितेंद्रियः ॥ २ ॥ निष्कन्नुनन्नु स्नवतात्वा भूजन्वपि जनार्दनम् ॥ की
र्त्तयेद्वा क्रियाकाले सप्तकृत्वः प्रकीर्त्तयेत् ॥ ३ ॥ लक्ष्म्या समन्वितं देवमर्चयेच्च जनार्दनम् ॥ संध्यासु परमेचंड स्वरूपं
हरिमीश्वरम् ॥ ४ ॥ रात्रौ च लक्ष्मीसंस्थितं समभ्यगंधैर्या पूजयेत् ॥ श्रीनिवासावतारस्त्वं वासुदेव जगत्पते ॥ ५ ॥ म
नोभिलषितं देव पूरयस्व नमोनमः ॥ मंत्रेणानेन दत्वार्घं देवदेवस्य भक्तितः ॥ ६ ॥ नक्तं भुंजीत नस्वैरं तैलक्षारविव

168

र्जितम् ॥ तथैव चैत्रवैशाखज्येष्ठे च नपसन्तमः ७ ॥ अर्घं येन यथा प्रोक्तं मासि मासि च तद्दिने ॥ तिथ्यादितं भवे
देकं पारणं पार्थ शक्तितः ॥ ८ ॥ द्वितीयं चापि वक्ष्यामि पारणं ते नरोत्तम ॥ आषाढे श्रावणे मासि प्रोष्ठे भाद्रपदे तथा
९ ॥ तथैवाश्वयुजे पक्षे श्रीधरं प्रियमासहे ॥ अर्घं चेडमसे दत्वा भुंजीताथ यथाविधि ॥ १० ॥ द्वितीयमेतदाख्यातं तृ
तीयं पारणं स्मृतम् ॥ कार्तिकादिषु मासेषु तथैवाभ्यर्च्य केशवम् ॥ ११ ॥ भक्त्या समन्वितं दद्याच्छ्राकाय तथा निशि
भुंजीत च यथाख्यातं तृतीयं पारणं स्मृतम् ॥ १२ ॥ प्रतिपूज्य ततो दद्याद्ब्राह्मणेभ्यश्च दक्षिणाम् ॥ प्रतिमासं च वक्ष्या
मि प्राशनं कायशुद्धये ॥ १३ ॥ चतुरः प्रथमान्मासान्पंचगव्यमुदाहृतम् कुशोदकं तथैवान्यदुक्तं मासचतुष्टयम्:
१४ ॥ सूर्याभितप्तं च जलं कायविशोधनम् ॥ गीतवाद्यादिकं रात्रौ तथा मङ्गलकथां शुभाम् ॥ १५ ॥ कारयेच्चैव देवस्य
पारणे पारणे गते ॥ जनार्दनं सपत्नीकमर्चयेत्प्रथमं ततः ॥ १६ ॥ सश्रीकं श्रीधरं तद्वत्तृतीये भूतिकेशवौ ॥ प्रति
मासं तु नामानि कृष्णस्यैतानि भारत ॥ १७ ॥ कृतोपवासः सुस्नातः पूजयित्वा जनार्दनम् ॥ उच्चारयन्नरो याति य
थालोकं यथासुखम् ॥ १८ ॥ ततो विप्राय वै दद्यादुदकुंभं सदक्षिणाम् ॥ उपानद्वस्त्रयुग्मं च छत्रं कनकमेव च ॥ १९ ॥
यद्वै मासगतं नाम प्रीयतामिति कीर्तयेत् ॥ केशवं मार्गशीर्षे तु पौषे नारायणं तथा ॥ २० ॥ माधवं माघमासे तु

गोविंदमपिफाल्गुने॥ चैत्रमासेन याविष्णुं वैशाखे मधुसूदनम्॥२१॥ ज्येष्ठे त्रिविक्रमं ज्ञेयं तथाषाढे च वामनम्
श्रीधरं श्रावणेन तु हृषीकेशेति वा परम्॥२२॥ रामो भाद्रपदे मासि गीयते पुण्यकांक्षिभिः॥ पद्मनाभमश्वयुजि दा
मोदरमतः परम्॥२३॥ कार्त्तिके देवदेवेशं स्मृतं स्मरति दुर्गतिं॥ एवं संवत्सरस्यांते प्रतिमासे क्रमोदितम्॥२४॥
यदिदानंतुं नशक्नोति दयाद्वैवैकहेलया॥ विशेषश्चात्र कथितश्चंडं कृत्वा हिरण्मयम्॥२५॥ पूजयित्वा फलैर्वस्त्रै
र्ब्राह्मणाय निवेदयेत्॥ स्नुवं त्मेवं विधानेन पारणोऽभ्यर्चयेत्सम॥२६॥ तावंन्निजन्मान्यसुखं नाप्नोतीष्टवियोग
जम्॥ इहैव स्वस्थतां प्राप्य मरणे स्मरणं तत॥२७॥ स्थानं तु नमसंप्राप्य स्वर्गलोके महीयते ततो मानुष्यमासाद्य
निरातंको गतज्वरः॥ धनधान्यवति स्फीते जन्म साधुकुलेऽहिति॥२८॥ श्रीखंडेरीमधुनिहा भगवान्मृगांकः संकल्प
वंदनतिलाक्षतपुष्पमिश्रम्॥ यच्छंति येऽर्घमनया नृपपूर्णिमायां नक्तं भवंति परिपूर्णमनोरथास्ते॥२९॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे पूर्णमनोरथव्रतं नाम चतुरशीतितमोऽध्यायः
१०४॥ ॥ श्रीकृष्ण उवाच॥ अशोकपूर्णिमां चान्यां शृणुष्व गदतो मम॥ यामुपोष्य नरः॥ शोकं नानुवंति क
दाचन॥१॥ फाल्गुनामलपक्षस्य पूर्णिमास्यां नरोत्तम॥ मृज्जलेन नरः स्नात्वा दत्वा शिरसि वैमृदम्॥२॥

169

मत्स्याख्यानंततः कृत्वा कृत्वा च स्थण्डिलं मृदा ॥ पुष्पैः पत्रैस्तथाभ्यर्च्य भूधरं नामनामनतः ॥ ३ ॥ धरणीं च तथा
देवीमश्लोकेत्समिकर्तियेत ॥ यथा विष्णोकांधरणीं कृतवांस्तु जनार्दन ॥ ४ ॥ तथा मां तर्व श्लोके भ्यो मोक्ष यास्रौ
षधारिणि ॥ यथा समस्तभूतानामाधारत्वे व्यवस्थिता ॥ ५ ॥ तथापि श्लोकं कुरुमांसकलेश्चविभूतिभिः ॥
ध्यानमात्रे यथा विष्णोः स्वारूपं जानासि मोदिनि ॥ ६ ॥ तथा मनः स्वरूपतां मे कुरुतं भूतधारिणि ॥ एवं स्तुत्वा
तथाभ्यर्च्य च विंशयामर्घ्यं निवेद्य च ॥ ७ ॥ उपोष्य विनयं नक्तं वा भोक्तव्यं तैलवर्जितम् ॥ अनेनैव प्रकारेण चत्वारः
फाल्गुनादयः ॥ ८ ॥ उपोष्यान्तपने मासाः प्रथमं पारणं स्मृतम् आषाढादिषु मासेषु ततः स्नानं मृदं तु
ना ॥ ९ ॥ तथैव च स्नानं पूजा तद्दिवा स्थिताईणम ॥ चतुष्वेष्वेषु चैव गो कार्त्तिकादिषु पारणाम् ॥ १० ॥ पा
रणं त्रितये चैव चातुर्मासिकमुच्यते ॥ विशेषपूजादानं च तथा जागरणं निशि ॥ ११ ॥ विशेषेणैव कर्त्तव्यं पार
णे पारणे गते ॥ प्रथमे धरणी नाम तृतीयं मासं वन्तुहयम ॥ १२ ॥ द्वितीये मेदिनी वाच्यमता ये च वसुंधरा ॥ पारणे
पारणे पार्थयुग्मानि वा चैयेद्विजान ॥ १३ ॥ धरणी देवदेवं च ततः स्थाने तु केशवम् ॥ वस्त्राभावे च सूत्रेण पू
जयेद्धरणीं तथा ॥ १४ ॥ घृताभावे तथा क्षीरं शालिं वा सलिलं हरेः ॥ एवं संवत्सरस्यान्ते गौः सवत्सा द्विजातये.

१५ ॥ प्रदेया धरणी देवी वस्त्रालंकारसंयुता ॥ पातालसंस्थया देव्या चीर्णमेतन्महाव्रतम् ॥ १६ ॥ धरण्या केशव
श्रीत्यैनतनः प्राप्ता समल्लतिम् ॥ देवेन चोक्ता धरणी वराहवपुषा पुरा ॥ १७ ॥ उपवासव्रतपरा समुद्धृत्य रसातलात् ॥ व्रते
नानेन कल्याणि त्वयाहं परितोषितः ॥ १८ ॥ तस्मात्त्वसाऽस्मननुलं करोमि नवसुव्रते ॥ यथैव कुरुषे भक्त्या पूजां मम सु
शोभनाम् ॥ १९ ॥ तथैव तव कल्याणि प्रणतो यः करिष्यति ॥ व्रतमेतद्याश्रित्य पारणं च यथाविधि ॥ २० ॥ सर्व
बाधाविनिर्मुक्तो जन्मजन्मांतरादपि ॥ विशोकः सर्वकल्याणभाजनं स्यान्नसंशयः ॥ २१ ॥ यथा त्वमेव वसुधे सं
प्राप्ता निर्वृतिं परम ॥ तथा स परमं लोके सुखं प्राप्स्यति मानवः ॥ २२ ॥ एवमन्नेन्महापुण्यं सर्वपापप्रशान्तिदम्
विशोकाख्यं व्रतवरं तत्कुरुष्व महाव्रतम् ॥ २३ ॥ सम्यग्विशोककरणीन्च पूर्णिमा ने ख्याता मया मनुमहेन्द्रसमान
कीर्ते ॥ एवं करोति कुरुपुंगव यः प्रयत्नाच्छोकेन तस्य भवतीह कुलेपि पुंसः ॥ २४ ॥ ॥ इति श्री भविष्ये महापुरा
णे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे विशोकपूर्णिमाव्रतं नाम पंचाधिकशततमोऽध्यायः ॥ १०५ ॥ ॥
युधिष्ठिर उवाच ॥ सर्वकामानवाप्नोति समाराध्य जनार्दनम् ॥ प्रकारैर्बहुभिः कृष्ण यायान्यानि च्छति येन सा
१ ॥ नराणां स्त्रीणां च सर्वेषां नान्यच्छोकस्य कारणम् ॥ अपत्यादधिकं किंचिद्विद्यतेहात्र जन्मनिः ॥ २ ॥ स पुत्र

॥ रामः ॥
॥ १७० ॥

170

दीनानाथजनाश्रयम्·

नामहादुःखमतिदुःखंकुपुत्रता॥ सुपुत्रःसर्वलोकानांहेतुभूतोमतोमम॥ ३॥ धन्यास्तेयेसुतंप्राप्ताःसर्वदुःखवि
वर्जितम्॥ शान्तंप्रशान्तंबलिनंपरांनिर्वृतिमागतं॥ ४॥ सत्कर्माभिरतंनित्यंदेवद्विजपरायणम्॥ शास्त्रज्ञंसर्वधर्म
ज्ञंदीनानाथानुकंपिनम्॥ ५॥ विनिर्जितारिसर्वस्वंमनोहृदयनंदनम्॥ देवानुकूलतायुक्तंसम्यग्गुणेनव॥ ६॥
मित्रस्वजनसन्मानलब्धंनिर्व्वाणमननमम्॥ यःप्राप्नोतिसुतंतस्मान्नान्योधन्यतरोभवि॥ ७॥ सोऽहमेवंविधंध्योनं
कर्मेच्छमिमहामने॥ येनेदृग्लक्षणःपुत्रःप्राप्यतेभविमानवैः॥ ८॥ श्रीकृष्णउवाच॥ एवमेतन्महाभागपुत्राप्तु
त्रसमुद्भवम्॥ दुःखंप्रयात्यपन्नामंततयाल्लेहकेनचित्॥ ९॥ अत्रापिश्रूयतांवृत्तंयत्पूर्वंसमभवन्मुने॥ उत्पन्नोकार्तवी
र्यस्यहैहयस्यमहात्मनः॥ १०॥ कृतवीर्योमहीपालोहैहयोनामवैपुरा॥ तस्यशीलघनानामबभूववरवर्णिनी॥ ११॥
पत्नीसहस्रप्रवरामहिषीशीलमंडना॥ सात्वपुत्रामहाभागामैत्रेयींपर्यपृच्छत॥ १२॥ गत्वाचसत्त्वलाभायकृता
सनपरिग्रहम्॥ तयापृष्टाथसासम्यङ्मैत्रेयीब्रह्मवादिनी॥ १३॥ कथयामासपरमंनाम्नानंतव्रतंमहत् सर्वकाम
फलावाप्तिकारणंपापनाशनम्॥ १४॥ तस्याःसुपुत्रलाभायराजपुत्र्यास्तपस्विनी॥ मैत्रेय्युवाच॥ योयमिच्छेन्नरः
कामंनारीवावरवर्णिनी॥ १५॥ सनंतमाराध्यविभुंसमाप्नोतिजनार्दनात्॥ मार्गशीर्षेमृगशिरोभीमोयस्मिन्दि

॥ भवि पु ॥
॥ १७१ ॥

ते ऽ भवत् ॥ १६ ॥ तस्मिन्नं प्राशयगोमूत्रं स्नातो नियतमानसः ॥ पुष्पैर्धूपैस्तथा गंधै रूपवासैश्च भक्तितः ॥ १७ ॥ वामपा
दमनंतस्य पूजयेद्वरवर्णिनी ॥ अनंतः सर्वकामानामनंतं भगवान्फलम् ॥ १८ ॥ ददात्यनंतं च पुनस्तद्देवान्यत्र जन्म
नि ॥ अनंतपुण्योपचयमनंतं तं तु महाव्रतम् ॥ १९ ॥ यथा मिता षिता नाथि किंकुरुष्वे पुरुषोत्तम इत्युच्चार्याभिवन्द्यैनं प
थावद्विधिनातरः ॥ २० ॥ समाहितमना भूत्वा व्रतिपानपुरस्सरम् ॥ विप्राय दक्षिणां दद्यादनंतः प्रीयतामिति ॥
२१ ॥ समभ्यर्च्य ततो नक्तं भुंजीयात्तैलवर्जितम् ॥ तत[illegible] पौषे पुष्यर्क्षे तथैव भगवत्कृतिम् ॥ २२ ॥ वामांसमभ्यर्च्य येद्रत्वा गो
मूत्रप्राशनं ततः ॥ अनंतः सर्वकामानामिति चोच्चारयेत्पुनः ॥ २३ ॥ भुंजीत च यथा विप्रान्त्वावयित्वा यथा विधिः
माघे मघासु तद्वद्वाऽंदेवस्य पूजयेत् ॥ २४ ॥ स्कंधं च फाल्गुनायिसे फाल्गुने मा भा मिति ॥ वनुर्चितेषु गोमूत्रं प्राशये
त्स्वपतं दिति ॥ २५ ॥ ब्राह्मणाय तथा दद्यात्तिलान्कनकमेव च ॥ देवस्य दक्षिणा स्कंधं चैत्रे चित्रासु पूजयेत् ॥ २६ ॥ त
दैव प्राशनं चात्र पंचगव्यमुदाहृतम् ॥ विप्रवाचनिके दद्याद्यावान्मासवनुषयम् ॥ २७ ॥ वैशाखे च विशाखासु
बाहुं संपूज्य दक्षिणाम् ॥ तथैवोकान्यवान्स्यघालनक्तं कुर्याद्विजिक्रियाम् ॥ २८ ॥ ज्येष्ठासु कंठपूजां च ज्येष्ठमासि

१४२

॥ रामः ॥
॥ १७१ ॥

शुभव्रते ॥ आषाढस्य तथा पाठे कुर्यात्स्नानार्चनं शुभे ॥ २९ ॥ पादद्वयं तु श्रवणे श्रावणे मासि पूजयेत् ॥ घृतं
विप्राय दातव्यं प्राशनीयं यथाविधि ॥ ३० ॥ श्रावणादिषु मासेषु प्राशनं दानमेव च ॥ एतदेवं समाख्यातं देवांस्तु छत्र पूज
येत ॥ ३१ ॥ गुह्यं प्रोष्ठपदायोगे मासि भाद्रपदेऽर्चयेत् ॥ तद्वदाश्वयुजे पूजां हृदयं चाश्विनीषु च ॥ ३२ ॥ कुर्यात्स मार्गेऽति नम
नाः स्नानं प्राशनमर्चनम् ॥ अनंतशिरसः पूजां कार्तिके कृत्तिकासु च ॥ ३३ ॥ यस्मिन्यस्मिन्दिने पूजा तत्र तत्रानदादिने
नामानं तस्य जप्तव्यं भक्ष्यं तत्र स्वहितादिषु ॥ ३४ ॥ एतेनानंतमुद्दिश्य पूर्वमासचतुष्टयम् ॥ कुर्वीत होमं चैत्रादौ शालि
ना कुलनंदिनि ॥ ३५ ॥ क्षीरेण श्रावणादौ च होमं मासचतुष्टयम् ॥ प्रशस्तं सर्वमासेषु हविष्यान्नेन भोजनम् ॥ ३६ ॥
एवं द्वादशभिर्मासैः पारणात्रितयं शुभे ॥ व्रतावसाने चानंतं सौवर्णं कारयेच्छुभम् ॥ ३७ ॥ राजतं मुशलं चैव हलं पार्श्वेषु
विन्यसेत् ॥ पुष्पधूपादिनैवेद्यैः पूजा कार्या यथाविधि ॥ ३८ ॥ ताम्रपीठोपरि हरेर्मंत्रैरेभिर्यथाक्रमम् ॥ नमोऽस्त्वनंताय
शिरः पादौ सर्वात्मने नमः ॥ ३९ ॥ गोपाय जानुयुगलं कामायेति कटिं नमः ॥ नमो वासुदेवाय पार्श्वं संपूजयेद्धरेः ॥
४० ॥ संकर्षणायेत्युदरं भुजं सर्वास्त्रधारिणे ॥ कंठं श्रीकंठनाथाय मुखमिंदुमुखाय च ॥ ४१ ॥ हलं च मुसलं चैव स्व
नाम्ना पूजयेद्बुधः ॥ एवं संपूज्य गोविंदं सितवस्त्रविभूषितम् ॥ ४२ ॥ छत्रोपानहसंयुक्तं स्रग्दामालंकृतं तथा ॥ नक्ष

त्र देवताः पूज्या नक्षत्राणि च सर्वशः ॥ ४३ ॥ सोमो नक्षत्रराजा च मासः संवत्सरं तथा ॥ द्वादश्यां च घटान्कुर्यात्ततो यां
भ्याल्ल संपूजनात् ॥ ४४ ॥ एवं संपूज्य विधिवद्देवदेवं जनार्दनम् ॥ ब्राह्मणं पूजयित्वा च वस्त्रैराभरणैस्तथा ॥ ४५ ॥ कर्णांगुलैः
पवित्रैर्भक्ष्यान्नं दांतं जितेंद्रियम् ॥ पुराणज्ञं धर्मनिरतमव्यंगं सुप्रियंवदम् ॥ ४६ ॥ तस्मै देयं समस्तं तदनंतः प्रीयतामिति
अन्येषां ब्राह्मणानां च देयं शक्त्या यथेप्सितं ॥ ४७ ॥ अनेन विधिना पार्थ व्रतं चैतत्समाप्यते ॥ पारिते च समाप्नोति सर्वा
नेव मनोरथान् ॥ ४८ ॥ पुत्रार्थिभिर्वित्तकामैर्भक्तदारानभीप्सुभिः ॥ प्रार्थयद्भिश्च मर्त्यैः स्त्रीत्वारोग्यफलसंपदः ॥ ४९ ॥
एतद्व्रतं महाभागे पुण्यं स्वस्त्ययनप्रदम् ॥ अनंतव्रतसंज्ञं वै सर्वपापप्रणाशनम् ॥ ५० ॥ न क्रूरस्यैव देवि त्वं व्रतं शीलधने
परम् । वरिष्ठं सर्वलोकस्य यदि पुत्रमभीप्ससि ॥ ५१ ॥ श्रीकृष्ण उवाच ॥ इति शीलधना श्रुत्वा मैत्रेयीवचनं शुभम् ॥ चकारै
तद्व्रतवरं सा विधानाहितमानसा ॥ ५२ ॥ पुत्रार्थिन्या ततस्तस्या व्रतेनानेन सुव्रत ॥ विश्वस्तुतो घनुषे च विष्णोस्तासु
पुवैस्तुतम् ॥ ५३ ॥ तस्यां वै जातमात्रस्य पुववौ चानिलः शुभम् ॥ नीरजस्कमभूद्व्योम मुदं प्रापाखिलं जगत् ॥ ५४ ॥ देव
दुंदुभयो नेदुः पुष्पवृष्टिः पपात च ॥ प्रजगुर्देवगंधर्वा ननृतुश्चाप्सरोगणाः ॥ ५५ ॥ धर्मे मतिः समस्तस्य पार्थ लोकस्य चा
भवत् ॥ तस्य नाम पिता चक्रे तनयस्यार्जुनेति वै ॥ ५६ ॥ कृतवीर्यसुतत्वाच्च कार्तवीर्यो बभव सः ॥ तेनापि भगवान्विष्णु

172

शौर्यंवलं

सर्वेत्रैव वरं देवमसमत्वान्न भवेति च २

दत्तात्रेयात्परं प्राप्तवान् ॥ ५७ ॥ आराधितोऽत्रिमहतात्तनयस्तापार्थभूभृताम् ॥ तस्य तुष्टो जगन्नाथश्चक्रवर्तित्वमुत्तम
म् ॥ ५८ ॥ ददौ शौर्यं धनं चापि सकलान्यायुधानि च ॥ संवत्रैव च वधं दैमसत्वतो भवेदिति ॥ ५९ ॥ परं तु स्मरणं ज्ञानं भी
तानामार्तिनाशनम् स्मरणादुपकारित्वं जगतोऽस्य जगत्पते ॥ ६० ॥ तमाह देवदेवेशः पुण्डरीकनिभेक्षणः ॥ सर्व
मेतन्महाभाग तव भूयो भविष्यति ॥ ६१ ॥ यश्च प्रभाते रात्रौ च त्वां नरः कीर्तयिष्यति ॥ नमोऽस्तु कार्तवीर्यायेत्यभिधा
स्यति वै वचः ॥ ६२ ॥ तिलप्रस्थप्रदानस्य नरः पुण्यमवाप्स्यति भवषड्क्मना चैव तव नामानुकीर्तने ॥ ६३ ॥ भविष्यति
महीपालेन्तत्कालं प्रययौ हरीः सचापि वरमासाद्य प्रसन्नात्कृतउध्वजात् ॥ ६४ ॥ पालयामास भूपालः सप्तद्वीपां वसुंध
राम् ॥ तेनेष्टं विविधैर्यज्ञैः समाप्तवरदक्षिणैः ॥ ६५ ॥ जित्वारिवर्गमखिलं धर्मतः पालिताः प्रजाः ॥ अनंतव्रतमाहात्म्या
दासाद्य तनयं च तम् ॥ ६६ ॥ पितुः पुत्रोऽभवं दुःखं नासीत्तव त्वमपि प्रभो ॥ एवमेतत्समाख्यातमनंताख्यं व्रतं तव ॥ ६७ ॥
यत्कृत्वा राजपत्नी सा कार्तवीर्यमसूयत ॥ यश्चैतच्छृणुयाज्जन्म कार्तवीर्यस्य मानवः ॥ ६८ ॥ स्त्रीवादुःखमपत्योत्थं सप्त
जन्मानि नाप्नुते ॥ ६९ ॥ सैश्वर्यमप्रतिहतं परमं विवेकं पुत्रान्मित्रहृदयानि करान्व कृष्ण ॥ कृत्वा व्रतं तदिति यद्व्रतना
मधेयं प्राप्नोत्यनंतविभवस्य विभोः प्रसादात् ॥ ७० ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर

सौभाग्यमिष्टजननामसुखं वलोकात्सेवैसमतस्तु वदाः सुतमाभवंति २

संवादेऽनंतव्रतवर्णनं नाम षडधिकशततमोऽध्यायः ॥ १०६ ॥ युधिष्ठिर उवाच ॥ अप्राप्तेन तथा दुःखमैश्वर्याद्येन रो
त्तम ॥ यथा मनोरमैः स्वैः स्वैर्नानादुःखं भवेन्नृणाम् ॥ १ ॥ यथा मनोरथैर्लब्धैर्नस्या दुःखभयं नृणाम् ॥ ऐश्वर्यादिच्युतो वा
पि संततेर्देवलोकतः ॥ २ ॥ अभीष्टादन्यतो वापि यत्र येन विनिष्कृतिम् ॥ प्राप्नोति पुरुषो वाथ नारी वा पुत्रपसंचयातः ॥
३ ॥ तन्ममाचक्ष्व भगवन्येन नाप्नोति विच्युतिम् ॥ ॥ श्रीकृष्ण उवाच ॥ सत्यमेतन्महाभाग दुःखं प्राप्नोत्यसंशयः ॥ ४ ॥
ऐश्वर्योदयचित्तस्थंऽपवर्गसुखस्य च ॥ तदेतच्छृणु तां पार्थ यथा नेष्टात्परिच्युति ॥ ५ ॥ स्वर्गादेर्जायते त ह्युपवासव
तां सततम् ॥ चाद्रश्चाभागिताराजेंऽप्रतिमासं तृयाणि वै ॥ ६ ॥ तन्नाम्ना वा अनंतेषु सम्यक संपूजयेन्नृप ॥ पुष्पैर्धूपैस्तथा
भोभिरभीष्टैरपरैरपि ॥ ७ ॥ साधितः कृत्तिकां कृत्वा कार्तिके नृपसत्तम ॥ कृष्णारामचन्ने वैशं पर्वं मासचतुष्टयम् ॥ ८ ॥ नि
वेदयेन्माल्पूनादिसंयावं च ततः परम् ॥ आषाढादिषु देवाय पायसं विनिवेदयेत् ॥ ९ ॥ तेनैवान्नेन राजेंऽब्राह्मणान्भो
जयेद्बुधः ॥ पंचगव्यजलस्नानं तस्यैव प्राशनो कुवि ॥ १० ॥ सम्यक संपूज्य राजेंऽनंतमेव पुरुषोत्तमः ॥ प्रणम्य प्रार्थयेद्विद्वं
श्शुचिः स्नातो यथाविधि ॥ ११ ॥ नमो नमस्तेऽच्युत मे क्षयोस्तु पापस्य वृद्धिं समुपैतु पुण्यम् ॥ ऐश्वर्यवित्तादि तथाऽक्ष
यं मे क्षयं च मा संततिरभ्युपैतु ॥ १२ ॥ यथाच्युत त्वं परतः परस्मात्स ब्रह्मभूतः परतः परात्मा ॥ तथाच्युतं मे कुरु वांछि

173

तत्वं हरस्व पापं च नताप्रमेय ॥ १३ ॥ अच्युतानंत गोविंद प्रसीद यदभीप्सितम् ॥ तदक्षयममेयात्मन् कुरुष्व पुरुषोत्त-
म ॥ १४ ॥ एवमेतं समभ्यर्च्य प्रार्थयित्वा तथा द्विजम् ॥ नैवेद्यं स्वयमश्नीयाल्लक्ष्मीसंपूजिते च्युते ॥ १५ ॥ ततः संवत्सरस्यां-
ते सुखसुप्तोत्थिते ऽच्युते ॥ घृतपूर्णं ताम्रपात्रं ब्राह्मणाय निवेदयेत् ॥ १६ ॥ शक्तितो दक्षिणां दद्यादच्युतः प्रीयतामि-
ति ॥ ततस्तु सप्तमे वर्षे कुर्यादुद्यापनं बुधः ॥ १७ ॥ कार्या चैवाच्युतस्याग्रे शाला स्वर्णमयी नृप ॥ तदग्रे ब्राह्मणी स्था-
प्या स्थविरा सा भगा पली ॥ १८ ॥ महासती रौप्यमयीह मानार्हा सदेवता ॥ ततस्तौ पूजयित्वा च माल्यवस्त्रविलेपनैः
१९ ॥ मंत्रेणानेन राजेन्द्र प्रणिपत्य विधानतः ॥ शक्तितश्च ददत्तं चेताम्रपात्रं द्विजन्मने ॥ २० ॥ तदेकहेलया दद्या-
त्सहिरण्याक्षसंयुतम् ॥ गाश्च प्रदद्यात्संपूज्य सवत्साः कांस्यदोहनाः ॥ २१ ॥ एकां वा शक्तितो दद्यात्तस्मात्तु पतिकेश-
वः ॥ घृतासन्यात्रनिर्दिष्टाः सान्ताः पूर्णेन्दुलोज्ज्वलाः ॥ २२ ॥ छत्रोपानद्युगैः सार्धमेवं दत्त्वा विसर्जयेत् ॥ शय्यां स-
तूलिकां दद्याद्गृहं चोपस्करैः सह ॥ २३ ॥ प्रियया च सह विप्रं च पूजयेद्भूषयेत्स भक्त् ॥ वस्त्राभरणभोज्यैश्च प्रणिपत्य क्षमा-
पयेत् ॥ २४ ॥ कृतेनानेन राजेंद्र ऽच्युतिं नाप्नोति मानवः ॥ संततेः स्वर्गविज्ञादेरैश्वर्यस्य न चैव च ॥ २५ ॥ यदाभिमतनामस्व
च ततो नश्यते नरः ॥ तस्मात्सर्वप्रयत्नेन मासनक्षत्रपूजनैः ॥ २६ ॥ यजेताक्षयकामस्तु सदैव पुरुषोत्तमम् ॥

श्रीकृष्णउवाच॥ अत्रापिश्रूयतेकाचित्स्त्रिद्यास्वर्गेमहाव्रता॥ २७॥ नारीतपोधनाभक्त्याप्रख्यातासांभरायणी।
समस्तसंदेहहरासदास्वर्गौकसांहिसा॥ २८॥ कस्यचित्त्वथकालस्यदेवराजःशतक्रतुः॥ पूर्वेन्द्रचरितंराजन्सप्रच्छेदंबृ
हस्पतिम्॥ २९॥ पूर्वेन्द्राणांततःपूर्वेयेबभूवुःसुरेश्वराः॥ तेषांचरितमिच्छामिश्रोतुमंगिरसांवर॥ ३०॥ एवमुक्तस्तदा
तेनदेवेन्द्रेणामलद्युतिः॥ प्राहधर्मभृतांश्रेष्ठःपरमर्षिर्बृहस्पतिः॥ ३१॥ नाहंचिरंतनान्वेद्मिदेवराजसुरेश्वरान्॥ आत्म
नःसमकालीनमवेहिवसुरेश्वर॥ ३२॥ ततःप्रपच्छदेवेन्द्रःकोस्माभिर्मुनिपुंगवः॥ प्रष्टव्योऽत्रमहाभागकृतादिव
सतिर्दिवि॥ ३३॥ बृहस्पतिश्चिरंध्यात्वाततःप्राहशचीपतिम्॥ तपस्विनींमहाभागांपृच्छैतांसांभरायणीम्॥ ३४॥
इत्युक्तस्तेनदेवेंद्रःकौतूहलसमन्वितः॥ ययौयत्रमहाभागासेष्यायास्तेतपस्विनी॥ ३५॥ सातौदृष्ट्वासमायांतौदेव
राजबृहस्पती॥ सभ्यार्घ्येणसंपूज्यप्रतिपत्याहसुव्रता॥ ३६॥ नमोऽस्तुदेवराजायतथैवांगिरसेनमः॥ यद्वांकार्यं
महाभागौसकलंतद्विहोच्यताम्॥ ३७॥ यदिकर्तुंमयाशक्यंतत्करिष्येविमत्सरा॥ बृहस्पतिरुवाच॥ आवामभ्याग
तौप्रष्टुंत्वामत्यातिविवेकिनीम्॥ ३८॥ यच्चकार्यंमहाभागेप्रष्टुंतत्कथयत्वतः॥ यदिस्मरसिकल्याणिपूर्वेन्द्रचरिता
नितै॥ ३९॥ तदाख्याहिमहाभागेदेवेन्द्रस्यकुतूहलम्॥ सांभरायण्युवाच॥ योवैपूर्वंसुरेंद्रस्यततश्चप्रथमो

174

साहृष्टा ३ महाहनु ७

हृय ॥ ४० ॥ तस्मात्सर्वतरो यश्च तस्यापि पृथमश्च यः ॥ तेषां पर्वतराये च वेष्टितानां खिलानहम् ॥ ४१ ॥ तेषां च
वरितं कृत्स्नं जातानामंगिरसां वर ॥ मन्वन्तराण्यनेकानि सृष्टीश्च त्रिदिवौकसाम् ॥ ४२ ॥ सप्तर्षीन्वह्न्वेप्रिमनन्ता
वसुतानलपान ॥ एवमुक्तास्ततस्ताभ्यां सुहृष्टासांमरायती ॥ ४३ ॥ यथावदानवदनयोः पर्वेन्द्रवरितं महत ॥ स्वायंभु
मनो ६ वेयस्तु मनौ स्वारोचिषे वयः ॥ ४४ ॥ उत्तमे तामसे चैव रैवते वाक्षुषे तथा ॥ येव भवत्सुहिदेवेन्द्रास्तस्यतस्यतपस्विनी ॥
४५ ॥ तदा जगादवरितं यथावत्ताम्भरायती ॥ कथयामास वाश्चर्यं तत्त्वापि कथयामिति ॥ ४६ ॥ शंकुकर्णस्तदा दैत्यो
वभवासौ तदुर्जयः ॥ सतो कपालास्समरे विजित्य सहदेवनैः ॥ ४७ ॥ इंद्रस्यासाद्यमवनं शविवेशात्तु निर्भयः ॥ तेद
ष्ट्वा सहसा शापन्नः शक्रः शाप्यान्तहेऽलुठन ॥ ४८ ॥ जगोपसहसान्यातं शंकुकर्णो भयार्दितः ॥ दानवः शक्र आयतेन स्मि
न्नेपविवेशाह ॥ ४९ ॥ इंद्राण्यपि तथा भीता गता वाचस्पते र्गृहम ॥ अथ देवाः समाजग्मुर्भयाद्वक्षुसुरद्विषम ॥ ५० ॥
आसीनं शक्रमायने प्रणिपात पुरस्सराः ॥ वासुदेवोऽपि तत्रागातं दृष्टुदेवकंटकम ॥ ५१ ॥ दृष्ट्वा कृत्स्नमनेघापन्न
नवः शाहहर्षितः ॥ धन्योऽहं कृतकृत्योऽहं यस्य मे गृहऽध्य नः ॥ ५२ ॥ शक्रः शय्यासनस्थस्य क्षत्रस्य मे निकेशवः ॥ त
तः करे समालंब्य शयनात्प्याशामानयत ॥ ५३ ॥ वकारकंठग्रहणं वांधवस्येव हर्षितः ॥ ततः कृत्स्नमसहसा गरुडस्योर्ध्वा

स्कन्दपुराणे हिम २

शक्र२
शनैः शनैः ॥ ५४ ॥ पीड्यमानमविहस्तत्वदंतं मे रक्षात्ववान् ॥ ममार तन्न चेन्द्रोऽसौ बलाद्गजास्थिपंजरः ॥ ५५
निर्जगाम ततः शाख्यामलादगाविहृताः ॥ नृपश्च हरिमासीनं शंखचक्रगदाधरः ॥ ५६ ॥ एतद्दृष्टं मया शक्रउसंत्या
गुरसप्तनि ॥ ततः कृताञ्जलिपुटो देवराट्तां तपस्विनीम् ॥ ५७ ॥ उवाच ज्ञानासि कथं त्वमेनान्त्वां भरायणि ॥ सांभ
रायण्युवाच ॥ सर्वत्र च हि देवेन्द्राः स्वर्गस्थाये मरेश्वराः ॥ ५८ ॥ वमत्रुरेने चरितमेतेषां वेप्सितेन वै ॥ चरितं च मया ते
सांश्रुतं दृष्टं तथैव च ॥ ५९ ॥ इन्द्र उवाच ॥ किं कृतं वद धर्मज्ञे त्वया येनेयमक्षया ॥ स्वर्लोके वससतिः प्राप्ता यथा नान्ये
न केनचित् ॥ ६० ॥ अहो सर्वव्रतानान्तु तपोषितमथा कृतम् ॥ अथाष्टनरमन्यं तं स्वर्गगासप्रदं मतम् ॥ ६१ ॥ एवमुक्ता
ततस्तेन देवेन्द्रेणान तपस्विनी ॥ प्रत्युवाच महाभागा यथावत्सांभरायणी ॥ ६२ ॥ मासर्क्षे हृ ज्ञतो देवः प्रतिमासं
सुरेश्वर ॥ यथोक्तव्रतया सम्यक्सप्तवर्षाणि पूजित ॥ ६३ ॥ तस्यैवं कर्मणो व्युष्टिरज्ञताराधनस्य मे ॥ देवलोकादमि
मता देवराजपदस्थिति ॥ ६४ ॥ स्वर्गेन्द्र विभवैश्वर्यसंततिर्यातिचाश्रुतिम् ॥ नरो वाञ्छति तेनैत्यं तो घणी यस्ततः प्र
भ ॥ ६५ ॥ एतत्ते पूर्वदेवेन्द्र चरितं सकलं मया ॥ स्वर्गवासाक्षयत्वं च मासर्क्षाच्युतपूजनात् ॥ ६६ ॥ यथावत्कथितं
देवपञ्चतहिद्रनोश्वरः ॥ धर्मार्थकाममोक्षाश्च वाञ्छितानि वृषाधिप ॥ ६७ ॥ विष्णोराराधनादस्मात्परमेसिद्धिका

175

अपि·७

खंजाभ्र १

कारणम् ॥ तस्मात्त्वद्वचनं श्रुत्वा देवराज बृहस्पती ॥ ६८ ॥ तनयेत्स्वचनुः साध्वी चेरतुभ्यापितद्व्रतम् ॥ तस्मात्त्वार्थप्रय
त्नेन प्रतिमासं समाहितः ॥ ६९ ॥ मासमर्क्षाच्युतपद्मायां भवेथास्तन्मनाः सदा ॥ ७० ॥ येषां भगवत्ति कथाचरितव्रते
स्मिन्वर्णानि समग्रविधिनानुधियो नयंति ॥ ते स्वर्गलोकमभिगम्य कृताधिवासाः कल्पायुतायुतशतैरपि नच्यवंते
७१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सांभरायणीव्रतवर्णनं नाम सप्ताधिक
शततमोऽध्यायः ॥ १०७ ॥ युधिष्ठिर उवाच ॥ सुरूपता मनुष्याणां स्त्रीणां च यदुसत्तम ॥ कर्मणा जायते केन तन्म
माख्यातुमर्हसि ॥ १ ॥ सुरूपाणां सुगात्राणां सुवेषाणां तथैव च ॥ स्मृतं तथाधिकं वापि यथा नागं प्रजायते ॥ २ ॥ स
मस्तैः शोभनैरंगैर्नराः केचिद्यदूत्तम ॥ कारणैः कैस्ताश्च जायंते त्रुटितेश्च वर्णास्तथा ॥ ३ ॥ नराणां योषितां चैव समस्ता
ङ्गसुरूपता ॥ कर्मणा येन भवति तन्मे सर्वं कथयामल ॥ ४ ॥ लावण्यगतिवाक्यानि सति रूपे महामते ॥ कुर्वंत्यभ्यधिकां
शोभां समस्तपरमोगुणाः ॥ ५ ॥ वाक्यलावण्यसंस्कारविलाससललितागतिः ॥ विडंबनानुरूपाणां केवला साहि जा
यते ॥ ६ ॥ रूपकारणभूताय कर्मणा प्रयतो भवेत् ॥ तस्मात्तन्मे समाचक्ष्व कर्म यच्चारुरूपदम् ॥ ७ ॥ श्रीकृष्ण उवा
च ॥ सम्यक्पृष्टं त्वया हीदमुपवासाश्रितं नृप ॥ कथयामि यथा प्रोक्तं वसिष्ठेन महात्मना ॥ ८ ॥ वसिष्ठमृषिमासीनं

सप्तर्षिप्रवरं द्विजम् ॥ पप्रच्छारुन्धती पश्चाद्यदेतद्व्रतमव्ययम् ॥ ९ ॥ तस्यास्तु परिपृच्छन्त्या जगाद स मुनिसत्तमः ॥ यत्तच्छुष्व कौन्तेय ममेदं वदतोऽखिलम् ॥ १० ॥ वसिष्ठ उवाच ॥ श्रूयतां यदिदं पृष्टं त्वयैतद्वरवर्णिनि ॥ सुरूपता नराणां येन योषितां चोपजायते ॥ ११ ॥ अनभ्यर्च्य तु गोविन्दमनाराध्य च केशवम् ॥ रूपादिका गुणाः केन प्राप्यन्तेऽन्येन कर्मणा ॥ १२ ॥ तस्मादाराधनीयोऽयं विष्णुरेव यशस्विनि ॥ पारत्र्यं प्राप्तुकामेन रूपसंपन्नतादिकम् ॥ १३ ॥ यस्तु वाञ्छति धर्मज्ञे रूपं सर्वाङ्गसुन्दरम् ॥ नक्षत्रपुरुषं सम्यग्जितक्रोधो जितेन्द्रियः ॥ १४ ॥ सुस्नातः प्रयताहारः संपूजयति योऽच्युतम् भक्त्या योऽपि नरो वापि सुरूपाङ्गः प्रजायते ॥ १५ ॥ योषितां हि परं रूपमिच्छन्त्या जगतः पति ॥ स एवाराधनीयोऽत्र नक्षत्राङ्गो जनार्दनः १६ ॥ अरुन्धत्युवाच ॥ नक्षत्ररूपी भगवान्पूज्यते पुरुषोत्तमः ॥ मुने येन विधानेन तन्ममाख्यातुमर्हसि ॥ १७ ॥ वसिष्ठ उवाच ॥ चैत्रमासात्समारभ्य विष्णोः पादाभिपूजनम् यथा कुर्वीत रूपार्थं तन्निशामय यत्नतः ॥ १८ ॥ नक्षत्रमेकमेकं वै स्नातः सम्यगुपोषितः ॥ नक्षत्रपुरुषस्याङ्गं पूजयेच्च विचक्षणः ॥ १९ ॥ मूले पादौ तथा जङ्घे रोहिण्यामर्चयेच्छुभे जानुनी चाश्विनीयोगे आषाढे चोरुसंज्ञिते ॥ २० ॥ फाल्गुनीद्वितये गुह्यं कृत्तिकासु तथा कटिम् ॥ पार्श्वे भाद्रपदायुग्मे देकुक्षी रेवतीषु च ॥ २१ ॥ अनुराधासूरः पृष्ठं धनिष्ठास्वभिपूजयेत् ॥ भुजयुग्मं विशाखासु हस्ते चैव करद्वयम्

२२ ॥ पुनर्वसावंगुलीश्च आश्लेषासु तथा नखान् ॥ ज्येष्ठायां पूजयेद्ग्रीवां श्रवणे श्रवणौ तथा ॥ २३ ॥ पुष्ये मुखं तथा
स्वातौ दन्तानानभिपूजयेत् ॥ आस्यं शतभिषग्योगे मघायोगे च नासिकाम् ॥ २४ ॥ मगोत्तमांगे नयने पूजयेद्भक्तितः
शुभे चित्रायोगे ललाटं च भरणीषु तथा शिरः ॥ २५ ॥ संपूजनीया विद्वद्भिरार्द्रायां च शिरोरुहाः ॥ उपोषितो नरो भद्रे
स्नानमभ्यंगपूर्वकम् ॥ २६ ॥ वर्जनीयं प्रयत्नेन रूपघ्नं नदि निर्दिष्टोत ॥ पूजयेत्तु नक्षत्रं नक्षत्रस्य च दैवतम् ॥ २७ ॥ सो
मं नक्षत्रराजानं स्वमंत्रैरर्चयेद्बुधः ॥ प्रतिनक्षत्रयोगे च भोजनीया द्विजोत्तमाः ॥ २८ ॥ नक्षत्रज्ञाय विप्राय दानं दद्याच्च
शक्तितः ॥ अंतराये समुत्पन्ने सूतकाशौचकारिते ॥ २९ ॥ उपोष्याग्राचोपविष्टोन्नक्षत्रमपरं पुनः ॥ एवं माघावसाने
तु व्रतपारः समाप्यते ॥ ३० ॥ समाप्तेन्तु व्रते दद्याच्छय्यासोपस्करान्वितम् ॥ नक्षत्रपुरुषं हैमं पूजयेत्तु शक्तितः ॥ ३१
ब्राह्मणं ब्राह्मणीं चैव वस्त्रालंकारभूषणैः ॥ शय्यायां तु समासन्नं गंधमाल्यानुलेपनैः ॥ ३२ ॥ सप्तधान्यं यथालाभं गां
सवत्सां पयस्विनीम् ॥ छत्रोपानद्युगं चैव घृतपात्रं तथैव च ॥ ३३ ॥ मंत्रेणानेन विप्राय सुशीलाय निवेदयेत् ॥ य
थान विश्लेषमृक्षाणां वृजिनं जायते क्वचित् ॥ ३४ ॥ तथास्तु रूपतारोग्यसुखसंपदिहास्तु मे ॥ यथा न लक्ष्म्या शयनं त
व शून्यं जनार्दन ॥ ३५ ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ एवं निवेद्य तत्सर्वं प्रणिपत्य क्षमापयेत् ॥

३६ ॥ शक्तिहीनस्तु गां दद्यात् घृतपात्रसमन्वितम् ॥ नक्षत्रपुरुषाख्योऽयं यथावत्कथितस्तव ॥ ३७ ॥ पापापनोदं
कुरुते सम्यग्वृद्धुख्यावतां सताम् ॥ अंगोपांगानि चैवास्य पादादीनि यथास्थिति ॥ ३८ ॥ सुरूपाण्यभिजायन्ते सदा जन्मान्त
राणि वै ॥ गात्राणि चैव भङ्गाणि शरीरारोग्यमुत्तमम् ॥ ३९ ॥ संततिं मनसः प्रीतिं रूपं चातीव शोभनम् ॥ वाङ्माधुर्यं तथा
कांतिं यच्चान्यदपि वांछितम् ॥ ४० ॥ ददाति नक्षत्रपुमान्स जितश्च जनार्दनः ॥ वसिष्ठेन यथाख्यातं सर्वं तत्ते निवेदित
म् ॥ ४१ ॥ नक्षत्रपुरुषं नाम व्रतानामुत्तमोत्तमम् ॥ ४२ ॥ हृषाकृजानुनपनोहनि तं व भागं दश्वैः पुकस्यस्तुतं पुरुषोत्तम
स्य ॥ ये पूजयंति जितकोपमनोविकाराः कौंतेय ते न तु भवंति सुरूपदेहाः ॥ ४३ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे नक्षत्रपुरुषव्रतवर्णनं नामाष्टाधिकशततमोध्यायः ॥ १०८ ॥ ॥ युधिष्ठिर उवाच ॥ उपवासे
ष्वशक्तस्य नरदेव फलमिच्छतः ॥ अनभ्यासेन योगाद्वा किमिष्टं व्रतमुच्यते ॥ १ ॥ शिवस्योपरि यस्यास्ति भक्तिः सर्वस्य संभवेत् ॥
नक्षत्राख्यं व्रतं तेन कथं कार्यं वदस्व मे ॥ २ ॥ श्रीकृष्ण उवाच ॥ उपवासेष्वशक्तानां नक्तंभोजनमिष्यते ॥ अस्मिन्व्रते तदप्य
त्र श्रूयतामभयं महत् ॥ ३ ॥ शिवनक्षत्रपुरुषं शिवभक्तिप्रदायकम् ॥ यस्मिन्नक्षत्रयोगेन पुराणज्ञाः प्रचक्षते ॥ ४ ॥ फा
ल्गुनस्यामले पक्षे यदा हस्तं प्रजायते ॥ तदा ग्राह्यं व्रतं चैव नक्तेन शिवपूजनम् ॥ ५ ॥ शिवायेति च हस्तेन पादौ पूज्यतमो

127

अंगुल्यौ

स्मृतौ ॥ शंकरायनमो गुल्फौ पूज्यौ चित्रासु पांडव ॥ ६ ॥ भीमायेति च स्वातीषु पूजयेत्सुरूषर्षभ ॥ जुरूद्वयं विशाखा
सु त्रिनेत्रायेति पूजयेत् ॥ ७ ॥ मेढ्रं चैवानुराधासु अनंगांगहराय च ॥ कटिं ज्येष्ठासु चंन तथा गुरज्येष्ठेति चार्थयेत ॥ ८ ॥ ना
रायणनमो नाभिः पूज्या मूलेन भक्तिनः ॥ पूर्वोत्तराषाढयुगे पार्श्वे वै पार्वतीपतिः ॥ ९ ॥ श्रवणेन तथा कुक्षी पूज्ये क
पालिनेति च ॥ वक्षःस्थलं धनिष्ठासु सद्योजातेति नाम च ॥ १० ॥ वामेति पूजयेत्पार्श्वं हृदयं शतभिषासु च । पूर्वोत्तरा
युगे बाहू नमः खट्वांगधारिणे ॥ ११ ॥ पूज्यं रुद्राय च तथा रेवतीषु ऊरुद्वयम् ॥ नखाः पूज्या अश्विनीयोगे नमः खण्डेन्दु
धारिणे ॥ १२ ॥ भरणीषु ततः पृष्ठं वृषांकाय नमोऽस्तु ते ॥ कृत्तिकासाय च तथा कृत्तिकासु कृकाटिकाम ॥ १३ ॥ वाक्पू
ज्या रोहिणीयोगे नमो वाचस्पतेति च ॥ मृगोत्तमांगे दृष्टानां नमैरवायेति वै नमः ॥ १४ ॥ आर्द्रासु पूज्या अधरौस्था
लावेति युधिष्ठिर ॥ नासा पुनर्वसौ पूज्या पूषदन्तविनाशिने ॥ १५ ॥ पुष्ये नेत्रत्रयं पूज्यं नमस्ते सर्वदर्शिने ॥ आ
श्लेषायां ललाटं च त्र्यम्बकाय नमो नमः ॥ १६ ॥ मघासु च जटाजूटं पूजयेदंधकारये ॥ पूर्वाफाल्गुनिकायुग्मे भ्र
वणौ सोमधारिणे ॥ १७ ॥ नमोऽस्तु पार्श्वांकुशपाशशूलकपालसर्पेन्दुधनुर्धराय ॥ गजासुरानंगपुरान्धकादिवि
नाशमूलाय नमः शिवाय ॥ १८ ॥ शिरः संपूजयेद्यान्ततो धूपविलेपनम् ॥ ततस्तु रात्रौ भोक्तव्यं तैलक्षारविवर्जि

तम् ॥ १९ ॥ स्थापयेत्तंडुलप्रस्थं घृतपात्रेण संयुतम् ॥ दद्यात्सर्वं भनक्ते भ्रब्राह्मणाय नृपोत्तमः ॥ २० ॥ शास्त्रभावेन दो-
षः स्यादधिके चाधिकं फलम् ॥ नक्षत्रयुगले प्राप्ते नक्तयुग्मं समाचरेत् ॥ २१ ॥ सूतकाशौचदोषे तु पुनरन्यदुपोषयेत्।
एवं क्रमेण संप्राप्ते पारणे पांडवादिके ॥ २२ ॥ ब्राह्मणान्भोजयेच्छक्त्या गुडक्षीरघृतादिभिः ॥ कांचनं कारयेद्देवमुमया
सह शंकरम् ॥ २३ ॥ शय्यां तु लक्षणां कृत्वा विहस्त्रंपि वर्जिताम् ॥ सोपधानकविश्रामां स्वास्तरावरणां शुभाम् ॥ २४
भाजनोपानहच्छत्रचामरासनदर्पणैः ॥ भूषणैरपि संयुक्तां फलवस्त्रानुलेपनैः ॥ २५ ॥ तस्यां निधाय तं देवमलंकृ-
त्य गुणान्वितम् ॥ कपिलां वस्त्रसंवीतां भ्रुविशीलां पयस्विनीम् ॥ २६ ॥ सुवर्णशृंगीं रौप्यखुरां सवत्सां कांस्यदोहनाम्।
दद्यात्संचेण पूर्वाह्ने न कालमपि लंघयेत् ॥ २७ ॥ यथा न देवशयनं तव पर्वतजातया ॥ शून्यं त्वयाथ संतत्या तथा मे
संतु सिद्धयः ॥ २८ ॥ यथा देवनश्रेयोऽर्थं त्वदन्यो विद्यते क्वचित् ॥ तथा मामुद्धराशेषदुःखसंसारसागरात् ॥ २९ ॥
ततः प्रदक्षिणीकृत्य प्रणिपत्य विसर्जयेत् ॥ शय्यागवादिकं सर्वं द्विजस्य भवनं नयेत् ॥ ३० ॥ नैतद्विशीलाय न दांभि-
काय कुतर्कदुष्टाय विनिंदकाय ॥ प्रकाशनीयं व्रतमिंदुमौलेर्यश्चापि लोभोपहतांतरात्मा ॥ ३१ ॥ भक्ताय दांताय गु-
णान्विताय प्रदेयमेतच्छिवभक्तियुक्तैः ॥ इदं महापातककृन्तशाणमप्यक्षयं वेदविदो वदंति ॥ ३२ ॥ या चाथ नारी

ब्राह्मणास्य२

कुरुतेऽतिभक्त्याभर्त्तारमाश्रित्यप्रभुंगुरुंवा॥नवंधुपुत्रैर्नधनैवियोगमाप्नोतिदुःखंनसुहृत्समुत्थम्॥३२
यावाथनारीकुरुतेऽतिभक्त्याभर्त्तारमाश्रित्यप्रभुंगुरुंगा॥नवंधुपुत्रैर्नधनैर्वियोगामाप्नोतिदुःखंनसुहृत्स
मुत्थम्॥३३॥इदंवसिष्ठेनपुराऽर्जुनेनकृतंकुवेरेणपुरंदरेण॥यत्कीर्त्तनादप्यखिलानिपापानिविध्वंसमायां
तिनसंशयोत्र॥३४॥इतिपठतिशृणोतिवायइत्थंशिवपुरुषंपुरुहूतवद्वभःस्यात्॥अपिनरकगतान्पि
तृनशेषाञ्छिवभवनंनयतीहयःकरोति॥३५॥ ॥इतिश्रीभविष्योत्तरमहापुराणेउत्तरपर्वणिश्रीकृष्णयु
धिष्ठिरसंवादेशिवनक्षत्रपुरुषव्रतंनामनवोत्तरशततमोऽध्यायः॥ १०९॥ ॥ श्रीयुधिष्ठिरउवाच॥
यदिकर्त्तुंनशक्नोतिव्रतंनक्षत्रपौरुषम्॥गृहीतारंभसाकल्यमन्यद्वाव्रतमुत्तमम्॥१॥संपूर्णंजायतेयेनयद
वीर्णंपुरास्थितम्॥कृष्णप्रसादंयुष्माकमेतन्मेवक्तुमर्हसि॥२॥श्रीकृष्णउवाच॥साधुसाधुमहाबाहोकुरुरा
जयुधिष्ठिर॥रहस्यानांरहस्यंतेकथयामिव्रतोत्तमम्॥३॥संपूर्णंनामनाम्नापिव्रतंसर्वफलप्रदम्॥यच्ची
र्णंनरनारीभिर्भवेत्संपूर्णकारकम्॥४॥सवर्णैनच्चकर्त्तव्यमक्षीणफलकांक्षिभिः॥किंचिद्गतंप्रमादेनयद्व
तंव्रतितांस्थितम्॥५॥ तत्संपूर्णंभवेत्सर्वंव्रतेनानेनपालव॥उपद्रवैद्रुविधैर्मन्मोहाच्चपार्थिव॥६॥

संपूर्णफलकांक्षिभि२ २क्रुस

॥ भवि ॥
॥ १२२ ॥

२ कुसुमादिना ५

यज्ञगतं किंचिदेवस्याद्भुतं विघ्नविनायकैः ॥ तत्सर्वं पूर्णं भवेत्सार्थसत्यं सत्यं न संशयः ॥ ७ ॥ कांचनं रौप्यकं रू-
प्यं शिलिनां तद्दापयेत् ॥ भगवद्भूते तु योदेवस्तत्स्वरूपं कृ निर्मितम् ॥ ८ ॥ रूप्यं स्त्रीपुंसयोर्वापि ताम्रध्वंयद्भूते कि-
ल ॥ नव निष्पादितं किंचिद्दैवात्सर्वं तथोत्थितम् ॥ ९ ॥ द्विभुजं पंकजारूढं सौम्यबृहस्तिनाननम् ॥ निष्पादितं शि-
ल्पभावात्तस्मिन्नेव दिनेऽदिने ॥ १० ॥ तन्नामे च पुत्रः प्राप्ते बालगणो विधिनाग्रहे ॥ स्नापयेत्स यथासाद ध्याघृतक्षीर-
रसांबुभिः ॥ ११ ॥ गंधवं दन्तपुष्पैश्च चर्चयेत्कुंकुमादिना ॥ नैवेद्यपूर्णास्वकं भक्ष्यपक्वानि विन्यस्य वंदनैः ॥ १२ ॥ धूपदी-
पाक्षतैर्वस्त्रैरत्नैरपुपहारकैः ॥ अर्घ्यं दद्याच्च तन्नाम्ना मासं त्रैतानेन पांडव ॥ १३ ॥ उपसन्नस्य दीनस्य प्रायश्चित्तकृतोज्ज-
लैः ॥ वारणां च प्रपन्नस्य कुरुष्वाघ दयां प्रभो ॥ १४ ॥ परत्र भयभीतस्य भग्नखंड व्रतस्य च ॥ कुरु प्रसादं सं पूर्णं व्रतं सं-
पूर्णमस्तु मे ॥ १५ ॥ तव च्छिद्रं व्रतं च्छिद्रं यच्छिद्रं भग्नके व्रते ॥ तव प्रसादाद्देवेश सर्वमच्छिद्रमस्तु नः स्वाहा ॥ १६ ॥
अमुकदेव उमा च ॥ पूर्वतो दक्षिणतः पश्चिमत उत्तरतः ॥ विदिक्षु चोपर्यधस्तात् दिक्पालेभ्यो नमोनमः ॥ १७ ॥
इमर्घ्यमिदं पाद्य नैवेद्यं ते नमोनमः ॥ एवं प्रोच्यत ततः पादौ जानुनी कटि शीर्षके ॥ १८ ॥ वक्षः कुक्षि दृष्टि पृष्ठ वा-
हे स्वांकशिरोरुहान ॥ पूजयेत्तस्य देवस्य ततः पश्चात् क्षमापयेत् ॥ १९ ॥ पूजितस्त्वं यथाशक्त्या नमस्तेऽस्तु सुरोत्त

वस्त्रकुम्भी २

179

॥ रामः ॥
॥ १२२ ॥

म॥ हे हि कारुणिकश्रीनाथ कार्यसिद्धिं दिशस्व मे॥२०॥ एवं समापयित्वा तु देवरूपं विधानतः॥ ततो द्विजस्य कौ
न्तेय विधियत्यो पपादयेत्॥२१॥ स्थित्वा पूर्वमुखो विप्रो गृह्णीयाद्दर्भपाणिना॥ विप्रस्य हस्तेय कुंचदाता वै
वोत्तराम्मुखः॥२२॥ मंत्रेणानेन कौन्तेय सोपवासः प्रयत्नतः॥ इदं व्रतं मया देवं कृतमासीत्त्वरा द्विज॥२३॥ भग
वंस्त्वत्प्रसादेन संपूर्णं नदिहास्तु मे॥ ब्राह्मणाः पिप्रतीगृह्णन्तु मंत्रेणानेन नद्व्रतम्॥२४॥ वाक्ये पूर्णे मनः पूर्णं
पूर्णकामं व्रतेन ते॥ संपूर्णस्य प्रसादेन भव पूर्णमनोरथः॥२५॥ ब्राह्मणा यामिमां चैते ह्यनुमोदन्ति देवताः॥
सर्वदेवमया विप्रा नैतद्वचनमन्यथा॥२६॥ जलधिः क्षारतां नीतः पावकः सर्वभक्षताम्॥ सहस्रनेत्रः शक्रोपि
कृतो विप्रैर्महात्मभिः॥२७॥ ब्राह्मणानां तु वचनाद्ब्रह्महत्या प्रणश्यति॥ अश्वमेधफलं साग्रं प्राप्यते नात्र संशयः
२८॥ तस्माद्वाल्मीकिवचनाद्ब्राह्मणवचनाच्च गर्गगौतमपराशरधौम्यांगिरसवसिष्ठनारदादिमुनिवचना
त्संपूर्णं भवतु ते व्रतम्॥ एवं विधिविधानेन गृहीत्वा ब्राह्मणो व्रजेत्॥ तद्दानं चेषयेत्सर्वं ब्राह्मणस्य गृहे स्वयम्
२९॥ ततः पंचमहायज्ञान्निर्वपेद्भोजनादिव॥ एवं यः कुरुते भक्त्या व्रतमेनत्सुकृतथा॥३०॥ तस्य संपूर्णतां
याति न व्रतं यत्त्वराश्रितम्॥ एवं संपूर्णतां याति प्रसन्ने व्रतदैवते॥३१॥ संपूर्णं च ततः कृत्वा संपूर्णांगो भवेद्व्रती

प्रापयेत् २

॥ भवि ॥
॥ १८० ॥

भोगी भव्यो लसत्कीर्त्तिः स्वसंपूर्णमनोरथः ॥ ३२ ॥ स्थित्वा वर्षशतान्तं मर्त्ये ततः स्वर्गे ऽमरो भवेत ॥ यथेष्टचेष्टा
चारी च ब्रह्मविष्णिन्द्रपूजितः ॥ ३३ ॥ स्थित्वा वर्षशतं मर्त्ये ततः स्वर्गे ऽमरो भवेत् ॥ यथेष्टचेष्टावीचब्रह्मविषिन्द्रपू
जितः ॥ ३३ ॥ स्वर्गलोके चिरं स्थित्वा पुनर्मोक्षमवाप्नुयात ॥ प्रायश्चित्तमिदं प्रोक्तं पुरा गर्गेण मे प्रभो ॥ ३४ ॥ गोकुले गो
कुलाकीर्णे मया बाल्ये ऽप्युपोषितम् ॥ एवं त्वमपि कौन्तेय व्रतसंपूर्णकं व्रतम् ॥ ३५ ॥ भग्नानि यानि मदमोहवशाद्देही
त्वा जन्मान्तरेषु पिनरेणासमस्तरेणां ॥ संपूर्णपूजनपरस्य पुरो भवंति सर्वव्रतानि परिपूर्णफलप्रदानि ॥ ३६ ॥ ॥
इति भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संपूर्णव्रतवर्णनं नाम दशोत्तरशततमो ऽध्यायः ॥ ११०
युधिष्ठिर उवाच ॥ वर्णाश्रमाणां प्रभवः पुराणेषु मया श्रुतः ॥ पतापस्त्रीणां समाचारं श्रोतुमिच्छामि तत्वतः ॥ १ ॥ काया
सां देवता कृष्ण किं व्रतं किमुपोषितम् ॥ केन धर्मेण चैवैताः स्वर्गमाप्स्यंत्यनुत्तमम् ॥ २ ॥ श्रीकृष्ण उवाच ममपत्नी
सहस्राणि संति षोडशषोडशः ॥ रूपौदार्यगुणोपेता मन्मथायतनाः शुभाः ॥ ३ ॥ ताभिर्वसंतसमये कोकिलालि
कुलाकुले ॥ पुष्पितोपवनोत्फुल्लकह्लारसरसां तटे ॥ ४ ॥ निर्भरायानगोष्ठीषु प्रसक्ताभिरलंकृते ॥ कुरंगनयनैः
श्रीमान्मालतीकृतशेखरः ॥ ५ ॥ उक्कन्तसमीपमार्गेण सांवः परपुरंजयः ॥ साक्षात्कन्दर्परूपेण सर्वाभरणभू

180

॥ रामः ॥
॥ १८० ॥

षितः॥ ६॥ अनंगशरतप्ताभिः साभिलाषमवेक्षितः॥ प्रद्युम्नो मन्मथस्तासां सर्वांगक्षोभदायकः॥ ७॥ निरी
क्ष्य तन्महं सर्वविकारं ज्ञानचक्षुषा॥ अज्ञायंत ऋषिभिः सर्वा हरिध्यंतीहृदस्ववः॥ ८॥ मयि स्वर्गमनुप्राप्ते भवतीः का
मसंमोहिताः॥ एतद्वाक्यमुपश्रुत्य वाष्पपर्याकुलेक्षणाः॥ ९॥ मामूचुर्वदगोविंद कथमेतद्भविष्यति॥ भर्तारं ज
गतामीशं भवंतमपराजितम्॥ १०॥ दिव्यानुभावां वपुरीं रत्नवंति गृहाणि च॥ द्वारिकावासिनः सर्वा देवरूपा
न्कुमारकान्॥ ११॥ भगवन्सर्वलोकस्य कथं भोग्या भवामहे दासभावमनुप्राप्य भविष्यामः कथं पुनः॥ १२॥ को
धर्मः कः समाचारः कथं तृप्तिर्भविष्यति॥ तथा लालप्यमानानास्ता वाष्पपर्याकुलेक्षणाः॥ १३॥ मया प्रोक्ता युवत्य
स्ताः संतापस्त्यज्यतामयम्॥ जलक्रीडाविहारे तु पुरा सरसि मानसे॥ १४॥ भवतीनां सगर्वाणां नारदोऽप्याश्रमाग
तः॥ कृताश्रानकृता सर्वा भवंत्योऽप्सरसः पुरा॥ १५॥ अपुराम्यावहेले येन परिहृष्टः स योगवित्॥ कथं नारायणोऽ
स्माकं भर्ता स्यादित्युपादिशत्॥ १६॥ तस्मात्कृतव्रतानां च शापदानमभूत्पुरा॥ शाप्याद्यपुरानेन मधुमाधवमास
योः॥ १७॥ सुवर्णोपस्करोत्सर्गान्द्वादश्यां शुक्लपक्षतः॥ भर्ता नारायणो नूनं भविष्यत्यत्र जन्मनि॥ १८॥ तत्कृतो
यत्रणा मोमे रूपसौभाग्यमत्सरात्॥ परं पष्टोऽस्मिन्नेनाभूद्वियोगो वो भविष्यति॥ १९॥ चौरैरपहृताः सर्वा वे

रूपान्त्वं समवाप्स्यथ ॥ एवं नारदशापेन मच्छापेन च सांप्रतम् ॥ २० ॥ न कार्यः संभ्रमः कश्चिद्दासत्वं वो भविष्य-
ति ॥ इदानीमपि यद्दस्येन कृतं ध्वंसं वराननाः ॥ २१ ॥ पुरा देवासुरे युद्धे हतेषु दानवाः पुनः ॥ दानवासुरसैन्येषु रा-
क्षसेषु जननं ततः ॥ २२ ॥ तेषां नारीसहस्राणि ज्ञानशोऽथ सहस्रशः ॥ परिणीतानि यानि स्युर्बलात्कृतानि यानि
वै ॥ २३ ॥ तानि सर्वाणि देवेशाः प्रोवाच वदतां वरः ॥ वेश्याधर्मेण वर्तध्वमधुना नृपमंदिरे ॥ २४ ॥ भविष्यन्त्यो व-
रारोहास्तथा देवकुलेषु च ॥ राजानः स्वामिनः स्तत्था बालता भवदङ्किताः ॥ २५ ॥ तेषां गृहेषु नित्यध्वं सूनकं
वापितं त्सदा ॥ भविष्यति च सौभाग्यं सर्वासामपि शार्ङ्गिनः ॥ २६ ॥ न चैकस्मिन् रतिः कार्या पुरुषे धनवर्जिते ॥ अ-
नुमान्यः प्रसादश्च शुल्कदो देववत्सदा ॥ २७ ॥ सुरूपो वा विरूपो वा ह्यनेन न प्रयोजनम् ॥ न तत्र जातिक्रमः कार्यो ब्र-
ह्महत्यामवाप्नुयात् ॥ २८ ॥ न चापि मद्यपाभिश्च भाव्यं कौटिल्यबुद्धिभिः ॥ यः कश्चित्कुलकमादाय गृहमेष्यति
वः सदा ॥ २९ ॥ निष्कपटेनैवोपहार्येण सर्वदंभवर्जितम् ॥ व्यभिचारो न कर्तव्यः स्वामिना सह कर्हिचित् ॥ ३० ॥
रूपयौवनदर्पेण धनलोभेन वा पुनः ॥ दासी भूत्वा तथा काचिद्व्यभिचारं करोति च ॥ ३१ ॥ पतिना सह पापिष्ठा
पापिष्ठां यात्यधोगतिम् ॥ देवतानां पितॄणां च पुण्येऽह्नि समुपस्थिते ॥ ३२ ॥ गोभूहिरण्यधान्यानि प्रदेया

181

स्वामिना

निचग्राक्षितः ॥ ब्राह्मणोथ्योवरारोहाः कार्याणिवचनानिच ॥ ३३ ॥ यच्चान्यत्कृतंसम्यगुपदेश्यामितत्त्वतः
३४ ॥ संसारोत्तारणायालमेतद्देविविदोविदुः ॥ यदासूर्यदिनेप्राप्तेपुष्योवाथपुनर्वसुः ॥ ३५ ॥ भवेत्तत्रौषधिस्नानंसम्यक्
नारीसमाचरेत् ॥ तदापंचशरस्यापिसंनिधानत्वमेष्यति ॥ ३६ ॥ अर्चयेत्पुण्डरीकाक्षमनंगस्यापिकीर्तनम् ॥ का
मायपादौसंपूज्यजंघेवैमोहकारिणे ॥ ३७ ॥ मेढ्रंकंदर्पनिधयेकटिंप्रीतिमुजेनमः ॥ नाभिंसौख्यसमुद्रायवामनायत
थोदरम् ॥ ३८ ॥ हृदयंहृदयेशायस्तनावाह्लादकारिणे ॥ उत्कंठायेतिवैकंठमास्यमानंदजायच ॥ ३९ ॥ वामांसंपुष्पचापा
यपुष्पबाणायदक्षिणम् ॥ नमोऽनंतायवैमौलिंविलोलायेतिवध्वजम् ॥ ४० ॥ सर्वात्मनेशिरस्तद्देवदेवस्यपूज
येत् ॥ नमःश्रीपतयेतार्क्ष्यध्वजांकुशाधरायच ॥ ४१ ॥ गदिनेपीतवस्त्रायशंखिनेचक्रिणेनमः ॥ नमोनारायणाये
तिकामदेवात्मनेनमः ॥ ४२ ॥ नमःशान्त्यैनमःप्रीत्यैनमोरत्यैनमःश्रियै ॥ नमःपुष्ट्यैनमस्तुष्ट्यैनमःसर्वार्थदेति
च ॥ ४३ ॥ एवंसंपूज्यगोविंदमनंगात्मकमीश्वरम् ॥ गंधैर्माल्यैस्तथाधूपैर्नैवेद्यैश्चभामिनी ॥ ४४ ॥ अत्रचाहू
यधर्मज्ञंब्राह्मणंवेदपारगम् ॥ अव्यंगावयवंपूज्यगंधपुष्पादिभिस्तथा ॥ ४५ ॥ शालेयतंडुलप्रस्थंघृतपात्रेणसं
युतम् ॥ तस्मैविप्रायसादद्यान्माधवःप्रीयतामिति ॥ ४६ ॥ यथेष्टाहारयुक्तंचतमेवद्विजसत्तमम् ॥ रत्यर्थंकामदे

॥ भवि ॥
॥ १८२ ॥

तोः यामिनि विनेः वधार्यव ॥ ४७ ॥ यद्यदिच्छति विप्रेंद्रस्तत्तत्कुर्याद्विलासिनी ॥ सर्वभावेन चात्मानमर्पयेत्स्मित
भाषिणी ॥ ४८ ॥ एवमादित्यवारेण सदा तद्व्रतमाचरेत् ॥ तंडुलप्रस्थदानं च यावन्मासांस्तु द्वादश ॥ ४९ ॥ त
तस्त्रयोदशे मासि संप्राप्ते तस्य भामिनी ॥ विप्रस्योपस्करैर्युक्तां शय्यां दद्याद्विलक्षणाम् ॥ ५० ॥ सोपधानकविश्रा
मां सास्तरावरणां शुभाम् ॥ दीपिकोपानहच्छत्रपादुकासनसंयुताम् ॥ ५१ ॥ सपत्नीकमलंकृत्य हेमसूत्रांगु
लीयकैः ॥ सूक्ष्मवस्त्रैः सकटकैर्धूपमाल्यानुलेपनैः ॥ ५२ ॥ कामदेवं सपत्नीकं गुडकुंभोपरि स्थितम् ॥ ताम्रपा
त्रासनगतं हेमनेत्रपटावृतम् ॥ ५३ ॥ सकांस्यभाजनोपेतमिक्षुदंडसमन्वितम् ॥ दद्यादेतेन मंत्रेण तथै
कां गां पयस्विनीम् ॥ ५४ ॥ यथांतरं न पश्यामि कामकेशवयोः सदा ॥ तथैव सर्वकामाप्तिरस्तु विष्णो सदा
मम ॥ ५५ ॥ यथा न कामिनी देहात्प्रयाति तव केशव ॥ तथापि मम देवेशशरीरं स्वं यतिकृतः ॥ ५६ ॥ तथैव का
ञ्चनं दैवं प्रतिगृह्णाद्विजोत्तमः ॥ क इदं कोऽदात्कस्मा अदात्कामः कामायादात् कामो दाता कामः प्रतिग्रहीता का
मः समुद्रमाविवेशेति वैदिकमंत्रमीरयेत् ॥ कोऽदादिति पठेन्मंत्रं ध्यायंश्चेतसि माधवम् ॥ ५७ ॥ ततः
प्रदक्षिणीकृत्य विसृज्य द्विजपुंगवम् ॥ शय्यासनादिकं सर्वं ब्राह्मणस्य गृहं नयेत् ॥ ५८ ॥ ततः प्रभृति योः स्त्रोपि

॥ रामः ॥
॥ १८२ ॥

182

प्रपूजयेत्· आचारतम्.१

रत्यर्थं गृहमागतः ॥ स सम्यक् सूर्यवारेण समं पूज्योपथे कृत्या ॥ ८९ ॥ एवमेकं द्विजं शान्तं पुराणज्ञं विचक्षणम्
तमर्च्चयीत च सदा अपरं वा तदाज्ञया ॥ ९० ॥ नष्टाप्रोतिनदा विद्युं गर्भसूतककजं कश्चित ॥ देवं वा मानुषं वास्याद्
पराणेन वा तनतः ॥ ९१ ॥ साधारणं वृषभञ्च यथाशास्त्रं समापयेत् ॥ एतद्वः कथितं सर्व्वं वेश्याधर्म्मसमोषनः ॥
९२ ॥ प्रवृत्ते नयत्सोक्तं दानवीभूततो मया ॥ तदिदं च व्रतं सर्व्वं भवतीषु प्रकाशितम् ॥ ९३ ॥ सर्व्वपापप्रशमनं
मनन्तफलदायकम् ॥ कल्याणिनीनां कथितं कृष्णेन नवराननाः ॥ ९४ ॥ एतत्पार्थ मया पूर्व्वं गोपीनां नृपकाशि
तम् ॥ पुराणं धर्म्मसर्व्वस्वं वेश्याजनसुखप्रदम् ॥ ९५ ॥ करोति या हि सम्यक्स्मेतत् कल्याणिनी माधवलोकसं
स्था ॥ सा पूजिता देवगणैरशेषैरानंदकृत्स्थानमुपैति विष्णोः ॥ ९६ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्व्वणि
श्रीकृष्णयुधिष्ठिरसंवादे कामदानवेश्याव्रतवर्णनं नामैकादशोत्तरशततमोऽध्यायः ॥ १११ ॥ ॥ श्रीकृष्ण उवा
च ॥ अथातो वृन्ताकविधिं व्याख्यास्यामः ॥ संवत्सरं च षण्मासां स्त्रीन्मासान्वा न भक्षयेत् अथ भरण्यां मघायां वा
एकरात्रोपवासं कृत्वा स्थंडिले देवतानाह्लयगंधधूपपुष्पनैवेद्यदीपादिना पूजयेत् ॥ दर्भपाणिर्ज्जोदकेनावा
हयेत ॥ यमराजानमावाहयामि कालमावाहयामि ॥ नीलमावाहयामि ॥ चित्रगुप्तमावाहयामि ॥ वैवस्वतमावा

ह्यामि ॥ परमेष्ठिनमावाहयामीति ॥ ततोग्निमुपसमाधाय तिलाज्येन जुहुयात ॥ यमराजाय स्वाहा। कालाय स्वाहा।
नीलाय स्वाहा ॥ चित्रगुप्ताय स्वाहा वैवस्वताय स्वाहा ॥ मृत्यवे स्वाहा ॥ परमेष्ठिने स्वाहेति ॥ अग्निमूर्द्धेत्याहुतीत्वष्टश-
तं कृत्वा स्विष्टकृतिं कृत्वा प्रायश्चित्तं कृत्वा ब्राह्मणाः स्वयमेव करोति ॥ इति वै धाम्नाचार्यः ॥ अथ सौवर्णं हंताकं ब्राह्म-
णाय निवेदयेत ॥ कृष्णां वृषभं गां च दद्यात ॥ कर्णवेष्टांगुलीयके वस्त्रोपानहौ कृष्णयुगं कृष्णकंबलं च दद्यात ॥ ब्रा-
ह्मणान्भोजयित्वा आशिषो वाचयेत ॥ पौंडरीकाश्वमेधफलमवाप्नोति ॥ सप्तकोटिसहस्राणि नाकपृष्ठे महीय-
ते ॥ सप्तजन्मांतरं यावद्यमलोकं न पश्यतीत्याह भगवान्धौम्यायनः ॥ हंताकसप्रतिहतान्नरहेमसिद्धं दद्याद्द्विजाय
यत्नतः कृसमन्वितं यः ॥ कृत्वा व्रतं वत्सरमासमेकं याम्यं न पश्यति पुरं पुरुषः कदाचित ॥ १ ॥ इति श्री भविष्ये म-
हापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हंताकव्रतविधिवर्णनंनाम द्वादशोत्तरशततमोऽध्यायः ॥ ११२
श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि रहस्यं ह्येतदुत्तमम् । येन लक्ष्मीनिर्वृतिस्तु पृथिव्यां वोपजायते ॥ १ ॥ सर्वे
ग्रहाः सदा सौम्या जायंते येन पांडव ॥ आदित्यवारे हस्तेन पूर्वेणह्वाविचक्षणः ॥ २ ॥ नक्तोक्तविधिना सर्वं कुर्या-
त्पूजां तथा रवेः ॥ पूज्यार्कं सप्तनक्तानि कृत्वा भक्तिपरो नरः ॥ ३ ॥ ततस्तु सप्तमे प्राप्ते कुर्याद्ब्राह्मणवाचनम् ॥ मा

183

तन्दुलानेर

ल्कारं सर्वसौवर्णं कृत्वा यत्नेन मानवः ॥ ४ ॥ ताम्रपात्रे स्थापयित्वा रक्तपुष्पैः प्रपूजयेत् ॥ रक्तवस्त्रयुगं कृत्वं छत्रो
पानयुगान्वितम् ॥ ५ ॥ घृतेन स्नपनं कृत्वा लेंडुकान्विनिवेदयत् ॥ मंत्रेणानेन विदुषे ब्राह्मणायोपपादयेत ॥ ६
॥ आदिदेव नमस्तुभ्यं सप्तसप्ते दिवाकर ॥ त्वं रवे तारयस्वास्मानस्मात्संसारसागरात् ॥ ७ ॥ कृतेनानेन राजेंद्र भवे
दारोग्यमनुत्तमम् ॥ ऽसंपन्नताप्तिरिति पीडानाशिका विडः ॥ ८ ॥ अविसंवादि श्रीश्चैवं शांतिपुष्टिप्रदानगा
म् ॥ तद्वच्चित्रासु संगृह्य सोमवारं विचक्षणः ॥ ९ ॥ सप्तमेव ततः प्राप्ते दत्वा ब्राह्मणभोजनम् ॥ कांस्यभाजन
संस्थं वा राजतं राजते ऽथवा ॥ १० ॥ पात्रे कृत्वा सोमराजं श्वेतवस्त्रावगुंठनम् ॥ पादुकोपानहच्छत्रभाजनासन
संयुतम् ॥ ११ ॥ वध्यल्लश्विरवरं दत्वा ब्राह्मणाय निवेदयेत् ॥ मंत्रेणानेन राजेन्द्र तं च गणस्व सर्वदा मिते ॥ १२ ॥ श्री
महादेवजटाबद्धचीपुष्पगोक्षीरपांडुर सोमसौम्यो भवास्माकं सर्वदा स्तुतभोजनम् ॥ १३ ॥ एवं कृते महाराज सोमस्तु
ष्टिप्रदो भवेत् ॥ भवंति तुष्टे ऽत्रिसुते सर्वेह्यानुग्रहायहा ॥ १४ ॥ स्वात्यामंगारकं गृह्य सपयेनक्तभोजनः ॥ सप्तमेव
त्सरं प्राप्ते स्थापितं ताम्रभाजने ॥ १५ ॥ रक्तवस्त्रयुगं कृत्वा कुंकुमेनानुलेपनम् ॥ नैवेद्यं हेनकारं च पक्वधूपाक्षता
दिभिः ॥ १६ ॥ मंत्रेणानेन तं दद्याद्ब्राह्मणाय कुटुंबिने ॥ कुजन्म प्रभवोऽपि त्वं मंगलः पठ्यते बुधैः ॥ १७ ॥ अमंगलं नि

महामते ७

॥भवि॥
॥१८४॥

ह्त्वाभूसर्वदायस्तु मंगलम् ॥ विशाखास्वोस्तु वृषंगहस्य सप्तनक्तान्स्तथाचरेत् ॥१८॥ वृषं हेममयं कृत्वा स्थापयित्वं
कांस्यभाजने ॥ भृक्ष्यवस्त्रयुगं शुक्लं भक्ष्यमाल्यानुलेपनैः ॥१९॥ गुडौदनोपहारं तु ब्राह्मणाय निवेदयेत् ॥ वृषः सं
तुष्टिजननो गोवृषदः सर्वदानफलान ॥२०॥ नत्वा वृषो धं कुरु मे राज्ञ पुत्रजनयो नमः ॥ अनुराधासु चाचार्यदेवानां पूज्य
मक्तिनः ॥२१॥ पूर्वोक्तक्रमयोगेन सप्तनक्तान्स्तथाचरेत् ॥ हैमं हेममये पात्रे स्थापयित्वा बृहस्पतिम् ॥२२॥ पीताम्ब
रयुगं शुक्लं पीतयज्ञोपवीतिनम् ॥ पादुकाछत्रसहितं ससंदंडं सकमंडलुम् ॥२३॥ संपूज्य पुष्पनिकरैर्धूपधूपाक्ष
तादिभिः ॥ खण्डखाद्योपहारैश्च द्विजाय प्रतिपादयेत् ॥२४॥ धर्मशास्त्रार्थशास्त्रज्ञ ज्ञानविज्ञानपारग ॥ अगाधबुद्धि
गांभीर्य देवाचार्य नमोऽस्तु ते ॥२५॥ भृक्षं ज्येष्ठासु संगृह्य स्थापयेन्नक्तभोजनैः ॥ पूर्वोक्तक्रमयोगेन द्विजसंतर्पणेन
च ॥२६॥ सप्तमे स्वयसंप्राप्ते सौवर्णं कारयेद्भृगुम् ॥ रौप्ये वा वंशपात्रे वा स्थापयित्वा भृगोः सुतम् ॥२७॥ संपूज्य प
रया भक्त्या श्वेतवस्त्रविलेपनैः ॥ अग्येनस्य प्रदानतद्धं गायसंघृतसंयुतम् ॥२८॥ दद्यात्तेन मंत्रेण ब्राह्मणाय विच
क्षणः ॥ भार्गवोऽसुरगुरुर्योऽसि सर्वकर्मविशारद ॥२९॥ हत्वा ग्रहकृतान्दोषान्नायुरारोग्यदो भव ॥ मूलेन तर्पयेन्नतयं
ग्रहीत्वा भरतर्षभ ॥३०॥ तस्मिन्दिने पूजनीयं ग्रहत्रितयमादरात् ॥ शनैश्चरश्च राहुश्च केतुश्चेति क्रमान्नृप ॥३१॥

184

॥राम:॥
॥१८४॥

होमंतिलघृतैःकुर्याद्ग्रहनाम्नातुमंत्रवित ॥ अर्कःपलाशखदिरौह्यपामार्गोथपिप्पलः ॥ ३२ ॥ उडुंवरशमीदूर्वाकु
शाश्चसमिधःक्रमात ॥ एकैकस्यत्वष्टशतमष्टाविंशतिरेववा ॥ ३३ ॥ होतव्यामधुसर्पिभ्यांदध्नावापायसेनवा ॥ सप्तमे
त्वथसंप्राप्तेनक्तंसूर्यसुतस्यतु ॥ ३४ ॥ ग्रहस्त्वयोऽपिकर्त्तव्याराजलोहमयाःशुभा ॥ व्रतांतेसर्वतश्चैतान्सौवर्णान्वाथ
कारयेत ॥ ३५ ॥ कृष्णवस्त्रयुगंदद्यादेकैकस्यक्रमान्नृप ॥ सगन्ताभ्यासमालभ्यकृशराण्णान्निनिवेदयच ॥ ३६ ॥ होमावसाने
सर्वंतब्राह्मणायोपपादयेत ॥ शनैश्चरनमस्तेऽस्तुनमोऽस्तुराहवेतथा ॥ ३७ ॥ केतवेचनमस्तुभ्यंसर्वशांतिप्रदोभव.
एवंकृतेभवेद्यत्तुतन्निवोधनरेश्वरः ॥ ३८ ॥ यदिभौमोरविसुतोभास्करोराहुणासह ॥ केतुश्चसंस्थितानित्यंसर्वेपीडा
कराग्रहा ॥ ३९ ॥ अनेनकृतमात्रेणसर्वेशाम्यंत्युपद्रवाः ॥ एवंयःकुरुतेराजन्सदाभक्तिसमन्वितः ॥ ४० ॥ तस्यसानुग्र
हाःसर्वेयच्छंतिविजयंसुखम ॥ यश्चैतच्छृणुयात्कल्यंग्रहाणांपठतेऽपिवा ॥ ४१ ॥ तस्यसानुग्रहाःसर्वेशांतियच्छंति
नान्यथा ॥ शनैश्चरंराहुकेतुंलोहपात्रेभुविन्यसेत ॥ ४२ ॥ कृष्णागरुःस्मृतोधूपोदक्षिणाचात्मशक्तितः ॥ ४३ ॥
सूर्यंविधुंकुजबुधौगुरुभृगुक्रसौरीन्रहुलादिकर्णसहितान्दिनक्रमेण ॥ संपूज्यहेमघटितान्द्विजपुंगवायदत्वापुमान्ग्र
हगणेननपीड्यतेऽत्र ॥ ४४ ॥ ॥ इतिश्रीभविष्योमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेग्रहनक्षत्रव्र

तद्वर्णनाम त्रयोदशोत्तरशततमोऽध्यायः ॥ ११३ ॥ ॥ श्रीकृष्ण उवाच ॥ पुरा त्रेतायुगे पार्थ नावर्षत्पाकशा
सनः ॥ कथंचिद्देवयोगाद्राज्ञस्तस्य राष्ट्रे समंततः ॥ १ ॥ ततो राष्ट्रं क्षुधाविष्टं बभूवातीवदारुणम् ॥ पतंगमक्षिका
कीर्णं चौरव्यालभयाकुलम् ॥ २ ॥ तस्मिन्घोराकुले काले सपत्नीकः सबालकः ॥ कौशिकः स्वगृहं त्यक्त्वा परराष्ट्रम
गाच्छते ॥ ३ ॥ मार्गेऽथ गच्छता तेन कौशिकेन महर्षिणा ॥ त्यक्तः सबालको ह्येको ऽर्भरं च कुटुंबकम् ॥ ४ ॥ तस्मिन्काले
विशेषेण श्रीरोल्लौ बधिसंचये ॥ कृत्वा निनिर्घृणां कर्मगतोऽसौ कौशिको मुनिः ॥ ५ ॥ सोऽपि बालो रुदन्दीनो दिशो
वीक्ष्य स्थितः पथि ॥ उत्थाय पिप्पलस्याधः फलान्यत्तुं प्रचक्रमे ॥ ६ ॥ कूपे जलं पपौ नित्यं तत्रैवाश्रममंडलम् ॥ कृत्वा स
म्यक्स्थितो रौद्रं तेपे चाविपुलं तपः ॥ ७ ॥ अथाजगाम भगवान्नारदोऽथ यदृच्छया ॥ तं दृष्ट्वा दीनवदनं क्षुधार्तं द्विजपोत
कम् ॥ ८ ॥ उपयातस्य संस्कारं चक्रे मौंज्यादिबंधनम् ॥ वेदानध्यापयामास सरहस्यपदक्रमान् ॥ ९ ॥ ददौ च वैष्णवं मं
त्रं द्वादशाक्षरमित्युत ॥ वेदाभ्यासरतस्यास्य विष्णुध्यानपरस्य च ॥ १० ॥ प्रत्यहं पिप्पलादस्य विष्णुः प्रत्यक्षतां ययौ
वैनतेयसमारूढो नीलोत्पलदलच्छविः ॥ ११ ॥ चतुर्भुजः पीतवासाः शंखचक्रगदाधरः ॥ स उवाच तदा तुष्टो वरं ब्रू
हि यमिच्छसि ॥ १२ ॥ तत्कृत्वा नारदस्तुवंसमालोकाशिष्यस्तदा ॥ नारदेनाभ्यनुज्ञातो ज्ञानविद्यासमयाचत ॥ १३ ॥

185

तच्छ्रुत्वा नारदमुखं समालोक्य ऋषिभिस्तदा ॥ नारदेनाप्यनुज्ञातो ज्ञानविद्यामथावदत् ॥ १३ ॥ दत्वा ज्ञानं सोपदे-
शं योगाभ्यासं च निर्मलम् ॥ नागारिगमनो विप्रस्तत्रैवान्तरधीयत ॥ १४ ॥ ततो राजन्महाज्ञानी महर्षिः सशिष्य-
स्तदा ॥ नारदं परिपप्रच्छ केनाहं पीडितो मुने ॥ १५ ॥ ग्रहेणाग्रहभूतेन नालालट्पोऽपिङ्गलितः ॥ न मे पिता न मे माता जी-
वितोऽस्म्यतिपीडया ॥ १६ ॥ ब्राह्मरूपं भवता दत्तं देवान्ममसद्विज्ञोनम ॥ एतच्छ्रुत्वा शिशोर्वाक्यं कथयामास नारदः ॥
१७ ॥ शनैश्चरेण क्रूरेण ग्रहेणात्वं हि पीडितः ॥ पीडितश्च समस्तोऽपि देशोऽयं मंदचारिणा ॥ १८ ॥ तेनैतत्ते फलं प्राप्तं
सैष सौरिः शनैश्चरः ॥ प्रज्वलन्निव दर्पेण स्फुरतीव नभस्तले ॥ १९ ॥ एवमुक्तः शिशुः क्रोधात्प्रजज्वालेव पावकः ॥
मालोक्य गगनाद्भूमौ पातयामास वै शनिम् ॥ २० ॥ पतमानो गिरेः शृङ्गाद्भग्नः खञ्जो बभूव ह ॥ धरण्यां पतितं द-
ष्ट्वा भास्करात्मजमातुरम् ॥ २१ ॥ नरीनर्ति भुजक्षेपैर्नारदो हृष्टमानसः ॥ हर्षाद्देवानथाहूय दर्शयामास तं शनिम् ॥
२२ ॥ अथ देवास्तथा ब्रह्मा विष्णुरुद्रेन्द्रपावकाः ॥ शनैः संग्रामयामासुरुद्वेश्चेदमपिवनम् ॥ २३ ॥ स्वस्ति तेऽस्तु म-
हाभाग पिप्पलाद महामुने ॥ भङ्तेऽत्र कृतं नाम नारदेन महर्षिणा ॥ २४ ॥ अन्वर्थकं शिशोरेजीवितं पिप्पलादना-
त्ते ॥ भगवन्पिप्पलान्नात्वाज्जीवितोऽसि यतो मुने ॥ २५ ॥ ततस्त्वं पिप्पलादेति ख्यातिं लोके गमिष्यसि ॥ ये च त्वां पूज-

॥भविपु॥
॥१८६॥

स्थावरकृता

पिष्टं तिलान्नाल्लापुष्प्यैर्महाकृषिमन्॥२६॥ इह जन्मसमभ्येतान्दूपे स्मिन्नाक्तिभाविताः॥ सप्तजन्मान्तरं यावत्पुत्रपौ
त्रानुगामिनः॥२७॥ ततेषां वाँधिका सत्यं ग्रहपीडा भविष्यति॥ स्मरिष्यंतीह ये वत्स पिप्पलादेति नामतः॥२८॥
तेषां शनैश्चरकृता पीडा न प्रभविष्यति॥ श्रमस्वास्य महाभाग निर्दोषोऽयं ग्रहाग्रणीः॥२९॥ चारन्नृक्षं शनैरे प्रभु
भाशुभफलप्रदः॥ हृतसाश्चाग्रहाष्चैतेन भवंति कदाचन॥३०॥ बलिहोमनमस्कारैः शान्तिं यवर्द्धतिपूजिताः॥ अ
तोर्थमस्य दिवसे स्नानमभ्यंगपूर्वकम्॥३१॥ कार्यं देपंच विप्राणां तैलमभ्यंगहेतवे॥ यत्तु संवत्सरं यावत्स्नानेशानि
दिने नरः॥३२॥ तैलं ददाति विप्राणां स्वशक्त्या मानजनेपि च॥ तत संवत्सरस्यांति प्राप्तेतस्य दिने पुनः॥३३॥ लोहे घं
टापितं सौरितैलमध्ये विनिक्षिपेत्॥ लोहभांडं कृसरधान्यं कृष्णवस्त्रयुगं कृष्णम्॥३४॥ कृष्णगोदक्षिणायुक्तं कृष्णा
कंबलशायितन्मत्॥ तिलतैलेन वस्त्रानेकृष्णपाठुष्प्यैः सुपूजितम्॥३५॥ कृष्णानांधैः कृष्णधूपैः कृसरान्नैस्तिलौदनैः
पूजयित्वा सूर्यपुत्रं ब्राह्मणाय निवेदयेत्॥३६॥ मंत्रेणानेन ब्रह्मर्षे शान्तो देवाति भक्तिमान्॥ इतरेषां तु वर्णानां
स्मरणात्मंत्रं द्विजोत्तम॥३७॥ कृष्णावलोकनवशान्द्भुवनं नाशयिष्यति योग्रहो रुष्टः॥ तुष्टो धनकनकसुखं ददाति
सौरिः शनैश्चरः पातु॥३८॥ यस्मात्तनपराज्ञाय नलाय प्रददौ किल॥ स्वप्ने सौरिर्निजं मंत्रं स्मरणात्कामफलप्रदम्॥

स्वयम्१
भक्तितः३

॥राम॥
॥१८६॥

क्रोडम्　　भवम्यहो ४　　　　एवमुक्त्वा शनिर्दत्वान्नं द्विजातिं विसर्जयेत्

३९॥ क्रोडं नीलाञ्जनप्रख्यं नीलवर्णसमस्रजम् ॥ छायामार्तण्डसंभूतं नमस्यामि शनैश्चरम् ॥ ४०॥ नमोऽ
र्कपुत्राय शनैश्चराय नीहारवर्णाञ्जनमेचकाय ॥ श्रुत्वा रहस्यं भवकामदश्च फलप्रदो मे भवसूर्यपुत्र ॥ ४१ ॥
नमोऽस्तु प्रेतराजाय कृष्णदेहाय वै नमः ॥ शनैश्चराय क्रूराय शुद्धबुद्धिप्रदायिने ॥ ४२ ॥ य एभिर्नामभिः स्तौ
ति तस्य तुष्टो भवाम्यहम् ॥ मदीयं तु भयं तस्य स्वप्नेऽपि न भविष्यति ॥ ४३ ॥ एवँ स्तवे शनिः पूर्वमन्त्रं तं ब्राह्मणोद
दितः ॥ एवमेतत्कृतं विप्र ये पठिष्यन्ति मानवाः ॥ ४४ ॥ स्थावरे स्थावरे प्राप्ते वत्सरं यावदेव तु ॥ तेषां शनैश्चरीपी
डा देहेऽपि न भविष्यति ॥ ४५ ॥ एवमुक्त्वा गतः सर्वं प्रतिज्ञार्थं यथागतम् ॥ शनैश्चरोऽपि स्वस्थाने ग्रहाणां तेषु
प्रतिष्ठितः ॥ ४६ ॥ पिप्पलादोऽपि ब्रह्मज्ञो ब्रह्माज्ञां प्रतिपालयन् ॥ शनैश्चरं तु संपूज्य तुष्टाव रचिताञ्जलिः ॥ ४७
कोणस्थः पिङ्गलो बभ्रुः कृष्णो रौद्रोऽन्तको यमः ॥ सौरिः शनैश्चरो मन्दः प्रीयतां मे ग्रहो नमः ॥ ४८ ॥ शनैश्चरमिति
स्तुत्वा पिप्पलादो महामुनिः ॥ खे प्रज्वलन्विमानस्थो दृश्यतेऽद्यापि मानवैः ॥ ४९ ॥ इदं शनैश्चराख्यानं ये श्रोष्यन्ति
समाहिताः ॥ तेषां कुरुवर श्रेष्ठ शनिः पीडां न दास्यति ॥ ५० ॥ कृष्णायसेन घटितां ग्रहराजमूर्तिं लोहे निधाय च क
लशे तिलतैलपूर्णे ॥ यो ब्राह्मणाय द्विजं प्रददाति भक्त्या पीडा शनैश्चरकृता न हि बाधते तम् ॥ ५१ ॥　॥

इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे स्नानेश्वरव्रतवर्णनं नाम चतुर्दशोत्तरशततमोध्यायः
११४ ॥ युधिष्ठिर उवाच ॥ यदारोग्यकरं पुंसां यदनंतफलप्रदम् ॥ व्रतं तद्ब्रूहि गोविंद सर्वपापप्रणाशनम् ॥ १ ॥ श्रीकृ
ष्ण उवाच ॥ यत्तद्विश्वात्मनो धाम परं ब्रह्म सनातनम् ॥ सूर्याग्निचंद्ररूपेण तत्त्रिधा जगति स्थितम् ॥ २ ॥ तमाराध्य पु
मान्किं न प्राप्नोति कुरुनंदन ॥ तस्मादादित्यवारेण सदा नक्ताशनो भवेत् ॥ ३ ॥ उभयत्र यदा भक्तिर्भानोरुपरि शाश्व
ती ॥ तदारभ्य सदा कार्यं नक्तमादित्यवासरे ॥ ४ ॥ पूर्वोक्तविधिना चैव पूजयित्वा द्विजोत्तमान् ॥ ततोऽस्तसमये भानो
रक्तचंदनपंकजम् ॥ ५ ॥ विलिख्य द्वादशदलं पद्मं सूर्यं ति पूर्वतः ॥ दिवाकरं तथाग्नेये विवस्वंतमतः परं ॥ ६ ॥ भगं तु
नैरृते देवं वरुणं पश्चिमे दले ॥ महेंद्रं मारुते दले आदित्यं तु तथोत्तरे ॥ ७ ॥ शांतमीशानभागे तु नमस्कारेण विन्यसेत्
॥ कर्णिकापूर्वपत्रे तु सूर्यस्य तुरगान्न्यसेत् ॥ ८ ॥ दक्षिणे यमनामानं मार्तंडं पश्चिमे दले ॥ उत्तरेणारविंदे वं कर्णिकायां तु

पूर्वभागे ४

भास्करः ॥ ९ ॥ अर्घं दद्यात्ततः पार्थ सतिलारुणचंदनम् ॥ फलाक्षतयुतं तद्वदिमं मंत्रमुदीरयेत् ॥ १० ॥ कालात्मा सर्व
भूतात्मा वेदात्मा विश्वतोमुखः ॥ यस्मादग्नींदुरूपत्वमतः पाहि प्रभाकर ॥ ११ ॥ अग्निमीले नमस्तुभ्यं इषेत्वोर्जे च भास्क
रे ॥ अग्न आयाहि वरद नमस्ते ज्योतिषां पते ॥ १२ ॥ अर्घं दत्वा विसर्ज्याथ निशि तैलविवर्जितम् ॥ भुंजीत भावितमना

भास्करं संस्मरन्नृप ॥ १३ ॥ प्राकृतनेः स्त्रियानो चैव तैलाभ्यंगं विवर्जयेत ॥ ब्रह्मणाने कारयित्वा कांचनेकमलोत्तमम् ।
१४ ॥ पुरुषं च यथाशक्त्या कारयेद्द्विभुजं तथा ॥ १५ ॥ सुवर्णशृंगीं कपिलां महार्घां रौप्यखुरां कांस्यदोहां सवत्साम् ॥ पूर्णां
गुडस्योपरि ताम्रपात्रे निधाय पद्मं च ततो निवेदयात ॥ १६ ॥ गां कल्पयित्वा पुरुषं सपद्मं दद्यादनेकव्रतनायकाय ॥ अ
नंगरूपाय जितेंद्रियाय कुटुंबिने श्रद्धमनन्तव्रताय ॥ १७ ॥ नमोऽस्तु ऋक्सामयजुर्विधात्रे पद्मप्रवोधाय जगत्सवित्रे ॥
त्रयीमयाय त्रिगुणात्मने च त्रिलोकनाथाय नमो नमस्ते ॥ १८ ॥ इत्यनेन विधानेन वर्षमेकं नृपो नरः ॥ नक्तमादि
त्यवारे तु कुर्यात्स नीरुजो भवेत ॥ धनधान्यसमायुक्तः पुत्रपौत्रसमन्वितः ॥ १९ ॥ मर्त्ये स्थित्वा चिरं कालं सूर्यलोक
मवाप्नुयात ॥ २० ॥ कर्मसंक्षयमवाप्य चैव शोकदुःखभयरोगवर्जितः ॥ स्यादमित्रकुलकालसंनिभो धर्मसूर्निरामि
तौजसा युतः ॥ २१ ॥ यावमर्त्यगृहदेवतन्मणावेदमूर्त्तिदिननक्तमाचरेत ॥ सोऽपि लोकममरेशपूजितो याति कौरव
रवेन्न संशयः ॥ २२ ॥ यः पठेदथ शृणोति वा नरः पठ्यमानमथवानुमोदयेत ॥ सोऽपि शक्रभवने दिवौकसैः कल्पकोटि
शतमेकमीड्यते ॥ २३ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे आदित्यदिननक्तवि
धिवर्णनं नाम पंचदशोत्तरशततमोऽध्यायः ॥ ११५ ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि संक्रांत्युद्याप

४ सर्वमनन्तव्रताय

॥ भविपु ॥
॥ १८८ ॥

तेपरत्नम् ॥ यदक्षय्यं परं लोके पुराणकवयो विदुः ॥ १ ॥ विषुवे अयने वापि संक्रान्तिव्रतमारभेत् ॥ पूर्वेद्युरेकभक्तेन दं-
तधावनपूर्वकम् ॥ २ ॥ संक्रान्तिवासरे प्राप्ते तिलैः स्नानं विधीयते ॥ अभिसंक्रमणं भूमौ चंदनेनाष्टपत्रकम् ॥ ३ ॥ पद्मं स-
कर्णिकं कुर्यात्तस्मिन्नावाहयेद्विभुम् ॥ कर्णिकायां न्यसेत्सूर्यमादित्यं पूर्वतस्ततः ॥ ४ ॥ नमः सप्तार्चिषेऽग्नेये यामोरु-
क्रमंऽलाय च ॥ नमः सवित्रे नैर्ऋत्ये वरुणं वारुणो यजेत् ॥ ५ ॥ सप्तसप्तिं च वायव्ये पूजयेज्ज्ञात्वनांपतिम् ॥ मार्तण्डमु-
त्तरे विष्णुमीशाने विन्यसेद्दले ॥ ६ ॥ गंधमाल्यफलैर्भक्ष्यैः स्थंडिले पूजयेत्ततः ॥ चंदनोदकपुष्पैस्तु दत्वार्घं विन्यसेद्भु-
वि ॥ ७ ॥ नमस्ते विश्वरूपाय विश्वधाम्ने स्वयंभुवे ॥ नमोनमस्ते वरद ऋक्सामयजुषां पते ॥ ८ ॥ अनेन विधिना द-
त्वा भानवेऽर्घं नरोत्तम ॥ द्विजाय सोदकुंभं च ततस्ताम्रं हिरण्मयम् ॥ ९ ॥ कमलं च यथाशक्त्या कारयित्वा निवेदयेत् ॥
विधिनानेन कर्तव्यं मासि मासि नरोत्तम ॥ १० ॥ एकभक्ताशनैः पुंभिः सर्वमेतद्यथाविधि ॥ एकस्मिन्नपि कर्तव्यं व-
त्सरान्तेऽथवा पुनः ॥ ११ ॥ कौन्तेय तस्मिन्घृतपायसेन संपूज्य वह्निं द्विजपुंगवाय ॥ कुंभान्नवान्द्वादश धेनुयुक्तान्सौवर्ण-
न्यपुक्तः कृशलामयैकाम ॥ १२ ॥ निवेदयेद्ब्राह्मणपुंगवाय हैमीं च दद्यात्पृथिवीं समस्याम् ॥ शक्त्याथवा व्योमपवा
पितामहीं पैष्टीमथा तौ वसुधां विधाय ॥ १३ ॥ सौवर्णसूर्येण समं प्रदद्यान्न वित्तशाठ्यं पुरुषोऽत्र कुर्यात् ॥ शक्त्याथ

188

॥ रामः ॥
॥ १८८ ॥

रौप्यामथवापिताम्रीं पैष्टीमथाक्षोवसुधां विधाय ॥ १३ ॥ सौवर्णीलक्ष्यैर्गासमंग्रदद्यात्वितस्ताञ्चं पुरुषोऽत्र
कुर्यात ॥ कुर्वन्नथोयातिनरेन्द्रचंडयावत्समहेन्द्रपुरमुग्योःसुरेन्द्रा ॥ १४ ॥ पृथ्वी च यावत्सकुलाचला च यावच्च सूर्या
निलवह्निचंद्राः ॥ तावत्स्वर्गं धर्वकृतैरशेषैः संपूज्यते भारत नाकपृष्ठे ॥ १५ ॥ ततस्तु कर्मक्षयमाप्य समृद्धो पार्थिवः
स्यात्सुकुलप्रसूतः ॥ दिव्यैः सुखैर्युक्तवपुः सभार्यः पुत्रैस्तपुत्रान्वयवंधुवर्गः ॥ १६ ॥ इति पठति मर्त्यो नित्यशोऽतिभ
क्त्या विधिमखिलं रविसंक्रमे पुराणम् ॥ मतिमपि च ददाति सोऽपि देवैरमरपतिपुरे वैर्मन्तलपूज्यः ॥ १७ ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे संक्रान्त्युद्यापनवर्णनं नाम षोडशोत्तरशततमोऽ
ध्यायः ॥ ११६ ॥ ॥ युधिष्ठिर उवाच ॥ कृष्णकेयं जनैः सर्वैर्विष्टिर्भद्रेति बोध्यते कस्मात्सा जायते किंरूपा पूज्यते च कथं जनैः
१ ॥ श्रीकृष्ण उवाच ॥ सुता मार्तण्डदेवस्य छायया जनिता पुरा ॥ शनैश्चरस्य सोदर्या भगिन्यातिभयंकरी ॥ २ ॥ सा जात
मात्रा भुवनं ग्रस्तुं समुपचक्रमे ॥ कृष्णा करालवदना लिनदंष्ट्रोर्ध्वमूर्द्धजा ॥ ३ ॥ निर्यातियकार्येण कश्चितस्य पुरः
स्थिता ॥ विघ्नं करोति सर्वतो भुंजानस्योत्थितस्य वा ॥ ४ ॥ यज्ञविघ्नकरी रौद्रा समाजोत्सवनाशिनी ॥ नित्योद्वेगकरी
रौद्रा विनाशयति सा जगत ॥ ५ ॥ तां तु दुर्विनयासक्तां दृष्ट्वा देवो दिवाकरः ॥ चिंतयामास कस्यापि यच्छामेतां सुम

ष्यामास ॥ ६ ॥ कन्या दुर्विनयाचेह पिता दोषेण गच्छति ॥ एवं तस्यास्तु ततो मूर्त्तां तस्माद्दुर्त्तं गृहं नयेत ॥ ७ ॥ विष्टिं त्वेव सु
तां भद्रां पश्य पश्य पृथक्कृति ॥ तेन मंत्रिस्मृतो नैव सुराणां सकिंनराः ॥ ८ ॥ मंडपं मंडपारम्भे भक्त्याभीष्टयते जनम्
चिवस्तां भिंनतया विधः कस्येयं प्रतिपाद्यताम् ॥ ९ ॥ विरूपा दुष्टहृदया स्वेच्छाचारविहारिणी ॥ दत्ताश्चेपानदोषाय
भवतीह कथं चन ॥ १० ॥ वितर्कयन्नावदेव मासेदे वो दिवस्पति ॥ तावत्तया जगत्सर्वं दुष्टया समभिद्रुतम् ॥ ११ ॥
अथाजगाम सवितुः पार्श्वे ब्रह्माऽऽत्मसंभवः ॥ कार्य्यं निवेदयामास विष्टेर्दैत्यमहोघनः ॥ १२ ॥ भास्करस्तमुवाचाथ
ब्रह्माणं भुवनेश्वरम् ॥ भवान्कर्त्ता च हर्त्ता च कस्मादेवं प्रभाषसे ॥ १३ ॥ एवमुक्तस्तदा ब्रह्मा भास्करेणामितद्युति ॥ उ
वाच विष्टिमात्मान्यभवनभद्रे मयोदितम् ॥ १४ ॥ करणैः सह वर्त्तस्व बवबालवकौलवैः ॥ सप्तमेऽर्धदिने प्राप्ते यद
भीष्टं कुरुष्व तत ॥ १५ ॥ यात्राप्रवेशमांगल्यकृषिवाणिज्यकारणात् ॥ भक्षयस्वाभिमुखगान्नरान्मार्गगामिनः ॥
१६ ॥ उद्वेजनीयो लोके हि जनो भवत्या दिवसत्रयम् ॥ पूज्या सुरासुराणां त्वं दिवसार्द्धे भविष्यसि ॥ १७ ॥ उद्वेजयेत्सुवर्त्ते
ते भद्रे त्वां निर्भया नराः ॥ तेषां विघ्नाशया याम्ह त्वं कार्यमार्ये सुखीभव ॥ १८ ॥ एवमुक्त्वा गतो ब्रह्मा भद्रापि भुवनत्रयम्
वभ्राम सोऽनुनहृदया भीषयंती सुरासुरान् ॥ १९ ॥ एवमेषा समुत्पन्ना विष्टिरिष्टविनाशिनी ॥ निवेदिता ते कौंतेय त

महद्युतिः

189

विपुलहनुकपोला १

स्नानंपरिवर्जयेत॥२० ॥अभिन्नजलदवर्णादीर्घनासोग्रदंष्ट्रा विपुलहनुकपाला पिंङ्कोद्धजंघा ॥अनलशानसह
स्रंबोद्धिंतीसमंतात्सनतित्रिभुवनमध्ये कार्यनाशायविघ्नि ॥२१ ॥भानोःसुताकेनशताग्रजाताङ्कुषाकुमूर्त्तिःसततं
कुचेला ॥देवैर्निपुज्याकरणार्थसंस्था विधिहित्सर्वत्रविसर्जनीया ॥२२ ॥सुखेनघटिकाःपंचदेकंठेनसदास्थिने ॥हृदि
चैकादशद्वोक्ता भ्रातरस्यो नाभिमंडले ॥२३ ॥ कण्ठांपंचैवविज्ञेयास्तिसःपृष्ठेजपावहा ॥ मुखेकार्यविनाशायग्रीवा
यांधननाशिनी ॥२४ ॥हृदिप्राणहराज्ञेयानाभ्यांनुकलहावहा ॥कण्ठामर्थपरिभ्रंशोविद्धिपृष्ठेध्रुवोजयः ॥२५ ॥
पथिआयातिकार्याणिशुभ्रभान्यशुभानिच ॥तानिसर्वाणिसिद्ध्यंतिविद्धिपृष्ठेनसंशयः ॥२६ ॥धन्यादधिमुखी
भडामहामारीखरानना ॥ कालरात्रिर्महारुद्राविधिभ्यकुलपुत्रिका ॥२७ ॥भैरवीचमहाकालीअसुरांसक्षयंकरी ॥
शदशैवनुनामानिप्रातरुत्थाययःपठेत ॥२८ ॥नचव्याधिर्भवेत्तस्यरोगीरोगात्प्रमुच्यते ॥ग्रहाःसर्वेऽनुकूलाःस्यु
र्नचविघ्नादिजायते ॥२९ ॥ रणोराजकुलेद्यूतेसर्वत्रविजयीभवेत ॥यश्चपूजयतेनित्यंश्रद्धास्तोक्तविधिनानरः ॥ ३०
तस्यसर्वार्थसिद्धिस्यभवतहिनसंशयः ॥येनोपचारविधिनाप्रोतेनचर्यैशास्विनी ॥३१ ॥पूजितानुष्टिमभ्येतित
देवकथयामिते ॥यास्मिन्दिनेभवेद्रुडातस्मिन्नहनिभारतः ॥२२ ॥उपवासस्यानियमंकुर्यान्नारीनरोऽथवा ॥यदि

पुष्टिम

॥ भवि पु ॥
॥ १९० ॥

आर्द्रमेतत् ४ भुक्त

रात्रौ भवेद्विधिरेकभुक्तं दिनद्वयम् ॥ ३३ ॥ कार्यं तेनोपवासः स्यादिति गौतमिकी श्रुतिः ॥ बृहस्पतेर्यदा स्या-
द्विधिः बृहस्त्रयम् ॥ ३४ ॥ नक्तोपवासः कर्तव्य एकभक्तोऽथवा ॥ सर्वौषध्युदकस्नानं सुगन्धामलकैरथ ॥ ३५ ॥ नद्यां
तडागे वा गृहे स्नानं सर्वत्र शस्यते ॥ देवान्पितॄन्सुराणां पित्वा ततो हेममयीं शुभाम् ॥ ३६ ॥ विधिं कृत्वा पुष्पधूपैर्नैवेद्येन च पू-
जयेत् ॥ होमं कृत्वा विधिनामैस्त्वो नमानेन ॥ ३७ ॥ भुंजीत दत्वा विप्राय तिलान्पायसमेव च ॥ सतिलां कृशरां भक्त्याप-
श्चाद्भुंजीत कामतः ॥ ३८ ॥ छाया सूर्यसुते देवि विधिरिष्टार्थदायिनि ॥ पूजितासि यथाशक्त्या मह्यं भद्रप्रदा भव ॥ ३९ ॥
उपोष्य विधिनानेन दद्यात्सप्त यथाक्रमम् ॥ उद्यापनं ततः कुर्यात्सर्वव्रतस्य भामिनीम् ॥ ४० ॥ स्नापयित्वा यमे पीठे
कृशरान्नं निवेदयेत् ॥ परिधाप्य कृष्णयुगं स्तुत्वा मन्त्रेण तां पुनः ॥ ४१ ॥ ब्राह्मणाय पुनर्दद्याल्लोहं तैलं तिलांस्तथा ॥ कृष्णां स-
वत्सां गामेकां तथैकं कालकम्बलम् ॥ ४२ ॥ दक्षिणां च यथाशक्त्या दत्त्वा भद्रां विसर्जयेत् एवं कुरुते पार्थ सम्यग्भद्रा-
व्रतं नरः ॥ ४३ ॥ विघ्नं न जायते तस्य कार्यारंभे कदाचन ॥ राक्षसाभ्व पिशाचा वा बाधन्ते ना शाकिनीग्रहाः ॥ ४४ ॥ न पीडयन्ति
तं मर्त्यं यो भद्राव्रतमाचरेत् ॥ नचैवेष्टवियोगः स्यान्न हानिस्तस्य जायते ॥ ४५ ॥ देहान्ते याति सदनं भास्करस्य न संशयः ॥
४६ ॥ सूर्यात्मजेति दयिता भगिनी शनेर्या मर्त्ये भ्रमत्यतिरथा करणे क्रमेण ॥ तां कृत्य भासुरसुतीं समुपोष्य विधि-

॥ रामः ॥
॥ १९० ॥

190

मिष्टार्थसिद्धिमबुधोऽपिपमानुपैति ॥ ४७ ॥ ॥ इति श्रीभविष्यपुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
विधिव्रतवर्णनंनाम सप्तदशोत्तरशततमोऽध्यायः ॥ ११७ ॥ ॥ श्रीकृष्ण उवाच ॥ अगस्तिव्रतमत्यन्तसर्वपाप
प्रणाशनम् ॥ शृणुष्वमहीपालकथ्यमानंमयानघ ॥ १ ॥ ॥ युधिष्ठिर उवाच ॥ अगस्तिमिब्रूहिमेकृष्णदेवर्षे
लक्ष्यचेष्टितम् ॥ जन्मचैवार्घ्यदानंच कालमुद्दमनस्य च ॥ २ ॥ ॥ श्रीकृष्ण उवाच ॥ मित्रश्चवरुणश्चैवपूर्वमेतौ
सुरोत्तमौ ॥ मंदरस्यसमीपेतु वरेतुर्विपुलंतपः ॥ ३ ॥ तयोःसंक्षोभणार्थाय कामसेनवराप्सराः ॥ उर्वशीप्रेषि
तातत्र रूपौदार्यगुणान्विता ॥ ४ ॥ तस्याःसंदर्शनादेवंक्षुभितौतौसुरोत्तमौ ॥ विकारंमनसोबुद्धा कुंभेवीर्यसु
सृजेतुः ॥ ५ ॥ निमेःशापात्तत्रजातो वशिष्ठोभगवानृषिः ॥ अनंतरमगस्त्यश्च जातोदिव्यस्तपोधनः ॥ ६ ॥ मल
यस्यैकदेशोतु वैखानसविधानतः ॥ सभार्यःसंवृतोविप्रैस्तपस्तेपेसुदुश्चरम् ॥ ७ ॥ आत्तांदैत्यौपुरादृष्ट्वावातापीकृ
तपुरास्यतु ॥ नाम्नात्विल्वलवातापी देवब्राह्मणकंटकौ ॥ ८ ॥ तयोरेकोऽभवन्मेषो द्वितीयोमांसपाचकः ॥ श्रा
द्धकर्मण्यनेनैव वहवोनाशिताद्विजाः ॥ ९ ॥ अथागस्तिमिन्दिनेदैत्यो लागत्यंसंमंत्रयत ॥ सोऽग्यार्थंब्राह्मणैःसा
र्द्धं भृगुगर्गकुलोद्भवैः ॥ १० ॥ सगस्त्योप्यभवन्क्रुद्धोघोरेयातोयथार्पितः ॥ सोऽपिहत्वापवनद्भुतोवाताप्पिंमेषरूपिणाम्

११ ॥ तरिविष्णमाणो वृत्तेषत्ते वृक्तिमितं प्राह दानवम् ॥ भगवन्स्यो भगवान्क्रुद्धः सर्वं मे दीयतामिति ॥ १२ ॥ मैवं मां सं
ततः प्रादादिल्वलः कुपितस्तदा ॥ भक्षयित्वा भवत्स्वस्थो निर्विकारो महामुनिः ॥ १३ ॥ आविर्वभौ ततः प्राह वातापिमि
ल्वलः शनैः ॥ निष्क्र. मस्वमुनेर्देहं भित्वा कस्माद्विलंबसे ॥ १४ ॥ तच्छ्रुत्वागस्त्यविप्रोपि उद्गारं कृतवान्गदम् ॥ कुतो नि
ष्क्रमणं प्राह भक्षितः समया पुनः ॥ १५ ॥ जीर्णोऽयं भस्मभूतोऽयं वातापिर्ब्रह्मकंटकः ॥ इल्वलोऽपि स्फुरत्क्रोधः सो
ऽगस्त्येनानिरीक्षितः ॥ १६ ॥ भस्मीभूतः क्षणेनैव ततः शान्तं जगद्बभौ तेन वैरेण ते दुष्टा नष्टोवा ल्वदानवाः ॥
१७ समं क्षानिभ्रयं मेरोस्तेनोऽगस्त्यमुपागताः ॥ विवर्द्धयिषवस्तेजो मुनेरप्यादिवौकसः ॥ १८ ॥ तेऽगस्त्यमाहुर्ब्रह्म
र्षे समुद्रं शोषयस्व वै ॥ तच्छ्रुत्वागस्त्यविप्रोपि आग्नेयीं धारणां दधत् ॥ १९ ॥ तथापीतः समुद्रोपि भ्रान्तमीनोर्मि
कच्छपः ॥ पीते समुद्रे तोयेऽपि देवैः कृत्तैस्तु दानवाः ॥ २० ॥ क्षयं नीताः क्षणात्सर्वे कंदमानाः पुनः पुनः ॥ क्षेमं जगत्य
भूत्सर्वमसमस्त्यर्थैः प्रसादतः ॥ २१ ॥ अथ गंगानदीतोयैः संपूर्णो सगरो पुनः ॥ मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासु
किम् ॥ २२ ॥ ममंथुः सहिताः सर्वे समुद्रं दैत्यदानवाः ॥ अथोत्थितेरत्नसंघे सोमेश्रीलोकोत्तमे गते ॥ २३ ॥ अ
तिलोभात्सुमथ्यमाने सागरे पयसां निधौ अथोत्थितं ज्वलद्घोरं कालकूटं महाविषम् ॥ २४ ॥ येनासौ सुरसंघात

आघूर्णितस्तदाभवत् ॥ सागरं संप्रविश्याशु घोरा ज्वाला विनिर्ययुः ॥ २५ ॥ निर्गम्य च वधं चक्रुर्मुनीनामूर्ध्वरेतसाम ॥
बभंजुर्यज्ञपात्राणि दिग्गता ये निलिम्पिरे ॥ २६ ॥ समुद्रमध्ये तज्ज्ञात्वा ब्रह्मा नारायणो हरः ॥ वायुः कुबेरो वरुणः सर्वे
देवाः समागताः ॥ २७ ॥ ततो मंत्रैः शंकरेण किंचित्तत्रैव भक्षितम ॥ सतोद्दग्धः समंत्रोपि नीलकंठीकृतो हर ॥ २८
ब्रह्मापि चैतत्तं प्राप्य स ब्रह्मतपमुपावह ॥ नास्ति कश्चिज्जगत्यस्मिन्त्रिषु मार्गानुसीश्वर ॥ २९ ॥ अगस्त्यो दक्षिणां
शाखां लंकामलेमहामुनिः ॥ तदृष्ट्वं महाभागाः शरणं सर्वदा ह्यसौ ॥ ३० ॥ एवमुक्ता गता देवा अगस्त्याश्रमं दक्षि
णाम ॥ देवान्वीक्ष्य च तान्हर्षादगस्त्यो मुनिसत्तमः ॥ ३१ ॥ ध्यानं चक्रे विधियेनाहि माडोसंप्रवेशितम ॥ कंठीसूत्रंनि
क्षेपे हिमपर्वतसानुषु ॥ ३२ ॥ तस्मिन्काले विषं लग्नं किंचित्तेषं द्रुमादिषु ॥ उन्मत्तकारवीरार्कस्थल भूमिजलानि
ले ॥ ३३ ॥ तद्विषं वर्तितं तेन भगणा लोकोचितं तथा ॥ हिमवातेन दुष्टेन वहमानेन पांडव ॥ ३४ ॥ मनुष्याणां तु जा
यंते रोगा नानाविधा भुवि ॥ तेच मासत्रयं सार्द्धं प्रवहंति विषोल्वणाः ॥ ३५ ॥ वृषसंक्रांतिमारभ्य सिंहांते श्वास्मते
विषम ॥ रोगादोषापनोदश्च भवेत्स्नार्थप्रभावतः ॥ ३६ ॥ एवं कालेन महता नीरुजे व्याधिवर्जिते ॥ जगत्यस्मिन्स्था
पार्थ घनी भवेत्प्रजागरो ॥ ३७ ॥ निरंतरे मर्त्यलोके दुर्ध्वगाह्यप्रसारिणि ॥ बलवान्यमनिर्देशान्मृत्युर्भूम्यतिम

र्तिमान् ॥ ३८ ॥ प्रज्ञाप्यापादयन्कालादागाममहामुने ॥ समीपं मर्तिमान्कुम्भो मन्त्ररत्नेन निरीक्षितः ॥ ३९ ॥ भक्तीव
भवपभ्याञ्चब्रह्मणः सुरवकारणात् ॥ व्याधिहृंदसमोपेतो मन्त्ररत्नो विनिर्मितः ॥ ५० ॥ तथान्योदंडकारण्ये भ्येतो
नामनत्पोतमः ॥ स्वमांसमश्नतानेन निर्ठदान्नार्थिनो मुनिः ॥ ४१ ॥ भगावत्सर्वमेवात्यद्दत्तं राज्यमदान्मया ॥ अल्लं
जलंवाश्राद्धं वानदत्तं पापबुद्धिना ॥ ४२ ॥ ततोऽगस्त्यः करुणया रत्नैः श्राद्धमकल्पयत् ॥ श्राद्धे निवृत्ते सहसा दि
व्यदेहः स्त्रिया वृतः ॥ ४३ ॥ प्राप्तश्चपरमं स्थानमगस्त्यप्रसादतः ॥ अथविन्ध्यो महाशैलः सूर्यरोधाभिवर्ध
त ॥ ४४ ॥ कस्मान्मेरुमिवासौ मां न करोति प्रदक्षिणाम् ॥ वर्द्धमानं तु तं दृष्ट्वा ततो देवाः सवासवाः ॥ ४५ ॥ एकी
भूयाश्रमं गत्वा स्तुत्वा देवर्षिपुंगवम् ॥ अगस्त्यमब्रुवन्भगवन्सूर्यमार्गविरोधिनम् ॥ ४६ ॥ वर्द्धमानं तु तं दृष्ट्वा त
तो देवाः सवासवाः ॥ ४५ ॥ एकीभूयाश्रमं गत्वा स्तुत्वा देवर्षिपुंगवम् ॥ अगस्त्यमब्रुवन्भगवन्सूर्यमार्गविरोधिनम्
४६ ॥ विंध्यं निवारयस्वैनं स्थितोस्थापय पर्वतम् ॥ अगस्त्योपि कृतं गत्वा प्राहेदं विंध्यपर्वतम् ॥ ४७ ॥ प्रास्थि
तं तीर्थयात्रायां विद्धि मामचलोत्तम ॥ स्थितावैस्थपितांतावद्यावदागमनं ममः ॥ ४८ ॥ एवमुक्त्वा संप्रया
तो नाद्यापि विनिवर्त्तते ॥ दृश्यते भ्राजयल्लाशां दक्षिणां गगनेज्वलतम् ॥ ४९ ॥ त्रैलोक्यवंद्यचरणो लोपामुद्रा

सर्वरत्नसमन्वितम् २

सहायवान् ॥ लोपामुद्रापितं प्राह देवर्षिर्देवपूजितम् ॥ ५० ॥ तत्राश्रमस्थालिकायामन्तकाले ह्युपस्थिते ॥ भोक्तु
मिच्छामि विषयांस्त्वया सह सुखैषिणी ॥ ५१ ॥ भवेद्यदि गृहं रम्यं सर्वरत्नविभूषितम् ॥ गजैरथैश्च संपूर्णं शय
नैः प्रवरासनैः ॥ ५ ॥ दुकूलपट्टनेत्रैश्च विलासैर्ललितैर्युते ॥ त्वया सह समायोगं यास्येऽहं कुरु चिन्तितम् ॥ ५३
एतच्छ्रुत्वा मुनिर्हृष्टः प्राह्वयद्धनदं क्षणात् ॥ कारयामास भवनं संपूर्णं रत्नराशिभिः ॥ ५४ ॥ आश्विकातुथ्याव
धर्मं प्राप्स्यसि पांऽदव ॥ कन्यायामागते सूर्ये सर्वाजिवैसप्तमे दिने ॥ ५६ ॥ कन्यायांतसमनुप्राप्ते सूर्ये यः सल्लिवर्त्तते ।
प्रत्यूषसमये विद्वान्कुर्याद्स्त्योदये निशि ॥ ५७ ॥ स्नानं भृङ्गतिलैस्तद्वत्कुम्भमाल्याम्बरे गृहे ॥ स्थापयेद्व्रणांकुं
भं माल्यवस्त्रविभूषितम् ॥ ५८ ॥ पंचरत्नसमायुक्तं घटपात्रेण संयुतम् ॥ नानाभक्ष्यसमोपेतं सप्तधान्यस
मन्वितम् ॥ ५९ ॥ कांचनं कारयित्वा तु यथाशक्त्या सुशोभनम् ॥ पुरुषाकृतिप्रशान्तं च जपमंडलधारिणम् ॥ ६०
कमंडलुकरं शिष्यैर्गणैश्च परिवारितम् ॥ मन्त्रपूर्वं विषठंतारं दर्भाश्लेषकरं मुनिम् ॥ ६१ ॥ तस्मिन्कुम्भे समाल
ग्नं चंदनेन ततो न्यसेत् ॥ स्नापितं चानुलिप्तं च चंदनेन सुगंधिना ॥ ६२ ॥ पूजितं चापि कुसुमैर्हृद्यैर्धूपैस्तथपूपि
तम् ॥ ततश्चार्घः प्रदातव्यो यैर्द्रव्यैस्तानि मे शृणु ॥ ६३ ॥ खर्जूरैर्नालिकेरैश्च कूष्माण्डैस्त्रपुषैरपि ॥ कर्कोटकार

वैलैश्चकर्चूरैर्वीजपूरकैः॥६४॥र्नारिकेलैर्दाडिमैश्च वनारंगैःकदलीफलैः॥दूर्वांकुरैःकुशैःकाशैःपद्मैर्नीलोत्प
लैस्तथा॥६५॥नानाप्रकारैर्भक्ष्यैश्चगोभिर्वस्त्रैरसैःशुभैः॥विरूढैःसप्तधान्यैश्चवंशपात्रेनिधापितैः॥६६॥सौ
वर्णरौप्यपात्रेणताम्रवंशमयेनच॥मूर्ध्निस्थितेनेननम्रेणजानुभ्यांपृथिवीतले॥६७॥दक्षिणाभिमुखोभूत्वा
दर्घ्यपाद्यादिकंचयत्न॥शीलेनचेतसाभक्त्यादद्यात्कौरवनंदन॥६८॥काशपुष्पप्रतीकाशअग्निमारुतसंभव·
मित्रावरुणयोःपुत्रकुंभयोनेनमोऽस्तुते॥६९॥विंध्यवृद्धिक्षयकरमेघतोयविषापह॥रत्नवल्लभदेवर्षेलंकावा
सनमोऽस्तुते॥७०॥वातापीभक्षितोयेनसमुद्रःशोषितःपुरा लोपामुद्रापतिःश्रीमान्योऽसौतस्मैनमोऽस्तुते·
७१॥येनोदितेनपापानिप्रलयंयांतिव्याधयः॥तस्मैनमोऽस्त्वगस्त्यायसशिष्यायसपुत्रिणे॥७२॥ब्रह्मतोवेद
ऋचयादद्यादर्घ्यंनमोऽस्तुते॥अगस्त्यःखनमानःखनित्रैःप्रजामपत्यंबलमिच्छमानः॥उभौवर्णौऋष्युग्रहा
र्षपुपोषसत्यादेवेष्वाशिषोजगाम॥दत्वैवमर्घ्यंकौंतेयप्रतिपूज्यचपुष्पकैः॥७३॥विसर्जयित्वागस्त्यंतंविप्रा
यप्रतिपादयेत्॥दैवज्ञायसरूपायवेदवेदांगवादिने॥७४॥ एवंयःकुरुतेभक्त्याह्यगस्त्यंप्रतिपूजनम्॥फल
मेकंतथाधान्यंकोपंवासंपरित्यजेत॥७५॥ संपूर्णोव्रततोवर्षेपुनरप्युपक्रमेत॥दत्वार्घ्यंसप्तवर्षाणिक्रमेण

॥एमः॥
॥१९३॥

193

नेन पांडव ॥७६॥ पुत्रान्कलमवाप्नोति तद्देकाग्रमनाः श्रुणु ॥ ब्राह्मणोश्चतुरोवेदान्सर्वशास्त्रविशारदः ॥७७
क्षत्रियः पृथिवींसर्वांप्राप्नोत्यर्णवमेखलाम् ॥ वैश्योऽप्यायुष्यमाप्नोति गोधनंचापिनंदति ॥७८॥ शूद्राणां
धनमारोग्यंसन्तानमभ्याधिकोभवेत् ॥ स्त्रीणांपुत्राःप्रजायंते सौभाग्यंवृद्धिऋद्धिमत् ॥७९॥ विधवानांमहत्पु
ण्यंवर्धतेपांडुनंदन ॥ कंन्याभर्तारमाप्नोतिव्याधेर्मुच्येतदुःखितः ॥८०॥ येषुदेशेष्वगात्यर्थैः पूजनंक्रियते
जनैः ॥ तेषुदेशेषुपर्जन्यः कामवर्षीप्रजायते ॥८१॥ ईतयःप्रशमंयांतिनश्यंतिव्याधयस्तथा ॥ पठंतियेत्वग
स्त्यार्घ्यंख्यातंशृण्वंतिचापरे ॥८२॥ तेसर्वपापनिर्मुक्ताश्चिरंस्थित्वामहीतले ॥ हंसयुक्तविमानेनस्वर्गंयांति
नरोत्तम ॥८३॥ मर्त्योयदीच्छतिगृहंपरमर्द्धियुक्तंभोगंशारीरमतुलंपशुपुत्रवृद्धिम् ॥ तत्सर्ववत्सरमनेनहृदये
महार्घ्यंयच्छेन्महार्घ्यफलवस्त्रधनैःसहान्नैः ॥८४॥ ॥इति श्रीभविष्येमहापुराणेउत्तरपर्वणि श्रीकृष्णयु
धिष्ठिरसंवादेऽगस्त्यार्घ्यविधिव्रतंनामाष्टादशोध्यायः ॥११८॥ ॥श्रीकृष्णउवाच ॥ पार्थपार्थिववदि
त्यर्थ्यस्त्रीमुखपंकजसंदवे ॥ श्रुणु स्वामिनवस्पंदोहृदयेऽर्घ्यविधिंपरम् ॥१॥ रविर्वादशाभिर्भागैर्वीरुत्पा
दयतेयदि ॥ प्रदोषसमयेपार्थअर्घ्यंदद्यात्तदाविभो ॥ २ ॥ द्वितीयायांसितेपक्षेसंध्याकालेतुपस्थिते ॥

संस्थाप्याभिनवंचंद्रंसमभ्यर्च्यांद्यपनेयादि ॥ ३ ॥ गोमयंमंडलंकृत्वाचंदनेनसुशोभितम् ॥ रोहिण्यासहितंदेवं
कुमुदमोदसंभवम् ॥ ४ ॥ दुग्धाचंदनधूपैश्चदीपाक्षतजलैःशुभैः ॥ दूर्वांकुरैरलंवरैर्दध्नावस्त्रैश्चपांडुरै ॥ ५
मंत्रेणानेनराजेन्द्रक्षत्रियःसपुरोहित ॥ नवोनवोऽसिमासांतेजायमानःपुनःपुनः ॥ ६ ॥ आप्यायस्वसमेते
वंसोमराजन्नमोनमः ॥ अनेनविधिनाचार्यंसर्वकामफलप्रदम् ॥ ७ ॥ यःउपवक्षतिकौंतेयमासिमासितिसमा
हितः ॥ सकीर्त्यायशसाकांत्याधन्यश्चभुविमानवः ॥ ८ ॥ पुत्रपौत्रैःपरिवृतोगोधान्यधनसंकुल ॥ स्थित्वाव
र्षशतंमर्त्येततःसोमपुरंव्रजेत् ॥ ९ ॥ तत्रास्तेदिव्यवपुषाभोगान्भुंजन्नृपोत्तम ॥ वरस्त्रीभिःसहात्यर्थयावदा
भूतसंप्लवम् ॥ १० ॥ धर्मसमृद्धिमतुलांयदिवाञ्छसित्वंमासानुमासमिहसद्व्रतनंकुरुष्व ॥ सोमस्यसोमकुल
नंदनधर्मपुत्रश्रेयप्रदंकृतनतज्ञानुवोदितस्य ॥ ११ ॥ ॥ इतिश्रीभविष्येमहापुराणोत्तरपर्वणिश्रीकृष्ण
युधिष्ठिरसंवादेऽभिनवचंद्रार्घ्यव्रतंनामैकोनविंशोत्तरशततमोऽध्यायः ॥ ११९ ॥ ॥ श्रीकृष्णउवाच ॥
अथातःश्रृणुभूपालव्रतिशुकप्रशांतये ॥ यात्रारंभेप्रयातोवतथाशुक्रोदयेपिहि ॥ १ ॥ शुक्रपूजाप्रकर्तव्या
तांनिशामयसारतः ॥ राजतेवाऽथसौवर्णेकांस्यपात्रेऽथवापुनः ॥ २ ॥ शुक्लपुष्पांवरयुतेसिततंडुलपूरिते·

194

निधाय राजतं भुक्तं भुविमुक्ताफलान्वितम् ॥३॥ सहितेन सवत्सां गां ब्राह्मणाय निवेदयेत् ॥ नमस्ते सर्वदेवे
श नमस्ते भृगुनंदन ॥ ४ ॥ कवे सर्वार्थसिद्ध्यर्थं गृहाणार्घ्यं नमोऽस्तु ते ॥ दत्वैवमर्घ्यं कौन्तेय प्रणिपत्य विस
र्जयेत् ॥५॥ यावकुक्रस्य न कृता पूजा लोभालकैः शुभैः ॥ वरकैः परिकाभिश्च गोधूमैश्चणकैरपि ॥६॥ तावन्न
दानं दातव्यं स्त्रीभिः कामार्थसिद्धये ॥ स्वंतस्योदये कुर्वन्माश्राद्धि भवभारत ॥७॥ सर्वसस्यागमं चैव सर्वा
न्कामानवाप्नुयात् ॥ नद्यतावस्पतेः पूजां प्रवक्ष्यामि युधिष्ठिर ॥८॥ सौवर्णपात्रे सौवर्णं ममरेशाप्य रोहित
म् ॥ पीतपुष्पांबरचनं कृत्वा स्नात्वाप्यसर्षपैः ॥९॥ पालाशाश्वत्थमंगेन चंवगअनुलेन च ॥ पीतांगराग व
सनं घृतहोमं तु कारयेत् ॥१०॥ प्रणाम्य च गवा सार्द्धं ब्राह्मणाय निवेदयेत् ॥ नमस्तेऽङ्गिरसां नाथ वाक्पतेथ
बृहस्पते ॥११॥ क्रूरग्रहैः पीडितानाममनाथभव स्वनः ॥ एवं सुरगुरुं पूज्य प्रणिपत्य समापयेत् ॥१२॥ संक्रान्तावु
दये वास्ते सर्वान्कामानवाप्नुयात् ॥ अथ वा मौक्तिकान्येव वस्तुवृत्तानि हेहेति च ॥१३॥ भार्गवांगिरसौ चिंत्य नान्येव
प्रतिपादयेत् ॥ भक्त्या मौक्तिकदानेन दत्तेन कुरुनंदन ॥१४॥ विरूपता दृशोः पुंसां यात्रास्वभ्युदयेषु च ॥ कुर्वन्व
हस्पतेः पूजां न कदाचित्प्रजायते ॥१५॥ ये भार्गवोदयमवाप्य सवस्त्रपुष्पां कुर्वंत्यनन्यमनसोऽङ्गिरसेव पूजाम्:

॥भविपु॥
॥१२५॥

नैषां गृहे प्रविशतां प्रतिशक्रजातं विघ्नं न संभवति भारत प्रणयभाजाम्॥१९॥ इति श्रीभविष्ये महापुराणे
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शक्रगृहस्यर्तित्रपूजाविधानं नाम विंशत्युत्तरशततमोऽध्यायः॥१२०॥
श्रीकृष्ण उवाच॥ ॥अथ भारत वक्ष्यामि पंचाशीतिव्रतानि च॥ नोक्तानि यानि कथ्यानि मुनिभिर्धर्मदर्शिभिः॥
१॥ भविष्यमत्स्यमार्कण्डपुराणेषु च वर्णितम्॥ वाराहे चैव संगृह्य कथ्यन्ते तानि पाण्डव॥२॥ यदभीष्टं सुमित्रा
यशिष्याय वसुन्नाय च। न कथ्यन्ते धर्मज्ञातं किं ते नोदरवर्तिना॥३॥ अतिस्मृतिपुराणोप्योपयन्त्य या ह्यवधार
तम्॥ तत्तेवाक्रीकृत्य श्रेष्ठकस्यान्यस्योपादिश्यते॥४॥ स्नात्वा प्रभातसंध्यायां यामृपग्रह चापिप्पलम्॥ तिलपात्रा
णियो दद्यात्ससर्वोवैततरत्कृते॥५॥ व्रतानामुत्तमं ह्येतत्सर्वपापप्रणाशनम्॥ पात्रव्रतमिति ख्यातं नाख्यातं क
स्यचिन्मया॥६॥ सुभद्रस्य सुवर्णस्य सुवर्णयः प्रयच्छति॥ प्रपेऽह्नि विप्र कथिते श्रीनापीतप्रणाशितम्॥७
ङनं गाचस्यन्तेरेन फलवृद्धिप्रदायकम्॥ तत्र प्रस्य प्रख्यातं ग्रहणा सर्वकामदम्॥८॥ लवणं कडुतिक्तं च जीरकं म
रिचानि च॥ हिंगु शुंठि समा युक्तं सर्वं पारिचयं तथा॥९॥ चतुर्थ्यामेकभक्ताशी सकृद्दत्वा कुटुंबिने॥ गृहे प्रसन्न
प्रसदा शिलाप्रक्रानि भारत॥१०॥ एतद्विलाव्रतं नाम लक्ष्मीलोकप्रदायकम्॥ कर्तव्यमिह यत्नेन मुखवाटवका

॥रामः॥
॥१९५॥

195

रकम् ॥११॥ नक्तमब्दं चरित्वा तु गवा सार्द्धं कुटुंबिने ॥ हैमं चक्रं त्रिशूलं च दद्याद्विप्राय वाससी ॥१२॥ ब्रुणाम्भ
न्या देवेशौ प्रीयेतां शिवकेशवौ ॥ एतद्देवव्रतं नाम महापातकनाशनम् ॥१३॥ कृत्वैकभुक्तं वर्षान्ते शक्त्या हैम
वृषान्विताम् ॥ धेनुं तिलमयीं दद्यात्सर्वोपस्करसंयुताम् ॥१४॥ एतद्रुद्रव्रतं नाम पापशोकविनाशनम् ॥ यः
करोति पुमानाजन्म पदं याति शांकरम् ॥१५॥ सर्वौषध्युदकस्नानः पंचमासां पूज्य पंचकम् ॥ सप्तोपस्करदानं च
यः करोति गृहाश्रमी ॥१६॥ गृहायुदूखलं शूर्पं शिलास्थाली च पंचमी ॥ उदकुंभं च कुञ्ची च यत्नेषामनु किंचन ॥१७
एतानि गृहिणां गेहे प्रस्थाप्य पुरुषोत्तमम् ॥ उपस्करोति या नारी न सीदति कदाचन ॥१८॥ एतद्गृहव्रतं नाम सर्व
सौख्यप्रदायकम् ॥ अत्रिरात्राहनस्यायाः कथितं पांडुनंदन ॥१९॥ यस्तु नीलोत्पलं हैमं शर्करापात्रसंयुतम् ॥ ददा
ति अब्दयोपेतो ब्राह्मणाय कुटुंबिने ॥२०॥ स वैष्णवं पदं याति नीलाव्रतमिदं स्मृतम् ॥ आषाढादिचतुर्मासमभ्यंगं वर्जये
न्नरः ॥२१॥ पारिते च पुनर्दद्यात्तिलतैलघटं नवम् ॥ भोजनं पायसान्नं च स याति भवनं हरेः ॥२२॥ लोकप्रीतिकरं चैतत्प्री
तिव्रतमिहोच्यते ॥ वर्जयित्वा मधौ यस्तु दधिक्षीरघृतैक्षवम् ॥२३॥ दद्याद्वस्त्राणि सूक्ष्माणि रसपात्रैश्च संयुतम् ॥ संपूज्य
विप्रमिथुनं गौरी मे प्रीयतामिति ॥२४॥ एतद्गौरीव्रतं नाम भवानीलोकदायकम् ॥ पुरुषो यस्त्रयोदश्यां कृत्वा नक्त

तमथोच्यते ॥ २५ ॥ संवत्सरान्तेन स्नात्वा दिवसे विघ्नवर्जितम् ॥ अशोककाञ्चनं दद्यात् इक्षुयुग्मसमन्वितम् ॥ २६ ॥ वि
प्राय वस्त्रसंयुक्तं शुक्लः प्रीयतामिति ॥ कल्पं विष्णुपदे स्थित्वा विशोकः स्यात्पुनर्भवः ॥ २७ ॥ एतत्कामव्रतं नाम सर्वशो
कविनाशनम् ॥ आषाढादि चतुर्मासं वर्जयेन्नखकृन्तनम् ॥ २८ ॥ वृन्ताकभक्षणं चैव मधुसर्पिर्घटान्वितम् ॥ कार्ति
कान्तु पुनर्हैमं ब्राह्मणाय निवेदयेत् ॥ २९ ॥ रुद्रलोकमवाप्नोति शिवव्रतमिदं स्मृतम् ॥ एवं पंचदशी स्मृत्वा एकभ
क्तेन मानवः ॥ ३० ॥ संपूज्य पूर्णिमां देवीं लिखित्वा वंदनादिना ॥ ततः पंचघटान्पूर्णान् सघोदधिघृतेन च ॥ मधुना
सितखंडेन ब्राह्मणायोपपादयेत् ॥ ३१ ॥ मनोरथास्सरयस्त संपूर्णान्पूर्णिमा हरति ॥ पंचकुंभप्रदानेन मतानां तु
पिरलुभे ॥ द्विजानेवं समभ्यर्च्य सर्वान्कामानवाप्नुयात् ॥ ३२ ॥ एतत्संचयदं नाम व्रतं शुद्धिप्रदायकम् ॥ वर्जयेद्य
स्तु पुष्पाणि हेमंतशिशिरव्रतम् ॥ ३३ ॥ पुष्पत्रयं च फाल्गुन्यां कृत्वा शक्त्याथ काञ्चनम् ॥ दद्याद्वैकालवेलायां प्रीयतां
शिवकेशवौ ॥ ३४ ॥ शिरः सौगंध्यमुक्तानन्तं सदानंदकरं नृणाम् ॥ कृत्वा परं पदं याति सौगंध्यव्रतमुत्तमम् ॥ ३५ ॥ फा
ल्गुनादितृतीयायां लवणं यस्तु वर्जयेत् ॥ समाप्ते शयनं दद्यात् गृहं चोपस्करान्वितम् ॥ ३६ ॥ संपूज्य विप्रमिथुनं भ
वानी प्रीयतामिति ॥ गौरीलोके वसेत्कल्पं सौभाग्यव्रतमुत्तमम् ॥ ३७ ॥ संध्यामौनं नरः कृत्वा समाप्ते घृतकुंभदः ॥

196

वस्त्रयुग्मं च घंटां च ब्राह्मणाय निवेदयेत ॥ ३८ ॥ सारस्वतं पदं याति पुनरावृत्तिदुर्लभम् ॥ एतत्सारस्वतं नाम रूपवि
द्याप्रदायकम् ॥ ३९ ॥ लक्ष्मीमभ्यर्च्य पंचम्यामुपवासी भवेन्नरः ॥ समाप्ते हेमकमलं दद्याद्धेनुसमन्वितम् ॥ ४० ॥
स वैष्णवं पदं याति लक्ष्मी स्याज्जन्मजन्मनि ॥ एतल्लक्ष्मीव्रतं नाम दुःखशोकविनाशनम् ॥ ४१ ॥ यास्तु नारी पिबेत्तो
यं जलधारां प्रपातयेत ॥ समाप्ते घृतसंपूर्णां दद्याद्घटं तिकांतवाम् ॥ ४२ ॥ एतद्धाराव्रतं नाम सर्वरोगहरं परम् ॥
कांतिसौभाग्यजननं सपत्नीदर्पनाशनम् ॥ ४३ ॥ गौरीसमन्वितं रुद्रं लक्ष्म्या सह जनार्दनम् ॥ राज्ञीसमन्वितं सूर्यं प्र
तिष्ठाप्य यथाविधि ॥ ४४ ॥ धूपाक्षेपेण सहितां कुघुंटां पात्रसंयुताम् यो ददाति द्विजेन्द्राणां पुष्पैरभ्यर्च्य पांडुरैः
॥ ४५ ॥ दक्षिणासहितां कृत्वा प्रणम्य च विसर्जयेत ॥ एतद्देवव्रतं नाम दिव्यदेहप्रदायकम् ॥ ४६ ॥ कृत्वोपलेपनं शंभोर
ग्रतः केशवस्य च ॥ यावद्व्रतं समाप्येत धेनुं च सजलान्विताम् ॥ ४७ ॥ जन्मायुतं स राजा स्यात्ततः शिवपुरे वसेत ॥
एतच्छुत्याव्रतं नाम बहुकल्याणकारकम् ॥ ४८ ॥ अभ्यर्च्य भास्करं गंगां प्रणम्यैव च वाग्यतः ॥ एकभक्तं नरः कुर्यादब्द
चैकं विमत्सरः ॥ ४९ ॥ व्रतांते विप्रमिथुनं पूज्य धेनुत्रयान्वितम् ॥ वृक्षं हिरण्मयं दद्यात्सोऽश्वमेधफलं लभेत ॥ ५० ॥
दिवि दिव्यविमानस्थः सेव्यतेऽप्सरसां गणैः ॥ एतत्कीर्तिव्रतं नाम भूतिकीर्तिफलप्रदम् ॥ ५१ ॥ घृतेन स्नपनं कृत्वा शंभो

र्त्तां कैलासस्य च ॥ ग्रामस्तो भास्करस्यापि गौर्या लंबोदरस्य वा ॥ ५२ ॥ अश्वत्थैस्तु समं कुर्यात्स्यं गोमयमंडले ॥ समाप्य हेमक
मलं तिलधेनुसमन्वितम् ॥ ५३ ॥ भुक्तं मध्याह्नलं दद्याच्छिवलोके महीयते ॥ सामगाय ततो भ्यैतत्स्मा मधुव्रतमिहोच्यते ॥ ५४
नवम्यां मे कभक्तेन कृत्वा कन्याश्च शक्तितः ॥ भोजयित्वा समादद्याद्वैमकंचुकवाससी ॥ ५५ ॥ हैमं च सिंहं विप्राय दत्वा शिव
पुरं व्रजेत ॥ भवार्बुदं सुरूपश्च शत्रुभिश्चापराजितः ॥ ५६ ॥ यत्नकीर व्रतं नाम नारीणां च सुखप्रदम् ॥ यावत्समारमेयस्तु
पंचदश्यां पयोव्रतः ॥ ५७ ॥ समाप्ते श्रद्धया दद्याद्गाश्च पंचपयस्विनी वासांसि च विचित्राणि जलकुंभयुतानि च ॥ ५८ ॥ स
यानि वैष्णवं लोकं पितॄणां तारयेच्छतम् ॥ कल्पांते राजराजः स्यात्क्षीरव्रतमिदं स्मृतम् ॥ ५९ ॥ तांबूलं समयोनित्यं गौरीभ
र्त्रे ददाति या ॥ पत्रगत्त्वूर्णसमायुक्तं स्त्रियो वा पुरुषोऽपि वा ॥ ६० ॥ वर्षस्यांते तु सौवर्णं कारयित्वा फलान्वितम् ॥ मुक्ताफल
मयं चूर्णं वितयं या प्रयच्छति ॥ ६१ ॥ न सा प्राप्नोति दौर्भाग्यं न दौर्गंध्यं मुखस्य च ॥ एतत्सुखव्रतं नाम सौगंध्यजननं पर
म् ॥ ६२ ॥ चैत्रादिचतुरो मासान् जलं कुर्यादयाचितम् ॥ ज्येष्ठाषाढे व जामासं च पक्षं वा पांडुनंदन ॥ ६३ ॥ व्रतांते मणिकं दद्यादन्न
वस्त्रसमन्वितम् ॥ घृतेन सहितं तद्वत्सप्तधान्यसमन्वितम् ॥ ६४ ॥ तिलपात्रं हिरण्यं च ब्रह्मलोके महीयते ॥ कल्पांते रा
जराजः स्याद्रसव्रतमिहोच्यते ॥ ६५ ॥ पंचामृतेन स्नपनं कृत्वा विष्णोः शिवस्य च ॥ वत्सरांते पुनर्दद्याद्धेनुं पंचामृतैर्यु

तृतीयायांपुष्यकृतिः

197

नाम॥ ६६॥ विप्राय कनकं शांखं सपदं याति शांकरम्॥ राजा भवति कल्पांते हृत्तिव्रतमिहाचरेत्॥ ६७॥ योहिंसां वर्जयि
त्वा तु मासं संवत्सरं तथा॥ व्रतांते हेमहरिणीं कृत्वाग्रान्मा विवस्त्रता॥ ६८॥ तद्वत्सवत्सां गां दद्यात्सोऽश्वमेधफलं लभेत्।
अहिंसाव्रतमित्येतत्सर्वशांतिप्रदं नृणाम्॥ ६९॥ माघमास्युषसि स्नानं कृत्वा दंपत्यमर्चयेत्॥ भोजयित्वा यथाश
क्त्या माल्यवस्त्रविभूषणो॥ ७०॥ सौभाग्यं महदाप्नोति शारीरारोग्यमुत्तमम्॥ सूर्यलोके वसेत्कल्पं सूर्यव्रतमिदं स्मृतम्॥
७१॥ आषाढादि चतुर्मासे प्रातःस्नायी भवेन्नरः॥ विप्राय भोजनं दद्यात्कार्त्तिक्यां गोप्रदो भवेत्॥ ७२॥ घृतकुंभं ततो
दत्वा सर्वान्कामानवाप्नुयात्॥ वैष्णवव्रतमित्युक्तं विष्णुलोकमवाप्नुयात्॥ ७३॥ अयनादयनं यावद्वर्जयेन्मधुसर्पिषी।
नदंते पुण्यदानानि घृतधेन्वा सहैव तु॥ ७४॥ दत्वा शैवपदं याति दत्वा तु घृतपायसम्॥ एतत्स्नेहव्रतं नाम शीला
रोग्यफलप्रदम्॥ ७५॥ संध्यादीपप्रदो यस्तु मासं तैलं विवर्जयेत्॥ समाप्ते दीपकं दद्याच्चक्रशूले च कांचने॥ ७६॥
वस्त्रयुग्मं च विप्राय स तेजस्वी भवेदृढम्॥ एतद्दीपव्रतं नाम सर्वकांतिप्रदायकम्॥ ७७॥ एकभक्तेन सप्ताहं गौरीं
वा यस्तु पूजयेत्॥ संपूज्य पार्वतीं भक्त्या गंधपुष्पविलेपनैः॥ ७८॥ ततः सुवासिनीभ्यां तु कुंकुमेन विलेपयेत्। पुष्पैर्विले
पयेच्चैनां कर्पूरागरुचंदनैः॥ ७९॥ तांबूलं शोभनं दत्वा नारिकेलफलं तथा॥ प्रीयतां कुमुदां देवीं प्रणिपत्य विसर्जयेत्॥ ८०

॥ भवि ॥
॥ १९८ ॥

ष्टम्यैकां पूजयेद्देवीं सप्ताहं यावदेव तु । उनकृत्सप्तमे पूर्णे त्वाः सप्तैव निमन्त्रयेत् ॥ ११ ॥ वद्रुसंभोजयित्वा तु यथाशक्त्या विभूषणैः
षयित्वा माल्यवस्त्रैः कर्णावेष्टाङ्गुलीयकैः ॥ १२ ॥ कृष्णदा माधवी गौरी भवानी पार्वती उमा । काली च दर्पणं हस्ते प्रत्येकं विनिवे
दयेत् ॥ १३ ॥ ब्राह्मणां पूजयित्वैकं वाचः संपत्नमश्नुते ॥ सप्तकुंदरकं नाम व्रतं चैतद्युधिष्ठिर ॥ १४ ॥ करोति सुंदरं देहं सौभाग्यं य
श्नुते परम् ॥ वर्जयेच्चैत्रमासे तु यस्तु गंधानुलेपनम् ॥ १५ ॥ शुक्तिं गंधभृतां दत्वा विप्राय सितवाससी ॥ शक्त्या च दक्षिणां दद्या
त्सर्वान्कामान्समश्नुते ॥ १६ ॥ वारुणं च पदं याति तदेतद्वरुणव्रतम् ॥ वैशाखमासे लवणं वर्जयित्वा यतव्रतः ॥ १७ ॥ मासां
तेऽधनतो दद्यात्सवत्सां गां द्विजातये स्थित्वा विष्णुपदे कल्पं ततो राजा भवेदिह ॥ १८ ॥ एतत्कान्तिव्रतं नाम कान्तिकीर्तिप्र
दायकम् ॥ ब्राह्मणं काञ्चनं कृत्वा तिलद्रोणोपरि स्थितम् ॥ १९ ॥ त्र्यहं तिलव्रतीभूत्वा वह्निं संतर्पयेद्द्विजम् ॥ संपूज्य विप्रदंप
त्यं माल्यवस्त्रविभूषणैः ॥ २० ॥ शक्तितस्त्रिपलादूर्ध्वं विश्वात्मा प्रीयतामिति ॥ पुण्येऽह्नि दद्यात्स परं ब्रह्म यात्यपुनर्भवम् ।
२१ ॥ एतद्ब्रह्मव्रतं नाम निर्वाणफलदं नृणाम् ॥ यश्चोभयमुखीं दद्यात्प्रभूतकनकान्विताम् ॥ २२ ॥ दिनं पयोव्रतं तिष्ठे
त्स याति परमं पदम् ॥ त्र्यहं पयोव्रतः स्थित्वा काञ्चनं कल्पपादपम् ॥ २३ ॥ पलादूर्ध्वं यथाशक्त्या तंडुलैरुपसंयुतम् ।
द्यादितं वरवासोभिः पुष्पमालाविभूषितम् ॥ २४ ॥ दत्वा स्वर्गे वसेत्कल्पं कल्पव्रतमिदं स्मृतम् ॥ यस्तु वत्सतरीं भक्त्या

198

॥ राम: ॥
॥ १९८ ॥

कंठाभरणभूषिताम्॥९५॥ सुपर्याणां कुञ्जरस्य घंटावलीनालंकृताननाम्॥ मोदकोदकपात्रेणतांबूलेनसमन्वि
ताम्॥९६॥ स्थापितांस्थापयेत्पृष्ठेभृंगाग्रेबुहिमान्विताम्॥ ईदृग्विधांअतीपातेग्रहतोवायनद्वये॥९७॥ अयाचि
तेनवस्थित्वाननतोदद्याद्विजातये॥ एतद्द्वारव्रतंनाममार्गखेदविनाशनम्॥९८॥ परलोकाद्दगमनेक्रांतिश्रमह
रंपरम्॥ नक्ताशीत्वष्टमीषुस्याद्वत्सरान्तेऽथगोप्रदः॥९९॥ पौरंदरंपदंयातिसुगतिव्रतमुच्यते॥ यश्चेन्धनप्रदोए
जन्हेमतौशिशिरव्रतम्॥१००॥ घृतधेनुंप्रयच्छेतपरंब्रह्मसगच्छति॥ शारीरारोग्यजननंधृतिकांतिप्रदायकम्· विनिवेशयेत·
१॥ वैश्वानरव्रतंनामसर्वपापप्रणाशनम्॥ एकादश्यांतुनक्ताशीयश्चक्रंविनिवेदयेत॥२॥ तदर्कंखंतुसौवर्णंचै
त्रेविप्रायपांडव॥ यएतत्कुरुतेभक्त्यासविष्णोःपदमाप्नुयात॥३॥ एतद्विष्णुव्रतंनामकल्पादौराज्यलाभकृत॥ पयोव्र
तस्तुपंचम्यांव्रतांतेगोयुगप्रदः॥४॥ लक्ष्मीलोकेवसेत्कल्पमेतद्देवीव्रतंस्मृतम्॥ सप्तम्यांनक्तभुग्दद्यात्समाप्तेगां
पयस्विनीम्॥५॥ सोऽर्कलोकमवाप्नोतिभानुव्रतमिहोच्यते॥ चतुर्थ्यांनक्तभुग्दद्यादब्दगाहेमवारणम्॥१०६॥ व्र
तंवैनायकंनामसर्वविघ्नविनाशनम्॥ महाफलानियस्त्यक्त्वाचातुर्मास्येद्विजातये॥७॥ हैमानिकार्तिकेदद्याद्गोयु
गेनसमंनरः॥ शिवंव्रतयुगंनामसंपूर्णांघपदानिव॥८॥ एतत्फलव्रतंनामफलावाप्तिकांसदा॥ यश्चोपवासीसप्त

विषा. लोकप्रदायकम् १

ष्मांसमाप्तेहैमपंकजम् ॥ ९ ॥ धेनुभ्यशक्तितोदद्यात्सवत्साःकांस्यदोहनाः ॥ भक्त्याराजेन्द्रविप्रायवाचकायनिवेदये
त् ॥ १० ॥ अनन्तसौख्यव्रतंनामसर्वलोकप्रदायकम् ॥ द्वादशद्वादशीर्यस्तुनामप्राशनसंयुतः ॥ ११ ॥ समुपोष्यसमाप्तेतु
सवत्साःसोदकाघटाः ॥ द्वादशात्रप्रदेयाश्चसर्वकामप्रसिद्धये ॥ १२ ॥ गोविन्दव्रतमित्येतन्गोविंदपददायकम् ॥ का
र्त्तिक्यांयोवृषोत्सर्गंकृत्वानक्तंसमाचरेत् ॥ १३ ॥ सगोलोकमवाप्नोतिवृषव्रतमिदंस्मृतम् ॥ व्रतान्तेगौः ॥ प्रदातव्या
भोजनंशक्तितःपरम् ॥ १४ ॥ विप्राणामत्रकथितंप्राजापत्यमिदंव्रतम् ॥ चतुर्दश्यांतुनक्ताशीसमान्तेगोयुगप्रदः ॥
१५ ॥ शैवंपदमवाप्नोतिज्ञेयंत्र्यंबकव्रतम् ॥ सप्तरात्रोषितोदद्याद्घृतकुंभंद्विजातये ॥ १६ ॥ घृतव्रतमिदंप्राहुर्ब्रह्मलो
कप्रदायकम् ॥ मासांतेवत्सगांदद्याद्धेनुमंतेपयस्विनी ॥ १७ ॥ शक्रलोकेवसेत्कल्पंशक्रव्रतमिदंस्मृतम् ॥ कार्त्तिकस्यसि
तेपक्षेचचतुर्दश्यांनराधिप ॥ १८ ॥ सोपवासःपंचगव्यंपिबेद्रात्रौविचक्षणः ॥ कपिलायास्तुगोमूत्रंकृष्णायागोमयंतथा ॥ १९
सितधेन्वास्तथाक्षीरंरक्तायास्तुतथादधि ॥ गृहीत्वाकर्बुरायास्तुघृतमेकत्रमेलयेत् ॥ २० ॥ वेदोक्तमंत्रैराजंडकृत्वोद
कसमन्वितम् ॥ ततःप्रभातसमयेस्नात्वासंतर्प्यदेवताः ॥ २१ ॥ ब्राह्मणान्वाचयित्वातुभुंजीयाद्वाग्यतःशुचिः ॥ ब्रह्म
कूर्चव्रतंह्येतत्सर्वपापप्रणाशनम् ॥ २२ ॥ यद्बाल्येयच्चकौमार्येवार्धकेवापियत्कृतम् ॥ ब्रह्मकूर्चोपवासेनतत्सर्वंन

असितेपक्षे

199

रूपतिस्वर्गात्॥२३॥ अनग्निपक्वमश्नाति तृतीयायां तु यो नरः॥ गां दत्वा द्विजमुख्येभ्यो निपनराह्ननिवर्जितम्॥२४॥
एतद्धि व्रतं नाम सर्वमांगल्यकारकम्॥ हैमं पलद्वयादूर्ध्वं रथमश्वयुगान्वितम्॥२५॥ तिलद्रोणोपरि गतं सित
माल्ययुगान्वितम्॥ दत्वा कृतोपवासस्तु दिवि कल्पशतं वसेत्॥२६॥ नदंतेराजराजः स्यादग्निव्रतमिदं स्मृतम्॥ कु
ल्यापलद्वयादूर्ध्वं ह्रयाभ्यां संयुतं नरः॥२७॥ हैमं रथवरं श्रेष्ठं सर्वोपस्करसंयुतम्॥ स तु लोके वसेत्कल्पं सहसप्तम
पभूपतिः॥२८॥ भवेद्युपोषितो दत्वा करिव्रतमिदं स्मृतम्॥ मुक्तवासं परित्यज्य समान्ते गोप्रदो भवेत्॥२९॥ यस्माधि
पं समाप्नोति सुमहत्वव्रतमुच्यते॥ निशि कृत्वा जले वासं प्रभाते गोप्रदो भवेत्॥३०॥ वारुणं लोकमाप्नोति वरुणव्रतमु
च्यते॥ चांद्रायणं च यः कुर्याद्धैमं चंद्रं निवेदयेत्॥३१॥ चंद्रव्रतमिदं प्रोक्तं चंद्रलोकप्रदायकम् ज्येष्ठे पंचतपाः सायं
हैमधेनुप्रदो दिवम्॥३२॥ अथाष्टमीचतुर्दश्यो रुद्रव्रतमिदं स्मृतम् अनुलेपनं यः कुर्यात्तृतीयायां शिवालये॥३३॥
स स्वर्गं धेनुदो याति भवानीव्रतमुच्यते॥ माघे निश्यार्द्रवासाः स्यात्सप्तम्यां गोप्रदो भवेत्॥३४॥ दिवि कल्पं वसित्वेह रा
जा स्यात्तापनं व्रतम्॥ दत्वा कृतोपवासस्तु दिवि कल्पशतं वसेत्॥३५॥ नदंतेराजराजः स्यादश्वव्रतमिदं स्मृतम्॥ नव
त्कलद्वयादूर्ध्वं करिभ्यां संयुतं नरः॥३६॥ हैमं रथं नरश्रेष्ठ सर्वोपस्करणान्वितम्॥ त्रिरात्रोपोषितो दद्यात्स्कन्यामोभव

॥ मत्स्यपु ॥
॥ २०० ॥

कस्मिंश्चित्पुस्तके २
धामव्रतमिदं स्मृतम्

नेभ्रभम् ॥ ३७ ॥ आदित्यलोकमाप्नोति पूजितः ससुरासुरैः ॥ सुरलोकमवाप्नोति धामव्रतसमन्वितम् ॥ ३८ ॥ त्रिसंध्यं
पञ्चाब्दं यस्त्वुपवासी विमत्सरः । पूर्णिमास्यामवाप्नोति मोक्षमिंदुव्रतादिह ॥ ३९ ॥ दत्त्वा सितद्वितीयायामिंदोर्लवण
भाजनम् । कांस्यं सवस्त्रं राजेन्द्र दक्षिणासहितं तथा ॥ ४० ॥ समाप्ते गोप्रदो याति विप्राय शिवमंदिरम् । कल्पांते राजराजः
स्यात्सोमव्रतमिदं स्मृतम् ॥ ४१ ॥ प्रतिपद्येकभक्ताशी समांते कपिलाप्रदः । वैश्वानरपदं याति आग्नेयव्रतमुच्यते ॥ ४२ ॥
एकादश्यां माघमासे चतुर्दश्यष्टमीषु च ॥ एकभक्तेन यो दद्याद्यालकान्यजिनानि च ॥ ४३ ॥ उपानहौ कंवलाभ्य चैत्रे छत्राणि
कं ततः ॥ करपात्रादिकं चापि यथाशक्त्या विवर्जितः ॥ ४४ ॥ ब्राह्मणानां महाराज सोऽश्वमेधफलं लभेत् ॥ एतत्सौख्यव्रतं नाम
सर्वसौख्यप्रदायकम् ॥ ४५ ॥ दशम्यामेकभक्ताशी समांते दशधेनुदः ॥ दिशाश्च कांचनीर्दद्यात्सौरीरत्नायुधिष्ठिर ॥ ४६ ॥ नि
लडाणो पतिगता ब्रह्मांडाधिपतिर्भवेत् ॥ एतद्दिग्व्रतं नाम महापातकनाशनम् ॥ ४७ ॥ संपूज्य सितसप्तम्यां भानुधान्यानि
सप्तपः ददाति तत्कृमुश्राद्धं चतोन समं द्विजे ॥ ४८ ॥ सत्ताश्यति सम्याग्नौक्तला स्नानमेव च ॥ एतच्छान्यव्रतं नाम धनधान्यप्रदाय
कम् ॥ ४९ ॥ मासोपवासी यो दद्याद्धेनुं विप्राय शोभनाम् ॥ स वैष्णवं पदं याति भीमव्रतमिदं स्मृतं ॥ ५० ॥ पक्षोपवासी यो द
द्याद्विप्राय कपिलाद्वयम् ॥ स ब्रह्मलोकमाप्नोति पूजितः सुरसत्तमैः ॥ ५१ ॥ दद्याद्विंशत्पलादूर्ध्वं महीं कृत्वा तु कांचनीम् ।

सभम

पूजितं देवं १

200

द्विजाग्र्याय ७

एतज्ज्ञानव्रतं नाम २

॥ रामः ॥
॥ २०० ॥

सर्वविघ्ननिवारणम् ७ महाव्रतम् ५

कुलाचलादिसहितां तिलवत्ससमन्विताम् ॥ ५२ ॥ तिलद्रोणोपरिगतां ब्राह्मणाय कुटुंबिने ॥ दत्वं पयोव्रतस्तिष्ठेद्रुद्र
लोके महीयते ॥ ५३ ॥ एतन्महीव्रतं प्रोक्तं सप्तकल्पानुवर्तकम् ॥ माघमासेऽथ चैत्रे वा गुडधेनुप्रदो भवेत् ॥ ५४ ॥ गुडव्रतस्तृ
तीयायां सर्वोपस्करणोर्ज्जितम् ॥ गौरीलोकमवाप्नोति पूज्यतेऽप्सरसां गणैः ॥ ५५ ॥ उमाव्रतमिदं प्रोक्तं सततानंददायक
म् वत्सरं त्वेकभक्ताशी सभक्ष्य जलकुंभदः ॥ ५६ ॥ शिवलोके वसेत्कल्पं तच्छिवव्रतमिदं स्मृतम् ॥ कार्त्तिकादितृतीयायां
प्राश्य गोमूत्रयावकम् ॥ ५७ ॥ गौरीलोके वसेत्कल्पं ततो राजा भवेदिह ॥ एतद्रुद्रव्रतं नाम महाकल्याणकारकम् ॥ ५८
चैत्रे त्रिरात्रं नक्ताशी नद्यां स्नात्वा ददाति यः ॥ स्रजः पयस्विनीः पंच ब्राह्मणाय कुटुंबिने ॥ ५९ ॥ न जायते पुनरसौ जी
वलोके कदाचन ॥ एतद्भक्तव्रतं प्रोक्तं सर्वव्याधिविनाशनम् ॥ ६० ॥ कन्यादानं तु यः कुर्याद्दाहंकारयेच्च यः ॥ एकविं
शतिकुलोपेतो ब्रह्मलोकं स गच्छति ॥ ६१ ॥ कन्यादानात्परं दानं न चान्यदधिकं क्वचित् ॥ ये करिष्यंति नृपते तेषां लोको
ऽक्षयो दिति ॥ ६२ ॥ तिलपिष्टमयं कृत्वा गजं हेमविभूषितम् ॥ कुर्यात्कुशामयं तद्वदारोहकसमन्वितम् ॥ ६३ ॥ नक्ष
त्रमालासहितं चामरापीडधारिणम् ॥ दत्तानागवदनेत्ररक्तवस्त्रयुगान्वितम् ॥ ६४ ॥ नागरूपान्कुंडके वा कृतं दत्वा
धर्मोदकम् ॥ प्रदद्याद्द्विजदंपत्यं संपूज्य माल्यविभूषणैः ॥ ६५ ॥ कंठस्थमाला साविश्य जलं मलविवर्जितः ॥ कांतारकारि

दीडाप ६

शिवलोकं ततो व्रजेत् ४

॥ भवि ॥ ण्ण होतत्कथितं नृप युधिष्ठिर ॥ ६६ ॥ कांतारकारिदुर्गेषु कारयन्नारिडस्कतीन् ॥ इह लोके परे चैव नात्र कार्या विचारणा
॥ २०१ ॥ ६७ ॥ ये कुर्वंति दिने पुण्ये व्रतं पौरंदरं नराः ॥ तेषां पौरंदरो लोको भवेदाभूतसंप्लवम् ॥ ६८ ॥ पयो व्रतस्तु पंचम्यां दत्वा नागं
द्विजातये ॥ सौवर्णां सर्पजनितं भयं तेषां न जायते ॥ ६९ ॥ सिताष्टम्यां सोपवासो वृषभं यः प्रयच्छति ॥ सितवस्त्रसमा-
च्छन्नं घण्टाभरणभूषितम् ॥ ७० ॥ शिवलोके वसेत्कल्पं ततो राजा भवेदिह ॥ तृणव्रतमिदं प्रोक्तं सर्वधर्मप्रदायकम् ॥ ७१
उत्तरे त्वयने प्राप्ते घृतपृष्ठेन यो हरिम् ॥ स्नापयित्वा ब्राह्मणाय वडवां यः प्रयच्छति ॥ ७२ ॥ स सर्वकामसंयुक्तः पुत्रभ्रात-
४ पुत्रपौत्रसमन्वितः समन्वितः ॥ सूर्यलोके वसेद्राजन्नारी व्रतमिहोच्यते ॥ ७३ ॥ सकृत्स्नवम्यां भक्तेन पूजयेद्विन्ध्यवासिनीम् ॥ पुष्पधूपैस्ततो द-
यान्नं जरंभकशोभितम् ॥ ७४ ॥ हैमं विप्राय यः शान्ताय स वाग्मी जायते नरः ॥ एतदाग्नेयमित्युक्तं व्रतमग्निपदप्रदम् ॥ ७५
द्वादश्यां गृहकान्तो च यत्नैलेशवसंयुतम् ॥ विप्राय भोजनं दत्वा यः स याति हरेः पदम् ॥ ७६ ॥ विष्कंभादिष्वयोगेषु ए-
कभक्तान्नो नरः ॥ एतदानेयमित्युक्तं व्रतमग्निपदप्रदम् ॥ ७७ ॥ यो ददाति कलादेषु घृततैलफलेशवम् ॥ यवगोधूम-
पुरम् ५ चणकानि ध्यादाश्यालितंडुलान् ॥ ७८ ॥ लवणं दधि दुग्धं च वस्त्रं कनकमेव च ॥ कंबलं गां वृषं छत्रमुपानद्युगलं तथा ॥ रामः ॥
७९ ॥ कर्पूरं कुंकुमं चैव चंदनं कस्तूरमानि च ॥ लोहं कनकताम्रं च रौप्यं चेति युधिष्ठिर ॥ ८० ॥ स्नानः स्वशक्त्या विधिवत्सर्व ॥ २०१ ॥

201

पुत्रपौत्रसमन्वितम् ४

फलदक्षिणाम् ३ यहोपडवनाशनं २

पापैः प्रमुच्यते ॥ न वियोगमवाप्नोति योगव्रतमिदं स्मृतम् ॥ ८१ ॥ कार्त्तिक्यां नक्तभुग्दद्यान्मेषं मार्गशिरे वृषम्
पौषमाघादिमासेषु सौवर्णाः सर्वफगहि ॥ ८२ ॥ कर्मणानायः सर्वाव स्त्रमाल्यैर्विभूषिताः ॥ पौर्णमास्यां पौर्णमा
स्यां कौंतेय चरुं दक्षिणाम् ॥ ८३ ॥ एतत्पाशिव्रतं नाम सर्वोपद्रवनाशनम् ॥ सर्वाशापूरकं नृणां सोमलोकप्रदाय
कम् ॥ ८४ ॥ पंचाशीतिर्व्रतानां ते कथिता पाण्डुनंदन ॥ यां श्रुत्वा ब्रह्महा गोघ्नः पितृहा मातृहा तथा ॥ ८५ ॥ मुच्यते
तत्क्षणादेव पातकैः सोपपातकैः ॥ ८६ ॥ पंचाधिकानवमयाकथिता व्रतानां राजन्नशीतिरतिसौख्यधनप्रदाना
म् ॥ एतां समाचरति यः शृणुयात्पठेद्वा हत्वाघलग्नदवतस्य सुरेशलोकः ॥ १८७ ॥ इति श्रीभविष्ये महापुराणे
उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे व्रतपंचाशीतिवर्णनं नामैकविंशत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ श्रीकृष्ण उवाच ॥ कृतं त्रे
तायुगं प्रोक्तं त्रेतानुक्षत्रियं युगम् ॥ वैश्यं द्वापरमित्याहुः शूद्रं कलियुगं स्मृतम् ॥ १ ॥ कलौ राजन्मनुष्याणां शैथिल्यं स्ना
नकर्मणि ॥ तथापि माघमासेन कथयिष्यामि तेऽनघ ॥ २ ॥ यस्य हस्तौ च पादौ च वाङ्मनश्च सुसंयतम् ॥ विद्यातप
श्च कीर्तिश्च स तीर्थफलमश्नुते ॥ ३ ॥ अश्रद्दधानः पापात्मा नास्तिकोऽच्छिन्नसंशयः ॥ हेतुनिष्ठश्च पंचैते न तीर्थफलभा
गिनः ॥ ४ ॥ प्रयागं पुष्करं प्राप्य कुरुक्षेत्रमथापि वा ॥ यत्र यात्र च वा स्नायान्माघे नित्यमिति स्थितिः ॥ ५ ॥ त्रिरात्रफलदान

॥ भविपु ॥
॥ १०२ ॥

घोषाः काश्चिदसमुद्रगाः ॥ समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥६॥ उषःसमीपे यः स्नानं संध्यायामुदिते रवौ ॥ प्रा-
जापत्यं तेन तत्स्नानं महापातकनाशनम् ॥७॥ प्रातरुत्थाय यो विप्रः प्रातःस्नायी सदा भवेत ॥ सर्व्वपापविनिर्मुक्तः परं ब्रह्माधिग-
च्छति ॥८॥ वृथा चोष्णोदकस्नानं वृथा जाप्यमवैदिकम् ॥ अश्रोत्रिये वृथा श्राद्धं वृथा भुक्तमसाक्षिकम ॥९॥ स्नानं चतुर्वि-
धं प्रोक्तं स्नानविधिर्न्निर्द्दिष्टविधिविद्भिः ॥ वायव्यं वारुणं ब्राह्मं दिव्यं चेति यथाक्रमम् ॥१०॥ वायव्यं गोरजःस्नानं वारुणं सागरादिषु ॥
ब्राह्मं ब्राह्मणमंत्रोक्तं दिव्यं मेघांबुभास्करम् ॥११॥ सर्व्वेषामेव स्नानानां विशिष्टं तत्र वारुणम ॥ ब्रह्मचारिगृहस्थस्य वान-
प्रस्थोःयभिक्षुकः ॥१२॥ स्नाते सर्व्वेषुवर्णां संति सर्व्वदा माघमज्जनम ॥ वालातरुणकावृद्धानरनारीनपुंसका ॥१३॥ स्नात्वा
माघं शुभे तीर्थे प्राप्नुवंतीप्सितं फलम् ॥ ब्रह्मक्षत्रविशां चैव मंत्रवत्स्नानमिष्यते ॥१४॥ तूष्णीमेव हि शूद्रस्य स्त्रीणां च
कुरुनंदन ॥ माघमासे रटन्त्यापः किंचिदभ्युदिते रवौ ॥१५॥ ब्रह्मघ्नं वा सुरापं वा कं पतंतं पुनीमहे ॥ घासापायत्रसो वर्णाः
स्त्रियश्वापाकसोपमाः ॥१६॥ ऋषिकुल्या वहा यत्र नद्यः पायसकर्द्दमाः ॥ तत्र ते यांति मज्जंति ये माघे भास्करोदये ॥१७॥
यतिवत्स्थितास्कैतमौनीयैश्च स्ववर्जितः ॥ यदीच्छेद्दिवलान्भोगांश्च सूर्योपमानरहान ॥१८॥ पुष्यफाल्गुनयोर्म-
ध्ये प्रातःस्नायी भवेन्नरः ॥ पौर्णमास्यां समावास्याः प्रारभ्य स्नानमाचरेत ॥१९॥ त्रिंशद्दिनानि पुष्याणि मकरस्थे दि-

महन

सदाभवेत-१

॥ रामः ॥
॥ २०२ ॥

202

वाकरे॥ तत्र उत्थाय नियमं गृह्णीयाद्विधिपूर्वकम॥ २०॥ माघमासमिमं पूर्णं स्नास्येऽहं देव माधव। तीर्थस्मीतज
ले नित्यमिति संकल्प्य चेतसा॥ २१॥ अप्रावृतशरीरस्तु यः कथं स्नानमाचरेत॥ पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः
२१॥ तत्र स्नात्वा शुभे तीर्थे दत्वा शिरसि हैमदम॥ वेदोक्तविधिना राजन्सूर्यस्यार्घ्यं निवेदयेत॥ २२। पितॄन्संतर्प्य तत्रस्थो
ह्यव तीर्थततो जलात॥ २३ देवं नमस्कृत्य पूजयेत्पुरुषोत्तमम॥ २४॥ शंखचक्रधरं देवं माधवं नाम पूजयेत॥ वह्निं हुत्वा
विधानेन नत्वा तत्र कामगो भवेत॥ २५॥ भक्त्या व्रह्मचर्येणाशक्तः स्नानं समाचरेत॥ अशक्तस्य धनेशस्य स्वेच्छा स्नान
त्र कथ्यते॥ २६॥ अवश्यमपि कर्त्तव्यं माघे स्नानमिति श्रुतिः॥ ईश्वरेणा यथाकामं बलधर्मोऽनुवर्तते॥ २७॥ तिलस्नायी
तिलोद्वर्त्ती तिलभोक्ता तिलोदकी॥ तिलहोता च दाता च षट्तिली नावसीदति॥ २८॥ तैलस्यामलकानां च तीर्थे देया
नि नित्यशः॥ तथा प्रज्वालयेद्वह्निं निवारणार्थं द्विजन्मनाम॥ २९॥ एवं स्नानावसाने तु भोज्यं देयमगातिम॥ भोजयेद्द्वि
जदंपत्यौ भूषयेद्वस्त्रभूषणैः॥ ३०॥ कंबलाजिनरत्नानि वासांसि विविधानि च॥ चोलकानि च दिव्यानि प्रच्छादन
पटीस्तथा॥ ३१॥ उपानहौ तथा गुप्तं मोदकैः पापमोचकैः॥ अनेन विधिना दद्यान्माधवः प्रीयतामिति॥ ३२॥ अ
गम्यागमनस्तेयपापेऽभक्ष्यपरिग्रहात॥ रहस्याचरिताद्वापि मुच्यते स्नानमाचरेत॥ ३३॥ पितृभिः पितामहैः सार्द्धं

तथैव प्रपितामहैः ॥ मातृमातामहैः सार्द्धं वृद्धमातामहैस्तथा ॥ २४ ॥ एकविंशकुलैः सार्द्धं भोगान्भुक्त्वा यथेप्सितान्
माघमास्युषसि स्नात्वा विष्णुलोकं स गच्छति ॥ २५ ॥ यो माघमास्युषसि सूर्यकरामितांगे स्नानं समाचरति चारुनदीप्र
वाहे ॥ उद्धृत्य सप्त पुरुषान्पितृमातृतश्च स्वर्गं प्रयात्यमलदेहधरोऽसौ ॥ २६ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरप
र्वणि श्रीकृष्णयुधिष्ठिरसंवादे माघस्नानविधिवर्णनं नाम द्वाविंशत्युत्तरशततमोऽध्यायः ॥ १२२ ॥ ॥ श्रीकृष्ण उ
वाच ॥ नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते ॥ तस्मात्कायविशुद्ध्यर्थं स्नानमादौ विधीयते ॥ १ ॥ अनुद्धृतैरुद्धृतै
र्वा जलैः स्नानं समाचरेत् ॥ तीर्थं प्रकल्पयेद्विद्वान्मूलमंत्रेण मंत्रवित् ॥ २ ॥ नमो नारायणायेति मूलमंत्र उदाहृतः
दर्भपाणिस्तु विधिना आचान्तः प्रयतः शुचिः ॥ ३ ॥ चतुर्हस्तसमायुक्तं चतुरस्रं समंततः ॥ प्रकल्प्यावाहयेद्गंगामेभिर्मं
त्रैर्विचक्षणः ॥ ४ ॥ ओं विष्णुपादप्रसूतासि वैष्णवी विष्णुदेवता ॥ पाहि नस्त्वेनसस्तस्मादाजन्ममरणांतिकात् ॥ ५
तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ॥ दिवि भुव्यंतरिक्षे च तानि ते संति जाह्नवि ॥ ६ ॥ नंदिनीत्येव ते नाम
देवेषु नलिनीति च ॥ क्षमा पृथ्वी च विहगा विश्वकाया शिवामृता ॥ ७ ॥ विद्याधरी सुप्रसन्ना तथा लोकप्रसादिनी
हैमा तथा जाह्नवी च शांता शांतिप्रदायिनी ॥ ८ ॥ एतानि पुण्यनामानि स्नानकाले प्रकीर्तयेत् ॥ भवेत्संनिहिता तत्र

विभ्रमाया २

203

त्रगंगा त्रिपथगामिनी ॥ ९ ॥ सप्तवाराभिजप्तेन करसंपुटयोजितम् ॥ ३ ॥ मूर्ध्नि कुर्याज्जलं भूयस्त्रिचतुःपंचसप्तधा ॥ १०
स्नानं कुर्यान्मृदा तद्वदामंत्र्य च विधानतः ॥ अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे ॥ ११ ॥ मृत्तिके हर मे सर्वं यन्मया दुष्कृ
तं कृतम् ॥ उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥ १२ ॥ नमस्ते सर्वलोकानाम सुधारिणि सुव्रते ॥ एवं स्नात्वा ततः प
श्चादाचम्य च विधानतः ॥ १३ ॥ उत्थाय वाससी शुक्ले शुद्धे तु परिधाय वै ॥ ततस्तु तर्पणं कुर्यात्त्रैलोक्याप्यायनाय तु
१४ ॥ देवा यक्षास्तथा नागा गंधर्वाप्सरसां गणाः ॥ क्रूराः सर्पाः सुपर्णाश्च तरवो विहगाः खगाः ॥ १५ ॥ विद्याधरा
जलधरास्तथैवाकाशगामिनः ॥ निराधाराश्च ये जीवाः पापकर्मरताश्च ये ॥ १६ ॥ तेषामाप्यायनायैतद्दीयते
सलिलं मया ॥ कृतोपवीती देवेभ्यो निवीती च भवेत्ततः ॥ १७ ॥ मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा ॥ सन
सनंदश्च कश्च तृतीयश्च सनातनः ॥ १८ ॥ कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा ॥ सर्वे ते तृप्तिमायांतु मद्दत्तेनांबुना
सदा ॥ १९ ॥ मरीचिमत्र्यंगिरसौ पुलस्त्यं पुलहं च क्रतुम् ॥ प्रचेतसं वसिष्ठं च भृगुं नारदमेव च ॥ २० ॥ देवब्रह्मऋषी
न्सर्वांस्तर्पयेत्साक्षतोदकैः ॥ अपसव्यं ततः कृत्वा सव्यं जानु च भूतले ॥ २१ ॥ अग्निष्वात्ता बर्हिषदो हविष्मंतस्तथोष्म
पाः ॥ सुकालिनस्तथा सौम्या आज्यपाः सोमपास्तथा ॥ २२ ॥ तर्पयेच्च पितॄन्भक्त्या सतिलोदकचंदनैः ॥ दर्भपाणि

॥ भविपु ॥
॥ २०४ ॥

स्नविधिवत्तर्पयेन्नामगोत्रतः ॥ २३ ॥ पित्रादीनामगोत्रेण तथा मातामहानपि ॥ संतर्प्य विधिवद्भक्त्या इमं मंत्रमुदी
रयेत् ॥ २४ ॥ ये ऽबांधवा बांधवा ये ये ऽन्यजन्मनि बांधवाः ॥ ते तृप्तिमखिला यांतु यश्चास्मत्तो ऽभिवाञ्छति ॥ २५ ॥ तत
श्चाचम्य विधिवदालिखेत्पद्ममग्रतः ॥ अक्षताभिः सपुष्पाभिः सतिलारुणचंदनैः ॥ २६ ॥ अर्घं दद्यात्प्रयत्नेन सूर्यना
मानुकीर्तनैः ॥ नमस्ते विश्वरूपाय नमो विष्णुस्वरूपवे ॥ २७ ॥ सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ॥ नमस्ते स
र्ववपुषे नमस्ते सर्वशक्तये ॥ २८ ॥ जगत्स्वामिन्नमस्ते ऽस्तु दिव्यचंदनभूषित ॥ पद्मनाभ नमस्ते ऽस्तु कुंडलांगद
धारिणे ॥ २९ ॥ नमस्ते सर्वलोकेश सर्वासुरनमस्कृत ॥ सुकृतं दुष्कृतं चैव सर्वं जानासि सर्वदा ॥ ३० ॥ सत्यदेव न
मस्ते ऽस्तु सर्वदेव नमो ऽस्तुते ॥ दिवाकर नमस्ते ऽस्तु त्रयीमय नमो ऽस्तुते ॥ ३१ ॥ एवं सूर्यं नमस्कृत्य त्रिः कृत्वा च प्रद
क्षिणाम् ॥ द्विजं गां कांचनं स्पृष्ट्वा ततो विष्णुगृहं व्रजेत् ॥ ३२ ॥ स्नानं दिनं प्रति दिनं कथितं मुनीन्द्रैः ॥ पापापहं मल
हरं सुखदं सदैव ॥ तस्मान्नदीष्वथ गृहे सुपवित्रतडागे कर्तव्यमेतदिह धर्मधिया नरेण ॥ ३३ ॥ ॥ इति श्री भवि
ष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नित्यस्नानविधिवर्णनं नाम त्रयोविंशत्युत्तरशततमो ऽध्या
यः ॥ १२३ ॥ ॥ युधिष्ठिर उवाच ॥ रुद्रस्नानविधानं मे कथयस्व जनार्दन ॥ सर्वदुष्टोपशमनं सर्वशांतिप्रदं

१धर्मपरेण पुंसा ३

204

॥ रामः ॥
॥ २०४ ॥

कतुवर्जिता २ दुहितामित्यार्षम् सप्तादीनि लिपाठेऽसपः पूजा वदन्ति मां त्रिकसंज्ञा ८

नगान॥१॥ श्रीकृष्ण उवाच॥ देवसेनापतिं स्कन्दं हृष्टचित्तं द्विजसत्तम॥ अगस्तिर्मुनिशार्दूलः पृष्टवान्स्नानमुत्ताव
ष॥२॥ सर्वज्ञोऽसि कुमार त्वं प्रसादाद्बद्धकरस्य वै॥ स्नानं हृष्ट विधानेन ब्रूहि कस्य कथं भवेत्॥३॥ स्कन्द उवाच॥ मृतप्र
जा तु या नारी दुर्भगा सुतवर्जिता॥ या सूते दुहितां वंध्या स्नानमासां विधीयते॥४॥ अष्टम्यां वा चतुर्दश्यामुपवास
परायणा॥ ऋतौ शुद्धे चतुर्थे हि प्राप्ते सूर्यदिनेऽथवा॥५॥ नद्योस्तु संगमे कुर्यान्महानद्योर्विशेषतः॥ शिवालयेऽथ
वा गोष्ठे विविक्ते वा गृहांगणे॥६॥ आहिताग्निं द्विजं शान्तं धर्मज्ञं सत्यशीलिनम्॥ स्नानार्थं प्रार्थयेद्देवं निपुणं रौद्रक
र्मणि॥७॥ ततस्तु मंडपं कुर्याच्चतुरस्रमुदग्गतम्॥ वस्त्रचंदनमालं तु गोमयेनोपलेपितम्॥८॥ तन्मध्ये श्वेतरजसा
संपूर्णं पद्ममालिखेत्॥ तन्मध्ये तस्य महादेवं स्थापयेत्कलशोपरि॥९॥ दद्याद्दले पूर्वाद्यादौ भक्त्या विधिपूर्वकम्॥
इंद्रादिलोकपालांश्च दलेष्वन्येषु विन्यसेत्॥१०॥ देवीं विनायकं चैव स्थापयेत्तस्य पार्श्वतः॥ दत्वार्घ्यं गंधपुष्पं च
धूपदीपं गुडौदनम्॥११॥ भक्ष्यान्नानाविधान्यपि फलानि विविधानि च॥ चतुष्कोणेषु भृंगारमश्वत्थदलभूषि
तम्॥१२॥ एकैकं विन्यसेद्बुलस्सर्वौषधिसमन्वितम्॥ चतुर्दिक्षु मंडपस्य दद्याद्भूतबलिं ततः॥१३॥ अग्निकार्यं प्र
भे कुंडे पद्मपत्रैरलंकृते॥१४॥ लवणं सर्षपैर्मिश्रं घृतेन मधुना सह॥ मानस्तोके न जुहुयात्कृतहोमेन वग्रहे॥१५

स्वंतगुणां ५

श्वेतरक्तं ६

द्वितीयमपि कार्यस्य कर्त्तारं ब्राह्मणं कुरु ॥ रुद्रजापकमाचार्यं सितचंदनचर्चितम् ॥ १६ ॥ सितवस्त्रपरीधानं सित
मालाधरं शुभम् ॥ शोभितं कंकणैः कंठैः कर्णवेष्टांगुलीयकैः ॥ १७ ॥ मंडलस्य समीपस्थो जपेद्रुद्रान्विमत्सरः ॥ या
वदेकादशगणनाः पुनरेव जपेत्तु तान् ॥ १८ ॥ एवमंडलवत्कार्यं द्वितीयं मंडलं शुभम् । तस्य मध्ये तु सा नारी श्वेतपुष्पैरलं
कृता ॥ १९ ॥ श्वेतवस्त्रैश्च संछन्ना श्वेतगंधानुलेपिता ॥ शुक्लासनोपविष्टायामाचार्यो रुद्रचिंतकः ॥ २० ॥ अभिषिंचेत
तं श्वेतामर्कपत्रपुटांबुना ॥ ततः षष्ठिविधेनैव रुद्रेणैकादशेन तु ॥ २१ ॥ शतानि सप्तपर्णानां चतुर्भिरधिकानि तु ॥ अ
स्त्रिकृतानां मन्त्राणां च स्नानार्थं विनियोजयेत् ॥ २२ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ गोष्ठांगणाद्राज
गृहात्सोष्ठादानीय वै मृदः ॥ २३ ॥ सर्वौषधिं रोचनां च तदलीपर्णोदकानि च ॥ एतान्संक्षिप्य कलशे शिवसंज्ञे तु पूजिते ॥ २४
सा पादतलकेशांतं कुशैश्चैव विशोधनः ॥ सर्वांगं लेपयेत्तस्याः सुश्रीलाकाविदंगता ॥ २५ ॥ रुद्राभिजप्तेन ततः स्ना
पयेत्कलशेन ताम् ॥ तोयपूर्णाष्टकलशैरश्वत्थदलपूरितैः ॥ २६ ॥ सर्वतो दिक्षु विन्यस्तैः पश्चापयेत्तान्कलशाष्टकैः ॥ एवं
स्नातां स्नापकाय दद्यात्सा कांचनं तथा ॥ २७ ॥ हेतरप्यत्र निर्दिष्टा दक्षिणा गौः पयस्विनी ॥ ब्राह्मणानामथान्येषां स्व
शक्त्या पांडुनंदन ॥ २८ ॥ गोवत्सकांचनादीनि दत्वा सर्वं समापयेत् ॥ कृते स्नाने नराजेंद्र रुद्रस्नानेन भागिनी ॥ २९ ॥

205

सुभगासुखसंयुक्तावरूञ्जावनजायते ॥ सर्वेष्वपिहि मासेषु ब्राह्मणामिमतेभ्युभम् ॥ ३० ॥ तस्मादेवसूपंकर्तव्यं
पुत्रश्रीसुखमिच्छता ॥ ३१ ॥ यास्नातमाचरति ह्रडमिति प्रसिद्धं श्रद्धान्विताद्विजवरान्नमताऽनतांगी ॥ सौभाग्यम्निह
त्समसकलान्वशरीरभागाद्भर्तुः प्रियाभवति भारत जीववत्सा ॥ ३२ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे ह्रडस्नानविधिवर्णनंनाम चतुर्विंशत्युत्तरशततमोध्यायः ॥ १२४ ॥ ॥ युधिष्ठिर उवाच·
॥ ॥ चन्द्रादित्योपरागेषु यत्स्नानमभिधीयते ॥ तदहं श्रोतुमिच्छामि द्रव्यमन्त्रविधानतः ॥ १ ॥ श्रीकृष्ण उवाच ॥
यस्य राशिं समासाद्य भवेद्ग्रहणसंप्लवः ॥ तस्य स्नानं प्रवक्ष्यामि मंत्रौषधिसमन्वितम् ॥ २ ॥ चंद्रोपरागं संप्राप्य कृत्वा
ब्राह्मणवाचनम् ॥ संपूज्य चतुरो विप्रान्शुक्लमाल्यानुलेपनैः ॥ ३ ॥ पूर्वमेवोपरागस्य समानीयौषधादिकम् ॥ स्था
पयेच्चतुरः कुंभानग्रतः सागरानिति ॥ ४ ॥ गजाश्वरथ्यावल्मीकसंगमाद्ध्रदगोकुलात् ॥ राजद्वारप्रदेशाच्च मृदमा
नीय प्रक्षिपेत् ॥ ५ ॥ पंचगव्यं च कुंभेषु पंचरत्नानि चैव हि ॥ रोचनां पद्मशंखौ च पंचभंगसमन्वितौ ॥ ६ ॥ स्फटिकं
चंदनं श्वेतं तीर्थवारि ससर्षपम् ॥ गजदंतं कुंकुमं च तथैवोशीरगुग्गुलम् ॥ ७ ॥ एतत्सर्वं विनिक्षिप्य कुंभेष्वा
वाहयेत्सुरान् ॥ सर्वेसमुद्राः सरितस्तीर्थानि जलदा नदाः ॥ ८ ॥ आयांतु यजमानस्य दुरितक्षयकारकाः ॥ योऽ

ग्रंथसंख्या
६२१७

॥भविष्य॥
॥२०६॥

सौ वज्रधरो देव आदित्यानां प्रभुर्मतः ॥९॥ सहस्रनयनश्चेन्द्रः पीडां मेऽव्यपोहतु ॥ रक्षोगणाधिपः साक्षात्प्र
लयानिलसप्रभः ॥१०॥ खड्गव्यग्रोऽतिभीमश्च रक्षा पीडां व्यपोहतु ॥ योऽसौ विंदुकरो विंदुः पिनाकी वृषवाह
नः ॥११॥ चंडोपरागपापानि स नाशयतु शंकरः ॥ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥१२॥ ब्रह्मार्क वि
ष्णुयुक्तानि तानि पापं दहंतु वै ॥ एवमामंत्रितैः कुंभैरंभोयुक्तैर्युगान्वितैः ॥१३॥ ऋग्यजुःसाममंत्रैश्च शुक्लमा
ल्यानुलेपनैः ॥ पूजयेद्वस्त्रगोदानैर्ब्राह्मणानिष्टदेवता ॥१४॥ एतानेव ततो मंत्रान्विलिख्य कनकान्वितान् ॥
यजमानस्य शिरसि उद्दत्वा स्तेनरोगम ॥१५॥ कलशान्द्रव्यसंयुक्तान्साप्रे ग्रहणपर्वणि ॥ चंडग्रहे निवृत्ते तु कृ
तगोदानमंगलः ॥१६॥ कृतस्नानः श्वेतपदं ब्राह्मणाय निवेदयेत् ॥ अनेन विधिना यस्तु ग्रहस्नानमाचरेत् ॥१७॥ न
तस्य ग्रहपीडा स्यान्न च बंधुजनक्षयः ॥ परमां सिद्धिमाप्नोति पुनरावृत्ति दुर्लभाम् ॥१८॥ सूर्यग्रहे सूर्यनाम सदा मंत्रे
षु कीर्तयेत् ॥ ऽश्चैतैरेव कथितं स्नानं कुरुकुलोद्वह ॥१९॥ यद्दंभगणान्नित्यं श्रावयेद्वापि मानवः ॥ सर्वपापवि
निर्मुक्तः शक्रलोके महीयते ॥२०॥ चंद्रग्रहे नरपतिर्ग्रहणोज्ज्वलं मंत्रैरिमैः समभिमंत्र्य शुभोदकुंभान् ॥ स्नानं क
रोति नियमेन न तस्य पीडा न तं ग्रहकृता वपुनर्ईज्ञोति ॥२१॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्री

206

॥रामः॥
॥२०६॥

कृष्णयुधिष्ठिरसंवादे चंद्रादित्यग्रहणस्नानविधिवर्णनं नाम पंचविंशत्युत्तरशततमोऽध्यायः ॥१२५॥ ॥ युधिष्ठिर उवाच ॥ गृहस्थो मानवो लोके प्राप्ते कथं त्यजति जीवितम् । एतन्मे ब्रूहि गोविंद परं कौतूहलं हि मे ॥१॥ श्रीकृष्ण उवाच ॥ नास्त्युद्यमसमुद्दिष्टं तज्ज्ञैरनघ नानास्वरम् ॥ तस्माहं लक्षणं वक्ष्ये यत्कार्यं च मुमूर्षता ॥२॥ यादृक्पञ्चमभगवां मितेनीयो जनार्दनः कालं ज्ञात्वा ज्ञातो युधिष्ठिर ॥३॥ निर्धनमलदोषघ्न स्नानो नियतमानसः ॥ समस्तश्चार्द्धहस्ती केशवं गन्धधूपादिभिस्ततः ॥४॥ प्रतिपान्नैः स्तनैः पुष्पैर्गन्धैर्धूपैस्तु पूजयेत् ॥ दत्वा पानं च विप्रेभ्यो विकलादिभ्य एव च ॥५॥ समर्थ्य ब्राह्मणेभ्यश्च देवार्चायुपयोगि च ॥ वंध्यपुत्रकलत्रेषु क्षेत्रधान्यधनादिषु ॥६॥ मित्रवर्गे च राजेंद्र समस्तं विनिवर्तयेत् ॥ मित्राण्यमित्रान्मध्यस्थान्परान्सर्वांश्च पुनः पुनः ॥७॥ मत्वार्थमपकारेणानोपकारेण चिंतयेत् ॥ ततश्च प्रयतः कुर्यादुत्सर्गं सर्वकर्मणाम् ॥८॥ शुभाशुभानां राजेंद्र वाक्यं चेदमुदीरयेत् ॥ परित्यजाम्यहं भोगांस्त्यजामि सुहृदोऽखिलान् ॥९॥ भोजनं हि मयोत्सृष्टमुत्सृष्टमनुलेपनम् ॥ स्रग्भूषणादिकं गेयं दानमासनमेव च ॥१०॥ होमादयः परार्थाये ये च नित्यक्रमागताः ॥ नैमित्तिकास्तथा काम्याः श्राद्धधर्मादयोऽखिलाः ॥११॥ त्यक्ताभ्याश्रमिका धर्मा वर्णधर्मास्तथोऽखिताः ॥ पञ्चांकराभ्यां विहरन्कुर्वाणः कर्मचोदहन् ॥१२॥ न पापं कस्यचित्स्थाप्याः प्राणिनः संतु निर्भयाः ॥ नभसि प्रा

॥ भविष्य ॥
॥ २०७ ॥

णिनो ये च ये जले ये च नभतले ॥ १३ ॥ क्षितेर्विवरगा ये च ये च पातालसंस्थिताः । धान्यादिषु च वस्त्रेषु शयनेष्वासनेषु च ।
१४ ॥ ते स्वपन्तु विबुध्यन्तु दत्तं तेभ्योऽभयं मया ॥ न मेऽस्ति बांधवः कश्चिद्विष्णुं मुक्त्वा जगद्गुरुम् ॥ १५ ॥ मित्रपक्षे च मे विष्णु-
रधश्चोर्ध्वं तथा भुवः ॥ पार्श्वतो नृसिंहो हृदये वाऽकुक्ष्यां वै च क्षपी ॥ १६ ॥ श्रीत्रादिषु च सर्वेषु मम विष्णुः प्रतिष्ठितः ॥ इति
सर्वं समुत्सृज्य ध्यात्वा सर्वेशमच्युतम् ॥ १७ ॥ वासुदेवेत्यविरतं नाम देवस्य कीर्त्तयेत् ॥ दक्षिणाग्रेषु दर्भेषु शेते वै प्रा-
क्शिरा वा शिरास्तथा ॥ १८ ॥ उदक्शिरा वा जाग्रद्वा चिंतयेज्जगतः पतिम् ॥ विष्णुं जिष्णुं हृषीकेशं केशवं मधुसूदनम् ॥ १९ ॥
नारायणं नरं शौरिं वासुदेवं जनार्दनम् ॥ वाराहं यज्ञपुरुषं पुण्डरीकाक्षमच्युतम् ॥ २० ॥ वामनं श्रीधरं कृष्णं नृसिं-
हमपराजितम् ॥ पद्मनाभमनन्तं श्रीशं दामोदरमधोक्षजम् ॥ २१ ॥ सर्वेश्वरं ध्रुवमनन्तं विश्वरूपिणम् ॥ चक्रिणं ग-
दिनं शांतं शार्ङ्गिनं गरुडध्वजम् ॥ २२ ॥ किरीटकौस्तुभधरं प्रणमाम्यहमव्ययम् ॥ अहमस्मि जगन्नाथ मयि वासं
कुरु द्रुतम् ॥ २३ ॥ आवयोरन्तरं नास्तु समीराकाशयोरिव ॥ अयं विष्णुरयं शौरिरयं कृष्णः पुरो मम ॥ २४ ॥ नीलोत्प-
लदलश्यामः पद्मपत्रायतेक्षणः ॥ एवं पश्यतु मामीशः पश्याम्यहमधोक्षजम् ॥ २५ ॥ इत्थं जपेदेकमनाः स्म-
रन्सर्वेश्वरं हरिम् ॥ आसीन सुखदुःखेषु समो मित्राहितेषु च ॥ २६ ॥ ॐ नमो वासुदेवाय इत्येतन्सततं जपेत् ।

207

॥ रामः ॥
॥ २०७ ॥

यथायथाभवेत्कामस्तथातन्नामकीर्तयेत् ॥२७॥ ध्यायेच्चदेवदेवेशंविष्णोरूपंमनोरमम् ॥ प्रसन्ननेत्रम्
वक्त्रंशंखचक्रगदाधरम् ॥२८॥ श्रीवक्षसंसुमनसंचतुर्भुजंकिरीटिनम् ॥ पीतांवरधरंकुंडलंचारुकेयूरधारि
णम् ॥२९॥ चिंतयेत्सदारूपंमनःकृत्वैकनिश्चयम् । यादृशोवामनःस्थैर्यंरूपेवध्यानिचक्रिणः ॥३०॥ तदे
वचिंतयेद्रूपंवासुदेवेतिकीर्तयेत् ॥ इत्थंजपन्स्मरन्नित्यंस्वरूपंपरमात्मनः ॥३१॥ साप्राणापारमोदारस्तवि
नतन्मयायणः ॥ सर्वपातकयुक्तोऽपिपुरुषःपुरुषर्षभ ॥३२॥ प्रयातिदेवदेवेशेलयंसैन्धवमम्बुनि ॥ यथाग्नि
स्तृणजालानिदहत्यनिलसंगतः ॥३३॥ तथानन्तानुसंकल्पःपुंसांपापमसंशयम् ॥ ॥ युधिष्ठिरउवाच ॥
उत्क्रांतिकालेभूतानांमुह्यंतिचित्तवृत्तयः ॥३४॥ जराव्याधिविहीनानांकिमुतव्याधिदोषिणाम् ॥ अस्वस्थव
पुषादग्धोआधिनाचोपपीडितः ॥३५॥ यदिस्यात्तुनशक्नोतिनिश्चिन्तिस्थोदर्भसंस्तरे ॥ किमप्यस्मोपायोऽ
स्तिनवानघानकर्मणि ॥३६॥ वैकल्यंयेननाप्नोतितन्मेब्रूहिजनार्दन ॥ त्वयोक्तंभगवंध्यानंतद्ब्रूहिममतत्त्व
तः ॥३७॥ ध्यानस्वरूपमखिलंकथयस्वजनार्दन ॥ श्रीकृष्णउवाच ॥ नात्रभूमिर्नवकुशाःस्थालनभ्वनकारण
म् ॥३८॥ चित्तस्यालंवनीभूतोविष्णुरेवात्रकारणम् ॥ तिष्ठंभुंजन्स्वपन्गच्छंस्तथाधावन्नितस्ततः ॥३९॥ उत्क्रांति

कालेगोविंदंसंस्मारंलक्ष्ययोभवेत ॥ यंयंवापिस्मरन्भावंत्यजत्यन्तेकलेवरम् ॥ ४० ॥ तंतमेवैतिकौन्तेयसदातद्भा
वभावितः ॥ तस्मात्प्रधानमन्त्रोक्तंगाङ्गदेवस्यचिंतनम् ॥ ४१ ॥ यद्यस्पृष्टंत्वयाध्यानंतंदेवकथयामिते ॥ पुरामेक
थितंपार्थमार्कंडेयेनधीमता ॥ ४२ ॥ राज्योपभोगशयनासनवाहनेषुस्त्रीगंधमाल्यमणिवस्त्रविभूषणेषु ॥
इच्छाभिलाषमतिमात्रमुदेतिमोहाध्यानंतदार्तमितिसंप्रवदंतितज्ज्ञाः ॥ ४३ ॥ संछेदनैर्दहनताडनपीडने
श्चगात्रप्रहारदमनैर्विनिकृंतनैश्च ॥ यस्येहवेनसिद्धिर्यातिनचानुकंपाध्यानंतुरौद्रमितितत्प्रवदंतितज्ज्ञाः
४४ ॥ सूत्रार्थमार्गणमहाव्रतभावनाभिर्बंधप्रमोक्षगतिहेतुचिंता ॥ पंचेंद्रियाप्युपशमश्चदयाश्चभूतेध्यानं
तुधर्म्यमितितत्प्रवदंतिसंतः ॥ ४५ ॥ यस्येंद्रियाणिविषयैर्नविवर्जितानिसंकल्पनाल्पजनितकल्पविकारयोगैः
तत्त्वैकनिष्ठहृदयोनिभृतांतरात्माध्यानंतुशुक्लमितितत्प्रवदंतिसिद्धाः ॥ ४६ ॥ आद्येतिर्यग्गतयोगतिश्चानियतं
ध्यानेनरौद्रेसदाधर्म्येदेवगतिःशुभंफलमहोशुक्लेवजन्मक्षयः ॥ तस्माज्जन्महजापहेहितनरैसंसारनिर्वाहके ॥
ध्यानेशुक्लनरैरजःप्रशमनेकुर्यात्प्रयत्नंबुधः ॥ ४७ ॥ समाःसहस्राणितुसप्तवैजलेदशैकमग्नौपवनेचषोड
श ॥ गवांग्रहेषष्टिरशीतिराहवेअनाशनेभारतचाक्षयागतिः ॥ ४८ ॥ ॥ इतिश्रीभविष्येमहापुराणेऽन्त

॥ रामः ॥
॥ २०८ ॥

208

र पर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सांभरायणीव्रतवर्णनं नाम षड्विंशत्युत्तरशततमोऽध्यायः ॥१२६॥ युधिष्ठिर
उवाच ॥ तडागोत्सर्जने देवविधिं विधिविस्तरं ॥ कथयस्व महाभाग मम देवकिनंदन ॥१॥ वापीकूपोदकानां च के मंत्राः
परिकीर्त्तिताः ॥ के ऋत्विजोत्र के यूपाः कर्त्तव्याः कुंडमंडपे ॥२॥ दानं किमत्र निर्दिष्टं वलयः के प्रकीर्त्तिताः ॥ कस्मिन्काले
कथं कुर्याद्दित्वे नन्तत्फलं वद ॥३॥ ॥ श्रीकृष्ण उवाच ॥ साधु साधु महाबाहो यन्मां त्वं परिपृच्छसि ॥ तडागवापीकूपा
नामुत्सर्गं कथयामि ते ॥४॥ निष्पन्ने व दृपालीके सर्वाट्टे दगवर्जिते ॥ सोपानपंक्तिसहिते पाषाणैः सर्वतश्चिते ।
तस्मिन्सलिलसंपूर्णे कार्त्तिके वा विशेषतः ॥ तडागस्य विधिः कार्यः स्थिरनक्षत्रयोगतः ॥६॥ मुनयः केचिदिच्छं
ति अतीते चोत्तरायणे ॥ नकालनियमो ह्यत्र प्रमाणं सलिलं यतः ॥७॥ तडागपालशीर्षे तु मंडलं कारयेच्छुभम् ॥ द
शद्वाशहस्तं च चतुर्द्वारं सुविस्तृतम् ॥८॥ तोरणानि तु चत्वारि चतुर्दिक्षु विचक्षणैः ॥ अश्वत्थोदुंबरप्लक्षवटशालम
यानि च ॥९॥ नानावर्णास्तु परितः पताकाः परिकल्पयेत ॥ मध्ये महाध्वजः कार्यः पंचवर्णः सुशोभनः ॥१०॥ चतु
र्हस्ता भवेद्वेदी मध्ये पंचकराथवा ॥ यजमानप्रमाणेन मध्ये यूपे न शोभिता ॥११॥ कुर्य्यं वाश्वत्थपालाशवैकंकतम
यः शुभः ॥ ब्राह्मणस्यास्य निर्दिष्टो यूपः श्रुतिविचक्षणैः ॥१२॥ न्यग्रोधबिल्वजः श्रीकः क्षत्रियाणां बलोदरः ॥ वै

ग्रधस्योडुंवरस्मयो मध्यर्जुनसमुद्भवः ॥ १३ ॥ विभीतकोडुंवरजः श्याकस्याल्मलिसंभवः ॥ मृड्रस्य पूर्वो निर्दिष्टः सा
रदारुमयोः धवा ॥ १४ ॥ लोकपालाष्टकं तत्र रजसा च विलेखयेत् ॥ ब्रह्मा विष्णुश्च रुद्रश्च कमला चाम्बिका तथा ॥ १५
सावित्रीसहिता कार्या पुष्पधूपैरथार्चयेत् ॥ कुर्यात्कुंडानि चत्वारि चतुर्दिक्षु विचक्षणः ॥ १६ ॥ मेखलात्रययुक्तानि हस्त
मात्राणि सर्वतः ॥ हेमालंकारिणः कार्या होतारः षोडशाष्ट वा ॥ १७ ॥ अहतांबरसंवीताः स्रग्वचंदनविभूषिताः ॥ स्था
पकाश्चात्र विहिता वेदवेदांगपारगाः ॥ १८ ॥ इतिहासपुराणज्ञाः प्रियवागनसूयकाः ॥ मन्मयानि च पात्राणि ताम्रा
णि स्रुवस्रुवं तथा ॥ १९ ॥ अंजनानि च कार्याणि होमार्थं समिधस्तिलाः ॥ ग्रहयज्ञविधानेन होमः कार्यो विजानता ॥
२० ॥ वेदाधिवासितानां चसुराणां होम इष्यते ॥ वारुणैस्तु तथा मंत्रैर्हितं पुष्टिवर्द्धनम् ॥ २१ ॥ इंद्रादिलोकपालानां पू
जां दिक्क्रमयोगतः ॥ बलिं दद्याच्च तल्लिंगैर्मंत्रैः सर्वार्थसिद्धये ॥ २२ ॥ द्वारेषु कलशान्दद्यात्सहिरण्यान्सपल्लवान् ॥ अश्वत्थ
पल्लवैः कार्याः शुभाश्चंदनमालिका ॥ २३ ॥ सौवर्णीकारयेत्कूर्मं तताम्रेण सहरं तथा ॥ रजतेन तथा मत्स्यं त्रपुणा दर्दुरं त
था ॥ २४ ॥ शिशुमारजलौकां च राजतेनैव कारयेत् ॥ सर्वानपि यथास्थानं ताम्रपात्र्यां निधापयेत् ॥ २५ ॥ रूपा प्रतिष्ठा
नामेति मंत्रेणामंत्रयेच्च तान् ॥ यूपप्रतिष्ठा कर्त्तव्या वेदोक्तविधिना ततः ॥ २६ ॥ कुंकुमेन समालभ्य पुष्पैर्धूपैः समर्चयेत्

209

॥ रामः ॥
॥ २०९ ॥

वस्त्रयुग्मेन संपूज्य नैवेद्यादि यथाक्रमम् ॥ २७ ॥ ततो द्विजातिप्रवरः श्रपयित्वा चरुं नवम् ॥ ततश्चाग्न्याहुतीर्दद्या
द्भूर्भुवः स्वरिति क्रमात् ॥ २८ ॥ ततश्चावाहयेद्देवं वरुणं सरितांपतिम् ॥ वादित्रघोषैर्गीतैश्च गंधमाल्यानुलेपनैः
२९ ॥ श्वेतेनैव तु वस्त्रेण शिरोवेष्टं तु कारयेत् ॥ आदाय ताम्रपात्रीं तु वुलघोषपुरःसरः ॥ ३० ॥ अथ मार्गां जलं गत्वा व
रुणाय निवेदयेत् ॥ त्वं वरुण इति मंत्रेण जलमध्ये प्रवाहयेत् ॥ ३१ ॥ यज्ञाश्वदस्त्रवीजाति तत्सर्वं मज्जयेज्जले
तारयेच्च ततो धेनुं दक्षिणाया उदग्व्रजेत् ॥ ३२ ॥ गोशिरोवेष्टनं कुर्यात्तानि वस्त्रे तु बुद्धिमान् ॥ लांगूलस्याग्रमादाय
अवतीर्य ततो जलम् ॥ ३३ ॥ ज्ञातिभिः सहितः कर्त्ता सभार्यश्चावगाहयेत् ॥ ततोऽवतीर्य सलिलाद्दत्वा गां ब्राह्मणा
य ताम् ॥ शक्त्या च दक्षिणां दद्याद्देवं विप्रान्विसर्जयेत् ॥ ३४ ॥ सामान्यं सर्वभूतेभ्यो मया दत्तमिदं जलम् । एवं जलां
जलिं क्षिप्त्वा पूजयेज्जलमातरः ॥ ३५ ॥ तोष्याः कर्मकराः सर्वे कुद्दालानि च पूजयेत् ॥ अवारितं तु दातव्यमन्नं च पूर्वंदि
नत्रयम् ॥ ३६ ॥ एकाहं च यथाशक्त्या वित्तशाठ्यं न कारयेत् ॥ गोसहस्रं तदर्धं वा तस्यार्धमथवापि वा ॥ ३७ ॥ शत
मर्धशतं वापि पंचविंशतिमेव च ॥ तासामभावे गां दद्यात्सवत्सां कांस्यदोहनाम् ॥ ३८ ॥ एवं राजेन्द्र तडागस्य विधि
स्ते परिकीर्तितः ॥ वापीकूपविधानं च कथयामि तथापरम् ॥ ३९ ॥ कुंडमंडपसंभारभूषणाच्छादनादिकम् ॥

तडागविधिवत्कुर्याद्युणगोतरणादिकम् ॥ ४० ॥ अकालमूलान्कलशान्वापीकोणेषु दापयेत् ॥ तीर्थोदकसमापू-
र्णान्सितचंदनचर्चितान् ॥ ४१ ॥ सितवासोयुगच्छन्नान्समाल्यान्रत्नगर्भिणः ॥ श्रपयित्वा चरुं तत्र पावकाग्नौ य-
थाविधि ॥ ४२ ॥ व्यस्तसमस्त आहुतीर्दद्याद्भूर्भुवःस्वरिति क्रमात् ॥ ग्रहहोमं प्रकुर्वीत शांतिपुष्टिविवर्द्धनम् ॥ ४३ ॥ वरुणाय ब-
लिं दद्याल्लोकपालेभ्य एव च ॥ वारुणानि च सूक्तानि पठेयुर्द्विजसत्तमाः ॥ ४४ ॥ वेदीमध्ये मंडलं च पद्ममत्र प्रशस्यते ॥
तन्मध्ये पूजयेद्रुद्रं ब्रह्माणं केशवं तथा ॥ ४५ ॥ संस्थाप्य कमठं मंडूकान्वेदीमध्येऽधिवासयेत् ॥ मित्रमित्रोऽसि सिद्धानां
धनदो धनकांक्षिणाम् ॥ ४६ ॥ वैद्यो रोगाभिभूतानां शरण्यः शरणार्थिनाम् ॥ अनेनैव हि मंत्रेण वरुणाय विसर्ज-
येत् ॥ ४७ ॥ आदौ चावाहयेद्देवमनेनैव विधानतः ॥ नमस्ते विश्वगुप्ताय नमो विष्णोरपां पते ॥ ४८ ॥ सान्निध्यं कु-
रु देवेश समुद्रे यद्वदत्र वै ॥ ततस्तु दक्षिणा देया ब्राह्मणानां नराधिप ॥ ४९ ॥ गौः स्थापकाय दातव्या भोजनं चानि-
वारितम् ॥ सर्वेषामेव दानानामेष पौराणिको विधिः ॥ ५० ॥ धाराया आगतं तोयं खातमुड्ड प्रथमं स्मृतम् ॥ निपाने वा
तडागे वा संस्थितं तद्भवेच्छुचिः ॥ ५१ ॥ वापीकूपतडागे वा स्थितं तत्प्रथमं जलम् ॥ अपेयं तद्भवेत्सर्वं तज्जलं सूतिकास-
मम् ॥ ५२ ॥ समुद्रोऽपि हि कौन्तेय देवयोनिरपां पतिः ॥ कृशाग्रेणापि रमलानस्पश्चात्मसंस्कृतः ॥ ५३ ॥ आग्निष्वते

210

मेघ.तम्

जोमऽयाथदेहेहेतोधाविल्पेरम्यतस्यनामभिः॥एवंतुवन्यांऽवसन्नगाक्षांततोव्रजाहेनयतिंनदीनाम्॥५४॥वैल
वेमामिसंप्राप्तेनक्षत्रेगारुडेतथा॥अर्घ्यंप्रदद्यात्कृष्णायतस्मिन्कालेमहोदधेः॥ ५५ ॥स्नात्वातुविधिवन्मंत्रैःसा
गरेतुसमाहितः॥फलमलाक्षतैर्भक्ष्यैस्तथार्घ्यंसंप्रकल्पयेत्॥ ५६ ॥अपिजन्मसहस्रंतुयत्पापंकुरुतेनरः॥मुच्य
तेसर्वपापेभ्यःस्नात्वातुलवणांभसि॥ ५७ ॥विधिज्ञेनतुकर्तव्यंब्राह्मणेनयथाविधि॥कर्ताकारयिताचैवउभौ
तुस्वर्गगामिनौ॥ ५८ ॥यिधिंत्वेनमजानानोयःकुर्याद्दर्थमोहितः॥कर्ताकारयिताचैवउभौनरकगामिनौ॥५९
योनकारयतेस्नांतिंनऽगायेभकर्मसु तस्यतान्निष्फलंसर्वमुप्तंबीजमिवोषरे॥ ६० ॥सर्वरत्नमयंदिव्यंचन्द्रा
र्कसदृशप्रभम्॥विमानंतेजसायुक्तमारोहेच्छुभकर्मकृत्॥ ६१ ॥कण्ठिलम्बिताततिनोयंनिपानस्थंततोऽञ्जलि
म्॥ब्राह्मणोवाचयतिगौर्वायेनकर्तानसीदति॥ ६२ ॥उत्सृष्टेक्षनकूपत्नगृहेकुर्यान्महोत्सवम्॥महाभोज्यंमहोत्स
र्गंयजमानोदिनाष्टकम्॥ ६३ ॥कारकाःकर्मणोयेपिसर्वेधारादयोनराः॥इष्टापूर्तेनधर्मेणतेऽपिस्वर्गंप्रयान्ति
हि॥ ६४ ॥खन्यमानेमहीभागेप्राणिनोयेक्षयंगताः॥चित्रेषादेवकूपार्थेतेसर्वेत्रिदिवंगताः॥ ६५ ॥धेनोस्तुरो
मकूपाणियावंतीहतनोर्जम॥तावद्वर्षसहस्राणिवर्षकोटिशतानिच॥ ६६ ॥कोटिर्युगसहस्राणांस्वर्गेतिष्ठे

तडागकृत ॥ येतस्य पितरः केचिन्नरकं समुपागताः ॥ ६७ ॥ तांस्तु तारयते सर्वांतात्मानं च महीपते ॥ आस्फोटयंति
पितरो वल्गंति प्रपितामहाः ॥ ६८ ॥ अपि नः स कुले जातो यस्तडागं करिष्यति ॥ सर्वस्वेनापि कौंतेय भूमिष्ठमुदकं
कुरु ॥ ६९ ॥ फलानि तान्यपेत्स्याप्न यत्र गौर्वितृषी भवेत् ॥ एवं वर्षागते नापि कृत्तिका विहरी वने ॥ ७० ॥ मासं वे ताग
हे कोटिसमा ध्वंसि धनस्य हि ॥ तडागं देवभवनं वापी ह्रसो घनच्छदः ॥ ७१ ॥ चतुर्थकं फलं प्राप्नं कारितेऽस्मिंभ्वनृप
पे ॥ यथा मातुः समावर्ष्टे पुत्रः शीलाव कैर्गुणैः ॥ ७२ ॥ तथा स्वादेन च जलं कर्तुः सर्वं शुभाशुभम् ॥ अतः शुभाग
तंडव्यं तडागादि कुलायपेत् ॥ ७३ ॥ धन्यस्य पांथाः संप्राप्य तडागं वृक्षमंडितम् ॥ पीत्वापः पादपतले विश्रसंति रमं
ति च ॥ ७४ ॥ मारुतोद्धुत वीच्यग्रैः करैः कमलमंडितम् ॥ सम्यागतायवसुधिया तडागाद्यं प्रकल्पितम् ॥ ७५ ॥ सामासं
सर्वभूतेभ्यो येन भूमिगतं जलम् ॥ तारितं कारितं तेन सुपुत्रेण कुलद्वयम् ॥ ७६ ॥ मर्त्त्यत्व मानवः सिद्धमिष्टं मंत्र
प्रदर्शितम् ॥ इष्टापूर्ते कृते राजन्कृतकृत्यः पुमान्भवेत् ॥ ७७ ॥ उत्तमा वाप्यनिम्ना वा कीर्तिर्येन प्रकाशिता ॥ तेन
त्रैलोक्यवंडेला जननी पार्थ पवित्रिता ॥ ७८ ॥ त्रिनयंतिन्म्नतान्येयां त्रिनयं वो त्नातिं परान् ॥ तडागमथ यो भूमौ देव दे
वाकुलं कृती ॥ ७९ ॥ यः कारयंति लोकेऽस्मिन्कीर्तिस्तस्यामला भवेत् ॥ सजीवति सएवैकः सभवेदजरामरः ॥ ८० ॥

212

उपेतानामपि दिवं सन्ति वंशविधायिनाम् ॥ आस्ताऽवर्तिरातंकं तस्य कीर्तिमयं वपुः ॥ ८१ ॥ तावत्स्वर्गे स रमते
यावत्कीर्तिरनश्वरी ॥ तावत्तिला याम श्चात्तेस्तु कृती वैकुधं पदम् ॥ ८२ ॥ हंसास्य क्षिप्तनीलाग्रं पद्मिनीखेलमंडि
तम् ॥ पीयमानं महाग्रामैर्धन्याः पश्यन्ति स्वं सरः ॥ ८३ ॥ घटैरंजलिभिर्वक्त्रैर्यस्य वारी पुरैर्जलम् ॥ पिबन्ति जन्तवः
सर्वे किमन्यत्तस्य वर्ण्यते ॥ ८४ ॥ तडागं नगरोपान्ते धन्यस्य किल जायते ॥ उभयोर्यत्र संमिश्रि दृष्टाकर्तुर्जनस्य च
८५ ॥ येषां देवकुलं तत्र निष्पद्येत सरस्तटे ॥ सभीष्टदेवतायुक्तं तेषां पार्थ किमुच्यते ॥ ८६ ॥ नभवंति ब्धिका याव
द्रोणी वाभूमिसलिला ॥ स्वर्गे महीयते तावत्कारको देवगेहतः ॥ ८७ ॥ भोग्यस्थाने कृतः कूपः सुस्वादुसलिलस्त
था ॥ दृष्टं जन्तु समाप्तकः पुनात्या सप्तमं कुलम् ॥ ८८ ॥ यस्य स्वादुजलं कूपे पिबंति सततं जनाः ॥ किं तेन न कृतं पुण्यं
सर्वसत्वोपकारिणा ॥ ८९ ॥ यः प्रासादान्नवयति श्रमान्देवतानां तडागे कीर्तिस्तस्य भ्रमति विपुला वंशमार्गानुया
ता । दिव्यान्भोगान्भजति च सदा कारकश्चाप्रमेयान्मुक्त्वा सोऽयं पुनरपि च भवे ब्रह्मकवर्णो ऽपथिग्राम ॥ ९० ॥ तेषां तडा
गानि च वृक्षकानि कूपांश्च वापांश्च प्रतिश्रयांश्च ॥ अन्नप्रदानं मधुरा च वाणी यमस्य ते निर्वचनी भवंति ॥ ९१ ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वापीकूपतडागोत्सर्गविधिवर्णनं नाम सप्तविं

शांतनरगानतनमोऽध्यायः ॥ १२७ ॥ ॥ युधिष्ठिर उवाच ॥ वृक्षारोपणमाहात्म्यं वद देवकिनंदन ॥ उद्यापनविधिं चैव सरस्यं समासतः ॥ १ ॥ ॥ श्रीकृष्ण उवाच ॥ वृक्षारोपणमाहात्म्यं वद देवकिनंदनः ॥ उद्यापनविधिं चैव सरहस्यं समासतः ॥ १ ॥ श्रीकृष्ण उवाच वरं भूमिरुहाः पंच न गाकाष्ठरुहात्म्या ॥ पत्रैः पुष्पैः फलैर्मूलैः कुर्वंति पितृतर्पणम् ॥ २ ॥ बहुभिर्मर्न किं जातैः पुत्रैर्धर्मार्थवर्जितैः ॥ वरमेकं पथितरुर्यत्रविश्रमतेजनः ॥ ३ ॥ प्राणिनः प्रीणयंति स्म छायावल्कलपल्लवैः ॥ घनच्छदाः स्तरवः पुष्पैर्देवान्फलैः पितृन् ॥ ४ ॥ पुष्पपत्रफलच्छायामलवल्कलदारुभिः ॥ धन्या महीरुहा येषां विफला यांति नार्थिनः ॥ ५ ॥ पुत्राः संवत्सरस्यांते श्राद्धं कुर्वंति वा न वा ॥ प्रत्यहं पादपाः पुष्टिं श्रेयोऽर्थं जनयंति हि ॥ ६ न नत्करोत्यग्निहोत्रं सुवैंयघोषितः स्मृतः ॥ यत्करोति घनच्छायः पादपः पथिरोपितः ॥ ७ ॥ सच्छायाश्च सपुष्पाश्च सफला वृक्षवाटिका ॥ कुलयोषेव भवति भर्त्तलोकदयानुगा ॥ ८ ॥ अशोकफला वकरानिलकालं कृतानना ॥ सर्वोपभोगवेश्येव वाटिका रसिका सदा ॥ ९ ॥ सदा सविश्री भवति सदा दानं प्रयच्छति ॥ सदा यत्नं सपजनै योरोपयति पादपम् ॥ १० ॥ अश्वत्थमेकं पिचुमंदमेकं न्यग्रोधमेकं दशचिंचिणीकम् ॥ कपित्थबिल्वामलकीत्रयं च पंचाम्रवापी नरकं न पश्येत् ॥ ११ ॥ पुष्पोपगा धात्रफलोपगान्वा यः पादपं स्पर्शयते द्विजाय ॥ सस्त्रीसमृद्धं बहुरत्नपूर्णं लभेद्विमानं प्रतिमंग

212

हं वै ॥१२॥ शान्तिश्चयाप्यान्तसमाश्रयत्वात्त्वमीहितं तत्र फलंऽभुक्तो ॥ अपत्यमेकं परलोकहेतोर्विमृश्य तां किंन
खो नरोपिता ॥१३॥ न खानिताः पुष्करिण्योऽपि विताननमहीरुहाः ॥ मातृयौवनचौरेण तेन जातेन किं कृतम् ॥
१४ ॥ छायामन्यस्य कुर्वंति तिष्ठंति स्वयमातपे ॥ फलंतिव परार्थे पुनस्वार्थे पुमहाभुजाः ॥१५॥ अतः परं प्रवक्ष्यामि वृ
क्ष्यामि वृक्षस्योद्यापने विधिम् ॥ सर्वपापप्रशमनं सर्वकीर्तिविवर्द्धनम् ॥१६॥ अपुत्रया पुरा पार्थ पार्वत्या मन्दरा
चले ॥ अशोकः शोकशमनः पुत्रत्वे परिकल्पितः ॥१७॥ जातकर्मादिकास्तस्य याः क्रियाः किल बुद्धिमन् ॥ चरकाश्चिपुरा
णोक्तास्ताः स्मराणस्वयुधिष्ठिर ॥१८॥ ततो मूलोधनदलो वल्गुस्कन्धायांगपः स्वव ॥ शीतवातातपसहः संस्कार्यस्तरुणा
न्तरुः ॥१९॥ स्त्रीनामकंटकीकुत्वकीटवृश्चिककोटरैः ॥ तोयाप्यः पादपः पार्थ ग्रीष्मे तां यो न संमतः ॥२०॥ आल
वालेसु विहिते ग्रीष्मे वस्त्रचतुष्किके ॥ शोधयित्वा तमुद्देशं सुगुप्तं कारयेत्ततः ॥२१॥ सदैवोद्यापने पार्थ पाऽपानां प्र
शस्यते ॥ शुभेऽह्नि विप्रकथिते ग्रहनक्षत्रसंयुते ॥२२॥ पताकालंकृतं वृक्षं पूर्वेद्युरधिवासयेत् ॥ रक्तवस्त्रैः समाच्छा
द्य रक्तसूत्रेण वेष्टयेत ॥२३॥ पिष्टातकेनागलिरेत्सर्वौषध्या च पादपम् ॥ स्थापयेत्सर्वकलशान्ध्वजं दिक्षु विचक्षणः
२४ ॥ पद्मवालंकृतमुखान्सितचंदनचर्चितान् ॥ सितवासोयुगच्छन्नान्सकलान्नरत्नगर्भिणः ॥२५॥ पताकालंकृताः

सर्वकार्याण्यत्सल्लिधौ तु सा॥ मूलविम्मलकलशारक्तसन्नावगुंठिताः॥ २६॥ रक्तपीतसिता स्त्रोदेभ्यर्चिताः कुसुमनोहरैः॥ कल
धौतमयान्यत्र फलानि दद्यापंचवा॥२७॥ ताम्रपात्रां सर्वबीजानि सरत्नान्यधिवासयेत्॥ तर्यमंगलघोषेण वनुर्दिक्षु क्षिपेद्बलि
म्॥२८॥ इंद्रादिलोकपालेभ्यो भूतेभ्यो मंत्रविन्नरः॥ ततः प्रभाते विमले कुंडं कृत्वा समेखलम्॥२९॥ ग्रहयज्ञविधानेन शांतिक
र्मसमारभेत्॥ सुवर्णालंकृतान्कृत्वा ब्राह्मणान्वेदपारगान्॥३०॥ चतुरोऽथ यथाशास्त्रं वासोभिरभिपूजयेत्॥ तिलाज्ये
नवहोमः स्यानुष्टिपुष्टिकरः सदा॥३१॥ मातरं स्थापयित्वाग्रे पूजयेत्कुसुमाक्षतैः॥ श्रपयित्वा चरुं सम्यक्पायसाद्यपरिप्लु
तम्॥३२॥ होमादौ जातकर्मादि गोदानं यावदेव तु॥ तादपं स्नापयित्वा तु समंत्रैस्तीर्थवारिभिः॥३३॥ जातकं नामकरणम
न्नप्राशनमेव च॥ सुवर्णसूच्या कुर्वीत कर्णवेधं विधानवित्॥३४॥ जातरूपक्षुरेणात्र चूडा कार्या यथाक्रमम्॥ बध्नीया
न्मेखलां मौंजीं वासश्च परिधापयेत्॥३५॥ यजमानस्ततः स्नातः शुक्लांबरधरः शुचिः॥ उपांजलिः समभ्येत्य मंत्रमेत
मुदीरयेत्॥३६॥ येस्मादिनः शिखरिणां शिरसा विभूषा येन नन्दनादिषु वनेषु कृतप्रतिष्ठा॥ ये कामदाः सुरनरोरगकि
न्नराणां ते मे ननन्तस्य दुरितानि तिहराभवंतु॥३७॥ एतैर्द्विजैर्विधिवरप्रकृतोकृताशः पदपस्य सा वहितमदीयितिरं वरस्य॥
लं कृष्णपुत्रपरिकल्पनया कृतोऽसि कार्यं सदैव भवता मयपुत्रकार्यम्॥३८॥ इत्येवमुक्त्वा तं वृक्षं लालयित्वा पुनः पुनः

223

॥रामः॥
॥२१३॥

घृतपात्रे स्ववदनं दृष्ट्वाशिषमुदीरयेत् ॥ ३९ ॥ अंगादंगात्संभवसि हृदयादभिजायसे ॥ आत्मा वै पुत्रनामासि स जीव
शरदः शतम् ॥ ४० ॥ ब्राह्मणानां ततो देयाद्दक्षिणां हृष्टमानसैः । स्थापकाय भुभां धेनुं दत्वा कुर्यान्महोत्सवम् ॥ ४१ ॥ दीना
नाथजनानां च भोजनं चानिवारितम् ॥ इतरेषां प्रदातव्यं संतुष्टेन सुरासवम् ॥ ४२ ॥ ज्ञातिबंधुजनैः सार्द्धं स्वयं भुंजीत काम
तः ॥ प्रेष्याः कर्मकराः सर्वे पूजनीयाः स्वशक्तितः ॥ ४३ ॥ यस्त्वेवं कुरुते पार्थ वृक्षारामं महोत्सवम् ॥ सर्वकामानवाप्नोति इह
लोके परत्र च ॥ ४४ ॥ पुत्रैर्विना शुभगतिर्न भवेन्नराणां दुष्पुत्रकैरिति तथोभयलोकनाशः ॥ यत्नाद्विचार्य सुधिया परिणा
त्यवृक्षास्सुत्राः सुगुणा विधिना परिकल्पनीयाः ॥ ४५ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवा
दे वृक्षोद्यापनविधिवर्णनं नाम षड्विंशत्युत्तरशततमोऽध्यायः ॥ १२६ ॥ श्रीकृष्ण उवाच ॥ ये मानवास्त्रिदशधाम्निनि
केतनानि कुर्वन्ति साधुजनदृष्टिमनोहराणि ॥ तेषां स्वतेःपपस्मार्थमये शरीरे लोके परिभ्रमति कीर्तिमयं शरीरम् ॥ १ ॥
यः कारयेद्धारसिताभ्रगौरमतुंगसौधधवलायतनं सुराणाम् ॥ चंडावदातभवने दिविलब्धसौख्यो राज्यश्रियं समनुविबो
धयुतामुपैति ॥ २ ॥ ये कारयंति सुरसद्मसु देवतानामर्चाः सुवर्णरजतायसशैलताम्राः ॥ सामंतमौलिमणिरश्मिसम
र्चितास्ते सिंहासनेऽस्फुदकिरीटमतोऽवभांति ॥ ३ ॥ ये मेरुमौलिसुरसंघकृताभिषेकाः पंचामृतैः सुरवरानभिषेचयंति

तेदिव्यकलामभिधार्यसुरेश्वरत्वंराज्याभिषेकमतुलंपुनराप्नुवंति॥४॥येशैलराजमलयोद्भवचंदनेनसत्कुंकुमे
नचसुराननुलेपयंति॥तेदिव्यगंधपटवाससुगंधिदेहानंदंतिनंदनवनेषुमहाप्सरोभिः॥५॥गंधाढ्यजातिकमलोत्प
लदिव्यपुष्पैर्देवालयैरनुदिनंननुयेऽर्चयंति॥उद्योतमेवनरपतित्वमवाप्यतेऽपिप्राप्स्यंतिकुंदधवलामचिरेणसिद्धि
म्॥६॥आमोदिभिर्हिमतुरुष्कसुगंधधूपैर्येमानवाःसुरवरानपिधूपयंति॥कर्पूरधारनिभगंधवराभिरामेस्वर्गेविमा
नवतितेभवनेरमंते॥७॥दोधूयनेकनकदंडविराजितेभ्यःसच्चामरैःप्रवलकुंडलसुंदरीभिः॥दिव्यांबरस्रगनुलेपन
भूषितांगाकृत्वासुरेश्वभवनांवरवस्त्रपूजाम्॥८॥ददीप्यतेदिनकरोज्वलपद्मरागरत्नप्रभाकुलितहेममयेविमाने
दिव्यांगनापरिवृतोनयनाभिरामःप्रज्वालदीपममलंभवनेश्वराणाम्॥९॥योजागरंसुरवराभिमतोददातिचैत्रोत्सवा
दिदिवसेषुपितूर्यनादैः॥वीणाश्रुवेणुमधुरस्वरभाषिणीभिःसंगीयतेवसकृशोदरकिन्नरीभिः॥१०॥कुर्वंतियेसदुप
लेपनधातुरागसंमार्जनंसुरवरायतनेऽनुरक्ताः॥मुक्ताकलापमपिकांचनभक्तिचित्रैर्वैदूर्यकुट्टिमतलेदिवितेवसंति॥
११॥दद्याद्यपःपरमभक्तियुतःसुराणांघंटावितानवरचामरमातपत्रम्॥केयूरहारमणिकुंडलभूषितोसौरत्नाधि
पोवसतिभूतलचक्रवर्ती॥१२॥सम्पूर्वयेत्वानिवचःकुसुमैर्विचित्रैर्देवाधिदेवपरिसंस्तुतपादपद्मान्॥भक्त्याग्रह

214

अतितीव्रंमहद्दिव्यम

ष्टमनसः प्रणमंतिदेवांस्तेभूर्भुवःस्वमहिमाप्तफलाभवंति ॥ १३ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्री
कृष्णयुधिष्ठिरसंवादेदेवप्रजाफलव्रतवर्णनंनामैकोनविंशत्युत्तरशततमोऽध्यायः ॥ १२९ ॥ युधिष्ठिरउवाच ॥ भगव
न्केनतपसाव्रतेननियमेनवा ॥ दानेनकेनवालोकेप्रोज्वलत्वंप्रजायते ॥ १ ॥ अतितेजोमहद्दीप्तंदीप्तांशुकिरणोज्वल
म् ॥ शरीरंजायतेयेनतन्मेवक्तुमथार्हसि ॥ २ ॥ श्रीकृष्णउवाच ॥ मथुरायांपुरापार्थपिंगलोनामतापसः ॥ आगतःसव
मेपस्नाजाह्नवत्याप्रपूजितः ॥ ३ ॥ पप्रच्छप्रश्नमेवैतंसचाचोचयथातथम् ॥ तथापिमेसमाख्यातंतत्सर्वंतेवदाम्यहम्
४ ॥ यदायदातपश्श्रेष्ठपुण्यकालःप्रपद्यते ॥ संक्रान्तौसूर्यग्रहणेचेंदुपर्वणिवैधृते ॥ ५ ॥ उत्तरेत्वयनेप्राप्तेदक्षिणेविषुवेत
था ॥ एकादश्यांभृकृपक्षेचतुर्दश्यांदिनक्षये ॥ ६ ॥ सप्तम्यामथवाषष्ठ्यांस्नात्वाव्रतपरोनरः ॥ नारीवाभक्तिदेवेभ्यःप्रयच्छे
त्स्वयतांगणे ॥ ७ ॥ घृतकुंभेनदीपेनप्रज्वलंतंप्रदीपकम् ॥ युधिष्ठिरउवाच ॥ भक्तिदेवाइतिप्रोक्तंयत्त्वयामधुसूदन ॥ ८
किमेतत्कौतुकंमेऽस्तिसंशयंछेत्तुमर्हसि ॥ ॥ श्रीकृष्णउवाच ॥ पुराकृतयुगस्यादौत्रिशंकुर्नामपार्थिव ॥ ९ ॥ सस्वर्गंगं
तुकामोऽभूच्छरीरेणनरोत्तम ॥ ततस्वर्गालतांनीतोवशिष्ठेनमहात्मना ॥ १० ॥ त्रिशंकुःसर्वमाचख्यौविश्वामित्रायधी
मते ॥ सोऽपिमन्त्रवशात्तस्यचकाराह्वयदेवता ॥ ११ ॥ नताहविःप्रत्यगृह्णंस्ततःक्रुद्धःकुशात्मजः ॥ विश्वामित्रस्तुकोपेनच

॥ भविष ॥ कारास्तान्सुरोत्तमान् ॥ १२ ॥ शृंगाटकान्नालिकेरान्यच्चनानानजौडकान् ॥ मेधारथ्यद्वार्ताकनारिकूष्माण्डकोड्वान्
॥ २१५ ॥ १३ ॥ उष्ट्रान्मनुजान्देवाश्वक्रोधान्मतिरवासजत् ॥ चकारास्यान्सप्तऋषीन्प्रतिमासंसुरोत्तमान् ॥ १४ ॥ ततः शक्रः समागम्य
विश्वामित्रंप्रसादयवै ॥ स छिंतिवारयामासयेसृष्टास्तेनथापिव ॥ १५ ॥ मर्त्यलोकेचतेसर्वेदेवादेवकुलेषुच ॥ मंत्रैर्निव
शाः पिंडीषुस्थितामूर्तिमन्तोयथा ॥ १६ ॥ ब्रह्मविष्णुस्तथारुद्रायेचान्येदेवतागणाः ॥ लोकानामुपकारायमर्त्यलोक
मुपागताः ॥ १७ ॥ प्रतिमासुस्थिताः शश्वद्भोगान्भुंजन्तिशाश्वतान् ॥ वरप्रदाश्चभक्तानामितिनेतुहसमीरितम् ॥ १८ ॥
तेभ्यः पुरस्ताद्दातव्यंप्रज्वलंतंप्रदीपकम् सूर्यायरक्तवस्त्रेणापूर्णावर्तिंघृतेनतम् ॥ १९ ॥ ततः प्रस्थैः प्रज्वलंतींमंत्रेणानेन
दापयेत् ॥ तद्विष्णोः परमंपदंसदापश्यंतिसूरयः ॥ दिवीवचक्षुराततम् ॥ २० ॥ पीतवस्त्रेणकृष्णायश्वेतवस्त्रेणभ
लिने ॥ कौसुंभवस्त्रेणाश्वेनगौरीमुद्दिश्यदापयेत् ॥ २१ ॥ लाक्षारक्तेनदुर्गायैपूर्णावर्तिंप्रबोधयेत् ॥ नीलवस्त्रेणकामा
यगणनाथायखादिरे ॥ २२ ॥ नागेभ्यः कृष्णवस्त्रेणग्रहेभ्यश्चषिकाधुधाम् ॥ देवांगनापितृभ्यस्तुपितृवर्तिंप्रबोधयेत् ॥
२३ ॥ विशेषंभरणसूर्यायपूर्णावर्तिंनिगद्यते ॥ शिवायेश्वरवर्तीतिभोगवर्तिर्जनार्दने ॥ २४ ॥ पद्मवर्तिर्विरिंचायगो ॥ रम: ॥
र्यैसौभाग्यवर्तिका ॥ नागेभ्योनागवर्तीतिग्रहवर्तिर्ग्रहविष्टिरा ॥ २५ ॥ नेत्रपट्टेनमधुनाघृतेनमधुकुंडके ॥ अर्चितेव ॥ २१५ ॥

216

र्चिते चैतल्लिताये प्रबोधयेत् ॥२६॥ मंत्रेणानेन राजेंद्र तन्निशामय वैदिकम् ॥२७॥ अग्ने त्वां कामया गिरानुभ्यं
ता गिरस्तु विश्वा ॥ ऋषिस्त्रितयः प पकप थक् ॥२८॥ अग्ने कामाय जेगिरे अग्नि प्रिये भुधामसु ॥ कामो भूतस्य भव्य
स्य सम्राडेको विराजति नाभ्यां नाम स्वाहा ॥२९॥ एवमेतेन विधिना यः प्रयच्छति दीपकम् ॥ विस्तीर्णे विपुले पात्रे घृत
र्णे भे नियोजितम् ॥३०॥ यांति ते बुलसदनं विमानेनार्कवर्चसा ॥ तिष्ठंति योत्तमा नाके से यावदाभूतसंप्लवम् ॥३१॥ सदी
पेनु यथा देशोच स्वं पिबलवं निधि ॥ तथा दीपस्य दातारो भवंति सफलेक्षणाः ॥३२॥ यथैवोर्ध्वगतिनित्यं राजन्दीपशिखा
शुभा ॥ दीपदातुस्तथैवोर्ध्वगतिर्भवति शोभना ॥३३॥ घृतेन दीपो दातव्यो राजंस्तैलेन वा पुनः ॥ वसामज्जादिभिर्दीपो न
तु देयः कथंचन ॥३४॥ दीपस्नेहेन कर्त्तव्यो न तु कर्मविजानता निर्वापणं च दीपस्य हिंसनं च विगर्हितम् ॥३५॥ यः कु
र्यान्नेन कर्माणि स्यादसौ पुष्पितेक्षणः ॥ दीपहर्ता भवेदन्धः काणो निर्वापको भवेत् ॥३६॥ पद्मसूत्रोद्भवां वर्तिं गंधतैले
न दीपिताम् ॥ विरोगः सुभगश्चैव दत्वा भवति मानवः ॥३७॥ यस्त्वालये देवदेवस्य कर्पूरेण तु दीपकम् ॥ अश्वमेधम
वाप्नोति कुलं चैव समुद्धरेत् ॥३८॥ एतन्मयोक्तं नवदीपदानफलं समग्रं कुरुवंशचंद्र ॥ श्रुत्वा यथावत्सततं हि देया
दीपास्त्वया विप्रसुरालयेषु ॥३९॥ अत्राप्युदाहरंतामितिहासं पुरातनम् ॥ दीपदानाज्ज्वलितया यदवाप्तं पुरानघः ॥४०

आसीच्चित्ररथोनामसविदर्भेषुमहीपतिः॥ तस्यपुत्रशतंराज्ञोजज्ञेपञ्चदशोत्तरम्॥ ४१ ॥ एकैवकन्यातस्यासीद्ललि-
तानामनामतः॥ सर्वलक्षणसंपन्नारूपेणाप्रतिमाभुवि॥ ४२॥ तांददौकाशिराजायचार्वंगींचारुधर्मणे॥ शतान्य-
स्यानिभार्याणांत्रीणित्वासंश्चारुधर्मणः॥ ४३॥ तासांमध्येयमहिषीललितानामसाप्यथाभवत्॥ विष्णोरायतनेसातुसहस्रं
परिदीपकाम्॥ ४४ ॥प्रज्वालयंत्यनुदिनंदिवारात्रमनिर्वृतम्॥ तामिस्रमाश्वयुक्पक्षंशुक्लपक्षंचकार्तिकम्॥ ४५॥
तस्याःप्रज्वलतोदीपउच्चस्थानकृतःशुभः॥ तस्मिन्कालेतथानित्यंब्राह्मणावसथेवसा अग्राभवतिसायाद्रेदीपप्रेम-
णातत्परा॥ ४६॥ चतुष्पथेषुरथ्यासुदेवतायतनेषुच॥ चैत्यवृक्षेषुगोष्ठेषुपर्वतानांचमूर्द्धसु॥ ४७॥ पुलिनेषुनदीनांच
कूपमूलेषुपांडव॥ तांसपत्न्योऽयलंगास्यपप्रच्छुरिदमादृताः॥ ४८॥ ललितेवदभद्रंतेललितेवदनंतथा॥ नतथावलि-
पुष्पेनतथाद्विजपूजने॥ ४९॥ भवत्याःसुमहासक्तोदीपप्रज्वालनेयथा॥ तदेतत्कथयास्माकंललितेकौतुकंपरम्॥ कृपया
५०॥ मन्यामहेत्वयावश्यंदीपदानंफलंश्रुतम्॥ ललितोवाच॥ नाहंमत्सरिणीभद्रानचनागादिदूषिता॥ ५१॥ एकप-
त्याश्रिताःसाध्व्योभवत्योममस्मातदा॥ अपथ्यधर्मचरणाःशृण्वंतुगदितंमम॥ ५२॥ मयैतद्दीपदानस्ययथैवंभु-
ज्यतेफलम्॥ हिरापदयिताभार्याचैलराजसुतावरा॥ ५३॥ उमादेवीतिमद्रेषुदेविकासासरिद्वरा॥ नराणामनुकंपार्थंब्र

216

लाग्ना ह्यवतारिता ॥ कृता किं भवतीभिः सा देविका पापनाशिनी ॥ ५४ ॥ तस्यास्नात्वा सकलपांगाणायत्समवाप्नुयात्
तस्यामथ नृसिंहाख्यं तीर्थं कल्मषनाशनम् ॥ हरिणा नृसिंहवपुषा यत्र स्नानं कृतं पुरा ॥ ५५ ॥ सौवीरराजस्य पुरा मैत्रेयो
भूत्पुरोहितः ॥ तेन चायतनं विष्णोः कारितं देविकातटे ॥ ५६ ॥ अहन्यहनि शुश्रूषां पुष्पधूपानुलेपनैः ॥ दीपदानादिभिश्चै
व चक्रे तत्र स वै द्विजः ॥ ५७ ॥ कार्त्तिकां दीपकं तत्र प्रदत्तं तेन वै कदा ॥ आसीन्निर्वाणभूयिष्ठो देवागारे सुरतो निशि ॥ ५८
देवतायतने वासीत्तत्राहमपि मूषिका ॥ प्रदीपवर्त्तिहरणे कृतबुद्धिर्वरानना ॥ ५९ ॥ गृहीत्वाथ मया वर्त्तिर्वृकदंशो ररास
च ॥ नष्टा चाहं ततस्तस्य मार्जारस्य भयातुरा ॥ ६० ॥ वक्त्रप्रान्तेन पस्पंत्या स दीपः प्रेरितो मया ॥ जज्वाल पूर्ववद्दीप्तात
स्मिन्नायतने पुनः ॥ ६१ ॥ मृताहं च पुनर्जाता वैदर्भे राजकन्यका ॥ जातिस्मरा महीपस्य महिषी चारुधर्मणः ॥ ६२ ॥
एष प्रभावो दीपस्य कार्त्तिके मासि शोभनः ॥ दत्तस्यायतने विष्णोर्यस्येयं व्युष्टिरुत्तमा ॥ ६३ ॥ असंकल्पितमप्यस्य
प्रेरणं यन्मया कृतम् ॥ केशवायतने दीपस्य तस्येदं भुज्यते फलम् ॥ ६४ ॥ एतस्मात्कारणाद्दीपानहमेतानहर्निशम्
प्रयच्छामि हरेर्गेहे जानमस्य महाफलम् ॥ ६५ ॥ एवमुक्त्वा सपत्नीः सा दीपदानपरायणाः ॥ बभूव देवदेवस्य केश
वस्य गृहे सदा ॥ ६६ ॥ ततः कालेन महता सह राज्ञा महात्मना ॥ विष्णुलोकमनुप्राप्ता पंचत्वं प्राप्य मानदा ॥ ६७ ॥ तंलो

॥ भविपु ॥
॥२१७॥

कमलासायन्थेणा सार्द्धं सा राजपत्नी कमलाभनेत्रा ॥ रेमे महीपालमुदा समेता दीपप्रदानात्सकलार्त्तिहीना ॥ ६८
दीपप्रदानमपि ठापनरं वदंति विप्राग्निगोसूर्यकुलैकगेहांगणेषु ॥ तद्दानदीप्तवपुषाथ पथांधकारे गच्छन्नरः पत
नित्तमस्खलते कदाचित् ॥ ६९ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दीपदानवि
धिवर्णनं नाम त्रिंशदुत्तरशततमोऽध्यायः ॥ १३० ॥ ॥ श्रीकृष्ण उवाच ॥ कार्त्तिक्यामथवा माघ्यामयमेव युधिष्ठि
र ॥ १ ॥ वैशाख्यामथवत्तीयाय विशाखाया वादशोऽह्निवा ॥ खंडनीलं शंखवर्णादं सपौंड्रं धौतपुच्छकम् ॥ २ ॥ गोभिश्चतुर्भिः
सहितं सृजेच्चैव विधिंमत यद्गाव पुराणगर्गो गोकुलेऽनघपांडव ॥ ३ ॥ ततेहं संप्रवक्ष्यामि विधिं गर्गप्रचोदितम् ॥ मा
तरं स्थापयित्वाग्रे पूजयेत्कुसुमाक्षतैः ॥ ४ ॥ मातृश्राद्धं ततः कुर्यात्तदाभ्युदयकारकम् ॥ सुकालमूलं कलशमश्वत्थ
दलशोभितम् ॥ ५ ॥ तत्र विवांत्रपित्वानुस्थापयेद्रुद्रदेवताम् ॥ सुसमिद्धं ततः कृत्वा वह्निमंत्रपुरःसरम् ॥ ६ ॥ अथैनं
जुहुयात्स्रुभिः पृथगाहुतिसंज्ञितैः ॥ पौष्णामंत्रैस्ततः पश्चाद्धुत्वा वह्निं यथाविधि ॥ ७ ॥ एकवर्णं द्विवर्णं वा रोहितं
श्वेतमेव वा ॥ नीलवत्सपयस्विन्याः पुत्रं सर्वांगसुंदरम् ॥ ८ ॥ चतस्रो वत्सतर्यश्च ताभिः सार्द्धमलंकृतम् ॥ तासां
कर्णे जपेद्विप्रः पतिर्वो गतिनं श्रमम् ॥ ९ ॥ सामितास्तेन सहिताः क्रीडध्वं हृष्टमानसाः ॥ ततो वामे त्रिशूलं च द

217

॥ रामः ॥
॥२१७॥

क्षिणेचक्रमालिखेत्॥१० ॥अंकितं शंखचक्राभ्यां वर्षितं कुसुमादिना॥ पुष्पमालाकृतग्रीवं सितवस्त्रेण छादि
तम् ११॥ विमुंचेद्वत्सकाभिश्च नीलाभिर्वलितं वृषम्॥ देवालये गोकुले वा नदीनां संगमेऽथवा ॥१२॥ इत्युक्ते
गर्गमुनिना विधानं वृषमोक्षणे॥ स्वेच्छाविहारिणं दृप्तं गर्जंतं सुंदरं गवान् ॥१३॥ ककुद्मिनं पतिं धन्या ये विमुंच
न्तिगोवृषम्॥ फलं चैतस्य वक्ष्यामि ब्रुवतो मे निबोधतम्॥१४ ॥वृषोत्सर्गे पुनात्येव दशातीतान्दशापरान्॥
यत्किंचित्स्पृशते तोयं समुत्तीर्य जलान्महीम् ॥ १५ ॥ वृषोत्सृष्टं पितॄणां तु तदक्षयमुदाहृतम्। येभ्ययेभ्यस्पृशो
तोयं लांगूलादिभिरंततः ॥१६ ॥सर्वं तदक्षयं तस्य पितॄणां नात्र संशयः॥ शृंगैः खुरैर्वा यद्भूमिमुल्लिखत्यनिशं वृ
षः॥१७॥ मधुकुल्याः पितॄंस्तस्य अक्षयालो भवंति वै॥ सहस्रतलमात्रेण तडागेन यथा भृतिः॥१८॥ पितॄणां या भवे
त्तृप्तिस्तां वृषस्त्वनिरिच्यते॥ यो ददाति तिलैर्मिश्रं तिलान्वा श्राद्धकर्मणि॥१९ ॥मधु वा नीलखंडं वा अक्षयं सर्वमेव
तत्॥ एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्॥२० ॥यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत ॥न करोति वृषोत्स
र्गं सुतीर्थे वा जलांजलिम् ।२१॥ नपुत्रवत्तुनियः पुत्रः पितुरुच्चार एव सः॥२२॥ यद्भूमिमुल्लिखेत शृंगखुरैः पुच्छको
यद्वा करोति प्रतिमःऽवृषान्निरीक्ष्या। रवणं समस्तमपि तस्य विवाहकर्तुः संतोषमावहति शाकसभागतस्य·

॥ भवि ॥
॥ २१८ ॥

वसन्ति ७

२३ ॥ इति श्रीभविष्यमहापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृषोत्सर्गविधिवर्णनं नामैकत्रिंशाउत्त
रशततमोध्यायः ॥ १३१ ॥ ॥ युधिष्ठिर उवाच ॥ किमर्थं फाल्गुनस्यान्ते पूर्णमास्यां जनार्दन ॥ उत्सवो जायते लोके
ग्रामे ग्रामे पुरे पुरे ॥ १ ॥ किमर्थं शिशवस्तस्यां गेहे गेहेऽतिवादिनः ॥ होलिका दीप्यते कस्मात्फाल्गुनान्ते किमुच्यते ॥ २
अडाडेति च का संज्ञा शीतोष्णेति किमुच्यते ॥ को ह्यस्यां पूज्यते देवः केनेयमवतारिता ॥ ३ ॥ किमस्यां क्रियते कृष्ण त
द्विस्तरेणो वद ॥ श्रीकृष्ण उवाच ॥ आसीत्कृतयुगे पार्थ रघुर्नाम नराधिपः ॥ ४ ॥ शूरः सर्वगुणोपेतः प्रियवादी बहुश्रुतः
स सर्वां पृथिवीं जित्वा वशीकृत्य नराधिपान् ॥ ५ ॥ धर्मतः पालयामास प्रजाः पुत्रानिवौरसान् न दुर्भिक्षं न च व्याधिर्नाका
लमरणं तथा ॥ ६ ॥ नाधर्मरुचयः पौरास्तस्मिन्शासति पार्थिवे ॥ तस्यैवं शासतो राज्यं भात्रधर्मरतस्य वै ॥ ७ ॥ पौराः सर्वे
समागम्य त्राहि त्राहीत्यथाब्रुवन् ॥ पौरा ऊचुः ॥ ॥ अस्माकं हि गृहे काचिद् ढौण्ढा नामेति राक्षसी ॥ ८ ॥ दिवा रात्रौ समाग
म्य बालान्पीडयते बलात् ॥ रक्षया कंडकेनापि भेषजैर्न नराधिप ॥ ९ ॥ मन्त्रज्ञैः परमाचार्यैः सा नियन्तुं न शक्यते ॥ पौराणां
वचनं श्रुत्वा रघुर्विस्मयमागतः ॥ १० ॥ विनयाविष्टहृदयः पुरोहितमथाब्रवीत् ॥ ॥ रघुरुवाच ॥ ढौण्ढेति राक्षसी केयं
किंप्रभावा द्विजोत्तम ॥ ११ ॥ कथमेषा नियन्तव्या मयाऽद्भुतकारिणी ॥ रक्षणात्सोच्यते राजा पृथिवीपालनान्नृपः

नृणाम्

प्रख्याता १

मेघनै ३

॥ राम: ॥
॥ २१८ ॥

218

रौडेणा२

१२॥ अरक्षमाणाः पृथिवीं राज्ञा भवन्ति किल्बिषी॥ ॥वसिष्ठ उवाच॥ शृणु राजन्स्वर्ग्गुह्यं यन्नाख्यातं मया क्वचित्
१३॥ डौंतन्नामेति विख्याता एषसीमालिनःस्मृता। तथा चाराधितः शंभू रैरेण तपसा पुरा॥१४॥ शीतला माह भगवा-
न्वरं वरय सुव्रते। यत्ते मनोऽभिलषितं तद्ददाम्यविचारितम्॥१५॥ डौंतन्नाह महादेवं यदि तुष्टः त्वयं मम॥ नववध्वा
मुपदीनां मनुजानां च शंकर॥१६॥ माकरुत्वं त्रिलोके शाशाश्वाश्वागां तथैव च॥ शीतोस्नवर्षासमये दिगाराश्रोवहि-
र्दहे॥१७॥ ममपंसर्व्वदा मेल्पो लवस्नाता स्माहेश्वर॥ ॥शंकर उवाच॥ एवमात्मित्रयो कत्यानां पुनःस्रोवा वम्भलमन्तः
१८॥ उक्ता तेभ्यः शिशुभ्यश्च भयं ते संभविष्यति॥ स्नता कृतौ सह भागेमाश्रयां हृदये कृपाः॥१९॥ एवं दत्वा वरं तस्या भग-
वान्भगनेत्रहा। त्वचुंनत्रक्षो यथा पूर्वं पश्यतैवांतरधीयत॥२०॥ एवं लब्धवरा सा तु राक्षसी कामरूपिणी॥ नित्यं पीडयते
बालान्संस्थ्यस्त्रहरमाश्रितम्॥२१॥ अद्याडयेति गृह्णाति सिद्धमंत्रं कुटुंबिनी॥ गृहे पूजेन तस्या लोके दुष्टदेवाभिधीयते॥२२
॥ एतत्ते सर्व्वमाख्यातं डौंतायाश्चरितं मया॥ सांप्रतं कथयिष्यामि येनोपायेन हन्यते॥२३॥ अद्य पंचदशी भद्र फाल्गुन
स्य नराधिप॥ शीतकालो विनिष्क्रांतः प्रातर्ग्रीष्मो भविष्यति॥२४॥ अभयप्रदानं लोकानां दीयतां पुरुषोत्तम॥ यथायथा
शंकिता लोकारमंति वहसंति च॥२५॥ दारुजानि च खड्गानि गृहीत्वा सस्मरोत्सुकाः॥ योधा इव विनिर्यान्तु शिशवः संप्र

॥ भविषु ॥
॥ २१९ ॥

तल्लोकानु २

हर्षिताः ॥ २६ ॥ संचयं शुष्ककाष्ठानामुपलानां च कारयेत् ॥ तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मंत्रविस्तरैः ॥ २७ ॥ ततः
किलकिलाशब्दैस्तालशब्दैर्मनोहरैः ॥ तमग्निं त्रिः परिक्रम्य गायंतु च हसंतु च ॥ २८ ॥ जल्पंतु स्वेच्छया लोका निःशं
का यस्य यन्मतम् तेन शब्देन सा पापा होमेन च निराकृता ॥ २९ ॥ अट्टहासैर्डिंभानां राक्षसी क्षयमेष्यति ॥ श्रीकृष्ण
उवाच ॥ तस्यर्षेर्वचनं श्रुत्वा स नृपः पांडुनंदन ॥ ३० ॥ सर्वं चकार विधिवद्युक्तं तेन च धीमता ॥ गता सा राक्षसी नाशं
तेन चोग्रेण कर्मणा ॥ ३१ ॥ ततः प्रभृति लोकेस्मिन्ल्याढख्यातिमागता ॥ सर्वदुष्टापहो होमः सर्वरोगोपशांतिद ॥
३२ ॥ क्रियतेऽस्यां द्विजैः पार्थ तेन सा होलिका मता ॥ सर्वसारा तिथिश्चेयं पूर्णमासा युधिष्ठिर ॥ ३३ ॥ सारत्वात्फल्गुनीस्ये
सापरमानंददायिनी ॥ अस्यां निशागमे पार्थ संरक्ष्याः शिशवो गृहे ॥ ३४ ॥ गोमयेनोपसंलिप्ते सचतुष्के गृहांगणे ॥ आ
कारयेच्छिशुप्रायान्खड्गव्यग्रकरान्नरान् ॥ ३५ ॥ ते काष्ठखंडैः संस्पृश्य गीतैर्हास्यकरैः शिशून् रक्षंति तेषां दातव्यो गु
डपक्वान्नमेव च ॥ ३६ ॥ एवं ढौंढिनपात्रस्य सदोषः प्रशमं व्रजेत् ॥ बालानां रक्षणं कार्यं तस्मात्तस्मिन्निशागमे ॥ ३७ ॥
युधिष्ठिर उवाच ॥ प्रभाते किं जनैर्देव कर्तव्यं सुखमीप्सुभिः ॥ प्रवृत्ते माधवे मासि प्रतिपद्भास्करोदये ॥ ३८ ॥ श्रीकृष्ण
उवाच ॥ कृत्वा चावश्यकार्याणि संतर्प्य पितृदेवताः ॥ वंदयेद्धोलिकाभूतिं सर्वदुष्टोपशांतये ॥ ३९ ॥ गंदिने चर्चिते चैव

॥ राम ॥
॥ २१९ ॥

219

उपलिप्ते गृहाजिरे ॥ चतुष्कं कारयेद्वेद्यां वर्णकैश्चाक्षतैः शुभैः ॥ ५० ॥ तन्मध्ये स्थापयेत्पीठं शुभं वस्त्रोत्तरच्छदम्-
अग्रतः पूर्णकलशं स्थापयेत्सूत्रवेष्टितम् ॥ ५१ ॥ साक्षतं सहिरण्यं च सितचंदनचर्चितम् ॥ कलशस्याग्रतो देयाउपा-
नह्वरां शुभाः ॥ ५२ ॥ आसने चोपविष्टस्य ब्राह्मणोपेण भारत ॥ वंदयेच्चन्दनं नारी अभ्यांगांगाकुलस्रगा ॥ ५३ ॥ पद्म-
रागोत्तरपटाश्लेष्ठां शुक्तिभिःपिधिता ॥ वसुधारां शिरोग्रे च दधिदूर्वाक्षतान्विताम् ॥ ५४ ॥ नेर्चापयित्वा श्रीखंडमायुरारो-
ग्यवृद्धये ॥ पश्चाच्च प्राशयेद्विद्वां अक्षतपुष्पं सचंदनम् ॥ ५५ ॥ मनोभवस्य सा पूजा ऋषिभिः संप्रदर्शिता ॥ येपिवं निव-
संतापौ च तु पुष्पं सचन्दनम् ॥ ५६ ॥ सत्यं हि दिव्यकामस्य तन्मूर्तिर्जायते जनः ॥ अनंतरं द्विजेन्द्राणां सुतमागधवंदि-
नाम् ॥ ५७ ॥ दद्याद्दानं यथाशक्त्या कामो मे प्रीयतामिति ॥ ततो भोजनवेलायां भूतं यत्स्वाकृतेऽहनि ॥ ५८ ॥ ब्राह्मणायेत्स्व-
थमं वान्नं ततो भुंजीत कामतः ॥ यश्चैवं कुरुते पार्थ शास्त्रोक्तं फाल्गुनोत्सवम् ॥ ५९ ॥ अनायासेन सिध्यंति तस्य सर्वे म-
नोरथा ॥ आधयो व्याधयश्चैव यांति नाशं न संशयः ॥ ६० ॥ तत्र पौत्रसमायुक्तः सुखं तिष्ठति मानवः ॥ पुण्या पवित्रा ज-
यदा सर्वविघ्नविनाशिनी ॥ ६१ ॥ ख्याता ते कथिता पार्थ तिथीनामुत्तमा तिथिः ॥ ६२ ॥ कृते तु पारसमयेसित पंचदश्यां प्रा-
तर्वसंतसमुपस्थिते च ॥ संप्राश्य वृतकुसुमं सहचंदनेन सत्यं हि पार्थ पुरुषस्स्मरसुखीसर्मांस्ते ॥ ६३ ॥ ॥ इति श्रीभ-

वद्धापयित्वा ४

समस्ते १

॥ भवि पु ॥
॥ २२० ॥

विष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे फाल्गुनपूर्णिमोत्सववर्णनं नाम द्वात्रिंशदुत्तरशततमोऽ
ध्यायः ॥ १३२ ॥ ॥ युधिष्ठिर उवाच ॥ सत्यस्मालिकुलालीढकुसुमानि मदन्यपि ॥ दमनेन कथं लोकैः पूज्यंते
नाकनायकाः ॥ १ ॥ दोलान्दोलनमाहात्म्यं रथयात्रामहोत्सवम् ॥ कथयस्वामलं प्राज्ञ यादवांभोजभास्कर ॥ २ ॥
श्रीकृष्ण उवाच ॥ पार्थार्थिजनसद्वृक्षक्षांतिधाम धरापते ॥ यदेतद्भवता पृष्टं तच्छृणुष्व वदामि ते ॥ ३ ॥ पुरा पुरा
णमातासे मंदरे चारुकंदरे ॥ गंधाधारीकुलालीढो जातो दमनकस्तरुः ॥ ४ ॥ तस्य गंधमनाघ्रेयमाघ्राय सुरयो
षितः ॥ मदनोन्मादवशगा गायंती विहसंति च ॥ ५ ॥ स्वबधोनियमांस्त्यक्त्वा प्राङ्गणं तगृहान्गति ॥ न वेदाध्य
यने ध्याने रतिस्तेषां बभूव ह ॥ ६ ॥ अपराधाद्विघटितं यदभूद्वद्विप्रियेपरम् मानसं मानिनीनां तु पुनर्गंधेन सं
धितम् ॥ ७ ॥ गंधेनाकुलितं लोकं दृष्ट्वा ब्रह्मा तमब्रवीत् ॥ स्वामनिर्मितया वाचा रोषात्प्रस्फुरिताधरः ॥ ८ ॥ ॥
ब्रह्मोवाच ॥ जातस्त्वं लोकदमनान्नूनं दमनको मया ॥ जगद्वाघूर्णासेकस्मात्कर्म नैतज्जगोचितम् ९ यस्मात्त्व
न्मत्यंते सर्वातिशायवर्जितम् ॥ यस्मादेतन्नरः कर्मयत्नो ठगो न धीमताम् ॥ १० ॥ अकस्मादपकारं यः करोति
स नराधमः ॥ बहूनामपकाराय संप्रवृत्तः किमुच्यते ॥ ११ ॥ दृष्टार्थसाधकं कर्म न कर्तव्यं कथंचन ॥ अदृष्टं च

॥ रामः ॥
॥ २२० ॥

220

निःसंदेहः सोस्माभिरनुमीयते ॥१२॥ ततः स्वयं प्रभवति दैवे पित्र्ये च कर्मणि । भोगार्थं च त्रिभुवनं निराशे यो भ
विष्यति ॥१३॥ दमनक उवाच ॥ उरुषादेवमारब्धं न क्रोधात्कार्यकारणात् । स्वभावस्यैव मे ब्रह्म त्वया सर्वः पुरा
विभो ॥१४॥ पापस्य जंतोः प्रकृतिः शुभा वा यदि वेतरा ॥ स तस्या मे वरमते दुष्कृते सुकृते तथा ॥१५॥ तत्स्वभाव प्रवृ
तस्य यदि स्यात्पदं त्वया मम ॥ यद्यन्तः किं करोम्येतन्न कृत्स्नमपराध्यति ॥१६॥ सूक्तियुक्तं वचः श्रुत्वा दमनेन समीरि
तम् ॥ प्रीतात्मा पद्मजः प्राह करोमि तव सत्प्रियम् ॥१७॥ वसंते सहकारोत्थमंजरीपिंजरे जने । पुष्पिताशोकशोभा
ढ्ये वने पुंस्कोकिलाकुले ॥१८॥ तस्मिन्काले सुरेशानां शिरांस्याक्रम्य लीलया ॥ स्थास्यति त्वं दिनं चैकं पयस्य विहितं
हितम् ॥१९॥ ये त्वामारोपयिष्यंति दानमानपुरस्सरा ॥ सुरार्चां ते भविष्यंति सदैव सुखिनो नराः ॥२० ॥ सर्वदेव
शिवस्येष्टा पुराणापापभयापहा ॥ प्रसिद्धिं यास्यति मधौ दमनाख्या चतुर्दशी ॥२१॥ एवमुक्त्वा ययौ ब्रह्मा दमनो
मंदरे गिरौ ॥ उवास वासिताशेषभुवनो गंधसंपदा ॥२२॥ दिव्ये गिरौ गिरिसुतादयितानिवासे रत्नोज्ज्वलद्युति
कांचनमणिभागे ॥ स्वापं वरं च हृदये विनिवेश्य तां भोक्तास्थितो दमनको दमितांतरात्मा ॥२३॥ श्रीकृष्ण उवाच ॥
॥ धर्मराज निबोधेदं सांदोलकमहोत्सवम् ॥ प्रहृष्टनरनारीकं पंचमोच्चारसुंदरम् ॥२४॥ सानंदनंदनवने आईया

आलीचनम्.

सहितो यथा ॥ विस्मयस्मेरनयनो बभ्रामोदांतसौरभः ॥ २५ ॥ उन्मादयन्नेव पुत्रे विद्याधरगणान्बहून् ॥ वसंतर्तौ न स
मानान्मुग्धारसानार्वितः ॥ २६ ॥ संतानपारिजातोत्थां वस्त्रासमाधवीलताम् ॥ कश्मिंदंदोलनं चक्रे समालिंग्य घनस्त
नीम् ॥ २७ ॥ गीतमांदोलकारूढस्तत्रा यंत्रमरराह्वियः ॥ येनचोत्कादयंतिस्मसमस्तथस्थापिमन्मथम् ॥ २८ ॥ तं दृष्ट्वाप
दनिमा भवानीप्राह शंकरम् ॥ कौतुकं मे समुत्पन्नं पश्येसाः शंकरप्रभो ॥ २९ ॥ आंदोलकं मम कृते कारयस्व स्वलंकृतम्
त्वया महांदोलयेयं यथा चैते त्रिलोकन ॥ ३० ॥ तद्गौरीवचनं श्रुत्वा गोवृषभध्वजः ॥ सद्योलां कारयामास समाह्व
यमहागुरान् ॥ ३१ ॥ लंभद्रयंत्रोपयित्वाहव्यायतंमयंदृढम् ॥ समस्तंवैवोपरितनंश्वेछंदंसमकल्पयत् ॥ ३२ ॥ वासुकिं दं
डकस्थाने वस्त्रानांतरबधभम् तत्रमाणिमंतरापीठं कृतवान्स्मणिमंडितम् ॥ ३३ ॥ कृमिकार्यासकौशेयवस्त्रैः संवेष्टि
तं नवैः ॥ स्रग्दामालंबितप्रांतं मणिमौक्तिकशोवरम् ॥ ३४ ॥ रचयित्वा विचित्रां तां दोलां चैलाजिनोत्तराम् ॥ तस्मिन्सां सि
द्धगुरवे गौरवेणस्यवेदयत् ॥ ३५ ॥ तत्रारूढस्तया वत्स सौम्यसोमविभवणः ॥ मंदं दोलयामास पार्श्वस्थैः पार्षदैः स
हः ॥ ३६ ॥ वामपार्श्वे तु विजया दक्षिणे तु जया भवेत् ॥ चामराक्रांतकाकृतेते नाभिळे स्ववीजनाम् ॥ ३७ ॥ सांदोल
यंत्यापार्वत्या सहितं सगदाधरम् ॥ येनदेवासुरश्रेणमासीदानंदनिर्भरम् ॥ ३८ ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्स

221

मणिमौक्तिकम्

रोगरणाः ॥ उत्कूलन्नालगाणानि वादयंति स्म चारणाः ॥ ३९ ॥ वेलुः कुलाचलाः सर्वे चुक्षुभुः सप्त सागराः ॥ ववुर्वाताः
सनिर्घाता देवे दोलां समास्थिते ॥ ४० ॥ आलोकाव्याकुलं लोकं देवाः शक्रपुरोगमाः ॥ उपेत्य प्राणिपत्योचुः सर्वपाप
हरं परम् ॥ ४१ ॥ उपारमस्व भगवन्भवतः क्रीडयानया ॥ जगद्व्यापद्यते देव चलितः सागरस्त्वयम् ॥ ४२ ॥ गीर्वाणा
गीर्भिः संहृष्टः शंकरो लोकशंकरः ॥ समुत्तस्थानदोलातः प्रहर्षोत्फुल्लोचनः ॥ ४३ ॥ उवाच वचनं पार्श्वसुरसार्थस्य
पश्यतः ॥ सानुकंपं सुललितं विस्फुटर्थपदाक्षरम् ॥ ४४ ॥ ॥ श्रीमहादेव उवाच ॥ अथ प्रभृति ये दोलाक्रीडां
पुष्करिणीतटे ॥ वसंते कारयिष्यंति मंडिते त्रिदशांगणो ॥ ४५ ॥ नेत्रपट्टापटकूलानां पद्मरागविभूषिताम् ॥ आतप
त्रेण संयुक्तां विस्तलकनकांडकाम् ॥ ४६ ॥ विचित्राभरणामाभिर्मालितदिगंतराम् ॥ नारकाशांतचित्रागपुष्प
मालामनोरमाम् ॥ ४७ ॥ मालंविघावराक्रांताशांतरोपितदर्पणाम् ॥ छत्रचामरसंकुलां यथाशक्त्याप्यलंकृताम् ॥
४८ अग्निकार्यं ततः कृत्वा क्षिप्त्वा चैव दिशां बलिम् ॥ तस्यामारोपयेद्देव मिथुनपूजनाहृतः ॥ ४९ ॥ मङ्गलमन्त्रेण
देवानां प्रोक्तदोलाधिरोहणम् ॥ पार्श्वस्थो ब्राह्मणो विद्वान्पठेद्वा मंत्रमुत्तमम् ॥ ५० ॥ गंभीरांतरनिर्घोषैर्लहना
नां च निस्वनैः ॥ स्तुतिमंगलशब्दैश्च पुष्पधूपाधिवासिताम् ॥ ५१ ॥ एतस्मिन्नंतरे नीरीदोहनायनिऊदका

॥ भवि ॥
॥ २२२ ॥

म्॥ प्रवेशयेत्कुंकुमाद्यां क्रीडावर्णाप्रियैः सह॥ ५२॥ सुवर्णाभ्यं गिलाप्रोक्तं स्मिन्नदंतां भ्रकर्बुरम्॥ लगमानं जलं चांगे कु
स्पन्नस्पात्सुखप्रदम्॥ ५३॥ जलसंक्लिन्नवसनो रक्तान्तादाममंडितः॥ कम्बुग्रीवोऽथ संस्कार्यो वधू वराणिकागणाः॥ ५४
कुंकुमक्षाददत्तांबूलपुष्पमालाकुलो जनः॥ तां विहाय जलक्रीडां तानास्पर्शां हि दधेमतः॥ ५५॥ पीतक्षीतजलाघ्रानतादि
तोऽपि जनः सुखम्॥ मन्यते नियतः कोपि प्रभावोऽयमनंगजः॥ ५६॥ एवं ये नगमिष्यंति नरा वर्म्मतयागतम्॥ नीरु
जस्ते भविष्यंति सुखिताः शारदंशतम्॥ ५७॥ पुत्रपौत्रसमायुक्ता धनधान्यसमावृताः॥ विहत्य सुखसंपत्तौ नतोया
स्यंति मत्पुरम्॥ ५८॥ प्राप्ते वसंतसमये पुरसत्तमानामान्दोलनं सुरवरान्नकुर्वते ये॥ ते प्राप्नुवंति भुवि जन्मनराः फला
निदुःखार्णवान्कुलशतान्यपि तारयंति॥ ५९॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
आन्दोलकविधिवर्णनंनाम त्रयस्त्रिंशाऽत्तरशततमोऽध्यायः॥ १३३॥ ॥ श्रीकृष्ण उवाच॥ रथयात्राविधानं ते क
थयामि युधिष्ठिर॥ स्थिरो भूत्वा निबोधेदं त्वं हि सर्वविदांवरः॥ १॥ चैत्रे त्रिनेत्रसंभूतमलयाख्ये महागिरौ॥ प्रवह
न्मवनध्वानप्रेरखोलितलतालये॥ २॥ एतस्मिन्नेवकाले तु भ्रममाणो यदृच्छया॥ नारदः शारदाकांताक्विचल्लोके स
मायर्यौ॥ ३॥ दृष्ट्वा पूर्वं शिवं शांतं सुरश्रैः सर्वतोवृतम्॥ प्रणम्योपाविशद्विप्रः पुरतः केशवेशयोः॥ ४॥ तमुपासी

॥ रा मः ॥
॥ २२२ ॥

222

नमो लक्ष्म्यै भगवत्यै भगवते च हरेः ॥ पुष्पव्रात्कादितमनाः कृतभ्यागमस्तेपुनः ॥ ५ ॥ श्रीनारद उवाच ॥ शिवकामं च तं विद्धि दग्धं मा-
विद्धि योनमः ॥ वसंतो नाम को योधकामस्य च पितः सखा ॥ ६ ॥ मलयानिलयुक्तेन तेन विश्वं वशीकृतम् ॥ सहकारकरीन्द्र-
स्थं कृत्वा कोकिलाडिंडिमम् ॥ ७ ॥ योधयामास विजयं मन्मथस्य पुरे पुरे ॥ शशांकशेखरः कोऽयं कोयं शांखगदाधरः ॥ ८
कोयं वडिम्बो वा बुल्ला कामस्त्रिजगतां प्रभुः ॥ प्रायः कीरान्तिर्लोको वसंतवचनात्मनः ॥ ९ ॥ दुर्धर्षा कृतनर्तितालह- कृ
नपदक्रमः ॥ अवसायं तनगश्च नियोसं हृत्यवनान्तरम् ॥ १० ॥ गायं तत्र परीहृष्टास्तेनाप्यायान्तियान्तिव ॥ गोप्य-
सीमान्तरगताः क्षेत्रस्थानत्स्वरक्षिताः ॥ ११ ॥ तेऽपि गायन्ति नर्त्तन्ति हसंति स्मरतारकाः ॥ कारस्यताऽनं स्वर्थं शुरजो-
धुर्धरापते ॥ १२ ॥ विटं पश्यन्ति कुलटाः प्रारब्धोचितपंडिताः ॥ सुमनांसि सुसंगीतनृत्यवापवृवादितम् ॥ १३ ॥ एव-
मेनत्रिलोकेऽस्मिन् लितिमवसितां जनः ॥ ललत्पश्वत्सनींदृष्ट्वाजरायोषापि नृत्यति ॥ १४ ॥ वसन्तस्य प्रभावोः यं कौ-
ऽप्यपूर्वो विजृम्भते ॥ सरांस्यद्भुतपद्मानि पुष्पकृद्योः पुष्पजातिका ॥ १५ ॥ हृष्टाः पक्षिद्रुतानाकीर्णा विजिघ्राणास्तु खो-
त्थराः ॥ विकंपवसन्ताबालः पवनस्त्रिगुणात्मकः ॥ १६ ॥ कृतः प्रत्यक्षस्तु महात्म्यसंतोनजगत्त्रये ॥ भवजन्यागुखो-
बालाहृष्टास्तुविकलाद्विजाः ॥ १७ ॥ उभावपि प्रत्यक्षेते पश्यते कामचेष्टितम् ॥ पक्षिणां पक्षनिक्षेपैर्नपस्तुं गतरंग

कैः ॥ १८ ॥ पादपाः पक्षवशातैर्नृत्यंते च प्रहर्षिताः ॥ एतच्छ्रुत्वा तु वचनं नारदस्येन्दुशेखरः ॥ १९ ॥ कौतुकाकलितः शीघ्र-
मारुरोह रथं स्वकम् ॥ रथेन कांचनांगेन पत्रिवरकेतनः ॥ २० ॥ प्रययौ पुण्डरीकाक्षः शंखचक्रगदाधरः ॥ पारावत-
प्रतीकाशं चतुर्वेदमयं रथम् ॥ २१ ॥ आस्थाय प्रययौ हृष्टो ब्रह्मा ब्राह्मणसंस्तुतः ॥ मुनिभिर्व्यासरोमिभ्य यमरक्षो-
महोरगैः ॥ २२ ॥ वृतो रथेन प्रययौ भास्करो वारितस्करः ॥ शैलजो रूपताकेन रथेनादित्यवर्चसा ॥ २३ ॥ कात्यायनी प्र-
चलिता पंचवक्त्रेण केतुना ॥ लंबोदरः करग्रस्तगृहीतकनकोत्पलः ॥ २४ ॥ प्रयातः स्वरथारूढः कृतकर्णाकुलाकुलः
स्वयं देवः परिवृतो भगवान्गोवृषध्वजः ॥ २५ ॥ रथारूढैरमरात्मा मर्त्यलोकमवातरम् ॥ यावत्पश्यति देवेशस्तावत्स-
र्वं तदक्षरम् ॥ २६ ॥ नारदेन यथैवोक्तस्तावत्सर्वं तदक्षरम् ॥ नारदेन यथैवोक्तं जगदानंदनिर्भरम् ॥ २७ ॥ देवैः सार्द्धं पशुप-
तिर्यावत्पश्यति विस्मितः ॥ तावत्तस्थे वहिगणाः परब्रह्मसमंजसम् ॥ २८ ॥ गायंति केचिन्नोत्कंठं लुंठंत्यन्ये प्रहर्षिताः
वादयंत्यपरे तुष्टा जहसुः केचिदुल्वणम् ॥ २९ ॥ वादयंत्यस्तथा वाद्यं गायंत्यस्योन्यथा गणाः ॥ अन्ये त्वथा प्रनृत्यंति
चित्रं चैत्रस्य चेष्टितं ॥ ३० ॥ नीलोत्पलाभनयनैर्विलसत्सांतनारकैः ॥ क्रीडारतिभिरारब्धमालापैर्भूसुरैरपि ॥
३१ ॥ सुराराणां शोभमालक्ष्य भगवान्गोवृषध्वजः ॥ चिंतयामास सुमहान्कार्ययोगो ह्युपस्थितः ॥ ३२ ॥ अनर्थमनुतिष्ठ

प्रारब्धमसमंजसम् ५

तंतद्वतद्विघातायये ज्जनाः॥ नयंतेयेऽतिमूर्खत्वादापदोऽभिभवंतितान्॥३३॥ वसंतःस्वामिभक्तत्वात्सान्त्वपू
व्याकरंयदा उन्मादात्प्रजनोरक्षः कार्यकायद्वयंसम॥३४॥ संचिंत्यैवंसमानाम्यवसंतंप्राहसोकरः॥ नमानीतोमास
मेकंस्थानद्वयंभवतात्विह॥३५॥ मितपक्षःसहृद्योऽयंसर्वभूतगुरवप्रद॥ भवन्तिमनसानंदोविश्वोद्वेगादिवौकसा
म॥३६॥ सोऽयथारथमारूढःसमायातःसमीहितम्॥ वर्षेवर्षेसमतेनैवसंस्थानेनागमिष्यति॥३७॥ कारयिष्यंति
येमत्सौरथयात्रामहोत्सवम्॥ तेद्विजभोगभोक्तारोभविष्यंतिनिरामया॥३८॥ एवमाभाष्यभगवान्स्वसंतंचवनतः
पुरैः॥ संस्तुतोऽथनतश्चापिरवेःस्थानमगमत्ततः॥३९॥ युधिष्ठिरउवाच॥ रथःकिमात्मकःकार्यःकार्यायात्रा
कथंभवेत्॥ आरोपयेत्कथंदेवंरथेहेद्रजगत्पते॥४०॥ श्रीकृष्णउवाच॥ सुविचित्रंविरचनंतुंश्रेष्ठकाष्ठमयंरथ
म्॥ सुदृढाक्षंदृढंवंशंसुवक्ररथकूबरम्॥४१॥ अथवावंशविहितंनेत्रपट्टपटावृतम्॥ नारकाशानविचित्रांगंपुष्पमा
लाविभूषितम्॥४२॥ सितगोपुरसंयुक्तंपंचवर्णपताकिनम्॥ कृत्वाचामरशोभाढ्यंस्थापयेद्भवनांगणे॥४३॥
वैभवेदेवंततःकुर्याद्धृदयस्तविधानतः॥ चतुर्भ्यरणान्तैर्मंत्रैर्वेदब्रशांतिकपौष्टिकैः॥४४॥ आरोपयेद्रथेदेवंमूलमं
त्रेणमंत्रवित्॥ वेदोक्तैरथपौराणैर्गंधधूपादिवासिते॥४५॥ रथेन्निरूढल्लयतिवाजिनःपुरोयत्रयत्रकामयतेपुमा

रथैः॥ अभीष्टां महिमानं प्रगायन्ते मनः पश्चाद्नुपकुंतिरसमयः॥ ४६॥ शंखडिंडिमनिर्घोषैः काहलानां च निःस्वनैः
हस्तदीपैः प्रज्वलितैस्तालकोलाहलैस्तथा॥ ४७॥ दोलाकुत्थेन रमितं प्रेषणीयगुरुः स्मरेत्॥ महतोत्सवभारेण भ्रामयेत्परि
तो रथम्॥ ४८॥ तांवूलानि रथे दद्यात्पुष्पमालाफलानि च॥ रथं वोढुं प्रदद्यात्तु प्रेक्षकेभ्यो ऽवधारितम्॥ ४९॥ यस्य यस्य गृहे
ऽभ्येति प्रेरितो रथिना रथः॥ तस्य तस्य भवेन्नूनं पुण्यं यज्ञाक्षतादिभिः॥ ५०॥ इतरो ऽपि भवेन्नूनः संप्राप्ते रहितां गृ
हे॥ किं पुनर्जगतां भर्ता सर्वलोकमहेश्वरः॥ ५१॥ कदाचिदक्षभंगः स्याद्ध्वजभंगो ऽथवा भवेत्॥ भग्नेन वा पुरामध्ये नह
नेत्रुद्यते यदि॥ ५२॥ ब्राह्मणानां तत्र शान्त्यै होमः कार्यो विजानता॥ तिलैराज्येन पयसा येन संपद्यते शुभम्॥ ५३॥ प्रेर
णीयं प्रेक्षणीयैश्च भ्रामयित्वा रथोत्तमम्॥ स्थापयेन्नगरस्यांते तत्र कुर्यान्महोत्सवम्॥ ५४॥ दोलाद्यैश्च कडोला
भ्रमैर्डमरकैस्तथा॥ विद्याधरीणां चरितैर्मिनरामिः प्रकाश्यते॥ ५५॥ एवं यः कुरुते पार्थ रथोत्सवं सुखप्रदम्
तथैव पूजयेत्पार्थ उपवासपरो नरः॥ ५६॥ सर्वव्याधिविहीनश्च सुखी स्याच्छरदां शतम्॥ यः कारयित्वा सौव
र्णं रौप्यं वा रथमुत्तमम्॥ ५७॥ वर्णकैश्चित्रितं दिव्यं दारुजं वा सुशोभनम्॥ स्वहस्तरचितं पश्चाद्भास्कराय नि
वेदयेत्॥ ५८॥ समस्तलोके सुचिरात्सुखानि च समश्नुते॥ पूर्वोक्तविधिना भानुं भ्रामयित्वा रथे स्थितम्॥ ५९

किंचिदत्र विद्यते ५

स्थापयेत्सर्वभागे तु गोपवाद्यपुरःसरम् ॥ दक्षिणे तु दिशो भागे द्वितीये ऽह्नि नयेद् ध्रुवम् ॥ ६० ॥ तत्रापि जागरं कुर्या-
द्गीतनृत्यमंगलैः ॥ अपराह्णे तृतीये ऽह्नि स्थापयेद् ध्रुवमुत्तमम् ॥ ६१ ॥ प्रेक्षणीयविनोदेन तां रात्रिमतिवाहयेत् ॥ स्था-
पयेदुत्तरस्यां तु चतुर्थे दिवसे ध्रुवम् ॥ ६२ ॥ महायात्रां प्रकुर्वीत तत्राप्यद्भुतचेष्टितम् ॥ पंचमे दिवसे प्राप्ते नगरान्तःस्थि-
तं रविम् ॥ ६३ ॥ पूजयित्वा विधानेन षष्ठे ऽह्नि भवनं नयेत् ॥ रथयात्राप्रसंगेन कथितारथसप्तमी ॥ ६४ ॥ सर्वपाप-
हरा पुण्या किंचिदन्यन्निबोध मे ॥ गौरी पूज्या तृतीयायां चतुर्थ्यां विघ्ननायकम् ॥ ६५ ॥ पंचम्यां पंकजकरां पूजयेद्
सरस्वतीम् ॥ षष्ठ्यां शक्तिधरं स्कन्दं सप्तम्यां तु दिवाकरम् ॥ ६६ ॥ अष्टम्यां सचतुर्दश्यां संपूज्य त्रिशिखेश्वरम् ॥ न-
वम्यां पूजयेच्चंडीं चामुंडां मुंडमालिनीम् ॥ ६७ ॥ दशम्यां मरुतः शान्ताः सर्वे वासपुरस्सराः ॥ एकादश्यां च रूपाणि द्वाद-
श्यां वा समर्चयेत् ॥ ६८ ॥ त्रयोदश्यां त्रिनेत्रो ऽथ वह्निनाशान्तविग्रहम् ॥ साधारणी तु सर्वेषां पौर्णमासी तिथिः स्मृता ॥
६९ ॥ मां दोलके दमनके रथयात्राकृते वहि मुख्यमेणापि कर्तव्या तिथीनां कार्यगौरवात् ॥ ७० ॥ यात्रावासं नि-
काचैयं चित्तस्वास्थ्यकरी परा ॥ ७१ ॥ सम्यक्सुधाधवलिते भवने सुराणां मेनस्तुवन्त्रमणिमौक्तिकदत्तचित्रे ।
तांबूलकंकुमकवारविलासिनीभिर्यात्रोत्सवाय भवती हसमारतेन्द्राः ॥ ७२ ॥ इति श्रीभविष्ये महापुरा

णोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दमनकांदोलकरथयात्रामहोत्सववर्णनं नाम चतुर्विंशाउत्तरशततमोध्या
यः ॥ १२४ ॥ ॥ श्रीकृष्ण उवाच ॥ गौरीविवाहयज्ञाहहरः शाभ्रुपर्तं व्रतम् ॥ उमापतिः पशुपतिर्ध्यानासक्तोवसद्वह ॥ १ ॥
ब्रह्मादिभिः समामंत्र्य विबुधैः पुत्रलब्धये गौर्यामनोभिलाषितपरणाय पुष्पहर्षितैः ॥ २ ॥ प्रहितः सोमरणार्थाय सम
र्पइति मन्मथः ॥ ततो मारः स्मरः कामो पाज्जगाम तमाश्रमम् ॥ ३ ॥ रतिप्रीतिमदोन्मादवसंतश्रीसहायवान् ॥ निषा
नवाहनो दर्पभृंगारैः परिवारितः ॥ ४ ॥ आम्राशोकवनोत्तंसो मालतीकृतशेखरः ॥ वीणामृदंगसंगीतकोकिलाभृंगरुत
कृ ॥ ५ ॥ रत्नश्रीवादसंपृष्टभांडागारिकलेखकः ॥ पानमत्तांगनारूढो हिंदोलाश्चर्यमंत्रिमान् ॥ ६ ॥ दक्षिणानिलगंधाढ्यः
पटाक्षेक्षितगर्ववान् महाराजाधिराजो वा स्मरः प्राप्तो हरांतिकम् ॥ ७ ॥ स पुष्पचापमाकृष्य मदनोन्मादनं शरम् ॥ विक्षे
प त्रिपुरघ्नाय समाधेर्भंगहेतवे ॥ ८ ॥ दृष्ट्वा तं तस्य संकल्पं हृडः क्रोधाज्वलद्रुषा ॥ ललाटवह्निमसृजत्तृतीयनयनाद्धरः
९ ॥ कामो विलोकितस्तेन भस्मीभूतश्च तत्क्षणात् ॥ दग्धं दृष्ट्वा स्मरं शोकाइतिधीनीस्थितेसदा ॥ १० ॥ कारुण्यं विमलं यस्मौ
तेसर्वमन्यदिशांगतम् ॥ ततः शोकार्त्तहृदया गौरी रुद्रमुवाच ह ॥ ११ ॥ भगवन्नस्य दर्पेण तं कामं निर्दग्धवानसि ॥ तेनैतेपरस्य
नायोते कामस्य हृदितः कथम् ॥ १२ ॥ कुरु प्रसादं देवेश रतिप्रीत्यैर्वृषध्वजः ॥ संजीवय स्मरं शंभो मूर्तिमंतं पुनः कुरु ॥ १३

225

तच्छ्रुत्वा तु महादेवो हृष्टः प्रोवाच पार्वतीं॥ उपप्लुतं जगत्सर्वं मन्मथेन स्मारीरिणा॥१४॥ मया दग्धस्य कामस्य पुनरा
गमनं कृतं॥ किंतु ते मानयन्त्वाकां करोमि सफलं प्रिये॥१५॥ अस्मिन्नवसंतसमये शुक्लपक्षत्रयोदशी॥ अस्यां मनोभ
वो देवि भविष्यति शरीरवान्॥१६॥ एतेन व्रतमतेन जगद्दुर्भिक्ष्यतेः विलम्॥ एवं वरमिमं दत्वा मन्मथाय युधि
ष्ठिर॥१७॥ जगाम हिमवच्छृंगं कैलासं पार्वती प्रिय॥ तदेतत्सर्वमाख्यातं स्मरस्य चारितं नृप॥१८॥ पूजाविधानमपरं
कथयामि शृणुष्व तत्॥ अस्यां स्नात्वा त्रयोदश्यामशोकाख्यं नगं लिखेत॥१९॥ सिंदूरजनितैरंगैरतिप्रीतिसमन्वि
तम्॥ कामदेवं वसंतं च वाजिवक्त्रं झषध्वजम्॥२०॥ मसौवर्णो वा महाराज चार्वं विचित्रमथापि वा॥ लीलाविलास
गमनं गर्वितं वाक्यरोगणाम्॥२१॥ गंधर्वगीतवादित्रैरप्सरीयसमाकुलम्॥ नेत्रावर्तिरतिक्रीडप्रीतिविद्या
धरैर्युतम्॥२२॥ मध्याह्ने भोजयेद्दत्वा भक्ष्यैर्धूपैः स्रग्वरैः॥ मंत्रेणानेन कौंतेय नरो नार्या समन्वितः॥२३॥
नमो वामाय कामाय देवदेवाय मूर्तये॥ ब्रह्मविष्णुशिवेन्द्राणां मनःक्षोभकराय वैः॥२४॥ कृत्वैवमर्चयित्वा तु
देवदेवं मनोभवम्॥ ततस्तस्याग्रतो देयामोदकान्यवमोदकाः॥२५॥ नानाप्रकारान्भक्ष्यांश्च कामो मे प्रीय
तामिति॥ ततो विसर्जयेद्विप्रा दत्वा युग्मं सदक्षिणम्॥२६॥ स्वपत्निं पूजयेन्नारीवस्त्रमालाविभूषणैः॥ का

समाप्तोतम् १ पत्रगा १

मोऽयमिति संचिंत्य हृष्टेनांतरात्मना ॥२७॥ मन्मथायतने तस्मिन्पूजमानः सुहृद्गणः ॥ रात्रौ जागरणं कुर्यात्सुखरा
त्रिर्यथा भवेत् ॥२८॥ कर्पूरकुंकुमक्षोदगंधतांबूलसर्जनैः ॥ नानाप्रकारैर्भक्ष्यैश्च कुर्याद्रात्रौ महोत्सवम् ॥२९॥ दीप
प्रज्वालनैर्नृत्यैः प्रेक्षणोः प्रेक्षणोत्सवैः ॥ एवं यः कुरुते पार्थ वर्षे वर्षे महोत्सवम् ॥३०॥ वसंतसमये प्राप्ते हृष्टस्तुष्टो
नृपः पुरे ॥ तस्य संवत्सरं यावद्योको रोगौर्विमुच्यते ॥३१॥ सुभिक्षं क्षेममारोग्यं यदाः श्रीः सौख्यमुत्तमम् ॥ कामव
र्षी च पर्जन्यस्तस्मिन्राष्ट्रे प्रजायते ॥३२॥ तुष्यते तु भगवान्देवो वादग्यार्द्धलोचनः ॥ तथा कामश्च विष्णुश्च वसंतश्च
प्रजापतिः ॥३३॥ चंद्रसूर्यादिकाः सर्वे ग्रहा ऋक्षर्षयस्तथा ॥ सर्वेऽपि तस्य तुष्यंति यक्षगंधर्वदानवाः ॥३४॥ अप्सरा या
तुधानाश्च सुपर्णाः पतगा नगाः ॥ तुष्टाः प्रयच्छंति सुखं तस्य कर्तन संशयः ॥३५॥ चैत्रोत्सवेन सकललोकमनोनिवा
सं कामं वसंतमलयाद्रिमरुत्सहायम् ॥ रत्या सहार्च्य पुरुषः प्रवराज्योपि सौभाग्यरूपसुतसौख्ययुतः सदा स्यात् ॥३६
॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे मदनमहोत्सववर्णनं नाम पंचत्रिंशोऽत्तरश
ततमोऽध्यायः ॥१३५॥ ॥ श्रीयुधिष्ठिर उवाच ॥ भूतमातेति संहृष्टे ग्रामे ग्रामे पुरे पुरे ॥ गायन्नृत्यन्सर्वो लोकः स
र्वतः परिधावति ॥१॥ उन्मत्तवत्स्खलपति क्षितौ पतति मत्तवत् ॥ कृष्ण वदस्वावति पुराणस्मन्नवत्कर्ष्यते बहिः ॥२॥ सुखो

226

गभंगान्क्रुरुते लोके ज्ञातगृहीतवत ॥ भतवद्भस्मगात्रं नु कर्द्दमानवगाहते ॥३॥ किमेव शास्त्रनिर्दिष्टो मार्गः किमु
न लौकिकः ॥ शुहते मे मतः कृऽमेत्वं तु वक्तुमिहार्हसि ॥४॥ श्रीकृष्ण उवाच ॥ शृणु पार्थ प्रवक्ष्यामि यन्ते किं विस्मितो
गतम् ॥ आस्तिकः श्रद्दधानश्च भवतीनिमतिर्मम ॥५॥ पार्वत्या सहितः पार्थ मन्दरे चारुकन्दरे ॥ क्रीडन्नास्ते मृदाप
केर्दिव्यक्रीडनकैर्हरः ॥६॥ हंसोन्नतगतिं चारुकुम्भभ्राजिकुचं वयाम् ॥ सिंजत्सडश्रान्ताहव्यां दृष्ट्वा गौरीं जगद्गुरुः ७
दग्धकामोऽपि च हरः संदीप्तमदनोऽभवत ॥ निःस्रुतां कामयामास महार्द्दायनैशिवः ॥८॥ रतस्थयोस्तयो र्जातं दि
व्यं वर्षशतं यदा ॥ तदा देवी समुत्थाय निरोधान्निर्गता बहिः ॥९॥ स्वेदोदकात्समुत्पन्नौ नारी निर्दारितोदरा ॥ क्ला
करालवदना पिंगाक्षा मुक्तमूर्द्धजा ॥१०॥ कपालमालाभरणा बद्धपिंडोर्ध्वपिंडिका ॥ खड्गांगकंकालधरा मुण्डाङ्कित
करा शिवा ॥११॥ व्याघ्रचर्माम्बरधरा रणत्किंकिणिमेखला ॥ डमड्डुमड्डुमरुकाकेत्कारापूरितांबरा ॥१२॥ तस्याः पा
र्श्वानुजाश्चान्या गीतवाद्यलयानुगा ॥ उत्तालतालसवलान्त्वं ति वहसंति च ॥१३॥ कपालखड्गांगधरा गजचर्माव
गुंठिता ॥ तथैव शंकराज्ज्ञातस्तद्रूपाभलोः पुमान ॥१४॥ अनुगम्यमानो बहुभिर्भूतैरतिभयंकरैः ॥ सिंहशार्दूलवदनै
रदनोग्निशिखितांबरैः ॥१५॥ स्फीभूतैः समतौ नैव नौ भवानीभवोद्भवौ ॥ दृष्ट्वा हृष्टमना देवः प्राह देवीं सुविस्मिताम् ॥

१६ ॥ कल्माशिपचपचश्चैतौ मत्वदंगासमुद्भवौ ॥ वीभत्साकुतभंगारवराणुषविधारिणौ ॥ १७ ॥ भाद्रभांडोपयथादे
वितदेतौव मतौमम ॥ ननार्घोरं नरं किंचित्ताहृषणात्प्रतिमासयेत ॥ १८ ॥ भाद्रभांडाभृतमातानथैद्योदकसेविका·
संज्ञावयंतयोः कृत्वा ततः प्रादाद्वरं हरः ॥ १९ ॥ मृत्स्याहीयगतांचैतांजरत्तकृतलेस्थिताम् सेवयिष्यंतिये भक्त्या
जलसंपूर्णकुंडकैः ॥ २० ॥ चंदनेन समालभ्य पुष्पधूपैस्तथार्चिताम् ॥ भोजयेत्स्त्रिश्चयाचैव कृशरापूपपायसैः
२१ ॥ य एवं कुरुते देवि भक्तिभावेन भावितः ॥ सपुत्रपशुवृद्धिंच नारी गारोग्यमाप्नुयात ॥ २२ ॥ नस्याकिल्मोत्सहेत
स्पनपिशाचानराक्षसाः ॥ पीडां कुर्वंति शिशवो यांति वृद्धिं निरामयाः ॥ २३ ॥ ॥ युधिष्ठिर उवाच ॥ कदापूजा प्रक
र्तव्या भक्तमातृः श्रुत्वायैर्विधिः ॥ एतद्धेतत्सर्वथाप्रयत्नेनवक्तुमर्हसि ॥ २४ ॥ श्रीकृष्ण उवाच ॥ सर्वत्रैषा भगवती वा
लानां हितकारिणी ॥ नामभेदैः क्रियाभेदैः कालभेदैश्च पूज्यते ॥ २५ ॥ प्रतिपत्प्रभृति ज्येष्ठे यावत्संचदशी तिथिः
तावत्पूजा प्रकर्तव्या पुत्रलोभे क्षणायकैः ॥ २६ ॥ विकर्मफलनिर्देशः पांडवानां विडंबनम् ॥ पुत्रक्षपं तेतस्य परैर्नरै
रकृतवेष्टितैः ॥ २७ ॥ विप्रास्य धनलोभेन संध्यायां निहतः पथि ॥ आरोहणांच भूलाग्रे न पश्यं तं हि पश्यति·
२८ दृष्ट्वो मरुद्भिः संहृष्टः परमोगमवमर्थकः ॥ छित्वा स्वहस्तैर्यदृत्तो विमनाभृत्वो मोरकः ॥ २९ ॥ श्रीगांशुस्मेरापत्रेण

वालामालानुमोदिता ॥ शुष्कभुग्नासमारूढो मृत्येहं कृत्वा वपश्चिमे ॥ ३० ॥ हे जनाः किं न पश्यध्वं स्वामिद्रोहकरं
परम् ॥ करपत्रैर्विदार्यन्तमुच्छलच्छोणितच्छटम् ॥ ३१ ॥ चरैः किलासैः संप्राप्तः सर्वोद्वेगकरः परम् ॥ दंडपाशाभि
हतो नीयते दंडपाशिके ॥ ३२ ॥ प्रेक्षकैर्वेष्टितः स्तेनो रटत्येष विमर्दितः ॥ संयमस्तनयितेयं नमूर्खैः कौर्याग्विलेखणः
३३ ॥ सितवेश्यांसितस्तनश्रृंसितांवरधरं द्विजम् ॥ घटचेष्टावधेटामिर्हस्यमानं न पश्यत ॥ ३४ ॥ गृहान्निष्क्राम्यतां रं
गकृद्धो भर्त्ताप्यसौ स्त्रिया ॥ स्वस्याभ्रसौनकृत्नेमूढो भरणे योषणाम् ॥ ३५ ॥ भैरवाभरणो नालाव्यालयज्ञोपवीति
नः ॥ पुत्रत्वात्ताडवपदान्यस्यध्वं ध्यातदीपकान ॥ ३६ ॥ निर्वेदकोऽस्य हृदये न किंचित्पितिष्ठति ॥ गृहीतं पदनेनेदं वा
लेनापि महाव्रतम् ॥ ३७ ॥ रक्तचक्षुः कृष्णांगं शावरं किं न पश्यत ॥ नरकोटरां नारंगन्नां भित्त्वा वक्त्रकरा वकान ॥ ३८
वकृमिः । कोटकीकृत्य शरीरेयैः शाकलीकृतम् ॥ विमुक्तचक्राझंकारस्पृष्टहारं निरीक्षित ॥ ३९ ॥ इमांकुत्पार्दवदनो गृही
तांसिंदुरार्विनाम ॥ विमुक्तकेशां नग्नां तां पश्यध्वं योगिनीमिव ॥ ४० ॥ गंभीरतूर्यध्वनिनाप्रनृत्तां हृतनांऽवाम ॥
स्वं प्रेक्षणकं कृत्वा नये दृष्टस्तले च नाम ॥ ४१ ॥ एवं कृते न दारिद्र्यं न च दुःखं भवेत्त्वलाम ॥ ४२ ॥ ॥ इति श्रीभविष्ये
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे भूतमातृत्सववर्णनं नाम षट्त्रिंशदुत्तरशततमोऽध्यायः ॥ १३६

श्रीकृष्णउवाच॥ अथातःसंप्रवक्ष्यामिबलिरक्षाविधिंनृप॥ नंभत्विकाग्रमनसासमासाद्दितंमया॥ १॥ पुरादेवासुरे
युद्धेदानवाःसुरनिर्जिताः॥ शक्रंबलिंपुरःकृत्वायत्रशुक्रउवाचतम्॥ २॥ शुक्रउवाच॥ नविषादस्त्वयाकार्यःकार्याणांगति
रीदृशी॥ दैवाद्भवंतिभूतानांकालेजयपराजयाः॥ ३॥ संधानंसहशक्रेणक्रितातामयपनद्यपम्॥ अजेयःसर्वशत्रूणां
कृतःशाच्याशचीपतिः॥ ४॥ रक्षाबंधप्रभावेनदानवेन्द्रोजितोमहान॥ वर्षमेकंप्रतीक्षस्वततःश्रेयोभविष्यति॥
५॥ भार्गवेणोवकुकालेनदानवाविगतज्वराः॥ तस्थुःकालंप्रतीक्षन्तोयथोक्तंगुरुणातथा॥ ६॥ एषप्रभावोरक्षायां
कथितस्तेयुधिष्ठिरः जयदःसुखदश्चैवपुत्रारोग्यधनप्रदं॥ ७॥ युधिष्ठिरउवाच॥ क्रियतेकेनविधिनारक्षाबंधः
सुरोत्तमः॥ कस्यांतिथौकदादेवएतन्मेवक्तुमर्हसि॥ ८॥ यथायथाहिभगवान्विचित्राणिप्रभाषते॥ तथातथा
नमेतृप्तिर्बहुर्थाःश्रुण्वतःकथा॥ ९॥ श्रीकृष्णउवाच॥ घनागतेऽम्बरेपार्थशाद्वलेधरणीतले॥ संप्राप्तेश्राव
णेचैवपौर्णमास्यांदिनोदये॥ १०॥ स्नानंकुर्वीतमश्रुमानितिस्मृतिविधानतः॥ ततोदेवान्पितॄंश्चैवतर्पयेत्प
रमांभसा ११ उपाकर्मादिकेप्रोक्ताऋषिणांचैवतर्पणम्॥ कुर्युश्चब्राह्मणाःश्राद्धंदेवमुद्दिश्यशक्तितः॥ १२॥
शूद्राणांमंत्ररहितंस्नानंदानंचशस्यते॥ ततोपराह्नसमयेरक्षापोटलिकाःशुभाः॥ १३॥ कारयेत्ताक्षतैःशस्तैः

228

सिद्धार्थैहेमभूषिताः ।। वस्त्रैर्विचित्रैःकार्पासैःक्षौमैर्वामलवर्जितैः ।। १४ ।। विचित्रतरैर्ग्रथिताःस्थापयेद्भाजनोपरि·
१५ ।। कार्यागृहस्यरक्षागोमयपरिलितैःस्रुत्नकुंडकैः ।। दूर्वावर्णाकलाहितैःसकलदुष्कृतोपशांतये ।। १६ ।। उपलिप्तगृहमध्येच
तुष्कोपरिन्यसेच्छुभंपीठम् ।। तत्रोपविशेद्राजासामात्यःसपुरोहितःससुहृत् ।। १७ ।। वेश्याजनसहितोमंगलशब्दैःसु
हसितैश्चहृष्टैः ।। रक्षाबंधःकार्यःशांतिध्वनिनानरेन्द्रस्य ।। १८ ।। देवद्विजातिशस्तास्तुस्त्रीरर्घ्यैःसमर्चयेत्तुप्रथमम् ।। तद
नुपुरोधानृपतिंरक्षांबध्नीतमंत्रेण ।। १९ ।। येनबद्धोबलीराजादानवेन्द्रोमहाबलः ।। तेनत्वामभिबध्नामिरक्षेमाचलमाच
ल ।। २० ।। ब्राह्मणैःक्षत्रियैर्वैश्यैःशूद्रैश्चान्यैश्चमानवैः ।। कर्तव्योरक्षिकाबंधोद्विजान्संपूज्यभक्तितः ।। २१ ।। अनेनविधि
नायस्तुरक्षिकाबंधमाचरेत् ।। ससर्वदोषरहितःसुखीसंवत्सरंभवेत् २२ ।। यःश्रावणेमवतिशीतजलेसुरेन्द्ररक्षा
विधानविधिमाचरतेमनुष्यः ।। आस्तेसुखेनपरमेणसवर्षमेकंपुत्रप्रपौत्रसहितःससुहृज्जनश्च ।। २३ ।। ।। इतिश्री
भविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेश्रावणपूर्णिमारक्षाबंधनविधिवर्णनंनामसप्तविंशाद्युत्त
रशततमोऽध्यायः ।। १२७ ।। ।। श्रीकृष्णउवाच ।। पुण्यामहानवम्याख्यातिथीनांप्रवरातिथिः ।। साद्यपूज्यासुरैःसर्वैःप्रजा
पालैर्विशेषतः ।। १ ।। भवानींस्थापयेत्पार्थसंवत्सरसुखायवै ।। भूतप्रेतपिशाचानांशीमार्थेचोत्सवायवा ।। २ ।।

युधिष्ठिर उवाच ॥ कस्मात्कालात्प्रवृत्तेयं नवमीमहत्फलद्युक ॥ किमादौ तत्फलोस्ति भगवन्नवमीविधिः ॥ ३ ॥ यशोदागर्भ
संभूतेस्तत्यात्राप्रवर्त्तते ॥ उताहो पूर्वमेवासीत्कृतत्रेतायुगादिषु ॥ ४ ॥ यदस्यां प्राणिनः केचिन्म्र्यंते घ्यानयंतिव ॥ हतानां प्रा
णिनां तेषां का गतिः पारलौकिकी ॥ ५ ॥ स्वयं घ्नतां घातयतामनुमोदयतां तथा ॥ एतन्मे संशयं पूर्वं वक्तुमर्हसि केशवः ॥
६ ॥ श्रीकृष्ण उवाच ॥ पार्थ या परमा शक्तिरनंता लोकविश्रुता ॥ आद्या सर्वगता शुद्धा भावगम्या मनोहरा ॥ ७ ॥ आद्या लक्ष्मी
कला काली द्वितीया सर्वमंगला, माया कात्यायनी दुर्गा चामुंडा शंकरप्रिया ॥ ८ ॥ ध्यायंति यां योगरतां सा देवी परमेश्वरी ॥
रूपभेदैर्नामभेदैर्भवानी पूज्यते शिवा ॥ ९ ॥ अष्टम्यां तु नवम्यां तु देवदानवराक्षसैः ॥ गंधर्वैरुरगैर्यक्षैः पूज्यते किन्नरैर्नरैः ॥
१० ॥ अन्येश्च पितृगोष्ठादौ रक्षैः पूर्वं प्रदर्शिता ॥ पूज्यते यं पुरा देवी तेभ्यः पूर्वतरैः जनैः ॥ ११ ॥ आश्वयुक्शुक्लपक्षे च याष्ट
मी मूलसंयुता ॥ सा महानवमी नाम त्रैलोक्येऽपि सुदुर्लभा ॥ १२ ॥ कन्यागते सवितरि शुक्लपक्षेऽष्टमी तु या ॥ मूलनक्षत्र
संयुक्ता सा महानवमी स्मृता ॥ १३ ॥ अष्टम्यां च नवम्यां च जगन्मातरमम्बिकाम ॥ पूजयित्वाऽऽश्विने मासि विशोको जा
यति द्विजः ॥ १४ ॥ संतर्जयंते हुंकारैः खड्गादिभिरहर्निशम् ॥ नवम्यां पूजिता देवी ददाति नवमं फलम् ॥ १५ ॥ सा पुण्या
सा पवित्रा च सा धर्मसुखदायिनी ॥ तस्मात्सदा पूजनीया चामुंडा मुंडमालिनी ॥ १६ ॥ तस्यां यज्ञप्रयुज्यंते प्राणिनो म

229

हिषादयः॥ सर्वे ते स्वर्गतिं यान्ति घ्नतां पापं न विद्यते॥१७॥ न तथा बलिदानेन पुष्पधूपविलेपनैः॥ यथा संतुष्यते लोके म
हिषैर्विंध्यवासिनी॥१८॥ उद्दिश्य दुर्गां हन्यन्ते विधानाये ऽजंतव॥ स्वर्गं ते यान्ति कौन्तेय घातयंतो ऽपि भक्तितः॥१९॥ भ
वानीं पूंगतो पुगणा येषां यान्ता युधिष्ठिर। तेषां स्वर्गे ध्रुवं वासो वरास्ते ऽप्सरसोंपि या॥ २०॥ मन्वन्तरेषु सर्वेषु कल्पेषु कुरुनं
दन॥ तेषु सर्वेषु चैवासीन्नवमी पंपुरार्चिता॥२१॥ पूजिह्यानादिनिधना वर्षे वर्षे युधिष्ठिर॥ मयो मयो ऽवतारैश्च भवानी
पूज्यते नृपैः॥२२॥ भगवती यां भविसमरानित्स्यं दैत्या निवार्हती॥ स्वर्गपातालमर्त्येषु कतो निखिलानि पालनम्॥२३॥ पुत्रश्चैषाम
हादेवी यशोदागर्भसंभवा॥ कंसासुरस्योत्तमांगे पादं दत्वा गता पुषः॥२४॥ ततः प्रभृति लोके पूज्यतो नंददायिनीम। विं
ध्याचले स्थापयित्वा पुनः पूजा प्रवर्तिता॥२५॥ पूर्वं पु हृतो ऽपि पुत्रं मर्भगिन्या माहिमा हृतः॥ भविसर्वोपकाराय सर्वोपद्रव
शांतये॥२६॥ एवं विंध्योपवासिन्या नवरात्रोपवासिनः॥ एकरात्रेण नक्तेन स्वशक्त्या ऽयाचितेन वा॥२७॥ पूजनैर्यजनै
र्देवाः स्थाने स्थाने पुरे पुरे॥ गृहे गृहे भक्तिपरैर्ग्रामे ग्रामे वने वने॥२८॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः॥ वैश्यैः
शूद्रैर्भक्तिचित्रैर्म्लेच्छैरन्यैश्च मानवैः॥२९॥ स्त्रीभिश्च कुरुशार्दूल तद्विधानमिदं शृणु॥ जयाभिलाषी नृपतिः प्रतिपत्प्र
भृतिक्रमात॥३०॥ लोहाभिसारिकं कर्म कारयेद्यावदष्टमी॥ प्रागुदक्प्रवणो देशे पताकाभिरलंकृतम्॥३१॥ मंडपं कार

येदिव्यं तव सप्तकरं वरम्॥ आग्नेय्यां कारयेत्कुण्डं हस्तमात्रं सुशोभनम्॥ ३२ ॥ मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभया।
राजचिह्नानि सर्वाणि यस्या स्थाप्य स्थानानि यानि च ॥ ३३ ॥ आनीय मंडपे तानि सर्वाण्येवाधिवासयेत्॥ ततस्तु ब्राह्मणः स्नातः॥
शुक्लाम्बरधरः शुचिः॥ ३४ ॥ ॐकारपूर्वकैर्मंत्रैस्तल्लिंगैर्जुहुयाद्घृतम्॥ लोहनामाभवत्पूर्वं दानवस्तु महाबलः॥ ३५ ॥
स देवैः समरे कृत्तैर्बहुधा खाण्डकलीकृतः॥ तदंगसम्भवं लोहं यत्तत्सर्वं दृश्यते क्षितौ॥ ३६ ॥ शस्त्रास्त्रमंत्रैर्होतव्यं पायसं घृतसं
युतम्॥ हुतशेषं तु रंगाणां गन्धानामपहारयेत्॥ ३७ ॥ लोहाभिहारकं कर्म तेनैतद्विधिभिः स्मृतम्॥ बद्धप्रतिसरं सर्वं गजा
श्वसमलंकृतम्॥ ३८ ॥ भ्रामयेन्नगरे नित्यं नन्दिघोषपुरःसरम्॥ प्रत्यहं नृपतिः स्नातास्तं पूज्य तितद्देवताः॥ ३९ ॥ पूजये
द्राजचिह्नानि फलमाल्यानुलेपनैः॥ हुतशेषं प्रदातव्यं सम्भोवना यानिके द्विजे॥ ४० ॥ तस्याभिहारणाद्राज्ञो विजयः समुदा
हृतम्॥ पूजामन्त्रांस्तु वक्ष्यामि पुराणोक्तानहं तव॥ ४१ ॥ यैः पूजिताः प्रयच्छन्ति कीर्तिमायुर्यशोबलम्॥ यथावृन्दं भद्र
दयति शिवा येमां वसुंधराम्॥ ४२ ॥ तथा च्छत्रस्य राज्ञानं विजयारोग्य वृद्धये॥ ॥ इति छत्रमंत्रः॥ गंधर्वकुलजात
त्वं मा भूयाः कुलदूषकः॥ ४३ ॥ ब्रह्मणः सत्यवाक्येन सोमस्य वरुणस्य च॥ प्रभावाच्च हुताशस्य वर्द्धस्व त्वं तुरंगम।
४४ ॥ तेजसा चैव सूर्यस्य मुनीनां तपसा यथा॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च॥ ४५ ॥ स्मर त्वं राजपुत्रोऽसि कौ

230

ग्रिंकृतिसू २

ण्डुभंचमरितंस्मर ॥ यांगतिंब्रह्महागच्छेत्स्वर्णहामातृहातथा ॥ ४५ ॥ भ्रस्यर्पेनतवादेवअत्रियस्यपराङ्मुखः
सर्पाश्चंडमसौवायुःपावकश्चनयत्रवै ॥ ४७ ॥ ब्रजेच्चतांगतिंक्षिप्रंतच्चपापंभवेत्किल ॥ विकृतिंयदिगच्छेत्त्वंयुद्धे
धनितुरंगम ॥ ४८ ॥ एवंत्विजित्वसमरेसहभर्त्राभिरतोभव ॥ अश्वमंत्रः ॥ ताक्ष्यकेतोमहावीर्यसुपर्णस्त्वमुपालिये
ते ॥ ४९ ॥ पतत्रिराड्वैनतेयस्तथानारायणध्वजः ॥ काश्यपेयोऽमृताहर्तानागारिर्विष्णुवाहन ॥ ५० ॥ अप्रमेयोऽ
दुर्धर्षोदेवशत्रुनिषूदनः ॥ गरुत्मान्मारुतगतिस्त्वयिसन्निहितःस्थितः ॥ ५१ ॥ शस्त्रवर्मायुधान्योधान्रक्षास्मांश्चारि
सूदन ॥ ध्वजमंत्रः ॥ कुमुदैरावणौपद्मःपुष्पदन्तोऽथवामनः ॥ ५२ ॥ सुप्रतीकोऽञ्जनोनीलएतेऽष्टौदेवयोनयः ॥
एतेषांपुत्रपौत्राश्चबलान्यष्टौसमाश्रिताः ॥ ५३ ॥ भद्रोमन्दोमृगश्चैवगजःसंकीर्णएवच ॥ वनेवनेप्रसूतास्तेकरियो
निमहागजाः ॥ ५४ ॥ पान्तुत्वांवसवोरुद्राआदित्याःसमरुद्गणाः ॥ भर्तारंरक्षनागेन्द्रसमयंप्रतिपालय ॥ ५५ ॥
अवाप्नुहिजयंयुद्धेगमनेस्वस्तिनोव्रज ॥ श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनिलात् ॥ ५६ ॥ स्थैर्यंमेरोर्जयंरु
द्राद्यशोदेवात्पुरन्दरात् ॥ युद्धेरक्षन्तुनागास्त्वांदिशाश्चसहदैवतैः ॥ ५७ ॥ अश्विनौसहगन्धर्वैःपान्तुत्वांसर्वतःसदा
हस्तिमंत्रः ॥ ॥ ऊतभृगवसवोरुद्रावायुःसोमोमहर्षयः ॥ ५८ ॥ नागकिन्नरगन्धर्वयक्षभूतगणाग्रहाः ॥ प्रम

७६३

॥ भवि ॥
॥ २३२ ॥

याभ्यस्सहादित्यैर्भूतैर्गोमातृभिः सह ॥ ५९ ॥ शक्रसेनापतिः स्कन्दो वरुणाभ्याग्निना त्वयि ॥ प्रदहन्तु रिपून्स
र्वान्राजा विजयमृच्छतु ॥ ६० ॥ यानि प्रयुक्तान्यरिभिर्भूषणानि समन्ततः ॥ स्नतघः पद्योत्रुतां हतानि तव तेजसा·
ह ॥ कालनेमिवधे यद्वद्यद्वत्त्रिपुरघातने ॥ हिरण्यकशिपोर्युद्धे देवासुरे तथा ॥ ६२ ॥ शोभितासि तथैवाद्य शोभसमाना
नृपतेः ॥ नीलांश्वेतामिमां दृष्ट्वा नश्यन्त्वघनपारयः ॥ ६३ ॥ आधिभिर्विविधैर्घोरैः शस्त्रैश्च युधि निर्जिता ॥ सद्यः
संस्था भवन्ति स्मत्वया तेनापमार्जिता ॥ ६४ ॥ पूतनारेवतीनाम्ना कालरात्रीति या स्मृता ॥ दहन्त्वाशु रिपून्सर्वान्पता
केत्वामुपागताः ॥ ६५ ॥ पताकामन्त्रः ॥ असिर्भ्यारिपुहा खड्गस्तीक्ष्णकर्मा दुरासद ॥ श्रीगर्भो विजयश्चैव धर्मधारस्त
थैव च ॥ ६६ ॥ इत्यष्टौ तव नामानि स्वयमुक्तानि वेधसा ॥ नक्षत्रं कृत्तिका तुभ्यं गुरुर्देवो महेश्वरः ॥ ६७ ॥ हिरण्यं च श
रीरं ते धाता देवो जनार्दनः ॥ पिता पितामहो देव त्वं मां पालय सर्वदा ॥ ६८ ॥ खड्गमन्त्रः ॥ शर्मप्रदस्त्वं समरे वर्मस
र्वायसोह्यसि ॥ रक्ष मां रक्षणीयोऽहं तव वर्मन्नमोऽस्तु ते ॥ ६९ ॥ वर्ममन्त्रः ॥ दुन्दुभे त्वं सपत्नानां घोषाद्धृदयकम्पन·
भव भूमिपसैन्यानां तथा विजयवर्द्धनः ॥ ७० ॥ यथा जीमूतघोषेण हृष्यन्ति वरवारणाः ॥ तथास्तु तव शब्देन ह
र्षोऽस्माकं मुदावह ॥ ७१ ॥ यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते ॥ तथा च तव शब्देन त्रस्यन्त्वस्माद्विषो र

॥ रामः ॥
॥ २३२ ॥

231 missing in manu

232

णो॥७२॥ दुंदुभिमंत्रः॥ सर्वाप्रथमहामात्रसर्वदेवादिसंदत्त॥ छायमां सर्वदा रक्षसा यत्नं सायसनमेः॥७३॥ छायमंत्र॥ प्र
तापत्वं शंखत्र ख्यातां मंगलानां च मंगलम्॥ विघ्ननाशिधृतो नित्यं मनःशांतिप्रदो भव॥७४॥ शंखमंत्र॥ शशांककरसं
काशाहिमडिंडीरपांडुरं॥ प्रोत्सारयामुद्धरितं चामरं नरवःश्रमः॥७५॥ चामरमंत्रः॥ सर्वाधुधानां प्रथमानिर्मितानां सिपिना
क्रिता॥ ऋता प्रधाव्हिनिष्कृष्याकृत्याम्गृहि परिग्रहम्॥७६॥ चंडिकायाः प्रदत्तासि सर्वदुष्टनिवारिणि॥ तथा विंशा
रिता चासि देवानां वृत्तिपादिता॥७७॥ सर्वसत्वांगभूतासि सर्वाशुभनिवारिणि॥ छुरिके रक्ष मां नित्यं शांतिंयच्छ
नमोस्तुते॥७८॥ छुरिकामंत्रः॥ प्रोत्सारणाय दुष्टानां साधुसंग्रहणाय च॥ ब्रह्मणा निर्मित श्चासि व्यवहारप्रसिद्धये
॥७९॥ यष्टोदेहि सुखं देहि जयदो भव भूपते॥ नाउयाभुरिपून्सर्वान्हेमदंड नमोस्तुते॥८०॥ कनकदंडमंत्र॥ विजयो
जयदो जेतारिपुघातीप्रियंकरः॥ दुःखहा धर्मदः सर्वारिष्टविनाशनः॥८१॥ एतेऽष्टौ सन्निधौ यस्मात्तव सिंहासन महा
बला॥ तेन सिंहासने नित्वं विप्रैर्वेदप्रगायिसे॥८२॥ त्वयि स्थितः शिवः साक्षात्त्वयि शक्रः सुरेश्वरः॥ त्वयि स्थितो
हरिर्देवस्त्वदर्थं तप्यते नृप॥८३॥ नयस्ते सर्वतोभद्र भद्रदो भव भूपते॥ त्रैलोक्यजय सर्वस्व सिंहासन नमोस्तुते
॥८४॥ सिंहासनमंत्रः॥ लोहाभिहारिकं कर्म कृत्वेदं मंत्रपूर्वकम्॥ फलनैवेद्यकुसुमैर्धूपदीपाविलेपनैः॥८५॥ अथ

शांत

द्विजेंद्रेण शिष्यया ६

म्यां धावनं कृत्वा पूर्वाह्ने स्नानमाचरेत् ॥ १६ ॥ गद्यम् ॥ दुर्गां कांचनम् तिरौप्यां वा पित्तलीं वार्क्षीं चैत्रीं ताम्रीं वाथिम
वत् ॥ कृत्वाथह विविचित्रतोरणा विमलतां शोभने स्थाने पुरतो विमलहृष्टां विचित्रगृहमध्यगां स्नातां कुंकुमचंदनगंधै
श्चतुःसमेत्थी रपदेः भर्चितगात्रां देवीं कुसुमैरभ्यर्चितां वकुभिः पुष्पमालाकीर्तितैर्द्धिजननैर्ज्जनितपरितोषे दिवा
त्वितो नरेंद्रः स्वयं पुष्पच्छन्सरोहितैः सार्द्धं विल्वपत्रैरणार्च्चनेन समर्चणानेन भगवत्यै ॥ गद्यसंपूर्णम् ॥ जयंती मंगला
काली भद्रकाली कपालिनी ॥ दुर्गा शिवा क्षमा धात्री स्वाहा स्वधा नमोस्तुते ॥ १७ ॥ अमृतोद्भवः श्रीवृक्षो महादेवीप्रियः
सदा ॥ विल्वपत्रं प्रयच्छामि पवित्रं ते सुरेश्वरी ॥ १८ ॥ दुर्गां संपूजनीयावनंदिनोडणापुष्पया ॥ मात्रामीष्टासुरेशात्या
नुथारूढ प्रणाम्य नः ॥ १९ ॥ ततः खड्गं नमस्कृत्य शस्त्राणां मानमर्हनम् ॥ इच्छत विजयं राज्यं भुमि सर्वात्मनो नृप ॥ २०
पुनः पुनः प्रणाम्याथ ध्यायेच्च हृदये शिवाम् ॥ महिषघ्नीं चतुर्भुजां कुमारीं सिंहवाहिनीम् ॥ २१ ॥ दानवांस्तर्जयंतीं च रक्षसो
स्नतकरांप्रभाम् ॥ संदाक्षसन्नगधरां दुर्गारणारंभे व्यवस्थिताम् ॥ २२ ॥ ततो जयजयाकारैः स्तवं कुर्यादिमं ततः ॥ सर्वमंगल
मांगल्ये शिवे सर्वार्थसाधिके ॥ २३ ॥ शरण्ये त्र्यंबके गौरी नारायणि नमोस्तुते ॥ कुंकुमेन समालब्धे चंदनेन विलेपि
ते ॥ २४ ॥ विल्वपत्रकृतामाले दुर्गेऽहं शरणं गतः ॥ कृत्वैवमर्च्चां कौरवश्रेष्ठ्यां जागरं निशि ॥ २५ ॥ नृत्तगीतैश्च

प्रणम्यादौ चिंतयेत् शिवां महिषमर्दिनीम् कुमारीतो चयंतीवदेत्त्व बन्धुयत्नांप्रभाम ४
उमाम् ३

कारयेन्नु महोत्सवम् ॥ एवं हृष्टैर्निशां नीत्वा प्रभाते चारुणोदये ॥ ९६ ॥ पातयेन्नादिघान्मेषानग्रतो नतकन्ध
रान् ॥ शतं वापि शतार्धं वा तदर्धं वा यथेच्छया ॥ ९७ ॥ सुरासवभृतैः कुंभैस्तर्पयेत्परमेश्वरीम् ॥ कापालिकेभ्य
स्तद्देयं दासीदासजनैस्तथा ॥ ९८ ॥ विभज्य सर्वं कौन्तेय सुहृत्संबंधिबंधुषु ॥ ततोपराह्नसमये नवम्यां स्यंदनेस्थि
ताम् ॥ ९९ ॥ भवानीं भ्रामयेद्राष्ट्रे स्वयं राजा स्वसैन्यवान् ॥ सहस्रैः पटहैर्वादिरथशंखैः सुशिक्षितैः ॥ १०० ॥ शान्तैः
शान्तैरधिकया दीप्त्या प्रज्वलदीपकैः ॥ आकृष्यखड्गैर्वीरैश्च धानुष्कैर्गजैस्तथा ॥ १ ॥ नदद्भिः खजपटहैर्नृत्यद्भि
र्नीरयोवतैः ॥ अलंकृताभिर्नारीभिर्वाहकैः सुशोभितैः ॥ २ ॥ भक्तेभ्यस्तु बलिं दद्यान्नं त्रैराणेन सामिषम् ॥
सरक्तं सजलं सान्नं गंधपुष्पाक्षतैर्युतम् ॥ ३ ॥ त्रीखिकाणां त्रिशूलेन दिग्विदिक्षु क्षिपेद्बलिम् ॥ बलिं गृह्णन्त्विमं
देवा आदित्या वसवस्तथा ॥ ४ ॥ मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥ असुरा यातुधानाश्च मातरश्च
पिशाचकाः ॥ ५ ॥ शाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥ जृंभकाः सिद्धगंधर्वावाल्पा विद्याधरा नराः
६ ॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥ जगतां शांतिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ ७ ॥ मा विघ्नं मम
पापं तेषामस्यं तु परिपंथिनः ॥ सौम्या भवंतु तृप्ताश्च भूताः प्रेताः सुखावहाः ॥ ८ ॥ इत्येवं भ्रामयेद्राष्ट्रे दुर्गां देवीं

बालाविद्याधरा

नव: ३

॥ भवि ॥
॥ २३४ ॥

रप्येष्विनाम्॥ नवम्यानेन वा पार्थ ततो ऽविघ्नं समापयेत्॥९॥ तथोत्पन्नेषु विघ्नेषु भूतशांतिं समाचरेत्॥ येन
विघ्ना न जायंते यात्रा संपूर्णतां व्रजेत्॥१०॥ एवं ये कुर्वते यात्रां राजानो ऽपि मानवा॥ महानवम्यां नंदायां पुत्रका
हृष्टमानसा॥११॥ ते सर्वे पापनिर्मुक्ता यांति भागवतीपुरीम्॥ न तेषां शत्रवो नाग्निर्न चौरा न विनायकाः॥१२॥
विघ्नं कुर्वंति राजेंद्र येषां तुष्टा महेश्वरी॥ नीरुजः सुखिनो भोगभोक्तारो भयवर्जिताः॥१३॥ भवंति भक्ताः पुरुषा भग
वत्याः किमुच्यते॥ इत्येवं ते समाख्यातो दुर्गादेव्या महोत्सवः॥१४॥ पठतां शृण्वतां चैव सर्वाशुभविनाशनः॥१५॥ भू
लाग्रभिन्नमहिषासुरपृष्ठविष्टामृतगात्रखजरुचिरांगदबाहुदंडाम्॥ अभ्यर्च्य पंचवदनानुगतां नवम्यां दुर्गासु दुर्ग
गहनानि तरंति मर्त्याः॥१६॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महानवमीव्रतव
र्णनं नामाष्टविंशदुत्तरशततमो ऽध्यायः॥२८॥ ॥ श्रीकृष्ण उवाच॥ पुरा देवासुरे युद्धे ब्रह्माद्यैरमरैर्नृप॥ विज
यार्थं महेंद्रस्य ध्वजयष्टिः प्रतिष्ठिता॥१॥ मेरोरुपरि संस्थाप्य सिद्धविद्याधरोरगैः॥ सा देवी हर्षिता नित्यं भूषणै
र्भूषिता स्वकैः॥२॥ छत्रघंटापिटकैः किंकिणीवरबुद्बुदैः॥ तां दृष्ट्वा दानवा नष्टा भयादेव रणे हताः॥३॥ गताः
रसातलं दैत्या देवाश्चापि दिवि स्थिताः॥ ततः प्रभृति तां दिव्यां मिंद्रयष्टिं यजंति ते॥४॥ देवाः सर्वे गणाः सर्वे हृष्टा

234
तत्तः ४
॥ रामः ॥
॥ २३४ ॥

शृणुष्व युधिष्ठिर ॥ अतः स्वर्गगतो राजा भक्तिपुण्यवशात्सकृत् ॥ ५ ॥ इह लोके महाभागो वसुदेवैः सुपूजितः ॥ तस्मै दत्त्वा
महेन्द्रेण वसुयष्टिः प्रगृह्यताम् ॥ ६ ॥ पूजयित्वा महाभाग सर्वदैत्यापनुत्तये ॥ अवतार्य वर्षासमये सर्वैर्नृपतिभिः
सह ॥ ७ ॥ महत्यां संपूजयामास चक्रे चेन्द्रमहं वसुः ॥ महेन्द्रमघवाप्रीतो ददौ पुण्यं वसोर्वरम् ॥ ८ ॥ येषु देशेषु मनुजा
भक्तिभावपुरःसराः ॥ पूजयिष्यन्ति वर्षान्ते यथा दत्तं महाध्वजम् ॥ ९ ॥ तेषु देशेषु मुदिताः प्रजा रोगविवर्जिताः ॥ प्र-
मत्तान्नाधर्मयुक्ता वृषये धाम होत्सवाः ॥ १० ॥ भविष्यन्ति सुवेषाश्च सुभाषाश्च सुभूषणाः ॥ श्रुत्वैतद्वचनं राजा व-
सुर्वसुमतां वरः ॥ ११ ॥ क्रियोपेतं ततश्चक्रे वर्षे वर्षे महोत्सवम् ॥ अवरोप्याथ यष्टिं स्नानवस्त्रैः प्रपूजिताम् ॥
१२ ॥ दैर्घ्येण विंशतिकरां सारदारुमयीं शुभाम् ॥ इन्द्रध्वजे गुरोर्दिष्टे इन्द्रमातृकयाङ्किते ॥ १३ ॥ तस्मिन्नधिष्ठितो भोक्ता स्वयं य-
त्नेन योजयेत् ॥ वस्त्रैर्विचित्रैः संवीतां पिटिकालङ्कृतां तथा ॥ १४ ॥ पिटिकानां महाराज क्रमं च कथयामि ते ॥ प्रथमं लोक-
पालाख्यं चतुरस्रं सकर्णिकम् ॥ १५ ॥ यमेन्द्रधनदेशेर्द्धं वह्नलोन समन्ततः ॥ वृत्तं त्वेन्द्रसंज्ञकं रम्यं द्वितीयं रक्तवर्णितम् ॥ १६ ॥
तृतीयं श्वेतकं चित्रमष्टास्रं पिटकं शुभम् ॥ चतुर्थं मिण्डगोपालं तन्नं मालसमावृतम् ॥ १७ ॥ पञ्चमं चाष्टकोणं तु भद्रकं
धान्यं विचित्रितम् ॥ कृष्णकर्णिकया षष्ठं वृत्तं तु ह्रस्वशोभितम् ॥ १८ ॥ सप्तमं चाष्टकोणं तु भद्रकं विद्याधरैर्युतम् ॥ अष्ट-

धान्यविवर्जितम् १ स्नतम् २ मातसमन्वितम्

॥ भविष्॥
॥ २३५॥

ध्वजदीर्घत्रयोदशाम् २

मंपिरकं तत्तं वा राज्ञां सूत्रवेष्टितम्॥ १९॥ नवग्रहयुतं दीप्तं नवमं वसवं डिकम्॥ वुद्धिपालीशासहितं दशामं शिवसंस्थि-
तम्॥ २०॥ कलसमेकादशं कृतं यमयुक्तं युधिष्ठिर॥ धात्रं द्वादशमं प्रोक्तं ध्वजदीर्घत्रयोदशाम्॥ २१॥ सकृत्सांड्यसमस्तानाम
घंटीचामरवर्धितम्॥ बंधयित्वा दंडपादे रज्जुभिः स्थूणिकान्तरे॥ २२॥ यानैरुत्थापयेत्पार्थ कृत्वा वैभ्रातरं द्विजान्॥ द-
क्षिणाभिश्च संपूज्य गुडपायसपूपकैः॥ २३॥ कर्तव्यस्तु महोत्सवं राजादिना निनवसप्तवा प्रेक्षणीयैर्महादानैर्नर्तैगीतैः
कथानकैः॥ २४॥ वक्रदोलाधरोत्सर्गैः कर्कटैर्मल्लयोधनैः॥ वेश्यांगनानटैर्दिव्यैर्वृत्तक्रीडामहोत्सवैः॥ २५॥ कर्पूरचन्द्र-
दानैश्च सस्नानैश्च परस्परम्॥ रात्रौ प्रजागरः कार्यो रक्षणाय प्रयत्नतः॥ २६॥ काकोलूककपोताताये न पात्तो न वि-
शते॥ काकाडवति दुर्भिक्षं कौशिका म्रियते नृपः॥ २७॥ कपोताश्च प्रजानाशा ततो रक्षेत्सदोद्यतः॥ शैथिल्यादिभि-
र्भङ्गः प्रमादान्नीयते यदि॥ २८॥ तस्मिन्देशे शुभं न स्यात् तस्मिन्नके तो न कारयेत्॥ यावन्नीयते स्थानात्तस्मात्तदिंद्रजो
ध्वजः॥ २९॥ इंद्रध्वजसमुत्थानं प्रमादात्कृतं यदि॥ ततो द्वादशमे वर्षे कर्तव्यं नान्तरे नृप॥ ३०॥ कथंचिद्यदि विघ्नः स्या-
द्विपाकं सोति वोधवे॥ ध्वजभंगे ध्वजभंगो ध्वजेत्राछुं विनश्यति॥ ३१॥ मल्लके मंत्रविच्छेदो मृत्युर्वेमुत्युव लक्षयः॥ धाकृ
दंडे वरस्त्रीशां जठरे जाठं भयम्॥ ३२॥ तरज्ञायां मित्रनाशः स्थूणिकाद्य पदा नयः॥ अभयंग कृतिराजेंद्र तस्मात्यत्नात्सु

235

॥ राम: ॥
॥ २३५ ॥

पकाल्लैः २

रं दरम ||३३|| उत्थाप्यपूजयेद्दत्ताद्दिवारात्रमतंद्रितः || प्रभातेत्वतितेभग्नेगतेचेन्द्रध्वजेद्दिवा ||३४|| सौगीजपूरैः
सनारंगैर्भक्ष्यान्नैर्विविधैस्तथा ||३६|| नैवेद्यादिभिरभ्यर्च्य मंत्रेणाऽनेन तोषयेत || वज्रहस्त सुरारिघ्न बहुनेत्र पुरंद
र ||३७|| सेमार्थं सर्वलोकस्य पूजेयं प्रतिगृह्यताम || श्रवणाद्दर्शनीं यावत्पूजां कृत्वा विधानतः ||३८|| रात्रौ विसर्ज
येच्छक्रं मंत्रेणाऽनेन पांडव || सार्धं सुरासुरगणैः पुरंदर शतक्रतो ||३९|| उपहारं गृहीत्वेमं महेंद्रध्वज गम्यताम || एवं
यः कुरुते यात्रामिंद्रकेतोर्युधिष्ठिर ||४०|| पर्जन्यः कामवर्षी स्यात्तस्मिन्राष्ट्रे न संशयः || ईतयो न प्रवर्त्तंते तस्मान्नस्मसु
कृतं भयम ||४१|| विजित्य शत्रून्समरे वशीकृत्वा महीतलम || भुक्त्वा राज्यं चिरं कालमिंद्रलोके महीयते ||४२|| राष्ट्रे पुरे
च नगरे सुहृत्राजकेतोर्यत्रोत्सवोन्न पूजनैः क्रियते समेत्य || दुष्टोपसर्गजनितं परचक्रजं वा न तस्मिन्भयं भवति पार्थ
न किंचिदेव ||४३|| || इति श्रीभविष्ये महापुराणे श्रीकृष्णयुधिष्ठिरसंवादे महेंद्रध्वजमहोत्सववर्णनं नामैको
नचत्वारिंशोत्तरशततमोऽध्यायः ||१३९|| || श्रीकृष्ण उवाच || पुरा वामनरूपेण याचयित्वा धरामिमाम || बलिय
ज्ञे हरिः सर्वं क्रांतवान्विक्रमैस्त्रिभिः ||१|| इंद्राय दत्तवान्राज्यं बलिं पातालवासिनम || कृत्वा दैत्यपतेर्वास महोरात्रं
पुनर्नृप ||२|| स्वकमेव हि भोगार्थं बलिराज्येति चिह्नितम || सरहस्यं तदेतत्ते कथयामि नरोत्तम ||३|| कार्तिके कृष्ण

कृत्वादैत्यपतेर्दत्तमहोरात्रंपदं २

॥ भवि ॥
॥ २३६ ॥

पक्षस्य पंचदश्यां निशागमे ॥ यथेष्टं चेष्टा दैत्यानां राज्यं तेषां महीतले ॥ ४ ॥ युधिष्ठिर उवाच ॥ निक्रान्ते तु हृषीके
शा कौमुदीं ब्रूहि मे प्रभो ॥ किमर्थं दीयते दानं तस्यां का देवता भवेत् ॥ ५ ॥ किं स्वित्तेषां भवेद्देयं केभ्यो देयं जनार्दन ॥ प्रह
र्षः कोऽत्र निर्दिष्टः क्रीडाकाच प्रकीर्तिताः ॥ ६ ॥ श्रीकृष्ण उवाच ॥ कार्तिके कृष्णपक्षे च चतुर्दश्यां दिनोदये ॥ अवश्यमेव
कर्त्तव्यं स्नानं नरकभीरुभिः ॥ ७ ॥ अपामार्गपल्लवान्भ्रामयेन्मस्तकोपरि ॥ सीतालोष्ठसमायुक्तं सकंटकदलान्वितम्
८ ॥ हर पापमपामार्ग भ्राम्यमाणः पुनः पुनः ॥ ॥ अपामार्गभ्रमतामंच ॥ आपदं किल्विषं वापि ममापहर सर्वशः ॥ ९
अपामार्ग नमस्तेस्तु शरीरं मम शोधय ॥ ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः ॥ १० ॥ यमाय धर्मराजाय मृत्यवे चांत
काय च ॥ वैवस्वताय कालाय सर्वभूतक्षयाय च ॥ नरकाय प्रदातव्यो दीपः संपूज्य देवताः ॥ ततः प्रदोषसमये दीपान्दद्यान्म
नोरमान् ॥ १२ ॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ॥ कूटागारेषु चैत्येषु सभासु च नदीषु च ॥ १३ ॥ प्राकारोद्यानवापी
षु प्रतोलीनिष्कुटेषु च सिद्धार्हद्बुद्धचामुण्डा भैरवायतनेषु च ॥ १४ ॥ मंदुरासु विविक्तासु हस्तिशालासु चैव हि ॥ एवं प्रभा
तसमये ह्यमावास्यां नराधिप ॥ १५ ॥ स्नात्वा देवान्पितॄन्भक्त्या संपूज्याथ प्रणम्य च ॥ कृत्वा तु पार्वणं श्राद्धं दधि क्षी
र घृतादिभिः ॥ १६ ॥ भोज्यैर्नानाविधैर्विप्रान्भोजयित्वा क्षमाप्य च ॥ ततो ऽपराह्नसमये घोषयेन्नगरे नृपः ॥ १७ ॥

236-

॥ रामः ॥
॥ २३६ ॥

श्चयत्रास्थंवलेर्हो कायये ष्वंमोघनामिति ॥ लोकध्वायिपरेहष्येन्तुधाथवलिताञ्जिरे ॥ १८ ॥ कुसुमैंदममालाध्वैभ्य
र्चितेच गृहे गृहे ॥ घृतपानरतोदृप्तनरनारीमनोहरे ॥ १९ ॥ नृत्यवादित्रसंघुष्टे संप्रज्वलितदीपके ॥ अन्योन्यप्रीतिसंहृष्ट
दत्तलाभेनवेजने ॥ २० ॥ तोर्वणहृष्टवदने कुंकुमस्नोदचर्चिते ॥ उत्फुल्लपदनेपथ्येस्वर्णमालिकाभूषिते ॥ २१ ॥ अद्भुतोद्र
ङ्गशृंगारप्रदर्शितकुतूहले ॥ युवतीजनसंकीर्णवस्त्रोज्वलविहारिणि ॥ २२ ॥ दीपमालाकुलेरम्ये विश्वस्तध्यानसंचये ॥
प्रदोषे दोषरहिते शान्तदोषागमे शुभे ॥ २३ ॥ शाक्यपूर्णामुक्ताभिभ्यकन्याभिः क्षिप्ततंदुलम ॥ नीराजनं प्रकर्तव्यं बुद्धस
स्यालोक्यदीपकैः ॥ २४ ॥ भास्वमालोक्य ततो मूर्द्धि सनृत्तानां जनाधिपः ॥ कृक्षशालोन दीपानां निरस्तादर्शनाद्व्रजेत ॥ २५
नीराजनं तु तेनेह प्रोक्तं तैर्विजयप्रदम । तस्माज्ज्ञानेन कर्तव्यं रक्षोदोषभयापहम ॥ २६ ॥ यात्राविहारसंचारे जयजीवे
तिवादितैः ॥ क्षुद्रोपसर्गरहिते राजचौरभयोज्झिते ॥ २७ ॥ मित्रस्वजनसंबंधिसुहृत्प्रेमानुरंजिते ततोऽर्द्धरात्रस
मये स्वयं राजा व्रजेत्स्वमे ॥ २८ ॥ अवलोकयितुं रम्यं वप्रामेव शनैः शनैः । महतातूर्यघोषेणज्वलाद्रिहस्तदीपकैः ।
२९ ॥ कृतशोभां पुरीं पश्येत्कृतरक्षः [illegible]कैर्नरैः ॥ तेष्वक्रोमहदाभ्यर्थ्यमष्ठिं वैवात्मनः शुभाम ॥ ३० ॥ गहिराज्यप्रमोदेन
ततः स्वगृहमाव्रजेत ॥ एवंगाते निशार्धे तु जने निद्राईलोचने ॥ ३१ ॥ नावल्लगरनारीभिः भर्य डिंडिमवादनैः ॥ निष्क्रा

प्रभाम २

स्यतेष्ठहृष्टाभिरलक्ष्मीः स्वगृहांगणात ॥३२॥ ततः प्रवृद्धे सकले जने जातमहोत्सवे ॥ माल्यदीपकहस्तेव स्नेहनिर्भरलो
चने ॥३३॥ वेश्याविलासिनीसार्धं स्वस्ति मंगलकारिणी ॥ गलहाद्रहंवृजंतीच पादाभ्यांगप्रणयिनी ॥३४॥ विघूको वर्त्तनवरेग
रूपभूषणाकुले ॥ द्विजाभिवादनपरे सुखरात्र्याभिनीक्षणे ॥३५॥ सुवासिनीभ्यो दानेच दीयमाने यदृच्छया ॥ यथाप्रभा
ने समये राजा हि मानयेज्जनम् ॥३६॥ संज्ञाते नैव संतोष्या देवाः सत्पुरुषा द्विजाः ॥ इतरे चान्नपानेन वाकप्रदानेन पं
डिताः ॥३७॥ वस्त्रैस्तांबूलदानैश्च पुष्पकर्पूरकुंकुमैः ॥ भक्ष्यैरुच्चावचैर्भोज्यैरंतःपुरविलासिनी ॥३८॥ ग्रामैर्विषयद
नैश्च ग्रामं तत्रपतीन्यथैः ॥ पदातीनंगसंलग्नाग्रैवेयककटकैः स्वकान् ॥३९॥ स्वयं राजा ततो वयेत्सजनान्मत्यान्पृथक्
पृथक् ॥ यथार्हं तोषयित्वा तु ततो मल्लनटान्भटान् ॥४०॥ वृषभान्माहिषांश्चैव पुष्पमालाम्बरैः सह ॥ गजानश्वांश्चयो
धांश्च पदातीन्समलंकृतान् ॥४१॥ मंचारूढः स्वयं पश्येत्स्वनर्तकवारणान् ॥ कृत्वापयोदानयेद्व्रगोमहिष्यादिकं ततः
॥४२॥ दिव्ला कार्यं पयोज्योतिहस्तिप्रस्तक्रिकावदेत ॥ ततो पराह्नसमये पूर्वस्यां दिशि भारत ॥४३॥ मार्गपालीं प्रबध्नी
यात्तुंगस्तंभेऽथपादपे ॥ कृत्वाकाशमयीं दिव्यां सभतेवकुमिर्हंताम ॥४४॥ पूजयित्वा गजान्वाजीन्सार्धयामत्रयेग
ते ॥ गावो वृषाः समहिषा मंडिता घणिकोत्कटा ॥४५॥ कृते होमे द्विजेन्द्रैस्तु गृह्णीयान्मार्गपालिकाम् ॥ राष्टभोस्तेन धा

प्रयत्नात् १

237

गभिः सह लोकानां तेन वा ॥४६॥ स्वगृहात्रापेक्षया वा वापि गृह्नीयाद्दानमभोजनैः ॥ मातुः कुलं पितृकुलं मातामहान्सह वंधुभिः
॥४७॥ संतारयेत्समकलं मार्गपालीं ददाति यः ॥ नीराजनं च तत्रैव कार्यं राज्ञे जयप्रदम् ॥४८॥ मार्गपालीतले नेत्थं हया गा
वो गजा वृषाः ॥ राजानो राजपुत्राश्च ब्राह्मणाः शूद्रजातयः ॥४९॥ मार्गपालीं समुल्लंघ्य नीरुजः स्यात्सुखी सदा ॥ कृत्वैत
न्सर्वमेवेह राज्ञो दैत्यपतेर्वलेः ॥५०॥ पूजां कुर्यात्ततः साक्षाद्भूमौ मंडलके कृते ॥ वलिमालिख्य दैत्येंद्रं वर्णकैः पंचवर्
णकैः ॥५१॥ सर्वाभरणसंपूर्णं विंध्यावल्या सहासितम् ॥ कूष्मांडवाणजंघोरुमुरदानवसंवृतम् ॥५२॥ संपूर्णहृष्ट
वदनं किरीटोत्कटकुंडलम् ॥ द्विभुजं दैत्यराजानं कारयित्वा नृपः स्वयम् ॥५३॥ गृहस्य मध्ये शालायां विशालायां ततोऽ
र्चयेत् ॥ भ्रातृमंत्रिजनैः सार्द्धं संतुष्टो वंदिभिः स्तुतः ॥५४॥ कमलैः कुमुदैः पुष्पैः कल्हारै रक्तकोत्पलैः ॥ गंधधूपान्ननैवेद्यै
रक्षतैर्गुडपूपकैः ॥५५॥ मद्यमांससुरालेह्यदीपवर्ज्यपहारकैः ॥ मंत्रेणानेन राजेंद्र समंत्रीसपुरोहितः ॥५६॥ वलिराजन्न
मस्तुभ्यं विरोचनसुत प्रभो ॥ भविष्येंद्र सुराराते पूजेयं प्रतिगृह्यताम् ॥५७॥ एवं पूजां नृपः कृत्वा रात्रौ जागरणं ततः
कारयेत्प्रेक्षणीयादि नटप्रेक्षकथानकैः ॥५८॥ लोकश्चापि गृहस्यांते शय्यायां शुक्लतंडुलैः ॥ संस्थाप्य वलिराजानं फलैः
पुष्पैश्च पूजयेत् ॥५९॥ वलिमुद्दिश्य दीयंते दानानि कुरुनंदन ॥ यानि तान्यक्षयाण्याहुर्मयैवं संप्रदर्शितम् ॥६०॥ य

दस्यां दीयते दानं स्वल्पं वापि हि वानघ ॥ तदक्षयं भवेत्सर्वं विष्णोः प्रीतिकरं परम् ॥ ६१ ॥ विष्णुना वसुधा लब्धा प्रीतेन व
लये पुनः ॥ उपकारः करोद्दैत्यस्यासुराणां महोत्सवः ॥ ६२ ॥ ततः प्रभृति राजेन्द्र प्रवृत्ता कौमुदी पुनः ॥ सर्वोपद्रवविद्राविसर्व
विघ्नविनाशिनी ॥ ६३ ॥ लोकशोकहरी काम्या धनपुष्टिसुखावहा ॥ कुशब्देन मही ज्ञेया मुदा हर्षं ततः परम् ॥ ६४ ॥ धातुज्ञै
र्नैगमज्ञैश्च तेनैषा कौमुदी स्मृता ॥ कौ मोदन्ते जना यस्यां नानाभावैः परस्परा ॥ ६५ ॥ हृष्टास्तुष्टाः सुखायत्तास्तेनैषा कौ
मुदी स्मृता ॥ कुमुदानि बलेर्यस्मा दीयन्तेऽस्यां युधिष्ठिर ॥ ६६ ॥ अर्थ्यार्थं पार्थ भूमौ वर्त्तते नैषा कौमुदी स्मृता ॥ एकमेव महो
रात्रं वर्षे वर्षे विशांपते ॥ ६७ ॥ दत्तं दानवराजस्य स्मादर्शमिव भूतले ॥ यः करोति नृपो राष्ट्रे तस्य व्याधिभयं कुतः ॥ ६८ ॥ कुत
ईतिभयं तत्र नास्ति मृत्युकृतं भयम् ॥ सुभिक्षं क्षेममारोग्यं सर्वसम्पदुत्तमा ॥ ६९ ॥ नीरुजश्च जनाः सर्वे सर्वोपद्रववर्जिताः
कौमुदीकरणाद्राजन्भवन्तीह महीतले ॥ ७० ॥ यो यादृशेन भावेन तिष्ठत्यस्यां युधिष्ठिर ॥ हर्षदैन्यादिरूपेण तस्य वर्षं प्रया
ति हि ॥ ७१ ॥ रुदिते रोदिति वर्षं हृष्टो वर्षं प्रहृष्यति ॥ भुक्तो भोक्ता भवेद्वर्षं स्वस्थः स्वस्थो भवेदिति ॥ ७२ ॥ तस्मात्प्रहृष्टैस्तु
ष्टैश्च कर्त्तव्या कौमुदी नरैः ॥ वैष्णवी दानवी चेयं तिथिः पैत्री युधिष्ठिर ॥ ७३ ॥ उपशामितमेघनादं प्रज्वलितदशाननं र
मितरामम् ॥ रामायणमिव सुभगं दीपदिनं हरतु वो दुरितम् ॥ ७४ ॥ कूष्माण्डदानरम्भं कुवलयपरवर्णेभ्य धातुकाम

238

ऽम॥ शारदि वहरिगतन्निद्रे दीपदिनं हरन्तु वो दुरितम्॥७५॥ दीपोत्सवे जनितसर्वजनप्रमोदां कुर्वन्ति ये सुमनसो ब
लिराजपूजाम्॥ तेनोपभोगसुखवृद्धियुताकुलानां हर्षेण वर्षमिह पार्थिव यातितेषाम्॥७६॥ ॥इति श्री भविष्ये
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे दीपालिकोत्सववर्णनं नाम चत्वारिंशदुत्तरशततमोऽध्यायः॥१४०
युधिष्ठिर उवाच॥ कथयस्व महाभाग सर्वज्ञो ह्यसि यादव॥ सर्वकामाप्तये कृत्यं कथं शान्तिकपौष्टिकम्॥१॥ श्रीकृष्ण उवा
च॥ श्रीकामः शान्तिकामो वा ग्रहयज्ञं समारभेत्॥ वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्पुनः॥२॥ सर्वशास्त्राण्यनुक्र
म्य संक्षिप्य ग्रन्थविस्तरम्॥ ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिभाषिताम्॥३॥ पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाच
नम्॥ ग्रहान्ग्रहाधिदेवांश्च स्थाप्य होमं समारभेत्॥४॥ ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः॥ प्रथमोऽयुतहोमः
स्याल्लक्षहोमस्ततः परम्॥५॥ तृतीयः कोटिहोमस्तु सर्वकामफलप्रदः॥ अयुतेनाहुतीनां च नवग्रहमखः स्मृतः॥६॥
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम्॥ गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम्॥७॥ कुर्याद्विधानतो वेदिं वित
स्त्युच्छ्रयसंयुताम्॥ संस्थापनाय देवानां चतुरस्रामुदक्प्लवाम्॥८॥ अग्निप्रणयनं कृत्वा तस्यामावाहयेत्सुरान्॥
देवानां तत्र संस्थाप्या विंशतिर्द्वादशाधिका॥९॥ सूर्यः सोमो महीपुत्रो बुधो जीवः सितार्कजः॥ राहुः केतुरिति प्रोक्ता ग्र

॥ भवि ॥
॥२३९॥

हालोकहितावहाः ॥१०॥ ताम्रकात्स्फाटिकाद्रक्तचंदनात्स्वर्णजावुभौ ॥ रजतादयसाचैवग्रहाः कार्याः क्रमादमी ॥
११ ॥ मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ॥ उत्तरेण गुरुं विद्याद्बुधं पूर्वोत्तरेण तु ॥१२॥ पूर्वेण भार्गवं विद्यात्सोमं द
क्षिणपूर्वके ॥ पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतंडुलैः ॥१३॥ रानामात्मान्महाराजततंडुलैः स्थापयेद्द्व ॥ भास्कर
स्येश्वरं विद्यादुमां च शशिनस्तथा ॥१४॥ स्कन्दमंगारकस्यापि बुधस्य च तथा हरिम् ॥ ब्रह्माणं च गुरोर्विद्याच्छुक्रस्या
पि शचीपतिम् ॥१५॥ शनैश्चरस्य तु यमं राहोः कालं तथैव च ॥ केतोस्तु चित्रगुप्तं तु सर्वेषामेव देवताः ॥१६॥ अग्नि
रापः क्षितिर्विष्णुरिंद्रः सौपर्णदेवताः ॥ प्रजापतिश्च सर्पश्च ब्रह्मा प्रत्यधिदेवताः ॥१७॥ विनायकं तथा दुर्गां वायु
माकाशमेव च ॥ सावित्रीं च तथा लक्ष्मीमुमां च सहभर्तृकाम् ॥१८॥ आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥ संस्म
रेद्रक्तमादित्यमंगारकसमन्वितम् ॥१९॥ सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिंगलौ ॥ मंदराहू तथा कृष्णौ धूम्रं केतु
गणं विदुः ॥ २०॥ ग्रहवर्णानि देयानि वासांसि कुसुमानि च ॥ गंधाश्च बलयश्चैव धूपो गुग्गुलपूर्वकः ॥२१॥ गुडोदनं
रवेर्दद्यात्सोमाय घृतपायसम् ॥ अंगारकाय संयावं बुधाय क्षीरषष्टिकम् ॥२२॥ दध्योदनं गुरोर्दद्याच्छुक्राय तु घृ
तोदनम् ॥ शनैश्चराय कृशरं मेषमांसं तु राहवे ॥२३॥ चित्रौदनं केतवे च सर्वान्भक्ष्यैरथार्चयेत ॥ प्रागुत्तरेण तस्मा

॥ राम: ॥
॥२३९॥

239

चंदनाक्षतविभूषितम् ॥ २४ ॥ चूतपल्लवसंपन्नं फलवस्त्रयुगान्वितम् ॥ पंचरत्नसमायुक्तं पंचभंगयुतं तथा ॥
२५ ॥ स्थापयेदव्रणं कुंभं वरुणं तत्र विन्यसेत ॥ गंगाद्याः सरितः सर्वाः समुद्राश्च सरांसि च ॥ २६ ॥ गजाश्वरथ्या
वल्मीकात्संगमाद्ध्रदगोकुलात ॥ मृदमानीय राजेंद्र सर्वौषधिजलान्वितम् ॥ २७ ॥ स्नानार्थं विन्यसेत तत्र य
जमानस्य धर्मवित ॥ सर्वे समुद्राः सरितः सरः प्रस्रवणानि च ॥ २८ ॥ आयांतु यजमानस्य दुरितक्षयकारकाः
एवमावाहयित्वा तानाम्नवील्पय निसत्तम ॥ २९ ॥ होमं समारभेत्सर्पिर्यवव्रीहितिलादिना ॥ अर्कः पलाशः खदि
रो ह्यपामार्गोऽथ पिप्पलः ॥ ३० ॥ उदुंबरः शमी दूर्वा कुशाश्च समिधः क्रमात ॥ एकैकस्यात्राष्टशतमष्टाविंशति
वा पुनः ॥ ३१ ॥ होतव्या मधुसर्पिभ्यां दध्ना वा पायसेन वा ॥ प्रादेशमात्राऽरुजा वो विशाखा विफलाः समाः ॥ ३२
कल्पयंते समिधः प्राज्ञैः सर्वकर्मसु सर्वदा ॥ देवानामपि सर्वेषामुपांशु परमोऽर्थवित ॥ ३३ ॥ स्वेनस्वेनैव मंत्रेण
होतव्याः समिधः पृथक ॥ आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः क्रमात ॥ ३४ ॥ उद्बुध्य स्वेति तो ध्याश्च यथासंख्य
मुदाहृताः ॥ बृहस्पते अतियद् तथैवान्नात्परिस्रुतः ॥ ३५ ॥ शन्नोदेवीति च कयाके तुं कृण्वन्नितीति च ॥ होत
व्यं च चदाज्यं च चरुं भक्ष्याणि याः पुनः ॥ ३६ ॥ मंत्रैर्दशाहुतीर्दत्वा होमो व्याहृतिभिस्ततः ॥ उदङ्मुखाः प्राङ्मु

णाभ्नकर्णब्रीह्मणापुनगया॥ ३७ ॥ मंत्रवंतस्तु कर्तव्याश्चरवः प्रतिदैवतम्॥ अपो राजेति रुद्रस्य बलिहोमं समा
रभेत्॥ ३८ ॥ आपो हि ष्ठेत्युमायास्तु जप्येते नित्योमि नन्तथा॥ विष्णोरिदं विष्णुरिति लक्ष्मि चैव मिलत्वयं भवेः॥ ३९ ॥ इं
द्राद् देवतानां तु इंद्राय त्रुरूपात्मनः॥ तवायमस्यायंगो भ्नेस्ते वै होमः॥ प्रकीर्तितः॥ ४० ॥ कालस्य ब्रह्मजज्ञानमि
ति मंत्रः प्रशस्यते॥ चित्रगुप्तस्य वाजानपौराणिकाविदुर्बुधा॥ ४१ ॥ अग्निं दूतं वृणीमहे इति वह्नेरुदाहृतः
इदं यमं वरुणमित्तायमंत्रः प्रकीर्तितः॥ ४२ ॥ भूमेः पृथिव्यंतरिक्षमिति वेदे प्रपठ्यते॥ सहस्रशीर्षापुरुषइ
ति विष्णोरुदाहृतः॥ ४३ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः॥ ब्रह्मणा सहितः शेषो दिक्पालाः पांतु
ते सदा॥ ४४ ॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः॥ बुद्धिर्लज्जा शांतिपुष्टीं कांतिस्तुष्टिश्च मातरः॥
४५॥ एतान्यामभिषिंचंतु धर्मपत्न्यः समागताः॥ आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः॥ ४६ ॥ ग्रहा
स्त्वामभिषिंचंतु राहुः केतुश्च संस्थिताः॥ देवदानवगंधर्वा यक्षराक्षसपन्नगाः॥ ४७ ॥ ऋषयो मनवो गावो देव
मातर एव च॥ देवपत्न्योद्रुमा नागा दैत्याश्चाप्सरसां गणा॥ ४८ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि
च॥ औषधानि च रत्नानि कालस्यावयवाश्च ये॥ ४९ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः॥ एते त्वाम

240

सिद्धिं चैव सर्वकामार्थसिद्धये ॥ ५० ॥ ततः शुक्लाम्बरधरः शुक्लांधानुलेपनः ॥ सर्वगंधसमायुक्तः स्नातः प्र-
काशमन्वितः ॥ ५१ ॥ यजमानः सपत्नीकान्सिद्धिदांस्तान्समाहितान ॥ दक्षिणाभिः प्रयत्नेन पूजयेन्न तु विस्मयः
५२ ॥ सूर्याय कपिलां धेनुं दद्याच्छुक्लं तथैव च ॥ रक्तं धुर्धरं दद्याद्भौमाय ककुदाधिकम ॥ ५३ ॥ बुधाय जातरूपं च गुर-
वे पीतवाससी ॥ शुक्लाश्वं दैत्यगुरवे कृष्णां गामर्कसूनवे ॥ ५४ ॥ आयसं राहवे दद्यात्केतवे छागमुत्तमम ॥ सुवर्णे-
न समं कार्यं यजमानेन दक्षिणा ॥ ५५ ॥ सर्वेषामथवा दद्याद्गुरुर्वा येन तुष्यति ॥ सुमंत्रेण प्रदातव्याः सर्वाः सर्वा-
र्थदक्षिणाः ॥ ५६ ॥ कपिले सर्वदेवानां पूजनीयासि रोहिणी ॥ तीर्थदेवमयी यस्मादतः शान्तिं प्रयच्छ मे ॥ ५७ ॥ पुण्य-
स्त्वं शंखपुण्यानां मंगलानां च मंगलं ॥ विष्णुना विधृतो नित्यमतः शान्तिं प्रयच्छ मे ॥ ५८ ॥ धर्मस्त्वं वृषरूपेण जग-
दानंदकारकः ॥ अष्टमूर्तेरधिष्ठानमतः शान्तिं प्रयच्छ मे ॥ ५९ ॥ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अ-
नंतपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ ६० ॥ पीतवस्त्रयुगं दद्या वासुदेवस्य वल्लभम ॥ प्रदानात्तस्य मे विष्णुरतः
शान्तिं प्रयच्छतु ॥ ६१ ॥ कपिलत्वं श्वरूपेण यस्मादमृतसंभवः ॥ चंद्रार्कवाहनो नित्यमतः शान्तिं प्रयच्छ मे ॥ ६२
यस्मात्त्वं पृथिवी सर्वा धेनोर्वै केशवसंस्थिता ॥ सर्वपापहरा नित्यमतः शान्तिं प्रयच्छ मे ॥ ६३ ॥ यस्मादायसकर्माणि

नेकाशीनानि सर्वदा ॥ लांगूलास्याश्वमुखादीनि तस्माच्छान्तिं प्रयच्छ मे ॥ ६४ ॥ यस्मात्त्वं नागयज्ञानामंगत्वेन व्यवस्थि-
ता ॥ सोऽपि त्वं भावसोमि त्वमतः शान्तिं प्रयच्छ मे ॥ ६५ ॥ गगगमंगे गोपुलिंद्धति भुवनानि चतुर्द्दश ॥ यस्मात्तस्माच्छिवं
मे स्यादिह लोके परत्र च ॥ ६६ ॥ यस्मादनन्तशयनं केशवस्य शिवस्य च ॥ शय्याममाप्यञ्चस्यापत्यताज्ञत्मानिज मा-
नि ॥ ६७ ॥ यथा रत्नेषु सर्वेषु सर्वे देवा व्यवस्थिताः ॥ तथा शान्तिं प्रयच्छन्तु रत्नदानेन मे सुराः ॥ ६८ ॥ यथा भूमिप्रदानस्य
कलां नार्हन्ति षोडशीम ॥ दानान्यन्यानि मे शान्तिं भूमिदानाद्भवत्विपि ॥ ६९ ॥ एवं संपूज्य येऽङ्कापि त्वाव्याधिविवर्जितः
७० ॥ वस्त्रकाञ्चनरत्नौघैर्माल्यगंधानुलेपनैः ॥ यहस्वरूपमतुलं कथ्यमानं निबोध मे ॥ ७१ ॥ भक्तिभावप्रपन्नस्य कथ्य-
मानं विराजते ॥ पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ॥ ७२ ॥ सप्ताश्वः सप्तरज्जुश्च द्विभुजः स्या[illegible]दा रविः ॥ श्वे-
तः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः ॥ ७३ ॥ गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥ रक्तमाल्याम्बरधरः शक्ति-
कासमद्युतिः ॥ ७४ ॥ रक्तवर्णो गदापाणिर्द्विबाहुर्भूमिनंदनः ॥ पीतमाल्याम्बरधरः पीतगंधानुलेपनः ॥ ७५ ॥
कांचनेवरपेद्विबाहुर्मानो बुधः सदा ॥ देवदैत्यगुरू तद्वत्पीतश्वेतौ चतुर्भुजौ ॥ ७६ ॥ दंडिनौ वरदौ कार्यौ साक्षसू-
त्रकमंडलू ॥ इंद्रनीलद्युतिः शूली वरदो गृध्रवाहनः ॥ ७७ ॥ बाणबाणासनधरः कर्त्तव्योऽर्कसुतः सदा ॥ शार्दूलवद

नस्थण्डाकुरवप्रशस्यते ॥ धूम्राद्विताहवः सर्वे गदितो विकृताननाः ॥ ७९ ॥ गन्धमासनरतानित्यं केतवः स्वर्वरप्रदाः
॥ सर्वे विचित्रितैः कार्या ग्रहा लोकहितावहा ॥ ८० ॥ स्वांगुलैनोच्छ्रिताः सर्वे शतमष्टोत्तरं तथा ॥ ग्रहस्वरूपमेतत्ते आ
ख्यातं पाण्डुनन्दन ॥ ८१ ॥ एतज्ज्ञात्वा प्रयत्नेन पूजा कार्या विचक्षणैः ॥ अनेन विधिना यस्तु ग्रहपूजां समारभेत् ॥
८२ ॥ सर्वान्कामानवाप्नोति प्रेत्य स्वर्गे महीयते ॥ यस्तु पीडाकरो नित्यं माल्पवित्तस्य वा ग्रहः ॥ ८३ ॥ तं तु यत्नेन संपू
ज्य शेषानप्यर्चयेद्बुधः ॥ ग्रहा गावो नरेन्द्राश्च ब्राह्मणाश्च विशेषतः ॥ ८४ ॥ पूजिताः पूजयन्त्येते निर्दहन्त्यपमानिताः
तस्मान्न दक्षिणाहीनं कर्तव्यं भूतिमिच्छता ॥ ८५ ॥ संपूर्णया दक्षिणया यस्मादेकोऽपि तुष्यति ॥ सदैवाऽयुतहोमो
ऽयं नवग्रहमखेः स्मृतः ॥ ८६ ॥ विवाहोत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु ॥ निर्विघ्नार्थं महाराज तथोद्वेगाद्भुतेषु च ॥ ८७
कथितोऽयुतहोमोऽयं लक्षहोममतः शृणु ॥ सर्वकामाप्तये यस्माल्लक्षहोमं विदुर्बुधाः ॥ ८८ ॥ पितॄणां वल्लभो य
स्माद्भुक्तिमुक्तिफलप्रदः ॥ ग्रहताराबलं लब्ध्वा कृत्वा ब्राह्मणवाचनम् ॥ ८९ ॥ गृहस्योत्तरपूर्वेण मण्डपं कारयेद्बुधः ॥
रुद्रायतनभूमौ वा चतुरस्रमुदङ्मुखम् ॥ ९० ॥ दशहस्तमथाष्टौ वा हस्तान्कुर्याद्विधानतः ॥ प्रागुदक्प्रवणां भू
मिं कारयेद्यत्नतो नरः ॥ ९१ ॥ प्रागुत्तरं समासाद्य प्रदेशं मण्डपस्य तु ॥ शोभनं कारयेत्कुण्डं यथावल्लक्षणान्वितम्

॥ भवि ॥
॥ २५२ ॥

९२ ॥ मानहीनं चाद्रव्याणामनेकभयदं भवेत् ॥ यस्मात्तस्मात्सुसंपूर्णाशांतिकुंडं विधीयते ॥ ९३ ॥ अस्माद्दशगुणः प्रोक्तो
लक्षहोमः स्वयंभुवा ॥ आहुतिभिः पृथक्त्वेन दक्षिणाभि तथैव च ॥ ९४ ॥ द्विहस्तविस्तृतं तद्वत्खनेद्हस्तायतं पुनः ॥ लक्षहोमे
भवेत्कुंडं योनिवक्त्रं त्रिमेखलम् ॥ ९५ ॥ संस्थापनाय देवानां विश्वत्रयसमाहृतम् ॥ द्विरंगुलोच्छ्रितो विप्रः प्रथमः समु
दाहृतः ॥ ९६ ॥ अंगुलोच्छ्रयसंयुक्तं वप्रद्वयमथोपरि ॥ अंगुलस्तत्र विस्तारः सर्वेषां कथ्यते बुधैः ॥ ९७ ॥ दशांगुलोच्छ्रि
ताभित्तिः स्थंडिलस्य तथोपरि ॥ तस्मिल्लावाहयेद्देवान्सर्वतस्तुष्मतंडुलैः ॥ ९८ ॥ आदित्याभिमुखाः सर्वे स्थाप्याः प्रत्य
धिदेवताः ॥ स्थापनीयाश्च निश्चेष्टतांतरेण पराङ्मुखाः ॥ ९९ ॥ गर्त्तात्तद्विक्रमस्तत्र संपूज्यः श्रियमिच्छता ॥ समपी
नकारीरत्नवाहनं परमेष्ठिनः ॥ १०० ॥ विघ्नापहरो नित्यमतः शांतिप्रयच्छमे ॥ पूर्ववत्कुंभमामंत्र्य तद्धोमं समाचरेत्
१ ॥ सहस्राणां शतं कृत्वा समित्संख्यादिकं पुनः ॥ सौडुंवरीमथार्द्रीं चवल्ककीटवर्जिताम् ॥ २ ॥ वाहुमात्रां स्त्रुवं कृत्वा
ततः स्तंभद्वयोपरि ॥ घृतधा१रां तथा सम्यग्गत्वे हृपरि पातयेत् ॥ ३ ॥ पाठयेन्सूक्तमाग्नेयं वैष्णवं रौद्रमैंदवम् ॥ महावै
श्वानरं साम ज्येष्ठसाम च पाठयेत् ॥ ४ ॥ स्नानं नृपयजमानस्य पूर्ववत्संचवाचनम् ॥ दातव्या यजमानेन पूर्ववद्द
क्षिणा पृथक् ॥ ५ ॥ कामक्रोधविहीनेन ऋत्विग्भ्यः शांतचेतसः ॥ नवग्रहमखे विप्रा श्चत्वारो वेदवेदिनः ॥ ६ ॥

श्रावयेत् २

252

॥ रामः ॥
॥ २५२ ॥

भवतिग्रहपूजने ७

शक्तिमान ३

अथवाऋत्विजोशांतोद्वावेवश्रुतिकोविदे॥ कार्यावयुतहोमेनतप्रसज्जेतविस्तरे॥७॥ तद्वद्द्वादशचाष्टौवालक्ष
होमेऽप्यृत्विजः॥ कर्तव्याःशक्तितस्तद्वत्वारोवाविमत्सराः॥८॥ नवग्रहमखेसर्वलक्षहोमेदशोत्तमे॥ दयाच्चपां
ऽवश्रेष्ठभूषणान्यपिशक्तितः॥९॥ स्थापनानिचवस्त्राणिहैमानिकटकानिच॥ कर्णाङ्गुलीपवित्राणिभक्तिमान्प्रतिपा
दयेत्॥१०॥ नकुर्याद्दक्षिणाहीनंवित्तशाठ्येनमानवः॥ अददल्लोभमोहाभ्यांकुलक्षयमवाप्नुयात॥११॥ अन्नदा
नंयथाशक्त्यादातव्यंभूतिमिच्छता॥ अन्नहीनंवृतंयस्मादुर्भिक्षफलदंभवेत॥१२॥ अन्नहीनोहनेराष्ट्रंमंत्रहीनस्तुऋ
त्विजः॥ अदक्षिणोयजमानंनास्तियज्ञसमोरिपुः॥१३॥ नवाप्यल्पधनःकुर्याल्लक्षहोमंनरःक्वचित॥ यस्मात्पीडाक
रोनित्यंयज्ञेवभवतिग्रहः॥१४॥ तमेवपूजयेद्भक्त्याद्वौवात्रीन्वायथाविधि॥ एकमप्यर्चयेद्भक्त्याब्राह्मणंवेदपारग
म॥१५॥ दक्षिणाभिःप्रयत्नेननबहून्वाबहुवित्तवान॥ लक्षहोमस्तुकर्तव्योयदिवित्तंगृहेगृहे॥१६॥ यतःसर्वानवा
प्नोतिकुर्वन्कामान्विधानतः॥ पूज्यतेशिवलोकेचवस्वादित्यमरुद्गणैः॥१७॥ यावत्कल्पशतान्यष्टावथमोक्षमवा
प्नुयात॥ सकामोयस्त्विमंकुर्याल्लक्षहोमंयथाविधि॥१८॥ सतंकाममवाप्नोतिपदंचानन्त्यमश्नुते॥ पुत्रार्थीलभतेपु
त्रंधनार्थीलभतेधनम्॥१९॥ भार्यार्थीशोभनांभार्यांकुमारीचशुभंपतिम॥ भ्रष्टराज्यस्तथाराज्यंश्रीकामःश्रियमाप्नु

दयाधर्मपरोनित्यंक्षमावान्बहुवित्तवान ४

पातकस्समवाप्नोतियत्कुर्वन्नविधानतः ४

यात् ॥२०॥ यंयंप्रार्थयतेकामंतंतमाप्नोतिपुष्कलम् ॥ निष्कामःकुरुतेयस्तुपरंब्रह्मसगच्छति ॥२१॥ शांतिंनवग्र
हमखांदुरितोपशांतिंशान्तिंकरोतिविकृताविधिवद्द्विजेन्द्रैः ॥ क्षेमंसुभिक्षमतुलंकुलवृद्धिसंपतन्त्राणियत्रकुरुतेवत
लक्षहोमम् ॥१२२॥ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेनवग्रहलक्षहोमविधिवर्णनं
नामैकचत्वारिंशदुत्तरशततमोध्यायः ॥ १४१ ॥ ॥ श्रीकृष्णउवाच ॥ राजासंवरणःपूर्वंप्रतिष्ठानेपुरोत्तमे ॥ बभूव
समहाभागःशास्त्रार्थकुशलोबली ॥१॥ ब्रह्मण्यःपितृभक्तश्चदेवब्राह्मणपूजकः ॥ तस्याथकुर्वतोराज्यंसम्यक्पाल
यतःप्रजाः ॥ २ ॥ आजगाममहायोगीसनकोब्रह्मणःसुतः ॥ दत्वातस्यासनंराजाप्रणम्यशिरसातथा ॥३॥ पूजयि
त्वार्घ्यपाद्याद्यैरात्मानंविनिवेद्यच ॥ इतिहासपुराणोक्ताश्चकारविविधाःकथाः ॥४॥ राजर्षीणांपुराणांवचालोनिय
तार्थवित् ॥ ततःकथांतरेराजाकार्यमनसिसंस्थितम् ॥५॥ हितायपृथिवीशानांजगतश्चात्मनस्तथा ॥ पप्रच्छ
विनयोपेतोयोगाचार्यंमहामतिः ॥ ६ ॥ संवरणउवाच ॥ भगवन्महदुत्पातसंभवेभूप्रकंपते ॥ निर्घातेपांशुव
र्षेचग्रहभंगेतथैवच ॥ ७ ॥ जन्मनक्षत्रपीडासुअनावृष्टिभयेषुच ॥ ज्वरासुप्रग्रहपीडासुदुर्भिक्षेराष्ट्रविग्रहे
न ॥ व्याधीनांसंभवेजातेशरीरेचातिपीडिते ॥ क्लेशेमहतिचोत्पन्नेकिंकर्तव्यंनरोत्तमः ॥ ८ ॥ स्वर्गस्यसाधनं

नपोत्तमैः १

243

समारभेत् ५

देवागारे वभवने तीर्थेगा शिवतं निधौ २

यशस्कीर्त्तिदं धनदं तथा ॥ प्रब्रूहि मे द्विजश्रेष्ठ तथारोग्यप्रदं नृणाम् ॥ १० ॥ सनत्कुमार उवाच ॥ शृणु राजन्प्रव
क्ष्यामि शांतिकर्म ह्यनुत्तमम् ॥ कोटिहोमाख्यमतुलं सर्वकामफलप्रदम् ॥ ११ ॥ ब्रह्महत्यादिपापानि येन नश्यंति तत्क्षणा
त् । उत्पाताः प्रशमं यांति महत्स्वंपद्यते ध्रुवम् ॥ १२ ॥ विधानं तस्य वक्ष्यामि शृणुष्वैकमना नृप ॥ देवागारे नदीती
रे वने वा भवनेपि वा ॥ १३ ॥ पर्वते वापि कुर्वीत यद्वे क्षेममात्मन ॥ शुभनक्षत्रयोगे च वारे पर्वगुणान्विते ॥ १४ ॥ यजमा
नस्यानुकूले कोटिहोमं समाचरेत् ॥ पूजयित्वा प्रयत्नेन ब्राह्मणं वेदपारगम् ॥ १५ ॥ वस्त्रैर्विभूषणैश्चैव गंधमाल्या
नुलेपनैः ॥ प्रणम्य विधिवत्तस्मै आत्मानं विनिवेदयेत् ॥ १६ ॥ त्वं नो गतिः पिता माता त्वं गतिस्त्वं परायण ॥ त्वत्प्रसादे
न विप्रर्षे सर्वमेस्यान्मनोगतम् ॥ १७ ॥ आपद्विमोक्षाय च मे कुरु यज्ञमनुत्तमम् ॥ कोटिहोमार्थमतुलं शांत्यर्थं सार्व
कामिकम् ॥ १८ ॥ पुरोहितस्ततः प्राज्ञः शुक्लांवरधरः शुचिः ॥ ब्राह्मणैर्वेदसंवृतैः उपलैर्ज्ञकैः समाहितैः ॥ १९ ॥ भूमि
भागे समे शुद्धे प्रागुदक्प्रवणे तथा ॥ पुण्याहं वाचयेत्पूर्वं कृत्वा विप्रान्सुपूजितान् ॥ २० ॥ ततस्तु मंहितैर्विप्रैः सूत्रये
न्मण्डपं शुभम् । उत्तमं शतहस्तं तु तदर्द्धेन तु मध्यमम् ॥ २१ ॥ जघन्यं तु तदर्द्धेन शक्तिकालाद्यपेक्षया ॥ मध्ये तु मण्डपस्या
पि कुंडं कुर्याद्विचक्षणः ॥ २२ ॥ अष्टहस्तप्रमाणेन आयामेन तथैव च ॥ मेखलात्रितयं तस्य द्वादशांगुलविस्तृतम् ॥

प्रहितैः २

सर्वतःप्रपेः

सर्वदेवानाम् समाचरेत् ५

पाठस्तत्र शुद्धकुण्डसिद्धियन्थेकक द्विर्वा कोटो तप करमविप्राकू रपरे हस्ते हे: कोटिहोमे: स्वकर परिमित कुण्डयोदितनात ८

२३ ॥ तत्र मार्गां तथा योनिं कुर्वीत सुसमाहितः ॥ कुंडस्य पूर्वभागे तु वेदिं कुर्याद्विचक्षणः ॥ २४ ॥ चतुर्हस्तां समां चैव हस्त
मात्रोच्छ्रितां नृप ॥ स्थानं तत्सर्वमेतत्तां कुर्याद्यत्नेन बुद्धिमान् ॥ २५ ॥ उपलिप्य ततो भूमिं मंडपस्य समीपतः ॥ विन्यसेत्क
लशांस्तत्र जलपूर्णांश्चतुर्दश ॥ २६ ॥ अश्वत्थपुष्पवृन्ताद्यैः पल्लवैरुपशोभितान् ॥ वितानमुपरिष्टाच्च मंडपस्य प्रक
ल्पयेत् ॥ २७ ॥ स्थापयेद्दिक्षु सर्वासु तोरणानि विचक्षणः ॥ एवं संभृतसंभारैः पुरोधाः सुसमाहितः ॥ २८ ॥ पुण्या
हजयघोषेण होमकर्म समारभेत् ॥ स्थापयित्वा सुरान्वेद्यां वक्ष्यमाणान्नरिंदम ॥ २९ ॥ ब्रह्माणं पूर्वभागे तु मध्ये देवं
जनार्दनम् ॥ पश्चिमे तु तथा रुद्रं वसूनुत्तरतस्तथा ॥ ३० ॥ ऐशान्यां च ग्रहान्सर्वानाग्नेय्यां मरुतस्तथा ॥ वायुं सोम्यांत
थैशान्यां लोकपालान्क्रमेण तु ॥ ३१ ॥ एवं संस्थाप्य विधिवत्तथा स्थाने नृपोत्तम ॥ पूजयेद्विधिवद्वस्त्रगंधमाल्या
नुलेपनैः ॥ ३२ ॥ वेदोक्तमंत्रैस्तल्लिंगैः पुराणोक्तैः पृथक्पृथक् ॥ आदित्या वसवो रुद्रा लोकपालास्तथा ग्रहाः ॥ ३३ ॥
ब्रह्माजनार्दनश्चैव शूलपाणिर्गौक्षिहा ॥ अत्र संनिहिताः सर्वे भवंतु शुभभागिनः ॥ ३४ ॥ पूजां गृह्णंतु सर्वेत्र मया
भक्त्योपपादिताम् ॥ कुर्वंतु च शुभं सर्वे यज्ञकर्मसमाहिताः ॥ ३५ ॥ एवं संपूजयित्वा तान्देवान्यत्नेन सुधीः ॥
नैवेद्यैर्विविधैर्भक्ष्यैः फलैः पुष्पैस्तथैव च ॥ ३६ ॥ ततस्तु नैर्द्विजैः सार्द्धं कुंडस्य विधिपूर्वकम् ॥ कुर्यात्संस्कारकरणं च

महेश्वर

चैघमुशीभनै १

प्रक्षालयेत १

धोमंतं वेदविंतकं ॥ ३७ ॥ ततः समाहूयेद्विजांस्तान्स्नातांश्च तार्चिबम् ॥ नियोजयेद्द्विजांस्तत्र शान्तसंख्योल्लयो
नम ॥ अलाभे तु बहूनां च यथा लाभं नियोजयेत् ॥ ३८ ॥ विद्यावृद्धवयोवृद्धानाहस्थानायतेन्द्रियान् ॥ स्वकर्म
नियतांज्ञानशीलाश्चदान्तान्द्विजोत्तमान् ॥ ३९ ॥ चिंतयेत ग्रहदेवेशांपंचास्यं तपपावकम् ॥ मुखानि तस्य चत्वारि सप्त
जिह्वानि पार्थिव ॥ ४० ॥ एकजिह्वामथैकंतु नक्षतं सर्वकामदम् ॥ धमायमानेन वृथा होतव्यं ज्वलितेनले ॥ ४१ ॥
ऋग्भिः पूर्वाग्रतो होमो यजुर्भिश्चोत्तरामुखैः ॥ सामभिः पश्चिमे कार्यो ऽथर्वभिर्दक्षिणामुखैः ॥ ४२ ॥ आघारावाज्य
भागौ तु पूर्वं कृत्वा विचक्षणः ॥ परितोथ परिस्तीर्य कल्पिनेव तथासने ॥ ४३ ॥ ब्रह्माणं पूर्वमभ्येन त्सर्वं पश्चात्समा
चरेत ॥ होमोथाहुतिभिश्चैव सर्वत्र विधीयते ॥ ४४ ॥ प्रणवादिभिर्मंत्रलिंगैः स्वाहाकारांतयोजितैः ॥ जुहुयात्स
र्वदेवानां येषां ये चोपकल्पिताः ॥ ४५ ॥ एवं प्रकल्पयेद्यत्नं कोटिहोमाख्यमुत्तमम् ॥ तिलाः कृष्णा घृताभ्यक्ताः किं
चिद्यवसमन्विताः ॥ ४६ ॥ होतव्याः कोटिहोमे तु समिधश्च पलाशजाः ॥ पूर्णां पूर्णां सहस्रेन दद्यात्पूर्णाहुतिं शुभाम् ॥ ४७
पंचमेतन्मुखे राजन्सर्वकामार्थसिद्धये ॥ पूर्णाकृताः समाख्याताः कोटिहोमे नराधिप ॥ ४८ ॥ सहस्राणि तपश्चैव दक्ष
शास्त्रविशारदैः ॥ प्रारंभदिनमारभ्य ब्राह्मणो ब्रह्मवादिभिः ॥ ४९ ॥ भाव्यं सयजमानेनत्वथवा सपुरोहितैः ॥ क्रोधलो

ब्रह्मचारिभिः १

कृत्वा ६

नैष्कर्म्यमथ कर्मणा ५

भाद्रयो रोषा वर्जनीयाः प्रयत्नतः ॥५०॥ यजमानेन राजेन्द्र सर्वान्कामानभीप्सता ॥ संवरण उवाच ॥ बहुत्वात्क
र्मणो ब्रह्मन्कोटिहोमः सुदुष्करः ॥५१॥ कालेन महता चैव शक्याः प्राप्तुं कथं च न ॥ नियमा ब्रह्मचर्याद्या दुष्करो हीति मे मति ॥५२
निरोधो व्रतचर्याणां महाप्यादिः सुदुष्करं ॥ कार्याद्रुतेन यत्नेन स्यात्स्वर्गकालाद्यपेक्षया ॥५३॥ तत्र द्विजा यजन्ते ब्रह्मन्यदिष्यात्वे
षु कथ्यते ॥ कोटिहोमस्य संक्षेपं यदस्मै ब्रह्मसंभव ॥५४॥ सनत्कुमार उवाच ॥ शताननो दशमुखो द्विसप्तैकमुखस्तथा ॥ च
तुर्विधो महाराज कोटिहोमो विधीयते ॥५५॥ कार्यस्त्वग्रजन्मानां ज्ञात्वा नैवकुर्याद्यवर्गतः ॥ यथा संक्षेपतः कार्यः कोटिहोमस्तथा
श्रृणु ॥५६॥ कृत्वा कुण्डशतं दिव्यं यथोक्तं हस्तसंमितम् ॥ एकैकस्मिंस्ततः कुण्डे शतं विप्रान्नियोजयेत् ॥५७॥ सद्यः पक्षे न वि
प्राणां सहस्रं परिकीर्तितम् ॥ एकस्थाने प्रणीतेग्नौ सर्वेन्तः परिभाविते ॥५८॥ होमं कुर्युर्द्विजाः सर्वैकत्र कुण्डे यथोदितम् ॥ यथा कु
ण्डकृत्येऽपि राजन्संक्षेपमतः कृतौ ॥५९॥ न च वह्निव कृत्यं स्यात्तत्र यज्ञे विधीयते ॥ तथा कुण्डशतेऽप्यत्र शताविधिविता निते ॥६०॥
एकस्य च भवेद्यज्ञः कोटिहोमो न संशयः ॥ स्वयं यान्ति प्रयते क्षिप्रं आकुलैः कार्यगौरवात् ॥६१॥ शताननः स विज्ञेयः कोटिहोमो न सं
शयः ॥ स्वल्पैरहोभिः कार्यः स्याद्वर्षाकालादिकेऽपि वा ॥६२॥ तदा दशायुगणः कार्यः कोटिहोमो विजानता ॥ विप्राणां दशशते तत्र
त्र विभज्य नियोजयेत् ॥६३॥ तेऽपि विज्ञानशीलाः स्युर्वृत्तवन्तो जितेन्द्रियाः ॥ यत्र कुण्डे दशयं कृत्वा विभज्य च विभागशः ॥६४

त्र विभाग नियोजयेत् १

245

होमं कुर्य्युर्द्विजाम्भसः संस्कृत्वा विधिपूर्व्वकम् ॥ शान्तं तत्र नियोज्यं स्याद्विप्राणां प्रविभज्य वै ॥ ६५ ॥ मासे वाथ द्विमासे वाय
थाकाले त्वुपस्थिते ॥ एवं च द्विगुणं कार्य्यः कोटिहोमो विचक्षणोः ॥ ६६ ॥ यदानुस्ते ह्यायत्तं यजमानः समापयेत् ॥ कालेन व
ऊधाराज्यं तदा चैकभुक्तो भवेत् ॥ ६७ ॥ एककुंडस्थितो वह्निरेकचित्तैः समाहितैः ॥ यथालाभस्थितैर्विप्रैर्ज्ञानिशीलैर्विचक्ष
णो ॥ ६८ ॥ न संख्यानियमस्त्वत्र ब्राह्मणानां नरोत्तमः ॥ न कालनियमश्चैवस्वे ह्ययज्ञः समुच्यते ॥ ६९ ॥ आवृत्त्या सर्वकाम
स्यावाप्तिर्मास्यानुकर्मवत् ॥ तदप्रसक्तो कर्त्तव्यो यज्ञोऽयं सर्वकालिकः ॥ ७० ॥ अयमेकमुखो राजन्कालेन बहुना भवेत् ॥ बहु
विघ्नश्च कालेन तस्मात्संक्षेपमाचरेत् ॥ ७१ ॥ यतो हि चित्तविनायमायुश्चैवास्थिरं सदा ॥ अतः संक्षेपतः कार्य्यं धर्मकार्य्यं प्र
शस्यते ॥ ७२ ॥ ततः समाप्ते यज्ञे तु कारयेत्तु महोत्सवम् ॥ शान्तितूर्य्यनिनादेन ब्रह्मघोषस्वनेन च ॥ ७३ ॥ ततस्तु दक्षयेद्वि
प्रान्होतॄंश्चह्यान्वितः ॥ निष्कैस्वकंकणोश्चैव कुंडलैर्विविधैर्नृप ॥ ७४ ॥ गोशतं चैव दातव्यमश्वानां च शतं तदा ॥ स
हस्रं वस्त्रवर्णानि सर्वेषामपि दापयेत् ॥ ७५ ॥ ग्रामैर्गजै रथैरश्वैः पूजयेच्च पुरोहितम् ॥ दीनान्धकृपणान्सर्वान्त्वस्वाध्ये
श्चापि पूजयेत् ॥ ७६ ॥ ततश्चावभृथं स्नायाद्यानैर्वद्यैः पूर्वकल्पितैः ॥ लक्षहोमोक्तमंत्रेण सदा विजयकारिणा ॥ ७७ ॥
एवं समापयेद्यस्तु कोटिहोममसावंशुभम् ॥ तस्यारोग्यं वित्तपुत्रराष्ट्रवृद्धिस्तथैव च ॥ ७८ ॥ सर्वपापक्षयश्चैव जायते न

षसत्तमः॥ अनावृष्टिभयं चैव उत्पातभयमेव च॥७९॥ दुर्भिक्षं ग्रहपीडां च प्रशमं याति भूतले॥ एतत्स्वस्त्ययं पापहरं सर्व
कामफलप्रदम्॥ सनत्कुमारमुनिना पार्थिवायानिवेदितम्॥८०॥ सर्वोपसर्गशमनं भवने वने वा ये कारयंति मनुजा नृ
पकोटिहोमम्॥ भोगानवाप्य मनसोभिमतान्स्वकामं ते यांति शक्रसदनं त्रुवि भुक्तसत्वाः॥८१॥ ॥ इति श्रीभविष्ये महापु
राणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कोटिहोमविधिवर्णनं नाम द्विचत्वारिंशदुत्तरशततमोऽध्यायः॥ १४२ ॥
श्रीकृष्ण उवाच॥ महाशांतिं प्रवक्ष्यामि महादेवेन भाषिताम्॥ पार्थिवानां हितार्थाय महादुस्तरनाशिनीम्॥१॥ नृपाभि
षेके सा कार्या यात्राकाले नृपस्य तु॥ दुःस्वप्ने दुर्निमित्ते च ग्रहवैगुण्यसंभवे॥२॥ दिग्दाहोल्कानिपाते च जन्मर्क्षे ग्रहदैवते
केतूदये च संजाते निर्घाते क्षितिकम्पने॥३॥ प्रसूतौ मूलगण्डान्ते यमलस्य तु संभवे॥ छत्राणां च ध्वजानां च त्वथा नाश
नते भुवि॥ काकोलूककपोतानां प्रवेशो वेश्मनस्तथा॥४॥ क्रूरग्रहाणां वक्रत्वे जन्मादिषु विशेषतः॥ जन्मनि ग्रहदृष्टो चैव॥ वत्सा
वनर्थे वाद्यमेतथा॥५॥ यदा स्युर्गुरुमंदाराः सूर्यभौमौ विशेषतः॥ कुरुष्व ग्रहाणां सर्वेषां सूर्यरश्मीनां च कीलके॥६॥ वत्सा
पृथग्वाश्वे प्रमाणिके ग्रहविनाशने॥ यद्यग्रे परिदृष्टे तारा ग्रहविंडधनुस्तथा॥७॥ वेश्मनभ्यनुलाभं गेगर्भेष्वभ्यतरी प्रच
रवीन्दोरुपरागे च महाशांतिः प्रशस्यते॥८॥ सर्वाणि दुर्निमित्तानि प्रशमं याति सर्वथा॥ नां कुर्युर्ब्राह्मणाः पंचकुलशील

सर्पस्य च

चामरा लांव ६

246

समन्विताः ॥९॥ चतुर्वेदास्त्रिवेदाभ्या द्विवेदाभ्यापि वांऽवा ॥ अथर्वणाविशेषेण च ह्वायज्ञैः संयुताः ॥१०॥ स्नवपः
कृतसंपन्नाजपहोमपरायणाः ॥ कृच्छ्रपाराकृतं काद्यैः कृतकायविशोधनाः ॥११॥ पूर्वमाराधमंत्रैश्च द्वारभेत्तत्क्रियांत
तः ॥ दक्षादक्षाहस्तं गामंडपं कारयेच्छुभम् ॥१२॥ तन्मध्ये वेदिकां कुर्याच्चतुर्हस्तप्रमाणतः ॥ आग्नेय्यां कारयेत्कुंडं हस्त
मात्रं सुशोभनम् ॥१३॥ मेखलात्रयसंयुक्तं योन्या चापि विभूषितम् ॥ चतुर्वंदनमालं च तोरणालंकृतं तथा ॥१४॥ गोम
येनोपलिप्तं च मंडपं तु द्विजातय ॥ शुक्लांबरधराः स्नाताः शुक्लमाल्यानुलेपनाः ॥१५॥ ततश्चार्घं च कलशांस्तस्यां वेद्यां
नियोजयेत् ॥ आग्नेयादिषु कोणेषु पंचमं मध्यतस्तथा ॥१६॥ अश्वत्थालंकृते पश्चैव चूतपल्लवशोभिते ॥ ब्रह्मकूर्चवि
धानेन पंचगव्यं तु कारयेत् ॥१७॥ सौषधीः पंचरत्नानि रोचनां चंदनं तथा ॥ सिद्धार्थकांश्च मी दूर्वा ॥ कुशान्व्रीहियवां
स्तथा ॥१८॥ अपामार्गफलवतीं न्यग्रोधोदुंबरौ तथा ॥ प्लक्षाश्वत्थकपित्थांश्च प्रियंगुचूतपल्लवान् ॥१९॥ हस्तिदंतमदं चै
व कोशाकुंभेषु निक्षिपेत् ॥ पुरापतीर्थोदकान्येव धान्यं गव्यं च मध्यमे ॥२०॥ कूर्चं चाचमितीदं च वह्निकुंभाभिमंत्रणम् ॥ आ
पः शिवानो मंत्रेणामंत्रेण वायुगोचरे ॥२१॥ ईशानाद्यां चतुर्थस्य कुंभस्य चाभिमंत्रणम् ॥ मध्यमे तु पूजन प्रमाणाढककुंभे
भवोद्भवाः ॥२२॥ गंधपुष्पाक्षतैर्वस्त्रैर्नैवेद्यैर्घृतपाचितैः ॥ फलैश्च नारिकेलाद्यैर्दीपकैः कुंभपूजनम् ॥२३॥ स्वस्तिवा

॥ भविषु ॥
॥ २४७ ॥

येनयत्नप्रयोजनम् १

ततकंचैवकारयेत्तदनंतरम् ॥ क्रमेणानेनस्नानकैरग्निकार्यंप्रयोजयेत् ॥ २४ ॥ अग्निंदत्तमितितामग्निंपूर्वमेवनिधापयेत् ॥ हिर
ण्यगर्भःसमितिब्रह्मासनंतन्नियोजयेत् ॥ २५ ॥ कपोतरूप्रणीतेनमंत्रेणविनिवेशयेत् ॥ कृत्वाचावरणंवह्नेराज्यसंस्कारमेवच
२६ ॥ अथवामादयेड्कं=यथावत्सप्रयोजनम् ॥ ततःष्रुघस्रुक्तेनपापसमापणंभवेत् ॥ २७ ॥ अभिघार्याथसंमिश्रंतथासं
स्थापयेद्बुधि ॥ अग्रादग्नेप्रमाणोक्तास्रुगादथशमीमयान् ॥ २८ ॥ पालाशीःसमिधःसप्ततथासप्तेतिदापयेत् ॥ साघारावा
ज्यभागौतुकृत्वापूर्वक्रमेणतु ॥ २९ ॥ जुहुयादाहुतीःसप्तजातवेदसइत्यृचा ॥ स्थालीपाकस्यजुहुयाज्जुहुयात्सर्वंजातवेद
ला ॥ ३० ॥ तारत्समंदीसूक्तेनचतस्रोजुहुयात्ततः=श्र ॥ यमायेतिचसप्तान्याःस्वाहांताजुहुयात्ततः ॥ ३१ ॥ इदंविष्णुस्ततःसप्तजुहु
यादाहुतीर्नृप ॥ नक्षत्रेभ्यस्ततःस्वाहासप्तविंशत्तथाहुती ॥ ३२ ॥ यत्कर्मणोतिजुहुयात्ततःस्विष्टकृतंततः ॥ ग्रहहोमस्ततः
कार्यस्तिलैराज्यपरिप्लुतैः ॥ ३३ ॥ प्रायश्चित्तंततोकृत्वाहोमकर्मसमापयेत् ॥ ततस्तुतूर्यनिर्घोषैःकाहलाशंखनिःस्वनैः ॥
३४ ॥ यजमानस्यकर्तव्योह्यभिषेकोद्विजोत्तमैः ॥ काश्मर्यपीठसंस्थंतंभद्रेभद्रासनेस्थितम् ॥ ३५ ॥ वेदिमध्यगतंकृत्वादुर्नि
मित्तप्रशांतये ॥ पंचभिःकलशैःपूर्णैर्मंत्रैरेभिर्यथाक्रमम् ॥ ३६ ॥ सहस्राक्षेणप्रथमंततश्चैवशतायुधा ॥ सज्ञोपसा
चद्रेतिविश्वानीनःसुगभिरेवच ॥ ३७ ॥ कृतवाग्नितिचततःस्नापयेद्गुःसमाहितः ॥ ततोदिक्षांबलिंदद्याद्विचित्रा

247

॥ रामः ॥
॥ २४७ ॥

समाप्ति २ दशाश्चैव युधिष्ठिर १०२ दशामान्तिकायुतस्य ६

न्नसमायुतम् ॥ ३८ ॥ नमोस्तु सर्वभूतेभ्य इतिमंत्रमुदाहरेत् ॥ स्नातस्य ब्राह्मणाः सर्वे पठेयुः शांतिमुत्तमाम् ॥ ३९ ॥
शांतितोयेन धारां वपातयित्वा समंततः ॥ पुण्याहवाचनं कृत्वा शांतिकर्म समापयेत् ॥ ४० ॥ क्षितिं हिरण्यं गां वासांसि श
यनान्यासनानि च ॥ विप्रेभ्यो दक्षिणां दद्याद्यथाशक्त्या विमत्सरः ॥ ४१ ॥ दीनानाथविशिष्टेभ्यः श्रोत्रियेभ्यश्च दाप
येत् ॥ भोजनं शोभनं दत्वा ततः सर्वं प्रसिध्यति ॥ ४२ ॥ आयुष्य लभते दीर्घं शत्रून्विजयते क्षणात् ॥ दुर्गाणि चास्य सिध्यं
ति पुत्रांश्च लभते शुभान् ॥ ४३ ॥ यथा बाणप्रहाराणां कवचं वारणं भवेत् ॥ तथा दैवोपघातानां शांतिर्भवति वारणम् ॥ ४४
अहिंसकस्य दांतस्य धर्मार्जितधनस्य च ॥ दैवाभिरपयुक्तस्य सर्वे सानुग्रहा ग्रहाः ॥ ४५ ॥ अर्थान्समर्पयति वर्द्धयते च धर्मं का
मं पुत्रांश्च यतितस्य विनष्टिपापम् ॥ यः कारयेत्सकलदोषहरीं समर्थां शांतिं प्रशांतहृदयः पुरुषः सदैव ॥ ४६ ॥ ॥ इति
श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महाशांतिविधिवर्णनं नाम त्रिचत्वारिंशदुत्तरशततमोऽ
ध्यायः ॥ १४३ ॥ युधिष्ठिर उवाच ॥ शांतिं कथय देवेश गणनाथस्य मे विभो ॥ यां कृत्वा सर्वदुर्गाणि तरते मानवोऽखि
लाम् ॥ १ ॥ श्रीकृष्ण उवाच ॥ शांतिं वक्ष्यामि राजेंद्र गणनाथप्रियां पराम् ॥ यस्याश्चाचरणे नैव सर्वाणि वश्यो भवेन्न ॥
२ ॥ विनायकं कर्माविघ्नसिद्ध्यर्थं विनिवोधतः ॥ स्वप्नेऽवगाहतेऽत्यर्थं जलं मुंडांश्च पश्यति ॥ ३ ॥ काषायवाससश्चैव

॥ भविपु ॥

॥ २४८ ॥

क्रव्यादन्तधिरोहति ॥ अपमृद्धैः शवैरुढैः सहैकत्रवतिष्ठति ॥ ४ ॥ वृजन्नपितथात्मानं मन्यतेऽनुगतं परैः ॥ विमनाविफ
लारंभः संसीदत्यनिमित्ततः ॥ ५ ॥ तेनोपसृष्टो लभते राज्यं न राजनंदनः ॥ कुमारी न च भर्त्तारमपत्यं गर्भिणी तथा ॥ ६ ॥ आ
चार्यत्वं श्रोत्रियश्च न शिष्योऽध्यापनं तथा ॥ वणिग्लाभं न वाप्नोति न कृषिं च कृषीवलः ॥ ७ ॥ स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि
विधिपूर्वकम् ॥ गौरसर्षपकल्केन राज्येनोत्सादितस्य तु ॥ ८ ॥ सुगंधकुंकुमालिप्तशरीरशिरसस्तथा ॥ भद्रासनोपविष्टस्य स्वस्ति
वाच्य द्विजां शुभान् ॥ ९ ॥ अश्वस्थानाद्गजस्थानाद्वल्मीकात्संगमाद्ध्रदात् ॥ मृत्तिकां रोचनां गंधान्गुग्गुलं चाप्सु निक्षिपेत् ॥ १०
यदाहृता ह्येकवर्णैश्चतुर्भिः कलशैर्ह्रदा ॥ चर्मण्यानडुहे रक्ते स्थाप्य भद्रासनं तथा ॥ ११ ॥ सहस्राक्षं शतधारमृषिभिः पावनं कृत
म् ॥ तेन त्वामभिषिंचामि पावमान्यः पुनंतु ते ॥ १२ ॥ भगं ते वरुणो राजा भगं सूर्यो बृहस्पतिः ॥ भगमिन्द्रश्च वायुश्च भगं सप्तर्षयो
ददुः ॥ १३ ॥ यत्ते केशेषु दौर्भाग्यं सीमंते यच्च मूर्द्धनि ॥ ललाटे कर्णयोरक्ष्णोरापस्तद्घ्नन्तु ते सदा ॥ १४ ॥ स्नातस्य सार्षपं तैलं स्रु
वेणौदुम्बरेण च ॥ जुहुयान्मूर्द्धनि कुशान्सव्येन परिगृह्य च ॥ १५ ॥ मितश्च संमितश्चैव तथा शालकटंकटौ ॥ कूष्मांडो राजपु
श्चसंते स्वाहासमन्वितैः ॥ १६ ॥ नामभिर्वलिमंत्रैश्च नमस्कारसमन्वितैः ॥ दद्याच्चतुष्पथे शूर्पे कुशानास्तीर्य सर्वशः ॥
१७ ॥ कृताकृतांस्तंडुलांश्च पललौदनमेव च ॥ मत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेव तु ॥ १८ ॥ पुष्पं चित्रं सुगंधं च सुरां च

248

॥ रामः ॥

॥ २४८ ॥

त्रिविधामपि । मूलकं पूरिकापूपं तथैवौंडेरकं स्रजम् ॥ १९ ॥ दूर्वां सर्वत्र दद्याद्गणेंद्रायार्घ्यपूर्णांऽजलाम् ॥ विनायकस्य
जननीमुपतिष्ठेत्ततोऽम्बिकाम् ॥ २० ॥ रूपं देहि यशो देहि भगं भगवति देहि मे ॥ पुत्रान्देहि धनं देहि सर्वकामांश्च देहि मे ॥ २१ ॥
ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनः ॥ भोजयेद्ब्राह्मणान्दद्याद्वस्त्रयुग्मं गुरोरपि ॥ २२ ॥ एवं विनायकं पूज्य ग्रहांश्चैव विधा
नतः ॥ कर्मणां फलमाप्नोति श्रियमाप्नोत्यनुत्तमाम् ॥ २३ ॥ आदित्यस्य तथा पूजां तिलकं स्वामिनस्तथा महागणपतेश्चैव
कुर्वन्सिद्धिमवाप्नुयात् ॥ २४ ॥ श्वेतार्कस्य तु यो मूले महागणपतिः कृतः । सर्वलक्षणसंपूर्णः सोऽपि सिद्धिकरः स्मृतः ॥ २५ ॥ सं
गच्छतेभ्यौ देहो विघ्नं नात्र हि देहिनः ॥ यः समं पूजयेन्नित्यं गंधमाल्यस्रगादिभिः ॥ २६ ॥ श्रीगणाध्योऽपि दृष्टः पूजितश्च नरेश्व
रः ॥ सर्वसिद्धिमवाप्नोति जयी भवति सर्वदा ॥ २७ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे
गणनाथशांतिवर्णनं नाम चतुश्चत्वारिंशदुत्तरशततमोऽध्यायः ॥ १४४ ॥ ॥ श्रीकृष्ण उवाच ॥ अग्निहोत्रे सुखासीनं ग
र्गः पृच्छति कौशिकम् ॥ बंधने संनिरोधे च व्याधीनां संप्रपीडने ॥ १ ॥ कथं मोक्षो भवेत्तस्य आसाध्यं ब्रवीहि मे गर्गेण कौ
शिकः पृष्ट इदं वचनमब्रवीत् ॥ २ ॥ आधाने जन्मनक्षत्रे नैधने प्रत्वरे तथा ॥ व्याधिरुत्पद्यते यस्य कृच्छ्राय मरणाय च ॥ ३
कृत्तिकासु यदा कश्चिद्व्याधिं संप्रतिपद्यते ॥ नवरात्रं भवेत्पीडा त्रिरात्रं रोहिणीषु च ॥ ४ ॥ मृगशीर्षे पंचरात्रमार्द्रायां प्राण

वियोजिनी॥ उत्तर्क्षे सौवर्णचवसपूर्णं विधीयते॥५॥ नवरात्रं तथाश्लेषा स्मृता लांतं मघायुत॥ होमासौ फाल्गुनी वैवड्
नरात्रु त्रिपक्षकम्॥६॥ हस्ते वनं तु दण्डेन चित्रायांतर्द्धमासकम्॥७॥ मासषट्कं तथा स्वातौ विशाखा त्वविंशा निर्दिशा॥ मैत्रे
वैवदशाहं तु ज्येष्ठा वैवार्द्धमासिका॥८॥ मूलेन जायते मोक्ष स्त्वाषाढा तु त्रिपंचकम्॥ उत्तरादि नविंशत्या होमासौ श्रवणो
नतु॥९॥ धनिष्ठायामर्द्धमासं वारुणो तु दशाहभिः॥ नवभाद्रपदा ऋक्षस्तु उत्तरासु त्रिपंचकम्॥१०॥ रेवती दशरात्रं तु महो
रात्रं तथाश्विनी॥ भ्रातौर्वियोजयेन्नित्यं गर्गनाम्नस्त्र संशयः॥११॥ कौत्तिकेन समादिष्टो नक्षत्राधिसंभवः॥ देवहेना
पिज्ञा तमन्नक्षत्रमथ जन्मना॥१२॥ क्षीरवृक्षस्य समिधो जुहुयादग्निदेवते॥ तिलान्नयमृताम्नाम्येयवमेवाग्निदै
वते॥१३॥ प्राजापत्येतु जुहुयाज्ञोग्यवीजकं वकम्॥ सौम्ये प्रियंगवो रोडे सर्प्पिर्मांससमन्वितम्॥१४॥ आदित्ये च
प्रयत्नेन घृताक्ताः सितातंडुलाः॥ पयसर्पिघासार्द्धं वृहस्पत्याधिदैवते॥१५॥ याम्ये बधेर्द्द पत्रैः सर्प्पिः सर्पाधि
दैवते॥ होमः प्रोक्तः प्रियंगूनां नक्षत्रे यामदैवते॥१६॥ सावित्रे दक्षिहोमो च त्वाष्ट्रे चित्रौदनं हविः॥१७॥ यवाम्न
हाज्येन कृते होडे अग्नौ तु पयोदनम्॥ मैत्रे राणाधनुमंत्रेण मैत्रेकं टकमिश्रितम्॥१८॥ नैर्ऋते तिलहोमः स्याडय
ज्येष्ठ कृता हूते॥ अर्द्धवत्से ज्ञासि वीजै वैश्वदेवं तु कारयेत्॥१९॥ रक्ताध्यत्तंडुला श्चैव होतमाप्यदैवते॥ वारु

ला

लोपरि जातानां पुष्पाणां होमइष्यते॥२०॥ अजैकपादेनक्षत्रे प्राजापत्येन तत्समम्॥ आहिर्बुध्नेन नक्षत्रे वैश्वदेवं तु
कारयेत्॥२१॥ रक्ताभ्यन्तगुलाभ्यैव होतव्याश्विनदैवते॥ पौष्णे फलानां संगतिनिजस्याद्वर्षोत्तरं यानम्॥२२॥ सावित्रीहोम
मेकं तु ब्रह्मणाभिहितं तथाम्बरा॥ सर्वज्वरप्रशमनं सर्वज्वरहरं परम्॥२३॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृ
ष्णयुधिष्ठिरसंवादे नक्षत्रहोमविधिवर्णनं नाम पंचचत्वारिंशोत्तरशततमोऽध्यायः॥१४५॥ ॥ श्रीवसिष्ठ उवाच॥
अथातस्तदपि तं वक्ष्ये व्रतं राजन्महाफलम्॥ अपराधशतं येन सर्वं याति क्षमां क्षतम्॥१॥ इक्ष्वाकुरुवाच॥ किं व्रतं तन्म
माचक्ष्व कोऽपराधश्च तं वद॥ कः पूज्यते च दैवतास्मिन् कृतार्थं क्रियते नरैः॥२॥ ॥ श्रीवसिष्ठ उवाच॥ शृणु राजन्महाबा
हो अपराधशतव्रतम्॥ येनानुष्ठितमात्रेण कामसौख्यं लभेन्नरः॥३॥ प्रायश्चित्तान्यशेषाणि सर्वपापापनुत्तये॥ कृता
न्यप्यकृतानि स्युरितिहोवाच पद्मजः॥४॥ पापं गुरुतरं चापि दहत्येतन्नराधिप॥ अपराधशतं राजञ्छृणु सुगदतो म
ममः॥५॥ न करोति नरो मोहाद्व्रतमेतद्दिने दिने॥ अनाश्रमित्वं प्रथमोऽनाग्नेताव्रतहीनता॥६॥ अपत्न्यकत्वमशौचं च
निर्दयत्वं स्पृहालुता॥ अक्षान्तिर्जनपीडा च मायित्वमप्यमंगलम्॥७॥ क्षतव्रतत्वं नास्तिक्यं वेदनिंदा कठोरता॥ असत्य
ताहिंसकत्वं स्तैन्यमिंद्रियविप्लवः॥८॥ मनसोऽनिग्रहश्चैव क्रोधईर्ष्याथमत्सरः॥ दंभः शाठ्यं च धौर्त्यं च कटुकोक्तिः प्रम

दत्ताः ॥ ९ ॥ भार्यामातृसुतादीनां त्यागश्चापूज्यपूजनम् ॥ श्राद्धहानिर्जपत्यागः पंचयज्ञविवर्जनम् ॥ १० ॥ संध्यातर्पणहोमानां हानिरग्नेः प्रणाशनम् ॥ अनृतौ मैथुनं पार्श्वपर्वण्यपि च मैथुनम् ॥ ११ ॥ पैशुनं परदारेषदानं वेश्याभिगामिता ॥ अपात्रदानं चालांचमल्लिकाकृतिभक्षणम् ॥ १२ ॥ अंत्यजागमनं मातृत्यागः पितृविवर्जनम् ॥ पित्रोरभक्तिर्वादेश्च पुराणस्मृतिवर्जनम् ॥ १३ ॥ अभक्ष्यभोजनं चापि पतिद्रोहोऽविचारता ॥ कृषिकर्म क्रियावाहं भार्यासंग्रहकारिता ॥ १४ ॥ इंद्रियाजयमापित्वं विद्याविस्मरणं तथा ॥ शास्त्रत्यागश्चलंचित्रकर्म चानेगधावनम् ॥ १५ ॥ भार्यापुत्रसुतादीनां विक्रयः पशुमैथुनम् ॥ इन्धनार्थद्रुमच्छेदो विलेवार्यादिपूरणम् ॥ १६ ॥ नटगागागमने नृतं विद्यादिक्रयकारिता ॥ वृत्तिलोपो महीपाल याचकत्वं कुमित्रता ॥ १७ ॥ स्त्रीवधो गोवधश्चैव पौरोहित्यं सुहृद्वधः ॥ ऋणहत्यापराज्ञं च भृजान्नस्य निषेवणम् ॥ १८ ॥ अऽस्य वाग्निकर्मत्वमविधित्वं कुपुत्रता ॥ विद्वष्यौपावकत्वं हि वाचालत्वं प्रतिग्रहः ॥ १९ ॥ श्रौतसंस्कारहीनत्वमार्तत्राणविवर्जनम् ॥ ब्रह्महत्या सुरापानं स्वर्णस्तेयमतः परम् ॥ २० ॥ गुरुदाराभिगामित्वं संयोगश्चापि तैः सह ॥ अपराधशतं त्वेतत्कथितं ते महानघ ॥ २१ ॥ अन्येऽपि विविधाः संति प्रोक्ताः प्राधान्यतस्त्वमी ॥ यदि वक्त्रसहस्राणि एकैके जिह्वाशतानि च ॥ २२ ॥ तथाप्येतेन शक्यंते वक्तुं यस्मादनंतकाः ॥ अपराधसहस्राणि लक्षकोटिशतानि च ॥ २३ ॥ तत्संति तत्स्मरणान्नूनं सत्येश

250

स्यानुपूजनात्॥ पूजितेभगवानत्रवृतकृत्येपराजिते॥२४॥ ध्वजेसत्स्थितंभार्यंलक्ष्म्यासहजगत्पति॥ वामदेवस्त
नःपूर्वतःसिंहोदक्षिणोस्थितः॥२५॥ कपिलःपश्चिमायांतुवाराहश्चोत्तरेस्थितः॥ ऊर्ध्ववक्त्रःश्रुतोह्येयपञ्चदैत्यहरंपंचकम्
र्द्ध॥ तंमत्स्येशंस्थितेराजन्मनजपेत्वसदैवहि॥ क्षीरोदपार्श्वेवंद्रस्यपद्मकर्णिकसंस्थितम्॥२७॥ पद्मकौमोदकीशंखच
क्रायुधविधारणम्॥ वामेवाधस्तथादक्षेतुर्ध्वंपश्चादधोत्तप॥२८॥ पादाधस्ताद्विनिष्क्रांतागंगापूतासदातमिः॥ शान्त
स्यकंतथाचान्यत्तन्नामानिचप्रेभरा॥२९॥ जयापवित्रयाचैवजयंतीपापनाशिनी॥ उन्मीलनीवंजुलीचत्रिस्पृशा
साविवर्द्धना॥३०॥ एताभिःशक्तिभिर्युक्तंलोकदिक्पालवर्जितम्॥ अंकुशंवाधरंसौम्यंपुष्पवद्वदनंशिवम्॥३१॥ सर्वाभ
रणशोभाढ्यंभुक्तिमुक्तिप्रदंहरिम्॥ पूजयेत्तुप्रयत्नेनविधिनायेनतंशृणु॥३२॥ मार्गशीर्षादिमासेषुद्वादश्यांत्वपिसर्व
दा॥ द्वादश्यामथवामावास्यामथ्यांचसितासिते॥३३॥ कृतोपवासःशुद्धात्माकुर्याद्व्रतमखंडितः॥ पक्षयोरुभयोरेवंपू
जयेऽहंजनार्दनम्॥३४॥ एवंतुनियमंकृत्वादंतधावनपूर्वकम्॥ गच्छेन्नतल्लडागेवापुष्करिण्यांगृहेऽपिवा॥३५॥ स्ना
त्वातुनैत्यकंकर्मकृत्वानैमित्तिकंततः॥ कुर्यात्सर्वंप्रयत्नेनयथावदनुपूर्वशः॥३६॥ सौवर्णंकारयेद्देवंपूर्वोक्तंसत्स्वरू
पिणम्॥ यत्नेचक्रयुतंलक्ष्म्यायुक्तंपचास्त्रनत्थया॥३७॥ सुवर्णपलमानेनकार्यमेतत्स्वविस्तरम्॥ ऊर्ध्वकेमो

परिष्वान्नस्वर्णपात्रंप्रकल्पयेत ॥३८॥ ततःकर्णिकागतंदेवंशान्तिवृंदसमन्वितम् ॥ पूजयेद्विधिवत्सम्यग्हृन्मंत्रप्रबोदि
त ॥३९॥ भरुभ्रकृत्मास्वारधरोमंत्रसंभारसंस्थितः ॥ देवक्षीरसमुद्रेऽस्मिन्कृतेवंडेवपुष्करे ॥४०॥ तत्रत्वंसत्ययासार्द्धंस
न्नेहाभवसन्निधौ ॥ ॐ क्षीरसागरकल्लोलेल्लाहिपापनिषूदन ॥४१॥ अनेनमन्तमञ्चेनदत्तेनजलविंदुना ॥ हरस्वस
र्वंदुरितंममनाथजनार्दन ॥४२॥ वस्त्रदानेनभग्नेणासन्तोषाकुरुमेऽच्युत ॥ यज्ञेयोगेनथातांत्वेपवित्रत्वंसदोच्यते
॥४३॥ यज्ञोपवीतदानेनकुरुमांसर्वपावनम् ॥ विलिप्तंकर्मणासर्वंसत्वंसत्वंनकेनचित ॥४४॥ ममचंदनलिप्तांगःसर्व
लेपापहोभव ॥ सत्यनाथनमस्तुभ्यंमूर्त्तामर्त्तस्वरूपिणो ॥४५॥ वासुदेवनृसिंहाख्यकपिलादिअमधर ॥ वाराहवामनय
ज्ञेशालक्ष्मीकांतनपेश्वरः ॥४६॥ पभ्रंपुत्रंचमेदेहि पापशान्तोनिरंजन ॥ संकर्षणमहावीर्यसर्वेशामितविक्रमः ॥४७॥
अनिरुद्धेनगोविंदधृतचक्रनमोस्तुते ॥४८॥ पूजामंत्रः ॥ कृष्णकृष्णप्रभोरामरामकृपेविभोहरे ॥ त्राहिमांसर्वदुःखेभ्यो
रमयासहमाधव ॥४९॥ पूजावेषंमयादत्तापितासहजगद्गुरो ॥ गृहाणजगदीशाननारायणनमोस्तुते ॥५०॥ धृतंगु
प्तंमहीपालसर्वपापापनुत्तये ॥ एकस्मैवनुविप्रस्ययावद्वर्षंसमर्पयेत ॥५१॥ दानंदद्यामहाराजलक्ष्याकौतदभाव
तः ॥ पक्षेपक्षेप्रकर्त्तव्यंव्रतमेतन्महत्तरम् ॥५२॥ संवत्सरेततःपूर्णेकुर्यादुद्यापनंबुधः ॥ पूर्ववत्पूजयेद्देवंवकृसं

251

भारविस्तरैः॥५३॥ अनुज्ञां प्रार्थयेद्विप्रान्पापध्वंसो ममास्तु वै॥ पापध्वंसोऽस्तु सन्ततं तवेति च द्विजो वदेत॥५४॥ न
नः सर्वब्राह्मणाय समर्प्य वस्त्रमातयेत॥ अस्मिन्व्रते कृते राजन्मठे ठकृफलोदय॥५५॥ यत्फलं सर्ववेदेषु सर्वतीर्थेषु
यत्फलम॥ तत्फलं कोटिगुणितं व्रतस्यास्य निषेवणात॥५६॥ इह लोके धनं धान्यं पुत्रमित्रसुखादिकम॥ प्राप्नोति पुरु
षः सम्यग्विधारोग्यकलायुधम॥५७॥ धर्ममर्थं च कामं च मोक्षं चन्तपसन्तम॥ लभते नात्र संदेहो ब्रह्मणो वचनं यथा॥
५८॥ यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते॥ यः कुर्यात्तु नरे नादिसोऽनन्तफलभाग्भवेत॥५९॥ अशक्तस्तु तथाश
क्तो वित्तशाठ्यविवर्जितः॥ व्रतं कुर्वन्नरो भक्त्या लभते शाश्वतं पदम॥६०॥ कृते वै क्रियमाणे तु कर्ता फलमवाप्नुयात॥
अपराधशतानां घोघं व्रतेनानेन नाशयेत॥६१॥ ॥इति श्रीभविष्यपुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे अपराध
शतव्रतनवमीनं नाम षट्चत्वारिंशोऽत्तरशततमोऽध्यायः॥१४६॥ ॥श्रीकृष्ण उवाच॥ श्वेतद्वीपे सुखासीनं देवदेवं ज
गत्प्रभुम॥ वासुदेवं जगन्नाथं स्थितिसंयमकारकम्॥१॥ परावराणां स्रष्टारं पुराणं परमव्ययम्॥ आदिदेवं ज
गन्नाथं जगतः कारणात्मकम॥२॥ प्रणिपत्य महादेवं चराचरगुरुं हरिम॥ लक्ष्मीः प्रोवाच राजेन्द्र पादसंवाहने
स्थिता॥३॥ भगवन्देवदेवेश भक्तानामनुकंपक॥ प्रष्टव्यं किंचिदिच्छामि प्रभुप्रश्नविदां वर॥४०॥ प्रकरुष्यस

हाभाग दयां कृत्वा ममोपरि ॥ व्रतं किंचित्कथय मे रूपसौभाग्यदायकम् ॥ ५ ॥ उत्तमं सर्ववर्णानां व्रतानामपि चो
त्तमम् ॥ कृतेन येन देवेश सर्वतीर्थफलं भवेत् ॥ ६ ॥ शिव उवाच ॥ गृहस्थश्चाश्रमाणां च वर्णानां ब्राह्मणो यथा ॥ य
था नदीषु सर्वासु जाह्नवी लोकविश्रुता ॥ ७ ॥ ह्रदानामुदधिः श्रेष्ठो देवानां विष्णुरुत्तमः ॥ स्त्रीणां देवी यथा लक्ष्मीस्तथेदं
व्रतमुत्तमम् ॥ ८ ॥ न गंगा कुरुक्षेत्रं न काशी न च पुष्करम् ॥ पावनानि महाभागे यथेदं व्रतमुत्तमम् ॥ ९ ॥ गौर्या देव्या
कृतं पूर्वं शंकरेण महात्मना ॥ रामेण सीतया सार्धं राज्यं प्राप्य कृतं पुरा ॥ १० ॥ दमयंती वियोगेन नलेन तु तथा कृतम् ॥
कुंत्या सहितैः पार्थैः पांडवैर्वनवासिभिः ॥ ११ ॥ कृतमेतद्व्रतं भद्रे स्वर्गमोक्षप्रदायकम् ॥ रंभया मेनया वापि पौलोम्या स
त्यभामया ॥ १२ ॥ शांडिल्या वाप्यरुंधत्या उर्वश्या देवदत्तया ॥ कृतं व्रतमिदं भद्रे सौभाग्यफलकाम्यया ॥ १३ ॥ पाताले नाग
कन्याभिः कृतमेतत्सुशोभनम् ॥ गायत्र्या सरस्वत्या सावित्र्या ब्रह्मभार्यया ॥ १४ ॥ अन्याभिः सर्वनारीभिः सर्वकामफलेप्सुभिः
तस्मात्ते संप्रवक्ष्यामि सर्वपापप्रणाशनम् ॥ १५ ॥ बहुप्रीतिकरं रम्यं व्रतानां परमं शुभम् ॥ ब्रह्महा मुच्यते पापात्सुरापो व
सुहारकः ॥ १६ ॥ गुरुभार्याभिगामी च ह्येतेषां संगमी च यः ॥ मानकूटं तुलाकूटं कन्या हृतिर्गवां व्रती ॥ १७ ॥ अगम्याग
मनो यस्तु मांसाशी वृषलीपतिः ॥ कुंडाग्निभोजी यस्तुष्याद्भूमिहर्ता तथैव च ॥ १८ ॥ एभिः सर्वैर्महापापैर्मुच्यते ना

नाम गृह्णाति धर्मं मयाप्नं देवि सौख्यं प्रयच्छ मे ॥ ७४ ॥ य एवं पुरतो दत्वा पर्वार्क्के विधिना तव ॥ रात्रौ जागरणं कुर्या-
द्भक्तियुक्तेन चेतसा ॥ ७५ ॥ गीतनृत्यविनोदेन तु पाख्यानैश्च वैष्णवैः येन केन विनोदेन निद्रा नैव प्रजायते ॥ ७६ ॥ उन्नि-
द्रो जागरे यस्तु स्नानयज्ञफलं लभेत ॥ प्रभाते विमले स्नात्वा संपूज्य पितृदेवताः ॥ ७७ ॥ ब्राह्मणाश्च सपत्नीकान्सादिधाप्पि
नु भोजयेत ॥ दक्षिणाश्च यथाशक्त्या प्रदापयेद्वस्त्रमापयेत ॥ ७८ ॥ दीनान्धबधिरान्पंगून्सर्वान्तान्परितोषयेत ॥ पश्चात्पा-
रणकं कार्यमुपवासी भवेद्यदि ॥ ७९ ॥ मधुरं पयसा युक्तं गृहे हि र्विविधैः सह ॥ एवमेतत्कृतं कार्यमेकादश्यां भुवि स्थितं ॥ ८०
भ्रस्नायामथ कृष्णायां तन्नीयायां तथा नियौ ॥ संक्रान्तिग्रहणे चापि अमनीयाने च वैधृतौ ॥ ८१ ॥ यदवाप्नुयात्तेचितं
वरवर्णिनि । गवां निकायप्रदानतः क्राकृलोमे प्रीयतामिति ति ॥ ८२ ॥ एवं कृते च यत्पुण्यं तन्नहास्यं निवेदितं मया ॥ अणिवर्षस-
हस्रेण कल्पलक्षसहस्रैरपि ॥ ८३ ॥ कल्पकोटिसहस्राणि कल्पकोटिशतानि च ॥ ब्रह्मलोकं समासाद्य प्रतिमोदति ब्रह्मणा
८४ ॥ ब्रह्मलोकाद्रुद्रलोकं तत्सांनिध्यसंनिधौ ॥ इंद्रादिलोकपालानां ब्रती लोकमवाप्नुयात ॥ ८५ ॥ ततो भूत्वा भुवि: पृथ्वी
मान्भोगांश्च त्रैलोक्यसुंदरि ॥ चक्रवर्ती भवेन्मूर्खो ब्रह्मण्यो वैष्णवस्तथा ॥ ८६ ॥ यद्यदिष्टतमं याति नित्यं वाच्छमानं तम
नतः ॥ फलसपन्नकमहृत्य वैष्णवं लोकमाप्नुयात ॥ ८७ ॥ त्वया कांचनपूर्यायं ब्रतमेतत्कृतं पुरा ॥ तेन पापेन

वितानवरमंडिताः ॥ पुष्पमालान्विताः कार्या दिव्यधूपाधिवासिता ॥ ३३ ॥ मध्ये तु मंडलं कार्यं पद्माख्यं वर्णकैः शुभैः ॥ ये
न दृष्टेन देवेशि सर्वपापक्षयो भवेत् ॥ मंडलस्य तु मध्ये वै भद्रपीठं सुशोभनम् ॥ ३४ ॥ आसनं तत्र विन्यस्य कोमलं वस्त्रवेष्टि
तम् ॥ तस्योपरि न्यसेद्देवं लक्ष्म्या युक्तं जनार्दनम् ॥ ३५ ॥ अग्रे तु कलशाः कार्या जलपूर्णाः सुशोभनाः ॥ क्षीरसागरनामास
कल्पितमः प्रयत्नतः ॥ ३६ ॥ पंचरत्नसमायुक्तं वस्त्रेणावेष्टयेद्घनम् ॥ कुंभं च पूर्णमुदकैस्तस्योपरि न्यसेद्बुधः ॥ ३७ ॥ तस्यो
परिष्टात्संस्थाप्य कांचनं तारमांडरीभभागम् ॥ वनुष्पला युतमाल्याद्विपलांम ध्यमा कृता ॥ ३८ ॥ मामास्यैकपला कार्या
कलशोस्तु समन्विता ॥ मोदकान्स्थापयेद्दिव्यान्समंतात्सुंदराकृतीन् ॥ ३९ ॥ तदग्रे कदलीस्तंभैस्तोरणं परिकल्पयेत् ॥ वा
न्येभ्यराणि कांस्यत्र विप्राना बालसुंदरी ॥ ४० ॥ प्रतिष्ठां कारयेत्तस्याः वेदमंत्रैः सुशोभनैः ॥ तस्या मध्ये न्यसेद्दिव्यं हैमं लक्ष्मा
समन्वितम् ॥ ४१ ॥ नेत्रे रत्नमये कार्ये दशना वज्रभूषिता ॥ मुक्ताफलमयं तस्य भूषणं परिकल्पयेत् ॥ ४२ ॥ अंगं स्व
र्णमयं कार्यं शंखचक्रगदायुधम् ॥ पंचामृतेन देवेशं स्नापयेन्नारायणं विभुम् ॥ ४३ ॥ तमेव गंधपुष्पाद्यैर्मंत्रमु
ख्यार्यपूजयेत् ॥ ब्राह्मणो वैदिकैर्मंत्रैः पूजयेन्मधुसूदनम् ॥ ४४ ॥ शेषा वर्णाः पुराणोक्तैः स्ना[illegible]समप्रिये ॥
वासुदेवाय पादेन गुल्फौ संकर्षणाय च ॥ ४५ ॥ त्रैलोक्यजननकायेति जानुनी पूजयेद्धरेः ॥ त्रैलोक्यनाथाय गुह्ये ज्ञान

नाम गृहाणार्घ्यंमयादत्तं देविसौख्यंप्रयच्छमे ॥ ७४ ॥ एवंसंपूर्णतोदत्वापूर्वोक्तविधिनानघ ॥ रात्रौजागरणंकुर्याद्भक्तियुक्तेनचेतसा ॥ ७५ ॥ गीतनृत्यविनोदेनतुपुराख्यानैश्चवैष्णवैः येनकेनविनोदेननिद्रानैवप्रजायते ॥ ७६ ॥ उन्निद्रोजागरेयस्तुस्यातयज्ञफलंलभेत ॥ प्रभातेविमलेस्नात्वासंपूज्यपितृदेवताः ॥ ७७ ॥ ब्राह्मणाश्चसपत्नीकास्वारिधाम्नि भोजयेत ॥ दक्षिणाश्चयथाशक्त्याप्रदायचक्षमापयेत ॥ ७८ ॥ दीनांधबधिरान्पंगून्सर्वांस्तान्परितोषयेत ॥ पश्चात्पारणकंकार्यमुपवासीभवेद्यदि ॥ ७९ ॥ मधुरंपयसायुक्तंसुहृद्भिर्बांधवैःसह ॥ एवमेतत्कृतंकार्यमेकादश्यांभुविस्थितं ॥ ८० अष्टम्यामथकृष्णायांतृतीयायांतथातिथौ ॥ संक्रांतिवासरेवापिव्यतीपातेचवैधृतौ ॥ ८१ ॥ यद्दत्वाप्राप्यतेवित्तं सवर्णरवर्णानि । गवादिकाप्रदानतस्मात्कृष्णोमेप्रीयतामिति ॥ ८२ ॥ एवंकृतेवदानस्तुत्पेंनःनशाकंनिवेदितम ॥ अभिवर्द्धसहस्रेणकल्पलक्षसहस्रैरपि ॥ ८३ ॥ कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ ब्रह्मलोकंसमासाद्यप्रतिमोदतिब्रह्मणा ॥ ८४ ॥ ब्रह्मलोकादूर्द्धलोकंतत्रविष्णुसंनिधौ ॥ इंद्रादिलोकपालानांव्रजतीलोकमवाप्नुयात ॥ ८५ ॥ ततोमर्त्याभुविःप्राप्त्वाभोगांस्त्रैलोक्यसुंदरान् ॥ चक्रवर्तीभवेद्भूमौब्रह्मण्योवैष्णवस्तथा ॥ ८६ ॥ यइदंशृणुयान्नित्यंवाच्यमानंतमंततः ॥ कुलसप्तकमुद्धृत्यवैष्णवंलोकमाप्नुयात ॥ ८७ ॥ त्वयाकांचनपूर्णाख्यंव्रतमेतत्कृतंपुरा ॥ तेनपापेन

वितानवरमंडिताः || पुष्पमालान्विताः कार्यादिग्मध्यपाधिवासिता || ३३ || मध्ये तु मंडलं कार्यंपञ्चाख्यंवर्णकैःशुभैः || ये
नदृष्टेन देवेशि सर्वपापक्षयो भवेत् || मंडलस्य तु मध्ये वै भद्रपीठं सुशोभनम् || ३४ || आसनं तत्र विन्यस्य कोमलं वस्त्रवेष्टि
तम् || तस्योपरि न्यसेद्देवं लक्ष्म्या युक्तं जनार्दनम् || ३५ || अग्नेतु कलशाः कार्या जलपूर्णाः सुशोभनाः || क्षीरसागरनामास
कल्पितश्चः प्रयत्नतः || ३६ || पंचरत्नसमायुक्तं वस्त्रेणावेष्टयेद्घनम् || कुम्भं प्रपूर्णमुदकैस्तस्योपरि न्यसेद्बुधः || ३७ || तस्यो
परिष्टात्संस्थाप्य कांचनारमांशुभाम् || चतुष्पलातन्माल्याद्विपलां सधमात्कृता || ३८ || सामान्यैकपला कार्या
कलशोत्तुसमन्विता || मोदकान्स्थापयेद्दिव्यान्समंतात्सुंदराकृतीन् || ३९ || तदग्रे कदलीस्तंभैस्तोरणं परिकल्पयेत् || वा
नुभ्वराणि कांस्तत्र विप्राता वाह्यसुंदरी || ४० || प्रति[illegible]ं कारयेत्तस्या वेदमंत्रैः सुशोभनैः || तस्या मध्ये न्यसेद्दिव्यं हैमं लक्ष्म्या
समन्वितम् || ४१ || नेत्रे रत्नमये कार्ये दशना वज्रभूषिताः || मुक्ताफलमयं तस्य भूषणं परिकल्पयेत् || ४२ || अंगं स्व
र्णमयं कार्यं शंखचक्रगदाब्जधम् || पंचामृतेन देवेशं स्नापयेन्नारायणं विभुम् || ४३ || तमेव गंधपुष्पाद्यैर्मंत्रमु
ख्यार्घ्यपूजयेत् || ब्राह्मणो वैदिकैर्मंत्रैः पूजयेन्मधुसूदनम् || ४४ || शूद्रा वर्णाः पुराणोक्तैस्तन्त्रोक्तैर्वा ममप्रिये ||
वासुदेवाय पादौतु गुल्फौ संकर्षणाय च || ४५ || त्रैलोक्यजननकायेति जानुनी पूजयेद्वरे || त्रैलोक्यनाथाय गुह्ये स्नान

253

नाम गृहाणार्घ्यं मया दत्तं देवि सौख्यं प्रयच्छ मे || ७४ || य एवं पूरतो दत्वा पूर्वोक्तविधिना ततः || रात्रौ जागरणं कुर्या-
द्भक्तियुक्तेन चेतसा || ७५ || गीतनृत्यविनोदेन पुराणाख्यानैश्च वैदिकैः यैन केन विनोदेन निद्रा नैव प्रजायते || ७६ || उन्नि-
द्रो जागरे यस्तु शतयज्ञफलं लभेत || प्रभाते विमले स्नात्वा सं पूज्य पितृदेवताः || ७७ || ब्राह्मणांश्च सपत्नीकान्परिधाप्या-
नु भोजयेत || दक्षिणाञ्च यथाशक्त्या प्रदद्याच्च क्षमापयेत || ७८ || दीनान्धबधिरान्पंगून्सर्वांस्तान्परितोषयेत || पश्चात्पा-
रणकं कार्यं स्वपत्नी भवेद्यदि || ७९ || मधुरं पयसा युक्तं सुहृद्भिर्बान्धवैः सह || एवमेतद्व्रतं कार्यमेकादश्यां भुवि स्थितं || ८०
शुक्लायामथ कृष्णायां तृतीयायां तथा तिथौ || संक्रान्तिवासरे वापि व्यतीपाते च वैधृतौ || ८१ || यदा वा जायते वित्तं
सद्रव्यं वर्णानि गवादिकाः प्रदातव्याः कृष्णो मे प्रीयतामिति || ८२ || एवं कृते च यत्पुण्यं तन्न शक्यं निवेदितम || अपि वर्षस-
हस्रेण कल्पकल्पशतैरपि || ८३ || कल्पकोटिसहस्राणि कल्पकोटिशतानि च || ब्रह्मलोकं समासाद्य प्रतिमोदति ब्रह्मणा-
८४ || ब्रह्मलोकाद्रुद्रलोकं तस्माद्विष्णुसंनिधौ || इन्द्रादिलोकपालानां व्रती लोकमवाप्नुयात || ८५ || ततो भुक्त्वा भुविः पृथ्वी-
मान्भोगांस्त्रैलोकान्मुदा || चक्रवर्ती भवेद्भूमौ ब्रह्मण्यो वैष्णवस्तथा || ८६ || य इदं शृणुयान्नित्यं वाच्यमानं सम-
न्ततः || कुलसप्तकमुद्धृत्य वैष्णवं लोकमाप्नुयात || ८७ || त्वया काञ्चनपर्याप्तं व्रतमेतत्कृतं पुरा || तेन पापेन

व्रतेपूर्णे च गौर्देया सर्वोपस्करसंयुता ॥ भूरीं घटां पयेत्सर्वं वस्त्रेणाच्छादयेत्ततः ॥ तथा कुर्यात्प्रयत्नेन यथा कर्त्ता न
पश्यति ॥ ६१ ॥ दीपांस्तु दीपितांस्तत्र आनयेद्व्रतमण्डपम् ॥ स्वेन वस्त्रेण तेनैव तेनु यत्नमानन्यचद्विये ॥ ६२ ॥ आचार्यः शास्त्रवि
त्स्नात भावध्यनयनेतन ॥ आवधने वेनुप्राह आचार्यस्तमिदं वदेत् ॥ ६३ ॥ सर्वकामप्रदा पुण्यकाञ्चनाढ्यां पुरीमिमाम्
वरवस्त्रयुतां रम्यां ऽः स्वदे भाग्यनाशिनीम् ॥ ६४ ॥ रूपवम्नकामहाभागपद्मनस्मन्ते व्रयोः ॥ पृथ्व्यांतलें गुरौ क्षिप्तास
पद्मयेतां पुरीं प्रभाम् ॥ ६५ ॥ इच्छन्तां नगरीं देवि यत्नमानः समाहितः ॥ सौवर्णी पात्रमादाय रौप्यं ताम्रमथापि वा ॥ ६६ ॥
मथवाशं चमादाय पात्रा लाभेन सुंदरी ॥ पवरत्न क्षिपेत्मात्रेनतं गांगं तथा फलम् ॥ ६७ ॥ सिद्धार्थमक्षताप्र्वरो
चनादधिवापुनः ॥ ततस्त्वार्घः प्रदातव्यः कन्यायप्रभविष्णवे ॥ ६८ ॥ लक्ष्मीनारायणौ देवौ सर्वकामफलप्रदौ ॥ रू
कमपूर्याः प्रदानेन यच्छेतां वांछितं मम ॥ ६९ ॥ नारायण हृषीकेश ज्ञानज्ञेयनिरंजन ॥ लक्ष्मीकान्त जगन्नाथ गृहा
णार्घ्यं नमोऽस्तु ते ॥ ७० ॥ अर्घमन्त्रः ॥ रूपमर्घ्यं ततो दत्वा विष्णवे प्रभविष्णवे । देवाय त्वर्घः प्रदातव्यो भक्तियुक्तेन वे
तसा ॥ ७१ ॥ जानुभ्यामवनिं गत्वा मंत्रमेतउदीरयेत् ॥ ब्रह्मणा पूजिता देवी विष्णुना शंकरेण च ॥ ७२ ॥ पार्वत्या पूजि
ता लक्ष्मीः स्कंदेवैश्रवणेन च ॥ मया च पूजिता देवि धर्मस्य विजिगीषया ॥ ७३ ॥ सौभाग्यं देहि मे पुत्रान्धनं पौत्रांश्च पूजि

254

भारते उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कन्याप्रदानं नाम साष्टचत्वारिंशोत्तरशततमोऽध्यायः ॥ १४८ ॥ ॥
श्रीकृष्ण उवाच ॥ ब्राह्मणा दैवतं भूमौ ब्राह्मणा दिवि दैवतम् ॥ ब्राह्मणेभ्यः परं नास्ति नास्ति भूतं जगत्त्रये ॥ १ ॥ अदेवं दै-
वतं कुर्युः कुर्युर्दैवमदैवतम् ॥ ब्राह्मणा हि महाभागाः पूज्यंते सततं द्विजाः ॥ २ ॥ ब्राह्मणेभ्यः समुत्पन्ना देवाः पूर्वमिति
स्मृतिः ॥ ब्राह्मणेभ्यो जगत्सर्वं तस्मात्पूज्यतमा द्विजाः ॥ ३ ॥ येषामश्नंति वक्त्रेण देवताः पितरस्तथा ॥ ऋषयश्च त-
था नागाः किं भूतमधिकं ततः ॥ ४ ॥ यद्देवमनुजो भक्त्या ब्राह्मणेभ्यः प्रयच्छति ॥ तदेवाप्नोति धर्मज्ञ वहुजन्मनि ज-
न्मनि ॥ ५ ॥ तालवृंतानिलेनैव श्रांतसंवाहनेन च ॥ उत्सादनेन गात्राणां तथा चांजनकर्मणा ॥ ६ ॥ पादशौचप्रदाने-
न पादयोः सेचनेन च ॥ परिचर्यां तथा काममेकेनैव द्विजोत्त-
म ॥ ७ ॥ अतिपूज्यापि तसमाप्नोति स्वर्गलोकं च शाश्वत-
म ॥ ब्राह्मणानां शुभं कृत्वा नाकलोके महीयते ॥ [illegible] यद्ब्राह्मणास्तुष्टिमंतो वदंति प्रत्यक्षदेवे भुपते सदेवाः ॥ न दै-
भं तस्तातरस्य नूनं भवेदतस्मात्सततं निषेवेत ॥ ८ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधि-
ष्ठिरसंवादे ब्राह्मणभुञ्जाविधिवर्णनं नामैकोनपंचाशदुत्तरशततमोऽध्यायः ॥ १४९ ॥ ॥ युधिष्ठिर उवाच ॥
युष्मद्वाक्यामृतमिदं श्रुतं त्वत्तो जनार्दन ॥ न तृप्तिमधिगच्छामि ज्ञातं कौतूहलं हि मे ॥ १ ॥ गोपतिः किल गोविंद

लब्धोऽहं भर्त्तास्त्रैलोक्यपूजितः ॥ ८८ ॥ इति श्रीभविष्ये महापुराणे श्रीविष्णुलक्ष्मीसंवादे काञ्चनपुरीव्रतव
र्णनं नाम सप्तचत्वारिंशोत्तरशततमोऽध्यायः ॥ १४७ ॥ अथ कन्यादानम् ॥ श्रीकृष्ण उवाच ॥ ब्रह्मदेयानु यः क
न्यामलंकृत्य प्रयच्छति ॥ सप्तपूर्वान्भविष्यांश्च स्वकुले सप्तमानवान् ॥ १ ॥ तेन कन्याप्रदानेन समतारयसमंता
यम् ॥ लोकानाप्नोति वितथाद्दक्षस्यैव प्रजापतेः ॥ २ ॥ प्राजापत्येन विधिनानं च समकृत्वं सम्लेतपमवाप्नोति
स्वर्गलोकं च गच्छति ॥ ३ ॥ भगवाश्वप्रदानानि गजदानं तथैव च ॥ दत्वानुवर्त्तिहीनाय योरेनमलिमज्जति ॥ ४
वरूवर्षसहस्राणि पुरीषं का कमश्नुते ॥ भक्तेन दत्वा कन्यां च घोरं नरकमाप्नुयात् ॥ ५ ॥ तद्वस्वद्वसहस्राणि तथा अभ्र
विभुङ्नरः ॥ सवर्णाय सवर्णो यो दद्यात्कन्यां यथाविधि ॥ ६ ॥ दत्वा चाधिकवर्णाय द्विगुणां निर्गुणां तथा ॥ क्षिप्रपुत्र
गतार्थं वा संस्कुर्याद्यश्च कर्मभिः ॥ ७ ॥ वृजोपनयनाद्यैश्च सोऽश्वमेधफलं लभेत् ॥ अनाथां कन्यकां दत्वा नाकलोके
महीयते ॥ ८ ॥ कन्यामाहृद्दत्तं च पुनर्गार्गविद्धि स्वलंकृताम् ॥ सकलं क्षितिगुणानां तस्य फलं सुकृतं पुराणैः ॥ ९ ॥ कन्यादानाद
वाप्नोति दक्षलोकं नरोत्तमः ॥ विष्णुपूजासमं पुण्यं तत्कन्यापूजया भवेत् ॥ १० ॥ विमानमाहृत्य मनोभिरामं वरा
ङ्गनागीतविलाससहृद्यम् ॥ प्राप्नोति लोकं त्रिदशोत्तमानां कन्याप्रदानाद्भविताशयोति ॥ ११ ॥ इति श्रीभविष्य

आर्घमेतत् २

नयापवैकदिम॥४७॥दामोदरायेत्युदरं हृदयं विश्वरूपिणो॥ नित्यं हि पूजयेद्देवि उरः श्रीवत्सधारिणो॥४८॥ कं
ठं कौस्तुभनाथाय आस्यं यज्ञमुखाय च॥ दैत्यांतकारिणो बाहू स्वेर्नामे रौद्रधानि च॥४९॥ शिरः सर्वात्मने देवि देवदे
वस्य पूजयेत्॥ त्रिपंच पूजयेद्देवीं देव्या मंत्रैः पृथग्विधैः॥५०॥ इन्द्रादिलोकपालानां पूजा कार्या यथाक्रमम्॥ नव
ग्रहाणां च होमः कर्तव्यो विघ्ननाशनः॥५१॥ पूजा गणपतेः कार्या तथा होमं विधानतः॥ अग्रे नैवेद्यमतुलं दापयेद्घृ
तपायसम्॥५२॥ पायसं घृतपूरांश्च मोदकान्पूरिकास्तथा॥ सोहालिकादिनैवेद्यं पेणिकाः शर्करास्तथा॥५३॥
देशकालोद्भवान्येव फलानि विनिवेदयेत्॥ दीपान्दशदिशो दयात्सार्पिषा नक्तवर्तिकान्॥५४॥ एतेन तु विधा
नाक्षिमूलमंत्रेण दापयेत्॥ पुष्पमालाभिवितानं कृत्वा चंदनेन विभूषितान्॥५५॥ आमिमंत्र्य प्रयत्नेन विप्राँल्ले
वकगावके॥ सहस्रशीर्षादिभिर्मंत्रैर्जपाद्भिर्ब्राह्मणो नमेः॥५६॥ षोडशाथ सपत्नीकान्पूजयेच्च यथाविधि
भूषयेच्च शुभैर्वस्त्रैस्तथालंकारणादिभिः॥५७॥ विप्रेभ्यस्त्वाद्विजः पूज्यो लक्ष्मीमन्त्रा च ब्राह्मणीम्॥ छत्रं चोपान
हं चैव अंगुल्याभरणं तथा॥५८॥ फलानि सप्तधान्यं च भोजनं चापदीपितम्॥ दातव्यं च सभार्याय कृष्णो मे
प्रीयतामिति॥५९॥ शय्यां सोपस्करां चैव वस्त्रेणाच्छादयेत्ततः॥ तथा प्रकल्पयेद्धित्तशात्याव सुंदरी यथा॥६०

स्त्रिषुलोकेषु विश्रुतः ॥ गोवृषस्य प्रदानेन त्रैलोक्यमभिनंदति ॥ २ ॥ तस्मात्सोत्वृषकल्पस्य विधानं कथयाच्युत ॥ ३ ॥
श्रीकृ॰ष्णउवाच ॥ वृषदानफलं पुण्यं शृणुष्व कथयामि ते ॥ पवित्रं पावनं चैव सर्वदानोत्तमं तथा ॥ ४ ॥ दशधेनुसमोनड्वा
नेकश्चैव धुरंधरः ॥ दशधेनुप्रदानाद्धि सम्यग्वैको विशिष्यते ॥ ५ ॥ वोढा च वाहवद्दांगो अरोगः पांडुनंदन सुवाभद्रः
सुशीलश्च सर्वदोषविवर्जितः ॥ ६ ॥ धुरंधरः स्थापयते एकः स्वकुलं महत् ॥ ज्ञाना भवति संसारे नात्र कार्या विचारणा ।
७ ॥ अलंकृत्य वृषं शांतं पुण्येऽह्नि समुपस्थिते ॥ रौप्यलांगूलसंयुक्तं ब्राह्मणाय निवेदयेत् ॥ ८ ॥ मंत्रेणानेन राजेंद्र तं
शृणुष्व वदामि ते ॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक ॥ ९ ॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातन दत्वैवं दक्षिणा
युक्तं प्रणिपत्य विसर्जयेत् ॥ १० ॥ सप्तजन्मकृतं पापं वाङ्मनःकायकर्मजम् ॥ तत्सर्वं विलयं याति गोदानसुकृतेन
च ॥ ११ ॥ यानं वृषभसंयुक्तं दीप्यमानं सुशोभितम् ॥ आरुह्य कामगं दिव्यं स्वर्लोकमधिरोहति ॥ १२ ॥ यावंति तस्य
रोमाणि गोवृषस्य महीपते ॥ तावद्वर्षसहस्राणि गवां लोके महीयते ॥ १३ ॥ गोलोकादवतीर्णस्तु इह लोके द्विजो
त्तमः ॥ यज्ञयाजी महातेजाः सर्वब्राह्मणपूजितः ॥ १४ ॥ न चोक्तं चैव महाराज कस्य देयो वृषोत्तम ॥ तदप्यहं ते व
क्ष्यामि पात्रं त्राणपदं नृणाम् ॥ १५ ॥ येषां सदा वै क्षांतिपरा करुणा जितेन्द्रियाः प्राणिवधे निवृत्ताः ॥ प्रतिग्रहे

256

॥ रामः ॥
॥ २५६ ॥

संकुचिताग्रहस्त्यास्ते ब्राह्मणान्कारयितुं समर्था ॥ १६ ॥ गात्रे दृढं भारसहं सुपुष्टं स्कन्धं गिराणां सर्वगुणोपपन्नम् ॥ दत्त्वर्षभं गोदशकेन तुल्यं भवन्ति भावितफलभागिनस्ते ॥ १७ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वृषदानविधिवर्णनं नाम पंचाशदुत्तरशततमोऽध्यायः ॥ १५० ॥ अथ विविधदानानि ॥ युधिष्ठिर उवाच ॥ अतः परं विविधस्य समादानस्य याच्युत ॥ ससागरान्तां ज्ञात्वा श्रुतं भवतु न विस्तरः ॥ १ ॥ भूयश्च श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ॥ किं दीयते कदा कृष्ण केनोपायेन शंस मे ॥ २ ॥ नहि दानात्परं त्वन्यदस्तीति मे मतिः ॥ धनं धनवतां किंचिद्धार्यं राजनतस्करैः ॥ ३ ॥ श्रीकृष्ण उवाच ॥ अनिश्चितं निधानं तदप्रयुक्तं च वर्द्धते ॥ सनीतं यानि चाध्वानं धनं विप्रकरार्पितम् ॥ ४ ॥ किं कायेन सुपुष्टेन बलिना चिरजीविना ॥ यन्न सत्त्वोपकाराय तज्जीवितमनर्थकम् ॥ ५ ॥ ग्रासादर्द्धमपि ग्रासमर्थिभ्यः किं न दीयते ॥ इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥ ६ ॥ एकस्मिन्नप्यतिक्रान्ते दिने दानविवर्जिते ॥ दस्युभिर्मुषितस्यैव दिवा रात्रौ च शोचति ॥ ७ ॥ यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ॥ स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥ ८ ॥ यैर्न दत्तं न च कृतं न तीर्थे मरणं कृतम् ॥ हिरण्यमन्नमुदकं ब्राह्मणेभ्यो न वार्पितम् ॥ ९ ॥ दीनानिरन्नादुःखार्ताः कपालांकितपाणयः ॥ ते दृश्यन्ते महाराज जायमानाः पुनः पुनः ॥ १० ॥ आयास

पुरुमाक्रंदितुंचिरम ३

त्रिवर्गशून्यस्य ३

धनस्योत्पत्तिकारणं २ दानमेव प्रकर्त्तव्यम् ३

यान लब्धस्य ग्रासोप्योपि गरीयसः ॥ गतिरेकैव वित्तस्य दानमन्या विपत्तयः ॥ ११ ॥ नोपभोगैः क्षयं यान्ति न प्रदानैः सम
द्धयः ॥ पूर्वार्जितानामस्यत्रस्कृतानां परिक्षयात् ॥ १२ ॥ अदृष्टपारं नत्वोपि पात्रेभ्यो विसृजेद्धनम् ॥ यस्मात्स्मतस्यतत्नात्मिन
स्मात्म्यांशपिकं वाम् ॥ १३ ॥ दानानि गऊर्णाणि कथयामि तवानघ ॥ व्यासवाल्मीकिमन्वाद्यैः कथितानि द्विजसत्तम ॥ १४ ॥
किं विद्वन्तं पवित्रं, यनेप्स्यते वा त्रिलोचनः ॥ दीयते यच्च विप्रेभ्यः केन ज्ञास्मनरोः फलम् ॥ १५ ॥ युधिष्ठिर उवाच ॥ ब्राह्मणश्रीणाना
र्थायकेशवस्य शिवस्य च ॥ यानि दानानि देयानि तान्याचक्ष्व यदूत्तम ॥ १६ ॥ येन चैव विधानेन दानं पुण्यफलोदयम् ॥ ऐहि
कामुष्मिकाणां किं करोति नर हिहस्मते ॥ १७ ॥ ॥ श्रीकृष्ण उवाच ॥ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती ॥ आसप्त
मं पुनन्त्येते दोहवाहनवेदनैः ॥ १८ ॥ गोदानमादौ वक्ष्यामि पुत्यश्रक्रमयोगतः ॥ येन चैव विधानेन अस्मन्नाधिकविस्त
रम् ॥ १९ ॥ युधिष्ठिर उवाच ॥ देयाः किंलक्षणा गावः काश्च राजन्विवर्जिताः ॥ कीदृशाय प्रदातव्या न देया कीदृशाय वै ॥
२० ॥ श्रीकृष्ण उवाच ॥ तरुणी रूपसंपन्ना सुशीला च पयस्विनी ॥ न्यायार्जिता सवत्सा च प्रदेया श्रोत्रियस्य गौः ॥ २१
वृद्धा सरोगा हीनांगी वंध्या दुष्टा मृतप्रजा ॥ दूस्थ्याः स्वायलध्वा च देया गौर्न कथंचन ॥ २२ ॥ सा दत्तैव हरेत्पापं श्रोत्रि
यायाहिताग्नये ॥ अतिथिप्रियदांताय धेनुं दद्यास्तगाधिके ॥ २३ ॥ अकुलीनाय मूर्खाय लुब्धाय पिशुनाय च ॥ हव्यक

ऊतम् ४

पुंसः ५

तेन ७

अयोगच्छेद्यत्र गन्तुम

ठाब्धपेनायनदेयागोः कथंवन:॥ २४ ॥ श्रीकृष्ण उवाच॥ उत्पन्ने दिनमथासाद्य स्नात्वा तर्प्यपितं स्तथा॥ घृतक्षीराभिषे
कं च कृत्वा विष्णोः शिवस्य च २५ समभ्यर्च्य यथान्यायं पुष्पादिभिरनुक्रमात॥ उदङ्मुखीं प्राङ्मुखीं गां गछि कृत्वा
पयस्विनी॥ २६॥ सवत्सां वस्त्रसंवीतां सितयज्ञोपवीतिनीम॥ स्वर्णशृंगीं रौप्यखुरां कांस्यदोहनकान्वितां॥ २७॥ शा
लितो दक्षिणायुक्तां ब्राह्मणाय निवेदयेत॥ उक्तेन कृष्णाजिनं देयं मां प्रत्येक रिणां करे॥ २८॥ अभ्यंमदास्यकर्णीकादासीं शिर
सि दापयेत॥ गावो ममाग्रतः सन्तु गावो मे सन्तु पृष्ठतः॥ २९॥ गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम॥ प्रदक्षिणां ततः
कृत्वा धेनुं द्विजवराय ताम॥ ३०॥ इमां च प्रतिगृह्णीष्व धेनुं दत्तां मयानघ॥ एवमुच्चार्य तां विप्रं देवेशं परिकल्पयेत॥ अनेन व्र
जेद्यत्र गन्तुं पदात्म चौनुराधिप॥ अनेन विधिना धेनुं यो विप्राय प्रयच्छति॥ ३२॥ सर्वकामसमृद्धात्मा स्वर्गलोकं स गच्छ
ति॥ सप्तपूर्वान् सप्तपरानात्मानं चैव मानव॥ ३३॥ सप्तजन्मकृतात्पापान्मोचयत्यवनीपते॥ पदे पदे ऽश्वमेधस्य
गोदानस्य च मानवः॥ ३४॥ फलमाप्नोति राजेन्द्र दक्षायैवं जगौ हरिः॥ सर्वकामप्रदा सा स्यात्सर्वकाले तु पार्थिव
३५॥ भवत्यसौ पापहरा सा वदिंजा भवतुर्दृष्टा॥ सर्वेषामेव पापानां कृतानामपि जानता॥ ३६॥ प्रायश्चित्तमिदं प्रो
क्तमनुतापोपबृंहितम॥ सर्वेषामेव दानानामेकजन्मानुगं फलम॥ ३७॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्चान्यै

कामदुघा १

पुण्यम २
४

श्मशाने वै ॥ लोकाः कामगमाः प्राप्ता दत्वैतद्विधिनानृप ॥ ३८ ॥ गोभ्योधिकं जगति नापरमस्ति किंचिद्दानं प
वित्रमिति निशाम्य विदो वदंति ॥ तस्मात्प्रदः सुरसद्मसमीहमानैर्देयाः सदैव विधिना द्विजपुंगवाय ॥ ३९ ॥ इति श्री
भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे प्रत्यक्षधेनुव्रतविधिवर्णनं नामैकपंचाशदुत्तरशतत
मोऽध्यायः ॥ १५१ ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि धेनूनां कल्पनानृप ॥ विशेषविधिना याभ्यो देयाः
कामानभीप्सुभिः ॥ १ ॥ कामं यदीयते दानं समग्रं तत्फलं लभेत् ॥ असमग्रं न दोषाय भवतीह परत्र च ॥ २ ॥ तस्मा
द्दक्षिणाहीनं विधानविकलं तथा ॥ देयं दानं महाराज समग्रफलकांक्षया ॥ ३ ॥ अन्यथा दीयमानं तदहंकाराय
केवलम् ॥ वित्तक्षयश्चार्थहानिः स्यान्न वा तत्फलं भवेत् ॥ ४ ॥ तिलधेनुं प्रवक्ष्यामि स्वरूपं पार्थिवसत्तम ॥ वाराहेण
पुरा प्रोक्तां महापातकनाशिनीम् ॥ ५ ॥ यां दत्वा ब्रह्महा गोघ्नः पितृघ्नो गुरुतल्पगः ॥ अगारदाही गरदः सर्वपाप
रतो पि वा ॥ ६ ॥ महापातकयुक्तश्च संयुक्तश्चोपपातकैः ॥ मुच्यते निखिलैः पापैः स्वर्गलोकं च गच्छति ॥ ७ ॥ अ
नुलिप्ते महीपृष्ठे कृष्णाजिनसमावृते ॥ धेनुं तिलमयीं कृत्वा दर्भानास्तीर्य सर्वतः ॥ ८ ॥ तिलाः श्वेतास्तिलाः कृष्णा
स्तिला गोमूत्रवर्णकाः ॥ तिलानां च विचित्राणां धेनुं सर्वां च कारयेत् ॥ ९ ॥ द्रोणस्य वत्सकं कुर्याच्चतुराढकिकां वगा

कृष्णाजिनसमावृते २
गोमूत्रसंभवाः १

258

देवानामेतज्जन्मांतरं फलम् ४
सः

: शुचिभुक्ताफलेप्सुनाम् २

१ पर्वकालं समीक्ष्य च ४

म्॥ स्वर्णशृंगी रौप्यखुरां गंधघ्राणवतीं तथा ॥ १० ॥ कार्याशार्कर्या जिह्वा गुडेनास्यं च कंबलम् ॥ इक्षुपादां ताम्र
पृष्ठीं भुक्तिमुक्तिफलेप्सुनाम् ॥ ११ ॥ पुष्पाक्षपत्रश्रवणां फलदंतवतीं शुभाम् ॥ स्रग्दामपुच्छां कुर्वीत नवनीतस्तना
न्विताम् ॥ १२ ॥ सितवस्त्रद्विरालंबां सितसर्षपरोमिकाम् ॥ फलैर्मनोहरै रत्नैर्मणिमुक्ताफलान्विताम् ॥ १३ ॥ ईदृक्
संस्थानसंपन्नां कृत्वा श्रद्धासमन्वितः ॥ कांस्योपदोहनां दद्यात् सर्वकाले समागते ॥ १४ ॥ या लक्ष्मीः सर्वभूतानां या
च देवेष्ववस्थिता ॥ धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥ १५ ॥ ततः प्रदक्षिणां कृत्वा पूजयित्वा प्रणम्य च ॥ सदक्षि
णामयान्यंदत्वैतां क्षमाविसर्जयेत् ॥ १६ ॥ अनेन विधिना दत्वा तिलधेनुं नराधिप ॥ सर्वपापविनिर्मुक्तो परं ब्रह्मा
धिगच्छति ॥ १७ ॥ यश्च गृह्णाति विधिवद्यमानां प्रमोदते ॥ दीयमानां प्रशंसंति ये च संहृष्टमानसाः ॥ १८ ॥ ते पि
दोषविनिर्मुक्ता ब्रह्मलोकं व्रजंति ते ॥ प्रशांताय सुशीलाय वेदव्रतरताय च ॥ १९ ॥ ४ धेनुं तिलमयीं दत्वा न शोचति
कृताकृते ॥ त्रिरात्रं यस्तिलाहारस्तिलधेनुप्रदो भवेत् ॥ २० ॥ एकाहमथवा रात्रं जल्पमुच्छेदं न तात्मना ॥ दानाद्धिश्र
ष्टिः पापस्य नश्य पुण्यस्य वर्द्धनः ॥ २१ ॥ चान्द्रायणाच्च अधिकं कथितं तिलभक्षणम् ॥ नालभ्ये वै वयस्याप्यं पयोव्रते वाई
के तथा ॥ २२ ॥ वाचा कृतं तु मनसा कर्मणा यच्च संचितम् ॥ उदकस्थो वनेचैव नग्नस्नानेन यद्भवेत् ॥ २३ ॥ प्रक्षालेनाघते

२ अतोय स्रोक निर्मुक्ताः प्रयान्ति परमां गतिम् ५

२ वेदव्रतधराय च ४

४ नयुक्तेन प्रमादेदितार्थः पुन्यप्रमादे यातु २

नापिलंघितेन्द्राह्यलोतेनतथा॥ कथलोगमनेचैवयान्तुरूपदाम्भिगामिनि॥ २४॥ कृपयानेनयत्स्यायमभक्ष्यवसस्मागात॥ तस्मात्सर्वप्रि
तापंयान्तितिलधेनुप्रदायिनाम्॥ २५॥ यममार्गेमहाघोरे नदीवैतरणीस्मृता॥ वालुकायाःस्थलंचैवपच्यन्तेयत्रपापिनः
२६॥ यत्रलोहमुखाःकाकायत्रश्वानोभयावहा॥ निकृन्त्यपापिनांमांसंभक्षयन्तिबुभुक्षिता॥ २७॥ असिपत्रवनंचैवलो
हकंटकशाल्मलीम्॥ एतान्सर्वानतिक्रम्यततोयमपुरंव्रजेत॥ २८॥ विमानेकांचनेदिव्येमणिरत्नविभूषिते॥ तत्रारूढो
नरश्रेष्ठोगच्छतेपरमांगतिम्॥ २९॥ गुणहीनेनदातव्यानदातव्याधनेश्वरे॥ कुंडगोलेचलुब्धेचनचदेयाकदापिसा॥
३०॥ एकाएकस्यदानस्यमुनिभिःकथितंपुरा॥ अरण्येनैमिषेपार्थनारदेननिवेदितम्॥ ३१॥ ततोहंसंप्रवक्ष्यामिस
स्यकफलसहस्रदम्॥ इदंपुण्यंपवित्रंचसौभाग्यंकीर्तिवर्द्धनम्॥ ३२॥ विप्राणांश्रावयेत्कूरे अनंतफलमश्नुते॥ बहू
नांतुप्रदेयानिगोर्गृहंश्रावयंस्त्रियः॥ ३३॥ विमत्स्यमानास्तेतानिदत्तानिपातयंत्यधः॥ सानुविक्रयमापन्नादहन्त्या
सप्तमंकुलम्॥ ३४॥ भक्त्यादानप्रभावेनविमानंसर्वकामिकम्॥ समारुह्यनरोयातियत्रदेवोहरिःस्वयम्॥ ३५
एषाचैवप्रदातव्यापुण्यतेनान्तरात्मना॥ पौर्णमास्यांचमाघस्यकार्त्तिक्यांचैवभारत॥ ३६॥ चंद्रसूर्योपरागेतुविषुवे
अयनेतथा॥ षडशीतिमुखेचैवव्यतीपातेतुसर्वदा॥ ३७॥ वैशाख्यांमार्गशीर्ष्यांवागजच्छायासुचैवहि॥ एषातेकथि

259

तापार्थ तिलधेनुर्मयानघ ॥ ३८ ॥ यावंति धेनोरोमाणि गात्रेषु नृपपुंगव ॥ तावद्वर्षसहस्राणि नाकस्वर्गे महीयते ॥
३९ ॥ यश्चागृह्णाति विधिवद्दीयमानां च पश्यति ॥ अनुमोदयते चैव ते सर्वे स्वर्गगामिन ॥ ४० ॥ धेनुं च ताक्षिपत सोमग
धीऽवेन मानेन ये तिलमयीं च नृपाढकेन ॥ कृत्वा यथोक्तरचनां कनकाग्ररत्नां यच्छंति ते भुवि भवंति विमुक्तपापाः
४१ ॥ प्रतिगृह्णामि देवि त्वां कुटुंबभरणाय च ॥ कामान्मे पादयास्माकं धेनो त्वं सर्वदा ह्यसि ॥ ४२ ॥ ॥ इति श्री भविष्ये
महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलधेनुदानव्रतविधिवर्णनं नाम द्विपंचाशदुत्तरशततमोऽध्यायः
१५२ ॥ श्रीकृष्ण उवाच ॥ जलधेनुं प्रवक्ष्यामि प्रीतये दत्तया यया ॥ देवदेवो हृषीकेशः पूजितः सर्वभावनः ॥ १ ॥ ज
लकुंभं नरः स्माप्रस्थापयित्वा सुपूजितम ॥ रत्नगर्भं तु तं कृत्वा ग्राम्यैर्धान्यैः समन्वितम ॥ २ ॥ सितवस्त्रयुगच्छन्नं दू
र्वापिच्छवरशोभितम ॥ कुंष्ठमांसीमुरोशीरवालकामलकीयुतम ॥ ३ ॥ प्रियंगुपत्रसंहितं सितयज्ञोपवीतिनम ॥ सच्छत्रं
सोपानत्कं दर्भविष्टरस्तं स्थितम ॥ ४ ॥ चतुर्भिः संयुतं रौप्यं तिलपात्रैश्चतुर्दिशम ॥ स्थापितं दधिपात्रेण घृतक्षौ
द्रवतामृतम ॥ ५ ॥ मुखतां च प्रतिष्ठाप्य गोमयेनोपशोभिताम स्रग्दामपुष्पैः कुर्वीत ताम्रदोहनकान्विताम ॥ ६
ततः समभ्यर्च्य विभुं वासुदेवं सनातनम ॥ पुष्पधूपोपहारैश्च यथाविभवमात्मनः ॥ ७ ॥ संकल्पजलधेनुं च कुंभं

१ सर्वदा

सितवस्त्रा संधीनो वीतरागः ८

३ सितवस्त्रेणसंवीतोवतिरागः सितवस्त्रेणसंवीतम् २

नमामि मंत्रव ॥ विष्णोर्वक्षसि या लक्ष्मीः स्वाहा या च विभावसोः ॥ ८ ॥ सोमशक्रार्कशक्तिर्या धेनुरूपेण सास्तु मे·
एवमामंत्र्य विधिवत्तत्फलां वत्सकान्विताम् ॥ ९ ॥ मन्त्रासंपूज्य गोविंदं जलशायिनमच्युतम् ॥ सितवस्त्रधरं शां
तो वीतरागो विमत्सरः ॥ १० ॥ दद्याद्विप्राय राजेंद्र प्रीत्यर्थं जलशायिनः ॥ शेषपर्यंकशयनः श्रीमाञ्छार्ङ्गी विभुः स्थितः
११ ॥ जलशायी जगद्योनिः प्रीयतां मम केशवः ॥ इत्युच्चार्य जगन्नाथं विप्राय प्रतिपादनाम् ॥ १२ ॥ तद्दिनं गोव्रतस्तिष्ठे
त्कूरू यापयेत्पुनः ॥ अनेन विधिना दत्त्वा जलधेनुं जनाधिप ॥ १३ ॥ सर्वभोगानवाप्नोति ये दिव्या ये च मानुषाः ॥
शरीरारोग्यमतुलं प्राकाम्यं सर्वकालिकम् ॥ १४ ॥ नत्तों भवंति दत्तायां सर्वकामा न संशयः ॥ अत्रापि श्रूयते भूप कृष्णलेन म
हात्मना ॥ १५ ॥ जातिस्मरत्वयजोत मिहाभ्येत्य पुरा किल ॥ समृकृलः पुरा विप्रो यमलोकगतो मुनिः ॥ १६ ॥ ददर्श यात
नानेकाः पापकर्मकृतां नृणाम् ॥ दीप्ताग्नितीक्ष्णा यन्त्रस्थाः क्वाथतैलमयास्तथा ॥ १७ ॥ उष्णाङ्गारनदी यात्रा भैर
वाः पुरुषर्षभः ॥ ब्रह्मांगारनिपातोथ कुंभीपाकमहालयाः ॥ १८ ॥ तादृष्ट्वा यातना विप्र भ्यकारं परमोक्तपाम् ॥ साकृ
दंते नरा जग्मुः पापान्तदनुकंपया ॥ १९ ॥ तं दृष्ट्वा नारकाः केचित्स्थित्वा नदवलोकिनः ॥ नदवत्युं विलोकाथ सार्गानि
नारकिमण्डलम् ॥ २० ॥ धर्मराजं समपृच्छन्तेषां प्रशमकारणम् ॥ तस्मै वा वष्ट राजे कृतन्दा वैवस्वतो यमः ॥ २१ ॥ आ

260

व्युष्टिःफलनिमर्षः३

ह्लादहेतुमधिकं नारकाणां नरोत्तम ॥ दानानुभावात्सर्वेषां नारकाणां द्विजोत्तम ॥ २२ ॥ सप्तकृतोऽपमाल्हादःका
रणं न कृच्छ्रमे ॥ त्वयाभ्यर्च्यं जगन्नाथं सर्वेशं जलशायिनम ॥ २३ ॥ जलधेनुः प्रदत्ता विधिवद्द्विजपुंगव । तस्मात्व
ज्जन्मनोऽतीते तीर्येद्विजजन्मनि ॥ २४ ॥ तस्य दानस्य ते व्युष्टिर्येयमाल्हाददायिनी येनांधपश्यंतिम्नराकेति येवध्या
यंतिमानवाः ॥ २५ ॥ म्लतो विघां भ्यविप्रेन्द्र यांभ्य आयलिपश्यति ॥ निवृत्तिः परमा तेषां सर्वाल्हादप्रदायिनी ॥ २६ ॥
सद्यो भवति माऽत्र त्वं द्विजाते कुरु विस्मयम् ॥ आल्हादहेतुर्जननं नातिविप्रेन्द्र ताद्दशम ॥ २७ ॥ जलधेनुर्यथा न्रणां जन्मा
न्तेकोनविंशतिम् ॥ न दोषो न ज्वरो नार्तिर्न क्लमो द्विज जायते ॥ २८ ॥ अपि जन्मसहस्रेपि जलधेनुप्रदायिनाम ॥ सत्वंग
कृगृहीतार्घसम्मतो द्विजसत्तम ॥ २९ ॥ येषां समाश्रयः कृष्णो नानियस्माहितेमया. कृत्सत्कृत्ननितोये कृये कृष्णार्थ
मुपोषिता ॥ ३० ॥ ये भ्यैति त्वां स्तुतः कृष्णो न ते मद्विषयोपगाः ॥ नमः कृष्णाय नानंत वासुदेवेत्युदीरितम् ॥ ३१ ॥
यैर्भावभाविते विप्र न ते मद्विषयोपगाः ॥ दानं दद्भिर्यैरुक्तं नमः कृष्णः प्रीयतामिति ॥ ३२ ॥ भगवान्परः सर्वैर्विप्र न ते मद्विष
योपगाः ॥ स एव नाथः सर्वस्य तन्नियोगकरा वयम ॥ ३३ ॥ जगत्संयमनस्याहं समस्तस्य यमो हरिः ॥ इत्थं निशाम्य वच
नं यमस्य वक्तोऽविलम् ॥ ३४ ॥ उक्तास्ते नारकाः सर्वे वद्धिग्रासन्नार्कभीरवः ॥ नमः कृष्णाय हरये विष्णवे जिष्णवे नमः ॥ ३५

येस्तु ४

यैः कृष्णार्थमुपोषितम ५

॥ भविषु ॥
॥ २६१ ॥

१ उदकशायिने २

कापिलमस्ते १ नमहीरुहते ४

हृषीकेशाय केशाय जगद्धात्रेऽच्युताय च । नमः पंकजनेत्राय नमः पंकजनाभये ॥ ३६ ॥ जनार्दनाय श्रीशाय श्रीमद्देवी
नवासमे ॥ गोविंदाय नमो नित्यं नमः क्षीरोदधिशायिने ॥ ३७ ॥ नमः कमलनेत्राय नृसिंहाय निनादिने ॥ शांर्गिणे खड्गि
खजाय शंखचक्रगदाभृते ॥ ३८ ॥ नमो वामनरूपाय कांतलोकत्रयाय च वाराहरूपाय तथा नमो यज्ञांगधारिणे ॥ ३९ ॥
साम्नाशेषशायिनानायानंताय परमात्मने ॥ वासुदेव नमस्तुभ्यं नमः कैटभसूदिने ॥ ४० ॥ केशवाय नमो राम नमस्तेस्तु म
हीधर ॥ नमोऽस्तु वासुदेवाय हे ब्रह्मचारि नैवनैः ॥ ४१ ॥ यास्त्राणि कृतं तं जगद्रक्षत भापि यातनौम् ॥ त्वमसत्त्वं च सत्त्वा
णि समस्तेनरयोगुणाः ॥ ४२ ॥ संस्कृकाः स्मारसरितः पतितः शाल्मलिर्द्रुमः ॥ एकाग्रा स्तसमसो जन्मेनकोऽनुभिः स
वेत्स जायते क्षत्रिये कुले॥४२॥ यज्ञाभ्यासेऽपि विद्वांश्च नरो भवति धार्मिक॥ पुनरेतं प्राप्य यादेहं लोकं देवस्य शार्ङ्गिणः॥
४३॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्पवृक्षदानविधिवर्णनं नामाष्टसप्तत्युत्तर

५ किंकिणीजालमंडितम् ३

लावन् ३

ग्या

दाननामोऽध्यायः॥१२८॥ ॥ युधिष्ठिर उवाच॥ भगवन्सर्वधर्मज्ञ सर्वलोकनमस्कृत॥ अनुग्रहाय लोकानां
कथयस्व ममापरम्॥१॥ निष्पापो ज्ञायते येन आयुबायशामाप्सिता॥ तन्मे कथय देवेश दानं व्रतमथापि
वा॥२॥ श्रीकृष्ण उवाच॥ श्रुणु राजन्प्रवक्ष्यामि नवलोकहितेप्सया॥ येनोपायेन जायन्ते सम्भ्रमां मानताम्भवि॥
३॥ न व्रतैर्नोपवासैश्च न तीर्थगमनैरपि॥ महापथादिमरणैर्न यज्ञैर्न भजनेन च॥४॥ प्राप्यते मम लोकोऽ
यं दुष्प्राप्यस्त्रिदशैरपि॥ पार्थस्नेहान्महाभाग प्रवक्ष्यामि हितं तव॥५॥ वक्ष्ये कल्पलतादानं शोभनं विधि
पूर्वकम्॥ सर्वपूर्वविधानं च तन्त्रमन्त्रैः प्रकल्पयेत्॥६॥ दिक्पालेभ्यो बलिं तत्र क्षिपेद्वै विधिपूर्वकम्॥ आचा
र्यावाज्ञभागो नृपर्वं कृत्वा विचक्षणः॥७॥ ततो ग्रहमखं कुर्यात् होमं चाहुतिभिस्ततः॥ अयुतेनैव होमस्य समाप्ति
रिहृष्यते॥८॥ ततः सर्वसमीपे तु स्नातः शुद्धांबरः शुचिः॥ पुष्पधूपैरथाभ्यर्च्य वासोभिः सफलाक्षतैः॥ ततः प्रद
क्षिणीकृत्य मंत्रानेतानुदीरयेत्॥९॥ नमो नमः पापविनाशिनीभ्यो ब्रह्मांडलोकेश्वरपालनीभ्यः॥ आशातिता
र्थिकाफलप्रदाभ्यो दिग्भ्यस्तथा कल्पलतावधूभ्यः॥१०॥ पापस्य शान्तिः परमात्रदिष्टा वेदेषु गणाग्ररसन्नमस्य·
तां पूजयामीह परेण साम्ना सामेभ्यसंय कृतन्तां नतोऽस्मि॥११॥ एवमुच्चार्य ताः सर्वा ज्ञालताभ्यो निवेदयेत्। दत्वाथाः

नाना मार्कव सितासितपिनाकिनम् वधालीर्थे गवां गोष्ठे ८

परयाभक्त्या: सकलत्यावेतसि ॥१२॥ ततः क्षमापयेद्विप्रान्सर्वान्स्वस्मदभिमानतः ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति
१३॥ तस्य पुण्यफलं राजन्कथ्यमानं निबोध मे ॥ इहलोके स विजयी धनवान्पुत्रवान्भवेत् ॥१४॥ मृतो लोकाधिपपुरे प्रति
मन्वन्तरं वसेत् । महाशक्तिवतः पश्चादेत्य राजन्समानलम् ॥१५॥ जित्वा सर्वं महीपालश्चक्रवर्ती भवेद्भुवि ॥ यावत्तारी महा
राजदानमेतत्प्रयच्छति ॥१६॥ सा चक्रवर्जितं पुत्रं नप्तेषां हि समन्वितम् ॥ यश्च पश्येद्दीयमानं दत्तं पश्चान्मोदते ॥१७
शृणोति वाच्यमानं च सोऽपि प्रेत्याभिगच्छति ॥१८॥ याशाकवल्लिरियमनेकर्तपान्नाहिल्लावानेन्द्रराजश्रीवदेशावद्यांभशाक्रा-
नाशेषप्रज्यदशाकल्पलतानादिने भ्योदेहि त्रिलोकविजये यदि ते स्थिता बुद्धिः ॥१९॥ ॥ इति श्रीभविष्ये महापुराणे उत्त
रपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कल्पलतादानविधिवर्णनं नामैकोनाशीत्युत्तरशततमोऽध्यायः ॥१७९॥ ॥
युधिष्ठिर उवाच ॥ भगवन्क्षत्रियैः शूरैः स्ववीर्योपात्तसंचयैः ॥ कानि दानानि देयानि पवित्राणि शुभानि च ॥१॥ अ
न्यैर्वा पुरुषैः कृष्ण धर्मभयभीरुभिः ॥ ग्रहपीडाभिसंतप्तैर्दुःस्वप्नाद्युपतापितैः ॥ २ ॥ इहलोके परे चैव विहितं सर्वका
मदम् ॥ विशेषविहितं दानं कथयस्व महामते ॥३ ॥ श्रीकृष्ण उवाच ॥ शृणु भूपाल भद्रं ते दानधर्मसमुच्चयम् ॥ विशे
षेण महीपानां हितायैतन्न संशयः ॥ ४ ॥ दानानि बहुरूपाणि नानाशास्त्रोदितानि च ॥ गोदानादीनि राजेन्द्र प्रधानानि

१वै॰ २मार्गवः ३सितासितपिनाकिनम ४तथा स्त्रीपैंगवां गोष्ठे ५

नसंशयः ॥५॥ किंतु प्रधानमेकं ते दानं वक्ष्यामि भारत ॥ वैरोचनाय यत्कार्त्तं भृगुः प्रोवाच भारतः ॥ ६ ॥ शुक उवाच ॥ श्रणु
दैत्यपते दानं सर्वपापप्रणाशनम ॥ व्याधयोक्ता वयश्चैव ग्रहपीडाः सुदारुणाः ॥ ७ ॥ येन दत्तेन नश्यंति तिष्ठत्येसा प्रोतिचो
नमम ॥ कार्त्तिक्यामयने चैव ग्रहणे शशिसूर्ययोः ॥ ८ ॥ दानमेतत्प्रदातव्यं विषुवे सूर्यसंक्रमे ॥ पुण्ये दिने तथा सायजि
नक्षौधौ जितेंद्रियः ॥९॥ संस्थाप्य दारुजं दिव्यं हेमपट्टैरलंकृतम ॥ रथं सुचक्राक्षधरं युगयोक्त्रसमन्वितम् ॥१०॥ सु
वर्णध्वजसंयुक्तं सितासितपताकिनम ॥ पुष्पप्रकरसंकीर्णे प्रागुदक्प्रवणोशुभे ॥११॥ तथा स्त्रीरैःपवां गोष्ठे विवि
क्ते वा गृहांगणे ॥ रथस्य पूर्वभागे तु कृत्वा वेदिमनुत्तमाम ॥१२॥ पुराणवेदविद्याज्ञान्वितयाचारसंयुतः ॥ तस्यां संस्था
पयेद्देवान्ब्रह्मादीन्कथयामि ते ॥१३॥ मध्ये ब्रह्मा प्रतिष्ठाप्यः पूजयेत्सुगणान्वितम ॥ विष्णुर्दक्षिणतः स्थाप्यः पौरुषेण
तमर्चयेत ॥१४॥ सूक्तेन रुद्रं रौद्रेण दक्षिणास्यां समर्चयेत ॥ ग्रहान्दर्यमुनींश्चैव विविधैः पूजयेत्तथा ॥ पुष्पैर्गंधैः
फलैर्भक्ष्यैर्दीपमालाभिरेव च ॥१५॥ पूजयेद्गंधकुसुमैः श्वेतवस्त्रैः सचंदनैः ॥ शंखभेरीमृदंगानां शब्दैः सर्वत्रगामिभिः
॥१६॥ ब्रह्मघोषविमिश्रैश्च कारयीत महोत्सवम ॥ कुंडं कृत्वा विधानेन हस्तमात्रप्रमाणतः ॥१७॥ आग्नेय्यां दिशि रा
जेंद्र ब्राह्मणांस्तत्र पूजयेत ॥ चतुर्भारणिकान्विप्रान्सितान्बुलमध्यगौः ॥१८॥ चतुरोष्टौ महाराज गृहस्थैरथवाम

298

१ तर्व्वैः २ २दिव्यांकुशसमन्वितौ ४

वेत ॥ होमोपकरणं सर्वं मेलयित्वा तिलास्वतम् ॥ १९ ॥ अग्निकार्यं ततः कुर्याद्यथावद्विधिपूर्वकम् ॥ आघारावाज्य
भागौ तु कृत्वा प्राग्वच्चैतौ ततः ॥ २० ॥ विष्णावेश्मनिकंतयामंत्रैः पूर्वोदितैः शुभैः ॥ ग्रहयज्ञोदितैश्चैव ग्रहाणां होम इष्य
ते ॥ २१ ॥ एवं यज्ञविधिं कृत्वा यजमानो द्विजैः सह ॥ योजयीत रथे दांतौ गजौ लक्षणसंयुतौ ॥ २२ ॥ विचित्रतनुसंवी
तौ शुभ्रकुम्भौ सुघंटिकौ हेमपट्टैः सुतिलकैः शोभितौ शुक्लचामरैः ॥ २३ ॥ दिव्यमाल्यापिनद्धौ तु दिव्यांकुशसमन्वितौ
महामात्रान्वितौ चैव सर्वाभरणभूषितौ ॥ २४ ॥ एवं विधिं ततः कृत्वा रथं तं सगजं नरः ॥ आरोपयेत्ततस्तस्मिन्ब्राह्म
णं शंसितव्रतम् ॥ २५ ॥ भूषितं कुण्डलकटकैः कर्णवेष्टांगुलीयकैः ॥ माल्यप्रचोलकबद्धवस्त्रयुग्मसमन्वितम् ॥ २६ ॥ न
द्धतूणिं धनुष्पाणिं बद्धवर्मविभूषितम् ॥ खड्गधेनुकया नद्धं हारालंकृतविग्रहम् ॥ २७ ॥ यजमानस्ततः प्राज्ञः शुक्लांबर
धरः शुचिः ॥ रथं प्रदक्षिणीकृत्य गृहीतकुसुमांजलिः ॥ २८ ॥ इममुच्चारयेन्मंत्रं सर्वपापप्रणाशनम् ॥ कुमुदैरावतौ प
द्मः पुष्पदंतोऽथ वामनः ॥ २९ ॥ सुप्रतीकोंऽजनः सार्वभौमोऽष्टौ देवयोनयः ॥ तेषां वंशप्रसूतौ तु बलरूपसमन्वितौ ॥ ३०
तद्युक्तरथदानेन मम स्यातां वरप्रदौ ॥ रथोऽयं यज्ञपुरुषो ब्राह्मणस्त्वं शिवः स्वयम् ॥ ३१ ॥ ममैतद्रथदानेन प्रीयेतां शि
वकेशवौ ॥ इत्युच्चार्य महाभाग पूजयित्वा पुनः पुनः ॥ ३२ ॥ आरोपयेत्ततस्तस्मिन्ब्राह्मणं शंसितव्रतम् ॥ स्वदारनि

महाभागे इति संदिग्धः संवाद १

४ विचित्रवस्त्रसंवीतौ ५

रनिरतं शान्तं वेदवेदांगपारगम् ॥ ३३ ॥ पंचाग्न्यभिमतं चैव ब्रह्मण्यं व्याधिवर्जितम् ॥ ततः प्रदक्षिणीकृत्य रथस्थं
द्विजसत्तमम् ॥ ३४ ॥ आचारमनुगच्छेच्च प्रणिपत्य गृहं विशेत् । ततो यज्ञावसाने तु दीनांधादीञ्जनान्कृपान् ॥ ३५ ॥
पूजयेद्विविधैर्दानैर्वस्त्रगोदानभोजनैः ॥ अनेनैव विधानेन संकल्पारब्धमुत्तमम् ॥ ३६ ॥ कुंडमंडपसंभारभूषणाच्छा
दनादिकम् ॥ तदेव होमद्रव्यं च होममन्त्रास्तथैव हि ॥ ३७ ॥ विशेषोऽश्वरथे राजन्कथ्यमानो निबोधताम् हयौ लक्ष
णसंयुक्तौ खलीनालंकृताननौ ॥ ३८ ॥ विचित्रवस्त्रसंवीतौ कंठाभरणभूषितौ ॥ शुभ्रग्रहयुतौ वाजौ दानातस्मिं रथो
त्तमे ॥ ३९ ॥ तं प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥ ४० ॥ नमोऽस्तु ते वेदतुरंगमाय त्रयीमयाय त्रिगुणात्मकाय ॥ दु
र्गमार्गे सुखयानदात्रे नमोऽस्तु ते वाजिवराय नित्यम् ॥ ४१ ॥ रथोऽयं सविता साक्षाद्वेदाश्चामी तुरंगमाः ॥ अरु
णो ब्राह्मणश्चायं प्रपद्यन्तु सुखं मम ॥ ४२ ॥ इत्युच्चार्य ततस्तस्मिन्रथे ब्राह्मणसत्तमम् ॥ आरोपयेद्गृहद्वारं यावदेतम
नुव्रजेत् ॥ ४३ ॥ अनेन विधिना यस्तु दद्याद्वाजिरथं बुधः ॥ तस्माद्वाहरथं राजन्तस्य पुण्यफलं शृणु ॥ ४४ ॥ सर्वपापवि
निर्मुक्तः सर्वामयविवर्जितः ॥ मन्वंतरशतं यावत्स्वर्गभोगसमन्वितः ॥ ४५ ॥ अप्सरोगणसंकीर्णे विमाने सूर्यवर्च
से ॥ दिव्यभोगान्वितः श्रीमान्कामचारी वसेद्दिवि ॥ ४६ ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ पुत्रपौत्रान्वितः

कल्पचारी १   परः १ रश्मीमानः

ष्यै तथिरं जीवी च्छियातिथिः ॥ ४७ ॥ गजेनैकेन निर्दिष्टः कश्चिद्गजरथोत्तमः ॥ एकेनाश्वेनाश्वरथः कथ्यते वेद
वादिभिः ॥ ४८ ॥ दानमंत्रात्मप्रोक्ताः फलं तत्र निगद्यते ॥ ४९ ॥ यच्छंति ये रथवरं सुधुराश्वयुक्तं वि
क्रांतवारणयुक्तं तुरगान्वितं वा ॥ नयस्त्वरं कनकपट्टविचित्रितांगं ते स्यंदनेन सुरराजपुरं प्रयांति ॥ ५० ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गजरथाश्वरथदानविधिवर्णनं नामाशीत्युत्तर
शततमोऽध्यायः ॥ १८० ॥ ॥ युधिष्ठिर उवाच ॥ ॥ दानान्यन्यानि मे कृष्ण कथयस्व यदूत्तम ॥ मंगल्यानि पवित्रा
णि सर्वपापहराणि च ॥ १ ॥ संसारसागरोत्तारहेतुभूतानि माधव ॥ धर्माधर्मपरिज्ञाने त्वदन्यो नेह केशव ॥ २
श्रीकृष्ण उवाच ॥ दानानि बहुरूपाणि कथितानि मया तव ॥ पुनरेव प्रवक्ष्यामि यद्यस्ति न तु कौतुकम् ॥ ३ ॥ कथितानि मया
ते भ्यं कथयिष्यामि यानि च ॥ महतार्थेन सिध्यंति प्रयच्छंति महत्फलम् ॥ ४ ॥ काम्यो दानविधिः पार्थ क्रियमाणः प्रयत्नतः ४ वधार्पनः
॥ फलाय मुनिभिः प्रोक्तो विपरीतो भयाय च ॥ ५ ॥ ज्ञेयं निष्कृतानं सर्वदानेषु विधिरुत्तमः ॥ मध्यमस्तु नदर्द्धेन तदर्द्धेनाव
रः स्मृतः ॥ ६ ॥ एवं वृषरथेंद्राणां धेनोः कृष्णाजिनस्य च ॥ मयाकृस्यापि कृष्टोऽयं पंचमो वर्णितो विधिः ॥ ७ ॥ भूतोऽप्य
हेनयो दद्यान्महादानं नराधिप ॥ प्रतिग्रहनिवानस्य दुःखशोकावहं भवेत् ॥ ८ ॥ आदौ तावत्प्रवक्ष्यामि कालाख्यं पुरुषं नव-

कष्टोयम २ ६ पुरुषोत्तमम १

॥ मवि ॥
॥३००॥

१ मंडप६

सप्तसागरदानं च महाभूतघटस्तथा ॥ ९ ॥ अर्घ्यप्रदानमन्त्रोक्तमात्मप्रतिकृतिस्तथा । सुवर्ण्णाश्वः स्मृतः षष्ठः सु
वर्ण्णाश्वरथोऽपरः ॥ १० ॥ सर्वदानोत्तमं राजन् कृष्णाजिनमथापरम् ॥ विश्वचक्रं च नवमं हैमो गजरथस्तथा ॥ ११ ॥ ए
ततेदानदशकं वै क्षितिपार्थिवसत्तमः ॥ देहि दापय सद्बुद्धिं दानेनापनरोत्तम ॥ १२ ॥ दानाद्दानेनोपकारी विद्यते धनिनोऽ
परः ॥ दीयमानो हि नापैति भूय एवाभिवर्धते ॥ १३ ॥ कूपउद्धियमानोऽपि भवत्येव बहूदकः ॥ ग्रहणं दिनमथासा
यं भूमिभागे समे शुभे ॥ १४ ॥ चतुर्थ्यां वा चतुर्दश्यां विष्ट्यां वा पांडुनंदन । शुभनक्षत्रतिथैः कार्यो रोप्य दंतः सुवर्णादिक ॥ १५
रत्नोपेतकरो दीर्णोजपाकुसुमकुंडलः ॥ हंसं वरवरः स्रग्वी शांरत्नमालाविभूषितः ॥ १६ ॥ तीक्ष्णासिपत्रधनुषा विस्फारि
तकटीतटः ॥ उपानत्युगपद्मानि हिकृत्स्नेकं वलपार्श्वगः ॥ १७ ॥ गृहीतमांसपिंडश्च वामे करतलेन तथा ॥ एवंविधं नरं कृत्वा
गृहीतकुसुमांजलिः ॥ १८ ॥ सपुष्पगंधकुसुमैर्नैवेद्यैर्विनिवेद्य च ॥ तिलाज्यं जुहुयात्तत्र अग्नौ केनिच मंत्रतः ॥ १९ ॥ स्व
गृह्योक्तविधानेन शतमष्टोत्तरं यजेत् ॥ यजमानः प्रसन्नात्मा इमं मंत्रमुदीरयेत् ॥ २० ॥ सर्वकलयुतेयस्मात्कालत्वं
तेन भण्यसे ॥ ब्रह्मविष्णुशिवादीनां त्वमसाध्योऽसि सुव्रत ॥ २१ ॥ पूजितस्त्वं मया भक्त्या प्रार्थितश्च तथा सुखम् ॥ यद्दत्तं
तेन वशिमोतन्कृरूप नमो नमः ॥ २२ ॥ एवं संपूजयित्वा तं ब्राह्मणाय निवेदयेत् ॥ ब्राह्मणं प्रथमं पूज्य वासोभिर्भूषणौ

कृष्णम ५

उत

सर्वकालयुतो यस्मात्कालत्वं तेन भण्यते ३
इदं वचनमब्रवीत् ३
प्रार्थितश्च
६ यथा २
८ ब्राह्मणम् १

॥ दानः ॥
॥३००॥

300

स्तथा ॥ २३ ॥ दक्षिणां शक्तितो दद्यात्सर्वपापं विसर्जयेत् ॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छति ॥ २४ ॥ नापम
त्युभयं तस्य न च व्याधिकृतं भयम् ॥ भवत्यव्याहतैश्वर्यः सर्वबाधाविवर्जितः ॥ २५ ॥ देहान्ते सूर्यमण्डलं भित्त्वा यान्ति परं
पदं ॥ तत्पक्षणादिहाभ्येत्य राजा भवति धार्मिकः ॥ संतत्याचाक्षयायुक्तः पुत्रपौत्रसमन्वितः ॥ २६ ॥ संपूज्य कालपु
रुषं विधिवद्द्विजाय दत्वा शुभाशुभफलोदयहेतुभूतं ॥ रोगान्नरे सकलदोषमयेव देहि मोहत्वमानमुपगच्छति तत्
स्वभावान् ॥ २७ ॥ ॥ इति श्रीभविष्यपुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कालपुरुषदानविधिवर्णनं नामै
कादशीतितमोऽध्यायः ॥ १९१ ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि पार्थ दानमनुत्तमम् ॥ सप्तसागरकं नाम
सर्वपापप्रणाशनम् ॥ १ ॥ पुण्यं दिनमथासाद्य युगादिग्रहणादिकम् ॥ कारयेत्सप्तकुंडानि कांचनानि विचक्षणः
२ प्रादेशमात्राणि तथा रत्निमात्राणि वा पुनः ॥ कुर्यात्सप्तशतात्पूर्ध्वमासहस्राच्च शक्तितः ॥ ३ ॥ संस्थाप्यानि च सर्वा
णि कृष्णाजिनतिलोपरि ॥ प्रथमं पूरयेत्कुंडं लवणेन विचक्षणः ॥ ४ ॥ द्वितीयं पयसा तद्वत्तृतीयं सर्पिषा पुनः ॥ चतु
र्थं तु गुडेनैव दध्ना पंचमसेव च ॥ ५ ॥ षष्ठं शर्करया तद्वत्सप्तमं तीर्थवारिणा ॥ स्थापयेल्लवणस्यांते ब्रह्माणं कांचनं
शुभम् ॥ ६ ॥ केशवं क्षीरमध्ये तु घृतमध्ये महेश्वरम् ॥ भास्करं गुडमध्ये तु दधिमध्ये सुराधिपम् ॥ ७ ॥ शर्करायां न्यसेच्छ्र

सर्वदानम् १०

ब्रह्मणा २

सर्वसमीपेन

ष्मीजलमध्येन्यपार्वती ॥ सर्वेषु सर्वरत्नानि क्षिप्त्वानि च समर्चनं ॥ ८ ॥ स्थापयेत्पुरुषश्रेष्ठ यथालाभं यथाक्रम
म । ततः पैर्वसमीपेन स्नातः शुक्लांबरो गृही ॥ ९ ॥ त्रिः प्रदक्षिणमावृत्य मंत्रानेतानुदीरयेत् ॥ नमो वः सर्वसिंधूनामा
धारेभ्यः सततं नता ॥ १० ॥ जंतूनां प्राणदेभ्यश्च समुद्रेभ्यो नमो नमः ॥ पूर्णाः सर्वे भवंतो वै क्षारक्षीरघृतेक्षवैः ॥ ११
दध्नामद्यात्मतीर्थवारिभिरेव च ॥ तस्मादघौघविध्वंसं कुरुध्वं मम मानदाः ॥ १२ ॥ अलक्ष्मीः प्रशमं यातु लक्ष्मी
भ्याश्च गृहे मम ॥ एवमुच्चार्य तान्दद्याद्ब्राह्मणेभ्यो युधिष्ठिर ॥ १३ ॥ एकमेकमथाभ्यर्च्य ष्पवस्त्रविलेपनैः ॥ बहूना
मेनऽद्दिष्टं दानमेकस्य वा पुनः ॥ १४ ॥ देयं वा सर्वसामान्यं क्रियाविप्रानुरूपतः ॥ दानं सप्तसमुद्राख्यं यः प्रयच्छति
पार्थिव ॥ १५ ॥ तस्य गेहान्न चलति लक्ष्मी [illegible] तावकम् ॥ पूज्यमानः सुरगणैः सिद्धविद्याधरोरगैः ॥ १६ ॥ देवलो
कान्व्रजते सप्तमन्वंतराण्यसौ ॥ ततश्च वेदसंस्कारात्परं ब्रह्माधिगच्छति ॥ १७ ॥ इति ददाति रसामरसंयुतान्भुवि वि
स्मयदानि हस्तागतान् ॥ अनलकांचनरत्नमयानसौ पदमुपैति हरेरमयाकृतम् ॥ १८ ॥ दानंप्रधाननरमेनदतीवविशेषतं
युधिष्ठिर समाधिविधिपाविचिंत्य ॥ हैमान्विधाय जलधीन्विततान्स्वशक्त्या विप्रोक्षितेन सरसानि समीक्षितानि ॥ १९ ॥
इति श्रीभविष्यपुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सप्तसागरदानविधिवर्णनं नाम षडशीत्युत्तरशततमोऽ

५ अमरादृतमर

४ कृतपिंडवैव
नमेतदुदीर
यत ६

301

दिवम् २

नरोत्तम

ध्यायः ॥१९८॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि दानमन्यत्तवोत्तमम् । महाभूतघटं नाम महापातकनाशन-
म् ॥१॥ पुण्यां तिथिं समासाद्य स्वकृल्लिङ्गे ग्रहाङ्गणे ॥ कारयेत्कांचनं कुंभं महारत्नान्वितं बुधः ॥ २ ॥ प्रादेशादङ्गुलशतं याव-
त्कुर्यात्प्रमाणतः ॥ शक्त्या पञ्चपलादूर्ध्वमाशताच्च नरोत्तम ॥३॥ क्षीराज्यपूरितं कृत्वा कल्पवृक्षसमन्वितम् ॥ पद्मासनगता-
ंस्तत्र ब्रह्मविष्णुमहेश्वरान् ॥४॥ लोकपालान्महेन्द्राद्यान्स्ववाहनसमन्वितान् ॥ ऋग्वेदः साक्षसूत्रश्च यजुर्वेदः सपङ्कजः ॥५
वीणाधारी सामवेदो ह्यथर्वा सस्रुक्स्रुभान्वितः ॥ पुराणवेदो वरदः साक्षसूत्रकमण्डलुः ॥६॥ सप्तधान्यानि परितः स्थापयेच्च
क्षितौ बुधः ॥ पादुकोपानहौ छत्रं चामरासनभाजनम् ॥७॥ एवं प्रकल्प्य विधिवन्महाभूतघटं नरः ॥ गुडस्योपरि गन्धमाल्यै-
र्नवैरथार्चयेत् ॥८॥ अथ पर्वसमीपेन स्नात्वा नियतमानसः ॥ त्रिः प्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ॥९॥ यस्मान्न किं-
चिदप्यस्ति महाभूतैर्विना कृतम् ॥ महाभूतमयब्रह्मायं तस्माच्छान्तिं ददातु मे ॥१०॥ अत्र सन्निहिता देवाः स्थापिता विश्वक-
र्मणा ॥ ते मे शान्तिं प्रयच्छन्तु भक्तिभावेन पूजिताः ॥११॥ इत्येवं पूजयित्वा तु महाभूतघटं नरः ॥ ब्राह्मणं पूजयित्वा तु भूष-
णाच्छादनादिभिः ॥१२॥ महाभूतघटं दद्यात्सर्वकाले यतव्रतः ॥ पुनः प्रदक्षिणीकृत्य ब्राह्मणं तं क्षमापयेत् ॥१३॥ अनेन
विधिना यश्च दानमेतत्प्रयच्छति । स कविंद्रान्कुलोपेतः शिवलोके प्रयात्यसौ ॥१४॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धा

प्रयत्नत २

स्योत्तम
पांडुकुलोद्वह ४

र्मिकः || अजेयः शत्रुसंघानां महाबलपराक्रमः || १५ || अत्र धर्मरतो विद्वान्देवब्राह्मणपूजकः || १६ || अब्धापदोत्तमघटं
विमलं तिष्ठाय ब्रह्मेशकेशवयुतं सह लोकपालैः || श्रीराज्ञपर्णीविवरं प्रतिपदत्मभक्त्या विप्राय देहि नवदानशतैः किमन्यैः || १७ || इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महाभूतघटदानविधिवर्णनं नाम त्र्यशीत्युत्तरशततमोऽध्यायः || १८३ || || श्रीकृष्ण उवाच || शय्यादानं प्रवक्ष्यामि तव पांडुकुलोद्वह || यद्दत्वा सुखे
भागी स्यादिह लोके परत्र च || १ || शय्यादानं प्रयच्छन्ति सर्वदेवद्विजोत्तमाः || अनित्यं जीवितं यस्मात्कोऽन्यः पश्चात्प्र
दास्यति || २ || तावद्बन्धुः पिता यावज्जीवति भारत || मृतो मृत इति ज्ञात्वा क्षणात्स्नेहो निवर्तते || ३ || तस्मात्स्व
यं प्रदातव्यं शय्याभोज्यजलादिकम् || आत्मैवात्मरतो बन्धुरिति संचिन्त्य चेतसि || ४ || आत्मैव यो हि नात्मानं दानभोगै
र्न पूजयेत् || कोऽन्योऽहितकरस्तस्मात्कः पश्चात्पूजयिष्यति || ५ || तस्माच्छय्यां समासाद्य सारदारुमयीं दृढाम् || दन्तप
त्रचितां रम्यां हेमपट्टैरलंकृताम् || ६ || हंसतूलीप्रतिच्छन्नां शुभगण्डोपधानिकाम् || प्रच्छादनपटीयुक्तां गन्धधूपाधि
वासिताम् || ७ || तस्यां संस्थापयेद्धैमं हरिं लक्ष्मीसमन्वितम् || उच्छीर्षके घृतं चैव कलशं पीठे कल्पयेत् || ८ || नि
द्रेयं पांडव सदा सन्निद्राकलशकं बुधैः || ताम्बूलं कुंकुमक्षोदकर्पूरागरुचन्दनम् || ९ || दीपकोपानहौ छत्रं चामरासनभो

सर्वभागी ५

दानं कोऽन्यः प्रदास्यति

302

१ यस्मात्कोऽत्रप्रदातव्यं शय्याभोज्यतिलादिकम् ६

निमात्र

जनम॥ पार्श्वेणुल्या पयेच्छन्या संप्रधान्यानि चैव हि॥१०॥ शयनस्थस्य भवति यदन्याद्युपकारकम्। भृंगारकाद्यणु
ष्याणि पंचवर्णविताननकम्॥११॥ शय्यामेवं विधां कृत्वा ब्राह्मणाय प्रदापयेत्। सपत्नीकाय संपूज्य पुष्पैः ऽविधि
पूर्वकम्॥१२॥ नमस्ते सर्वदेवेश शय्यादानं कृतं मया। देहि तत्सर्वकामानि फलं नमस्ते पुरुषोत्तम॥१३॥ यथा न कृष्ण शय
नं शून्यं सागरजातया॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि॥१४॥ दत्वैवं तन्मया तं प्रणिपत्य विसर्जयेत्।
ऽकादशाहे ऽपि तथा विधिरेष प्रकीर्तितः॥१५॥ ददाति यदि धर्मार्थं स्नानवीवाधवे सति। विशेषं चात्र राजेन्द्र कथ्यमा
नं निबोध मे॥१६॥ तेनोपभुक्तं यद्द्रव्यं किंचित्सर्वं गृहे सता। तत्सर्वं लग्नं तथा ह स्नातानमाजनम्॥१७॥ यदिदं
वतथास्यासीत्तत्सर्वं परिकल्पयेत्॥ नऽनापुरुषो हेमस्तस्यां तं स्थापयेत्तथा॥१८॥ पूजयित्वा प्रदातव्यो मृतशा
याय योदिता। स्वर्गे पुरंदरगृहे सूर्यपुत्रालयेथवा॥१९॥ सुखं वसत्यसौ जंतुः शय्यादानप्रभावतः। पीड्यंति न तं
याम्याः पुरुषा भीषणानना॥२०॥ न घर्मेण न शीतेन बाध्यते स नरः क्वचित्। अपि पापसमायुक्तः स्वर्गलोके मही
यते॥२१॥ विमानवरमारूढः सेव्यमानोप्सरोगणैः॥ आभूतसंप्लवं यावत्तिष्ठत्यातंकवर्जितः॥२२॥ शय्याप्रदानमम
लं तनव पांडुपुत्र संकीर्तितं स४कलसौख्यनिधानमेतत्॥ तद्यो ददाति विधिवत्स्वयमेव नाकेन त्वां विकल्परहितः स

४सकलसौख्यनिधानमतमे १

पद्मादिबं६

॥ भविष्य ॥
॥ ३०३ ॥

तिमानितस्त्वम ॥ २१ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शय्यादानविधिव
र्णनं नाम चतुरशीतिसत्तरशततमोऽध्यायः ॥ १९४ ॥ ॥ श्रीकृष्ण उवाच ॥ आत्मप्रतिकृतिर्नाम यथोक्तस्य वि
स्तरात् ॥ ततोऽहं संप्रवक्ष्यामि दानं मानविवर्धनम् ॥ १ ॥ दानकालः सदा तस्य मुनिभिः परिकीर्तितः ॥ पुण्यैः पुराणवि
दं पार्थ प्राप्यते जीवितैर्नव ॥ २ ॥ लोहजां प्रकृतिं भव्यां कारयित्वा स्वतो नृप ॥ अमीषवाहंतां मिष्टालंकारसंयुता
म् ॥ ३ ॥ अमीषलोकसहितां सर्वोपस्करसंयुताम् ॥ ततः पट्टपटी वस्त्रैः छादितां रत्नभूषिताम् ॥ ४ ॥ कुंकुमेनानुलि
प्तांगीं कर्पूरागरुवासिताम् ॥ स्त्रीवेदप्रतिशयने शायितां कारयेत्स्वयम् ॥ ५ ॥ ययादिष्टतमं किंचित्तत्सर्वं पार्श्वतो
न्यसेत् ॥ उपकारकरं स्त्रीणां स्वशरीरे च यद्भवेत् ॥ ६ ॥ तत्सर्वं स्थापयेत्पार्श्वे स्वयं संचिन्त्य चेतसि ॥ एतत्सर्वं समेलयि
त्वा स्वे स्वे स्थाने निधाय च ॥ ७ ॥ पूजयित्वा लोकपालान्ग्रहान्देवीं विनायकम् ॥ ततः शुक्लाम्बरः स्नात्वा गृहीतकुसुमां
जलिः ॥ ८ ॥ इममुच्चारयेन्मंत्रं विप्रस्य पुरतो बुधः ॥ आत्मनः प्रतिमा चेयं सर्वोपकरणैर्युता ॥ ९ ॥ सर्वरत्नसमायुक्ता
तव विप्र निवेदिता ॥ आत्मात्मानं भृः शिवः शौरिः शक्रः सुरगणैर्वृतः ॥ १० ॥ तस्मादात्मप्रदानेन मम सात्मा प्रसीदतु ॥ इ
त्युच्चार्य ततो दद्याद्ब्राह्मणाय युधिष्ठिर ॥ ११ ॥ ब्राह्मणश्चापि गृह्णीयात्कोऽदादिति च कीर्तयेत् ॥ ततः प्रदक्षिणीकृत्य प्रणि

नग

303

॥ रामः ॥
॥ ३०३ ॥

१ बुधैः २

२ सर्वसंपत्समायुक्ता ३

पत्थविसर्जयेत॥१२॥विधिनानेनराजेंद्रदानमेतत्प्रयछति॥यः पुमानथवानारीभक्त्यायास्फलमाप्नुयात्
१३॥साग्रंवर्षशतंदिव्यंस्वर्गलोकेमहीयते॥अभीष्टफलदानेन ह्यभीष्टफलभाग्भवेत्॥१४॥यत्रैवोत्पद्यतेजं
तुःप्राप्तेकर्मक्षयेपुन॥तत्रैवसर्वकामानांफलभाग्भवतेनरः॥१५॥इष्टबंधुजनैःसार्द्धंनवियोगंकदाचन॥प्रा
प्नोतिपुरुषोराजन्स्वर्गेचानंतमश्नुते॥१६॥यस्मात्त्वतःप्रतिकृतिंवरवाहनस्याहैमीविधायधनधान्यसमाकुलां
च सोपस्करंद्विजवरायददातिभक्त्यावंद्यार्कवत्सदिविभातिहिराजराजः॥१७॥ ॥इतिश्रीभविष्येमहापुराणेउत्त
रपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेआत्मप्रतिकृतिदानविधिवर्णनंनामपंचशी।त्युत्तरशततमोऽध्यायः॥१८५॥
श्रीकृष्णउवाच॥सांप्रतंसंप्रवक्ष्यामिहिरण्याश्वविधिंपरम्॥यस्यप्रदानात्पुरुषःशाश्वतंफलमश्नुते॥१॥पुण्यंदिन
मथासाद्यपात्रंचापिगुणाधिकम॥शक्तितस्त्रिपलादूर्ध्वमाशताच्चनरोत्तम॥२॥खलीनालंकृतमश्वंकारयेद्धेम
वाजिनम्॥सुखुरंसोत्तरस्कंधंदंष्ट्राजानुसवालधिम॥३॥स्थापयेद्वेदिमध्येतुकृष्णाजिनतिलोपरि॥कौशेयवस्त्र
संवीतंकुंकुमेनविलेपितम॥४॥संपूज्यकुसुमैःधूपैर्भक्ष्याणाकान्विनिवेद्यच॥ततःपर्वसमीपेतुगृहीतकुसुमांज
लिः॥५॥इममुच्चारयेन्मंत्रंपुराणोक्तंयतव्रतः॥नमस्तेसर्वदेवेशवेदाहरणलंपट ६॥वाजिरूपेणमामस्मात्पा

त्वयाजितंजगत्सर्वंत्वत्स्वरूपकाविता मही वाजिरूपनमस्तुभ्यंपाहि संसारसागरात १

॥ भवि ॥
॥ ३०४ ॥

वर्त्तसे   भावयसे

हि संसारसागरात् ॥ त्वमेव सप्तधा भूत्वा छन्दोरूपेण भांस्करम् ॥ ७ ॥ यस्मात्वायसे लोकानतः पाहि सनातन ।
एवमुक्त्वार्पयेत्तं राजन्विप्राय प्रतिपादयेत् ॥ ८ ॥ प्रदक्षिणांततः कृत्वा प्रणिपत्य विसर्जयेत् ॥ अनेन विधिना राजन्हि-
रण्याश्वमर्त्तं कृतम् ॥ ९ ॥ दत्वा पापक्षयापश्यात्प्राप्तो लोकमाप्नोति शाश्वतम् ॥ तस्मिन्नहनि भुंजीत तैलक्षारविव-
र्जितम् ॥ १० ॥ पुराणश्रवणं तद्वत्कारयेद्विजनादत् ॥ ११ ॥ इत्थं हिरण्याश्वविधिं करोति यः सुपुण्यमासाद्य दिनं नरेंद्र ॥ वि-
मुक्तपापः सपुरंदराद्यैः प्राप्नोति सिद्धैरभिपूजितं यत् ॥ १२ ॥ इति पठति य इत्थं हेमवाजिप्रदानं सकलकलुषमुक्तः सोऽपि
युक्तेन भूपः ॥ कनककमलविमानेनार्कलोकं प्रयाति त्रिदशपतिवधूभिः पूज्यते हर्म्यभोगे ॥ १३ ॥ यो वा शृणोति पुरुषोऽ-
थवा स्मरेद्वा हेमाश्वदानमभिनंदति दीयमानम् ॥ सोऽपि प्रयाति हतकल्मषभद्रदेहः स्थानं पुरंदरमहेश्वरलोकजुष्ट-
म् ॥ १४ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हिरण्याश्वदानविधिवर्णनं नाम षडशीत्यु-
त्तरशततमोऽध्यायः ॥ १८६ ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि तव पांडुकुलोद्वह ॥ पुण्यं हेमरथं नाम महापात-
कनाशनम् ॥ १ ॥ पुण्येऽह्नि विप्रकथिते स्वनुलिप्ते गृहांगणे ॥ कृष्णाजिनतिलान्कृत्वा कांचनं स्थापयेद्रथम् ॥ २ ॥ च-
तुरश्वं महाभाग चतुश्चक्रं सकूबरम् ॥ वृत्तानामग्रतः कृत्वा गरुडेन प्रग्रहंभमम् ॥ ३ ॥ इंद्रनीलेन कुंभेन ध्वजरूपेण सं-

अप्नोति ४   ५ राजन्कारयेन्नियतात्मना ८.   ६ ग्रभिपूजितात्मा ७

॥ राम: ॥
॥ ३०४ ॥

304

पूजनम् ॥ लोकपालाष्टकोपेतं पद्मरागदलान्वितम् ॥ ४ ॥ चत्वारः पूर्णकलशा धान्यान्यष्टादशैव तु । कौशेयवस्त्रसंवी-
तमुपरिष्टाद्वितानकम् ॥ ५ ॥ माल्येक्षुफलसंपूर्णं पुरुषेणान्वितम् ॥ योगपूर्णः पुमान्कार्यस्तं च तत्राधिवासयेत् ॥ ६ ॥
एवंविधं पूजयित्वा माल्यगंधानुलेपनैः ॥ चक्ररक्षास्तु भोनस्य कार्यौ विप्रकुमारकौ ॥ ७ ॥ पुण्यकाले ततः प्राप्ते स्नातः संपूज्य देव-
ताः त्रिःप्रदक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ ८ ॥ अक्षमालां वरधरः इमं मंत्रमुदीरयेत् ॥ ९ ॥ नमो नमः पापविनाशना-
य विश्वात्मने वेदतुरंगमाय ॥ धाम्नामधीशाय भवाय रथस्थदानात्मम देहि शांतिम् ॥ १० ॥ वस्वष्टकादित्यमरुद्गणानां
त्वमेव धाता परमं निधानम् ॥ यतस्ततो मे हृदयं प्रयातु धर्मैकतानत्वमघौघनाशात् ॥ ११ ॥ इति तुरगरथप्रदानमेतद्भव-
भयसूदनमत्र यः करोति ॥ स कलुषपटलैर्विमुक्तदेहः परमुपयाति पदं पिनाकपाणेः ॥ १२ ॥ देदीप्यमानवपुषाथ जित-
प्रभावमाक्रम्य मंडलमखंडलचंडभानोः ॥ सिद्धांगनानयनषट्पदपीयमानवक्त्रांबुजोऽजभवने चिरं स हास्ते ।
१३ ॥ इति पठति शृणोति वा य एतत्कनकतुरंगरथप्रदानमस्मिन् न स नरकपुरं व्रजेत्कदाचिन्नरकरिपोर्भवनं प्रया-
ति मर्त्यः ॥ १४ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हिरण्याश्वरथदानविधिवर्णनं
नाम सप्ताशीत्युत्तरशततमोऽध्यायः ॥ १८७ ॥ ॥ युधिष्ठिर उवाच ॥ कृष्णाजिनप्रदानस्य विधिं कालं ममानघ ·

१ वेदतुरंगमाय ७   २ अखंडलदंडमानो अखंडलतुल्यमानो ४

३ दुःस्वदुःस्वप्नदर्शने २ ४ सुधिरवरम् ५

ज्ञातव्यं वसमाचक्ष्व नत्र मे संशयो महान्॥१॥ श्रीकृष्ण उवाच॥ पुरा दिलीपराजेभ्य संक्रान्तो दिनसंक्षये॥ माघ्यां
वा ग्रहपीडासु दुःस्वप्नाद्भुतदर्शने॥२॥ येयमेतन्महादानं ऽकामाज्ञागमे तथा॥ आहिताग्निर्द्विजो यश्च वेदवेदांगपा-
रगः॥३॥ पुराणाभिरतो दक्षो देयं तस्यैव पार्थिव॥ यथा येन विधानेन तन्मे निगदतः शृणु॥४॥ गोमयेनोपलिप्ते
तु शुचौ देशे नराधिप॥ आदावेव समास्तीर्य शोभितं वस्त्रमाविकम्॥५॥ कर्तव्यं रक्तभंगेन द्रौव्यदंतं तथैव च
मुक्तादामान्वितांगलं तिलच्छन्नं तथैव च॥६॥ तिलैः कृत्वा शिरो राजन्स्नात्वा समालब्धदये बुधः॥ सुवर्णनाभितः कुर्याद-
लंकुर्याद्विजोत्तमः॥७॥ पुष्पैर्गन्धैः फलैश्चैव नैवेद्येन च पूजयेत्॥ रत्नैरेवं यथाशक्त्या नवदिक्षु च विन्यसेत्॥८॥ कां-
स्यपात्राणि चत्वारि नैवेद्याद्यथाक्रमम्॥ घृतं क्षीरं दधि क्षौद्रमेवं दत्वा यथाविधि॥९॥ ततः सर्वसमीपे तु मंत्रमेन-
मुदीरयेत्॥ कृष्णः कृष्णमलो देव कृष्णाजिनधरस्तथा॥१०॥ तद्दानात्पात्तपापस्य प्रीयतां मे नमो नमः॥ त्रयस्त्रिंशात्मरा-
णां च आधारत्वं व्यवस्थितः॥११॥ कृष्णोऽसि मूर्तिमान्साक्षात्कृष्णाजिन नमोऽस्तु ते॥ एवं प्रदक्षिणीकृत्य प्रणिपत्य पु-
नः पुनः॥१२॥ तस्य निग्राहकं विप्रं वेदवेदांगपारगम्॥ स्नातं वस्त्रयुगाच्छन्नं स्वशक्त्या वाप्यलंकृतम्॥१३॥ प्रतिग्रहश्च
तस्योक्तः पुच्छदेशे स्वयं भवा॥ प्रतिग्रहप्रदस्यापि विप्रस्य चसमारतः॥१४॥ न पश्येद्वदनं पश्चान्नचैनमभिभाषयेत्॥

१ नक्षपरिच्छन्नम् २

नैवस्वर्गमवाप्नुयः २

अनेन विधिना दत्वा यथावत्कृष्णमार्गणम् ॥१५॥ समग्रं भूमिदानस्य फलं प्राप्नोति मानवः ॥ कृष्णाजिनतिलान्कृ
त्वा हिरण्यं मधुसर्पिषी ॥१६॥ ये प्रयच्छंति विप्राय नैते शोच्या भवंति वै ॥ सर्वाल्लोकान्व्रजंत्येते कामचारा विपश्चिताः ॥ १७
आभूतसंप्लवं यावत्स्वर्गं प्राप्नोत्यनक्षयः ॥ कृष्णाजिनसमं दानं नचास्ति भुवनत्रये ॥१८॥ प्रतिग्रहेपि पापीयानिति वेदवि
दो विदुः ॥ अवस्थात्रितये यच्च त्रिधा यत्समुपार्जितम् ॥१९॥ तत्सर्वं नाशमायाति दत्वा कृष्णाजिनं क्षणात् ॥२०॥ कृष्णो
सारां कृष्णमृगस्य चर्म दत्वा द्विजेंद्राय समाहितात्मा ॥ यथोक्तमेतन्मरणं न शोचेत्प्राप्नोत्यभीष्टं मनसः फलं यत् ॥२१॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कृष्णाजिनदानविधिव्रतवर्णनं नामाष्टाशीत्युत्तरश
ततमोऽध्यायः ॥ १८८ ॥ ॥ श्रीकृष्ण उवाच ॥ कथयिष्ये महाराज हेमहस्तिनरथं नत ॥ यस्य प्रदानाद्भवनं वैष्णवं याति
मानवः ॥ १ ॥ पर्वकालं समासाद्य संक्रांतौ ग्रहणेऽपि वा ॥ कुर्याद्देवरथाकारं रथं सालोविभूषितम् ॥ २ ॥ बलभीभि
र्विचित्राभिर्ध्वजनुष्कसमन्वितम् ॥ चतुर्भिर्हैममातंगैर्युक्तं हेमविभूषितम् ॥ ३ ॥ ध्वजे च गरुडं कुर्यात्कूबराग्रे वि
नायकम् ॥ लोकपालाष्टकोपेतं ब्रह्मार्कशिवसंयुतम् ॥ ४ ॥ मध्ये नारायणोपेतं लक्ष्मीपुष्टिसमन्वितम् ॥ कृष्णाजि
नतिलद्रोणं कृत्वा तं स्थापयेऽथम ॥ ५ ॥ नानाफलसमायुक्तमुपरिष्टाद्वितानकम् ॥ कौशेयवस्त्रसंवीतमम्ला

३ ग्रकादत ५

४८ हीनाकुसुमांजलिम्   ॥ शंकरलोकपाललोकेशविद्याधरवासुदेवैः ईप्सितपदमंप्रराशे

॥ भवि पु ॥
॥ ३०६ ॥

नकुसुमार्चितम् ॥ ६ ॥ कुर्यात्संचपलाश्वं साश्वानाञ्च नरोत्तम ॥ ततः स्नात्वा समभ्यर्च्य पितॄन्देवांस्तथा विधि ॥ ७ ॥ त्रिःप्र
दक्षिणमावृत्य गृहीतकुसुमांजलिः ॥ इममुच्चारयेन्मंत्रं सर्वसौख्यप्रदायकम् ॥ ८ ॥ नमो नमः शंकरपद्मजार्कलोकेशवि
द्याधरवासुदेवैः ॥ त्वं सेव्यसे वेदपुराणयज्ञैस्तेजोहितः स्यंदन पाहि तस्मात् ॥ ९ ॥ यत्तत्पदं परमगुह्यतमं पुराणमानंदहे
तुगणरूपविमुक्तबंधाः ॥ योगैकमानसदृशो मुनयः समाधौ पश्यंति तत्त्वमसि नाथ रथोऽधिरूढः ॥ १० ॥ यस्मात्त्वमेव
भवसागरसंप्लुतानामानंदभांडचितमध्यगयानपात्रम् ॥ तस्मादघौघशमनेन कुरु प्रसादं चामीकरेभरथ मां भव
संप्रदानात् ॥ ११ ॥ इत्थं प्रणम्य कनकेभरथप्रदानं यः कारयेत्सकलपापविमुक्तदेहः ॥ विद्याधरामरमुनींद्रगणा
भिजुष्टं प्राप्नोत्यसौ पदमतींद्रियमिंदुमौलेः ॥ १२ ॥ हृतदुरितवितानातिगरिसवह्निपालब्धनिकरकृतदेहोद्दामभा
नोऽपि वंश्यान् ॥ नयति च पितृपौत्रानात्मरोदप्यशोभा कृतगजरथदानः शाश्वतं सद्म विष्णोः ॥ १३ ॥ ॥ इति श्री
भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे महारथदानविधिवर्णनं नामैकोननवत्युत्तरशत
तमोध्यायः ॥ १८९ ॥ ॥ श्रीकृष्ण उवाच ॥ पुनरेव प्रवक्ष्यामि दानमत्यद्भुतं तव ॥ विश्वचक्रमिति ख्यातं सर्व
पापविनाशनम् ॥ १ ॥ तपनीयस्य शुद्धस्य विश्वचक्रन्तु कारयेत् ॥ श्रेष्ठं पलसहस्रेण तदर्द्धेन तु मध्यमम्:

मृ ८४

306

॥ रामः ॥
॥ ३०६ ॥

थ ॥ तस्याग्रे ईशके निधेस्याद्विश्वचक्रमुदाहृतम् ॥ तथा विंशात्सलाद्दूर्ध्वमष्टाक्षोऽपि निवेदयेत् ॥ ३ ॥ षोडशारं ततश्च
क्रं भूमल्लेस्यष्टकावृतम् ॥ नाभिपद्मे स्थितं तद्धि हंसयोगाद्द्वंद्वचतुर्भुजम् ॥ ४ ॥ शंखचक्रेऽस्य पार्श्वस्थे देव्यष्टकसमा
वृतम् ॥ द्वितीयावरणे तत्र स्वर्वतो जलशायिनं ॥ ५ ॥ भवित्रिर्मत्र्व लिख्य बुद्धाकल्पपद्मच ॥ मत्स्यः कूर्मो वरा
हश्च नारसिंहोऽथ वामनः ॥ ६ ॥ रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश ॥ ततो यावरणे गौरी मनुभिर्वर्णभिर्यु
ता ॥ ७ ॥ चतुर्थे चाद्दशादित्या वेदाश्चत्वार एव च ॥ पंचमे पंचभूतानि रुद्राश्चैकादशैव तु ॥ ८ ॥ लोकपाला
ष्टकं षष्ठे दिङ्मातंगास्तथैव च ॥ सप्तमेऽस्त्राणि सर्वाणि मंगलानि च कारयेत् ॥ ९ ॥ अंतरांतरतो देवान्विन्य
सेदष्टमे पुनः ॥ दिग्भागस्थिततः शंख्यापताकातोरणान्वितम् ॥ १० ॥ मंडपं कुंडमेकं च कारयेद्वस्त्रसंयुतम् ॥ च
तुर्हस्ता भवेद्वेदी मध्ये तस्यास्ततोन्यसेत् ॥ ११ ॥ कलशाजिनोपरि गतं विश्वचक्रं विचारतः ॥ तथाष्टादशधा
न्यानि रत्नाश्च लवणादयः ॥ १२ ॥ पूर्णकुंभाष्टकं तद्वद्वस्त्रमाल्यविभूषितम् ॥ फलानि दापयेत्सार्द्धं पंचवर्ण
वितानकम् ॥ १३ ॥ अधिवासनं तनश्चक्रं पश्चाद्धोमं समाचरेत् ॥ चातुश्चरणिकास्तत्र ब्राह्मणाश्च गुरोऽथ
वा ॥ १४ ॥ होमं कुर्युर्जितात्मानो वस्त्राभरणभूषिताः ॥ होमद्रव्यसमोपेताः स्त्रुवस्त्रुवैस्ताम्रभाजनैः ॥ १५ ॥

चक्रप्रतिष्ठितानां तु सुराणां होम इष्यते ॥ तद्विप्रैर्जपमन्त्रैः सर्वोपद्रवशान्तये ॥ १६ ॥ ततो मंगलशब्देन स्नातः शुक्लांवरो गृही ॥ इष्टमाधिकामन्तां नेतु गृहीतकुसुमांजलिः ॥ १७ ॥ इममुच्चारयन्मंत्रं कृत्वा तं त्रिः प्रदक्षिणाम ॥ नमो विश्वंभरायेति विश्वचक्रात्मने नमः ॥ १८ ॥ परमानंदरूपी त्वं पाहि नः पापकर्दमात् ॥ तेजोमयमिदं यस्मात्सदा पश्यंति सूरयः ॥ १९ ॥ हृदि तत्त्वगुणातीतं विश्वचक्रं नमाम्यहम् ॥ वासुदेवे स्थितं चक्रं तस्य मध्ये तु माधवः ॥ २० ॥ अन्योन्याधाररूपेण प्रणमामि स्थिताविह ॥ विश्वचक्रमिदं यस्मात्सर्वपापहरं हरेः ॥ २१ ॥ आयुधं चाधिवासश्च तस्माच्छांतिं ददातु मे ॥ इत्यामंत्र्य च यो दद्याद्विश्वचक्रं विमत्सरः ॥ २२ ॥ विमुक्तः सर्वपापेभ्यो विष्णुलोके महीयते ॥ वैकुंठलोकमासाद्य चतुर्बाहुर्नरोत्तम ॥ २३ ॥ सेव्यतेऽप्सरसां संघैस्तिष्ठेत्कल्पशतत्रयम् ॥ प्रणमेद्वाथ यः कृत्वा विश्वचक्रं दिने दिने ॥ २४ ॥ तस्यायुर्वर्द्धते दीर्घं लक्ष्मीश्च विपुला भवेत् ॥ तस्माच्चक्रं सदा कार्यं धार्यं च स्वगृहे नरैः ॥ २५ ॥ कांचनं वाथ रौप्यं वा तदभावेऽथ ताम्रजम् ॥ २६ ॥ इति सकलजगत्गुणाधिवासं वितरति यस्तपनीयषोडशारम् ॥ हरिभवनगतः ससिद्धसंघैश्चिरमधिगम्यानमस्यतेऽप्सरोभिः ॥ २७ ॥ अथ सुदर्शनतां प्रयाति शत्रोर्मदनसुदर्शनतां च कामिनीभिः ॥ स सुदर्शनकेशवानुरूपः

कनकञ्च दर्शनदानं दद्यात्पाप ॥ २८ ॥ कृतयज्ञस्तु हितोः पितृषोऽस्मात्प्रभिन्नरत्नात्प्रवराः कृतिर्हुतारे ॥ अभिभवति
भयोऽस्वानि भित्वा भवम भितो भवने भया निष्कपः ॥ २९ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृ
ष्णयुधिष्ठिरसंवादे हिम्यचक्रदानविधिवर्णनं नाम नवम्युत्तरशततमोऽध्यायः ॥ १२० ॥ ॥ युधिष्ठिर उवाच ॥
॥ प्रतिष्ठा शाश्वती केन दानेन मधुसूदन ॥ इह लोके परे चैव कीर्तिरत्युत्तमा तथा ॥ १ ॥ सद्गतिं च तथा यांति सर्वे
पितृपितामहाः ॥ संततिश्चाक्षया लोके भवश्चापि पुष्कलः ॥ २ ॥ स्थापनात्सर्वदेवानां कथं स्याद्यदुनन्दन ॥ तद
वदस्व महाभाग दानेन नियमेन वा ॥ ३ ॥ ॥ श्रीकृष्ण उवाच ॥ साधु पृष्टं त्वया राजंल्लोकानां नृप कारकम् ॥ शृणुष्वैक
मना भूत्वा गुह्यं परममुत्तमम् ॥ ४ ॥ भुवनानां समासेन प्रतिष्ठां कथयामि ते देवानृषींस्तथा नागा गंधर्वा यक्षराक्ष
सा ॥ ५ ॥ प्रेताः पिशाचा भूताश्च तथा पितराः सुपर्णसंज्ञयाः ॥ कारकस्यानुकूलेन मन्वैर्विजयेश्च मे ॥ ६ ॥ उत्तमे तिथौ शि
वक्षेत्रे दिने सौम्यग्रहान्विते ॥ सम्पूजितं परं कृत्वा बान्धवैः सुसंहतम् ॥ ७ ॥ अभिलाषं दृष्ट्वा भुवनं बहुदिक वर्धनम-
न स्मिन्सर्वाणि राजेन्द्र भुवनानि चलेत्ययेत ॥ ८ ॥ चातुर्वर्णकमानीय विचित्रं शिवकर्मणि ॥ पूजनं वापि रहितं
भक्ष्यं चित्रकरं भम ॥ ९ ॥ संपूज्य पितृस्थाय स्थलेन दिव्यवासोविभूषणैः ॥ तस्मिन्कर्मणि युंजीत पंचगव्यानि तैर्द्विजोत्तमैः

कृत्वं तां मस्था
दिकुर्वन्सम

१ ज्यपत्तनः २ स्तुविस्तरम् ३ मेरोः

१० ॥ शंखभेरीनिनादैश्च गीतमंगलनिस्वनैः ॥ उत्साहजनयोगैश्च ब्राह्मणानां जयेन तः ॥ ११ ॥ आचार्यमपि संपू-
ज्य वाससोभिर्भूषणैस्तथा ॥ प्रारंभं कारयेद्दानमेतेनास्मिन्यथोदितम् ॥ १२ ॥ मध्येवलेखयेद्दानं जंबूद्वीपं सविस्तर-
म् । तस्य मध्ये स्थितो मेरुर्मेरोरुपरि देवताः ॥ १३ ॥ दिक्पाला लोकपालानां पुरोऽष्टौ तु रसंयुताः ॥ सप्तद्वीपवती पृ-
थ्वी सप्तचैव कुलाचलाः ॥ १४ ॥ सागराः सप्त चात्रैव नद्यो ह्रदाः सरांसि च ॥ पातालाः सप्त चात्रैव सप्तस्वर्गाधिमनवः ।
१५ ॥ ब्रह्मविष्णुशिवादीनां भवनानि यथाक्रमम् ॥ ध्रुवमार्गस्तथादित्यो ग्रहतारागणैर्युतः ॥ १६ ॥ देवदानवगंधर्वाप्-
सराश्च सपन्नगाः ॥ ऋषयो मुनयो गावो देवमातर एव च ॥ १७ ॥ सुपर्णाद्याश्च विहगा नागाश्चैरावतादय ॥ दिग्गजा-
ष्टकमत्रैव लेखयेत्स्वदमंडितम् ॥ १८ ॥ एवंविधं पटं राजन्कारयित्वा सुशोभनम् ॥ दशोत्तरेण पयसा एतत्सर्वं समावृ-
तम् ॥ १९ ॥ ततेजलाशतं मध्ये महतोग्रेण सर्वतः ॥ तेजस्तद्वायुना वायुराकाशेन समावृतः ॥ २० ॥ भूतादिना तथा का-
शं भूतादिर्महतात तथा ॥ अव्यक्तेन महांश्चैव व्याप्तो वैभद्विलक्षणः ॥ २१ ॥ अव्यक्तं तमसा व्याप्तं तमश्च रजसा तथा ॥ र-
जः सत्वेन संव्याप्तं त्रिधा प्रकृतिरुच्यते ॥ २२ ॥ एवमावरणोपेतं ब्रह्मांडमखिलं लिखेत् ॥ पुरुषेणावृतं सर्वं सबाह्याभ्यंतरं
तथा ॥ २३ ॥ एतत्सर्वं पटस्थं तु गंधाद्यैरर्चयेत्सुधीः ॥ कार्त्तिक्यामयने चैव विषुवे ग्रहणेऽपि वा ॥ २४ ॥ पूजयेत्तेन विधि-

नानन्त्रमासीनमेभ्यणः ॥ ततो मंडपं नत्वा विचित्रं कारयेद्बुधः ॥ २५॥ तत्र कुंडानि चत्वारि चतुरस्राणि कारयेत् ॥ द्वौ द्वौ
नियोजयेत्तेषु ब्राह्मणौ वेदपारगौ ॥ २६॥ यज्ञोपकरणोपेतो वस्त्राभरणभूषितो ॥ होमं कुर्य्युर्जितात्मानो मौनिनः स
र्वस्ववते ॥ २७॥ पटस्थितानां देवानां मंत्रैरोंकारपूर्वकैः ॥ यजमानस्ततः स्नातः सर्वालंकारभूषितः ॥ २८॥ माचार्येणास
मं कुर्यात्स्नानमग्रेपटस्य तु ॥ पुष्पैर्वस्त्रैः समभ्यर्च्य मंत्रमेतमुदीरयेत् ॥ २९॥ ब्रह्मांडोदरवर्त्तीनि भूतानि चतुर्दश ॥ ला
निसंति हि तान्यत्र पूजितानि भवंतु मे ॥ ३०॥ ब्रह्माविष्णुस्तथारुद्रो ह्यादित्या वसवस्तथा ॥ पूजिताः सुप्रतिष्ठाश्च भवंतु स
ततं मम ॥ ३१॥ रुपं पटं तं संपूज्य कृत्वा चैव प्रदक्षिणाम् ॥ भक्ष्यान्नानाविधांश्चैव नैवेद्यं तत्र दापयेत् ॥ ३२॥ गीतवाद्यध्वनि
नादैश्च जागरं कारयेत्ततः ॥ ब्रह्मघोषैर्विचित्रैश्च गीतमंगलनिस्वनैः ॥ ३३॥ पुनः प्रभाते विमले स्नात्वा शुचिरलंकृतः ॥
पूर्वोक्तविधिना तेन पुनः संपूजयेत्पटम् ॥ ३४॥ ऋत्विक्पूजां ततः कृत्वा गोदानेन विचक्षणः ॥ अथवा गोयुगं दद्यादेकै
कस्माप्यलंकृतम् ॥ ३५॥ उपानहौ तथा छत्रं गृहोपकरणानि च ॥ यद्यदिष्टतमं किंचित्सर्वं दद्याद्विचक्षणः ॥ ३६॥ ततः
प्रकल्पयेद्यानं नागं कुंकुमालंकृतम् ॥ जलामेवाजिसंयुक्तं पताकाध्वजशोभितम् ॥ ३७॥ सहस्रं दक्षिणां दत्वा ततस्वा
रोपयेत्पटम् ॥ ब्राह्मणैर्वा रथेनाथ नयेद्देवालयं बुधः ॥ ३८॥ तत्र स्वं स्थापयेन्नीत्वा गंधैः पुष्पैश्च धूपयेत् । तच्चापि दद्या

ममसर्वदा ।

गोयुतम्

संस्थापयेत्पटम्

वर्षसहस्राणीत्यग्निमेराग्रा ख्याख्याहतेनान्वयः ६

॥ भविपु ॥
॥ ३०२ ॥

न्नैवपंकर्णाश्चापिमहोत्सवम् ॥ ३९ ॥ यस्मिन्नायतनेनेनस्य प्रतिष्ठाक्रियतेनृप । पूजातत्रापिमहतीकर्तव्याभक्तिमिच्छता ॥ ४०
चंद्रातपत्रंघंटांचध्वजांछंदापयेत्सुधीः यथाशक्त्याचराजेंद्र गृहंगौरवयंश्रितः ॥ ४१ ॥ अभ्यर्च्य दक्षिणाभिश्चब्राह्मणांश्चविस
र्जयेत् । दीनांधकृपणानांचभोजनंचाप्ययाचितम् ॥ ४२ ॥ तस्मिन्नहनिदातव्यंमित्रस्वजनबंधुषु ॥ अनेनविधिनायस्तुश्रद्धावान्तो
जितेंद्रियः ॥ ४३ ॥ कुर्यान्नरोवानारीवाप्रतिष्ठांसार्वलौकिकीम् ॥ स्थापितंतुभवेत्तेनत्रैलोक्यंसचराचरम् ॥ ४४ ॥ कुलंचतारि
तंतेनसप्तश्चैत्ता युधिष्ठिर यावद्देवतागारे पटस्तिष्ठतिपूजितः ॥ ४५ ॥ तावदस्याक्षयाकीर्तिस्त्रैलोक्ये संप्रसर्पति । दानेन
कीर्तिर्यावत्तिमर्त्यलोकेप्रगीयते ४६ ॥ तावद्वर्षसहस्राणिस्वर्गलोकेमहीयते गंधर्वैर्गीयमानस्तुअप्सरोगणसेवितः ॥ ४७
वसेद्दृष्टमनाः स्वर्गेयावदिंद्राश्चतुर्दश पुण्यक्षयादिहाभ्येत्यराजाभवतिधार्मिकः ॥ ४८ ॥ पुत्रपौत्रान्वितःश्रीमान्दी
र्घायुरतिधार्मिकः ॥ दशजन्मानिराजेंद्रजायमानःपुनःपुनः ॥ ४९ ॥ क्षयतेवसुधाराजाराजिर्नाममहाबलः ॥ चक्रवर्तीदि
ढमतिर्जितारिर्विजितेंद्रियः ॥ ५० ॥ महीयेनपुरादत्तादेवराजस्यसंगरे ॥ जित्वादैत्यबलंसर्वंदानवांस्त्रिदिवंगतः ॥ ५१
महेंद्रायमहाभागसर्वंनिहतकंटकम् ॥ सकदाचित्सभामध्येयावदास्तेमहीपति ॥ ५२ ॥ तावत्तत्राजगामाथपुलस्त्यो
ब्रह्मणःसुतः ॥ शिष्यैःपरिवृतःश्रीमान्वेदवेदांगपारगैः ॥ ५३ ॥ दत्तार्घस्तुतदातेनउपविष्टोवरासने ॥ कुशलंपरया

तस्य ५
प्रतिमर्प निप

309

॥ रामः ॥
॥ ३०२ ॥

तस्मात्पितामहं द्रावरः ॥ ५४ ॥ अथ तं पूजयित्वाग्ने मधुपर्केण पार्थिवः ॥ पप्रच्छ विनयोपेतः कथासात्मोद्भवां नृपः
५५ ॥ भगवन्केन दानेन तपसा नियमेन वा ॥ प्रीरियं मम धर्मज्ञ तेजश्च्या स्यादृतं भवि ॥ ५६ ॥ यत्नं पुष्टिं धनं धान्यं पुत्र
पौत्रं तथोत्तमम् ॥ एतन्मे सर्वमाचक्ष्व सर्वज्ञोसि द्विजोत्तम ॥ ५७ ॥ पुलस्त्यउवाच ॥ शृणु राजन्कथामेतां मात्मीयां
शुभमनोहरम् ॥ कथ्यमानां मया सम्यक्सम्पूर्वे तु जन्मनि ॥ ५८ ॥ कथ्येयमभिनिर्दिष्टा भक्त्या त्वैश्वर्यवर्द्धिनीम् ॥ आसीत्त्वं
वैश्यजातीयो वाणिज्यां नगरे नृप ॥ ५९ ॥ बहुभृत्यपरीवारो धनधान्यसमन्वितः ॥ धार्मिकः सत्यनिरतो वणिग्धर्मर
तः सदा ॥ ६० ॥ तत्र तत्र पाश्चात्ताधर्मा धर्मात्मा यो न गतेन वै ॥ दानाध्ययात्कृत्विधा व्रतानि विविधानि च ॥ ६१ ॥ प्रसंगेन
कदाचिच्च प्रतिष्ठा भौवती त्वया ॥ कृता राजेन्द्र विधिवत्कृता चवसुधापदा ॥ ६२ ॥ फलेन तेन जातोसि सप्तजन्मानि
भूपति ॥ कीर्तिस्ते प्रथिता लोके यत्नं चापि महत्तव ॥ ६३ ॥ अपराण्यपि जन्मानि सप्त राजा भविष्यसि ॥ पश्चाद्योगिकुले
मृत्वा निर्वाणं समवाप्स्यसि ॥ ६४ ॥ एतत्ते सर्वमाख्यातं यन्मां त्वं परिपृच्छसि ॥ नारी वा पुरुषो वापि प्रतिष्ठां भौव
तीं नृप ॥ ६५ ॥ प्रकरोति विधानेन कृतकृत्यो भवेद्बुधः ॥ इह तथा समृद्धिस्तत्र राजा नेत्रोसि नश्रुतः ॥ ६६ ॥ यथा वदर्श
नेन तत्र सूर्यवैश्वानरोपमः ॥ ६७ ॥ धर्मं विवर्द्धयति कीर्तिश्रातानिधनेकामं प्रसाधयति पापमपाकरोति ॥ ख्यातामये

तथा

यम भुक्तानवदान निष्ठानतला लिपल्लकृत्ते भुवनप्रतिष्ठा ॥ ९८ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृ-
ष्णयुधिष्ठिरसंवादे भुवनप्रतिष्ठावर्णनं नामैकनवत्युत्तरशततमोऽध्यायः ॥ १२१ ॥ युधिष्ठिर उवाच ॥ कृतो दानवि-
धिः सर्वः प्रसादात्ते माधव ॥ नक्षत्रदानस्येदानीं दानकल्पं प्रवक्ष्यामे ॥ १ ॥ श्रीकृष्ण उवाच ॥ अत्राप्युदाहरन्तीममितिहा-
सं पुरातनम् । देवक्याश्चैव संवादं देवर्षेर्नारदस्य च ॥ २ ॥ द्वारकामनुसंप्राप्तं नारदं देवदर्शनम् ॥ पप्रच्छेदं तथा पूर्वं
देवकी धर्मदर्शिनी ॥ ३ ॥ तस्याः संपृच्छमानाया देवर्षिर्नारदस्तदा ॥ आचष्ट विधिवत्सर्वं यत्तत्पृच्छ विशांपते ॥ ४ ॥
नक्षत्रयोगं वक्ष्यामि सर्वपातकनाशनम् ॥ कृत्तिकासु महाभाग पायसेन ससर्पिषा ॥ ५ ॥ संतर्प्य ब्राह्मणान्साधूंल्लोका-
न्प्राप्नोत्यनुत्तमान् ॥ रोहिण्यां पाण्डवश्रेष्ठ मांसैरन्नेन सर्पिषा ॥ ६ ॥ संतर्प्य ब्राह्मणान्साधूंल्लोकान्प्राप्नोत्यनुत्तमान् ॥
पयोऽन्नदानं दत्वा तु आनृण्यार्थं द्विजातये ॥ ७ ॥ दोग्ध्रीं सवत्सां तु नरो नक्षत्रे सोमदैवते ॥ दत्वा दिव्यविमानस्थः
स्वर्गं प्राप्नोत्यनुत्तमम् ॥ ८ ॥ आर्द्रायां कृसरां दत्वा तिलमिश्रां समाहितः ॥ नरस्तरति दुर्गाणि सर्वाण्येव नरोत्तमः
९ ॥ पूपास्तु नर्वसौ दत्वा घृतपूर्णान्सुपाचितान् ॥ यशस्वी रूपसंपन्नः सज्जनो जायते कुले ॥ १० ॥ पुष्ये तु कनकं
दत्वा कृतं वा कृतमेव वा ॥ अनालोकेषु सोमवत्स विराजते ॥ ११ ॥ आश्लेषासु तथा रौप्यं यः सुरूपं प्रयच्छति ॥ सर्वभय

मृगशीर्षे २

लोकेषु शर्करा २

ब्रह्मराय २

ति निर्मुक्तः स्वास्थ्यवानभिजायते ||१२|| मघासु तिलपूर्णानि वर्धमानानि मानवः || प्रदाय पशुमांश्चैव पुत्रवां
श्च प्रजायते ||१३|| फाल्गुनीपूर्वसमये वडवां द्विजपुंगवे || दत्वा पुण्यकृतां लोकान्प्राप्नोति सुरसेवितान् ||१४||
उत्तराफाल्गुनीयोगे दत्वा सौवर्णपंकजम् || स्वर्गलोकमवाप्नोति सर्वबाधाविवर्जितः ||१५|| हस्ते तु हस्तिनं दत्वा कां
चनं शास्त्रितः कृतम् || यात्यसौ शक्रसदनं वरवारणधर्गतः ||१६|| चित्रासु वृषभं दत्वा पुण्यानां पुण्यमुत्तमम् || चर
त्यप्सरसां लोके मोदते नंदने वने ||१७|| स्वातीषु च धनं दत्वा यदभीष्टमिहात्मनः प्राप्नोति च शुभांल्लोकानिह लोके
महद्यशः ||१८|| विशाखासु महाराज धुरंधरविभूषितम् | सोपस्करं च शकटं सधान्यं वस्त्रसंयुतम् ||१९|| दत्वा प्रीणाति
स पितॄः प्रेत्य चानंत्यमश्नुते || न च दुर्गाण्यवाप्नोति रौरवादीनि मानवः ||२०|| दत्वा यथोक्तं विप्रेभ्यो गतिमिष्टां स गच्छति.
| कंबलान्यनुराधर्क्षे दत्वा प्रावरणानि च ||२१|| स्वर्गे वर्षशतं साग्रमास्ते सुरगणैर्वृतः || कालशाकं च विप्रेभ्यो दत्वा
मर्त्यः समूलकम् ||२२|| ज्येष्ठायां ज्येष्ठतामेति गतिमिष्टां च गच्छति || मूले मूलफलं दत्वा ब्राह्मणेभ्यः समाहितः ||२३||
पितॄन्प्रीणयते सर्वान्गतिं प्राप्नोत्यनुत्तमाम् || अथ पूर्वास्वषाढासु दधिपात्राणि मानवः ||२४|| कुलवृत्तोपसम्पन्ने
ब्राह्मणे वेदपारगे || प्रदाय जायते प्रेत्य कुले च बहुभोगवान् ||२५|| पुत्रपौत्रः परिवृतः पशुमान्धनवांस्तथा || उदमंथं

विंदति ५

॥ भवि ॥
॥ ३११ ॥

समर्पितं प्रभतमक्षफलानितम् ॥ २६ ॥ दत्वो नरास्वघाटकुसर्वान्कामानवाप्नुयात् ॥ दुग्धं त्वभिजितो भागे दत्वा
घृतमधुप्लुतम् ॥ २७ ॥ धर्मनिष्ठो मनीषिभ्यः स्वर्गेव सतिसत्यभाक ॥ श्रवणे प्रस्नकं श्वेतं प्रददातीह यो नरः ॥ २८ ॥
स्वेच्छयायानियानेन सर्वाल्लोकानसंशयः ॥ गोयुग्मं च धनिष्ठासु दत्वा विप्राय मानवः ॥ २९ ॥ सर्वत्र मानमाप्नोति
यत्र यत्रैव जायते ॥ तथा शतभिषायोगे दत्वागरुचंदनम् ॥ ३० ॥ प्राप्नोत्यप्सरसां लोके प्रेत्य गंधांश्च शोभनान् ॥ पूर्व
भाद्रपदायोगे राजमाषान्प्रदापयेत् ॥ ३१ ॥ सर्वभक्षफलोपेतः स वै प्रेत्य सुखी भवेत् ॥ उत्तरयोगेन वृषभं यः प्रयच्छ
ति ॥ ३२ ॥ पितॄन्प्रीणाति सकलान्प्रेत्य चानंत्यमश्नुते ॥ कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ॥ ३३ ॥ स प्रेत्य कामाना
दाय दातारमुपगच्छति ॥ रथमश्वसमायुक्तं दत्वाश्विन्यां नरोत्तमः ॥ ३४ ॥ हस्त्यश्वरथसंपन्ने वर्चस्वी जायते कुले ॥ भर
णीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै ॥ ३५ ॥ गावः प्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा ॥ इत्येष दक्षिणोद्देशः प्रोक्तो नक्ष
त्रयोगतः ॥ ३६ ॥ देवक्यै नारदेनैव यथावत्कथितस्तव ॥ सर्वपापप्रशमनः सर्वोपद्रवनाशनः ॥ ३७ ॥ नक्षत्रकालनिय
मो नक्षत्रप्रक्रमस्तथा ॥ वित्तं श्रद्धा च राजेंद्र कारणं चात्र कथ्यते ॥ ३८ ॥ यद्यच्च ते भगवता कृतलोऽवस्य ध्वेत्तादानमुदि
तं प्रसमीक्ष्य वेदान् ॥ नयो ददाति विभवे सति साधुवृत्ते किं तेन पार्थ न कृतं भवतीह लोके ॥ ३९ ॥ ॥ इति श्रीभ

सर्व ।

॥ दान: ॥
॥ ३११ ॥

311

२मासे ३चायतने ४ निश्चतात्मना ५ योददातिनरश्रेष्ठदानंत्व· स्वायकल्पितम्

विष्येमहापुराणोत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादेनक्षत्रदानविधिवर्णनंनामद्विनवत्युत्तरशततमोऽध्यायः
१९२॥ ॥श्रीकृष्णउवाच॥ तिथिदानमिदानींते कथयामियुधिष्ठिर॥ सर्वपापप्रशमनं सर्वविघ्नविनाशनम्॥ २
१॥ मानसंवाचिकंवापिकर्मजंयदघंभवेत्॥ सर्वंप्रशममायातिदानेनानेनपाण्डव॥२॥ श्रावणेकार्त्तिकेचैत्रेवैशा
खेफाल्गुनेतथा। सितपक्षाश्चभक्तोवदानंगोपुण्यवर्द्धनम्॥३॥ वित्तंभ्रातृसहायश्चपात्रज्ञाप्तिलपैवच॥ दानकालः
सदैवेहकथितस्तत्वदर्शिभिः॥४॥ तीर्थेदेवालयेगोष्ठेगृहेवानियतात्मवान्॥ योददातिनरश्रेष्ठदानंस्वायकल्पिते
५ प्रतिपत्सुद्विजान्स्नात्वासंपूजयित्वाप्रजापतिम्॥ सौवर्णमरविंदंचकारयित्वाबलान्वितम्॥६॥ कृत्वाचोदुम्बरेपा
त्रेसुगंधघृतपूरिते॥ गंधैर्धूपैः पूजयित्वाविप्रायप्रतिपादयेत्॥७॥ अनेनविधिनादत्त्वाकमलंकमलालयम्
रक्षितांश्चभतेकामान्कामिकामोब्रह्मसात्मताम्॥८॥ वह्निंपूज्यद्वितीयायांमधुपःस्वपितिक्रमात्॥ तिलाज्येनतथा
तंहुत्वादत्त्वापूर्णाहुतिंततः॥९॥ वैश्वानरंतुसौवर्णंस्थापयेत्ताम्रभाजने॥ गुडाज्यपूरितेराजंस्तोयपूर्णघटोपरि
१०॥ पूजयित्वावस्त्रमाल्यैर्भक्ष्यभोज्यैरनेकशः॥ नमस्तंब्राह्मणेदद्याद्वह्निर्मेप्रीयतामिति॥११॥ यावज्जीवकृतात्पा
पान्मुच्यतेनात्रसंशयः॥ ततोवह्निपुरंयातितिष्ठेहेदंनारदोमुनिः॥१२॥ तृतीयायांमहाराजराधांस्वर्णमयींशुभा

१ ब्रह्मसाम्यतम् ४पंक्ति

॥ भवि ३ ॥
॥ ३१२ ॥

वरुणपुत्त ४

म॥ स्थापयित्वा तामुपान्ते लवणोपरि विन्यसेत् ॥१३॥ जीरकं कटुकं चैव गुडं पार्श्वे तु दापयेत् ॥ रक्तवस्त्रयुगच्छन्नां
कुंकुमेन विभूषिताम् ॥१४॥ पुष्पधूपैः सनैवेद्यैः पूजयित्वा द्विजातये ॥ दत्वा यत्फलमाप्नोति पार्थिव केन वर्ण्यते ॥१५
क्षीरादयत्र गौवर्णानद्यः पायसकर्दमाः ॥ गन्धर्वाप्सरसो यत्र तत्र ते यान्ति मानवाः ॥१६॥ स्वर्गादिहैत्य संसारे सुरू-
पः॥ सुभगो भवेत् ॥ नानाभोक्ताव्ययधनः पुत्रपौत्रसमन्वितः ॥१७॥ नारी वा नरशार्दूल युक्ता भवतीह न संशयः ॥ वत्सण्यां
वारुणं हेमं वस्त्रयुग्मं सुशोभनम् ॥१८॥ कारयित्वांकुशायुतं तिलद्रोणोपरिन्यसेत् ततो ॥ पुष्पैः पूजयित्वा नैवेद्यैर्वि-
निवेदयेत् ॥१९॥ ततकृत्वा प्रणामोदद्यात् द्रोणाः श्रीयतामिति ॥ कार्यारम्भेषु सर्वेषु न स्याद्विघ्नं न जायते ॥२०॥ वारुणाः स-
प्तजन्मानि भवन्ति सर्वसिद्धिदाः ॥ वारुणोऽस्य सर्वाः तस्य लोकानिर्जयी भवेत् ॥२१॥ पञ्चमांपल्लवं चैव स्वर्णानेकेन का-
रयेत् ॥ क्षीरस्य पात्रमध्यस्थं पूजयित्वा प्रदापयेत् ॥२२॥ द्विजं सम्पूज्य वासोभिः प्रणिपत्य क्षमापयेत् ॥ इह लोके परे
चैव दानमेतत् सुखावहम् ॥२३॥ नागोपद्रवविद्राविसर्वदुःखनिवर्हणम् ॥ प्रायश्चितं तथा प्रोक्तं नागदष्टस्य शोभना.
२४॥ षष्ठ्यां शक्तिः समोपेतं कुमारं शिखिवाहनम् ॥ कारयित्वा यथाशक्त्या हेममालाविभूषितम् ॥२५॥ तंडुलेनाथ शि-
खरे वासोभिः पूज्य शक्तितः ॥ षष्ठ्यां स्कन्दं यथाशक्त्या स्कन्दं दद्यात् हिरण्मयम् ॥२६॥ पूजयित्वा गन्धपुष्पधूपैर्नैवेद्यकैस्तथा.

पूजयित्वा प्रदापयेत्.४

पताशोर्द्धम

॥ दान ॥
॥ ३१२ ॥

312

कोरव्यालाकुलेपथि ७

नमस्कृत्य ततो दद्याद्ब्राह्मणाय कुटुंबिने ॥२७॥ इह भुक्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥ अष्टौ ब्राह्मणानामेति ब्राह्मणो
ब्रह्मलोकनाम ॥२८॥ सप्तम्यां भास्करं पूज्य ब्राह्मणानभ्यमृतनमम् दद्याद्देवे कृतनशी वसनयामालं सदक्षिणम् ॥२९॥ सर्व
लोकमवाप्नोति सर्वेण सह मोदते ॥ गंधर्वास्त्विह मायांति दत्तेः प्रेक्षम लंकृते ॥३०॥ अष्टम्यां वृषभं श्वेतमअंगांगं धुंधर
म् ॥ सितवस्त्रयुगच्छन्नं घंटाभरणभूषितम् ॥३१॥ दद्यात्स्वर्णस्य विप्राय प्रीयतां वृषभध्वजः ॥ प्रदक्षिणां ततः कृत्वाभावारं
नमनुव्रजेत ॥३२॥ दानेनानेन नृपते शिवलोको न दुर्लभः ॥ वृषस्कंधे प्रतिष्ठंति भुवनानि चतुर्दश ॥३३॥ तस्माद्वृषभदाने
न दत्ता भवति भारती ॥ नवम्यां कांचनं सिंहं कारयित्वा स्वशक्तितः ॥३४॥ मृत्फलाद्यकृतं तेनीलं वस्त्रावगुंठितम् ॥ द
द्याद्देवीमनुस्मृत्य दुर्गे देवि नतिर्वर्हिणीम ॥३५॥ द्विजातिप्रवरायेत्थं सर्वान्कामानवाप्नुते ॥ कांतारवनदुर्गेषु चौरेव्याला
कुलेपथि ॥३६॥ हिंसकानां न वहि [illegible] न तस्याप्यभावतः ॥ मत्तो देवीपुरं याति पूज्यमानः सुरासुरैः ॥३७॥ पुण्यक्षया
दिह प्येत्य राजा भवति धार्मिकः ॥ दशम्यां च पक्षाद्दलदशाग्राः स्वर्णनिर्मिताः ॥३८॥ तवरोचनगडेश्वीरे निष्पाद्य षुति
लेषु च ॥ गव्यत्रयेतं दले षमाषाणामुपरि स्थिताः ॥३९॥ संपूज्य वस्त्रयुग्माद्यैर्द्विजाय प्रतिपादयेत ॥ अनेन विधि
ना यस्तु प्रमानत्री वाथवाप्नुतः ॥४०॥ तिर्णपयपिताजैडन स्यपुण्यफलं महत् ॥ इह लोके भूपतिः स्यात्प्रेत्य स्वर्गे मही

॥ अधि ॥
॥ ३१३ ॥

परितम् २

यते ॥४१॥ सफलास्तस्य सर्वाश्चाशायाः काश्चिन्मनसेप्सिताः ॥ ततः स्वर्गादिहाभ्येत्य कुले महति जायते ॥४२॥ एकादश्यां
गरुत्मन्तं कारयित्वा हिरण्मयम् ॥ यथाशक्त्या ताम्रपात्रे घृतस्योपरि पूजितम् ॥४३॥ पंचाग्न्यभिरते विप्रे गुणान्विते विशे
षतः ॥ दत्वा किंवकृतो ज्ञेन विष्णुलोके महीयते ॥ ४४ ॥ गां हयं महिषीं हेमसस्यधान्यान्यजाविकम् ॥ वडवां गृहं रसान्सर्वां
स्तथा वस्त्रफलद्रुमान् ॥४५॥ छत्राणि च विचित्राणि गंधांश्चोच्चावचान्कृन ॥ यथाशक्त्या समेलयित्वा वस्त्रैराच्छादयेत्त
तैः ॥४६॥ सदक्षिणां सदक्षौतानि ब्राह्मणेभ्यो निवेदयेत् ॥ एकस्य वा महाराज यत्नात्संतनिमित्तामय ॥४७॥ इहकीर्तिं परां प्राप्य
भुक्त्वा भोगान्यथेप्सितान् ॥ ततो विष्णुपुरं याति सेव्यमानोऽप्सरोगणैः ॥४८॥ कर्मक्षयादिहाभ्येत्य राजा भवति धार्मिकः
यज्वा भोगी दानपतिर्जीवेच्च शरदां शतम् ॥४९॥ स्नापयेद्ब्राह्मणान्भक्त्याभ्यंगोष्णांश्च योदकैः ॥ नानाच्छादनवैर्वस्त्रैर्गंध
पुष्पैरथार्चयेत् ॥५०॥ भोजयीत सुमिष्टान्नं दक्षिणांश्च विनिवेदयेत् ॥ यथाशक्त्या हेमरत्नं गां धर्मात्मा प्रीयतामिति ॥५१
धर्मराजाय कालाय चित्रगुप्ताय दंडिने ॥ मृत्यवे क्षयरूपाय अंतकाय यमाय च ॥५२॥ प्रेतनाथाय रौद्राय तथा वैवस्व
ताय च ॥ महिषस्थाय देवाय ताम्रांजलिस्त्रयोदश ॥५३॥ उच्चार्य श्रद्धया युक्तः प्रणिपत्य विसर्जयेत् ॥ यः करोति महारा
ज नपक्षासेतां मनोरमाम् ॥५४॥ यमायतनसंवेंसर्वे स्थित्वा व्याधिविवर्जितः ॥ यममार्गगतः पश्चाद्दुःखेनाप्नोत्स

आषाढ

॥ एमः ॥
॥ ३१३ ॥

313

लेख क्रम ९

सौगमान् ॥ ५५ ॥ गणप्रतिपत्तेन मर्त्यं पितृलोकं स गच्छति ॥ पुण्यपक्षवादिहाभ्येत्य समकुर्वीतीरजो भवेत् ॥ ५६ ॥ षष्टि
संयुतमंकुंभं चतुर्दश्यां पयोभक्तम् ॥ तं कर्षकेणासंयुक्तं हेम्नः सहस्रसंयुतम् ॥ ५७ ॥ पंचामरणसोमाद्यं वृषभमे
णासमन्वितम् ॥ यो दद्याच्छिवभक्ताय ब्राह्मणाय कुटुंबिने ॥ ५८ ॥ एवं दत्वा नरश्रेष्ठ शिवलोके महीयते ॥ तत्र
स्थित्वा चिरं कालं क्रमादेत्य महीतलम् ॥ ५९ ॥ आरोग्यधनसंपन्ने कुले महति जायते ॥ सर्वकामसमृद्ध्यर्थं यावज्ज
न्मशतत्रयम् ॥ ६० ॥ पौर्णमास्यां तु योत्सर्गं कारयित्वा विधानतः ॥ चंद्रं रजतनिष्पन्नं फलेनैकेन सोमनम् ॥ ६१
पूजयेद्गंधकुसुमैर्नैवेद्यैर्विविधैश्च ॥ दद्याद्विप्राय संकल्प्य वासोलंकारसंयुतम् ॥ ६२ ॥ मंत्रेणानेन राजेंद्र तल्लिबोध
यथोदितम् ॥ क्षीरोदार्णवसंभूत त्रैलोक्यांगणदीपक ॥ ६३ ॥ उमापतेः शिरोरत्न शिवं यच्छ नमो नमः ॥ दानेनाने
न नृपते भ्राजते चंद्रवद्दिवि ॥ ६४ ॥ अप्सरोभिः परिवृतो यावदाभूतसंप्लवम् ॥ ६५ ॥ दानान्यमूनि विधिवत्प्रयाति
क्रमेण यच्छति ये द्विजवराय विभवसत्त्वाः ॥ ते ब्रह्मविष्णुभवनेषु सुरं विहृत्य यांत्येकतां सह शिवेन न संशयो मे ॥ ६६
॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिथिदानवर्णनं नाम त्रिनवत्युत्तरशतत
मोऽध्यायः ॥ १९३ ॥ श्रीकृष्ण उवाच ॥ आदिवराहदानं ते कथयामि युधिष्ठिर ॥ धरण्यै यत्पुरा प्रोक्तं वराहवपुषा म

॥ भविष्य ॥
॥ ३१४ ॥

क्षारेषु २

ता ॥ १ ॥ उत्तमं पवित्रमायुष्यं सर्वदानोत्तमं ततम ॥ महापापादिदोषघ्नं पूजितं धर्मसत्तमैः ॥ २ ॥ देयं संक्रमणे भा
नोर्ग्रहणे द्वादशीष्वथ ॥ यज्ञोत्सवविवाहेषु दुःस्वप्नाद्भुतदर्शने ॥ ३ ॥ यदा वा जायते वित्तं चित्तं श्रद्धासमन्वितम ॥ तदै
व दानकालः स्यादध्रुवं जीवितं यतः ॥ ४ ॥ कुरुक्षेत्रादितीर्थेषु गंगायां यमुनदीषु च ॥ पुरेषु च पवित्रेषु आरामेषु वने
षु च ॥ ५ ॥ गोष्ठे देवालये वापि रथ्यायां स्वगृहांगणे ॥ देयं पुराणविधिना शालग्रामे कृते दिने ॥ ६ ॥ कृत्वो रात्रीर्यं तां ताम्र
प्रणं वाश्वरमं विन्निते ॥ उपरिष्टात्तिलैस्तेषां वराहं परिकल्पयेत ॥ ७ ॥ डौलौभ्यनुर्भिः संपूर्णं तदर्धेनाथवा पुनः ॥ माठके
नाथ कुर्वीत वित्तशाठ्यं न कारयेत ॥ ८ ॥ सुवर्णेन मुखं कार्यं भुजौ चक्रगदान्वितौ ॥ राजतौ कारयेद्दंष्ट्रां पद्मरागवि
भूषितम ॥ ९ ॥ शंखं व स्थापयेत्पार्श्वे वनमालां हिरण्मयीम ॥ पृष्ठे वीकारयेद्घिबसादौ रूप्यमयौ तथा ॥
१० ॥ दंष्ट्राग्रलग्नवसुधां सौवर्णीं कारयेत्क्षमाम ॥ सर्वधान्यसमोपेतां वस्त्रालंकृतविग्रहाम ॥ ११ ॥ प्रच्छाद्य व
स्त्रैर्देवेशं वराहं सर्वकामदम ॥ रोमराजिं कृष्णैः कृत्वा गंधपुष्पैस्तथार्चयेत ॥ १२ ॥ नवग्रहमखः कार्यो होमश्चात्रा
तिलैः स्मृतः ॥ एवं संस्थाप्य विधिवत्ततः स्तोत्रमुदीरयेत ॥ १३ ॥ वराहेशाग्रदुष्टानि सर्वपापफलानि च ॥ मर्द
मर्द महादंष्ट्र भास्वत्कनककुण्डल ॥ १४ ॥ शंखचक्रासिहस्ताय हिरण्याक्षान्तकाय च ॥ दंष्ट्रोद्धृतधरामते त्र

314

॥ रामः ॥
॥ ३१४ ॥

यीमूर्तिमते नमः || १५ || इत्युच्चार्य नमस्कृत्य प्रदक्षिणामनुव्रजेत् || ततस्तं ब्राह्मणो दद्याद्वस्त्रालंकारभूषितम् || अर्द्ध
प्रतिग्रहकृतनस्योक्षः पादयोः परमर्षिभिः || अनेन विधिना दत्वा प्रतिपत्य क्षमापयेत् || १६ || ततस्तं ब्राह्मणो दद्याद्व
स्त्रालंकारभूषितम् || अर्द्ध || प्रतिग्रहकृतस्योक्षः पादयोः परमर्षिभिः || अनेन विधिना दत्वा प्रतिपत्य क्षमापयेत् ||
१७ || एवं दत्वा महीनाथ वराहं सर्वकामदम् || यत्फलं समवाप्नोति पार्थ तत्केन वर्ण्यते || १८ || सर्वदानेषु यत्पुण्यं सर्वक्रतु
षु यत्फलं || तत्फलं समवाप्नोति दत्वा देवं जनार्दनम् || १९ || यथा ह्यनेन समुद्धृता वराहेण वसुंधरा || तथा कुलं समुद्धृत्य वि
ष्णुलोके महीयते || २० || ब्राह्मणक्षत्रियविशां स्त्रीणां शूद्रजनस्य च || एतत्साधारणं दानं शैववैष्णवयोगिनाम् || २१ || विप्रा
य वेदविदुषे वराहं रूप्यं दत्वा तिलामलसुवर्णमयं सवत्सकम् || उद्धृत्य पूर्वपुरुषान्सकलत्रमित्रः प्राप्नोति विष्णुभवनं सुर
सिद्धजुष्टम् || २२ || इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे वराहदानविधिवर्णनं नाम चतु
र्नवत्युत्तरशततमोध्यायः || १२४ || || युधिष्ठिर उवाच || भगवन् श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् || यदक्षयं परे लोके देव
र्षिगणपूजिते || १ || श्रीकृष्ण उवाच || रुद्रेण यत्पुरा प्रोक्तं नारदाय महात्मने || मत्स्येन मनवे तद्वत्कृताम्पृष्ठकराशह | २ || मेरोः
प्रदानं वक्ष्यामि दशधा पुनरेव च || यत्प्रदानो नरो लोकान्प्राप्नोति सुरपूजितान् || ३ || पुराणेषु च वेदेषु यज्ञेष्वयनेषु च·

𑑌 𑐩𑐰𑐶 𑑌
𑑌 𑑓𑑑𑑕 𑑌

𑐰𑐶𑐢𑐵𑐣𑐟𑑅

𑐣𑐟𑐟𑑂𑐦𑐮𑐩𑐢𑐷𑐟𑐾𑐲𑐸𑐎𑐺𑐟𑐾𑐲𑑂𑐰𑐶𑐴𑐫𑐡𑐱𑑂𑐣𑐸𑐟𑐾 𑑌𑑔𑑌 𑐟𑐳𑑂𑐩𑐵𑐡𑑂𑐰𑐶𑐢𑐵𑐣𑑄𑐰𑐎𑑂𑐲𑑂𑐫𑐵𑐩𑐶𑐥𑐬𑑂𑐰𑐟𑐵𑐣𑐵𑐩𑐣𑐸𑐎𑑂𑐬𑐩𑐵𑐟𑑂 𑑋 𑐥𑑂𑐬𑐠𑐩𑑀𑐢𑐵𑐣𑑂𑐫𑐱𑐿𑐮𑑅𑐳𑑂𑐫𑐵𑐡𑑂𑐡𑑂𑐰𑐶𑐟𑐷𑐫𑑀𑐮𑐰
𑐞𑐵𑐔𑐮𑑅 𑑌𑑕𑑌 𑐐𑐸𑐜𑐵𑐔𑐮𑐳𑑂𑐟𑐺𑐟𑐷𑐫𑐳𑑂𑐟𑐸𑐔𑐟𑐸𑐬𑑂𑐠𑑀𑐴𑐾𑐩𑐥𑐬𑑂𑐰𑐟𑑅 𑑋 𑐥𑑄𑐔𑐩𑐳𑑂𑐟𑐶𑐮𑐱𑐿𑐮𑑅𑐳𑑂𑐫𑐵𑐟𑑂𑐲𑐲𑑂𑐛𑑅𑐎𑐵𑐬𑑂𑐥𑐵𑐳𑐥𑐬𑑂𑐰𑐟𑑅 𑑌𑑖𑑌 𑐳𑐥𑑂𑐟𑐩𑑀𑐑𑐺𑐟𑐱𑐿𑐮𑐱𑑂𑐔𑐬
𑐟𑑂𑐣𑐱𑐿𑐮𑐳𑑂𑐟𑐠𑐵𑐲𑑂𑐚𑐩𑑅 𑑋 𑐬𑐵𑐖𑐟𑑀𑐣𑐰𑐩𑐳𑑂𑐟𑐡𑑂𑐰𑐡𑑂𑐡𑐱𑐩𑑅𑐱𑐬𑑂𑐎𑐬𑐵𑐔𑐮𑑅 𑑌𑑗𑑌 𑐰𑐎𑑂𑐲𑑂𑐫𑐾𑐰𑐶𑐢𑐵𑐣𑐩𑐾𑐟𑐾𑐲𑐵𑑄𑐫𑐠𑐵𑐰𑐡𑐣𑐸𑐥𑐹𑐬𑑂𑐰𑐱𑑅 𑑋 𑐀𑐫𑐣𑐾𑐰𑐶𑐲𑐸𑐰𑐾𑐥𑐸𑐞𑑂𑐫𑐾𑐰𑑂𑐫𑐟𑐷𑐥𑐵
𑐟𑐾𑐡𑐶𑐣𑐎𑑂𑐲𑐫𑐾 𑑌𑑘𑑌 𑐱𑐸𑐎𑑂𑐮𑐥𑐎𑑂𑐲𑐾𑐟𑐺𑐟𑐷𑐫𑐵𑐫𑐵𑐩𑐸𑐥𑐬𑐵𑐐𑐾𑐱𑐱𑐶𑐎𑑂𑐲𑐫𑐾 𑑋 𑐰𑐶𑐰𑐵𑐴𑑀𑐟𑑂𑐳𑐰𑐫𑐖𑑂𑐘𑐾𑐲𑐸𑐡𑑂𑐰𑐵𑐡𑐱𑑂𑐫𑐵𑐩𑐠𑐰𑐵𑐥𑐸𑐣𑑅 𑑌𑑙𑑌 𑐱𑐸𑐎𑑂𑐮𑐵𑐫𑐵𑑄𑐥𑑄𑐔𑐡𑐱𑑂𑐫𑐵𑑄
𑐰𑐵𑐥𑐸𑐞𑑂𑐫𑐬𑑂𑐎𑑂𑐲𑐾𑐰𑐵𑐥𑐸𑐢𑐵𑐣𑐟𑑅 𑑋 𑐢𑐵𑐣𑑂𑐫𑐱𑐿𑐮𑐵𑐡𑐫𑑀𑐡𑐾𑐫𑐵𑐫𑐠𑐵𑐱𑐵𑐳𑑂𑐟𑑂𑐬𑑄𑐰𑐶𑐖𑐵𑐣𑐟𑐵 𑑌𑑑𑑐𑑌 𑐟𑐷𑐬𑑂𑐠𑐾𑐲𑑂𑐰𑐵𑐫𑐟𑐣𑐾𑐰𑐵𑐥𑐶𑐐𑑀𑐲𑑂𑐛𑐾𑐰𑐵𑐳𑑄𑐐𑐩𑐾𑑇𑐥𑐶𑐰𑐵 𑑋 𑐩𑑄
𑐜𑐥𑑄𑐎𑐵𑐬𑐫𑐾𑐡𑑂𑐨𑐎𑑂𑐟𑑂𑐫𑐵𑐔𑐟𑐸𑐬𑐳𑑂𑐬𑐩𑐸𑐡𑐒𑑂𑐩𑐸𑐏𑐩𑑂 𑑌𑑑𑑑𑑌 𑐥𑑂𑐬𑐵𑐐𑐸𑐡𑐎𑑂𑐥𑑂𑐬𑐰𑐞𑑄𑐟𑐡𑑂𑐰𑐟𑑂𑐥𑑂𑐬𑐵𑐒𑑂𑐩𑐸𑐏𑑄𑐰𑐵𑐰𑐶𑐢𑐵𑐣𑐟𑑅 𑑋 𑐐𑑀𑐩𑐫𑐾𑐣𑐵𑐣𑐸𑐮𑐶𑐥𑑂𑐟𑐵𑐫𑐵𑑄𑐨𑐹𑐩𑐵𑐰𑐵
𑐳𑑂𑐟𑐷𑐬𑑂𑐫𑐰𑐵𑐎𑐸𑐱𑐵𑐣𑑂 𑑌𑑑𑑒𑑌 𑐟𑐣𑑂𑐩𑐢𑑂𑐫𑐾𑐥𑐬𑑂𑐰𑐟𑑄𑐎𑐸𑐬𑑂𑐫𑐵𑐡𑑂𑐰𑐶𑐲𑑂𑐎𑑄𑐨𑐥𑐬𑑂𑐰𑐟𑐵𑐣𑑂𑐰𑐶𑐟𑐩𑑂 𑑋 𑐢𑐵𑐣𑑂𑐫𑐡𑑂𑐬𑑀𑐞𑐳𑐴𑐳𑑂𑐬𑐾𑐞𑐨𑐰𑐾𑐡𑑂𑐐𑐶𑐬𑐶𑐬𑐶𑐴𑑀𑐟𑑂𑐟𑐩𑑅 𑑌𑑑𑑓𑑌 𑐩𑐢𑑂𑐫
𑐩𑑅𑐥𑑄𑐔𑐱𑐟𑐶𑐎𑑅𑐎𑐣𑐶𑐲𑑂𑐛𑑅𑐳𑑂𑐫𑐵𑐟𑑂𑐟𑑂𑐬𑐶𑐨𑐶𑑅𑐱𑐟𑐿𑑅 𑑌𑑑𑑔𑑌 𑐩𑐾𑐬𑐸𑐬𑑂𑐩𑐴𑐵𑐰𑑂𑐬𑐷𑐴𑐶𑐩𑐫𑐳𑑂𑐟𑐸𑐩𑐢𑑂𑐫𑐾𑐳𑐸𑐰𑐬𑑂𑐞𑐰𑐺𑐎𑑂𑐲𑐟𑑂𑐬𑐫𑐳𑑄𑐫𑐸𑐟𑑅𑐳𑑂𑐫𑐵𑐟𑑂 𑑋 𑐥𑐹𑐬𑑂𑐰𑐾𑐞𑐩𑐸𑐎𑑂𑐟𑐵𑐦
𑐮𑐰𑐖𑑂𑐬𑐫𑐸𑐎𑑂𑐟𑑀𑐫𑐵𑐩𑑂𑐫𑐾𑐣𑐐𑑀𑐩𑐾𑐡𑐎𑐥𑐸𑐲𑑂𑐥𑐬𑐵𑐐𑐿𑑅 𑑌𑑑𑑕𑑌 𑐥𑐱𑑂𑐔𑐵𑐔𑑂𑐔𑐐𑐵𑐬𑐸𑐟𑑂𑐩𑐟𑐣𑐷𑐮𑐬𑐟𑑂𑐣𑐿𑑅𑐳𑑁𑐩𑑂𑐫𑐾𑐣𑐰𑐿𑐜𑐹𑐬𑑂𑐫𑐳𑐬𑑀𑐖𑐬𑐵𑐐𑐿𑑅 𑑋 𑐱𑑂𑐬𑐷𑐏𑑄𑐜𑐏𑑄𑐜𑐿𑐬𑐨𑐶
𑐟𑑅𑐥𑑂𑐬𑐰𑐵𑐮𑐮𑐟𑐵𑐣𑑂𑐰𑐶𑐟𑑅𑐱𑐸𑐎𑑂𑐟𑐶𑐱𑐶𑐮𑐵𑐟𑐮𑑅𑐳𑑂𑐫𑐵𑐟𑑂 𑑌𑑑𑑖𑑌 𑐧𑑂𑐬𑐴𑑂𑐩𑐵𑐠𑐰𑐶𑐲𑑂𑐞𑐸𑐬𑑂𑐨𑐐𑐰𑐵𑐣𑑂𑐥𑐸𑐬𑐵𑐬𑐶𑐬𑑂𑐡𑐶𑐰𑐵𑐎𑐬𑑀𑑇𑐥𑑂𑐫𑐟𑑂𑐬𑐴𑐶𑐬𑐞𑑂𑐩𑐫𑑅𑐳𑑂𑐫𑐵𑐟𑑂 𑑋 𑐣
𑐰𑐿𑐎𑐡𑐾𑐱𑑀𑐴𑐟𑐟𑑂𑐎𑑄𑐢𑐬𑐵𑐞𑐶𑐔𑐟𑑀𑐡𑐎𑐥𑐸𑐲𑑂𑐥𑐰𑐞𑐵𑐣𑑂𑐫𑐨𑑂𑐫𑐡𑐶𑐎𑑂𑐲𑐸 𑑌𑑑𑑗𑑌 𑐥𑐹𑐬𑑂𑐰𑐾𑐞𑐩𑑄𑐡𑐬𑑀𑑇𑐣𑑂𑐫𑐨𑑂𑐬𑐐𑐸𑐞𑐵𑐰𑐮𑑅𑐳𑑂𑐫𑐵𑐟𑑂𑐟𑐸𑑄𑐐𑐵𑐒𑑂𑐎𑐸𑐥𑐵𑐞𑐵𑐣𑐶𑐔

𑐥𑑂𑐬𑐠𑑂𑐰𑐵𑐟𑐾

𑑌 𑐬𑐵𑐩𑑅 𑑌
𑑌 𑑓𑑑𑑕 𑑌

325

४ पार्श्वात्

४

दक्षिणेन ॥ वारुणीं पश्चादथ केसराणि रक्तानि चेतोनरसोदलानि ॥ १८ ॥ रौप्यान्महेन्द्रप्रमुखांस्तथाष्टौ संस्थापये
ल्लोकपतीन्क्रमेण ॥ नानापदालीश्च समन्ततः स्यान्मनोरमा माल्यविलेपनाद्या ॥ १९ ॥ वितानकं चोपरि पंचवर्णं सम्ना
नपुष्पाभरणान्वितं वा ॥ इत्थं निवेश्यामरशैलमध्ये स्नानस्य विष्टं भगवान्क्रमेण ॥ २० ॥ तृतीयभागेन चतुर्दिशं च संस्था
पयेत्सर्व्वविलेपनाद्यान् ॥ पूर्वेङ्गमं दरमनेकपलोपयुक्तं यत्रोऽश्यकाल्कनकमण्डकदंबविधूनन ॥ २१ ॥ कामेन कांचनमयेन
विराजमानमाकारयेत्कुसुमवस्त्रविलेपनाद्यम् ॥ क्षीरार्णोदसरोथ तथा वनेन रौप्यमाणानिपाटितेन विराजमान
म् ॥ २२ ॥ याम्येन गंधमदनोऽत्र निवेशनीयो गोधूमसंचयमयः कलधौतशोभा हैमं न पश्चिमपनिनाधनमानसेन नेनाप
मेव सकलं किल संयुतः स्यात् ॥ २३ ॥ पश्चात्तिलाचलमनेकसुगंधपुष्पसौवर्णपिप्पलहिरण्मयहंसयुक्तम् ॥ आका
रयेद्भक्तपुष्पवनेतनदधस्त्रान्वितं दक्षिणतोऽमरस्तथाग्रे ॥ २४ ॥ संस्थाप्य तं क्षिपलश्रीलसमधोनरौ ताश्रीलं सुपर्व्वम
पिनाघमयं कुलपुष्पम् ॥ पुष्पोद्भवे हेमवदपादपहोमरत्नमाकारयेत्कनकधेनुविराजमानम् ॥ २५ ॥ माक्षीकमण्डकर
साढचयेन तढडोध्येणाभास्वररोश्मयुतं विधाय ॥ होमश्चतुर्भिरथ वेदपुराणविद्भिर्होमं नेरनिप कीर्तिकृति

॥ भति ॥
॥ ३१६ ॥

भिर्द्विजोड्डैः ॥ २६ ॥ पूर्वं रामाहमात्मज्ञ त्वमत्र विधाय कुण्डं कार्यं त्वित्येवं धृतेन मम मित्कृशो भव ॥ राज्ञो वज्रागरमनुष्यनगी
नं नवैरावाहनं च कल्पयामि विलोच्य यालाम ॥ २७ ॥ त्वं सर्वदेवगणधामनिषेव्य विष्णुमस्मान्दहेश्वसर्पर्वतनाग
याभ्य ॥ क्षेमं विश्वस्य कृत्स्नां निमनुजमानः संप्रजितः परमभक्तिमतः प्रदेहि ॥ २८ ॥ त्वमेव भगवानीशो ब्रह्मा वि
ष्णुर्दिवाकरः । मूर्तामूर्तपरं तीजमतः पाहि सनातन ॥ २९ ॥ यस्मात्त्वं लोकपालानां विभ्रमन्तेभ्य मन्दिरम् । केशवार्कव
सूनां च तस्माच्छान्तिं प्रयच्छ मे ॥ ३० ॥ यस्माद् भूतमसंग्रैर्गन्धर्वैर्भुज्जिरतव ॥ तस्मात्त्वामनु यज्ञो भवः स संसार
सागरात ॥ ३१ ॥ एवमस्य अनमेहं सदरं चापि पूजयेत ॥ यस्माद्वैरं शेनाथमडाभ्य सी येस च ॥ ३२ ॥ ग्रामसे संदर
क्षिप्रमनन्तुष्टिकरो भव ॥ यस्मात्त्वरमत्निर्जं वृद्धये त्वं गन्धमादनः ॥ ३३ ॥ गन्धर्वैरप्सरोभिश्च गीयमानं यशो नृमे
यस्मात्त्वं केतुमालेन नैमिशेन धनेन च ॥ ३४ ॥ हिरण्मयपत्रालाङ्गलस्याच्छान्तिं प्रयच्छ मे ॥ उत्तरैः कुरुभिर्यस्मा
त्सावित्रेणापनेनन च ॥ ३५ ॥ सुपार्श्वराजसेनिस्समतः श्रीरक्षया सूने ॥ एवमासंज्ञाता स्वर्णान्तभाते विमले पुनः
३६ ॥ क्षात्वा नगरं वेदयान्सधर्मं सर्वदेनोन्नमन ॥ गोवां भूपं चतास्य पादलि गन्धः कृमनोस्तनः ॥ ३७ ॥ गावो देयाश्च
गृहिणे यादध्यवादशभारत ॥ शक्तितः स्वर्णवाष्टौ च वंध्या दद्याच्छक्तिमान ॥ ३८ ॥ एकापि गाव देया कपि लान्नपयस्वि

316

॥ रामः ॥
॥ ३१६ ॥

ती ॥ पर्व्वतानामशेषाणामेष सम्यग्विधिः स्मृतः ॥ ४९ ॥ यस्ते्व पूजने मंत्रान्स्वगोपस्कारे तथा ॥ ग्रहाणां लोकपा
लानां ब्रह्मादीनां समंत्रकम् ॥ ५० ॥ स्नानं देवार्च्चनं सर्व्वं होमः शैले प्रशस्यते । उपवासी भवेन्नित्यमशक्तौ नक्तमिष्यते ॥ ५१ ॥
विधानं सर्व्वशैलानां क्रमशः शृणु भारत ॥ दानकाले च ये मंत्राः पर्व्वतेषु च यः कृतम् ॥ ५२ ॥ अन्नं ब्रह्म यतः प्रोक्तमन्नप्रा
णाः प्रतिष्ठिताः ॥ अन्नाद्भवंति भूतानि जगदन्नेन वर्द्धते ॥ ५३ ॥ अन्नमेव यतो लक्ष्मीरन्नमेव जनार्द्दनः ॥ धान्यपर्व्वतरू
पेण पाहि तस्मान्नगोत्तम ॥ ५४ ॥ अनेन विधिना यस्तु दद्यादन्नमयं गिरिम् ॥ मन्वंतरशतं साग्रं देवलोके महीयते ॥ ५५ ॥
अप्सरोगणगंधर्व्वैराकीर्णेन विराजता ॥ विमानेन दिवः पृष्ठे समायाति ऋषिसेवितः ॥ ५६ ॥ पुण्यक्षये राजराज्यमवाप्नो
तीह न संशयः ॥ ५७ ॥ अप्सरोगणगंधर्व्वैराकीर्णेन विराजता ॥ विमानेन दिवः पृष्ठे समायाति ऋषिसेवितः ॥ ५८ ॥ पुण्य
क्षये राजराज्यमवाप्नोतीह न संशयः ॥ ५९ ॥ धान्याचलं कनकरूप्यविराजमानं विष्कंभपर्व्वतयुतं नगरोमयुक्तम् ॥ य
च्छंति ये सुमनसः प्रणिपत्य विप्रांस्ते प्राप्नुवंति परमेष्ठिपदानुरूपम् ॥ ६० ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरप
र्व्वणि श्रीकृष्णयुधिष्ठिरसंवादे धान्यपर्व्वतदानविधिवर्णनं नाम पंचविंशत्युत्तरशततमोऽध्यायः ॥ १२५ ॥ ॥
श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि लवणाचलमुत्तमम् ॥ यत्प्रदानान्नरो लोकमाप्नोति शिवसंयुतम् ॥ १ ॥ उत्तमः

॥ भवि ॥
॥ ३१७ ॥

सर्व्वदा

षोडशद्रोणः कर्त्तव्यो लवणाचलः ॥ मध्यमः स्यात्तदर्द्धेन तदर्द्धेनाधमः स्मृतः ॥ २ ॥ वित्तहीनो यथाशक्त्या द्रोणादूर्द्ध्वन्तु
कारयेत् ॥ चतुर्थांशेन विष्कम्भपर्वतान्कारयेत्पृथक् ॥ ३ ॥ विधानं पूर्ववत्कुर्याद्ब्रह्मादीनां च सर्वदा ॥ तद्वद्धेमतरून्सर्वाल्लो-
कपालान्निवेशयेत् ॥ ४ ॥ सरांसि कामदेवादींस्तद्वत्तत्र निवेशयेत् ॥ कुर्याज्जागरमत्रापि दानमंत्रान्निबोध मे ॥ ५ ॥ सौभा-
ग्यरससम्भूतो यतोऽयं लवणो रसः ॥ तदात्मकत्वेन च मां पाहि पापान्नगोत्तम ॥ ६ ॥ तस्मादन्नरसाः सर्वे नोत्कृष्टाल-
वणं विना ॥ प्रियश्च शिवयोर्नित्यं तस्माच्छान्तिप्रदो भव ॥ ७ ॥ विष्णुदेहसमुद्भूतं यस्मादारोग्यवर्द्धनम् ॥ यस्मात्पर्वत-
रूपेण पाहि संसारसागरात् ॥ ८ ॥ अनेन विधिना यस्तु दद्याल्लवणपर्वतम् ॥ उमालोके वसेत्कल्पं ततो याति परां गति-
म् ॥ ९ ॥ पुण्यक्षयादिहाभ्येत्य राजा भवति धार्मिकः ॥ पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् ॥ १० ॥ कुर्वन्ति ये लवणप-
र्वतसंप्रदानं संप्राप्नुवन्ति दिवि ते नृमहद्विमानम् ॥ तत्राप्सरोगणगणैरुपसेव्यमानास्तिष्ठन्ति हृष्टमनसो दिविवृन्दमा-
नाः ॥ ११ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे लवणपर्वतदानविधिवर्णनं नाम ष-
ण्णवत्युत्तरशततमोऽध्यायः ॥ १९६ ॥ ॥ श्रीकृष्ण उवाच ॥ अतः परं प्रवक्ष्यामि गुडपर्वतमुत्तमम् ॥ यत्प्रदानान्नरः
स्वर्गं प्राप्नोति सुरपूजितम् ॥ १ ॥ उत्तमो दशभिर्भारैर्मध्यमः पंचभिस्तथा ॥ त्रिभिर्भारैः कनिष्ठः स्यात्तदर्द्धेनाल्पकोऽ

२ अष्टतीभारै १

317

॥ राम: ॥
॥ ३१७ ॥

नरोत्तमः

मतः ॥ २ ॥ तक्षदामंत्रणां वृत्वां हेमकूटस्य सुपर्वतम् ॥ विध्वंसयध्वं तां तत्र मखं शिवनदेवता ॥ ३ ॥ होमं ज्ञागरम्यां तद्दत्तः क्रो
धपालाधितासनम् ॥ धान्यपर्वतनाकृर्यादि समंत्रमुदीरयेत ॥ ४ ॥ यथा देवेषु विश्वात्मा प्रवरोऽयं जनार्दनः ॥ सामवे
देस्तु वेदानां महादेवस्तु योगिनाम् ॥ ५ ॥ प्रणवः सर्वमंत्राणां नारीणां पार्वती यथा तथा रसानां प्रवरः सदैवेक्षुर
सो मतः ॥ ६ ॥ मम तस्मात्परां लक्ष्मीं प्रयच्छ गुडपर्वत ॥ सुरासुराणां सर्वेषां नागयक्षर्क्षयंत्रिणाम् ॥ ७ ॥ हिनास्त्राण्यापि
पार्वत्याललनानांपाहि सर्वदा ॥ अनेनविधिना यस्तु दद्यात्सर्वगिरीन ॥ ८ ॥ संपूज्यमानो गंधर्वैर्गौरीलोके महीयते
पुनः कल्पशतान्ते तु सप्तद्वीपाधिपो भवेत् ॥ ९ ॥ आयुरारोग्यसम्पन्नः शत्रुभिश्चापराजितः ॥ आसीद्राज्ञी महाभागा
लंभानामसकृत्तता ॥ १० ॥ मरुत्तस्य प्रिया भार्या रूपयौवनशालिनी ॥ तस्य भार्याशतान्यासन्तस्य राज्ञो महात्मनः ॥ ११
तादास्याद्वनताकान्तिर्गुणैस्तस्याः सदैव हि ॥ मृगावलोकनकरो राजा तस्य च सा प्रिया ॥ १२ ॥ अथ कालेन महता दुर्वा
साऽङ्घिसत्तमः ॥ आजगाम नदं भार्गं मृगमार्गो यदृच्छया ॥ १३ ॥ तस्याथ सत्क्रियां कृत्वा दत्वा चार्घं यथाविधिः
पप्रच्छ कुशलं भाविप्रं दुर्वाससमकल्मषम् ॥ १४ ॥ नृपोवाच ॥ केन पुण्येन भगवन्नाम राजा प्रियंकरः ॥ मृगावलो
कनपरो वशी तिष्ठति सर्वदा ॥ १५ ॥ सपत्नीभिः समं तत्र सदा प्रियहितेरता ॥ एतन्मे वद भगवन्सर्वं कौतूहलं मम ॥

॥ भवि ॥
॥ ३१८ ॥

१६ ॥ दुर्वासा उवाच ॥ अलक्ष्याकहितानां क्रूरात्मवृत्तं पुरा ननम ॥ जानामि सर्वं कर्म गौरी नववृत्तमहीपते ॥ १७ ॥ त्वमासीर्वैश्य
महिषी गिरिव्रजपुरे पुरा ॥ धार्मिका सत्यशीला च पतिव्रतपरायणा ॥ १८ ॥ तत्र कस्मिंश्चित्काले ब्राह्मणानां समीपतः ॥ गुडदान
विधिः कृत्स्नः स्थितया पतिसन्निधौ ॥ १९ ॥ विलोक्य तत्र विप्रैः कथितो गुडपर्वतः ॥ दत्तश्चापि त्वया पुत्रि सम्मार्विधिवत्तदा
२० ॥ तस्य दानस्य माहात्म्यात्त्वया भुक्तं वरानने ॥ राज्यं जन्मानि च त्रीणि निःसपत्नमकण्टकम् ॥ २१ ॥ आयान्ति सप्त जन्मानि
तव राज्यं भविष्यति ॥ सौभाग्यमतुलं चैव रूपमारोग्यमेव च ॥ २२ ॥ अतः तं चैव मन्तव्यं गुडपर्वतदानजम् ॥ कथं न वचनादरो
हि यास्येतं मव पुत्रिणी ॥ २३ ॥ तस्माद्देयमिदं दानं फलमत्र सम्मितं ॥ गतिं वत्साश्च तां मे सौभाग्यं रूपमेव च ॥ २४ ॥ दा
नमेतत्प्रशंसन्ति सर्वेषां दानानां विशेषतः ॥ पूर्वोक्तं च फलं प्राप्य कृतकृत्योऽभिजायते ॥ २५ ॥ कल्पैकं दत्तो स्वर्गलोक
लेन गन्धर्वसिद्धवनिताज्ञातमहोत्सवेन ॥ दानेन भारत विधानेन सदेवगौरीप्रसादमुपयान्ति गजलोके ॥ २६ ॥ ॥ इति श्री
भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे गुडाचलदानविधिवर्णनं नाम सप्तनवत्युत्तरशततमोऽध्यायः
१९७ ॥ ॥ श्रीकृष्ण उवाच ॥ अथ पापहरं वक्ष्ये स्वर्णाचलमनुत्तमम् ॥ यस्य प्रदानाद्भवनं वैरिञ्च्यं याति मानव ॥ १ ॥ उत्तमः
पलसाहस्रो मध्यमः पञ्चभिः शतैः ॥ तदर्द्धेनावरस्तद्वदल्पवित्तोऽपि शक्तितः ॥ २ ॥ दद्यादेकपलादूर्ध्वं यथाशक्त्या विच

॥ रामः ॥
॥ ३१८ ॥

318

१ दिवस्याति २ अध्यायम् ३ पावना

ष्रणः॥ धान्यपर्वतनवन्तं वै विधानेन प्रपन्न नम॥ ३॥ तिष्ठं भगवँल्लोकानां लक्ष्मीरूपेण त्वामहं समुदीरयेत॥ नमस्ते ब्रह्मबीजाय ब्र
ह्मगर्भाय वै नमः॥ ४॥ यस्मादनंतफलदस्तस्मात्पाहि शिलोच्चय॥ यस्मादग्नेरपत्यं त्वं यस्मात्पुष्टं जगत्पाते॥ ५॥ हेमप
र्वतरूपेण तस्मात्पाहि नगोत्तम॥ अनेन विधिना यस्तु दद्यात्कनकपर्वतम्॥ ६॥ स याति परमं स्थानं यत्र देवो महेश्वरः
। तत्र वर्षशतं तिष्ठेत्ततो याति परां गतिम॥ ७॥ हेमाचलाख्यं दानं नयास्मद्विपते कथित॥ ८॥ हेमं महीऽमणिभिर्नगस्थानैरु
पेतं लोकाधिपाष्टकयुतं बहुतं मुनीन्द्रैः॥ यः शक्तिमान्वितरतीह गणो गणो के कृ स्वं क्रमारतदसौ कृतपुण्यगणोऽस्ति॥ ९॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे हेमाचलदानविधिवर्णनं नामाष्टनवत्युत्तरशततमो
ऽध्यायः॥ १९८॥ श्रीकृष्ण उवाच॥ अतः परं प्रवक्ष्यामि तिलशैलं विधानतः॥ यत्प्रदानान्नरो याति विष्णुलोकमनु
त्तमम्॥ १॥ तिलाः पवित्रमतुलं पवित्राणां च पावनम्॥ विष्णुदेहसमुद्भूतास्तस्माऽनमतां गता॥ २॥ मधुकैटभना
मानावाप्तां दितिसुतो परा॥ मधुना सहितत्राभूद्युद्धं विष्णोरनारतम॥ ३॥ सहस्रं किल वर्षाणां न च जीवनदानवैः
तत्र स्वेदो महानासीत्कृष्णस्याव्ययात्मनः॥ ४॥ पतितश्च धरापृष्ठे कणशो लवशस्तथा॥ समुत्पन्नास्तिला माषाः कृशा
श्च कुसुमंदन॥ ५॥ हत्वा हरिर्गणामध्ये समं मधुर्वैतिनां वरः॥ मेदसानन्यवसुधारजितामसकलानदा॥ ६॥ मेदिनीति

१ भगवतः २

४ त्रिदशापुंगवाः

॥ भवि ॥
॥ ३१९ ॥

ताततः संग्रामसापापवनधारिणी ॥ हतैःऽश्वादैत्यप्रवरे देवाः किं षंपरं ययुः ॥ ७ ॥ लुतिभिक्षपरं तत्ताद्रे त्रिदशापुंगवः ॥ ॥
देयाः कृत्तिः ॥ त्वयाधृतं जगद्देव तत्पायसवं नवैव च ॥ ८ ॥ त्वयी गाली पतेः सर्वं तत्पैवमधुसूदन ॥ तस्मात्त्वदंगतो जातास्तिलाः
संतु जगद्धिताः ॥ ९ ॥ पालयंतु च देवेशा हव्यकव्यानि सर्वदा ॥ दैवे पित्र्ये च सततं नियोज्यास्तत्ततो नरैः ॥ १० ॥ नहि दैत्याः
पिशाचा वा विघ्नं कुर्वंति भारत ॥ तिला यत्रोपयुज्यंते तेन तद्व्रोपुं विधीयताम् ॥ ११ ॥ कृत्वा सुराणां न वात्तं विलत्ता निदमृ
तीत ॥ तिलाभवंतु रक्षार्थं प्राणानां जगतामपि ॥ १२ ॥ शुक्लपक्षे तु देवानां सप्तदद्यात्तिलोदकम् ॥ कृष्णपक्षे पितॄणां च दद्यात्त्वा
भक्त्या समन्वितः ॥ १३ ॥ तिलैः सप्ताष्टभिर्वापि समर्पितं जलांजलिः ॥ तस्य देवाः सपितरस्तृप्ता यच्छंति शोभनम् ॥ १४ ॥ श्व
काकोपहतं यच्च पतितादिभिरेव च ॥ तिलैरभ्युक्षितं सर्वं पवित्रं स्यान्न संशयः ॥ १५ ॥ यस्तैर्भक्तैस्तिलैर्यस्तु कृत्वा पर्वतमुत्तमम्
प्रदद्याद्द्विजमुख्याय दानं तस्याक्षयं भवेत् ॥ १६ ॥ उत्तमो दशभिर्द्रोणैर्मध्यमः पंचभिर्मतः ॥ त्रिभिः कनिष्ठो राजेंद्र तिलशै
लः प्रकीर्तितः ॥ १७ ॥ पूर्ववच्चापरं सर्वं विष्कंभपर्वतादिकम् ॥ दानमंत्रं प्रवक्ष्यामि यथावन्मुनिसत्तम ॥ १८ ॥ यस्मान्मधु
वधे विष्णोर्देहस्वेदसमुद्भवाः ॥ तिलाः कुशाश्च माषाश्च तस्माच्छंनो भवत्विह ॥ १९ ॥ हव्ये कव्ये च यस्माच्च तिलैरेवाभिरं
क्षणम् ॥ भवादुद्धर शैलेंद्र तिलाचल नमोऽस्तु ते ॥ २० ॥ इत्यामंत्र्य च यो दद्यात्तिलाचलमनुत्तमम् ॥ स वैष्णवं पदं याति पु

कमिरक्षतो २

॥ रामः ॥
॥ ३१९ ॥

कालो विष्णोर्देहसमुद्भवाः २

५ कुशाश्च २

२ चनोत्तमम् ३

319

७ आगत्य   ८ इहसौभाग्यसंयुता   ९ निर्धनः

इहसौभाग्यसंयुताः

अगत्य

९ निर्धनः

नराः कृतिदुर्लभम्॥ २१॥ दीर्घायुष्मवाप्नोति इह लोके परत्र च पितृभिर्देवगंधर्वैः पूज्यमानो दिवं व्रजेत्। २२॥ उत्पत्स्या
दिहाध्येत्य राजा भवति धार्मिकः॥ नारी वा नरस्य पत्नी स्याद्रूपसौभाग्यसंयुता॥२३॥ दक्षा कुलोद्भवा चैव पुत्रपौत्रसमन्विता॥
विधानमिदमाकर्ण्य विधिनाप्यनुपालितः॥ २४॥ कपिलादानतुल्यस्य समं फलमवाप्नुयात्॥ २५॥ दानं तिलाचलसमं यदि
वाप्यदत्तिनद्रूतशास्तुनिचपंप्रविचार्यबुध्या। यैर्वर्जितापि न क्रिया न च होमकर्म तेषां प्रदानमिह किं न करोति शर्म॥ २६ ॥
इति श्रीभविष्योत्तरपुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे तिलाचलदानविधिवर्णनं नामैकोनद्विशततमोऽध्यायः॥
१९९ ॥ श्रीकृष्ण उवाच॥ अतः परं प्रवक्ष्यामि कार्पासाचलमुत्तमम्॥ परमं सर्वदानानां प्रियं सर्वदिवौकसाम्॥ १॥ देशका
लौ समासाद्य धनं श्रद्धां च यत्नतः॥ देयमेतन्महादानं कुलोद्धरणहेतवे॥ २॥ पूर्वोक्तेन विधानेन कृत्वा सर्वमशेषतः॥ पर्वतं
कल्पयेत्तत्र कार्पासेन विधानतः॥ ३॥ विंशद्भारस्तु कर्तव्यः उत्तमः पर्वतो बुधैः॥ दशभिर्मध्यमः प्रोक्तो जघन्यः पंचभिर्मतः
४॥ भारेणाल्पधनो दद्याद्वित्तशाठ्यविवर्जितः॥ धान्यपर्वतवत्सर्वमासाद्य मुनिपुंगव॥ ५॥ तद्वज्जागरणं कुर्यात्तद्वच्चैताधि
वासनम्॥ प्रभाताद्यां तु सर्वं वा मिमं मंत्रमुदीरयेत्॥ ६॥ त्वमेवावरणं यस्माल्लोकानामिह सर्वदा॥ कार्पासाचलनस्तस्मा
दघौघध्वंसनो भव॥ ७॥ इति कार्पासशैलेन्द्रं यो दद्यात्सर्वसंनिधौ॥ रुद्रलोके वसेत्कल्पं ततो राजा भवेदिह॥ ८॥ रूपवा

१ प्रियं सर्वदिवौकसाम् ५

॥ भविपु ॥
॥ ३२० ॥

न्वभवेच्छ्रीश्रीमानतुलविक्रमः ॥ पंचजन्मानि नारीणां जायते नात्र संशयः ॥ ९ ॥ कार्पासपर्वतं मयो जगादेकलं श्रु
र्यस्मान्मानेन रहितो वरवस्त्रयोगः ॥ तस्माद्घोषद्वमनाप्य भक्त्या पवित्रं देयो नरैनरनाथविमत्सरेण ॥ १० ॥ ॥
इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे कार्पासाचलदानविधिवर्णनंनाम द्विशततमोऽध्यायः
२०० ॥ ॥ श्रीकृष्ण उवाच ॥ अथातः संप्रवक्ष्यामि घृताचलमनुत्तमम् ॥ तेजोऽमृतमयं दिव्यं महापातकनाशनम् ॥ १ ॥
पंचाशद्घृतकुंभानामुत्तमः स्याद्घृताचलः ॥ मध्यमस्तु तदर्धेन तदर्द्धेनाधमः स्मृतः ॥ २ ॥ अल्पवित्तस्तु कुर्वीत यथाशा
क्त्याविधानतः ॥ विष्कंभपर्वतांस्तद्वच्चतुर्भागेन कल्पयेत ॥ ३ ॥ शालेयतंडुलानां च कुंभांश्च परिविन्यसेत ॥ कारयेत्सं
हतानुच्चास्तथाशोभं विधानतः ॥ ४ ॥ वेष्टयेच्छुक्लवासोभिरिक्षुदंडफलादिकैः ॥ धान्यपर्वतवच्छेषं विधानमिह प
ठ्यते ॥ ५ ॥ अधिवासनपूर्वं च तद्वद्धोमसुरार्चनम् ॥ प्रभातायां तु शर्वर्यां गुरवे विनिवेदयेत ॥ ६ ॥ विष्कंभपर्वतांस्तद्वदृ
त्विग्भ्यः शांतमानसः ॥ मंत्रेणानेन कौंतेय प्रदद्यात्यघवदामिते ॥ ७ ॥ संयोगाद्घृतमुत्पन्नं यस्मादमृततेजसोः
तस्माद्घृताचलश्चात्मा प्रीयतामत्र शंकरः ॥ ८ ॥ तस्मात्तेजोमयं ब्रह्म घृते नित्यं व्यवस्थितम् ॥ घृतपर्वतरूपेण त
स्मात्त्वं पाहि भूधर ॥ ९ ॥ अनेन विधिना दद्याद्घृताचलमनुत्तमम् ॥ महापातकयुक्तोऽपि लोकमायाति शांक

॥ रामः ॥
॥ ३२० ॥

२ अगम्लाघवदामि २ १ ब्रह्मपातकयुक्तोऽपि १

320

रम्॥१०॥ हेमसारसमायुक्तैः किंकिणीजालमालिने॥ विमाने अप्सरोभिश्च सिद्धविद्याधरैर्वृतः॥११॥ विहरेत्सित
भिः सार्द्धं यावदाभूतसंप्लवम्॥१२॥ आस्फोटयन्प्रचलत्कुण्डलसुन्दरीभिः संसेव्यमानमिह योषितरं नितम्बाः॥ स्वर्गं सुरेन्द्रभवनं
भवनं निषिंधान्ति हान्तुवंशमचलं भवतीति नर्थम्॥१३॥ ॥इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिर
संवादे घृताचलदानविधिवर्णनं नामैकाधिकद्विशततमोऽध्यायः॥ २०१॥ ॥श्रीकृष्ण उवाच॥ अथातः संप्रवक्ष्यामि
रत्नाचलमनुत्तमम्॥ यत्प्रदानान्नरो याति लोकान्सुरर्षिसेवितान्॥१॥ मुक्ताफलसहस्रेण पर्वतः स्यादनुत्तमः॥
मध्यमः पंचशतिकस्त्रिशतेनावरः स्मृतः॥२॥ अल्पवित्तस्तु कुर्वीत मुक्ताफलशतेन च॥ चतुर्थांशेन विष्कंभपर्व
ताः स्युः समंततः॥३॥ पूर्वेण वज्रगोमेदैर्दक्षिणेनेन्द्रनीलकैः॥ पुष्परागयुतः कार्यो विद्वद्भिर्गंधमादनः॥४॥ वैदूर्य
विद्रुमैः पश्चात्संमिश्रो विपुलाचलः॥ पद्मरागैः ससौवर्णैरुत्तरेणापि विन्यसेत्॥५॥ धान्यपर्वतवत्सर्वमत्रापि परि
कल्पयेत्॥ तद्वदावाहनं कृत्वा वृक्षान्देवांश्च कांचनान्॥६॥ पूजयेत्पुष्पनैवेद्यैः प्रभाते तु विसर्जनम्॥ पूर्ववद्गुरुऋ
त्विग्भ्य इमान्मंत्रानुदीरयेत्॥७॥ यथा देवगणाः सर्वे सर्वरत्नेष्ववस्थिताः॥ त्वं च रत्नमयो नित्यमतः पाहि महाचला
ल॥ यस्माद्रत्नप्रदानेन तुष्टिमेति जनार्दनः॥ पूजा रत्नप्रदानेन तस्मान्नः पाहि सर्वदा॥८॥ अनेन विधिना यस्तु दद्या

३ तुष्टिं प्रकुरुते हरिः १

१ष्पगंधाद्यैः १ष्पध.पौठै

रत्नादि

५ रूपारोग्यकुलोपेत २

ड्त्नमयंगिरिम ॥ सयातिवैष्णवंलोकममरैरभिपूजितम ॥ १० ॥ यावत्कल्पशतंसाग्रंवसित्वेहनराधिप ॥ रूपा
रोग्यगु५लोपेतः सप्तद्वीपापाधिपोभवेत ॥ ११ ॥ ब्रह्महत्यादिकंकिंचिद्यदत्रामुत्रवाकृतम ॥ तत्सर्वंनाशमायाति
गिरिर्वज्रहतोयथा ॥ १२ ॥ रत्नामयंकनकविद्रुमभक्तिचित्रंचंचत्सहस्रमणिमरीचिविचयोपपन्नम ॥ रत्नाचलंद्विज
वरायनिवेदयित्वाभात्यप्रभाममिभवेन्दुरलोकलोके ॥ १३ ॥ ॥ इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृ
ष्णयुधिष्ठिरसंवादेरत्नाचलदानविधिवर्णनंनामअधिकद्वाततमोऽध्यायः ॥ २०२ ॥ श्रीकृष्णउवाच ॥ अतःपरंप्र
वक्ष्यामिरौप्याचलमनुत्तमम ॥ यत्प्रदानान्नरोयातिसोमलोकंनरोत्तम ॥ १ ॥ सहस्रेणपलानांतुकृत्तमोर
जताचलः ॥ पंचभिर्मध्यमःप्रोक्तस्तदर्द्धेनावरःस्मृतः ॥ २ ॥ अशक्तोविंशतेरूर्द्ध्वंकारयेच्छक्तितःसदा ॥ विष्कं
भपर्वतान्सम्यक्तुरीयांशेनकल्पयेत ॥ ३ ॥ पूर्ववद्राजतान्कुर्यान्मंदरादीन्विधानतः ॥ कलधौतमयांस्तद्वल्लो
केशान्कारयेन्नृप ॥ ४ ॥ ब्रह्माविष्णुशिवादींश्चनितंबोऽत्रहिरण्मयः ॥ राजतंस्याद्यदन्येषांसर्वंतदिहकांच
नम ॥ ५ ॥ शेषंचपूर्ववत्कुर्याद्धोमजागरणादिकम ॥ दद्यात्तद्वत्प्रभातेतुगुरवेरौप्यपर्वतम ॥ ६ ॥ विष्कंभशैला

321

२ नागेश ४

ऋत्विग्भ्यः पूजयेद्यस्तु विभूषणैः ॥ इमं मंत्रं पठन्दद्याद्दर्भपाणिर्विमत्सरः ॥ ७ ॥ पितृणां व[illegible]भो यस्माद्धरींद्रशंकरस्य च ॥ रजतं पाहि तस्मात्त्वं घोरात्संसारसागरात् ॥ ८ ॥ इत्थं निवेद्य यो दद्याद्रजताचलमुत्तमम् ॥ गवामयुतदानस्य फलं प्राप्नोति मानवः ॥ ९ ॥ सोमलोके स गंधर्वैः किंनराप्सरसां गणैः । पूज्यमानो वसेद्विद्वान्यावदाभूतसंप्लवम् ॥ १० ॥ राजेन्द्र राजतगिरिं कनकाग्रलालीवृंतं प्रसन्नमसलिलैः सहितं सरोभिः ॥ यश्चार्पयेत्कृतिनो तिरजो विशोकं गंधर्वतिते गतमलानुप सोमलोकम् ॥ ११ ॥

॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे रौप्याचलदानविधिवर्णनं नाम नवाधिकद्विशततमोध्यायः ॥ २०५ ॥

श्रीकृष्ण उवाच ॥

२ शर्कराशैलम

अथातः संप्रवक्ष्यामि शर्कराचलमुत्तमम् ॥ यस्य प्रदानाद्विष्णुर्करुद्रास्तुष्यंति सर्वदा ॥ १ ॥ अष्टभिः शर्कराभारैरुत्तमः स्यान्महाचलः ॥ चतुर्भिर्मध्यमः प्रोक्तो भाराभ्यामधमः स्मृतः ॥ २ ॥ भारेण चार्धभारेण कुर्याद्यस्त्वल्पवित्तवान् ॥ विष्कंभपर्वतान्कुर्यात्तुरीयांशेन मानव ॥ ३ ॥ धान्यपर्वतवत्सर्वमासाद्य रससंयुतम् ॥ मेरोरुपरि तद्वच्च स्थाप्यं हैमतरुत्रयम् ॥ ४ ॥ मंदारः पारिजातश्च तृतीयः कल्पपादपः ॥ एतद्वृक्षत्रयं मूर्ध्नि सर्वेष्वपि निधापयेत् ॥ ५ ॥ हरिचंदनसंतानौ पूर्वपश्चिमभागयोः ॥ निवेश्यौ सर्वशैलेषु विशेषाच्छर्कराचले ·

४ प्रथमोत्तम ३ १ प्रयाति ६

६ ॥ मंदरे कामदेवं तु कदंबस्य तले तथा ॥ जंबूवृक्षतले कार्यो गरुडो गंधमादने ॥७॥ प्राङ्मुखो हेममूर्त्तिर्भवेद्धंसः
स्याद्विपुलाचले ॥ हैमी कोयोपिभिः कार्या सुरभिर्दक्षिणामुखी ॥८॥ धान्यपर्वतवत्सर्वमावाहनमखादिकम् ॥ कृत्वाथ
गुरवे दद्यान्मध्यमं पर्वतोत्तमम् ॥९॥ ऋत्विग्भ्यश्चतुरः शैलानिमान्मंत्रानुदीरयेत् ॥ सौभाग्यामृतसारोऽयं परमः शर्क
रायुतः ॥१०॥ यस्मादानंदकारी त्वं भव शैलेंद्र सर्वदा ॥ अमृतं पिबतां येन निपेतुर्भुवि शीकराः ॥११॥ देवानां तत्समुत्थोऽसि
पाहि नः शर्कराचल ॥ मनोभवधनुर्मध्यादुद्भूता शर्करा यतः ॥१२॥ तन्मयोऽसि महाशैल पाहि संसारसागरात् ॥ यो दद्याच्छ
र्कराशैलमनेन विधिना नरः ॥१३॥ सर्वपापविनिर्मुक्तः स याति शिवमंदिरम् ॥ चंद्रादित्यार्कसंकाशमधिरुह्यानुजीवि
भिः ॥१४॥ स दैवयानमातिष्ठेत्कान्तु विष्णुपदे दिवि ततः कल्पशतांते तु सप्तद्वीपाधिपो भवेत् ॥१५॥ आयुरारोग्यसंपन्नो
यावज्जन्मायुतत्रयम् ॥ भोजनं शक्तितो दद्यात्सर्वशैलेष्वमत्सरः ॥ सर्वत्राक्षारलवणमश्नीयात्तदनुज्ञया ॥१६॥ पर्व
तोपस्करं सर्वं प्रापयेद्ब्राह्मणालयम् ॥ आसीत्पुरा बृहत्कल्पे धर्ममूर्त्तिर्नराधिपः ॥१७॥ सुहृच्छक्रस्य निहता येन दैत्याः स
हस्रशः ॥ सोमसूर्यादयो यस्य तेजसा विगतप्रभाः ॥१८॥ भवंति शतशो येन राजानोऽपि पराजिताः ॥ यथेच्छारूपधारी
च मनुष्योऽप्यपराजितः ॥१९॥ तस्य भानुमती नाम भार्या त्रैलोक्यसुंदरी ॥ लक्ष्मीरिव वरूपेण निर्जितामरसुंदरी ॥ २०

322

पुरोधसम्२

राज्ञस्तस्याग्रमहिषी प्राणेभ्योऽपि गरीयसी ॥ दशनारीसहस्राणां मध्ये श्रीरिव राजते ॥ २१ ॥ नपकोटिसहस्रेणानक
दाचित्प्रमुच्यते ॥ स कदाचित्स्थानगतं पप्रच्छ स्वं पुरोहितम् ॥ २२ ॥ विस्मयाविष्टहृदयो वसिष्ठमृषिसत्तमम् ॥ भगव
न्केन धर्मेण मम लक्ष्मीरनुत्तमा ॥ २३ ॥ कस्माच्च विपुलं तेजो मच्छरीरे सदोत्तमम् ॥ २४ ॥ वसिष्ठ उवाच ॥ पुरा लीला
वती नाम वेश्या शिवपरायणा ॥ तया दत्तं चतुर्दश्यां गुरवे लवणाचलः ॥ २५ ॥ हेमवृक्षामरैः सार्द्धं यथावद्विधि
पूर्वकः ॥ शूद्रः सुवर्णकारस्तु नाम्ना शौण्डोऽभवत्तदा ॥ २६ ॥ भृत्यो लीलावतीगेहे तेन हैमा हि निर्मिताः ॥ तरवोऽम
रमुख्याश्च श्रद्धायुक्तेन पार्थिव ॥ २७ ॥ अतिरूपेण संपन्ना घटयित्वा ततो नृप ॥ धर्मकार्यमिति ज्ञात्वा नागृही
तकथंचन ॥ २८ ॥ उज्वालितास्तु तत्पत्न्या सौवर्णामरपादपाः ॥ लीलावतीगृहे पार्श्वे परिचर्या च पार्थिव ॥ २९ ॥
कृतं ताभ्यां प्रहर्षेण द्विजशुश्रूषणादिकम् ॥ सा तु लीलावती वेश्या कालेन महता नृप ॥ ३० ॥ सर्वपापविनिर्मुक्ता
जगाम शिवमंदिरम् ॥ योऽसौ सुवर्णकारश्च दरिद्रोऽप्यतिसत्ववान् ॥ ३१ ॥ न मूल्यमादाद्वेश्यातः स भवानिह सां
प्रतम् ॥ सप्तद्वीपपतिर्जातः सूर्यायुतसमप्रभः ॥ ३२ ॥ यया सुवर्णरचितास्तरवो हेमदेवताः ॥ सम्यगुज्वलिताः
पत्नी सेयं भानुमती तव ॥ ३३ ॥ उज्वालनादुज्वलरूपमस्याः संजातमस्मिन्भुवनाधिपत्यम् ॥ तस्मात्कृतं तन्मरि

॥भवि॰॥
॥३२३॥

नःर्मन्त्रावनुष्ठिताभ्यां लवणाचलस्य ॥२४॥ तस्माच्च लोकेष्वपराजितत्वमारोग्यसौभाग्ययुता च लक्ष्मीः ॥ तस्मा
त्त्वमप्यत्र विधानपूर्वं धान्याचलादीन्दशधा कुरुष्व ॥२५॥ तथेति संपूज्य च धर्ममूर्तिं वचो वशिष्ठस्य ददौ स सर्वान् ॥
धान्याचलादीन्क्रमशः पुरारेर्लोकं जगामामरपूज्यमानः ॥२६॥ यश्चाधनः पश्यति दीयमानान्मेरोः प्रदानमिह धर्मप
रो मनुष्यः ॥ शृणोति भक्त्या परयाऽप्रमादी विकल्मषः सोऽपि दिवं प्रयाति ॥२७॥ दुःस्वप्नं प्रशाममुपैति पठ्यमाने
शैलेन्द्रे भवभयभेदने नराणाम् ॥ यः कुर्यात्किमु नृपपुंगवेह सम्यक्छान्तात्मा हरिहरपरमेति जंतु ॥२८॥ इति श्री
भविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे शर्कराचलदानविधिवर्णनं नाम चतुरधिकद्विशत
ततमोऽध्यायः ॥ २०४ ॥ युधिष्ठिर उवाच । प्रतिपत्क्रमयोगेन तिथीनांविहिताः कृत ॥ सरहस्यः समंत्रश्च प्रारं
भोद्यापनैः सह ॥१॥ नवग्रहमखात्सर्वं होमकर्मावधारितम् ॥ स्नानक्रमश्च विदितो विज्ञाताश्चोत्सवा मया ॥
२। दानधर्मास्त्वशेषेण भक्तः सर्वाः प्रदर्शिताः ॥ तडागोत्सर्जनविधिर्विहितः पादपोत्सवः ॥३॥ एवं गतं मम मनो
मुक्तेन मधुसूदन ॥ व्रतं कथय यत्नात्कल्पेनात्ताः संश्रित्य देवताः ॥४॥ देवानां देवकीपुत्र नानात्वं संप्रदर्शितम्

१ पर्वम

॥राम॰॥
॥३२३॥

323

२कृमयता ३गिणाः ४धर्माःसनातनाः ५प्रवर्तकाः

तिथिक्रमात्कथयतापूजामंत्रोषिताननम् ॥ ५ ॥ आसाद्यैर्मुनिभिः सर्वैर्ध्यानयोगपरायणैः ॥ एकरूपात्रनिर्दि
ष्टो देवः सर्वगतोऽव्ययः ॥ ६ ॥ वर्णाश्रमाचारधर्मः कस्मात्त्वात्र प्रदर्शितः ॥ एते महर्षयस्तुष्टाः श्रोतुकामा भवद्वचः
७ ॥ श्रीकृष्ण उवाच ॥ व्रतदानैकदेशोयं कथितस्तव पार्थिव ॥ विशेषतो न शक्नोति वक्तुं यदि सरस्वती ॥ ८ ॥ सर्व
स्तरति दुर्गाणि सर्वो भद्राणि पश्यति ॥ वर्णाश्रमाणां सामान्यादिति धर्मः प्रकीर्तितः ॥ ९ ॥ कथितोऽयं तु नत्वो हे दे
वानुदिश्य वो मया ॥ परमार्थः स्वरूपोक्तो देवस्तमुपधारय ॥ १० ॥ यो ब्रह्मा स हरिः प्रोक्तो यो हरिः स महेश्वरः ॥ महेश्व
रः स्मृतः सूर्यः सूर्यः पावक उच्यते ॥ ११ ॥ पावकः कार्तिकेयोसौ कार्तिकेयो विनायकः ॥ गौरी लक्ष्मीश्च सावित्री शक्ति
भेदाः प्रकीर्तिताः ॥ १२ ॥ देवदेवीं समुद्दिश्य यः करोति व्रतं नरः ॥ न भेदस्तत्र मंतव्यः शिवशक्तिमयं जगत् ॥ १३ ॥ व
हुप्रकारा वसुधा भेदाः साग्यनिलांभसाम् ॥ परमार्थतश्चिंत्यमानो न भेदः प्रतिभासते ॥ १४ ॥ कश्चिद्देवं समाश्रि
त्य करोति किमपि व्रतम् ॥ त्रयीधर्मानुगं पार्थ एकं तत्रापि कारणम् ॥ १५ ॥ यश्चैव ते मयाख्यातो व्रतदानविधिः
परः ॥ सफलः स तु विज्ञेयः सदाचारवतां सतां ॥ १६ ॥ आचारहीनं न पुनंति वेदा यद्यप्यधीताः सह षड्भिरंगैः ॥
छंदांस्येनं मृत्युकाले त्यजंति नीडं शकुंता इव जातपक्षाः ॥ १७ ॥ कपालस्थं यथा तोयं श्वदृतौ वा यथा पयः ॥ दुष्टं स्या

१ हृतनस्य मनोहरः २ यानाकरः ३ प्रोष्ठ आत्मनः ४ अशरीरस्य धर्मस्य आचारो हंत्यलक्षणम्

नथानदोषेण हीनहीनेन तथाश्रमम् ॥ १८ ॥ वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च ॥ अहीनो वित्ततो हीनो वृत्ततस्तु
हतो हतः ॥ १९ ॥ एवमाचारधर्मस्य मूलं राजन्कृतस्य च ॥ आचाराद्विच्युतो जंतुर्न कुलीनो न धार्मिकः ॥ २० ॥ किं कुले
नोपदिष्टेन विपुलेन दुरात्मनाम् ॥ कृमयः किं न जायंते कमलेषु सुगंधिषु ॥ २१ ॥ हीनजातिप्रसूतोपि शौचाचार
समन्वितः ॥ सर्वधर्मार्थकुशलः सकुलीनः सतां वरः ॥ २२ ॥ न कुलं कुलमित्याहुराचारः कुलमुच्यते ॥ आचारकुश
लो राजन्निह चामुत्र नंदते ॥ २३ ॥ युधिष्ठिर उवाच ॥ सदाचारमहं कृष्ण श्रोतुमिच्छामि शाश्वतम् ॥ सर्वधर्ममयः कोऽ
यमाचारः प्रकीर्तितः ॥ २४ ॥ श्रीकृष्ण उवाच ॥ आचारप्रभवो धर्मः संतश्चाचारलक्षणाः ॥ साधूनां च यथा वृत्तं स
दाचार उच्यते ॥ २५ ॥ तस्मात्कुर्यादिहाचारं यदिच्छेद्भूतिमात्मनः ॥ अपि पापशरीरस्य आचारो हंत्यलक्षणम् ॥ २६ ॥
अदृष्टमश्रुतं वेदप्रभवं धर्मचारिणाम् ॥ स्वानि कर्माणि कुर्वाणं तं जनं कुरुते प्रियम् ॥ २७ ॥ येनास्तिका नैष्टिका
श्च गुरुशास्त्रातिलंघिनः ॥ अधर्मज्ञा दुराचारास्ते भवंति गतायुषः ॥ २८ ॥ सर्वलक्षणहीनोपि यः सदाचारवान्न
रः ॥ श्रद्दधानोनसूयश्च सर्वान्कामानवाप्नुयात् ॥ २९ ॥ ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत ॥ ब्राह्मणा
नलगोसूर्यान्नमेहेत कदाचन ॥ ३० ॥ उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः ॥ उत्थायाचम्यातिष्ठेन

324

पूर्णां संख्यां समाहितः ॥३१॥ एवमेवोत्तरां संख्यां सम्यक् पालयित्वा ततः ॥ नैमित्तादिष्वमुं यत्नात् पालयेत्तं कदा-
चन ॥३२॥ एवं यो दीक्षितः पक्षाद्दीर्घमायुरवाप्नुयुः ॥ उपासते येन पूर्वां द्विजाः संध्यां न पश्चिमाम् ॥३३॥ सर्वांस्तान्धार्मि-
को राजा शूद्रकर्मणि योजयेत् ॥ आबाधासु यथाकामं कुर्यान्मूत्रपुरीषयोः ॥३४॥ शिरसा प्रावृतेनैव समास्तीर्य तृ-
णैर्महीम् ॥ ग्रामावसथतीर्थानां क्षेत्राणां चैव वर्त्मनि ॥३५॥ न कृष्टमपि तिष्ठेत न नष्टे न च गोव्रजे ॥ अंतर्जलात्तदवस-
था वल्मीकान्मूषकस्थलात् ॥३६॥ एतद्दोषावनिर्दिष्टाश्च वर्जयेन्नावशेमदः ॥ देवार्चनादि कार्याणि तथा गुर्वभिवादन-
म् ॥३७॥ कुर्वीत सम्यगाचम्य तद्वदेव भुजिक्रियाम् ॥ अपेतबुद्गंधाभिरद्भिरच्छाभिरादरात् ॥३८॥ आचामेत्प्रयतः
सम्यक्प्राङ्मुखोदङ्मुखोऽपि वा ॥ त्रिवर्गसाधनं यच्च सदा कार्यं द्विजन्मना ॥३९॥ नत्यानिषेधे गृहस्थस्याति सिद्धिरत्र
परत्र च पादेन कार्यं पारत्र्यं कुर्याच्च संचये ॥४०॥ अर्धेनाहारवराणां नित्यनैमित्तिकां न कर्म ॥ अर्थस्योपार्जने यत्नः
सदा कार्यो विपश्चिता ॥४१॥ नित्यानि सन्निमित्तानि धर्मकामादयो नृप ॥ केशप्रसाधनादर्शदर्शनं दन्तधावनम्
४२ ॥ पूर्वाह्ण एव कार्याणि देवतानां च पूजनम् ॥ दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ॥४३॥ उच्छिष्टोत्सर्जनं दू-
रात्सदा कार्यं हितैषिणा ॥ तोष्मर्दीन्नगास्कृदीनववरवादीवयो नरः ॥४४॥ नित्योच्छिष्टः स करक्लेहापूर्विदनेमहत ॥

गा८

१ कर्तव्य ४

समारभेत

४ न संहताभ्यां हस्ताभ्यां कंडूयादात्मनः शिरः द

॥ मधि ॥
॥ ३२५ ॥

नग्नांपरस्त्रियंनेक्षेन्नपश्येदात्मनःशकृत ॥४५॥ उदक्यादर्शनस्पर्शंकुर्यात्संभाषणंनच ॥ नाप्सुमूत्रंपुरीषंवामैथु-
नंवासमाचरेत ॥४६॥ नाधितिष्ठेच्छकृन्मूत्रकेशभस्मकपालिकाम । नतुषांगारास्थिशीर्णानिरज्जुवस्त्रादिकानिच ॥४७
धारिणोननमेढिनानासनंचापिदापयेत । ब्राह्मणस्याग्रमेढिनानासनंचापिदापयेत ॥४८॥ कृतांजलिरुपासीतताकु-
तेपव्रतोनियमात ॥ नचासीतासनेभिन्नेभिन्नंकांस्यंचवर्जयेत ॥४९॥ नाभ्यक्तकेशोमोक्तंअंननग्नःस्नानमाचरेत ॥ स्वप्नं
नैवनग्नेननचोच्छिष्टःक्वसंविशेत ॥५०॥ उच्छिष्टोनस्पृशेच्छीर्षंसर्वेप्राणास्तदाश्रयाः ॥ केशग्रहान्प्रहारांश्चशिरस्येता
न्निवर्जयेत ॥५१॥ नान्यत्रपुत्रशिष्याभ्यांशिफयाताडनंस्मृतम ॥ नपाणिभ्यांसंहताभ्यांकंडूयेदात्मनःशिरः ॥५२॥ नचा
भीक्ष्णंशिरःस्नानंकार्यंनिष्कारणंनरैः ॥ अप्रशस्तंनिशिस्नानंराहोरन्यत्रदर्शनात ॥५३॥ नभुक्तोनातुरःकूलंचनगंभीरज
लाशये ॥ शिरःस्नानंतुतैलेननांगंकिंचिदुपस्पृशेत ॥५४॥ तिलपिष्टंनचाश्नीयात्तथायुर्नहीयते ॥ उच्छिष्टंनगुरोर्दूया
क्रुद्धंचैनंप्रसादयेत ॥५५॥ परीवादंनशृणुयादन्येषामपिजल्पताम ॥ सदानुपहरेत्तिष्ठेन्नग्रामस्नानभ्वनथौबधीः ॥५६
गारुडानिचरत्नानिविभृयात्प्रयतोनरः ॥ सुस्निग्धामलकेशाश्चसुगंधिश्चारुवेषधृक ॥५७॥ सिताःसुमनसोहृद्याबि
भृयाच्चनरःसदा ॥ किंचित्परस्वंनहरेन्नाल्पमप्यप्रियंवदेत ॥५८॥ प्रियंचनानृतंब्रूयान्नान्यदोषानुदीरयेत ॥ नान्याभि

॥ रामः ॥
॥ ३२५ ॥

325

नेनथावैरंरोचयेत्पुरुषेश्वरः ||५९|| नदुष्टयानमारोहेत्कूलच्छायांनसंश्रयेत || विद्विष्टपतितोन्मत्तबहुवैरादिसं
करैः ||६०|| बंधकीबंधकीभर्तृक्षुद्रानृतकथैः सह || तथातिव्ययशीलैश्चपरिवादरतैःशठैः ||६१|| बुधोमैत्रीनकुर्वीत
नैकःपंथानमाश्रयेत || नावगाहेज्जलौघस्यवेगमग्रेनरेश्वर ||६२|| प्रदीप्तंवेश्मनविशेन्नारोहेच्छिख
रंतरोः || नऊंकुर्याद्धवंचैवज्ञावगांधोहिसोमजः ||६३|| नकुर्याद्दंतसंघर्षंनकुर्याच्चनासिकाम || नासंस्पटमु
खोजृंभाश्वासकासौविवर्जयेत ||६४|| नोच्चैर्हसेत्सशब्दंचनमुंचेत्पवनंबुधः || नखान्नखादयेच्छिंद्यान्नतृणंनम
हींलिखेत ||६५|| नश्मश्रुभक्षयेच्चैवनलोष्टानिविमर्दयेत || पादेननाक्रमेत्पादंनपूज्याभिमुखंनयेत ||६६||
नोच्चासनेसमासीतगुरोरग्रेकदाचन || तस्मात्सदाचारपरोभवेत्कामचरोनहि ||६७|| लोकद्वयेभमंद्रेप्युःश्रे
मत्स्वर्गेमहीयते || चतुष्पथंचैत्यतरुंश्मशानोपवनानिच ||६८|| दुष्टस्त्रीसंनिकर्षंचवर्जयेन्निशिसर्वदा || सौधा
वर्षामृतश्चद्रीमोनीरात्रौदनेष्वव ||६९|| केशास्थिकंटकामेध्यबलिभस्मतुषांस्तथा || स्नानार्द्रधरणींचैवदूरतः
परिवर्जयेत ||७०|| पंथादेयोब्राह्मणेभ्योराजभ्यःस्त्रीभ्यएवच || विद्याधिकस्यगुर्विण्याभारतस्यमहीयसः ||
७१ मूकांधबधिराणांचमत्तस्योन्मत्तकस्यच || उपानद्वस्त्रमाल्यंचधृतमन्यैर्नधारयेत ||७२|| नहीदृशमनायुष्यंलो

के किंचन विद्यते ॥ यादृशं पुरुषस्येह परदारोपसेवनम् ॥ ७३ ॥ नेर्ष्या स्त्रीषु कर्त्तव्या दारा रक्ष्याः प्रयत्नतः ॥ अनायु
ष्या भवेदीर्ष्या तस्मात्तां परिवर्जयेत् ॥ ७४ ॥ मूर्खोन्मत्तान्व्यसनिनो विरूपान्मायिनस्तथा ॥ हीनांगानधिकांगांश्च विद्या
हीनांश्च नाभिपेत् ॥ ७५ ॥ पानीयस्याक्रिया नक्तं तथैव दधिसक्तवः ॥ वर्जनीया महाराज निशीथे भोजनक्रियाः ॥ ७६ ॥
नोर्ध्वजानुश्चिरं तिष्ठेन्नारहस्यपरो भवेत् नचल्लोपविशेन्नाङ्गः पादेनाक्रम्य वासनम् ॥ ७७ ॥ न चातिरक्तवासाः स्याच्चि
त्रासितधरोऽपि वा ॥ न च कुर्याद्विपर्यासं वाससो नविभूषणी ॥ ७८ ॥ स्त्रीकृतानां नवज्ञाश्रीयादीर्घमायुर्जिजीविषुः ॥ ब्राह्म
णं क्षत्रियं सर्वं सर्वे ह्याशीविषोपमाः ॥ ७९ ॥ हन्त्याशीविषः क्रुद्धो यावत्पश्यति चक्षुषा ॥ क्षत्रियोऽपि दहेत्क्रुद्धो यावत्स्
पृशति तेजसा ॥ ८० ॥ ब्राह्मणः सकुलं हन्याद्ध्यानेनावेक्षितेन च ॥ नातिकल्यं नातिसायं न च मध्यंदिने तथा ॥ ८१ ॥ नाज्ञा
तैः सह गंतव्यं नैकेन बहुभिः सह ॥ नारुंतुदः स्यान्नपरोक्षवादी नसहीनत ॥ ८२ ॥ रोहते वाग्निना दग्धं वनं परशुना हतम्
वचो दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ ८३ ॥ नास्तिकां वेदनिंदां च देवतानां च कुत्सनम् ॥ द्वेषस्तंभादिमानस्तु वलैक्ष्यं च
परिवर्जयेत् ॥ ८४ ॥ न ब्राह्मणं परिवदेन्नक्षत्राणि दर्शयेत् ॥ तिथिं पक्षस्य न ब्रूयाद्यथास्यायुर्न रिष्यते ॥ ८५ ॥ नेत्रोनि
ष्ठीवनं वासश्च परिधायाचमेद्बुधः ॥ जितामित्रो न पोयन्न वलवान्कर्मनन्सरः ॥ ८६ ॥ नक्षानिस्पंवसेत्साद्धः कृतकृत्याः पतौस

326

रवम्॥ पौराः सुसंहृतास्तत्रसततन्न्यायवर्तिनः॥ ८७॥ यत्रस्त्रियोन्मत्सरिणपत्नेत्रवासःसुखोदयः॥ यस्मिन्कृषीवला
लाःपुष्टेप्रायशोनातिमाधिनः॥ ८८॥ यत्रौषधान्यशेषाणिवसेत्तत्रविचक्षणः॥ तत्रराजन्वतसंयत्रैतत्त्रितयंसदा॥
८९॥ जिगीषुःपर्वैवैरंतजननभ्यविरतोत्सवः॥ तत्रराजन्वलसंयत्रनास्तिचतुष्टयम्॥ ९०॥ ऋणप्रदातावैद्यश्चश्रो-
त्रियःसजलानदी॥ भवल्लोकोनतादर्श्रौमलिनोबुद्धिमन्नरैः॥ ९१॥ नचराज्ञोमहाराजदीर्घरात्रमभीक्षतम्॥ हेमकारग-
हेचान्नमश्नीयान्नचविश्वसेत॥ ९२॥ नचमित्रंप्रकुर्वीतहेमकारंकदाचन॥ भिन्नभांडंचखट्वांचकुक्कुरंकुक्कुटंतथा॥
९३॥ अप्रशस्तानिचत्वारियेचवृक्षाःसकंटकाः॥ भिन्नभांडेबलिःप्रायःखट्वायांचेहनिश्चयः॥ ९४॥ नाश्नंतिपितरस्तस्य
यत्रकुक्कुरकुक्कुटौ॥ वृक्षमूलेपिशाचानांसर्वेषामेवसंस्थितिः॥ ९५॥ अन्नन्तेषांनलेभंजन्नन्यभृतेपपशोणितम्॥ असं-
स्कृतान्नभुजःमूत्रंवालादिप्रभवंस्वयम्॥ ९६॥ सुवासिनीगुर्विणींचवृद्धांबालानुरांस्तथा॥ भोजयेत्संस्कृतान्नेनप्रथमं
चरमेगृही॥ ९७॥ अघंसकेवलंभुंक्तेवधूगोवाहनादिकम्॥ योभुंक्तेचवहिर्मोष्ठप्रेतनामप्रदायच॥ ९८॥ वैश्वदेवंततः
कुर्याद्यावदाकृतयःक्रमात॥ प्रथमांब्रह्मणोदद्यात्संज्ञान्तांपनयेततः॥ ९९॥ ततोयांचैवगृह्येभ्यःकश्यपायतथापरा-
म्॥ ततश्चानुमतेदद्याद्दत्वागृहबलिंततः॥ १००॥ पूर्वाख्यातंमयायत्तेनित्यकर्मक्रियाविधौ॥ दद्यादथधरित्र्यांदद्यात्तु

मणिकत्रयम् ॥ १ ॥ प्राच्यादिक्रमयोगेन इन्द्रादीनां बलिं क्षिपेत् ॥ ब्रह्मणे चान्तरिक्षाय सूर्याय च यथाक्रमम् ॥ २ ॥ विश्वे
भ्यश्चैव देवेभ्यो विश्वभूतेभ्यस्तथैव च ॥ कृत्वापसव्यं वायव्यं यक्ष्मैतन्निवेदयेत् ॥ ३ ॥ ततश्चाग्रं समुद्धृत्य हन्तकारोपकल्पि
तम् । यथाविधि यथान्यायं ब्राह्मणायोपपादयेत् ॥ ४ ॥ दत्वातिथिभ्यो गुरुभ्यः स्वज्ञातायच ॥ पुण्यगंधांवरधरो माल्य
धारी नरेश्वर ॥ ५ ॥ नैकवस्त्रधरोऽथार्द्रपादो महीपते ॥ विशुद्धवदनः प्रीतो भुंजीत न विदिङ्मुखः ॥ ६ ॥ प्राङ्मु
खोदङ्मुखो वापि न चैवान्यमना नरः ॥ कुत्सितेनाहृतं चैव जुगुप्सावदसंस्कृतम् ॥ ७ ॥ दत्वान्नं भुंजीत शिष्टेभ्यः क्षुधितेभ्य
स्तथा गृही ॥ प्रशस्तशुद्धपात्रे च भुंजीताकुपितो नृप ॥ ८ ॥ नासंदीसंस्थिते पात्रे नादेशे च नरेश्वरः ॥ नाकाले नातिसंकी
र्णे दत्वाग्रं च नरो मही ॥ ९ ॥ अश्नीयात्तन्मयो भूत्वा पूर्वं तु मधुरं रसम् ॥ लवणाम्लौ ततः पश्चात्कटुतीक्ष्णादिकं ततः ॥ १०
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिनाशनम् अन्ते पुनर्द्रवाशी च नरो रोगेण मुच्यते ॥ ११ ॥ दिवा धानासु वसति रात्रौ च दधि
सक्तुषु ॥ अलक्ष्मीः कोविदारे च सर्वदैव कृतालया ॥ १२ ॥ अनिंद्यं भक्षयेन्नित्यं वाग्यतोऽन्नमकुत्सयन् ॥ भुक्त्वा सम्यगथ
चाचम्य प्राङ्मुखोदङ्मुखोऽपि वा ॥ १३ ॥ यथावत्पुनराचामेत्पाणी प्रक्षाल्य यत्नतः ॥ अभीष्टदेवतानां च कुर्वीत स्म
रणं नरः ॥ १४ ॥ प्राणापानसमानानामुदानव्यानयोस्तथा ॥ अन्नं पुष्टिकरं चास्तु ममाप्याहतं सुखम् ॥ १५ ॥ अगस्ति

327

रग्निर्वेऽवानलभ्य मृत्कं शृपालं नर मन्त्रस्तोत्रम्॥ मृत्वं च मे तन्मारिराणामसंभवं पञ्चपत्ररोगं वलवान्मृदेव॥१६॥ प्रजा
र्यस्य हस्तेन परिमार्ज्यंत थोदरम्॥ भनायाम्लप्रदायी नि कुर्यात्कर्मारायतं डितः॥१७॥ संध्यायां पथिकः कश्चित्समागच्छ
ति भारत॥ पादशौचासनैः प्रहूः स्वागतो कृत्वा च पूजयेत॥१८॥ तनभ्यात्मप्रदानेन स्नापनेन च पार्थिव। दिवानिशौच वि
मृ रोगो यदेतं पानकं भवेत॥१९॥ तदेतावपृगगांपुंसां सर्वेहं तस्मृ श्लोगते॥ गच्छेच्छुप्याम स्मृति नामपि दारुमर्यान्तप॥
२०॥ नाविशालां नता भग्नां नामसमां मतिनां तव॥ नवाजंनृमर्यांत्रा प्यां समातिष्ठेदनापदि॥२१॥ प्राकांदिशि शिरः
शास्तं पाम्पायाम पिमपते॥ सार्वं तस्वपतां पुंसां विपरीतं तु रोगदम्॥२२॥ स्नतावुपगमः शास्तः सत्वां हावनीपते॥ पू
र्णा सर्वेवभ मेकाले पुत्रार्थी सुरात्रिषु॥२३॥ नचास्नातां स्त्रियं गच्छेन्नार्त्तिंलीना रजस्वलाम्॥ नानिष्टां वैन कुपितां ना
शस्तां नवरोगिणीम्॥२४॥ नादक्षिणां नान्यकामां नाकामां नान्ययोषितम्॥ क्षुधामामतानभुक्तां च स्वयं चैभिर्गुणैर्यु
र्युतः॥२५॥ स्नातः सुगंधधृग्धृष्टो नाध्मातः क्षुधितोऽपि वा॥ सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत॥२६॥ चतु
र्दश्यां तथाष्टम्यां पंचदश्यां च पर्वसु॥ तैलाभ्यंगं तथा भोगं योषितश्च विवर्जयेत॥२७॥ क्षुरकर्म तिथावंते चह्रीसं
भोगे च भारत॥ स्नायीत चैलवान्स्नातः कटभूमिमुपेत्य च॥२८॥ गुरोः पतिव्रतानां च तथा यज्ञतपस्विनाम्॥ परिवा

कष्ठम.मिम १

॥ भविषु ॥
॥ ३२८ ॥

दं न कुर्यात्परिहासेऽपि भारत ॥२९॥ युगपज्ज्वलमग्निं च विभयान्न विचक्षणः ॥ गुरुं देवान्न तिष्ठन्वा न च पादौ प्रसा
रयेत् ॥३०॥ नाचक्षीत धयन्तीं गां जलं नाञ्जलिना पिबेत् ॥ वातातपौ न सेवेत भग्नपात्रं च वर्जयेत् ॥३१॥ दारुसंघापेन्न
नैकवः सर्वदैवं धनमन्नमरी ॥ भीताभ्यागतनकृत्वा युः स्वर्गमस्याप्यथ फलम् ॥३२॥ नोर्ध्वं नृपतेन द्वारं निरीक्ष्य पर्वदे
ल्वरः ॥ युगमात्रं महीं दृष्ट्वा नरो गच्छेद्विलोकयन् ॥३३॥ शौचाहेत्वपि शौ पांभ्व नरूपा तस्या यो निरस्यति ॥ तस्य धर्मार्थ
कामानां हानिर्नालापि जायते ॥३४॥ वृथा मांसं न लोदेत पृष्ठमांसं तथैव च ॥ आक्रोशं च विवादं च पैशून्यं च वि
वर्जयेत् ॥३५॥ संयावं कृसरं मांसं शष्कुलीं पायसं तथा ॥ आत्मार्थं न प्रकुर्वीत देवतानां प्रकल्पयेत् ॥३६॥ अजाश्व
नावकर्षेत नावहिर्धारयेन्निव ॥ रक्तमाल्यं न धार्यं स्यात् पुष्पं फलं धार्यं नृपण्डितैः ॥३७॥ वर्जयित्वा तु कमलं तथा कुवल
यं विभो ॥ रक्तं शिरसि धार्यं च तथा वान्येयमित्यपि ॥३८॥ काञ्चनीयापि या माला सा न दुष्यति कर्हिचित् ॥ सम्यदेव
भवेत्तासः शायनी चेन्नरोत्तम ॥३९॥ सन्ध्यार्चा च देवानामन्या शार्यसभासु च ॥ पिप्पलं च वटं चैव शीर्णं श्लेष्मातकं तथा ॥
४०॥ उदुम्बरं न खादेत भवार्थी पुरुषोत्तम ॥ पतितैर्भ्र कथां नैव छेदनं वापि वर्जयेत् ॥४१॥ पतितः स्यान्नरो राजन्स्त
निते तु समाचरन् ॥ वृक्षोज्ज्ञानि तथा मित्रो दरिद्रो यो मदेदिह ॥४२॥ गृहे वासं स्थापितस्तते गृहवृद्धिमभीप्सता ॥

328

॥ एनः ॥
॥ ३२८ ॥

गन्हेणाराधनाधन्याः शुक्लाम्बसहस्रादिकाः ॥ ४३ ॥ भवन्ति तेन तथा पापात्मनां वै निलयाधिका ॥ आज्ञोभ्याचार्दनं दी
ण्णः शाद्दर्शीमधुसर्पिषी ॥ ४४ ॥ जलाग्नीचैव नहि भयाद्दहेति स्म मिति स्थिति ॥ धनुर्वेदेच सततं यत्नः कार्यो नराधिप
४५ ॥ हस्तिपृष्ठेऽश्वपृष्ठे रथचर्यास्वेव हि ॥ यत्नवानभवद्राजेन्द्र नयवान् सुखमेधते ॥ ४६ ॥ राज्ञा पालनयुक्तश्च न क्षां
न्तिं तमते नय ॥ यज्ञशास्त्रं च विज्ञाय शब्दशास्त्रं च भारत ॥ ४७ ॥ गान्धर्वशास्त्रं विज्ञेयं कलाश्चेयाश्च भारत ॥ पुराणमि
तिहासं च तथाख्यानानि यानि च ॥ ४८ ॥ एषते लक्षणोद्देश आचारस्य प्रकीर्त्तितः ॥ शोभाश्च वेया न्न्रेभाः सत्याहार्या
नराधिप ॥ ४९ ॥ आचारो भवति जनन आचारः कीर्तिवर्धनः ॥ आचाराद्वर्धते ह्यायुराचारो हन्त्यलक्षणम ॥ ५० ॥ आ
गमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते ॥ आचारः प्रभवो धर्म आचाराद्वर्धते धनम ॥ ५१ ॥ प्राप्यं यशस्यमायुष्यं स्वर्ग्यं
स्वस्त्ययनं महत ॥ सर्ववर्णानुकम्पार्थं मयैतत्समुदाहृतम ॥ ५२ ॥ आचारमेवं नरपुङ्गव सेवमानो धर्मार्थकामफ
लदो भवतीह पुंसां ॥ तस्मात्त्वदैव नितु षा गहि ते नराज श्रेष्ठाज्ञो दिनोत्पन्न दिनं परिपालनीयः ॥ १५३ ॥ ॥ इति श्रीभवि
ष्यमहापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे सदाचारधर्मवर्णनं नाम पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५
॥ ॥ नारद उवाच ॥ दीर्घायुरारोग्यकुलाभिवृद्धि युक्तः पुमान्नेनगुणान्वितः स्यात ॥ सुकुम्भकुजन्मनियेन सम्यग्व्रतम

॥ भवि ॥
॥ ३२९ ॥

मधुरिताहिंडमौले ॥१ ॥श्रीभगवानुवाच ॥ त्वयापृष्टमिदंसम्यगक्षय्यकारकंनृप ॥ रहस्यंतेप्रवक्ष्यामियत्पु
राणविदोविदुः ॥२ ॥रोहिणीचंद्रशयनंनामव्रतमिहोत्तमम् ॥ तस्मिन्नारायणस्यार्चामर्च्चयेदिंदुनामभिः ॥३ ॥यदा
सोमदिनेशुक्लाभवेत्पंचदशीक्वचित् ॥ अथवाब्रह्मनक्षत्रंपौर्णमास्यांप्रजायते ॥४ ॥तदास्नानंनरःकुर्यात्पंचगव्येनस
र्षपैः ॥ आप्यायस्वेतिचजपेद्विद्वानष्टशतंपुनः ॥५ ॥शूद्रोऽपिपरयाभक्त्यापाषंडालापवर्जितः ॥ सोमायवरदायाथ
विष्णवेचनमोनमः ॥६ ॥कृतजप्यःस्वभवनमागत्यमधुसूदनम् ॥ पूजयेत्फलपुष्पैश्चसोमनामानिकीर्त्तयेत् ॥
७ ॥सोमायशांतायनमोऽस्तुपादावनंतधाम्नेतिचजानुजंघे ॥ ऊरुद्वयंचापिजलोदरायसंपूजयेन्मेढ्रमनंगधाम्ने ॥८
नमोनमःकामसुखप्रदायकटिःशशांकस्यसमर्चनीया ॥ तथोदरंचाप्यमृतोदरायनाभिःसुपद्माधिविलोचनाय ॥
९ ॥नमोऽस्तुचंद्रायकृवक्षःप्रपूज्यंहनुर्द्विजानामधिपायपूज्या ॥ आस्यंनमश्चंडमसेऽभिपूज्यमोष्ठौकुमुद्वंतवनप्रियाय ॥
१० ॥नासाचनाथायवनौषधीनामानंददेवायपुनर्भ्रुवौच ॥ नेत्रद्वयंनीलकुमुत्प्रियायइंदीवरव्यासकरायशौ
रेः ॥११ ॥ नमःसमस्ताध्वरवंदितायकर्णद्वयंदैत्यनिषूदनाय ॥ ललाटमिंदोरुदधिप्रियायकेशाःसुषुम्नाधिपतेःप्र
पूज्याः ॥१२ ॥शिरःशशांकायनमोमुरारेर्विश्वेश्वरायेतिनमःकिरीटम् ॥ पद्मप्रियेरोहिणितेनामलक्ष्मीसौभाग्यसौ

॥ रामः ॥
॥ ३२९ ॥

329

स्त्वामनन्तनारकायै ॥१३॥ देवींचसंपूज्यसुगंधपुष्पैर्नैवेद्यधूपादिभिरिंदुपत्नीम् ॥ प्रसुप्यभूमौपुनरुत्थितेनस्ना
त्वाचविप्रायहविष्ययुक्तः ॥१४॥ देयःप्रभातेसहिरण्यवारिकुंभोनमःपापविनाशनाय ॥ संप्राश्यगोमूत्रममांसमन्न
मक्षारमष्टावथविंशतिंच ॥१५॥ ग्रासान्पयःसर्पियुतानुपोष्यभुक्त्वेतिहासंशृणुयान्मुहूर्त्तम ॥ कदंबनीलोत्पलके
तकानिजातीसरोजंशतपत्रिकाच ॥१६॥ अम्लानकुब्जान्यथसिंदुवारंपुष्पंपुनर्नारदमल्लिकावा ॥ शुक्लंचविष्णोःकरवीर
पुष्पंश्रीचंपकंचंद्रमसेप्रदेयम् ॥१७॥ श्रावणादिषुमासेषुक्रमादेतानिसर्वदा ॥ यस्मिन्मासेव्रतादिःस्यात्तत्पुष्पैरर्च
येद्धरिम् ॥१८॥ एवंसंवत्सरंयावदुपोष्यविधिवन्नरः ॥ व्रतांतेशयनंदद्याद्दर्पणोपस्करान्विता ॥१९॥ रोहिणीचं
द्रमिथुनंकारयित्वातुकांचनम ॥ चंद्रःषडंगुलःकार्योरोहिणीचतुरंगुला ॥२०॥ मुक्ताफलाष्टकयुतंसितनेत्रपटान्वित
म ॥ क्षीरकुंभोपरिपुनःकांस्यपात्राक्षतान्वितम ॥२१॥ दद्यान्मंत्रेणपूर्वाह्णेशालीक्षुफलसंयुतम ॥ श्वेतामथ
सुवर्णास्यांरौप्यखुरैःसमन्विताम् ॥२२॥ सवस्त्रभाजनांधेनुंतथाशंखंचभाजनम ॥ भूषयेद्द्विजदांपत्यमलं
कृत्यगुणान्वितम ॥२३॥ चंद्रोयंद्विजरूपेणसभार्यइतिकल्पयेत ॥ यथानरोहिणीकृष्णशयनंत्यज्यगच्छति ॥
२४ ॥ सोमरूपस्यतेतद्वन्माभेदोस्तुमूर्त्तिभिः ॥ यथात्वमेवसर्वेषांपरमानंदमुक्तिदः ॥ २५ ॥ भुक्तिर्मुक्तिस्तथा

१ वंशे २ मयापि चार्थतत्त्वेन ३ वेदवेदाङ्गसंयुतम्

॥ भविष्य ॥

॥ ३३० ॥

भक्तिस्त्वयि पृष्टेऽस्मि हे नृप ॥ इति संसारभीतस्य मुक्तिकामस्य चानघ ॥ २६ ॥ एषारोग्यावहामेतद्विधायकमनुत्त
मम् ॥ इदमेव विहङ्गानां सर्वदावश्यं गते ॥ २७ ॥ त्रैलोक्याधिपतिर्भूत्वा यावत्कल्पशतत्रयम् ॥ वंशलोकमवाप्नोति पुन
रावृत्तिदुर्लभम् ॥ २८ ॥ नारी वा यो हि लीवंशशयनं यामसमाचरेत् ॥ साऽपि तत्फलमाप्नोति पुनरावृत्तिदुर्लभम् ॥ २९ ॥ इ
ति पठति शृणोति वा य इत्थं मधुमथनार्चनविधिं कीर्तनेन ॥ मतिमपि वदतीति सोऽपि धीरैर्भवनगतः परिपूज्यतेऽम
रौघैः ॥ ३० ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि श्रीकृष्णयुधिष्ठिरसंवादे नारदमहेश्वरसंवादे करोहिणी
वंशशयनव्रतवर्णनं नाम षडधिकशततमोऽध्यायः ॥ २०६ ॥ श्रीकृष्ण उवाच ॥ श्रुतं दानमथो राजंस्त्वया धर्माः प्रकाशि
ताः ॥ धर्ममूलं ततश्चेदं तस्मात्कर्मपरो भव ॥ १ ॥ ज्ञानतोऽपि मया पार्थ कामार्थौ न प्रकाशितौ ॥ यतः स्वयं प्रवर्त्तोत्र लोकः
किमनुवर्ण्यते ॥ २ ॥ कामितो वर्णयन्कामान् स्त्रीभिर्लुब्धस्य वर्णयन् ॥ नरः किं फलमाप्नोति कूपेऽन्धमिव पातयन् ॥ ३ ॥ भवि
ष्योत्तरमेतत्ते कथितं पाण्डुनन्दन ॥ सदाचारवतां पुंसां व्रतदानसमुच्चयः ॥ ४ ॥ यद्दृष्टमितिहासेषु पुराणेषु च भारत ॥ वेदवे
दाङ्गसंवृद्धं तत्सर्वमिह दर्शितम् ॥ ५ ॥ लोकवेदविरुद्धं यत्कथ्यते मनुजोत्तम ॥ न तत्रास्था प्रकर्त्तव्या विप्रलापो हि सज्जनः ॥
६ ॥ अतिस्नेहेन भवतो मयैव समुदाहृतम् ॥ ऋषीणां पुरतः पार्थ कुण्ठा भवति भारती ॥ ७ ॥ नैतत्प्रकाशनीयं हि दाम्भिका

संप्रदर्शितम् १

330

॥ रामः ॥

॥ ३३० ॥

पराभृतादये हृतिम २   कृकर्मविहिताय च १

यशठाय वा ॥ नास्तिकायात्ममनसे कृतघ्नाय प्रहताय च ॥ ८ ॥ साधुवृत्ताय दान्ताय सत्यार्जवरताय च । स्वनदाम्भाय मानं
हिंस्रभाग्यादयेदनिम ॥ ९ ॥ सामान्यमेतत्सर्वजनमानां वर्णाश्रमाणां च नरेन्द्र ॥ ख्यातं भविष्योत्तरं नाम धेयं म
या पुराणं नवसौहृदेन ॥ १० ॥ धर्मः स्वयं पार्थ भवाननित्य धर्मार्थसिद्धपरावरज्ञ ॥ पृष्टोऽस्म्यतो धर्ममहं च शक्ति
भक्त्येयमेतन्मृतरं जनस्य ॥ ११ ॥ यास्याम्यहं द्वारवतीं पुनश्च यत्नं समेष्यामि महोत्सवेच ॥ कालस्य सर्वं हि वशो विदि
त्वा नैतावृतापो भवतात्र कार्यः ॥ १२ ॥ इत्युक्त्वा वास्यान्तकामः प्रहृष्टः संपूजितः पाण्डुसुतैर्महात्मा ॥ पक्वासुहृज्ज्ञातिज
नैर्हि सर्वं जगाम विप्रास्सविप्रोपस्य कृष्णः ॥ १३ ॥ यथाज्ञात्वा स्यान्मुनिना भगवान्नैमिषेषुः पृष्टः किलैनां मुदा चचार कारम्:
कृष्णोन पाण्डुतनयस्य नयस्मादिदं व्यासेन तत्कृतं महामुनिपुङ्गवेन ॥ १४ ॥ जयति पराशरसूनुः सत्यवतीहृदयनन्द
नो व्यासः । यस्यास्यकमलगलितं वाङ्मयमधु पुण्यं जगत्पिबति ॥ १५ ॥ ॥ इति श्रीभविष्ये महापुराणे उत्तरपर्वणि
श्रीकृष्णयुधिष्ठिरसंवादे समाप्तिवर्णनं श्रीकृष्णस्य द्वारकां प्रतिगमनवर्णनं नाम सप्ताधिकद्विशततमोऽध्यायः ॥
२०७ ॥ ॥ अथ वृत्तान्ता ॥ आसनानुगमनं पूर्वं वृत्तान्तस्य समुद्भवः ॥ मायाचवैलवी यात्रा त्वं सारेदोषकीर्तनम् ॥ १ ॥
पापभेदस्तनतत्संख्या कर्मभाग्यविनिर्णयः । शंकट व्रतमाहात्म्यं तिलकव्रतकीर्तनम् ॥ २ ॥ अशोककरवीरात्वाद्व्रतं

१ भविष्यम्   २ अष्टमी वृत्तान्ताः इति पुस्तकद्वये पाठः   ३ संकट व्रतमाहात्म्यम्

मेघपालीव्रतं तथा ६ विष्णुसप्तमी तथा ७ फलसप्तमी ८ वामलाव्रत·९०१·

४ अशून्यशयनं तथा·१

तस्माच्चकोकिलव्रतम् । बृहत्तपोव्रतं नाम रुद्रोपोषणमेव च ॥ ३ ॥ द्वितीयाव्रतमाहात्म्यमभ्स्नशयनं तथा । कामाख्यातृ
तीया च मेघपालीव्रतं तथा ॥ ४ ॥ पंचाग्निसाधनारम्भा तृतीयाव्रतमुत्तमम् ॥ त्रिरात्रं गोष्पदं नाम हरिकालीव्रतं तथा·
५ ॥ ललिताख्यतृतीया च योगाख्या च तथा परा ॥ उमामहेश्वरं नाम तथा रंभातृतीयकम् ॥ ६ ॥ सौभाग्याख्यतृती
या च आर्द्रानंदकरी तथा ॥ चैत्रे भाद्रपदे माघे तृतीयाव्रतमुच्यते ॥ ७ ॥ अनंतरी तृतीया च गणनाथादि व्रतं तथा ॥ सा
रस्वतव्रतं नाम पंचमीव्रतमुच्यते ॥ ८ ॥ तथा श्रीपंचमी नाम षष्ठीशोकप्रणाशिनी ॥ फलषष्ठी च मंदारषष्ठीव्रतम
थोच्यते ॥ ९ ॥ ललिताव्रतषष्ठी च षष्ठी कार्त्तिकसंज्ञिता ॥ महातपः सप्तमी च विमुक्ता सप्तमी तथा ॥ १० ॥ आदित्यमं
डविधिस्त्वयोदशानिसप्तमी ॥ कृकवाकुपूर्वंगा च तथैवाभयसप्तमी ॥ ११ ॥ कल्याणसप्तमी नाम शर्करासप्तमीव्रत
म् ॥ सप्तमी कमलाख्या च तथा शुभसप्तमी ॥ १२ ॥ स्नपनव्रतसप्तम्यौ तथैवाचलसप्तमी ॥ बुधाष्टमीव्रतं नाम त
था जन्माष्टमीव्रतम् ॥ १३ ॥ दूर्वाकृष्णाष्टमी प्रोक्ताऽनघाव्रतमष्टमी ॥ अष्टमार्काष्टमी चाथश्री वृक्षनवमीव्रतम् ॥
१४ ॥ ध्वजाख्यानवमी चैव उल्काख्यानवमी तथा ॥ दशावताररव्रतकं तथा चाद्यदशमीव्रतम् ॥ १५ ॥ तोह्रिखीडहरिद्रांभ
व्रलसर्पाविषयोगकम् ॥ गोवत्सद्वादशी नाम व्रतमुक्तं ततः परम् ॥ १६ ॥ नीराजनद्वादशी च भीष्मपंचकमेव च· ॥ म

ततयाव्रतम रआवनीव्रतकं च·

331

२ मडाव्रतम

ष्टिकाख्याद्वादशीचभीमद्वादशिकोत्तमम ॥ १७ ॥ श्रवणाद्वादशीनामसंप्राप्तिद्वादशीव्रतम् । गोविंदद्वादशीनाम
व्रतमुक्तंततःपरम् ॥ १८ ॥ अखंडद्वादशीनामतिलद्वादश्याततःपरम् ॥ सुकृतद्वादशीनामधरणीव्रतमेवच ॥ १९ ॥
विशोकद्वादशीनामविभूतिद्वादशीव्रतम् ॥ उष्पर्शद्वादशीचैवद्वादशीश्रवणर्क्षगा ॥ २० ॥ अनंगद्वादशीचैवअंक
पादव्रतंतथा ॥ निम्बार्ककरवीराख्ययमादर्शीत्रयोदशी ॥ अनंगद्वादशीचापिपालिरम्भाव्रतेतथा ॥ २१ ॥ चतुर्दशीव्र
तंप्रोक्तंततोऽनंतचतुर्दशी ॥ श्रावणीव्रतनक्तंचचतुर्दश्यष्टमीदिने ॥ २२ ॥ व्रतंशिवचतुर्दश्यांफलत्यागचतुर्दशी ॥ वैशा
खीकार्तिकीमाघीव्रतमेतदनंतरम् ॥ २३ ॥ कार्तिक्यांकृत्तिकायोगेकृत्तिकाव्रतमीरितम् ॥ फाल्गुनेपौर्णिमायांतुव्रतं
पूर्णमनोरथम् ॥ २४ ॥ अशोकपूर्णिमानामअनंतव्रतमेवच ॥ व्रतंहिसांभरायण्यंनक्षत्रपुरुषव्रतम् ॥ २५ ॥ शिवनक्ष
त्रपुरुषंसंपूर्णायेनमुच्यते ॥ कामदानव्रतंनामवेश्याकलिविधिरेवच ॥ २६ ॥ आदित्यस्याभिषेकेनकर्मसंज्ञानस्नापनेफलम् ॥ म
हाव्रतमहास्नानपौर्णंवचन्द्रार्कमेवच ॥ २७ ॥ अर्घःशुक्रबृहस्पत्योःपंचाग्निव्रतानिच ॥ माघस्नानंनित्यस्नानंरुद्रस्नान
विधिस्तथा ॥ २८ ॥ चन्द्रार्कग्रहणेस्नानंविधिश्चान्यास्तनेतथा ॥ वापीकूपतडागानामुत्सर्गोवृक्षयाजनम् ॥ २९ ॥ देवपू
जादीपदानवृषोत्सर्गविधिस्तथा ॥ फाल्गुनेमत्स्यचक्रनामतथास्यःसदत्तोत्सवः ॥ ३० ॥ मलमासनावश्यावलत्पोरक्षावेधवि

धिस्तथा ॥ विधिस्तथानवम्याकृतथाइंद्रमहोत्सवः ॥ ३१ ॥ दीपालिकायांनृहोमोलक्षहोमविधिस्तथा ॥ कोटिहोमोम-
हाशांतिर्गणनाथस्यशांतिका ॥ ३२ ॥ तथानक्षत्रहोमोथगोदानविधिरेवच ॥ गुडधेनुर्घृतधेनुस्तिलधेनुर्व्रतंतथा ॥ ३३ ॥ जल-
धेनुर्विधिःप्रोक्तोलवणस्यतथापरा ॥ धेनुःकार्पासमंज्ञात्वानवनीतस्यचापरा ॥ सुवर्णधेनुश्चतथादेवकार्यचिकीर्षुभिः ॥ ३४
इतिश्रीभविष्येमहापुराणेउत्तरपर्वणिश्रीकृष्णयुधिष्ठिरसंवादेसंक्षिप्तानुक्रमणिकाकथनंनामाष्टोत्तरद्विशततमोऽध्यायः
२०८ ॥ समाप्तम ॥ ॥ स्वस्तिश्रीसम्वत १९९० सालमिति आधिकज्येष्ठकृष्ण १० रुतादिने लिखितं·ललितापट्टनेनगरविवासि-
न·श्रीमहाबौधोपाध्याक·श्रीमहेश्वरानंदेन लिखितंसमर्पिताशुभम ॥ ॥ शुभम ॥ ग्रंथसंख्या ८९५८

332

भ·पु·न
४०८

रामः
४०८